नमो नमो निम्मल दंसणस्स
पंचम गणधर श्री सुधर्मा स्वामिने नमः

४३ उत्तराध्ययनानि-मूलसूत्रम् -१-

सटीकं

[चतुर्थं मूलसूत्रं]

[पूर्वोद्धृत्-जिनभाषित-ऋषि प्रणित मूलम्+भद्रबाहुस्वामि रचितानिर्युक्तिः + शान्त्याचार्य विरचिता वृत्तिः]

शिवदाः सन्तु तीर्थेशाः, विघ्नसङ्घातघातिनः ।
गवकृपोद्भूतौ येषां, वाग् वज्रायते नृणाम् ॥१॥
समस्तवस्तुविस्तारे, व्यासधौतैलवज्जले ।
जीयात् श्रीशासनं जैनं, श्रीदीपोद्दीपिवर्द्धनम् ॥२॥
यत्प्रभावादवाप्यन्ते, पदार्थाः कल्पनां विना ।
सा देवी संविदे भूयः स्यादस्तकल्पलतोपमा ॥३॥
व्याख्याकृतामखिलशास्त्रविशारदानां, सूत्र्यग्रवे यकधियां शिवमस्तु तेषाम् ।
यैरत्र गाढतरगूढविचित्रसूत्रग्रन्थिर्विभिद्य विहितोऽद्य ममापि गम्यः ॥४॥
अध्ययनामागेषां यदपि कृताक्षूर्णिवृत्तयः कृतिभिः ।
तदपि प्रवचनभक्तिस्त्वरयति मामत्र वृत्तिविधौ ॥५॥

वृ.इह खलु सकलकल्याणनिबन्धनं जिनागममवाप्य विवेकिनैवं विवेचनीयं यदुत महार्थोऽयं मनोरथानामप्यपथभूतो भूरिजन्मान्तरोपचितपुण्यपरिपाकतो महानिधिरिव मयाऽधिगतः, तथाहि महति संसारमण्डलेऽस्मिन् मानसादिदण्डैरभिहन्यमानाः कष्टेनेष्टविशिष्टार्थां महापुरीमिव मनुजगतिमनुप्रविशन्ति जन्तवः, अनुप्रविश्यापि चास्यामूर्ध्वरथिका इवाकृतसुकृतसम्भारा निरीक्षितुमपि नैनं क्षमन्ते, किमङ्ग पुनरवाप्तुमिति ?, एतदवाप्तौ सर्वथा कृतार्थोऽस्मि, सम्भवति चास्यां स्वोपकारवत्परोपकारेऽपि शक्तिरिति नेदानीं युक्ता कदर्यता, किन्तु ?, भवितव्यमुदाराशयेन, परोपकारपूर्विकैव च स्वोपकारप्रवृत्तिरुदाराशयतां ख्यापयतीति परोपकार एवादितः प्रवर्तितुमुचितम् । सन्ति चास्मिन् महितमाहात्म्याः समीहितसम्पादकाश्च मणय इव चरणकरणादिगोचराचाराद्यङ्गानुयोगाः, न चैत इदानीं सम्यग्दर्शनादिहेतुं मिथ्यात्वादिपिशाचशमनं धर्मकथात्मकोत्तराध्ययनायोगं रक्षाविधानमिवापहाय स्वयं ग्रहीतुमन्यस्मै वा दातुं युज्यन्ते, इत्यारभ्यत उत्तराध्ययनानुयोगः -तत्र च न तथाविधफलादिपरिज्ञानविकला प्रेक्षावतां प्रवृत्तिः, तस्यास्तद्व्यापकत्वाद्, व्याप्यस्य च व्यापकाविनाभावित्वात्, अतः प्रेक्षावत्प्रवृत्त्यङ्गत्वात् फलयोगमङ्गलसमुदायार्थानुयोगद्वारतद्भेदनिरुक्तक्रमप्रयोजनानि वाच्यानि । यच्च शब्दस्या-

प्रमाणत्वमभिधाय तदभिधानस्यानर्थकत्वमिह केश्चिदुक्तं, तदसाधु, शब्दस्याप्रमाणत्वे तत्प्रामाण्यमूलत्वेन सकल-व्यवहाराणामुच्छेदप्रसङ्गात्, उक्तं हि-

"लोकिकव्यवहारोऽपि, यस्मिन्न व्यवतिष्ठते ।
तत्र साधुत्वविज्ञानं, व्याकोहोपनिबन्धनम् ॥" इति

तथा च शास्त्रादौ फलादिप्रतिपादिका पूर्वाचार्यगाथा-

"तस्स फलजोगमंगलसमुदायत्था तहेव दारा हं ।
तब्भेयविरुत्तिक्कमपयोयणाइं च वच्चाइं ॥"

फलाभिलाषिणां च सकलप्रेक्षावतां प्रवृत्तिरिति प्रथमतः फलस्याभिधानं, तत्रापि किमिदं सम्बद्धमुतासम्बद्धमिति विचारत एव विपश्चितः प्रवर्तन्त इति तदनु योगस्य, इत्यादि क्रमप्रयोजनं सर्वत्र योज्यं, तत्र फलं कर्तुः श्रोतुश्चाव्यवहितं विनेयानुग्रहो यथावदर्थावबोधश्च, व्यवहितं पुनरुभयोरपि तदुत्तरोत्तरगुणप्रकर्षप्राप्त्याऽपवर्गावाप्तिरिति । योगः सम्बन्धः, स च हेतुतः फलतश्च, तत्र हेतुत उत्तराध्ययनानुयोगस्य साक्षात्कृतधर्माणः सूत्रकृत एव यथास्वं प्रणेतारः ततस्तदवबोधितादर्थात्तीर्थकृतः, ततोऽपि गणधरशास्त्रावद्धात् भगवान् भद्रबाहुः ततो भाष्यकृतस्ततश्चूर्णिकृतः ततोऽपि वृत्तिकृतो यावदस्मद्गुरव इति गुरुपर्वक्रमलक्षणः । फलतस्तूपायोपेयभावरूपः अभिहितफलस्योपेयत्वात् प्रस्तुतानुयोगस्य च तदुपायत्वादिति । मध्नातिविनाशयति शास्त्रपारगमनविघ्नान् गमयति-प्रापयति शास्त्रस्थैर्यं लालयति च श्लेषयति तदेव शिष्यप्रशिष्यपरम्परयामिति मङ्गलं, यद्वा मन्यन्ते अनापायसिद्धिं गायन्ति प्रबन्धप्रतिष्ठितिं लान्ति षाऽव्यवच्छिन्नसन्तानाः शिष्यप्रशिष्यादयः शास्त्रमस्मिन्निति मङ्गलम्, आदिमध्यावसानवर्तिनस्तस्योक्तरूपार्थप्रसाधकत्वेन प्रसिद्धत्वात्, उक्तं हि-

"तं मंगलमाईए मज्झे पज्जंतए य सत्थस्स ।
पढमं सत्थस्साविग्घपारगमनाय निद्दिट्ठं ॥१॥
तस्सेव ठ थिज्जत्थं मज्झिमयं अंतिमं च तस्सेव ।
अव्वोच्छित्तिनिमित्तं सिस्सपसिस्साइवंसस्स ॥२॥"

तच्च नामादिचतुर्भेदं, तत्र मङ्गलमिति नामैव नाममङ्गलं, स्थापनामङ्गलं मङ्गलकारः मङ्गलानि च दर्पणादीनि, यथोक्तम्-

"दप्पणभद्दासण वद्धमाण वरकलसमच्छसिरिवच्छ ।
सोच्छिय नंदावत्ता लिहिया अट्ठट्ठ मंगलगा ॥" इति

द्रव्यभावमङ्गले त्वावश्यकभाष्यानुसारतोऽवबोद्धव्ये । तत्र चेह भावमङ्गलेनाधिकारः, तच्च कृतमेव, नन्दिरूपत्वात् तस्य, नन्दिव्याख्यानपूर्वकत्वाच्च सकलानुयोगस्य, अपवादतः उत्क्रमेणापि यदाऽनुयोगस्तदा भावत आदिमङ्गलं 'संजोगा विप्पमुक्कस्स अनगारस्स'त्ति अनगारग्रहणं, मध्यमङ्गलं, 'कपिलेन नयरे राया' इत्यादिनाऽनगारगुणवर्णनम्, अन्त्यमङ्गलम् 'इइ पाउकरे बुद्धे' इत्यादिना बुद्धाद्यभिधानं । समुदायो-वर्णपदवाक्यश्लोकाध्ययनकदम्बकात्मकश्रुतस्कन्धरूपतस्याभिधेयोऽर्थः समुदायार्थः, स चेह धर्मकथात्मकः, विशेषतस्त्वेनं 'पढमे विनओ' इत्यादिना निर्युक्तिकार एव वक्ष्यति । द्वाराणीति प्रक्रमादनुयोगद्वाराणि, तत्र

चानुगतमनुरूपं वा श्रुतस्य स्वेनाभिधेयेन योजनं--सम्बन्धनं तस्मिन् वाऽनुरूपोऽनुकूलो वा योगः श्रुतस्यैवाभिधानव्यापारोऽनुयोगः, तदुक्तम्-

"अनुजोयणमनुजोगो सुयस्स नियएण जमभिधेयेणं।
ववारो वा जोगो जो अनुरूवोऽनुकूलो वा॥"

तस्य द्वाराणि - उपक्रमादीनि अनुयोगद्वाराणि तानि तद्भेदनिरुक्तिक्रमप्रयोजनानि च 'तत्थ-ज्झयणं पढम' मित्यत्र वक्ष्यामः। आह प्रकृतोऽयमुत्तराध्ययनानुयोगः, तत्र किमेतान्युत्तरा-ध्ययनान्यङ्गमङ्गानि श्रुतस्कन्धः श्रुतस्कन्धा अध्ययनमध्ययनानि उद्देशक उद्देशकाः ?, उच्यते, नाङ्गं नाङ्गानि, श्रुतस्कन्धो न श्रुतस्कन्धाः, नाध्ययनमध्ययनानि, नोद्देशको नोद्देशका इति। अस्य च नामनिक्षेपे 'उत्तराध्ययनश्रुतस्कन्ध' इति नाम, तत्रोत्तरं निक्षेप्तव्यमध्ययनं श्रुतस्कन्धश्च, तत्रोत्तरनिक्षेपाभिधानायाह भगवान् निर्युक्तिकारः-

नि.[१] नामं ठवणा दविए खित्त दिसा तावखित्त पन्नवए।
पडुकालसंचयपहाणनाणकमगणणओ भावे॥

वृ.- इह च सुपो यत्रादर्शने तत्र सूत्रत्वेन छान्दसत्वात् लुक्, तथोत्तरनिक्षेपप्रस्तावात् सूचक-त्वात्सूत्रस्य 'कमउत्तरेण पगय' मित्युत्तरश्रवणाच्च 'नामं'ति नामोत्तरं 'ठवणं'ति स्थापनोत्तर मित्याद्यभिलापः कार्यः। तत्र नामोत्तरमिति नामैव यस्य वा जीवादेरुत्तरमिति नाम क्रियते, स्थापनोत्तरमक्षादि, उत्तरमिति वर्णविन्यासो वा, द्रव्योत्तरमागमतो ज्ञाताऽनुपयुक्तो नोआगमतो ज्ञशरीरभव्यशरीरे तद्व्यतिरिक्तं च, तत्र तद्व्यतिरिक्तं त्रिधा-सचित्ताचित्तमिश्रभेदेन, तत्र सचित्तं पितुः पुत्रः, अचित्तं क्षीरात् दधि, मिश्रं जननीशरीरतो रोमादिमदपत्यम्, इह च द्रव्यपर्यायोभया-त्मकत्वेऽपि वस्तुनो द्रव्यप्राधान्यविवक्षया पित्रादेरूर्ध्वभवनतश्च पुत्रादीनां द्रव्योत्तरत्वं भावनीयं, क्षेत्रोत्तरं मर्वाद्यपेक्षया यदुत्तरं, यथोत्तराः कुरवः, यद्वा पूर्वं शालिक्षेत्रं तदेव पश्चादिक्षुक्षेत्रं, दिगुत्तरमुत्तरा दिग्, दक्षिणादिगपेक्षत्वादस्य, तापक्षेत्रोत्तरं यत्तापादिगपेक्षयोत्तरमित्युच्यते, यथा-सर्वेषामुत्तरो मन्दरादिः, प्रज्ञोपकोत्तरं यत् प्रज्ञापकस्य वामं, प्रत्युत्तरमेकदिगवस्थितयोर्देवदत्त-यज्ञदत्तयोर्देवदत्तात् परो यज्ञदत्त उत्तरः, कालोत्तरः समया दावलिका आवलिकातो मुहूर्त-मित्यादि, सञ्चयोत्तरं यत्सञ्चयस्योपरि, यथा धान्यराशेः काष्ठं, प्रधानोत्तरमपि त्रिविधंसचित्ता-चित्तमिश्रभेदात्, सचित्तप्रधानोत्तरमपि त्रिधैव, तद्यथा-द्विपदं चतुष्पदमपदं च, तत्र द्विपदमनु-त्तरपुण्यप्रकृतितीर्थकरनामाद्यनुभवनतः तीर्थकरः, चतुष्पदमनन्यसाधारणशौर्यधैर्यादियोगतः सिंहः, अपदं रम्यत्वसुरसेव्यत्वादिभिर्जात्यजाम्बूनदादिमयो जम्बूद्वीपमध्यस्थिता सुदर्शना-जम्बूः, अचित्तमचिन्त्यमाहात्म्यमाहात्म्यश्चिन्तामणिः, मिश्रं तीर्थंकर एव गृहस्थावस्थायां सर्वा-लङ्कारालङ्कृतः, ज्ञानोत्तरं केवलज्ञानं, विलीनसकलावरणत्वेन समस्तवस्तुस्वभावाभासितया च, यद्वा श्रुतज्ञानं, तस्य स्वपरप्रकाशकत्वेन केवलादपि महर्द्धिकत्वात्, उक्तं च-

"सुयनाणं महिड्ढीयं, केवलं तयनंतरं।
अप्पाणो य परेसिं च, जम्हा तं परिभावनं॥"ति

क्रमोत्तरं क्रममाश्रित्य यद्भवति, तच्चतुर्विधं-द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतः परमाणोर्द्विप्रदेशिकः ततोऽपि त्रिप्रदेशिकः एवं यावदन्त्योऽनन्तप्रदेशिकः स्कन्धः, क्षेत्रत

एकप्रदेशावगाढात् द्विप्रदेशावगाढः ततोऽपि त्रिप्रदेशावगाढः एवं यावदवसानवर्त्यसङ्ख्येयप्रदेशावगाढः, कालत एकसमयस्थितेर्द्विसमयस्थितिः ततोऽपि त्रिसमयस्थितिः एवं यावदसङ्ख्येयसमयस्थितिः, भावत एकगुणकृष्णात् द्विगुणकृष्णः ततोऽपि त्रिगुणकृष्णः एवं यावदनन्तगुणकृष्णः, यतो वा क्षायोपशमिकादिभावादनन्तरं यः क्षायिकादिर्भवति, 'गणणओ'त्ति गणनात उत्तरमेककाद् द्विकस्ततोऽपि त्रिक एवं यावच्छीर्षप्रहेलिका, भावोत्तरं क्षायिको भावः, तस्य केवलज्ञानदर्शनाद्यात्मकत्वेन सकलौदयिकादिभावप्रधानत्वाद-

आह-एवमस्य प्रधानोत्तर एवान्तर्भावादयुक्तं भेदेनाभिधानं, यत्रैवमत्यल्पमिदमुच्यते, एवं हि नामादिचतुष्टय एव सर्वनिक्षेपाणामन्तर्भावात्तदेवाभिधेयं, तत इहान्यत्र च यन्नामादिचतुष्टयाधिकनिक्षेपाभिधानं तच्छिष्यमतिव्युत्पादनार्थं सामान्यविशेषोभयात्मकत्वख्यापनार्थं च सर्ववस्तूनामिति भावनीयमिति गाथार्थः ॥ इहानेकधोत्तराभिधानेऽपि क्रमोत्तरमेवाधिकरिष्यति, विषयज्ञाने च विषयी मुह्यानो भवति इति भव्यानो यत्रास्य सम्भवो यत्र चासम्भवो यत्र चोभयं तदेवाह-

नि.[२] जहन्नं सुत्तरं खलु उक्कोसं वा अनुत्तरं होइ ।
संसाइं उत्तराइं अनुत्तराइं च नेयाणि ॥

वृ. जघन्यं सोत्तरं 'खलु' अवधारणे, सोत्तरमेव 'उक्कोसे'ति उत्कृष्टं, वाशब्दस्यैवकारार्थस्य भिन्नक्रमत्वाद् अनुत्तरमेव भवति, 'शेषाणि' मध्यमानि 'उत्तराणि' इति अर्शआदित्वेनाजन्तत्वात् मतुबलोपाद्वोत्तरवन्ति अनुत्तराणि च ज्ञेयानि। द्रव्यक्रमोत्तरादीनि हि जघन्यान्येकप्रदेशिकादीनि उपरि द्विप्रदेशिकादिवस्त्वन्तराभावात् सोत्तराण्येव, तदपेक्षयैव तेषां जघन्यत्वात्, उत्कृष्टानि त्वनन्तानन्तप्रदेशिकादीन्यनुत्तराण्येव, तदुपरिवस्त्वन्तराभावाद, अन्योथोत्कृष्टत्वायोगात्, मध्यमानि तु द्विप्रदेशिकादीनि त्रिप्रदेशिकाद्यपेक्षया सोत्तराणि एकप्रदेशापेक्षया त्वनुत्तराणि, उपरितनवस्त्वपेक्षयैव सोत्तरत्वात् इति गाथार्थः ॥ उत्तरस्यानेकविधत्वेन येनात्र प्रकृतं तदाह-

नि.[३] क्रमउत्तरेण पगयं आयारस्सेव उवरिमाइं तु ।
तम्हा उ उत्तरा खलु अज्झयणा हुंति नायव्वा ॥

वृ. क्रमापेक्षमुत्तरं क्रमोत्तरं, शाकपार्थिवादित्वान्मध्यपदलोपी समासः, तेन प्रकृतम्-अधिकृतम्, इह च क्रमोत्तरेणेति भावतः क्रमोत्तरेण, एतानि हि श्रुतात्मकत्वेन क्षायोपशमिकभावरूपाणि तद्रूपस्यैवाऽऽचाराङ्गस्योपरि पठ्यमानत्वेनोत्तराणीत्युच्यन्ते, अत एवाह-'आयारस्सेव उवरिमाइं'ति एवकारो भिन्नक्रमः, ततश्चाचारस्योपर्येव-उत्तरकालमेव 'इमानी'ति हृदि विपरिवर्तमानतया प्रत्यक्षाणि, पठितवन्त इति गम्यते, 'तुः' विशेषणे, विशेषश्चायं यथाशय्यम्भवं यावदेष क्रमः, तदाऽऽरतस्तु दशवैकालिकोत्तरकालं पठ्यन्त इति, 'तम्हा उ'त्ति 'तुः' पूरणे, यस्मादेवञ्च नित्यमभिसम्बन्धः, ततो यस्मादाचारस्योपर्येवेमानि पठितवन्तस्तस्माद् 'उत्तराणि' उत्तरशब्दवाच्यानि, 'खलुः' वाक्यालङ्कारेऽवधारणे वा, तत उत्तराण्येव 'अध्ययनानि' विनयश्रुतादीनि भवन्ति 'ज्ञातव्यानि' अवबोद्धव्यानि, प्राकृतत्वाच्च लिङ्गव्यत्यय इति गाथार्थः ॥ आह-यद्याचारस्योपरि पठ्यमानत्वेनोत्तराण्यमूनि, तत्किं ? यत एवाचारस्य प्रसूतिरेषामपि तत एव अभिधेयमपि यदेव तस्य तदेवोतान्यथेति संशायापनोदायाह-

नि. [४] अंगप्पभवा जिनभासिया य पत्तेयबुद्धसंवाया ।
बंधे मुक्खे य कया छत्तीसं उत्तरज्झयणा ॥

वृ. अङ्गात् द्वादशविधात् प्रभवः उत्पत्तिर्येषामिति अङ्गप्रभवानि, यथा परीषहाध्ययनं,

"कम्मपयडिपुव्वे सत्तरसमे पाहुडंमि जं सुत्तं ।
सनयं सोदाहरणं तं चेव इहंपि नायव्वं ॥"

जिनभाषितानि यस्मादुत्पत्तिविकल्पतोऽध्ययनं, तस्मिन्नप्युत्पन्नकेवलेन भगवता महावीरेण प्रणीतं, यदुक्तम्-"तंनिम्माए भगवं सीसाणं देइ अनुसट्ठिं" इति, 'च:' समुच्चये, प्रत्येकबुद्धाश्च संवादश्च प्रत्येकबुद्धसंवादं तस्मादुत्पन्नानीति शेषः, तत्र प्रत्येकबुद्धाः-कपिलादयः तेभ्य उत्पन्नानि यथा कापिलीयाध्ययनं, वक्ष्यति हि-'धम्मद्दया गीयं' तत्र हि कपिलेनेति प्रक्रमः, संवादः-सङ्गतप्रश्नोत्तरवचनरूपस्तत उत्पन्नानि, यथा-केशिगौतमीयं, वक्ष्यति च-"गोतमकेसीओ य संवायसमुट्ठियं तु जम्हेय" मित्यादि ।

ननु स्थविरविरचितत्वात्तेषां तानि, यत आह चूर्णिकृत्-"सुने थेरेण अनागमो" इति नन्वध्ययनेऽप्युक्तम् "जस्स जेत्तिया सीसा उप्पत्तियाए वेणइयाए कम्मयाए परिणामियाए चउव्विहाए बुद्धीए उववेया तस्स तेत्तियाइं पइन्नगसहस्साइं" प्रकीर्णकानि चामूनि तत्कथं जिनदेशितत्वादि न विरुध्यते ?, उच्यते, तथास्थितानामेव जिनादिवचसामिह द्रव्यत्वेन तद्देशितत्वाद्युक्तमिति न विरोधः । बन्ध-आत्मकर्मणोरत्यन्तसंश्लेषस्तस्मिन्, मोक्षः तयोरेवाऽत्यन्तिकः पृथग्भावस्तस्मिंश्च कृतानि, कोऽभिप्रायः ?-यथा बन्धो भवति यथा च मोक्षस्तथा प्रदर्शकानि, तत्र बन्धे यथा-"आणाअनिद्देसकरे" मोक्षे यथा-"आणानिद्देसकरे" इति, आह्यां यथाक्रममविनयो विनयश्च प्रदर्श्यते, तत्राविनयो मिथ्यात्वाद्यविनाभूतत्वेन बन्धस्य विनयश्चान्तरपौरुषत्वेन मोक्षस्य कारणमिति तत्त्वतस्तौ यथा भवतस्तदेवोक्तं भवति, मोक्षप्राधान्येऽपि बन्धस्य प्रागुपादानमनादित्वोपदर्शनार्थं, यद्वा 'बंधे मोक्खे य' इति चशब्द एवकारार्थो भिन्नक्रमश्च, ततो बन्ध एव सति यो मोक्षस्तस्मिन् कृतानि, अनेनानादिमुक्तमतव्यवच्छेदश्च कृतः, तत्र हि मोक्षशब्दार्थानुपपत्तिः सकलानुष्ठानवैफल्यापत्तिश्च, किमेवं कतिचिदेव ?, नेत्याह-'षट्त्रिंशत्' षट्त्रिंशत्संख्यानि, कोऽर्थः ?-सर्वाणि उत्तराध्ययनानि इति गाथार्थः ॥ इत्थं प्रसङ्गत उक्तरूपं संशयमपाकृत्याध्ययननिक्षेपं विनेयानुग्रहाय तत्पर्यायनिक्षेपातिदेशं चाह

नि. [५] नामं ठवणज्झयणे दव्वज्झयणे य भावज्झयणे ।
एमेव य अज्झीणे आयज्झवणेवि तहेव ॥

वृ. 'नामं ठवणज्झयणे' इति प्रत्येकमध्ययनशब्दसम्बन्धान्नामाध्ययनं स्थापनाध्ययनं द्रव्याध्ययनं च भिन्नक्रमत्वाद् भावाध्ययनं च, तत्र नामस्थापने गतार्थे, द्रव्याध्ययनमागमतो ज्ञातानुपयुक्तः, नोआगमतो ज्ञशरीरभव्यशरीरे तद्व्यतिरिक्तं च पुस्तकादिन्यस्तं, भावाध्ययनमागमतो ज्ञातोपयुक्तः, नोआगमतस्तु प्रस्तुताध्ययनान्येव, आगमैकदेशत्वादेषाम् । एवं चाक्षीणमायः क्षपणाऽपि च तथैव, कोऽर्थः ?-अध्ययनवदेतान्यपि नामादिभेदभिन्नान्येव ज्ञेयानीति गाथार्थः ॥ साम्प्रतं नाम्नाध्ययनादीनि त्रीणि प्रसिद्धान्येवेति मन्यमानो निर्युक्तिकारो निरुक्तिद्वारेण नोआगमतो भावाध्ययनं व्याख्यातुमाह-

नि.[६] अज्झप्पस्साणयणं कम्मापं अवचओ उवचियाणं ।
अनुवचओ य नवाणं तम्हा अज्झयणमिच्छंति ॥

वृ. 'अज्झप्पस्स'त्ति सूत्रत्वादध्यात्ममात्मनि, कोऽर्थः ?-स्वस्वभावे, आनीयतेऽनेनेति आनयनं प्रस्तावादात्मनोऽध्ययनं, निरुक्तिविधिना चात्माकारनकारलोपः, कुत एतदित्याह-यतः 'कर्मणां' ज्ञानावरणीयादीनां नाम् 'अपचयः' चयापगमोऽभाव इत्यर्थः, 'उपचितानां' प्राग्बद्धानाम् 'अनुपचयश्च' अनुपचीयमानताऽनुपादानमितियावत्, 'नवानां' प्रत्यग्राणां, कोऽर्थः ?-प्राग्बद्धानाम्, एतदुपयुक्तस्येति गम्यते, उपसंहारमाह- तस्मात् प्राग्बद्धबध्यमान-कर्माभावेनाऽऽत्मनः स्वस्वभावानयनाद्धेतोः अध्ययनम् 'इच्छन्ति' अभ्युपगच्छन्ति, पूर्वसूरय इति गम्यते, यद्वाऽध्यात्ममिति रूढितो मनः, तच्च प्रस्तावात् शुभं, तस्याऽऽनयनमध्ययनम्, आनीयते ह्यनेन शुभं चेतः, अस्मिन् उपयुक्तस्य वैराग्यभावात्, शेषं प्राग्वत्, नवरं वैराग्यभावात् कर्मणामिति क्लिष्टानामिति गाथार्थः ॥ निरुक्त्यन्तरेणैतदेव व्याख्यातुमाह

नि.[७] अहिगम्मंति व अत्था अनेन अहियं व नयनमिच्छंति ।
अहियं व साहु गच्छइ तम्हा अज्झयणमिच्छंति ॥

वृ. 'अधिगम्यन्ते वा' परिच्छिद्यन्ते वा 'अर्थाः' जीवादयः अनेनाधिकं वा नयनं प्रापण-मर्थादात्मनि ज्ञानादीनामनेन इच्छन्ति, विद्वांस इति शेषः 'अधिकम्' अर्गलं शीघ्रतरमितियावत्, 'वा' सर्वत्र विकल्पार्थः, 'साधु'त्ति साध्नुवन्ति पौरुषेयीभिर्विशिष्टक्रियाभिरपवर्गमिति साधुः 'गच्छति' यात्यर्थान्मुक्तिम्, अनेनेत्यत्रापि योज्यते, यस्मादेवमेवं च ततः किमित्याह-तस्माद-ध्ययनमिच्छन्ति, निरुक्तविधिनाऽर्थनिर्देशपरत्वाद्वाऽस्य, अयतेरेतेर्वाऽधिपूर्वस्याध्ययनम्, इच्छन्तीति चाभिधानं सर्वत्र सूत्रार्थाबाधया व्याख्याविकल्पानां पूर्वाचार्यसम्मतत्वेनादुष्ट-त्वख्यापनार्थमिति गाथार्थः ॥ नामाक्षीणादित्रयं प्रतीतमेवेति दृष्टान्तद्वारेण भावाक्षीणमाह-

नि.[८] जह दीवा दीवसयं पइप्पए सो य दीप्पए दीवो ।
दीवसमा आयरिया अप्पं च परं च दीवंति ॥

वृ. यथा दीपाद्दीपशतं 'प्रदीप्यते' ज्वलति सोऽपि च दीप्यते दीपो, न पुनरन्यान्यदीपोत्प-त्तावपि क्षीयते, तथा किमित्याह-दीपसमा आचार्या 'दीप्यन्ते' समस्तशास्त्रार्थविनिश्चयेन स्वयं प्रकाशन्ते 'परं च' शिष्यं 'दीपयन्ति' शास्त्रार्थप्रकाशनशक्तियुक्तं कुर्वन्ति, इह च 'तात्स्थ्यात् तद्व्यपदेश' इत्याचार्यशब्देन श्रुतज्ञानमेवोक्तं, भावाक्षीणस्य प्रस्तुतत्वात्तस्यैव चाक्षयत्वसम्भ-वादिति गाथार्थः ॥ नामाऽऽद्यादयस्त्रयः सुज्ञाना इति भावायं व्याचष्टे-

नि.[९] भावे पसत्थमियरे नाणाई कोहमाइओ कमसो ।
आउत्ति आगमुत्ति य लाभुत्ति य हुंति एगट्ठा ॥

वृ. 'भावे' विचार्ये इति शेषः, प्रशस्तः मुक्तिपदप्रापकत्वेन 'इतरः' अप्रशस्तः भवनिबन्धन-त्वेन, प्रक्रमादायः, किंरूपः पुनरयं द्विविधोऽपीत्याह- 'ज्ञानादिः' आदिशब्दाद्दर्शनादिपरिग्रहः, 'कोहमाइओ'त्ति मकारश्चालाक्षणिकत्वात् क्रोधादिकः, आदिशब्दान्मानादिपरिग्रहः, 'कमसो'त्ति आर्षत्वात् क्रमतः, किमुक्तं भवति ? प्रशस्तो ज्ञानादिः, अप्रशस्तः क्रोधादिः । इह च ज्ञानादेः क्रोधादेश्च आयत्वमार्यविषयत्वाद्विषयविषयिणोरभेदोपचारेण आयते तमि-

त्याह इति कर्ममाधनत्वेन वा, ज्ञानादिप्रशस्तभावायहेतुत्वाच्चाध्ययनमपि भावाय:। 'तत्त्व गोदपर्यायैर्व्याख्ये'त्ति पर्यायकथनमपि व्याख्याङ्गमिति पर्यायानाह- आय इत्यागम इति च लाभ इति च भवन्त्येकार्थिका:, शब्दा इति गम्यते, 'इति' प्रत्येकं पर्यायस्वरूपनिर्देशार्थ:, 'च:' समुच्चय इति गाथार्थ:॥ नामस्थापनाक्षपणे प्रसिद्धे इति द्रव्यक्षपणामाह-

नि.[१०] पल्लत्थिया अपत्था तत्तो उप्पिट्ठणा अपत्थयरी।
निप्पीलणा अपत्था तिन्नि अपत्थाइ पुत्तीए॥

वृ. 'पर्यस्तिका' प्रसिद्धा 'अपथ्या' अहिता, 'तत:' इति पर्यस्तिकात उत्प्राबल्येन पिट्टना उत्पिट्टनाउत्पिट्टनकादिना कुट्टनोत्पिट्टना अपथ्यतरा, 'निष्पीडना' अत्यन्तमावलनात्मिका 'अपथ्या' इति प्रस्तावादपथ्यतमा, सर्वत्र वस्त्रस्येति गम्यते, निगमयितुमाह त्रीण्यपथ्यानि 'पोत्तीए' निवस्त्रस्य, इह चाल्पाल्पतराल्पतमकालत आभिर्वस्त्रद्रव्यं क्षप्यत इति पर्यस्तिकादी-नामपथ्यापथ्यतरापथ्यतमत्वं द्रव्यक्षपणत्वं चोक्तम्, अपथ्यानीति च निगमनं सामान्यस्या-शेषविशेषसङ्ग्रहकत्वाददुष्टमिति गाथार्थ:॥ भावक्षपणामाह-

नि.[११] अट्ठविहं कम्मरयं पोराणं जं खवेइ जोगेहिं।
एयं भावज्झयणं नेयव्वं आनुपुव्वीए॥

वृ. 'अष्टविधम्' अष्टप्रकारं, क्रियत इति कर्म-ज्ञानावरणादि, रज इव रजो जीवशुद्ध-स्वरूपान्यथात्वकरणेन, इह चोपमावाचकशब्दमन्तरेणापि परार्थप्रयुक्तत्वात् अग्निर्माणवक इतिवदुपमानार्थोऽवगन्तव्य:, कर्मरज इति समस्तं वा पदं, 'पुराणम्' अनेकभवोपात्तत्वेन चिरन्तनं 'यत्' यस्मात् क्षपयति जन्तु: 'योगै:' भावाध्ययन चिन्तनादिशुभव्यापारै:, तस्मादि-दमेव भावरूपत्वात् क्षपणाहेतुत्वाद्भावक्षपणेत्युच्यते इति प्रक्रम:। प्रकृतमुपसंहर्तुमाह- 'एतद्' इत्युक्तपर्यायाभिधेयं भावाध्ययनं 'नेतव्यं' प्रापयितव्यम् 'अनुपूर्व्या' शिष्यप्रशिष्य-परम्परात्मिकायां, यद्वा 'नेतव्यं' संवेदनपथविषयतां प्रापणीयमानुपूर्व्या- क्रमेणेति गाथार्थ॥ तदित्थमुत्तराध्ययनानीति व्याख्यातम्, अधुना श्रुतस्कन्धयोर्निक्षेपं प्रत्यध्ययनं सामान्यार्थाधि-कारांश्च वक्तुमवसर इति तदभिधानाय प्रतिज्ञामाह-

नि.[१२] सुयखंधे निक्खेवं नामाइ चउव्विहं परूवेउं।
नामाणि य अहिगारे अज्झयणाणं पवक्खामि॥

वृ. श्रुतं च स्कन्धश्चेति समाहारद्वन्द्वस्तस्मिन् निक्षेपं नामादयश्चत्वारो विधा:-प्रकारा यस्य स तथा तं 'प्ररूप्य' प्रज्ञाप्य नामान्यधिकारांश्चाध्ययनानां प्रवक्ष्यामि इति गाथार्थ:॥ इह च श्रुतस्कन्धनिक्षेपस्यान्यत्र सुप्रपञ्चितत्वात् प्रस्तावज्ञापनायैव श्रुतस्कन्धे निक्षेपं प्ररूप्येति निर्युक्तिकृतोक्तं, न तु प्ररूपयिष्यत इति। स्थानाशून्यार्थं किञ्चिदुच्यते-तत्र श्रुतं नामस्थापना-पनात्मकं श्रुतं, द्रव्यश्रुतं तु द्विविधम्- आगमनोआगमभेदात्, तत्र यस्य श्रुतमिति पदं शिक्षितादि-गुणान्वितं ज्ञातं न च तत्रोपयोग: तस्य आगमतो द्रव्यश्रुतम्, 'अनुपयोगो द्रव्य'मिति वचनात्, नोआगमतस्तु श्रुतपदार्थज्ञशरीरं भूतभविष्यत्पर्यायं, तद्व्यतिरिक्तं च पुस्तकादिन्यस्तम् अभि-धीयमानं वा, भावश्रुतहेतुतया द्रव्यश्रुतं, तथा चाह-

"भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके।

तद् द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं कथितम् ॥"

यावच्छ्रुतमप्यागमनोआगमभेदतो द्विधैव, तत्राऽऽगमतस्तज्ज्ञस्तत्र चोपयुक्तः, नोआगमतस्त्वेतान्येव प्रस्तुताध्ययनानि, आगमैकदेशत्वात् क्षायोपशमिकभाववृत्तित्वाच्चामोगमिति ॥ स्कन्धोऽपि नामस्थापनात्मकः प्रसिद्ध एव, द्रव्यस्कन्धः आगमतस्तज्ज्ञोऽनुपयुक्तः, नोआगमतो ज्ञशरीरभव्यशरीरे, तद्व्यतिरिक्तो द्रुमस्कन्धादिः, भावस्कन्ध आगमतस्तज्ज्ञस्तत्रोपयुक्तः, नोआगमतः प्रक्रान्ताध्ययनसमूह इत्यत्र प्रसङ्गेन ॥ प्रतिज्ञातमनुसरन्नाह-

नि.[१३] विनयसुयं च परीसह चउरंगिज्जं असंखयं चेव ।
अकाममरणं नियंठि ओरब्भं कापिलिज्जं च ॥

नि.[१४] नमिपव्वज्ज दुमपत्तयं च बहुसुयपुज्जं तहेव हरिएसं ।
चित्तसंभूइ उसुआरिज्जं सभिक्खु समाहिठाणं च ॥

नि.[१५] पावसमणिज्जं तह मंजईज्जं मियचारिया निर्याठज्जं ।
समुद्दपालिज्जं रहनेमियं केसिगोयमिज्जं च ॥

नि.[१६] समिइओ जन्नइज्जं सामायारी तहा खलुंकिज्जं ।
मुक्खगइ अप्पमाओ तव चरण पमायठाणं च ॥

नि.[१७] कम्मप्पयडी लेसा बोद्धव्वे खलु नगारमग्गे य ।
जीवाजीवविभत्ति छत्तीसं उत्तरज्झयणा ॥

वृ. निगदसिद्धाः । नवरमाभिरध्ययनविशेषनामान्युक्तानि, एतन्निरुक्त्यादि च नामनिष्पन्ननिक्षेपप्रस्ताव एवाभिधास्यते ॥ अधिकारानाह

नि.[१८] पढमे विनओ बीए परिसहा दुल्लहंगया तइए ।
अहिगारे य चउत्थे होइ पमायप्पमाएत्ति ॥

नि.[१९] मरणविभत्ती पुण पंचमम्मि विज्जा चरणं च छट्ठज्झयणे ।
रसगेहिपरिच्चाओ सत्तमे अट्ठमि अलाभे ॥

नि.[२०] निक्खेपया य नवमे दसमे अनुसासणोवमा भणिया ।
इक्कारसमे पुण्णा तवरिद्धी चेव बारसमे ॥

नि.[२१] तेरसमे अ नियाणं अनियाणं चेव होइ चउदसमे ।
भिक्खुगुणा पन्नरसे सोलसमे बंभगुत्तीओ ॥

नि.[२२] पावाण वज्जणा खलु सत्तरसे भोगिड्ढिविजहणट्ठारे ।
एगूणे अगगरिकम्मे अनाहया चेव वीसइमे ॥

नि.[२३] चरिया च विचित्ता इक्कवीसि बावीसिमे थिरं चरणं ।
तेवीसइमे धम्मो चउवीसइमे य समिइओ ॥

नि.[२४] बंभगुण पन्नवीसे सामायारी य होइ छव्वीसे ।
सत्तावीसे अणगढया अट्ठावीसे य मुक्खगई ॥

नि.[२५] एगूणतीस आवस्सगप्पमाओ तवो अ होइ तीसइमे ।
चरणं च इक्कतीसे बत्तीसि पमायठाणाइं ॥

नि. [२६] तेत्तीसइमे कम्मं चउतीसइमे य होंति लेसाओ ।
भिक्खुगुणा पगतीसे जीवाजीवा य छत्तीसे ॥

वृ. आमामर्थः सुखावगम एव । नवरं विनयमूलोऽयं धर्मः, यत आगमः

"मूलाउ खंधप्पभवो दुमस्स, खंधाउ पच्छा समुविंति साहा ।
साहप्पसाहा विरुहंति पत्ता, तओ से पुप्फं च फलं रसो य ॥१॥

एवं धम्मस्स विणओ मूलं परमो से मोक्खो ।
जेण कित्तिं सुयं सिग्घं, निस्सेसं चाभिगच्छइ ॥२॥"

इत्यतः प्रथमाध्ययने विनयोऽधिकृतः, विनयवतश्च तेषु तेषु गुर्वनियोगेषु प्रवर्तमानस्य कदाचित् परीषहा उत्पद्येरन् ते च सम्यक् सोढव्या इति द्वितीयाध्ययने परीषहा इत्यादि क्रमप्रयोजनमभ्यूह्यम्, अध्ययनसम्बन्धाभिधानप्रस्तावे चाभिधास्यामः । उपसंहरन्नाह-

नि. [२७] उत्तरज्झयणाणेसो पिंडत्थो वण्णिओ समासेणं ।
इत्तो इक्किक्कं पुण अज्झयणं कित्तइस्सामि ॥

वृ. उत्तराध्ययनानाम् 'एषः' अनन्तरमभिहितस्वरूपः 'पिण्डार्थः' समुदायार्थः 'वर्णितः' उक्तः 'समासेन' सङ्क्षेपेण, 'इतः' पिण्डार्थवर्णनाद्, अनन्तरमिति गम्यते, एकैकं 'पुनः' विशेषणे अध्ययनं 'कीर्तयिष्यामि' व्याख्याद्वारेण संशब्दयिष्यामीति गाथार्थः ॥ तत्र चाद्यं विनयश्रुतमिति तस्य कीर्तनावसरः, न च तद् उपक्रमाद्यनुयोगद्वारतद्भेदनिरुक्तक्रमप्रयोजनप्रतिपादनमन्तरेण शक्यं कीर्तयितुमिति मन्वानः प्रस्तुताध्ययनस्यानुयोगविधानक्रममर्थाधिकारं चाह-

अध्ययनं-१ विनयश्रुतं

नि. [२८] तत्थज्झयणं पढमं विनयसुयं तस्सुवक्कमादीणि ।
दाराणि पन्नवेउं अहिगारो इत्थ विनएणं ॥

वृ. 'तत्र' एतेष्वध्ययनेषु मध्ये अध्ययनं 'प्रथमम्' आद्यं विनयाभिधानकं श्रुतं विनयश्रुतं मध्यपदलोपीसमासः, 'तस्य' इति विनयश्रुतस्य उपक्रमादीनि द्वाराणि 'प्ररूप्य' तद्भेदनिरुक्तक्रमप्रयोजनप्रतिपादनद्वारेण प्रज्ञाप्य, एतदनुयोगः कार्य इति शेषः, अधिकारश्चात्र विनयेन, तस्येहानेकधाऽभिधानात् । आह- 'पढमं विणओ' इत्यनेनोक्तत्वात् पुनरुक्तमेतद्, उच्यते, शास्त्रपिण्डार्थविषयं तत्, एतच्च प्रस्तुताध्ययनगोचरमिति न पौनरुक्त्यमिति गाथार्थः ॥ अत्रापि 'प्ररूप्ये'त्यवसरज्ञापनार्थमेव नियुक्तिकृतोक्तं, न तु प्ररूपयिष्यत इति, अनुयोगद्वारैरुक्तत्वात्, तदुक्तानुसारेण किञ्चिदुच्यते- इह चत्वार्यनुयोगद्वाराणि- उपक्रमो निक्षेपोऽनुगमो नयश्चेति, तद्भेदा यथाक्रमं द्वौ द्वौ चेति, निरुक्तिश्चैवम्- उपक्रमणं दूरस्थस्य सतो वस्तुनस्तैस्तैः प्रकारैः समीपानयनमुपक्रमः, नियतं निश्चितं वा नामादिसम्भवत्पक्षरचनात्मके क्षेपणं-न्यसनं निक्षेपः, अनुरूपं सूत्रार्थाबाधया तदनुगुणं गमनं-संहितादिक्रमेण व्याख्यातुः प्रवर्तनमनुगमो, नयनम्- अनन्तधर्मात्मकस्य वस्तुनो नियतैकधर्माधरतम्बेन प्रतीतौ प्रापणं नयः । क्रमप्रयोजनं च-नानुपूर्व्यादिपिन्यासदेशमनानीतं शास्त्र निक्षेप्तुं शक्यं, न चौर्धानिष्पन्नादिभिर्निक्षेपैरनिक्षिप्त-

मनुगन्तुं, नापि सूत्राद्यनुगमेनाननुगतं नयैर्विचारयितुमित्ययमेवैषां क्रमः, तथा च पूज्याः

"दारक्कमोऽयमेव उ निक्खिप्पइ जेण नासमीवत्थं ।
अनुगम्मइ नासत्थं नानुगमो नयमयविहुणो ॥"

अत्र सङ्ग्रहश्लोकाः-

"उपक्रमोऽथ निक्षेपोऽनुगमश्च नयाः क्रमात् ।
द्वारण्येतानि भिद्यन्ते, द्वेधा त्रेधा द्विधा द्विधा ॥१॥
उपक्रम उपक्रान्तिर्दूरस्थनिकटक्रिया ।
निक्षेपणं तु निक्षेपो, नामादिन्यसनात्मकः ॥२॥
सूत्रस्यानुगतिश्चित्राऽनुगमो नयनं नयः ।
अनन्तधर्मणोऽर्थस्यैकांशेनेति निरुक्तयः ॥३॥
न्यासदेशागतं शास्त्रं न्यस्यते न्यस्तमेव तत् ।
अन्वीयतेऽन्विते नीतिस्तेनैतेषामयं क्रमः ॥४॥'

इत्थं विनेयस्मरणार्थं भेदैर्निरुक्तिक्रमेणार्थोऽभिधेयोऽस्य द्वारैण वर्णितोऽभि, तद्वर्णनाच्च फलादीनि वाच्यानीति प्रतिज्ञातं निर्वाहितम्। सम्प्रत्येभिरित्थं प्ररूपितैरेषामेव भेदप्रपञ्चनपुरस्सरं प्रक्रान्ताध्ययनं विचार्यते, तत्रोपक्रमो द्विधा-लौकिको लोकोत्तरश्च, तत्राद्यो नामस्थापनाद्रव्य-क्षेत्रकालभावभेदतः षोढा, तत्र च नामतश्चिरतरकालभाविनः सन्निहितकाल एव कारणं नामोपक्रमः, एवं स्थापनोपक्रमोऽपि, द्रव्योपक्रमः सचित्ताचित्तमिश्रभेदात् त्रिविधः, प्रत्येकोऽपि परिकर्मनाशभेदतो द्विविधः उक्तं च भाष्यकारेण-

"नामाई छब्भेओ उवक्कमो दव्वओ सचित्ताई ।
तिविहो दुविहो य पुणो परिकम्मे वत्थुनासे य ॥"

तत्र परिकर्मणि सचित्तद्रव्योपक्रमोऽवस्थितस्यैव द्विपदचतुष्पदापदरूपस्य नरतुरगतरु-प्रभृतिसचित्तवस्तुनोऽविवक्षिताचित्तकेशाद्यवयवस्य यथाक्रमं रसायनशिक्षायुर्वेदादिवशतः तथाविधकर्मोदयादेः कालान्तरभाविनो वयःस्थैर्यविनयनप्रसूनोद्गमादिपरिणतिविशेषस्योपादनम्, अचित्तद्रव्योपक्रमः कनकादेः कटककुण्डलादिक्रिया, मिश्रद्रव्योपक्रमः सचित्तस्यैव द्विपदादेः अचित्तकेशादिसहितस्य स्नानादिसंस्कारकरणम्, एवं विनाशेऽपि द्रव्योपक्रमस्त्रिधा-तत्र सचित्तद्रव्योपक्रमोऽवस्थितस्यैव सचित्तद्रव्यस्याविवक्षितपर्यायान्तरोत्पत्तिं प्रत्यभिज्ञानि-वर्तकमसिपरश्वादितः प्राक्तनपर्यायापनयनम्, अचित्तद्रव्योपक्रम एवमेवाचित्तस्य रजतादेः पारदादिसम्पर्कतः स्वरूपादिध्वंशनं, मिश्रद्रव्योपक्रमोऽपि तथैव शङ्खशृङ्खलाद्यलङ्कृतद्विरदादेः सचेतनस्य मुद्रादिभिरभिघातः। एवं क्षेत्राद्युपक्रमा अपि परिकर्मविनाशभेदतो द्विभेदाः, तत्र यद्यपि क्षेत्रं नित्यममूर्तं च, ततो न तस्य परिकर्मविनाशौ स्तस्तथापि तदाधेयस्य जलादेर्नाव्यादि-हेतुतस्तौ सम्भवत इत्युपचारतस्तदुपक्रमः, उक्तं च-

"खित्तमरूवं निच्चं न तस्स परिकम्मणं न य विनासो ।
आहेयगयवसेण उ करणविनासोवयारोऽत्थ ॥१॥
नावाए उवक्कमणं हलकुलियाईहि वावि खेत्तस्स ।

संमज्जभूमिकम्मे य पंथतलागाइयाणं च ॥२॥"

कालो वर्तनादिरूपत्वेन द्रव्यपर्यायात्मक एव, द्रव्यपर्यायौ च नरसिंहवदन्योऽन्यसंवलितौ, ततस्तद्द्वारेण तस्य गुणविशेषाऽऽभानविनाशावुपक्रमशब्दवाच्यौ, आह च

"जं वत्तणादिरूवो कालो दव्वाण चेव पज्जाओ ।
तो तक्करणविनासे कीरइ कालोवयारो उ ॥

आह- मनुष्यक्षेत्रे सूर्यक्रियाव्यङ्ग्यो वर्तनादिद्रव्यपरिणतिनिरपेक्षोऽद्धाकालाख्यः कालोऽस्ति, यथोक्तम्-

"सूरकिरियाविसिट्ठो गोदोहादिकिरियासु निरवेक्खो ।
अद्धाकालो भन्नइ समयक्खेत्तंमि समयाई ॥" त्ति,

तत्र का वार्ता ?, उच्यते, तस्यापि शङ्कुच्छायादिना यथावत्परिज्ञानत ऋक्षादिचारैरतिपात-तश्चामूर्तत्वेऽपि परिकर्मविनाशसम्भवादुपक्रमः, तथा च पूज्याः-

"छायाइ नालियाइ व परिकम्मं से जहत्थविन्नाणं ।
रिक्खाईचारेहि य तस्स विनासो विवज्जासो ॥"

भावोपक्रमस्तु यद्यपि भावस्य पर्यायत्वात् तस्य च द्रव्यात् कथञ्चिदनन्यत्वात्तदुपक्रमाभिधानत उक्त एव, तथापि जीवद्रव्यपर्यायोऽभिप्रायाख्यो भावशब्दाभिधेयोऽस्ति, यदुक्तम्-भावाभिख्याः पञ्च स्वरूपसत्तात्मयोन्यभिप्रायाः" इति, ततस्तस्य परचित्तवर्तिनः संवेदना-विषयतया विप्रकर्षवत इङ्गिताकारादिना परिज्ञानतः सन्निहितकरणं ज्ञातस्य वा तथाऽननुगुणानु-गुणचित्रचेष्टातः कुपितप्रसन्नतापादनं भावपक्रम एव, स चावश्यमिहाभिधेयः, तदन्तर्गतत्वात् गुरुभावोपक्रमस्य, तस्य च सकलानुयोगप्रथमाङ्गत्वात्, उक्तं च-"भन्नइ वक्खाणंगं गुरुचित्तो-वक्कमो पढमं" ति, शेषोपक्रमाणामपि चैतदङ्गत्वात्, तथा चाह-

"जुत्तं गुरुमयगहणं को सेसोवक्कमोवयारोऽत्थ ? ।
गुरुचित्तपसायत्थं तेऽवि जहाजोगमाजोज्जा ॥१॥
परिकम्मणासणाओ देसे काले य जे जहा जोगा ।
तो ते दव्वाईणं कज्जाऽऽहाराइकज्जेसुं ॥२॥"

तत एतदभिधानाय द्रव्योपक्रमाद् भावोपक्रमः पृथगुच्यते, स च द्विविधः-प्रशस्ताप्रशस्त भेदात्, तत्राप्रशस्तो ब्राह्मणीगणिकाऽमात्यदृष्टान्ततोऽवसेयः, प्रशस्तश्च शिष्यस्य श्रुतादिहेतोर्गुरु-भावोन्नयनं, यत आह-

"सोसो गुरुणो भावं जमुवक्कमए सुहं पसत्थमनो ।
सहियत्थं स पसत्थो इह भावोवक्कमोऽहिगतो ॥"

इत्युक्तो लौकिक उपक्रमः, शास्त्रीयस्त्वानुपूर्वीनामप्रमाणवक्तव्यताऽर्थाधिकारसमवतारात्मकः, तत्रानुपूर्वी नामादिदशप्रकारा अन्यत्र प्रपञ्चत उक्ता, इह पुनरुत्कीर्तनगणनात्मिकयाऽर्थाधिकार इति सैव भण्यते-तत्रोत्कीर्तनं विनयश्रुतं परीषहाध्ययनं चतुरङ्गीयमित्यादि संशब्दनं, गणनं सङ्ख्यानं, तच्च पूर्वानुपूर्वीपश्चानुपूर्वीअनानुपूर्वीभेदतस्त्रिविधं, तत्र पूर्वानुपूर्व्या गण्यमानमिदमध्ययनं प्रथमं, पश्चानुपूर्व्या षट्त्रिंशत्तमम्, अनानुपूर्व्या त्वस्यामेवैकाद्येकोकोत्तर-

षट्त्रिंशदुत्तरछगतयां श्रेण्यामन्योऽन्याभ्यासतो द्विरूपोनसङ्ख्याभेदं भवति. उक्तं च

"एकाद्या गच्छपर्यन्ताः, परस्परसमाहताः ।
राशयोऽन्त्यांद्य विज्ञेयं, विकल्पगणिते फलम् ॥"

इह चासम्मोहार्थं षड्भेदा[illegible]विचारतः [illegible]दारभ्य यावद् गाथा उच्यन्ते तावद् यैकादीनि षडन्तानि षट् पदानि स्थाप्यन्ते, तानि चान्योऽन्यं गुण्यन्ते, ततश्च जातानि सप्त शतानि विंशत्युत्तराणि, तेषां चान्त्येन षट्केन भागहारः, तत्र लब्धं विंशत्युत्तरं शतं १२०, इयन्तः षष्ठषड्वर्क्तौ षट्का न्यस्यन्ते, तदधस्तावन्त एव क्रमेण पञ्चकचतुष्ककत्रिकद्विकैककाः स्थाप्याः, इत्थं जातानि षष्ठषड्वर्क्तौ सप्त शतानि विंशत्युत्तराणि । ततो विंशत्युत्तरशतस्य पञ्चकेन भागहारः, तत्र च लब्धा चतुर्विंशतिः २४, तावत्सङ्ख्याः पञ्चमषड्वर्क्तौ क्रमेण पञ्चकचतुष्ककत्रिकद्विकैककाः न्यस्याः, जातं विंशत्युत्तरं शतं, तस्य चाधस्तादग्रेतनपङ्क्तिस्थमङ्कमपहाय यथामहत्सङ्ख्यमङ्कविन्यासः, तत्राग्रेतनपङ्क्तिस्थश्च पञ्चकस्तत्परित्यागतश्च सर्वबृहत्सङ्ख्यः षट्कश्चतुर्विंशतिस्थानगः स्थाप्यते, ततस्त्रिकापेक्षया चतुष्को द्विकापेक्षया च त्रिक एककापेक्षया च द्विको बृहत्सङ्ख्यः तत एककश्च तावत एव वारान् न्यसनीयः, जातं पुनर्विंशत्युत्तरं शतम्, एवमग्रेतनपङ्क्तिस्थचतुष्कत्रिकद्विकैकपरिहारतस्तथैव तावन्नेयं यावत्पञ्चमषड्वर्क्तावपि पूर्णानि सप्त शतानि विंशत्युत्तराणि । ततश्चतुर्विंशतेश्चतुष्केण भागहारः, तत्र लब्धाः षट् ६, ततश्चतुर्थषड्वर्क्तौ तावन्त एवाधोऽधश्चतुष्कत्रिकद्विकैककाः स्थाप्याः, यावज्जाता चतुर्विंशतिः, ततश्चाग्रेतनपङ्क्तिस्थाङ्कपरिहारादिप्रागुक्तयुक्तित एव पङ्क्तिः पूरणीया ।

भूयः षट्कस्य त्रिकेण भागहारः, ततश्च लब्धो द्विकः, ततस्तृतीयषड्वर्क्तौ द्वौ त्रिको पुनर्द्वाविव द्विको भूय एककौ च द्वावधः स्थापनीयौ, अधस्ताच्च पुरःस्थिताङ्कत्यागतो बृहत्सङ्ख्याङ्कन्यासतश्च विंशत्युत्तरसप्तशतप्रमाणैव पङ्क्तिः पूरणीया । षड्भागहारलब्धस्य द्विकस्य विभजने लब्ध एकः, ततो द्वितीयषड्वर्क्तौ द्विक एककश्चैकौ विरचनीयः, तदधश्च पुरोदितपुरस्थाङ्कपरिहारादिन्यायतस्तावत्सङ्ख्यैवं द्वितीयपङ्क्तिः कार्या । प्रथमपङ्क्तिस्तु पुरस्थाङ्कपरिहारतः पूरणीया । उक्तं च -

"गणितेऽन्त्यविभक्ते तु, लब्धं शेषैर्विभाजयेत् ।
आदावन्ते च तत्स्थाप्यं, विकल्पगणिते क्रमात् ॥"

इह च परस्परगुणनागतराशिर्गणितमुच्यते, शेषास्तु षट्कापेक्षया पञ्चकादयः, 'आदा'-वितिं च प्रथमषड्वर्क्तौ, 'अन्त'इति च पञ्चमादिषड्वर्क्तावितिं । उक्तानुपूर्वी, सम्प्रति नाम, तत्र नमति-ज्ञानरूपादिपर्यायभेदानुसारतो जीवपरमाण्वादिवस्तुप्रतिपादकतया प्रह्वीभवतीति नाम,

"जं वत्थुणो ऽभिहाणं पज्जवभेयानुसारि तं नाम ।
पइभेयं जं नमए पइभेयं जाइ जं भणियं ॥"

तच्चैकनामादि दशनामान्तम्, इह तु षड्विधनामन्दयिकादिषड्भावरूपेणाधिकारः, तदन्तर्भूतक्षायोपशमिकभावे श्रुतज्ञानात्मकत्वेन प्रस्तुताध्ययनस्यावतारात्, आह च-

"छव्विहनामे भावे खओवसमिए सुयं समोयरइ ।
जं सुयनाणावरणक्खओवसमजं तयं सव्वं ॥"

प्रमीयते परिच्छिद्यतेऽनेनेति प्रमाणं, तच्च द्रव्यक्षेत्रकालभावभेदाच्चतुर्विधं, तत्रास्य भावोपशमिकभावरूपत्वेन भावप्रमाणेऽवतारः, यत आह

"दव्वाइ चउब्भेयं पमीयए जेण तं पमाणंति।
इणमज्झयणं भावोत्ति भावमाणे समोयरइ ॥"

भावप्रमाणं च गुणनयसङ्ख्याभेदतस्त्रिधा, तत्रास्य गुणप्रमाणसङ्ख्याप्रमाणयोरेवावतारः, नयप्रमाणे तु यद्यपि श्रुतकेवलिनोक्तम्-

"अहिगारो तिहि उ गोसन्नो'त्ति, तथा 'नत्थि नएहिं विहूणं सुत्तं अत्थो व जिनमए किं च।
आसज्ज उ सोयारं नए नयविसारओ बूया ॥"

तथापि सम्प्रति तथाविधनयविचारणाव्यवच्छेदतोऽवतार एव, तथा च तेनैव भगवतोक्तम्-

मूढनइयं सुयं कालियं तु न नया समोयरंति इहं।
अपहुत्ते समोयरणं नत्थि पहुत्ते समोयारो ॥१॥"

(तथा)-"जावंति अज्जवयरा अपहुत्तं कालियानुओगस्स।
तेनारेण पहुत्तं कालियसुयदिट्ठिवाए य ॥२॥"

महामतिनाऽप्युक्तं-मूढनयं तु न संपइ नयप्पमाणेऽवयारो से"। गुणप्रमाणं तु द्विधा-जीवगुणप्रमाणमजीवगुणप्रमाणं च, तत्रास्य जीवोपयोगरूपत्वाज्जीवगुणप्रमाणेऽवतारः, तस्मिन्नपि ज्ञानदर्शनचारित्रभेदतस्त्र्यात्मकेऽस्य ज्ञानरूपतया ज्ञानप्रमाणे, तत्रापि प्रत्यक्षानुमानोपमानाऽऽगमात्मके प्रकृताध्ययनस्यागमोपदेशरूपतयाऽऽगमप्रमाणे, तत्रापि लौकिकलोकोत्तरभेदे परमगुरुप्रणीतत्वेन लोकोत्तरे सूत्रार्थोभयात्मनि, तथा चाह-

"जीवाजीवगुणओ जीवगुणेनेह भावओ नाणे।
लोउत्तरसुत्तत्थो भयागमे तस्स भावाओ ॥"

तत्राप्यात्मानन्तरपरम्परागमभेदतस्त्रिविधे अर्थतस्तीर्थकरगणधरतदन्तेवासिनः सूत्रतस्तु स्थविरतच्छिष्यतत्प्रशिष्यानपेक्षय यथाक्रममस्यात्मानन्तरपरम्परागमेष्ववतारः, सङ्ख्याप्रमाणमनुयोगद्वारादिषु प्रपञ्चितमिति तत एवावधारणीयं, तत्र चास्य परिमाणसङ्ख्यायामवतारः, तत्रापि कालिकश्रुतदृष्टिवादश्रुतपरिमाणभेदतो द्विभेदायां कालिकश्रुतपरिमाणसङ्ख्यायां सङ्ख्यातपरिमाणात्मिकायां पर्यायापेक्षया त्वनन्तपरिमाणात्मिकायाम्, अनन्तगमपर्यायत्वादागमस्य, तथा चाह-"अनंता गमा अनंता पज्जवा" इत्यादि। वक्तव्यता-पदार्थविचारः, सा च स्वपरोभयसमयभेदतस्त्रिधा, तत्र स्वसमयः-अर्हन्मतानुसारिशास्त्रात्मकः, परसमयः-कपिलाद्यभिप्रायानुवर्तिग्रन्थस्वरूपः, उभयसमयस्तूभयमतानुगतशास्त्रस्वभावः, तत्रास्य स्वसमयवक्तव्यतायामेवावतारः, स्वसमयपदार्थानामेवात्र वर्णनात्, यद्यपि परोभयसमयपदार्थवर्णनं तत्रापि स्वसमयवक्तव्यतैव, परोभयसमययोरपि सम्यग्दृष्टिपरिगृहीतत्वेन स्वसमयत्वात्, अत एव सर्वाध्ययनानामपि स्वसमयवक्तव्यतायामेवावतारः, तदुक्तम्-

"परसमओ उभयं वा सम्मद्दिट्ठिस्स ससमओ जेणं।
तो सव्वज्झयणाइं ससमयवत्तव्वयाइं ॥"ति

अथाधिकारः 'पढमे विनओ' इत्यनेन स्वत एव निर्युक्तिकृताऽभिहित इति नोच्यते। इह

च वक्तव्यता प्रतिसूत्राभिधेयार्थविषया, अर्थाधिकारस्तु 'अहिगारो इत्थ विणएण' मित्यनेनैवाभिहितः। समवतारस्त्वानुपूर्व्यादिषु लाघवार्थं यथासम्भवमुक्त एव इति न पुनरुच्यते,

"अहुणा य समोयारो जेण समोयारियं पइट्ठारं।
विनयसुय सो ऽनुगतो लाघवओ न उण वक्खेति॥"

निक्षेपपरिघा-ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च, आह च-

भन्नइ घेप्पइ य सुहं निक्खेवपयानुसारओ सत्थं।
ओहो नामं सुत्तं निक्खेयव्वं तओ ऽवस्सं॥"

(ओघः) अध्ययनादि सामान्यनाम, आह च

ओहो जं सामन्नं सुयाभिहाणं चउव्विहं तं च।
अज्झयणं अज्झीणं आओ झवणा य पत्तेय॥१॥
नामादि चउब्भेयं वन्नेऊणं सुयानुसारेणं।
विनयसुयं आउज्जं चउसुंपि कमेण भावेसुं॥२॥
जेन सुहप्पज्झयणं अज्झप्पाणयणमहिय नयनं वा।
बोहस्स संजमस्स य मोक्खस्स व तो तमज्झयणं॥३॥
अक्खीणं दिज्जंतं अव्वोच्छित्तिणयतो अलोगो व्व।
आओ नानाईणं झवणा पावाण कम्माणं॥४॥

प्रकटार्थौ एव, नवरं येन हेतुना शुभात्माध्ययनं शुभस्य-पुण्यस्यात्मन्याधिक्येनायनं-गमनं ततो भवति, पठ्यते वा-'सुहज्झप्पयणं'ति, तत्र शुभं-सङ्क्लेशविरहितमध्यात्मं-मनः तत्रायनमर्थादात्मनः ततः, तथाऽधिकं नयनं-प्रकर्षवत्प्रापणं, कस्य?-बोधस्य-तत्त्वावगमस्य संयमस्य वा-पृथिव्यादिसंवरक्षणात्मकस्य मोक्षस्य वा-कृत्स्नकर्मक्षयलक्षणस्य ततो भवति, आत्मनीति गम्यते, 'ततः' तस्माद्धेतोः, प्राग्वदध्ययनमुच्यत इति शेषः, तथा 'अव्यवच्छित्तिनयतः' अव्यवच्छित्तिनयमाश्रित्य द्रव्यास्तिकनयाभिप्रायेणेत्यर्थः, 'अलोकवत्' इत्युपलक्षणत्वाद्-लोकाकाशवदिति। नामनिष्पन्ननिक्षेपेऽस्य विनयश्रुतमिति द्विपदं नाम, ततो विनयस्य श्रुतस्य च निक्षेपः शास्त्रान्तरउक्तोऽप्यवश्यमिह वक्तव्यः। तत्र च विनयनिक्षेपो बहुवक्तव्य इति तमतिदेष्टुं श्रुतनिक्षेपस्तु न तथेति तमभिधातुमाह-

नि.[२९] विनओ पव्वद्दिट्ठो सुयस्स चउक्कओ उ निक्खेवो।
दव्वसुय निण्हगाइ भावसुय सुए उ उवउत्तो॥

वृ. विनीयते-अपनीयतेऽनेन कर्मेति विनयः, स च पूर्वं-दशवैकालिकविनयसमाधिनाध्ययने उद्दिष्टउक्तः पूर्वोद्दिष्ट, स्थानाशून्यार्थं तदुक्तमेव किञ्चिदुच्यते-

"विनयस्स य सुत्तस्स य निक्खेवो होइ दुण्ह य चउक्को।
दव्वविनयम्मि तिनिसो सुवन्नमिति एवमातीते॥१॥
लोकोवयारविनओ अत्थनिमित्तं च कामहेउं च।
भयविनयमोक्खविनओ विनओ खलु पंचहा नेओ॥२॥
अब्भुट्ठाणं अंजलि आसनदानं च अतिहिपूया य।

लोगोवयारविनओ देवयपूया य विनयेणं ॥३॥
अत्थागमनिक्खेदानुनणा देसकालदानं च ।
अब्भुट्ठाणं अंजलि आसनदानं च अल्पकए ॥४
एसोय कामविनओ भए य मोक्खे य आनुपुव्वीए ।
मोक्खंमिवि पंचविहो परूवणा तंमिमा होइ ॥५॥
दंसणनाणचरित्ते तवे य तह ओवयारिए चेव ।
एसो य मोक्खविनओ पंचविहो होइ नायव्वो ॥६॥
दव्वाण सव्वभावो उवइट्ठो जे जहा जिणिंदेहि ।
ते तह सद्दहइ नरो दंसणविनओ भवइ तम्हा ॥७॥
नाणं सिक्खइ नाणं गुणेइ नाणेण कुणइ किच्चाइं ।
नाणी नवं न बंधइ नाणविनओ हवइ तम्हा ॥८॥
अट्ठविहं कम्मचयं जम्हा रित्तं करेइ जयमानो ।
नयमट्ठं च न बंधइ चारित्तविनओ हवइ तम्हा ॥९॥
अवनेइ तवेण तमं उवनेइ य संगमोक्खमग्गंमि ।
तवनियमनिच्छयमई तवोविनओ हवइ तम्हा ॥१०॥
अह ओवयारिओ पुन दुविहो विनओ समासओ होइ ।
पडिरूवजोगजुंजण तहय अनासायणाविनओ ॥११॥
पडिरूवो खलु विनओ काइयजोगो य वायमानंमि ओ ।
अट्ठचउव्वहदुविहो परूवणा तस्सिमा होइ ॥१२॥
अब्भुट्ठाणं अंजलि आसनदानं अभिग्गह किती य ।
सुस्सूसण अनुगच्छण संसाहण काय अट्ठविहो ॥१३॥
हियमियअफरुसवाई अनुवीईभास वाइओ विनओ ।
आकुसलमनोनिरोहो कुसलमणउदीरणा चेव ॥१४॥
पडिरूवो खलु विनओ परानुवित्तिमइओ मुनेयव्वो ।
अप्पडिरूवो विनओ नायव्वो केवलीणं तु ॥१५॥
एसो य परिकहिओ विनओ पडिरूवलक्खणो तिविहो ।
वावन्नविहिविहाणं विति अनासायणाविनयं ॥१६॥
तित्थयर १ सिद्ध २ कुल ३ गण ४ संघ ५ किरिय ६ धम्म ७ नाण ८ नाणीणं ९ ।
आयरिय १० थेर ११ उवज्झाय १२ गणीणं १३ तेरस पयाइं ॥१७॥
अनसायणा य भत्ती बहुमाणो वण्णसंजलणया य ।
तित्थयराई तेरस चउग्गुणा होंति बावन्ना ॥१८॥

स्पष्टार्थाः. नवरं 'तिनिशो' वृक्षविशेषः. लोकोपचारविनयः लोकपङ्क्तिफलः. अर्थनिमित्तं चेति. विनय इति गम्यते. ततोऽर्थप्रतिबंधहेतोरभ्युत्थानानुव्रजनमर्थविनयः. कामहेतोरपि इत्यपि

विनय इति प्रक्रमः, ततश्च शब्दादिविषयसम्पत्तिनिमित्तं तथा तथा प्रवर्तनं कामविनयः, दुष्प्रणिधानादेः प्राणातिपातादेश्च मनोवाक्कायानामनुवर्तनं भयविनयः, इहलोकानपेक्षस्य श्रद्धानज्ञानशिक्षादिषु कर्मक्षयाय प्रवर्तनं मोक्षविनयः, स च दर्शनज्ञानचारित्रतपउपचारभेदात् पञ्चप्रकारः, तत्र बाह्योपचारकोऽनुरूपव्यापारसम्पादनाशातनापरिहारतो द्विभेदः, तत्र चाद्य अभ्युत्थानम् आगच्छति गच्छति च इष्टे गुरावासनमोचनम्, अभिग्रहो गुरुविश्रामणादिनियमः, कृतिः द्वादशावर्तादिवन्दनं, शुश्रूषणं 'न पक्खओ न पुरओ' इत्यादिविधिना गुरुवचनश्रवणेच्छा, पर्युपासनमित्यर्थः, अनुगमनम् आगच्छतः प्रत्युद्गमनं, संसाधनं-गच्छतः सम्यगनुव्रजनं, 'कुलं' नागेन्द्रादिः 'गणः' कोटिकादिः, 'क्रिया' अस्ति परलोकोऽस्त्यात्मा ऽस्ति च सकलक्लेशलेशाकलङ्कितं मुक्तिपदमित्यादिप्ररूपणात्मिकेह गृह्यते, 'धर्मः' श्रुतचारित्रात्मकः 'ज्ञानं' मित्यादि 'आचार्यः' अनुयोगाचार्यः 'गणी' गणाचार्यः अनाशातना-मनोवाक्कायैरप्रतीपप्रवर्तनं, भक्तिः-अभ्युत्थानादिरूपा, बहुमानोमानसोऽत्यन्तप्रतिबन्धः, वर्णनं वर्णः श्लाघनं तेन सद्भावलनाज्ञानादिगुणोद्दीपना वर्णसंज्वलना ॥ श्रुतस्य चत्वार परिमानमस्येति चतुष्कः, सङ्ख्याया अतिशदन्तायाः कप्रतिषेधे कन्, तुशब्दश्चतुर्विधनिक्षेपोऽवश्यं सर्वत्र वक्तव्य इति विशेषद्योतकः,

"जत्थ उ जं जाणेज्जा निक्खेवं निक्खिवे निरवसेसं।
जत्थवि नवि जाणिज्जा चउक्कयं निक्खिवे तत्थ ॥"

निक्षेपो न्यासः, तत्राद्ययोः सुगमत्वान्तृतीयमाह द्रव्यतो द्रव्यरूपं वा श्रुतं द्रव्यश्रुतम्, आगमतो नोआगमतश्च, तत्रागमतोज्ञाताऽनुपयुक्तः, नोआगमतस्त्वाह-निह्नुते-आगमाभिहितमर्थमतिक्लिष्टकर्मोदयात् कुयुक्तिभिरपनयतीति निह्नवो-जमालिप्रभृतिः पश्चात्कृतश्रुतपरिणतिः, आदेशब्दात्पुरस्कृतश्रुतपरिणतिसन्यपग्रहः, भावश्रुतमप्यागमनोआगमभेदतो द्विधा, तत्रागमतोऽभिधातुमाह-भावतो भावरूपं वा श्रुतं भावश्रुतं, प्राकृतत्वादिह पूर्वत्र च बिन्दुलोपः, 'श्रुते' श्रुतविषये, 'तु:' अवधारणे भिन्नक्रमः, तत उपयुक्त एव, को ऽर्थः ?-यस्य श्रुतमिति पदं ज्ञातं तत्र चोपयोगः स भावश्रुतं, तदुपयोगानन्यत्वाद, अग्न्युपयुक्तमानवकाग्निवदिति गाथार्थः ॥

उक्तावोघनामनिष्पन्ननिक्षेपौ, सम्प्रति सूत्रालापकनिष्पन्ननिक्षेपः प्राप्तावसरः, तथापि स नोच्यते, यतः सति सूत्रेऽसौ सम्भवति, सूत्रं च सूत्रानुगमे, स चानुगमभेद इति अनुगम एव तावदुपवर्ण्यते-द्विविधोऽनुगमः-निर्युक्त्यनुगमः सूत्रानुगमश्च, तत्राद्यो निक्षेपनिर्युक्तिउपोद्घातनिर्युक्तिसूत्रस्पर्शिकनिर्युक्त्यनुगमविधानतस्त्रिविधः, तत्र च निक्षेपनिर्युक्त्यनुगम उत्तरादिनिक्षेपप्रतिपादनादनुगत एव, उपोद्घातनिर्युक्त्यनुगमस्तु द्वारगाथाद्वयादवसेयः, तच्चेदम्-

"उद्देसे निद्देसे य निग्गमे खेत्त काल पुरिसे य।
कारण पच्चय लक्खण नए समोयारणाणुमए ॥१॥
किं कइविहं कस्स कहिं केसु कहं केच्चिरं हवइ कालं ?।
कइ संतरमविरहियं भवागरिस फासण निरुत्ती ॥२॥

एतदर्थः सामायिकनिर्युक्तितोऽवसेयः, सूत्रस्पर्शिकनिर्युक्त्यनुगमस्तु सूत्रावयवव्याख्यानरूपत्वात् सूत्रस्पर्शिकनिर्युक्तेः सति सूत्रे सम्भवति, तच्च सूत्रानुगम एवेति तत्रैव वक्ष्यते।

नन्वेवमस्थानमिदमस्येति कस्मादिहोद्देशः ? उच्यते, निर्युक्त्यनुगममात्रसामान्यात्, तदुक्तम् -

"संपइ सुत्तफासियनिज्जुत्ती जं सुयस्स वक्खाणे ।
तीसेऽवसरो सा गुण पत्तावि न भन्नए इहई ॥१॥
किं जेणासइ सुत्ते कस्स तई तं जया कमप्पत्तो ।
सुत्तानुगमो वोच्छं होही तीसे तया भावो ॥२॥
अत्थाणमियं तीसे जइ तो सा कीस भन्नई इहयं ? ।
सा भन्नइ निज्जुत्तीमेत्तसामन्नओ नवरं ॥३॥"

साम्प्रतं सूत्रानुगमः, तत्रानौकोपघातजनकस्खलितादिदोषरहितं निर्दोषमारुग्ण(वल्ल)दि गुणान्वितं सूत्रमुच्चारणीयं, तच्चेदम् -

सू.(१) संजोगा विप्पमुक्कस्स अनगारस्स भिक्खुणो ।
विनयं पाउकरिस्सामि आनुपुव्विं सुणेह मे ॥

वृ. अस्य च संहितादिक्रमेण व्याख्या - तत्र चास्खलितपदोच्चारणं संहिता, सा चानुगतैव, सूत्रानुगमस्य तद्रूपत्वात्, तथा चाह "होइ कयत्थो वोत्तुं सपयच्छेयं सुयं सुयानुगमो" त्ति । पदं तु नामिकनैपातिकादि स्वधियैव भावनीयं, पदार्थस्त्वयम् - अन्यसंयुक्तस्यान्यसंयुक्तस्य वा सचित्तादिवस्तुनो द्रव्यादिना संयोजनं - संयोगः, स च संयुक्तसंयोगादिभेदेनानेकधा वक्ष्यते, तस्मान्मात्रादिसंयोगरूपादौदयिकादिक्लिष्टतरभावसंयोगात्मकाच्च विविधैः - ज्ञानभावनादिभिर्विचित्रैः प्रकारैः प्रकर्षेण - परीषहोपसर्गादिसहिष्णुतालक्षणेन मुक्तो - भ्रष्टो विप्रमुक्तः, तस्य, 'अनगारस्ये'तिअविद्यमानमगारमस्येत्यनगार इति व्युत्पन्नोऽनगारशब्दो गृह्यते, यस्त्वव्युत्पन्नो रूढिशब्दो यतिवाचकः, यथोक्तम् -

'अनगारो मुनिर्मौनी, साधुः प्रव्रजितो व्रती ।
श्रमणः क्षपणश्चैव, यतिश्चैकार्थवाचकाः ॥१॥ इति,

स इह न गृह्यते, भिक्षुशब्देनैव तदर्थस्य गतत्वात्, तत्र चागारं द्विधा - द्रव्यभावभेदात्, तत्र द्रव्यागारमगैः - द्रुमदृषदादिभिर्निर्वृत्तं, भावागारं पुनरगैः - विपाककालेऽपि जीवविपाकतया शरीरपुद्गलादिषु बहिःप्रवृत्तिरहितैरनन्तानुबन्ध्यादिभिर्निर्वृत्तं कषायमोहनीयं, तत्र च द्रव्यागारपक्षे तन्निषेधे ततोऽनगारस्याविद्यमानगृहस्येत्यर्थः, भावागारपक्षे त्वल्पताभिधायी, ततः स्थितिप्रदेशानुभागतोऽत्यल्पकषायमोहनीयस्येत्यर्थः, कषायमोहनीयं हि कर्म, न च कर्मणः स्थित्यादिभूयस्त्वे विरतिसङ्गमः, यत आगमः -

"सत्तण्हं पयडीणं अब्भितरओ उ कोडिकोडीओ ।
काऊण सागराणं जइ लहइ चउण्हमन्नयरं ॥"

इत्यादि, क्लिष्टतरभावसंयोगमुक्तत्वेनैव चास्य गतत्वे पुनरभिधानं कषायमोहनीयस्यातिदुष्टताख्यापनार्थं, विशेष्यमाह - 'भिक्षो'रिति, अत्र च पचनपाचनादिव्यापारोपरमतः साधुर्भिक्षते तद्धर्मा चेत्यर्थं "सनाशंसभिक्ष उ" रिति ताच्छीलिक उप्रत्ययः, अस्य च वर्तमानाधिकारविहितत्वेऽपि 'सञ्ज्ञाप्रकारास्ताच्छीलिका' इति भाष्यकारवचनाद्भिक्षुशब्दस्त्रिकालविषयो यतिपर्यायः सिद्धो भवति, शेषविवक्षायां च षष्ठी, अथवा - 'अनगारस्सभिक्खुणो' त्ति अस्मेषु

भिक्षुरग्र्यभिक्षुः - ज्ञात्याद्यनाश्रितजीविनादनात्मोत्कृष्टतत्त्वेनानात्मीयानेव गृहिणोऽज्ञादि भिक्षत इतिकृत्वा, स च यतिरेव, ततोऽनगारश्चासावग्र्यभिक्षुश्च अनगाराग्र्यभिक्षुस्तस्य, किमित्याह- विशिष्टौ त्रिविधो वा नयो- नीतिर्विनयः - साधुजनासेवितः समाचारस्तं, विनमनं वा विनतं 'नीयं मेज्झं गइं ठाणं' इत्याद्यागमात्, द्रव्यतो नीचैर्वृत्तिलक्षणं प्रह्वत्वं भावतश्च साध्वाचारं प्रति प्रवणत्वं 'प्रादुष्करिष्यामि' प्रकटयिष्यामि, कथमित्याह- पूर्वस्य पश्चादनुपूर्वं तस्य भाव इत्यर्थे "गुणवचनब्राह्मणादिभ्यः" कर्मणि चेति ष्यञ्, तस्य च विल्लक्षणसामर्थ्यात् स्त्रीत्वे "यिद गौरादिभ्यश्चे"ति ङीप्यानुपूर्वी क्रमः परिपाटीतिर्यावत् तया. द्वितीया तु 'छन्दोवत् सूत्राणी'ति न्यायतः छान्दसत्वे 'सुपां सुपो भवन्ती'ति वचनात् तृतीयार्थे, 'शृणुत' आकर्णयत श्रवणं प्रत्यवहिता भवत, यद्वा शृणु 'इहे'ति ब्रूहीति जिनगते वा, व्याख्यादये ऽपि शिष्याभिमुखो करणमित्यर्थः।

अनेन च परोक्षमुखमपि प्रतिबोधयतो व्याख्यातुर्धर्म्म एवेति ख्यापितं भवति, तथा च-

"नश्यति धर्मः श्रोतुः सर्वस्यैकान्तता हितश्रवणात्।
ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति॥"

'मे' मम विनयं विनतं वा प्रादुष्करिष्यत इति प्रक्रमः। उक्तः पदार्थस्तदभिधानात् सामासिकपदान्तर्गतः पदविग्रहश्च (उक्त इति), ततश्चालनावसरः, सा च सूत्रार्थगतदूषणात्मिका, "सुत्तगयमत्थविसयं च दूसणं चालणं मयं तस्स" इति वचनात्, तत्र सूत्रचालना- संयोगस्य विप्रमुक्तक्रियां प्रति कर्तृत्वात् तं प्रेरणेति कथं न्यायो ?, अर्थचालना च 'विनयं प्रादुष्करिष्यामी'ति प्रतिज्ञातम, उत्तरत्र च 'आणाऽनिद्देसकरे' इत्यादिना 'खड्डुयाहिं चवेडाहिं' इत्यादिना च विपर्ययप्रतिपादनमपि दृश्यते, इति कथं न प्रतिज्ञाक्षतिः ?, प्रत्यवस्थानं- शब्दार्थन्यायतः परोपन्यस्तदोषपरिहाररूपं, यत आह-

"सद्दत्थनायाओ परिहारो पच्चवत्थाणं" तत्र च यद्यपि संयोगेन विमुच्यमानो भिक्षुः कर्म तथापि कर्तृत्वेनात्र विवक्ष्यते, ततश्च तस्य तं विप्रमुञ्चतो विश्लेषोऽस्तीति विश्लेषक्रियायां संयोगस्य ध्रुवत्वेनापादानत्वाच्याय्यैव पञ्चमी, अत एव विप्रमुक्त इत्यत्र कर्मकर्तुः कर्मवद्भावात् कर्मणि क्तोऽपि सिद्धो भवति इति न सूत्रदोषो, नाप्यर्थदोषः, यतो यद् यल्लक्षणं तत्तद्विपर्ययाभिधान एव तल्लक्षणमल्पेशेन ज्ञातुं शक्यमिति अत्र विनयाभिधानप्रतिज्ञानेऽप्यविनयाभिधानं, तथा च शय्यम्भवप्रणीताचारकथायामपि "वयछक्कायछक्क"मित्यादिनाऽऽचारप्रक्रमेऽप्यनाचारवचनम्। अथवा एकमपीदं सूत्रमावृत्त्या 'शृणोति धावती'तिवदर्थद्वयाभिधायकं, ततश्चायमन्योऽर्थः - संयोगेन कनकादिसम्पर्कलक्षणेनाप्यविप्रमुक्तः - अपरित्यक्तः, संयोगाविप्रमुक्तस्यास्य, ऋणमिव कालान्तरक्लेशानुभवहेतुतया ऋणम्- अष्टप्रकारं कर्म तत् करोतीति, को ऽर्थः ? तथा तथा गुरुवचनविपरीतप्रवृत्तिं गरुपचिनोतीति ऋणकारस्तस्य, 'भिक्षोः' कषायादिवशतो जीवस्यैवंविधकलस्य पौरुषघ्नीमेव भिक्षां तथाविधफलनिरपेक्षतया भ्रमणशीलस्य 'विनयं प्रादुष्करिष्यामी'ति "प्राकाश्यसम्भवे प्रादु"रिति वचनात् प्रादुःशब्दस्य सम्भवार्थस्यापि दर्शनादुत्पादयिष्यामि, सम्भवति ह्येदमध्ययनमधीयानानां गुरुकर्मणामपि प्रायो विनीताविनीतगुणदोषविभावनातो ज्ञानादिविनयपरिणतिः, अथवा विरुद्धो नयो विनयोऽसदाचार इत्यर्थः, तं प्रादुष्करिष्यामि - प्रकटयिष्यामि, कस्य ?- 'भिक्षोः' उक्तन्यायेन

शिक्षणशीलस्य, सम्यग् अविपरीतो योगः-समाधिः संयोगः, ततो विविधैः परीषहाप्रहण गुरुनियोगासहिष्णुत्वालस्यादिभिः प्रकारैः प्रकर्षेण मुक्तो विप्रमुक्तः तस्य, शेषं प्राग्वत् ।

एवं चाविनयप्रतिपादनस्यापि प्रतिज्ञातत्वात् सर्वं सुस्थम् । अपरस्त्वाह-प्रतिज्ञातमपि विनयमभिधित्सोरप्रस्तुतम्, इदमपि बालप्रजल्पितं, यतः शास्त्रारम्भेऽभिधेयाद्यवश्यमभिधेयम्, अन्यथा प्रेक्षावत्प्रवृत्त्यसम्भवात्, तत्प्रदर्शनात्मकं चैतत् प्रतिज्ञानं, तथाहि-विनयं प्रादुष्करिष्यामीत्युक्ते विनयोऽस्याध्ययनस्याभिधेयः, तत्प्रादुष्करणं फलं, तथा चेदमुपेयम्, उपायश्चास्याप्रस्तुताध्ययनम्, इत्यनयोरुपायोपेयभावलक्षणः सम्बन्ध इति च दर्शितं भवति, ततो नाप्रस्तुतत्वं प्रतिज्ञानस्येति स्थितम् । सम्प्रति सूत्रोऽऽलापकनिष्पन्ननिक्षेपस्य सूत्रस्पर्शिकनिर्युक्तिश्च प्रस्तोव्य इति मन्यमानः संयोग इत्यादि पदं पृथक्तिक्षेप्तुमाह निर्युक्तिकृत्-

नि. [३०] संजोगे निक्खेवो छक्को दुविहो उ दव्वसंजोगे ।
संजुत्तगसंजोगो नायव्विय रेयरो चेव ॥

वृ. 'संयोग' इति संयोगविषयः 'निक्षेपः' न्यासः, षट् परिमाणमस्येति षट्कः प्राग्वत्कर्म, एतद्भेदाश्च नामस्थापनाद्रव्यक्षेत्रकालभावाः प्रसिद्धत्वादुत्तरत्र व्याख्यानेन उच्चार्यमाणत्वाच्च नोक्ताः, अत्र च-

"संहितादिर्यतो व्याख्याविधिः सर्वत्र दृश्यते ।
नामादिविधिना ऽऽरब्धुं, न व्याख्या युज्यते ततः ॥१॥
इत्याहुरविभाव्यैव, स्याद्वादं नादिनोऽपरे ।
यदत्र निराकार्यमाचक्षाणेन तद्विधिम ॥२॥
स्यादस्तीत्यादिको वादः, स्याद्वाद इति गीयते ।
नयौ न च विमुच्यायं, द्रव्यपर्यायवादिनौ ॥३॥
अतश्चैतद्द्वयोपेतं, स्वं मतं समुदाहृतम् ।
सज्ञाततत्त्वसंविद्भिः, स्याद्वादः परमेश्वरैः ॥४॥
ते हि तीर्थविधौ सर्वे, मातृकाख्यं पदत्रयम् ।
उत्पत्तिविगमध्रौव्यख्यापकं सम्प्रचक्षते ॥५॥
उत्पत्तिविगमावत्र, मतं पर्यायवादिनः ।
द्रव्यार्थिकस्य तु ध्रौव्यं, मातृकाख्यपदत्रयं ॥६॥
ततश्च-द्रव्यत्वमन्वयित्वेन, मृदो यद्वद् घटादिषु ।
तद्वदेवान्वयित्वेन, नामस्थापनयोरपि ॥७॥
अन्वयित्वं तु सर्वत्र, सङ्केतान्नाम्न उच्यते ।
स्थापनायाश्च तदुपक्रियातो बुद्धितोऽपि वा ॥८॥
तन्नामस्थापनाद्रव्यनिक्षेपैरनुवर्तितः ।
द्रव्यार्थिकनयो भावनिक्षेपादितरः पुनः ॥९॥

तथा च महामतिः-"तित्थयरवयणसंगहविसेसपत्थारमूलवागरणी ।
दव्वट्ठिओवि पज्जवणओ य सेसा वियप्पा सिं ॥१०॥"

(तथा) "नामंठवणादवियत्ति एस दव्वट्ठियस्स निक्खेवो ।
भावत्ति पज्जवट्ठिय परूवणा एस परमत्थो ॥११॥"

यद्वा किल: किलैताभ्यां, किन्त्वेष विधिराश्रित: ।
यद्याख्या वस्तुतत्त्वस्य, बोधायैव विधीयते ॥१२॥

तच्च नामादिरूपेण, चतूरूपं व्यवस्थितम् ।
नामाद्येकान्तवादानामयुक्तत्वेन संस्थिते: ॥१३॥

(तथाहि-नामनय आह-)यतो नाम विना नास्ति, वस्तुनो ग्रहणं तत: ।
नामैव तद्यथा कुम्भो, मृदेवान्यो न वस्तुन: ॥१४॥

(तथाहि)-यत् प्रतीतावेव यस्य प्रतीतिस्तदेव तस्य स्वरूपं, यथा मृत्प्रतीतावेव प्रतीयमानस्य घटस्य मृजेव रूपं, नामप्रतीतावेव च प्रतीयते वस्तु, न च विनापि नाम निर्विकल्पकविज्ञानेन वस्तुप्रतीतिरस्तीति हेतोरसिद्धता, सर्वसंविदां वाग्रूपत्वात्, तथा च भर्तृहरि: -

वाग्रूपता चेद्दोधस्य, व्युत्क्रामेतेह शाश्वती ।
न प्रकाश: प्रकाशेत, सा हि प्रत्यवमर्शिनी ॥"

यदि च नामरूपमेव वस्तु न स्यात ततश्च तदवगतावपि वस्तुनि संशयादीनामन्यतमदेव स्यात, तथा च पूज्या: -

"संसय विवज्जओ वाऽणज्झवसाओऽवि वा जहिच्छाए ।
होज्जऽत्थे पडिवत्तो न वत्थुधम्मो जया नामं ॥"

स्थापनानय आह-

स्थापनेत्याकार:, ततश्चप्रमाणमिदमेवार्थस्याऽऽकारमयतां प्रति ।
नामादि न विनाऽऽकारं, यत: केनापि वेद्यते ॥

तथाहि - नाम्नोऽर्थान्तरेऽपि वर्तयितुं शक्यत्वान्न तदुल्लेखेऽप्याकारावभासमन्तरेण नियत - नीलाद्यर्थग्रहणमित्याकारग्रहण एव ग्रहात् सर्वस्य सिद्धमाकारमयत्वं, ततो ज्ञानज्ञेयाभिधान: - भिधेयादिसकलमाकारारूपितमेव संव्यवहारावतारि, तद्विकलस्य खपुष्पस्येवासत्त्वात्, उक्तं-

"आगारो च्चिय मइसद्दवत्थुकिरियाफलाभिहाणाइं ।
आगारमयं सव्वं जमनागारं तयं नत्थि ॥१॥
न घरानुमयं वत्थुं आगाराभावओ खपुप्फं व ।
उवलंभव्ववहाराभावओ नाणगारं च ॥२॥"

(द्रव्यनय आह-) यथा नामादि नाकारं, विना संवेद्यते तथा ।
नाऽऽकारोऽपि विना द्रव्यं, सर्वं द्रव्यात्मके तत: ॥

तथाहि- द्रव्यमेव मृदादिनिखिलस्थासकोशकुशूलकुटकपालाद्याकारानुयायि वस्तु सत्, तस्यैव तत्तदाकारानुयायिन: सद्बोधविषयत्वात्, स्थासकोशाद्याकाराणां तु मृद्द्रव्यातिरेकिणां कदाचिदनुपलम्भात्, तच्चोत्पादादिसकलविकारविरहितं तथा तथाऽऽविर्भावतिरोभावमात्रा - न्वितं मम्मूर्च्छितसर्वप्रभेदनिर्भेदबोजं द्रव्यमगृहीततरङ्गादिप्रभेदस्तिमितसर: सलिलवत्,

"दव्वपरिणाममेत्तं मोत्तूणागारदरिसणं किं तं ? ।

उप्पायक्खयरहियं दव्वं चिय निच्चियारेति ॥१॥
आविब्भावतिरोभावमेत्तपरिणामकारणमचिंतं।
निच्चं बहुरूवंपिय नडोव्व वेसंतरावत्थो ॥२॥"

(भावनय आह-) सम्यग् विवेच्यमानोऽत्र, भाव एवावशिष्यते।
पूर्वापरविविक्तस्य, यतस्तस्यैव दर्शनम् ॥

तथाहि- भावः पर्यायः, तदात्मकमेव च द्रव्यं, तदतिरिक्तमूर्तिकं हि तद दृश्यमदृश्यं वा?, यदि दृश्यं, नास्ति तद्व्यतिरेकेण अनुपलभ्यमानत्वात्, खरविषाणवत्, न हि वलितमौलितपटी-कृतत्रुटितसङ्घर्वटितादिविचित्रभवनबहिर्भूतमिह मृत्रादि द्रव्यमुपलभ्यमस्ति, अदृश्यमपि नास्ति, तत्साधकप्रमाणाभावात्, खपुष्पवत्, ततः प्रतिसमयमुदयव्ययात्मके स्वयं भवनमेव भावा-ख्यमस्ति, उक्तं च-

"भावत्थंतरभूयं किं दव्वं नाम? भाव एवायं।
भवणं पइसमयुदयव्वयाओ विवरी य॥"

परमार्थतस्त्वयम् सर्वत्रैवैव सर्वोपि, विषयाणां व्यवस्थितिः। संवेदनं च नामादिविकलं नानुभूयते॥ तथाहि-

घटोऽयमिति नामैतत्, पृथुबुध्नादिनाऽऽकृतिः।
मृद्द्रव्यं भवनं भावो, घटे दृष्टं चतुष्टयम् ॥१॥
तत्राणि नाम साकारमाकारो नाम नो विना।
तौ विना नापि चान्योऽन्यमुन्नगावपि संस्थितौ ॥२॥"
मयूराण्डरसे यद्वद्वर्णा नीलादयः स्थिताः।
सर्वेऽप्यन्योऽन्यमुन्मिश्रास्तद्वन्नामादयो घटे॥३॥

इत्थं चैतत्, परस्परमन्यापेक्षितयैकांशोपनयानां सम्यग्नयत्वात्, इतरथा 'उत्पादव्ययध्रौव्य-युक्तं सदि'ति प्रत्यक्षादिप्रमाणप्रतीतसल्लक्षणानुपपत्तेश्च। किञ्च- शब्दादपि घटादेर्नामादिभेद-रूपेणैव अर्थार्थे बुद्धिपरिणामो जायते, इत्यतोऽपि नामादिचतुरूपतैव सर्वस्य वस्तुनः,

"नामादिभेदसदत्थबुद्धिपरिणामभावओ नियमं।
जं वत्थु अत्थि लोए चउप्पज्जायं तयं सव्वं॥"
(ततश्च)- चतुष्काभ्यधिकस्येह, न्यासो योऽन्यस्य दर्श्यते।
एतदन्तर्गतः सोऽपि, ज्ञातव्यो धीधनान्वितैः ॥१॥

इत्यलं प्रसङ्गेन। सम्प्रति निर्युक्तिरनुश्रि(स्रि)यते- तत्र नामस्थापने आगमतो नोआगमतश्च ज्ञशरीरभव्यशरीररूपश्च द्रव्यसंयोगः सुगम इति मन्वानो व्यतिरिक्तद्रव्यसंयोगमभिधातुमाह-'द्विविधस्त्वि'ति द्विविध एव, द्रव्येण द्रव्यस्य वा, 'स'मिति सङ्गतो योगः संयोगः, संयोगद्वै-विध्यमेवाह संयुक्तमेव संयुक्तकम् अन्येन संश्लिष्टं, तस्य संयोगो-वस्त्वन्तरसम्बन्धः संयुक्तकसंयोगो ज्ञातव्यः, 'इतरेतर' इति इतरेतरसंयोगः, चः समुच्चये 'एवः' अवधारणे, उक्तमेव द्विविधं एष संयोग इति गाथासमासार्थः॥ विस्तरार्थं त्वभिधित्सुः 'यथोद्देशं निर्देश' इति न्यायतः संयुक्तकसंयोगं भेदेनाह-

नि.[३१] संजुत्तसंजोगा सच्चित्तादीण होइ दव्वाण ।
दुममनुसुरनरमाइं संतइकम्मेण जीवस्स ॥

वृ. 'संयुक्तकसंयोगः' अनन्तरमेवाभिहितस्वरूपः, 'सचित्तादीनां' सचित्ताचित्तमिश्राणां भवति द्रव्याणाम्, अमीषामुदाहरणान्याह 'दुममनुसुरनरमाइ'त्ति अत्र मकारस्यालाक्षणिकत्वात् गुरुव्यत्ययाच्च 'द्रुमपृथ्वीवर्णादीनां' प्रत्येकं चादिशब्दसम्बन्धात्सचित्तद्रव्याणां द्रुमादीनाम् अचित्तद्रव्याणामण्वादीनां सुवर्णादीनां च मिश्रद्रव्यस्य तु मनुष्यादिकर्मणोपलक्षितस्य जीवस्य, अत्र चाण्वादीनां सुवर्णादीनामिदमुदाहरणद्वयमचित्तद्रव्याणां सचित्तमिश्रद्रव्यापेक्षया भूयस्त्वख्यापनार्थम्, एतद्भूयस्त्वं च जीवेभ्यः पुद्गलानामनन्तगुणत्वात्, उक्तं च

"जीवा पोग्गल समया दस पएसा य परजवा चेव ।
थोवाऽणंतानंता विसेसमहिया दुवेऽणंता ॥"

इति, अनेन च सचित्तादेः संयोगद्रव्यस्य त्रैविध्यात् संयुक्तकसंयोगस्य त्रैविध्यमुक्तमिति गाथार्थः ॥ तत्र द्रुमादीनां सचित्तसंयुक्तद्रव्यसंयोगं विवरीतुमाह-

नि.[३२] मूले कंदे खंधे तया य साले पवाल्लपत्ते हि ।
पुप्फफलबीएहि अ संजुत्तो होइ दुममाई ॥

वृ. 'मूले कन्दे स्कन्धे' इति सर्वत्र सूत्रत्वात् तृतीयार्थे सप्तमी, ततश्च 'मूलेन' अधःप्रसर्पिणा स्वावयवेन 'कन्देन' तेनैव मूलस्कन्धान्तरालवर्तिना 'स्कन्धेन' स्थुडेन 'त्वचा' छविरूपया 'साले'त्ति एकारोऽलाक्षणिकः, ततः 'शालाप्रवालपत्रैः' शाखापल्लवपलाशैः, फले इत्यत्रापि-कार-स्यार्थत्वे, ततः 'पुष्पफलबीजैश्च' प्रसिद्धैरेव 'संयुक्तः' सम्पन्नो भवति 'दुममाईहि' मकारो ऽलाक्षणिकः ततो द्रुमादिः, आदिशब्दाद्गुच्छगुल्लम्बादिश्च संयुक्तकसंयोग इति प्रक्रमः । स हि प्रथममृदगच्छाङ्कुरात्मकः पृथिव्याः संयुक्त एव मूलेन संयुज्यते, ततो मूलसंयुक्तक एव कन्देन, कन्दसंयुक्त एव स्कन्धेन एवं त्वक्शाखाप्रवालपत्रपुष्पफलबीजैरपि पूर्वसंयुक्त एवोत्तरोत्तरैः संयुज्यते इति भावनीयम, ननूक्तमेवं द्रुमादेर्द्रव्यात्तात संयुक्तकसंयोगस्य च गुण-त्वात्कथं द्रुमादिरेव स इति, अत्रोच्यते, धर्मधर्मिणोः कथञ्चिदनन्यत्वादेवमुक्तमित्यदोषः, एवमुत्तरभेदयोरपीति गाथार्थः ॥ अण्वादीनामचित्तसंयुक्तकद्रव्यसंयोगं स्पष्टयितुमाह-

नि.[३३] एगरस एगवन्ने एगगंधे तहा दुफासे अ ।
परमाणू खंधेहि अ दुपएसाईहि नायव्वो ॥

वृ. एकः-अद्वितीयस्तिक्तादिरसान्यतमो रसोऽस्येति एकरसः, तथैकः कृष्णादिवर्णान्यतमो वर्णोऽस्येति एकवर्णः, एवम् 'एकगन्धः' सुरभ्यादितरान्यतरगन्धान्वितः, 'एगे' इत्येकारस्वा-लाक्षणिकत्वात्, तथा द्वौ चाविरुद्धौ स्निग्धशीतादात्मकौ स्पर्शावस्येति द्विस्पर्शः, चशब्दः स्वगतानन्तभेदोपलक्षकः, क एवंविधः ? इत्याह- परमः-तदन्यसूक्ष्मतरासम्भवात् प्रकर्षवान् स चासावणुश्च परमाणुः, उपलक्षणत्वाद् द्व्यणुकादिश्च, 'स्कन्धैश्च' स्कन्धशब्दाभिधेयैः, किं-भ्याह-द्वौ प्रदेशावाद्यभागावस्येति द्विप्रदेशो-द्व्यणुकः, स आदिर्येषां त्रिप्रदेशादीनामचित्त-महास्कन्धपर्यन्तानां ते तथा तैः, चशब्दात्परमाण्वन्तरैर्वर्णान्तरादिभिश्च, संयुज्यमान इति गम्यते, 'विज्ञेयः' विशेषेणावसङ्ख्यातासङ्ख्यातानन्तभङ्गविकल्पनात्मकेनावबोद्धव्यः, पाठान्तरतो

ज्ञातव्यः, अचित्तसंयुक्तकसंयोग इति प्रक्रमः, अयमर्थः

कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरसवर्णगन्धो द्विस्पर्शः कार्यलिङ्गश्च ॥

इत्येवंलक्षणपरमाणुर्यदा द्व्यणुकादिस्कन्धपरिणतिमनुभवति तदा रूक्षादिसंयुक्त एव द्व्यणुकादिभिः स्कन्धैः संयुज्यते, यदा वा तिक्ततादिपरिणतिमपहाय कटुकत्वादिपरिणतिं प्रतिपद्यते तदाऽपि वर्णादिभिः संयुक्त एव कटुकत्वादिना संयुज्यते इति संयुक्तसंयोग उच्यते । अत्र च कृष्णपरमाणुः कृष्णत्वमपहाय नीलत्वं प्रतिपद्यत इत्येको भङ्गः, एवं रक्तत्वं पीतत्वं शुक्लत्वं चेति चत्वारः, तथाऽयमेव रसपञ्चकगन्धद्वयस्पर्शाष्टकतारतम्यजनितैश्च स्वस्थान एव द्विगुणकृष्णत्वादिभिः परमाण्वन्तरद्विप्रदेशादिभिश्च यावदादिवक्षावशतः षड्डस्थानपतितानन्तांशिका भङ्गरचनामवाप्नोति, एवं वर्णान्तररसस्पर्शगन्धस्वगततारतम्ययुक्तोऽपि, तथा द्विप्रदेशादिश्च । यच्च- 'वण्णरसगंधफासा पोग्गलाणं च लक्खणं' इत्यादिसूत्रेषु वर्णस्यादित्वेन दर्शनेऽपि 'एगरसवण्णं' ति रसस्य प्रथमत उपादानं तदनानुपूर्व्या अपि व्याख्याङ्गत्वेन गाथास्थानानुलोम्येन वेति भावनीयम् । सूक्ष्मादीनां च प्राच्यवर्णकादिसंयुक्तानामेव विशेषविशेषणकादिभिः संयोगो ऽचित्तसंयुक्तसंयोग इत्यनुयोगेन सूत्रान्तर एवेति नियुक्तिकृता न व्याख्यात इति गाथार्थः ॥ दृष्टान्तपूर्वकं सन्ततिक्रमेण जीवस्य मिश्रसंयुक्तकद्रव्यसंयोगं व्यक्तीकर्तुमाह-

नि.[३४] जह धाउ कनगाई सभावं जोगमंजुया हुंति ।
इअ संतइकम्मेणं अनाइसंजुत्तओ जीवो ॥

वृ. 'यथा' इत्युदाहरणोपन्यासार्थः, यथा 'धातवः' कनकादयोऽनिधृतो मृदादयः 'कनगाइ'-त्ति सूत्रत्वात्कनकादिभिः, आदिशब्दात्ताम्रादिभिश्च, किमित्याह-स्वभावेन संयोगः-प्रकृतौश्च-राद्यरथान्तरव्यापारनपेक्षयोपलक्ष्यानुपलक्ष्यरूपो यः सम्बन्धस्तेन संयुता मिश्रिताः स्वभावसंयोगसंयुताः 'भवन्ति' विद्यन्ते 'इती'त्यमुनैवार्थान्तरनिरपेक्षत्वलक्षणेन प्रकारेण सन्ततिः-उत्तरोत्तरनिरन्तरोत्पत्तिरूपः प्रवाहस्तयोपलक्षितं कर्म-ज्ञानावरणादि सन्ततिकर्म तेन, न विद्यते आदिः-प्राथम्यमस्येत्यनादिः स चेह प्रक्रमात्संयोगस्तेन 'स' मिति अन्योन्यानुगयाणं इमं च तं च त्ति । विभयणमजुत्तं' इत्यागमाद्विभागाभावतो युक्तः श्लिष्ट इत्यनादिसंयुक्तः स एव अनादिसंयुक्तकः, यद्वा-संयोगः संयुक्तं ततोऽनादिसंयुक्तमस्येति अनादिसंयुक्तकः, क इत्याह-जीवति जीविष्यति जीवितवांश्चेति जीवः, मिश्रसंयुक्तकद्रव्यसंयोग इति प्रक्रमः च इदमुक्तं भवति-जीवा ह्यनन्तकर्मानुवर्गणाभिरात्मेष्टितप्रचेष्टितोऽपि न स्वरूपं चैतन्यमतिवर्तते, न चाचैतन्यं कर्मणाम् इत तद्युक्तलया विवक्ष्यमाणोऽसौ संयुक्तकमिश्रद्रव्यं, ततोऽस्य कर्मप्रदेशान्तरैः संयोगो मिश्रसंयुक्तकद्रव्यसंयोग उच्यते, इह च जीवकर्मणोरनादिसंयोगस्य धातुकनकादिसंयोगदृष्टान्तद्वारेणाभिधानं तद्देवानादित्वेऽप्युपायतो जीवकर्मसंयोगस्याभावख्यापनार्थम्, अन्यथा मुक्त्यनुष्ठानवैफल्यापत्तेरिति भावनीयमिति गाथार्थः ॥

उक्तः संयुक्तकसंयोगः, इतरेतरसंयोगमाह

नि.[३५] इयरेयरसंजोगो परमाणूणं तहा पएसाणं ।

अभिधेयमणाभिधेओ अभिलाओ चेव संबंधो ॥

वृ. इतरेतरस्य परमाणोः संयोगो-घटना इतरेतरसंयोगः 'परमाणूनाम्' उक्तरूपाणां, तथा प्रक्रमेणसूक्ष्मातिशयलक्षणेन दिश्यन्ते कथ्यन्त इति प्रदेशाः धर्मास्तिकायादिसम्बन्धिनो निर्विभागा भागास्तेषाम्, 'अभिधेयं' ति प्राकृतत्वादभिप्रेतः, इतरेतरसंयोगइति योज्यते, एवमुत्तरत्रापि, अभिप्रेतत्वं चास्याभिप्रेतविषयत्वाद्, एतद्विपरीतोऽनभिप्रेतः, अभिलप्यते-आभिमुख्येन व्यक्तमुच्यतेऽनेनार्थ इत्यभिलापो-वाचकः शब्दस्तद्विषयत्वात् अभिलापः, चः समुच्चये, 'एवः' अवधारणे, सम्बन्धशब्दानन्तरं चैतौ योज्यौ, ततः सम्बन्धनं सम्बन्धः, स चैव स्वस्वामित्वादिरनेकधा वक्ष्यमाणः, एतावद्भेद एवायमितरेतरसंयोग इति चावधारणस्यार्थ इति गाथासमासार्थः ॥ परमाणूनां संयोगमाह

नि. [३६] दुविहो परमाणूणं हवइ य संठाणखंधओ चेव।
संठाणे पंचविहो दुविहो पुन होइ खंधेसु ॥

वृ. द्वौ विधौ प्रकारावस्येति द्विविधः-द्विभेदः, कौऽसौ !-'परमाणूनाम्' इति परमाणुसम्बन्धी, प्रक्रमादितरेतरसंयोगो भवति, 'चः' पूरणे, कथं द्विविध इत्याह- 'संठाणखंधतो' त्ति संतिष्ठतेऽनेन रूपेण पुद्गलात्मके वस्त्विति संस्थानम्-आकारविशेषः ततस्तमाश्रित्य, 'स्कन्धतः' स्कन्धमाश्रित्य, चः समुच्चये, 'एवः' भेदावधारणे। द्विविधस्यापि प्रत्येकं भेदानाह-'संस्थाने' संस्थानविषयः 'पञ्चविधः' पञ्चप्रकारः 'द्विविधः' द्विप्रकारः, पुनःशब्दो वाक्यान्तरोपन्यासे भवति 'स्कन्धेषु' स्कन्धविषय इति गाथार्थः ॥ इह च संस्थानस्कन्धभेदद्वारक एवायमितरेतरसंयोगभेद इति तदभिधानमुचितं, तत्र 'यथोद्देशं निर्देश' इति न्यायतः संस्थानभेदाभिधानप्रस्तावेऽप्यत्यवक्तव्यत्वात् स्कन्धभेदं हेतुभेददारेणाह-

नि. [३७] परमाणुपुग्गला खलु दुन्नि व बहुगा य संहता संता।
निव्वत्तयंति खंधं तं संठाणं अनित्थंत्थं ॥

वृ. परमाणुपुद्गलौ खलु द्वौ वा बहव एव बहुकाः त्रिप्रभृतयः, ते च परमाणुपुद्गलाः 'संहताः' एकपिण्डतामापन्नाः सन्तो 'निर्वर्तयन्ति' जनयन्ति, किमित्याह-'स्कन्धं' द्व्यणुकादिकम्, अनेन च द्विपरमाणुजन्यतया बहुपरमाणुजन्यत्वेन च स्कन्धस्य द्विभेदत्वमुक्तं, खलुशब्दोऽत्र विशेषं द्योतयति, स चायम्-इह रूक्षः स्निग्धो वा एकगुणः सम्बध्यमानो द्विगुणादिकेनैव स्वस्वरूपापेक्षया सम्बध्यते, न तु समगुणेनैकगुणादिकेन वा. किमुक्तं भवति ? एकगुणस्निग्धस्त्रिगुणस्निग्धेन सम्बध्यते त्रिगुणस्निग्धः पञ्चगुणस्निग्धेन पञ्चगुणस्निग्धः सप्तगुणस्निग्धेनेत्यादि, तथा द्विगुणस्निग्धश्चतुर्गुणस्निग्धेन चतुर्गुणस्निग्धः षड्गुणस्निग्धेनेत्यादि, एवमेकगुणरूक्षगुणरूक्षेण त्रिगुणरूक्षः पञ्चगुणरूक्षेनेत्यादि, तथा द्विगुणरूक्षश्चतुर्गुणरूक्षः चतुर्गुणरूक्षः षड्गुणरूक्षेनेत्यादि, एवं द्विगुणादिकसम्बन्धो भावनीयः, न त्वेकगुणस्निग्ध एकगुणस्निग्धेन द्विगुणस्निग्धेन वा सम्बध्यते द्विगुणस्निग्धो द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा यावदनन्तगुणस्निग्धोऽप्यनन्तगुणस्निग्धेन समगुणेनैकगुणादिकेन वा, एवमेकगुणरूक्ष एकगुणरूक्षेण द्विगुणरूक्षेण वा द्विगुणरूक्षो द्विगुणरूक्षेण त्रिगुणरूक्षेण वा यावदनन्तगुणरूक्षोऽप्यनन्तगुणरूक्षेण समगुणेनैकगुणादिकेन वेति.

अन्ये त्वाहुः - एकगुणादि स्वस्थानापेक्षया द्विगुणेन रूपाधिकेन सम्बध्यत इति, अयमत्र विशेषः खल्वशब्देन सूच्यते, तथा चैककस्य स्वस्थानापेक्षया द्विगुणो द्विक एव स च रूपाधिकस्त्रिक एव इति त्रिगुणेनैकत्वैकगुणस्य सम्बन्धः, तथा द्विगुणस्य पञ्चगुणेन त्रिगुणस्य सप्तगुणेन चतुर्गुणस्य नवगुणेन पञ्चगुणस्यैकादशगुणेनेत्यादि, उक्तं च-

"समनिद्धयाइ बंधो न होइ समलुक्खयाइ य न होइ।
वेमायनिद्धलुक्खत्तणेण बंधो उ खंधाणं ॥१॥"

(तथा) "दोण्ह जहन्नगुणाणं निद्धाणं तह य लुक्खदव्वाणं।
एगाहिएवि य गुणे न होंति बंधस्स परिणामो ॥२॥
निद्धविउणाहिएणं बंधो निद्धस्स होइ दव्वस्स।
लुक्खत्त विउणाहिएम य लुक्खस्स समागमं पप्प ॥३॥"

स्निग्धरूक्षपरस्परबन्धविचारणायां तु समगुणयोर्द्विसमगुणयोर्वा जघन्यवर्जयोर्बन्धपरिणतिरिति विशेषः। तथा चाह-

"बज्झंति निद्धलुक्खा विसमगुणा अहव समगुणो जे उवि।
बज्झंतु जहन्नगुणे वज्झंती पोग्गला एवं ॥"

इत्यादि, येन विशेषण संस्थानात् स्कन्धस्य भेदेनोपादानं तमाविष्कर्तुमाह- 'तं संठाणंति' प्राकृतत्वादेवं पाठः, तस्य-स्कन्धस्य संस्थानम्-आकारस्तत्संस्थानम्, अनेन-हृदि विवर्तमानतया प्रत्यक्षेण परिमण्डलादिना ऽनन्तरोक्तप्रकारेणेत्थमित्थं तिष्ठति इत्थंस्थं, न तथा अनित्थंस्थम्, अनेन नियतपरिमण्डलाद्यन्यतराकारं संस्थानं शेषो ऽनियता ऽऽकारस्तु स्कन्ध इत्यनयोर्विशेष इत्युक्तं भवति। आह-स्कन्धानामपि परस्परं बन्धो ऽस्ति, यदुक्तम्- "एसेव य खंधाणं दुपएसाईण बंधपरिणामो' त्ति अतः किं न तेषामपोद्गलेतरसंयोग इहोक्तः ?, उच्यते, उक्त एव, तेषां प्रदेशसद्भावात्, प्रदेशानां च 'इयरेतरसंजोगो परमाणूणं तहा पएसाणं' इत्यनेन तदभिधानादिति गाथार्थः ॥ संस्थानभेदानाह-

नि.[३८] परिमंडले य वट्टे तंसे चउरंसमायए चेव।
घनपयर पढमवज्जं ओयपएसे य जुम्मे य ॥

वृ. लिङ्गं व्यभिचार्यपी'ति प्राकृतलक्षणात् सर्वत्र लिङ्गव्यत्ययः, ततः परिमण्डलं, प्रक्रमात् संस्थानमेवमुत्तरत्रापि, तच्च बहिर्वृत्ततावर्त्मस्थनप्रदेशजनितमन्तःशुषिरं, यथा वलयस्य, यशब्द उत्तरभेदापेक्षया समुच्चये, वृत्तं तदेवान्तःशुषिरविरहितं यथा कुलालचक्रस्य, त्र्यस्रं-त्रिकोणं, यथा शृङ्गाटकस्य, चतुरस्रं-चतुष्कोणं, यथा कुम्भिकायाः, आयतं-दीर्घं, यथा दण्डस्य, चः पूर्वभेदापेक्षया समुच्चये 'एव' अवधारणे, तत इयत एव संस्थानभेदाः, 'घनपयर'त्ति घनं च प्रतरं च घनप्रतरं, प्राकृतत्वाद्विन्दुलोपः, सर्वत्र च प्रतरपूर्वक एव घनः प्ररूप्यते, इहापि तथैवोपदर्शयिष्यते, ततः प्रतरघन इति निर्देशः प्रायः, अल्पाक्षर(चूत)त्वात् घनशब्दस्य पूर्वनिपातः, ततश्चैककं परिमण्डलादि प्रतरं घनं च. भवतीति गम्यते, तथा प्रथमम्- आद्यं वर्जयति-त्यजतीति प्रथमवर्जं-परिमण्डलरहितं वृत्तादिसंस्थानचतुष्कमित्यर्थः 'ओयपएसे य'त्ति ओजःप्रदेशं च-त्रिप्रदेशसङ्ख्यपरमाणुकं 'जुम्मे य' त्ति प्रक्रमाद् युग्मप्रदेशं च, उभयत्र चः समुच्चये।

इह च घनप्रतरभेदमेव कृत्वादित्थं भिद्यते, ततः प्रतरवृत्तमोजःप्रदेशं युग्मप्रदेशं च, तथा घनवृत्तमोजःप्रदेशं युग्मप्रदेशं च, एवं त्र्यस्रादिष्वपि चतुर्विधं भावनीयं, परिमण्डलं वर्जनीयं च, समसङ्ख्यानुक्रमेण तस्य समपर्वतैर्विषमभेदासम्भवात्, तथा च द्विविधमेव परिमण्डलमिति गाथार्थः॥ इह च परिमण्डलादि प्रत्येकं जघन्यमुत्कृष्टं च, तत्रोत्कृष्टं सर्वमनन्ताणुनिष्पन्नसङ्ख्यप्रदेशावगाढं चेत्येकरूपतया ऽनुक्तमपि सम्प्रदायाज्ज्ञातुं शक्यमिति तदुपेक्ष्य जघन्यं तु प्रतिभेदमन्यान्यरूपतया न तथेति तदुपदर्शनार्थमाह-

नि.[३९] पंचग बारसगं खलु सत्तग बत्तीसगं तु वट्टंमि।
तिय छक्कग पनतीसा चत्तारि य हुंति तंसंमि॥

नि.[४०] नव चेव तहा चउरो सत्तावीसा य अट्ठ चउरंसे।
तिगदुगपन्नरसे ऽवि य छच्चेव य आयए हुंति॥

नि.[४१] पणयालीसा बारस छब्भेया आयवंमि संठाणे।
बीसा चत्तालीसा परिमंडलि हुंत संठाणे॥

वृ- आसामर्थः स्पष्ट एव, नवरमायते षड्भेदाभिधानस्यापिल्लेन प्रागनुद्दिष्टस्यापि श्रेणिगतभेदद्वयस्यार्थिकस्य तत्र सम्भवात्, तथा परिमण्डलादित्वे ऽपि संस्थानानां वृत्तादिभेदानामोजःप्रदेशप्रतरादीनामनन्तर्गृहीतत्वात् प्रत्यासत्तिन्यायेन यथाक्रमं पञ्चकादिधिः प्रथममुपदर्शनं, पश्चात् परिमण्डलभेदद्वयस्य। तत्रौजःप्रदेशप्रतरवृत्तं पञ्चाणुनिष्पन्नं पञ्चाकाशप्रदेशावगाढं च, तत्रैको ऽणुः [illegible] स्थाप्यते, [illegible] चैवमेव, युग्मप्रदेशप्रतरवृत्तं द्वादशप्रदेशं द्वादशप्रदेशावगाढं च, तत्र हि चतुर्षु प्रदेशेषु निरन्तरमन्तश्चतुरो ऽणून्निधाय तत्परिक्षेपेणाष्टौ स्थाप्यन्ते, ओजःप्रदेशं घनवृत्तं सप्तप्रदेशं सप्तप्रदेशावगाढं च, तच्चैवम्- तत्रैव पञ्चप्रदेशे प्रतरवृत्ते मध्यस्थितस्याणोरुपरिष्टादधस्ताच्चैकैको ऽणुरवस्थाप्यते, ततो द्वयसंहिताः पञ्च सप्त भवन्ति ३, युग्मप्रदेशं घनवृत्तं द्वात्रिंशत्प्रदेशं द्वात्रिंशत्प्रदेशावगाढं च, तत्र प्रतरवृत्तो प्रदर्शितद्वादशप्रदेशोपरि द्वादशान्ये, तदुपरि चत्वारो ऽधस्ताच्च तावन्त एवाणवः स्थाप्याः, एते मीलिता द्वात्रिंशद्भवन्ति ४। ओजःप्रदेशं प्रतरत्र्यस्रं त्रिप्रदेशं त्रिप्रदेशावगाढं च, तत्र च तिर्यग्निरन्तरमनुद्वयं विन्यस्याऽऽद्यस्याध एकोऽणुः स्थाप्यः, युग्मप्रदेशं प्रतरत्र्यस्रं षट्प्रदेशं षट्प्रदेशावगाढं च, तत्र च तिर्यग्निरन्तरं त्रयोऽणवः स्थाप्यन्ते तत आद्यस्याधस्तादधऊर्ध्वभावेन द्वयं द्वितीयस्य त्वध एकोऽणुः स्थाप्यः, ओजःप्रदेशं घनत्र्यस्रं पञ्चत्रिंशत्प्रदेशं पञ्चत्रिंशत्प्रदेशावगाढं च, तत्र च तिर्यग्निरन्तराः पञ्चाणवो न्यस्यन्ते, तेषां चाधो ऽधः क्रमेण तिर्यगेव चत्वारस्त्रयो द्वावेकश्चाणुः स्थाप्यन्ते, अस्य च प्रतरस्योपरि सर्वपङ्क्तिष्वन्त्यान्त्यपरमाणुपरिहारेण दश, तथैव तेषामुपर्युपरि षट् त्रय एकश्चेति क्रमेणाणवः स्थाप्याः एते मीलिताः पञ्चत्रिंशद्भवन्ति ३,

युग्मप्रदेशं घनत्र्यस्रं चतुष्प्रदेशं चतुष्प्रदेशावगाढं च, तत्र च प्रतरत्र्यस्र एव त्रिप्रदेश एकतरस्योपर्येकोऽणुर्दीयते, ततो मीलिताश्चत्वारो भवन्ति ४। ओजःप्रदेशं प्रतरचतुरस्रं नवप्रदेशं नवप्रदेशावगाढं च, तत्र च तिर्यग्निरन्तरं त्रिप्रदेशास्तिस्रः पङ्क्तयः स्थाप्याः, युग्मप्रदेशं प्रतरचतुरस्रं च चतुष्प्रदेशं चतुष्प्रदेशावगाढं च, तत्र चातिर्यग्निरन्तरं द्विप्रदेशे द्वे पङ्क्ती स्थाप्येते, ओजःप्रदेशं घनचतुरस्रं सप्तविंशतिप्रदेशं सप्तविंशतिप्रदेशावगाढं च, तत्र च नवप्रदेशस्य

प्रतरचतुरस्रमेवाध उपरि च तथैव नव नवानवः स्थाप्याः, ततश्चिगुणा नव सप्तविंशतिर्भवति ३. युग्मप्रदेशं घनचतुरस्रम् अप्रदेशमष्टप्रदेशावगाढं च. तत्र चतुष्प्रदेशस्य प्रतरस्यैवोपरि चत्वारश्चत्वार एव स्थाप्याः, ततो द्विगुणाश्चत्वारोऽष्टौ भवन्ति ४। ओजःप्रदेशं श्रेण्यायतं त्रिप्रदेशं त्रिप्रदेशावगाढं च, तत्र च तिसृणां निरन्तरस्थानां त्रयः स्थाप्याः, युग्मप्रदेशं श्रेण्यायतं द्विप्रदेशं द्विप्रदेशावगाढं च, तत्र च तथैवाद्वयं न्यस्यते, ओजः प्रदेशं प्रतरायतं पञ्चदशप्रदेशं पञ्चदशप्रदेशावगाढं च, तत्र प्राग्वत् षड्भिक्तत्रये पञ्च पञ्चाग्रवः स्थाप्याः, युग्मप्रदेशं प्रतरायतं षट्प्रदेशं षट्प्रदेशावगाढं च, तत्र च प्राग्वत् षड्भिक्तद्वये त्रयस्त्रयोऽग्रवः स्थाप्याः, ओजःप्रदेशं घनायतं पञ्चचत्वारिंशत्प्रदेशं पञ्चचत्वारिंशत्प्रदेशावगाढं च, तत्र पञ्चदशप्रदेशस्य प्रतरायतस्यैवाधः उपरि च तथैव पञ्चदश पञ्चदशाग्रवः स्थाप्याः, ततस्त्रिगुणाः पञ्चदश पञ्चचत्वारिंशद् भवन्ति ५.

युग्मप्रदेशं घनायतं द्वादशप्रदेशं द्वादशप्रदेशावगाढं च, तत्र च षट्प्रदेशस्य प्रतरायतस्यैवोपरि तथैव तावन्तोऽग्रवः स्थाप्याः, ततो द्विगुणाः षट् द्वादश भवन्ति ६। परिमण्डलमुक्तन्यायतं द्विभेदमेव, तत्र प्रतरपरिमण्डलं विंशतिप्रदेशं विंशतिप्रदेशावगाढं च, तत्र च प्राच्यादिषु चतसृषु दिक्षु चत्वारश्चत्वार एव विदिक्षु चैकैकः स्थाप्यः, मीलिताश्चैते विंशतिर्भवन्ति, घनपरिमण्डलं चत्वारिंश-त्प्रदेशं चत्वारिंशत्प्रदेशावगाढं च, तत्र च तस्या एव विंशतेरुपरि तथैव विंशतिरन्या स्थाप्यते, विंशतिश्च द्विगुणा चत्वारिंशद् भवन्ति २। इत्थं चैषां प्ररूपणागतोऽपि न्यूनदेशतायां यथोक्त-संस्थानासम्भवात्, न चैतान्यतीन्द्रियत्वेनातिशायिगम्यत्वात् सर्वथा अनुभवमारोपयितुं शक्यन्ते, स्थापनादिद्वारेण च कथञ्चिच्छक्यानीति तथैव दर्शितानीति गाथात्रयभावार्थः॥ उक्तः परमाणु-नामितरेतरसंयोगः, सम्प्रति तमेव प्रदेशानामाह-

नि. [४२] धम्माइपएसाणं पंचण्ह उ जो पएससंजोगो।
तिण्हपुण अणाईओ साईओ होंति दुण्हं तु॥

वृ. धर्मादीनां-धर्माधर्माकाशजीवपुद्गलानां प्रदेशाः उक्तरूपा धर्मादिप्रदेशास्तेषां, 'पञ्चानाम्' इति सम्बन्धिनां धर्मादीनां पञ्चसङ्ख्यत्वेन पञ्चसङ्ख्यानां 'तुः' पुनरर्थः, संयोग इति गम्यते, स च श्रुतत्वाद्धर्मादिभिः स्कन्धैस्तया तदन्तर्गतैर्देशैः प्रदेशान्तरैश्च सजातीयेतरैः, असौ किमित्याह-प्रदेशानां संयोगः प्रकृतत्वादितरेतरसंयोगाख्यः प्रदेशसंयोगः, उच्यते इति शेषः, अमुमेव विभागमाह-'त्रयाणां पुनः' पुनःशब्दस्य विशेषद्योतकत्वात् धर्माधर्माकाश प्रदेशानां धर्मादिभिरेव त्रिभिस्तेषामेव देशैः प्रदेशान्तरैश्च प्रकृतत्वादितरेतरसंयोगः 'अनादिः' आदिविकलः सदा संयुक्तत्वादेषां, 'सादिकः' आदियुक्तो भवति 'द्वयोः' पारिशेष्याज्जीव प्रदेशपुद्गलप्रदेशयोः, तथाहि-संयुज्यन्ते वियुज्यन्ते संसारिजीवप्रदेशाः कर्मपुद्गलप्रदेशाश्च परस्परं धर्मादिप्रदेशैश्च सह, तुशब्दो विशेषं द्योतयति, स चायं-जीवप्रदेशानां धर्मादित्रयदेश-प्रदेशापेक्षया पुद्गलस्कन्धाद्यपेक्षया च सादिसंयोगः, धर्मादिस्कन्धत्रयापेक्षया त्वनादिः, पुद्गलप्रदेशानामपि धर्मादिस्कन्धत्रयापेक्षयाऽनादिः, शेषापेक्षया तु सादिः।

इह च धर्मादिस्कन्धानां तद्देशानां च यः परस्परं संयोगः स न प्रदेशसंयोगमन्तरेणेति तदभिधानत एवोक्तो मन्तव्यः, अप्रदेशस्य तु परमाणोर्धर्मादिभिः संयोग उक्तानुसारतः सज्ञान एव इति नोक्त इति गाथार्थः॥ उक्तः प्रदेशानामितरेतरसंयोगः, सम्प्रत्यभिप्रेतानभिप्रेतभेदरूपं-

नि.[४३] अभिप्पेयमणभिप्पेअ पंचसु विसएसु होइ नायव्वो।
अनुलोमाऽभिप्पेओ अनभिप्पेओ अ पडिलोमो ॥

वृ. 'अभिप्पेय'त्ति अभिप्रेतः 'अनभिप्पेओ'त्ति चास्य गम्यमानत्वादनभिप्रेतश्च, प्रक्रमादितरेतरसंयोगः, किमित्याह-'पञ्चसु' विषयेषु शब्दादिपञ्चकगोचरे, अर्थादिन्द्रियमनसां तद्ग्रहणप्रवृत्तौ ग्राह्यग्राहकभावः, स चाभिप्रेतार्थविषयोऽभिप्रेतः अनभिप्रेतार्थविषयस्त्वनभिप्रेतः भवति ज्ञातव्यः, आह-आस्त्वेवाभिप्रेतानभिप्रेतार्थविषयत्वेनाभिप्रेतः अनभिप्रेतश्चेतरेतरसंयोगः, अभिप्रेतानभिप्रेतार्थौ तु कावितिं, अत्रोच्यते, 'अनुलोम' इन्द्रियाणां प्रमोदहेतुतयाऽनुकूलश्चवयकाकलीगीतादिरभिप्रेतः, अनभिप्रेतस्तु प्रतिलोम उक्तविपरीतकाकस्वरगदितिं गाथार्थः ॥ इह गाथापश्चार्द्धेन मनोनिरपेक्षप्रवृत्त्यभावेऽपीन्द्रियाणां प्राधान्यमाश्रित्य तदपेक्षयाऽभिप्रेतोऽनभिप्रेतश्चार्थ उक्तः, सम्प्रति मनोऽपेक्षया तमेवाह-

नि.[४४] सव्वा ओसहजुत्ती गंधजुत्ती य भोयणविही य।
रागविहि गीयवाइयविही अभिप्पेयमनुलोमो ॥

वृ. 'सर्वा:' समस्ता, कोऽर्थः ?-इन्द्रियाणामनुकूलाः प्रतिकूलाश्च, अस्य चौषधयुक्त्यादिभिः प्रत्येकं सम्बन्धः, ततश्च औषधादीनाम-अगुरुकुङ्कुमादीनां सज्जिकाराजिकादीनां च युक्तयो-योजनानि समविषमविभागनीतयो वा औषधयुक्तयः, गन्धानां-गन्धद्रव्याणां श्रीखण्डादीनां लक्षणादीनां च युक्तयः गन्धयुक्तयः ताश्च, भोजनस्य-अन्नस्य विधयः-शाल्योदनादयः कोद्रवपक्तादयश्च भेदाः भोजनविधयः ते च, 'रागविहिगीयवाइयविहि'त्ति सूत्रत्वाद्वचनव्यत्यये रागविधयश्च गीतवादित्रविधयश्च रागविधिगीतवादित्रविधयः, तत्र रञ्जनं रागः-कुसुम्भादिना वर्णान्तरापादनं तद्विधयः-स्निग्धत्वादयो रूक्षत्वादयश्च गीतवादित्रविधय इति, तत्र विधिशब्दस्योभयत्र योगात्, गीतं-गानं तद्विधयः-कोकिलारुतानुकारित्वादयः काकस्वरानुविधायित्वादयश्च, वादित्रम्-आतोद्यम्, इह चोपचारात्तद्ध्वनिः तद्विधयो-मृदङ्गादिस्वनाः केवलकरटिकादिस्वनाश्च, चशब्दो नृत्तादिविधिसमुच्चयार्थः, एते किमित्याह-'अभिप्पेयं'ति अभिप्रेतार्था उच्यन्ते, कीदृशाः सन्त इत्याह-अनुलोमाः, कोऽर्थः ? शुभा अशुभा वा मनोऽनुकूलतया प्रतिभासमानाः, एतेनैतदप्याह-यथैत एव देशकालावस्थादिवशतो विचित्राभिसन्धितया जन्तूनां मनसोऽननुलोमाः सन्तोऽनभिप्रेतोऽर्थः।

इत्थं व्याख्यानतो विशेषप्रतिपत्तिमाश्रित्येन्द्रियापेक्षया मनोऽपेक्षया च भेदेनाभिप्रेतोऽनभिप्रेतश्चार्थो व्याख्यातः, अथवाऽनन्तरगाथापश्चार्द्धेनाविशेषणेन्द्रियाणां मनसश्चानुकूलोऽभिप्रेतोऽर्थः इतरस्त्वनभिप्रेत उक्तः, एतद्गाथयाऽपि स एव विशेषतो दर्शित इति व्याख्येयम्, अत्र च सर्वा इति सर्वप्रकारा अनुलोमा इति चेन्द्रियमनसामनुकूलाः, शेषं प्राग्वत्। उपेक्षणीयस्त्विहानभिधानं नयस्य कस्यचिन्मतेनानभिप्रेत एव तस्यान्तर्भावादिति गाथार्थः ॥ उक्तोऽभिप्रेतानभिप्रेतभेदरूप इतरेतरसंयोगः, साम्प्रतममुमेवाभिलापविषयमाह-

नि.[४५] अभिलावे संजोगो दव्वे खित्ते अ कालभावे अ।
दुगसंजोगाईओ अक्खरसंजोगमाईओ ॥

वृ. 'अभिलापः' उक्तस्वरूपः, तद्विषयः 'संयोगः' प्रक्रमादभिलापेतरेतरसंयोगः, अयं

च त्रिधा सम्भवति, तत्रैकोऽभिलाप्यस्याभिलाप्येन द्वितीयोऽभिलाप्यस्याभिलाप्यान्तरेण तृतीयो वर्णस्य वर्णान्तरेण। तत्राद्योऽभिलाप्यस्य द्रव्यादिभेदेन चतुर्विधत्वात् 'द्रव्ये' इति द्रव्यविषयः, स चार्थाद् घटादिशब्दस्य पृथुबुध्नोदराद्याकारपरिणतद्रव्येण वाच्यवाचकभावलक्षणः सम्बन्धः, एवं 'क्षेत्रे च' क्षेत्रविषयः, आकाशध्वनेरवगाहदानलक्षणक्षेत्रेण 'कालभावे' इति समाहारद्वन्द्वः, ततः 'काले' कालविषयः समयादिश्रुतेर्वर्तनादिव्यङ्ग्येन कालपदार्थेन, 'भावे च' भावविषय औदयिकादिवचसो मनुष्यत्वादिपर्यायेण, चशब्दोऽत्र पूर्वत्र च समुच्चये।

द्वितीयमाह-द्विकस्य संयोगो द्विकसंयोगः स आदिर्यस्य त्रिकसंयोगादेः सोऽयं द्विकसंयोगादिकः, इहाभिलापसंयोगस्य त्रिविधत्वात् तत्र चाद्यस्यानन्तरमेवोक्तत्वात् तृतीयस्य चाभिधास्यमानत्वाद् अर्थाद् द्विकग्रहणेनाभिलाप्यद्वयमेव गृह्यते, तत्र द्विकसंयोगो यथा-स च स च तौ, त्रिकसंयोगो यथा-स्त्री च स च, अत्रापि च शब्दौ योज्यौ स च स च स्त्री च तथा स च तौ चेत्यनुक्तावप्येकत्राभिलाप्यार्थद्वयमन्यत्र चाभिलाप्यार्थत्रयं सह प्रतीयते, अभिलापसंयोगत्वं चास्याभिलापद्वारकत्वादभिलाप्येन सह प्रतीतेः।

तृतीयमाह अक्षरे च अक्षराणि च अक्षराणि तेषां संयोगः अक्षरसंयोगः स आदिर्यस्यां दानाद्यशेषवर्णधर्मसंयोगस्य सोऽयमक्षरसंयोगादिकः, मकारोऽत्राक्षणिकः, तत्राक्षरयोः संयोगो यथा - क इति, अक्षराणां संयोगः यथा श्रीरिति, उदात्तादिवर्णधर्मसंयोगास्तु स्वधिया भावनीयाः, अस्याप्यभिलाप्यसंयोगत्वं वर्णादीनां कथञ्चिदभिलापान्यत्वेन तदात्मकत्वात्, यद्वाऽक्षरसंयोग इत्यनेन सर्वोऽपि व्यञ्जनसंयोग उक्तः, आदिशब्देन त्वर्थसंयोगः, एतद्विशेषणं च द्विकसंयोगादिरिति योजनीयम्, अन्यत् प्राग्वत्, द्रव्यसंयोगत्वं चास्याभिलापस्य द्रव्यत्वात्, द्रव्यत्वं चास्य स्पर्शवत्त्वेन गुणाश्रयत्वात्, वक्ष्यति हि-"गुणाणमासओ दव्वं"ति, न च स्पर्शवत्त्वमसिद्धं, प्रतिघातजनकत्वात्, तथाहि-यत् प्रतिघातजनकं तत्स्पर्शवत् दृष्टं, यथा लोष्ठादि, प्रतिघातजनकश्च शब्दः अन्यथा तथाविधशब्दश्रुतावनुभवसिद्धश्रोत्रान्तःपीडाया असम्भवादिति गाथार्थः॥

उक्तोऽभिलापविषय इतरेतरसंयोगः, सम्प्रति सम्बन्धनसंयोगरूपस्य तस्यावसरः, सोऽपि द्रव्यक्षेत्रकालभावभेदतश्चतुर्धा, तत्र द्रव्यसंयोगसम्बन्धनमाह-

नि. [४६] संबंधणसंजोगो सच्चित्ताचित्तमीसओ चेव।
दुपयाइ हिरण्णाई रहतुरगाई अ बहुहा उ॥

वृ. सम्बध्यते प्रायो ममेदमित्यादिबुद्धितोऽनेनास्मिन् वाऽऽत्माऽप्यविधेन कर्मणा सहेति सम्बन्धनः स चासौ संयोगश्च सम्बन्धनसंयोगः, 'सच्चित्ताचित्तमीसओ चेव'त्ति प्राग्वत् सुपो लुकि सचित्तोऽचित्तो मिश्रकः, चः समुच्चये, एवः भेदावधारणे, यथाक्रममुदाहरणान्याह द्विपदेत्यादिना, सचित्ते द्विपदादिः, आदिशब्दाच्चतुष्पदापदपरिग्रहः, तत्र च द्विपदसंयोगो यथा-पुत्री, चतुष्पदसंयोगो यथा-गोमान्, अपदसंयोगो यथा-पनसवान्। अचित्ते हिरण्यादिः, आदिशब्दान्मणिमुक्तादिग्रहः, स च हिरण्यवानित्यादि। मिश्रे रथयोजितस्तुरगः मध्यपदलोपे रथतुरगस्तदादिः, आदिशब्दाच्छकटवृषभादिपरिग्रहः, स च रथिक इत्यादि, 'चः' समुच्चये, 'बहुधा तु' इति बहुप्रकार एव, तुशब्दस्यैवकारार्थत्वात्, इह च सचित्तविषयत्वात् सम्बन्धनसंयोगोऽपि सचित्त इत्यादि सर्वत्र भावनीयम्।

आह यदि सचित्तादिविषयत्वादयौ सचित्तादिरिति व्यपदिश्यते, एवं सत्त्वात्मन एकासौ तैः सह, तत उभयनिष्ठत्वात्तेनापि किं न व्यपदिश्यते ?, उच्यते, यथाङ्कुरादिवदसाधारणेनैव व्यपदेशः, आत्मनश्च सर्वैरप्यसाधारणैरिति तस्य साधारणत्वान्न तेनेह व्यपदेशः पृथिव्यादिगिरिवाङ्कुरस्येति न दोषः, एवमुत्तरत्रापि, इति ॥ अमुमेव क्षेत्रकालभावविषयमभिधित्सुराह-

नि. [४७] खेत्ते काले य तहा दुण्हवि दुविहो उ होइ संजोगो।
आयाम हेड्ड ओवरि आएसे चेव नाएसे ॥

वृ. 'क्षेत्रे' क्षेत्रविषयः, 'काले च' कालविषयश्च 'तथा' इति तेनागमप्रसिद्धप्रकारेण 'द्वयोरपि' इत्यनयोरेव क्षेत्रकालयोः 'द्विविधः' द्विभेदः, चशब्दो भावस्मि इत्यत्र योक्ष्यते, भवति संयोगः प्रक्रमात् सम्बन्धनसंयोगः, न च क्षेत्रे काले इत्युक्ते द्वयोरपीति पौनरुक्त्याद् दुष्टं, लोकेऽपि हस्तिन्यश्च द्वयोरपि गावो हस्तिन्यश्च द्वयोरपि गाव इत्येवंविधप्रयोगदर्शनाद्, 'भावे च' भावविषयश्च, संयोग इति संटङ्कः, भवति द्विविधः, कथं क्षेत्रादिर्द्विविध्यमित्याह-'आएसे चेव नाएसे'त्ति आङिति मर्यादया विशेषरूपावतिक्रमात्मिकया दिश्यते कथ्यत इति आदेशो विशेषस्तस्मिन्, तदन्यस्त्वनादेशः सामान्यं, पृथक् चैवशब्दयोः समुच्चयावधारणार्थयोर्भिन्नक्रमत्वात्तस्मिंश्चैव, तत्र क्षेत्रविषयोऽनादेशो यथा-जम्बूद्वीपजोऽयम्, आदेशो तु यथा-भारतोऽयं, कालविषयोऽनादेशो यथा दौष्यमिकोऽयम्, आदेशे तु-वार्षान्तिकोऽयं, भावविषयोऽनादेशो भाववानयम्, आदेशे त्वौदयिकादिभाववानिति।

सामान्यावगमपूर्वकत्वाद्विशेषावगमस्यैवमुद्दिश्यते, निर्युक्तौ तु विपर्ययाभिधानं जम्बूद्वीप इति सामान्यमपि लोकापेक्षया विशेषो भवतीति विशेषोऽपि मगधाद्यपेक्षया सामान्यमित्यादिरूपेण सर्वत्र सामान्यविशेषयोरनियतत्वख्यापनार्थं, भावे च भवति द्विविध इति भिन्नवाक्यताऽभिधानमनन्तरग्रन्थस्यैतद्विषयत्वख्यापनार्थमिति गाथार्थः ॥ अत्र क्षेत्रकालगतयोरुद्देशानादेशयोरल्पवक्तव्यत्वेन सम्प्रदायादपि सुज्ञानत्वात् तद्विषयः सम्बन्धनसंयोगोऽपि सुज्ञान एवेति मत्वा भावगतादेशानादेशविषयं तमभिधित्सुरुक्तहेतोरेव प्रथममनादेशविषयं भेदत आह-

नि. [४८] ओदइअ ओवसमिए खइए य तहा खओवसमिए य।
परिणाम सन्निवाए छव्विहो होअनाएसो ॥

वृ. तत्रौदयः-शुभानां तीर्थंकरनामादिप्रकृतीनाम् अशुभानां च मिथ्यात्वादीनां विपाकतोऽनुभवनं तेन निर्वृत्तः औदयिकः, क्वचित्तु 'उदयिए'त्ति पठ्यते तत्र च पदावसानवर्तिन एकारस्य गुरुत्वेऽपि विकल्पतो लघुत्वानुज्ञानात् नात्र छन्दोभङ्गः, उक्तं हि-

"इहियाय बिंदुजुया एओ सुद्धा पयावसाणंमि।
रहवंजणसंजोए परंमि लहुओ विभासाए ॥"

विपाकप्रदेशानुभवरूपतया द्विभेदस्याप्युदयस्य विष्कम्भणमुपशमस्तेन निर्वृत्त औपशमिकः, क्षयः-कर्मणामत्यन्तोच्छेदः तेन निर्वृत्तः क्षायिकः स च, तथा क्षयश्च-अभाव उदयावस्थस्य उपशमश्च-विष्कम्भितोदयत्वं तदन्यस्य क्षयोपशमौ ताभ्यां निर्वृत्तः क्षायोपशमिकः स च, परीति सर्वप्रकारं नमनं-जीवानामजीवानां च जीवत्वादिस्वरूपादिस्वरूपानुभवनं प्रति प्रह्वीभवनं परिणामः, 'एदोदलोपो विसर्जनीयस्ये'ति विसर्गलोपो विसर्जनीयस्ये'ति विसर्ग-

लोपः, 'स' मिति संहतरूपतया नीतिजनियतं पतनं-गमनं, कोऽर्थः ? एकत्र वर्तनं, सन्निपातः-औदयिकादिभावानामेव द्वयादिसंयोगः, 'चः' सर्वत्र समुच्चये, इत्थं षड् विधाः-प्रकारा अस्येति षड्विधो भवति,'अनादेशः' सामान्यं, सामान्यत्वं चौदयिकादीनां गतिकषायादिविशेषेष्व-नुवृत्तिधर्मकत्वाद्, अनादेशस्य चाविशेषत्वे तद्विषयः कोऽपि व्यवहारः कथं भवतीति गाथार्थः ॥ इदानीमादेशविषयं तमेव भेदत आह-

नि.[४९] आएसो पुन दुविहो अप्पिअवववहारऽनप्पिओ चेव।
इक्किक्को पुन तिविहो अत्तान परे तदुभए य॥

वृ. 'आदेशः' अभिहितरूपः, पुनःशब्दो विशेषणेच 'द्विविधः' द्विभेदः, कथमित्याह 'अप्पियववहारऽनप्पिओ चेव'त्ति व्यवहारशब्दोऽत्र डमरुकमणिन्यायेनोभयत्र सम्बन्ध्यते, ततश्चार्पित इति व्यवहारो यस्मिन् सोऽयमर्पितव्यवहारः, मयूरव्यंसकादित्वात् समासः, अनर्पित व्यवहारस्तु तद्विपरीतः, तत्रार्पितो नाम क्षायिकादिर्भावः स्वाधारे भाववति ज्ञाताऽयमित्यादिरूपेण ज्ञानमस्येत्यादिरूपेण वा वचनव्यापारेण वक्त्रा स्थापितः, अनर्पितस्तु वस्तुनः साधारणत्वेऽपि निराधार एव प्ररूपणार्थं विवक्षितो यथा-सर्वभावप्रधानः क्षायिको भावः। अनयोरपि भेदानाह-'एकैकः' इत्यर्पितव्यवहारः अनर्पितव्यवहारश्च पुनस्त्रिविधः, कथमित्याह-'अत्ताण'त्ति आर्षत्वादात्मनि परस्मिन् तयोरात्मपरयोरुभयं तस्मिंश्च, विषयसप्तम्यश्चैताः, ततो विषयत्रै-विध्येनानयोस्त्रैविध्यम्, इहाप्यादेशभेदाभिधानद्वारेण सम्बन्धनसंयोगस्य भेद उक्तो भवति, तत्र चानर्पितस्य प्ररूपणामात्रसत्त्वेऽप्यर्पितप्रतिपक्षत्वेनैवात्रोपादानम्, अतो वस्तुतस्तस्यास-त्त्वान्न तेन कस्यचित्संयोगसम्भव इति न तद्भेदेन संयोगभेदः, अर्पितस्य त्वात्मपरोभया-र्पितभेदतस्त्रैविध्यात् तद्भेदेन त्रिविधः सम्बन्धनसंयोग इति गाथार्थः ॥

तत्राऽऽत्माऽर्पितसम्बन्धनसंयोगमाह-

नि.[५०] ओवसमिए य खइए खओवसमिए य पारिणामे अ।
एसो चउव्विहो खलु नायव्वो अत्तसंजोगो॥

वृ. औपशमिके यस्य भिन्नक्रमत्वात् क्षायिके च क्षायोपशमिके च सर्वत्र सम्यक्त्वादिरूपे जीवस्य(स्व) भावे 'तथा' तेनागमोक्तप्रकारेण चस्यास्यापि भिन्नक्रमत्वात् परिणामे च जीवत्वा-द्यात्मके च, सर्वत्र संयोग इति प्रक्रमः, पठ्यते च-'खओवसमिए य पारिणामे य' त्ति स्पष्टमेव, 'एषः' अनन्तरोक्त औपशमिकादिसंयोगः 'चतुर्विधः' चतुष्प्रकारः, 'खलु' निश्चितं 'ज्ञातव्यः' अवबोद्धव्यः, 'आत्मसंयोगः' इत्यात्मार्पितसम्बन्धनसंयोगः, अत्र ह्यात्मशब्देना-र्पितभाव एव धर्मधर्मिणोः कथञ्चिदनन्यत्वादुक्तः, तथा च वृद्धाः-'एए हि जीवमया भवंति, एएसु भावेसु जीवो नत्थो हवइ' तदात्मक इत्यर्थः, औपशमिकादिभावानां च प्रागनादेशतो-क्तावप्यत्रादेशत्वेनाभिधानं सम्यक्त्वादिविशेषनिष्ठत्वेन विवक्षितत्वाद् भावसामान्यापेक्षया वेति गाथार्थः ॥ किञ्च-

नि.[५१] जो सन्निवाइओ खलु भावो उदएण वज्जिओ होइ।
इक्कारससंजोगो एसो विय अत्तसंजोगो॥

वृ. यः सान्निपातिकः 'खलु' वाक्यालङ्कारे भावः 'उदयेन' औदयिकभावेन 'वर्जितः' रहितो भवति, एकादश-एकादशसङ्ख्याः संयोगाः-द्वयादिर्दशपर्यन्तो यस्मिन् = एकादश-संयोगः, सूचकत्वात् सूत्रस्यैतद्विषयो यः संयोगः, एषोऽपि, न केवलमौपशमिकादिसंयोग इत्यपिशब्दार्थः, 'चः' पूरणे, 'आत्मसंयोगः' प्राग्वदात्मार्पितसंयोगः, एकादशसंयोगाश्चैवं भवन्ति-औपशमिकक्षायिकक्षायोपशमिकपारिणामिकानां चतुर्णां षट् द्विकसंयोगाश्चत्वारस्त्रिकसंयोगा एकश्चतुष्कसंयोगः, एते च मीलिता एकादशेति गाथार्थः ॥

बाह्यार्पितसम्बन्धसंयोगमाह-

नि.[५२] लेसा कसायवेयण वेओ अन्नाणमिच्छ मोसं च।
जावइया ओदइया सव्वो सो बाहिरो जोगो ॥

वृ. 'लेश्या' लेश्याध्ययनेऽभिधास्यमानाः, कषायाश्च वक्ष्यमाणाः 'वेदना' च सातासातानुभवात्मिका कषायवेदनं, प्राकृतत्वाद्विन्दुलोपः, 'वेदः' पुंस्त्र्युभयाभिलाषाभिव्यङ्ग्यः, मिथ्यात्वोदयवशात्सदध्यवसायाभावकं सत् ज्ञानमज्ञानम्, उक्तं हि-

"जह दुव्वयणमवयणं कुच्छियसीलं असीलमसईए।
भन्नइ तह नाणंपि हु मिच्छद्दिट्ठिस्स अन्नाणं ॥"

अत एव मिथ्यात्वोदयभावित्वादस्यौदयिकत्वं, तद्दलिकेषु चार्पितत्वविवक्षया बाह्यार्पितत्वमिति भावीनयं, 'मिथ्ये'ति भावप्रधानत्वान्निर्देशस्य मिथ्यात्वम्, -अशुद्धिदलिकस्वरूपं, 'मिश्रं' शुद्धाशुद्धदलिकस्वभावं, चशब्दः शेषौदयिकभेदसमुच्चये, अत एवोपसंहारमाह-'यावन्तो' यत्परिणामा औदयिकाः, भावा इति गम्यते, प्रक्रमादेतद्विषयो यः संयोगः 'सर्वः' निर्विशेषः सः 'बाह्यः' परः तद्विषयत्वाद्, बाह्यसंयोग इति प्रकृतत्वात्सम्बन्धनसंयोगो ज्ञातव्य इति शेषः, इहापि बाह्यशब्देन प्राग्वद् बाह्यार्पित उक्तः।

आह-'भावा भवन्ति जीवस्यौदयिकः पारिणामिकश्चैव' इतिवचनादौदयिकोऽपि जीवभावत्वेन जीवार्पित एवेति कथं बाह्ये कर्मण्यर्पित इति, अत्रोच्यते, कर्मानुभवनमुदयः, अनुभवनं चानुभवितरि जीवेऽनुभूयमाने च कर्मणि स्थितं, तत्र यदाऽनुभवितरि जीवे विवक्ष्यते तदोदयः जीवगतो लेश्यादिपरिणामः प्रयोजनमस्येत्यौदयिकः-कर्मणः फलप्रदानाभिमुख्यलक्षणो विपाक एव तमाश्रित्य कर्मणि बाह्येऽर्पितत्वमिहौदयिकभावस्योक्तं, यदा त्वनुभूयमानस्थतया विवक्ष्यते तदोदये-कर्मणि फलप्रदानाभिमुख्यलक्षणे भव औदयिको लेश्याकषायादिरूपो जीवपरिणामः, तदाश्रयणेन चोच्यते- भावा भवन्ति जीवस्यौदयिक इत्यादि। इहापि चादेशान्तरेण वक्ष्यन्ति-'छव्विहो अत्तसंजोगो'त्ति 'सर्वः स' इति चैकवचनं बाह्यसंयोगस्य विधीयमानतया प्राधान्यात् प्रधानानुयायित्वाच्च व्यवहाराणामिति गाथार्थः ॥ उभयार्पितसम्बन्धसंयोगमाह-

नि.[५३] जो सन्निवाइओ खलु भावो उदएण मीसिओ होइ।
पन्नरससंजोगो सव्वो सो मीसिओ जोगो ॥

वृ. यः सान्निपातिकः खलु भावः 'उदयेन' औदयिकभावेन 'मिश्रितः' संयुतो भवति, कियत्संख्य इत्याह-पञ्चदश संयोगा अस्मिन्निति पञ्चदशसंयोगः, सर्वः सः किमित्याह-आत्मकर्मणोर्मिश्रत्वात्तदर्पितभावा अप्यौदयिकसहितौपशमिकादयो मिश्राः, ततस्तद्विषयत्वात्सं-

योगोऽपि मिश्रः, स एव मिश्रको योगः, प्रक्रमात् सम्बन्धनसंयोगो ज्ञेय इति शेषः, ते च षञ्च-दश संयोगा औदयिकममुञ्चता औपशमिकादिपञ्चकस्य द्विकत्रिकचतुष्कपञ्चकसंयोगतः कार्याः, तत्र चत्वारो द्विकसंयोगाः षट् त्रिकसंयोगाश्चत्वारश्चतुष्कसंयोगा एकः पञ्चकसंयोग एते च मीलिताः पञ्चदश, भावना तु वक्ष्यमाणेति गाथार्थः ॥

पुनरात्मसंयोगादीनेव प्रकारान्तरेणाभिधित्सुः प्रस्तावनामाह-

नि. [५४] बीओऽवि य आएसो अत्ताणे बाहिरे तदुभए य।
संजोगो खलु भणिओ तं कित्तेऽहं समासेणं ॥

वृ. द्वितीयोऽपि च न केवलमेक एव इत्यपि शब्दार्थः, चः पूरणे, 'आदेशः' प्रकारः, प्रस्तावना, प्रज्ञापनीयः, कोऽसौ इत्याह-आत्मनि बाह्ये तदुभयस्मिंश्च, संयोग इति सम्बन्ध-नसंयोगः, 'खलु' निश्चित 'भणित' उक्तो, गणधरादिभिरिति गम्यते, अनेन च गुरुपारतन्त्र्यमा-विष्करोति, 'तम्' इति द्वितीयमादेशं 'कीर्तये' संशब्दये' वर्तमानसामीप्ये वर्तमानवद् वे'ति भविष्यत्सामीप्ये लट्, 'अहम्' इत्यात्मनिर्देशः, 'समासेन' संक्षेपेणेति गाथार्थः ॥

तत्र तावदात्मसंयोगमाह-

नि. [५५] ओदइय ओवसमिए खइए य तहा खओवसमिए य।
परिणामसन्निवाए अ छव्विहो अत्तसंजोगो ॥

वृ. 'औदयिके' औदयिकविषये, एवम् औपशमिके च क्षायिके तथा क्षायोपशमिके च परिणामसन्निपाते च, सर्वत्र संयोग इति प्रक्रमः, तत एष 'षड्विधः' षड्भेदः आत्मभिः,-आत्मरूपैः संयोग इति सम्बन्धनसंयोगश्च आत्मसंयोगः, न चैषामेकैकेनात्मनः संयोगः सम्भवति, अपि तु द्वाभ्यां त्रिभिश्चतुर्भिः, पञ्चभिर्वा, तत्र द्वाभ्यां क्षायिकेण सम्यक्त्वेन ज्ञानेन वा पारिणामिकेन च जीवत्वेन, त्रिभिरौदयिकेन देवगत्यादिना क्षायोपशमिकेन मत्यादिना पारिणामिकेन च जीवत्वेन, चतुर्भिस्त्रिभिरे(वमे) व चतुर्थेनौपशमिकेन क्षायिकेण वा सम्य-क्त्वेन, पञ्चभिर्यदा क्षायिकसम्यग्दृष्टिरेवोपशमश्रेणिमारोहति तदौदयिकेन मनुष्यत्वेन क्षायिकेण सम्यक्त्वेन क्षायोपशमिकेन मत्यादिना औपशमिकेन चारित्रेण पारिणामिकेन जीवत्वेनेति, अत्र च त्रिकभङ्गक एकः चतुष्कभङ्गौ च द्वावेतौ त्रयोऽपि गतिचतुष्टयभाविन इति गतिचतुष्टयेन भिद्यमाना द्वादश भवन्ति, उक्तं च-

"ओदइय खओवसमो तइओ पुण पारिणामिओ भावो।
एसो पढमवियप्पो देवाणं होइ नायव्वो ॥१॥
ओदइय खओवसमो ओवसमियपारिणामिओ बीओ।
उदइयखइयपारिणामियखओवसमो भवे तइओ ॥२॥
एए चेव वियप्पा नरतिरिणरएसु हुंति बोद्धव्वा।
एए सव्वे मिलिया बारस होंती भवे भेया ॥३॥"

पञ्चभिर्मनुष्यस्यैव, तस्यैव तथोपशमश्रेण्यारम्भकत्वात्, तस्यामेव च तत्सम्भवात्, तथा चाह-

"ओदइए ओवसमिए खओवसमिए खए य परिणामे।
उवसमसेढिगयस्सा एस वियप्पो मुणेयव्वो ॥"

अन्यथाऽपि च त्रिभिः सम्भवति, तद्यथा-औदयिकेन मनुष्यत्वेन क्षायिकेण ज्ञानेन पारिणामिकेन जीवत्वेन, अयं च केवलिनाम्, उक्तं हि-"उदइयखइयपरिणामिय भावा होंति केवलीणं तु" प्रागुक्तभावोभयेन च सिद्धानामेव, उक्तं हि-"खाइय तह परिणामा सिद्धाणं होंति नायव्वा" एवं चैते पञ्चकत्रिकद्विकसंयोगभङ्गास्त्रयः पूर्वे च द्वादशेति मीलिताः पञ्चदश सम्भवन्ति, एत एव चाविरुद्धसान्निपातिकभेदाः पञ्चदश तत्र तत्रोच्यन्ते, तथा चाहुः-

"एए संजोएणं भावा पन्नरस होंति नायव्वा ।
केवलिसिद्धवसमसेढिएसु सव्वासु य गईसु ॥"

आह-एवं सान्निपातिकेनैवात्मनः सदा संयोगसम्भवात् कथं षड्विधत्वमात्मसंयोगस्य ?, उच्यते, सहभावित्वेऽपि भावानां यदैकस्य प्राधान्यं विवक्ष्यते तदैकेनाप्यात्मसंयोगसम्भव इत्यदोष इति गाथार्थः ॥ बाह्यसम्बन्धनसंयोगमाह-

नि. [५६] नामंमि अ खित्तंमि अ नायव्वो बाहिरो य(उ) संजोगो ।
कालेन बाहिरो खलु मीसोऽवि य तदुभए होइ ॥

वृ. 'नाम्ना' वस्त्वभिधायिध्वनिस्वभावेन, चकारात् द्रव्येण क्षेत्रेण चाकाशदेशात्मकेन, प्राकृतत्वात्, तृतीयार्थे सप्तमी, प्रकृतत्वात् संयोगः, किमित्याह-ज्ञातव्यः बाह्यविषयत्वाद्, 'बाह्यः' तुः पुनरर्थः 'संयोग' इति सम्बन्धनसंयोगः, 'कालेन' इति चास्य गम्यमानत्वात् कालेन च समयाऽऽवलिकादिना, तत एव संयोगो-बाह्यसम्बन्धनसंयोगः 'खलु' निश्चितं, ज्ञातव्य इति योज्यम्, इदमिहैदम्पर्यम्-यः पुरुषादेर्देवदत्तानाम्ना सम्बन्धोऽयं देवदत्त इत्यादिः द्रव्येण च दण्डीत्यादिः क्षेत्रेणारण्यजो नगरज इत्यादि कालेन दिनजो रजनिज इत्यादि, स सर्वो नामादिभिर्बाह्यैरेवेति बाह्यः सम्बन्धनसंयोगः, भावेन तु संयोग आत्मसंयोगत्वेनोक्त एव, भवितुरनन्यत्वात्, भावस्य, अन्यथा तस्याभावत्वप्रसङ्ग इतीह तस्यानभिधानं, तथा कालेन बाह्य इति च भिन्नवाक्यताकरणं केषाञ्चिन्मतेन कालस्यासत्त्वख्यापनार्थं, यद्वा नाम्नि क्षेत्र इति च विषयसप्तम्येव, यो हि येन सह भवति स तद्विषय एवेतिकृत्वा ।

आह-नाम्नोऽप्यभिलापत्वात् तद्विषयोऽपि संयोगोऽभिलापसंयोगः, स चोक्त एवेति कथं न पौनरुक्त्यम् ?, उच्यते, अभिलापसामान्यविषयोऽभिलापसंयोगः, अयं तु सम्बन्धनसंयोगस्य प्रकृतत्वात् तस्य च सकषायजीवसम्बन्धित्वात्, वक्ष्यति हि-"संबंधणसंजोगो कसायबहुलस्स होइ जीवस्स" त्ति, कस्यचिन्नाम्न्यप्यभिष्वङ्गसम्भवादभिष्वङ्गहेत्वभिलापविषय एवेति न पौनरुक्त्यं, 'मीसोऽवि य'त्ति 'अपिः' पुनरर्थे, 'चः' पूरणे, ततो मिश्रविषयत्वान्मिश्रः सम्बन्धसंयोगः पुनर्ज्ञातव्यः, यः कीदृगित्याह-'तदुभए'त्ति प्राग्वत्तदुभयेन-आत्मबाह्यलक्षणेन तदुभयस्मिन् वोक्तरूप एव भवति, यः संयोग इति शेषः, यथा-क्रोधी देवदत्तः क्रोधी कौन्तिको मानी सौराष्ट्रः क्रोधी वासन्तिकः, अत्र क्रोधादिभिरौदयिकभावान्तर्गतत्वेनात्मरूपैर्नामादिभिस्त्वात्मनोऽन्यत्वेन बाह्यरूपैः संयोग इत्युभयसम्बन्धनसंयोग उच्यते ।

नन्वेवं न कदाचिन्नामादिविकलैरौदयिकादिभिरौदयिकादिरहितैर्या-नामादिभिरात्मनः संयोग इति सर्वदोभयसम्बन्धनसंयोग एव प्राप्तः, सत्यमेतत्, किन्तु वक्तुरभिप्रायवैचित्र्यात्कदाचिदौदयिकादिभिः कदाचिन्नामादिभिः कदाचित्तदुभयेन संयोगविवक्षेति नात्मपरोभय-

सम्बन्धनसंयोगव्यवविरोध इति गाथार्थः ॥ प्रकारान्तरेण बाह्यसम्बन्धनसंयोगमाह-

नि. [५७] आयरिय सीस पुत्तो पिया य जननी य होइ धूया य।
भज्जा पइ सीउण्ह तमुज्जछायाऽऽयवे चेव ॥

वृ. आङित्यभिव्याप्त्या मर्यादया वा स्वयं पञ्चविधाचारं चरत्याचारयति वा परान् आचर्यते वा मुक्त्यर्थिभिरासेव्यत इति आचार्यः, 'अन्यत्रापी'ति वचनात् कर्तरि कर्मणि वा कृत्यप्रत्ययः, तथा शासितुं शक्यः शिष्यः पुनाति पितुराचारानुवर्तितयाऽऽत्मानमिति पुत्रः पाति-रक्षत्यपत्यमिति पिता स च जनयति-प्रादुर्भावयत्यपत्यमिति जननी सा च भवति बाह्यसम्बन्धनसंयोगविषयत्वाद्बाह्यसम्बन्धनसंयोग इति वृद्धाः, इदं च सर्वत्र योज्यं, दोग्धि च केवलं जननीं स्तन्यार्थमिति दुहिता, ततश्च 'दुहितरि श्वो हिलोपश्च' इतिवचनादादेर्धत्वे हिलोपे च 'उदृत् सुपुष्योत्सवोत्-सुकदुहितृषु" इति वचनात्, उत ऊत्वे च धूया, सा च, चकारत्रयं पूरणे, ध्रियते, पोष्यते भर्तेति भार्या पाति-रक्षति तामिति पतिः स्त्यायते धातूनामनेकार्थत्वात् कठिनीभवत्यस्मिन् जलादिति शीतम् उपति-दहति जन्तूमिति उष्णं तमयति-खेदयति जनलोचनानीति तमः औणादिको ऽसन् 'उज्ज' इति आर्षत्वादुद्द्योतयतीति उद्द्योतः पचादित्वादच्, छृयति छिनत्ति वाऽऽतपमिति छाया, आ-समन्तात्तपति संतापयति जगदिति आपतः, चशब्दो राजभृत्याद्यनुक्ताशेषसम्बन्धिसमुच्चये, लक्षणानुपपत्तौ च सर्वत्र नैरुक्तो विधिः, सुपश्च यत्रा श्रवणं तत्र प्राग्वल्लुक्, इदमत्रैदम्पर्यम्-

आचार्यः शिष्यादन्यत्वेन बाह्यः, ततो यस्तेन शिष्यस्य संयोगः शिष्य इत्युरिक्तवश्यमाचार्यमाक्षिपति यस्यायं शिष्य इत्याक्षेप्याक्षेपकभावलक्षणः स बाह्यो नेतिकृत्वा बाह्यसम्बन्धनसंयोगः, ततस्तद्विषयआचार्यो ऽप्युपचारात्तथोच्यते, एवं शिष्योऽप्याचार्यादन्यत्वेन बाह्यः, तेनाप्याचार्यस्य यः संयोगः-आचार्य इत्युक्तिरवश्यं शिष्यमाक्षिपति यस्यायमाचार्य इत्याक्षेप्याक्षेपकभावरूपः सोऽपि बाह्यो नेतिकृत्वा बाह्यसम्बन्धनसंयोगः, ततत्सद्विषयः शिष्योऽप्युपचारात्, तथोच्यते, एवं पुत्रपित्रादिद्वयेष्वपि भावनीयं, सर्वत्र सामान्येन परस्पराक्षेप्याक्षेपकभावः सम्बन्धः, विशेषनिरूपणायां त्वाचार्यशिष्यभार्यापतीनामुपकार्योपकारकभावः पितृपुत्रजननीदुहितृणां जन्यजनकभावः शीतोष्णादीनां च विरोधः सम्बन्धः, अत एव च विशेषाद् द्रव्यसंयोगत्वेऽप्यस्य भेदेनोपादानमिति गाथार्थः ॥

सम्प्रति संयोगप्रक्रमेऽप्याचार्यशिष्यमूलत्वादनुयोगस्य तयोः स्वरूपमाह-

नि. [५८] आयरिओ तारिसओ जारिसओ नवरि हुज्ज सो चेव।
आयरियस्सवि सीसो सरिसो सव्वेहिवि गुणेहिं ॥

वृ. आचार्यः, 'तादृशः' तथाविधः, यादृशः क इत्याह-यादृशो 'नवर' मिति यदि परं भवेत् 'स चेव' इति चः पूरणे, स एव-आचार्य एव, किमुक्तं भवति ?-आचार्यस्याचार्य एवान्यः सदृशो भवति, न पुनरनाचार्यः, आचार्यगुणानामन्यत्राविद्यमानत्वात्, न ह्याचार्यदन्यः षट्त्रिंशत्संख्यगणिगुणसमन्वित इहास्ति, तत्समन्वितत्वे त्वन्योऽपि तत्त्वत आचार्य एवेति। अथ क एते षट्त्रिंशद्गुणाः ?, उच्यन्ते, प्रत्येकं चतुष्प्रकारा अष्टौ गणिसम्पदो द्वात्रिंशत्, तत्र चाचारादिचतुर्विधविनयशीलनात् षट्त्रिंशद्भवन्ति, उक्तं च-

"अट्ठविहा गणिसंपइ चउग्गुणा नवरि होंति बत्तीसा।
विनओ य चउब्भेओ छत्तीस गुणा हवंतेए॥"

तत्राष्टौ गणिसम्पद इमाः--आचारसम्पत् १ श्रुतसम्पत् २ शरीरसम्पत् ३ वचनसम्पत् ४ वाचनासम्पत् ५ मतिसम्पत् ६ प्रयोगमतिसम्पत् ७ संग्रहपरिज्ञासम्पत् ८ तथा चाह-

"आयारसुयसरीरे वयणे वायणमतीपओगमती।
एएसु संपया खलु अट्ठविया संगहपरिन्ना॥"

तत्र चाचारसम्पत् चतुर्धा-संयमध्रुवयोगयुक्तता १ असम्प्रग्रहता २ अनियतवृत्तिः ३ वृद्धशीलता चेति ४ तत्र संयमः -चरणं तस्मिन् ध्रुवो-नित्यो योगः- समाधिस्तद्युक्तता, कोऽर्थः ?-सन्ततोपयुक्तता संयमध्रुवयोगयुक्तता १, असम्प्रग्रहः-समन्तात् प्रकर्षेण जात्यादिप्रकृष्टतालक्षणेन ग्रहणम्--आत्मनोऽवधारणं सम्प्रग्रहस्तदभावोऽसम्प्रग्रहः, जात्याद्यनुत्सिक्ततेत्यर्थः, २, अनियतवृत्तिः-अनियतविहाररूपा ३, वृद्धशीलता-वपुषि मनसि च निभृतस्वभावता निर्विकारतेतियावत् ४, १ श्रुतसम्पच्चतुर्धा-बहुश्रुतता १ परिचितसूत्रता २ विचित्रसूत्रता ३ घोषविशुद्धिकरणता ४ च, तत्र बहुश्रुतता- युगप्रधानागमता १ परिचितसूत्रता-उत्क्रमक्रमवाचनादिभिः स्थिरसूत्रता २ विचित्रसूत्रता-स्वपरसमयविविधोत्सर्गापवादादिवेदिता ३ घोषविशुद्धिकरणता-उदात्तानुदात्तादिस्वरशुद्धिविधायिता ४, २

शरीरसम्पच्चतुर्धा-आरोहपरिणाहयुक्तता १ अनवत्राप्यता २ परिपूर्णेन्द्रियता ३ स्थिरसंहननता च ४, इह चाऽऽरोहो-दैर्घ्यं परिणाहो-विस्तरः ताभ्यां तुल्याभ्यां युक्तताऽऽरोहपरिणाहयुक्तता १ अविद्यमानमवत्राप्यम्-अवत्रपणं लज्जनं यस्य सोऽयमनवत्राप्यः, यद्वाऽवत्रापयितुं-लज्जयितुमर्हः शक्यो वाऽवत्राप्यो लज्जनीयः न तथाऽनवत्राप्यस्तद्भावोऽनवत्राप्यता २ उभयत्राहीनसर्वाङ्गत्वं हेतुः, परिपूर्णेन्द्रियता-अनुपहतचक्षुरादिकरणता ३ स्थिरसंहननता-तपःप्रभृतिषु शक्तियुक्तता ४, ३ वचनसम्पच्चतुर्भेदा-आदेयवचनता १ मधुरवचनता २ अनिश्रितवचनता ३ असन्दिग्ध-वचनता ४, तत्राऽऽदेयवचनता-सकलजनग्राह्यवाक्यता १, मधुरं रसवद् यदर्थतो विशिष्टार्थवत्तयाऽर्थावगाढत्वेन शब्दतश्चापरुषत्वसौस्वर्यगाम्भीर्यादिगुणोपेतत्वेन श्रोतुराह्लादमुपजनयति तदेवंविधं वचनं यस्य स तथा तद्भावो मधुरवचनता २ अनिश्रितवचनता-रागाद्यकलुषित-वचनता ३ असन्दिग्धवचनता-परिस्फुटवचनता ४, ४

वाचनासम्पच्चतुर्धा-विदित्वोद्देशनं १ विदित्वा समुद्देशनं २ परिनिर्वाप्य वाचना ३ अर्थनिर्यापणेति ४, तत्र विदित्वोद्देशने विदित्वा समुद्देशने ज्ञात्वा परिणामिकत्वादिगुणोपेतं शिष्यं यद् यस्य योग्यं तस्य तदेवोद्दिशति समुद्दिशति वा, अपरिणामिकादावपक्वघटनिहितजलोदाहरणतो दोषसम्भवात्, २ परीति-सर्वप्रकारं निर्वापयतो निरो निर्दग्धादिषु भृशार्थस्यापि दर्शनात् भृशं गमयतः-पूर्वदत्तालापकादि सर्वात्मना स्वात्मनि परिणमयतः शिष्यस्य सूत्रगताशेषविशेषग्रहणकालं प्रतीक्ष्य शक्त्यनुरूपप्रदानेन प्रयोजकत्वमनुभूय परिनिर्वाप्य वाचना-सूत्रप्रदानं परिनिर्वाप्यवाचना ३, अर्थः-सूत्राभिधेयं वस्तु तस्य निरिति भृशं यापना-निर्वाहणा पूर्वापरसाङ्गत्येन स्वयं ज्ञानतोऽन्येषां च कथनतो निर्गमना निर्यापणा ४, ५।

मतिसम्पत् अवग्रहेहापायधारणारूपा चतुर्द्धा, अवग्रहादयश्च तत्र तत्र प्रपञ्चिता एवेति न

विविच्यन्ते ६। प्रयोगमतिसम्पच्चतुर्था-आत्मपुरुषक्षेत्रवस्तुविज्ञानात्मिका, तत्राऽऽत्मज्ञानं-वादादिव्यापारकाले किममुं प्रतिवादिनं जेतुं मम शक्तिरस्ति नवा ? इत्यालोचनं १, पुरुषज्ञानं-किमयं प्रतिवादि पुरुषः सांख्यः सौगतोऽन्यो वा ?, तथा प्रतिभादिमानितरो वेति परिभावनं २, क्षेत्रज्ञानंकिमिदं मायाबहुलमन्यथा वा ?, तथा साधुभिरभावितं भावितं वा नगरादीति विमर्शनं ३, वस्तुज्ञानं-किमिदं राजाऽमात्यादि सभासदादि वा वस्तु दारुण्यमदारुणं भद्रकमभद्रकं वेति निरूपणं ४, ७

संग्रहपरिज्ञा तु बालदुर्बलग्लाननिर्वाहकबहुजनयोग्यक्षेत्रग्रहणलक्षणैका १ निषद्यादि-मालिन्यपरिहाराय फलकपीठोपादानाऽऽत्मिका द्वितीया २ यथासमयमेव स्वाध्यायोपधिस-मुत्पादनप्रत्युपेक्षणभिक्षादिकरणात्मिका तृतीया ३ प्रव्रजकाध्यापकरत्नाधिकादिगुरूणामुप धिवहनविश्रामसंपूजनाभ्युत्थानदण्डकोपादानादिरूपा चतुर्थीति ४, ८।

इत्युक्ता अष्टौ चतुर्गुणा आचारादिगणिसम्पदः, विनयस्तूत्तरत्राचार्यविनयप्रस्तावेऽभिधा-स्यते, इति गतं प्रासङ्गिकं, प्रकृतमुच्यते-तत्राऽऽचार्यस्य स्वरूपमभिहितं, शिष्यस्याह-आचार्यस्य, अपिभिन्नक्रमः, ततः शिष्योऽपि, न केवलमाचार्यस्ताऽदृशो यादृशो नवरं स एवेति वचनादाचार्य इत्यपिशब्दार्थः, 'सदृशः' तुल्यः, सर्वैरपि न कतिपयैरेव, कैः ?, 'गुणैः' साधारणैः क्षान्त्यादिभिरिति गम्यते, यद्वा लक्षणे तृतीया, ततः सर्वैरपि स्वगुणैर्लक्षितः शिष्य आचार्यस्य सदृश इति योज्यं, सादृश्यं च स्वगुणमाहात्म्यविभूतित उभयोरपि यथोक्तान्यर्थमुक्तत्व)मेव, अथवाऽऽचार्यस्यापीति अपेरेवकारार्थत्वात् स्वगुणोपलक्षितः शिष्यः सदृश एव-अनुरूप एव, अनुरूपार्थस्यापि सदृशशब्दस्य दर्शनात्, यथाऽऽत्मसदृशं कुर्यात्, कुलानुरूपमित्यर्थः, अननुरूपस्तु तत्त्वतोऽशिष्य एवेति भावः, अथ के अमी शिष्यगुणाः, ? उच्यन्ते,

'भावविआनानमनुयत्तणा उ भत्ती गुरूण बहुमानो।
दक्खत्तं दक्खिन्नं सीलं कुलमुज्जमो लज्जा ॥१॥
सुस्सूसा पडिपुच्छा सुनणं गहणं च ईहणमवाओ।
धरणं करणं सम्मं एमाई होंति सीसगुणा ॥२॥"

इति गाथार्थः ॥ इत्थमनुयोगोपयोगित्वादाचार्यशिष्ययोः स्वरूपक्तं, प्रकारान्तरेणोभय-सम्बन्धनसंयोगमाह-

नि.[५९] एवं नाणे चरणे सामित्ते अप्पणो उ(य) पिउनोत्ति।
मज्झं कुलेऽयमस्स य अहयं अब्भितरो मित्ति ॥

वृ. 'एवम्' अनन्तरोक्तबाह्यसंयोगवदाक्षेप्याक्षेपकभावेन 'ज्ञाने' ज्ञानविषयः 'चरणे' चरण-विषयः, आत्म न उभयसम्बन्धनसंयोगो ज्ञातव्य इति वृद्धाः, अत्र भावना-ज्ञानेनात्मभूतेन संयोगो, ज्ञानमित्युक्तिर्निराश्रयस्य निर्विषयस्य च ज्ञानस्यासम्भवादवश्यं ज्ञानिनं च चाऽऽ-क्षिपतीति, ज्ञानाक्षिप्तेन च ज्ञेयेन बाह्येन तद्द्वारकः संयोग इत्युभयसंयोगः। एवं चरणे-नाप्यात्मभूतेनोक्तवत्तदाक्षिप्तेन चर्यमाणेन च बाह्येन संयोग इत्युभयसम्बन्धनसंयोगः, अयमाक्षे-प्याऽऽक्षेपकभावे उभयसम्बन्धनसंयोग उक्तः, अमुमेव प्रकारान्तरेणाह-'स्वामित्वेन' स्वामित्वविषयः, उभयसम्बन्धनसंयोग इति प्रक्रमः, किंरूप ? इत्याह-'आत्मनः' मम 'च:'

पूरणे, पितुः' जनकस्य, पुत्र इति गम्यते, एवंविधोल्लेखद्वयव्यङ्ग्ये, अत्रात्मनः पित्रा सहात्मकद्वारकः स्वस्वामिभावलक्षणः सम्बन्धः, तत्पुत्रेण परद्वारकः, मम पितुरयं, पुत्र इति पितृद्वारेणासाविति कृत्वा तत उभयद्वारकत्वादुभयविषयसंयोग उभयसम्बन्धनसंयोगः, इतिशब्दो मम पितुः मम भ्रातुः मम दासस्य कम्बल इत्येवंप्रकारसम्बन्धान्तरव्यञ्जकान्योल्लेखसूचकः,

अनेन लौकिके स्वामित्व उभयसम्बन्धनसंयोग उक्तः, लोकोत्तरमेवाह-मम 'कुले' नागेन्द्रादावयं साध्वादिरिति गम्यते, यद्वा कुलमेव कुलकं तस्य, 'च:' समुच्चये दोश्यते, ततोऽहमेव अहकम् अभ्यन्तरः 'अस्मि' भवामि, चशब्दादयं च साध्वादिरित्येवंविधोल्लेखद्वयव्यङ्ग्य एषोऽप्युभयसम्बन्धनसंयोग इति वृद्धाः, अत्र हि मच्छब्दवाच्यस्य कुलेन सहात्मद्वारकः स्वस्वामिभावसम्बन्धः, कुलान्तर्वर्तिना च साध्वादिना परद्वारको, मम कुलेऽयमिति कुलद्वारकत्वादस्य, ततोऽयमपि द्वाभ्यामुभयसम्बन्धनसंयोगः, इतिशब्दोऽयं गण्यपूरणे साध्वादिरित्याद्येवंप्रकारसम्बन्धान्तरव्यञ्जकान्योल्लेखसूचकार्थः, इह चोल्लेखद्वयाभिधानमेकत्राप्यनेकोल्लेखसम्भवख्यानार्थमिति गाथार्थः ॥ पुनरन्यथा तमेवाह-

नि. [६०] पच्चयओ य बहुविहो निव्वित्ती पच्चओ जिनस्सेव ।
देहा य बद्धमुक्का माइपिइसुआइ अ हवंति ॥

वृ. प्रतीयतेऽनेनार्थ इति प्रत्ययः-ज्ञानकारणं घटादिः, सर्वथा निरालम्बनज्ञानाभावेन तदविनाभावित्वात ज्ञानस्य, ततस्तमाश्रित्य, चकारात् ज्ञानतश्च-ज्ञानं चाश्रित्य 'बहुविधः' बहुप्रकारः, प्रक्रमादात्मनो यः संयोगः स उभयसम्बन्धसंयोगः, तद्बहुत्वं च प्रत्ययानां तद्विशिष्टज्ञानानां च बहुविधत्वात्, तथा च वृद्धाः-घटं प्रतीत्य घटज्ञानं पटं प्रतीत्य पटज्ञानम् एवमादीनि प्रत्ययात् ज्ञानानि भवन्ति, तथा च सति ज्ञानेनात्मद्वारको, ममेदं ज्ञानमिति प्रत्ययेन परद्वारको, मम ज्ञानस्यायं विषय इति ज्ञानद्वारकत्वात्तस्य तत उभयविषयत्वादुभयसम्बन्धनसंयोगः ।

आह-एवं केवलिनोऽप्युभयसंयोग एवेति, अत्रोच्यते, 'निर्वृत्तिः' इत्युत्तरत्रैवकारस्य भिन्नक्रमत्वान्निर्वृत्तिरेव-सकलावरणक्षयादुत्पत्तिरेव प्रत्ययो जिनस्य, जिनसम्बन्धिज्ञानस्येति गम्यते, इदमाकूतम्- छद्मस्थानां हि मत्यादिकं लब्धिरूपतयोत्पन्नप्युपयोगरूपतायां बाह्यमिति घटादिकमपेक्षते, तथाहि-घटं प्रतीत्य घटज्ञानं पटं प्रतीत्य पटज्ञानं, केवलिनस्तु ज्ञानं लब्धिरूपतयोत्पन्नं पुनरुपयोगरूपतां प्रति न बाह्यं घटादिकमपेक्षते- तज्ज्ञानस्योत्पत्तिसमकालमेव सकलातीतानागतदूरान्तरितस्थूलसूक्ष्मार्थयाथात्म्यवेदिततयैवोपयोगभावात्, यदुक्तम्-

"उभयवरणाईतो केवलवरनाणदंसणसहावो ।
जाणइ पासइ य जिनो सव्वं नेयं सयाकालं ॥"

ततः केवलज्ञानस्य सर्वत्र सततोपयोगेन नोपयोगं प्रति बाह्यापेक्षेति निर्वृत्तिरेव प्रत्ययः, ततो न छद्मस्थज्ञानस्येव प्रत्ययत उभयसंयोगः । आह-उक्त एव ज्ञानस्योभयसंयोगः, तत् किं पुनरुच्यते ?, सत्यम्, उक्तः स तत्राक्षेप्याक्षेपकभावेन, इह त्वेकस्यापि वस्तुन उपाधिभेदेनानेकसम्बन्धसम्भवख्यापनाय जन्मजनकभावेनोच्यते इति न दोषः ।

उभयसम्बन्धनसंयोगमेव पुनः स्वस्वामिभावेनाह-'दिज्जन्ते-उपचीयन्ते पुद्गलैरिति देहाः-कायाः ते च बद्धा-इह जन्मनि जीवेन सम्बद्धा मुक्ता अन्यजन्मनि तेनैवोज्झिता अनयोर्द्व-

न्द्रे बद्धमुक्ताः, 'माइपितिसुयाइ'त्ति 'नो जसूशसोर्लोपे' आर्षत्वाच्च 'लोपे दीर्घ' इति दीर्घत्वस्याभावे पितृमातृसुतादयः, आदिशब्दाद् भ्रातृभगिन्यादयो, बद्धमुक्ता इत्यत्रापि योज्यते, चशब्दोऽयं पूर्वश्च समुच्चये, एते च किमित्याह-'भवंति'त्ति जायन्ते, प्राग्वदुभयसम्बन्धनसंयोगः, जीवस्येति गम्यते, इयमत्र भावना-बद्धा देहा मात्रादयश्चात्मरूपाः, तत्र देहात्मनोः क्षीरनीरवदन्योऽन्यानुगतत्वेन मात्रादयश्चात्यन्तस्नेहविषयतयाऽऽत्मवद् दृश्यमानत्वेन, मुक्तास्तूभये बाह्याः, तत्र देहा आत्मनः पृथग्भूतत्वेन मात्रादयश्च तथाविधस्नेहाविषयतयाऽऽत्मवद्दृश्यमानत्वेन, अतो देहैर्मात्रादिभिश्च बद्धमुक्तैः स्वस्वाभिवालक्षणसम्बन्धो जीवस्योभयसम्बन्धसुयोगः ।

आह-देहादयो मुक्ताश्च स्वस्वामिविषयाश्चेति विरुद्धमेतत्, एवमेतद्, यदि भावतोऽपि मुक्ताः स्युः, अथ भावतोऽप्यहमेषां स्वामी ममैत स्वमिति भावाभावान्मुक्ता एव ते, नन्वेवमैहिकेष्वप्यमीष्वपरापरोपयोगवत आत्मनो न सततमेवं भावोऽस्तीति कथं तेष्वपि तद्विषयतया ?, अथ तेष्वेवं भावाभावेऽपि व्युत्सर्गकरणतस्तद्विषयत्वम्, एतदिहापि समानं, व्युत्सर्गकरणत एव तद्विषयत्वस्येहापि विवक्षितत्वादिति ॥ इत्थमनेकधा सम्बन्धनसंयोग उक्तः,

नि. [६१] संबंधणसंजोगो कसायबहुलस्स होइ जीवस्स ।
पहुणो वा अपहुस्स व मज्झंति ममज्जमाणस्स ॥

वृ. 'सम्बन्धनसंयोगः' उक्तरूपः, कषायाः-क्रोधादयस्तैर्बहुलस्य-व्याप्तस्य, प्रभूतकषायस्येत्यर्थः, 'भवति' जायते, कस्य ?-जीवस्य, पुनः कीदृशस्य ?,-प्रभवति-सम्बन्धितस्तु तत्र तत्र स्वकृत्ये नियोक्तुं समर्थो भवतीति प्रभुस्तस्य वा 'अप्रभोर्वा' उक्तविपरीतस्य, वाशब्दौ समुच्चये, उभयोरपि संयोगसाम्यं प्रति कारणमाह-'मज्झंति ममज्जमानस्स'त्ति ममेदं नगरजनपदादीति ममत्वाच्चारतः, इदमुक्तं भवति-सत्यसति वा मत्सम्बन्धितया बाह्यवस्तुनि तत्त्वतोऽभिष्वङ्ग एव सम्बन्धनसंयोगः, अनेन च काक्वा कषायबहुलत्वं हेतुरुक्तः, कषायबहुलस्येति च ब्रुवता कषायद्वारेण सम्बन्धनसंयोगस्य कर्मबन्धहेतुत्वं ख्यापितं भवति, आह-मिथ्यात्वादयो हि बन्धहेतवः, तत्कथं कषायसत्तामात्रेणैव तद्धेतुख्यापनम् ?, उच्यते, तेषामेव तत्र प्राधान्यात्, तत्प्राधान्यं च तत्तारतम्येनैव वत् कषायबहुलस्य जीवस्येत्युच्यते, ततोऽकषायहेतुकत्वेऽप्यौपशमिकादिभावे नामादिसंयोगानामजीवविषयत्वेऽपि च शीतोष्णादिविरोधिसंयोगानां सम्बन्धनसंयोगत्वं न विरुध्यते ।

आह-एवमभिप्रेतानभिप्रेतसंयोगयोरपि तत्त्वतः सकषायजीवविषयत्वात् सम्बन्धनसंयोगत्वप्राप्तिः, सत्यं, तथापीन्द्रियमनसोः साक्षात्तावुक्तौ, अयं तु जीवस्येति न दोषः । अन्यस्त्वाह-संयुक्तकसंयोगोऽपि दिष्टत्वेनेतरेतरस्यैव तथेतरेतरसंयोगोऽपि स्वपरधर्मैः संयुक्तत्वात्, सर्ववस्तुनः संयुक्तस्यैवेति नानयोः प्रतिविशेषः, एवमेतत्, तथाऽप्येकस्कन्धताऽऽपन्नद्रव्यविषयः संयुक्तसंयोगः, इतरेतरसंयोगस्तु तथाऽन्यथा च, तत्र परमाणुसंयोगस्तथा प्रदेशादिसंयोगस्तु प्रायोऽन्यथेति युक्त एव तयोर्भेदः, एवं तर्हि परमाणुसंयोगस्य संयुक्तसंयोगभेदोऽस्तूभयोरपिएकस्कन्धताऽऽपन्नद्रव्यविषयत्वात्, अयमपि न दोषः, यतो निष्पाद्यमानविषय इतरेतरसंयोगः, परिमण्डलादिसंस्थितद्रव्यस्य तेनैव(वि) निष्पाद्यमानत्वात्,

संयुक्तसंयोगस्तु प्रायो निष्पन्नद्रव्यविषयः, निष्पन्नं हि मूलादिरूपेण वृक्षादिद्रव्यं कन्दादिना युज्यते, इत्यस्त्यनयोर्विशेष इति गाथार्थः ॥ इत्थं सम्बन्धसंयोगः स्वरूपत उक्तः, सम्प्रति तस्यैव फलतः प्ररूपणापूर्वकं विप्रमुक्तस्येति प्रकृतसूत्रपदं व्याख्यानयन् यथा ततो विप्रमुक्ता भवन्ति यच्च तेषां फलं तदाह-

नि. [६२] संबंधनसंजोगो संसारओ अनुत्तरणवासो ।
तं छित्तु विप्पमुक्का माइपिइसुआइ य हवंति ॥

वृ. 'सम्बन्धसंयोगः' उक्तरूपः, संसरन्त्यस्मिन् कर्मवशवर्तिजन्तव इति संसारस्तस्मात्, न विद्यते उत्तरणं-पारगमनमस्मिन् सतीत्यनुत्तरणः, स चासौ वासश्च- अवस्थानमनुत्तरणवासः, अनुत्तरणवासहेतुत्वादायुर्घृतमित्यादिवदनुत्तरणवासः, अथवा 'अनुत्तरणवासो'त्ति आत्मनः पारतन्त्र्यहेतुतया पाशवत् पाशः, ततोऽनुत्तरणश्चासौ पाशश्च अनुत्तरणपाशः, उभयत्र च सापेक्षत्वेऽपि गमकत्वात् समासः, अनेन संसारहेतुरपि हि पारतन्त्र्यहेतुत्वात् सम्बन्धसंयोगस्यार्थतः फलमुक्तं. 'तम्' एवंविधं सम्बन्धसंयोगम्, अर्थादौदयिकभावविषयं मात्रादिविषयं च 'छित्त्वा' द्विधा विधाय निर्णाश्येतियावत्, किमित्याह विप्रमुक्ताः, श्रुतत्वादनन्तोक्तसम्बन्धनसंयोगादेव, के ते ?, -'साधवः' अनगाराः, येनैवं तेन किमित्याह-मुक्ताः 'ततः' संसारात्, तद्धेतुकत्वात्तस्य, 'तेन' हेतुना, अनेन च गाथापश्चार्धेन सम्बन्धच्छेदनलक्षणेन प्रकारेण विप्रमुक्ता भवन्ति, तेषां च फलं मुक्तिरित्यर्थत उक्तं भवति। यच्च विप्रमुक्तस्येत्येकत्वप्रक्रमेऽपि विप्रमुक्ता इतीह बहुवचनं तदेवंविधभिक्षोः पूज्यत्वख्यापनार्थमिति गाथार्थः ॥

एवं 'संजोगे निक्खेवो' इत्यादिमूलगाथोपक्षिप्तसंयुक्तकसंयोगेतरेतरसंयोगभेदतो द्विविधं द्रव्यसंयोगं निरूप्य तत्र संयुक्तकसंयोगं सचित्तादिभेदतस्त्रिविधम् इतरेतरसंयोगं तं परमाणुप्रदेशाभिप्रेतानाभिप्रेताभिलापसम्बन्धनविधानतः षड्विधमभिधाय सम्बन्धसंयोग एव च साक्षात् कर्मसम्बन्धनबन्धनतया संसारहेतुरिति तत्त्याज्यतां च सम्प्रति तत्प्रतिपादनत एवान्यदुक्तप्रायमिति मन्वानः क्षेत्रादिनिक्षेपमविशिष्टमतिदेष्टुमाह-

नि. [६३] संबंधणसंजोगे खित्ताईणं विभास जा भणिया ।
खित्ताइसु संजोगो सो चेव विभासियव्वो अ(ठ) ॥

वृ. सम्बन्धसंयोगे क्षेत्रादीनाम्, आदिशब्दात् कालभावपरिग्रहः, विविध-आदेशानाम-देशादिभेदादनेकभेदा भाषा विभाषा, या इति प्रस्तुतपरामर्शः, 'भणिता' अभिहिता, 'क्षेत्रादिषु' क्षेत्रादिविषयः संयोगः प्रथमद्वारगाथासूचितः, स चैव विभाषितव्यः, 'तुः पूरणे, संयोगत्वं चात्र विभाषाया वचनरूपत्वाद्वचनपर्यायाणां कथञ्चिद्भाव्यादभेदख्यापनार्थमुक्तं, ततोऽयमर्थः-सम्बन्धनसंयोगविषयक्षेत्रादिविभाषायां यत्संयोगस्वरूपमुक्तम्, इहापि तदेव वक्तव्यं, चकारस्यानुक्तसमुच्चयार्थत्वात्, संयुक्तसंयोगः सम्भवन्त इतरेतरसंयोगशेषभेदाश्च वाच्याः, तत्र क्षेत्रस्य संयुक्तकसंयोगो यथा-जम्बूद्वीपः स्वप्रदेशसंयुक्तक एव लवणसमुद्रेण युज्यते, इतरेतरसंयोगः क्षेत्रप्रदेशानामेव परस्परं धर्मास्तिकायादिप्रदेशैर्वा संयोगः, एवं कालभावयोरपि नेयमिति गाथार्थः ॥

इह चोक्तनीत्या सम्बन्धसंयोग एव साक्षादुपयोगी, इतरेषां तु तदुपकारितया तेषामपि

कथञ्चित्त्याज्यतया च शिष्यमतिव्युत्पादनाय चोपन्यास इति भावनीयम्, । उक्तः संयोगः, तदभिधानाच्च व्याख्यातं प्रथमसूत्रम्॥ सम्प्रति यदुक्तं 'विनयं प्रादुष्करिष्यामी'ति, तत्र विनयो धर्मः, स च धर्मिणः, कथञ्चिदभिन्न इति धर्मिद्वारेण तत्स्वरूपमाह-

मू.(२) आणानिद्देसयरे, गुरुणमुववायकारए।
इंगियागारसंपन्ने, से विनीएत्ति वुच्चइ॥

वृ. आङिति स्वस्वभावावस्थानात्मिकया मर्यादयाऽभिव्याप्ता वा ज्ञायन्तेऽर्था अनयेत्याज्ञा-भगवदभिहितागमरूपा तस्या निर्देश-उत्सर्गापवादाभ्यां प्रतिपादनमाज्ञानिर्देशः, इदमित्थं विधेयमिदमित्थं वेत्येवमात्मकः तत्करणशीलस्तदनुलोमानुष्ठानो वा आज्ञानिर्देशकरः, यद्वाऽऽज्ञा-सौम्य ! इदं कुरु इदं च मा कार्षीरिति गुरुवचनमेव, तस्या निर्देश-इदमित्थमेव करोमि इति निश्चयाभिधानं तत्करः, आज्ञानिर्देशेन वा तरति भवाम्भोधिमित्याज्ञानिर्देशतरइत्यादयोऽनन्तागमपर्यायत्वाद्भगवद्वचनस्य व्याख्याभेदाः, सम्भवन्तोऽपि मन्दमतीनां व्यामोहहेतुतया बालावबलादिबोधोत्पादनार्थत्वाच्चास्य प्रयासस्य न प्रतिसूत्रं प्रदर्शयिष्यन्ते, तथा 'गुरूणां' गौरवार्हाणामाचार्यादीनामुप-समीपे पतनं-स्थानमुपपातः-दृग्वचनविषयदेशावस्थानं तत्कारकः-तदनुष्ठाता, न तु गुर्वादेशादिभीत्या, तद्रहितदेशस्थायीतिभावः, तथोक्तं-निपुणमतिगम्यं प्रवृत्तिनिवृत्तिसूचकमीषद्भ्रुशिरः कम्पादि आकारः-स्थूलधीसंवेद्यः प्रस्थानादिभावाभिव्यञ्जको दिगवलोकनादिः, आह च-

"अवलोयणं दिसाणं वियंमणं साडयस्स संठवणं।
आसनसिढिलीकरणं पडियलिगाइं एयाइं॥"

अनयोर्द्वन्द्वे इङ्गिताकारौ तौ अर्थाद्गुरुगतौ सम्यक् प्रकर्षेण जानाति इङ्गिताकारसम्प्रज्ञः, यद्वा-इङ्गिताकाराभ्यां गुरुगतभावपरिज्ञानमेव कारणे कार्योपचारादिङ्गिताकारशब्देनोक्तं, तेन सम्प्रज्ञो-युक्तः, 'स' इत्युक्तविशेषणान्वितः 'विनीतः' विनयान्वितः, 'इति' सूत्रपरामर्शे, उच्यते, तीर्थकृद्गणधरादिभिरिति गम्यते, अनेन च स्वमनीषिकाऽपोहमाह इति सूत्रार्थः॥ इह विनयोऽभिधित्सितः, स च विपर्ययाभिधान एव तद्विविक्ततया सुखेन ज्ञातुं शक्यत इत्यविनयं धर्मिद्वारेणाह-

मू.(३) आणाऽनिद्देसकरे, गुरुणमणुववायकारए।
पडिनीए असंबुद्धे, अविनीएत्ति वुच्चइ॥

वृ. पादद्वयं प्राग्वत्, नवरं नञ्योजननाद्व्यतिरेकतो व्याख्येयं, '**प्रत्यनीकः**' प्रतिकूलवर्ती शिलाऽऽक्षेपककूलवालकश्रमणवत्, दोषानीकं प्रति वर्तत इति प्रत्यनीकः, किमित्येवंविधोऽसावित्याह-'असम्बुद्धः' अनवगततत्त्वः 'अविनीतः' अविनयवान् 'इत्युच्यते' इति पूर्ववदिति सूत्रार्थः॥ साम्प्रतं दृष्टान्तपूर्वकमिहैवास्य सदोषतामाह-

मू.(४) जहा सुणी पूइकन्नी, निक्कसिज्जइ सव्वसो।
एवं दुस्सीलपडिनीए, मुहरी निक्कसिज्जइ॥

वृ. 'यथा' इत्युपदर्शने, श्वसितीति शुनी, स्त्रीनिर्देशोऽत्यन्तकुत्सोपदर्शकः, पूती-परिपाकतः कुथितगन्धौ कृमिकुलाकुलत्वाद्युपलक्षणमेतत्, तथाविधौ कर्णौ-श्रुती यस्याः पक्वरक्तं वा

पूतिस्तद्व्यासौ कर्णौ यस्याः सा पूतिकर्णा, सकलावयवकुत्सोपलक्षणं चैतत्, सा चेदृशी शुनी किमित्याह-'निष्काश्यते' निर्वास्यते बहिर्निः सार्यत इतियावत्, कुतः ?, 'सव्वसो'त्ति सर्वतः सर्वेभ्यो गोपुरगृहाङ्गणादिभ्यः सर्वान् वा हतहतेत्यादिविरूक्षवचनलताकुटलेष्टुघातादिकान् प्रकारानाश्रित्य 'छन्दोवत् सूत्राणि भवन्ती'ति छान्दसत्वाच्च सूत्रे शस्तप्रत्ययः। उपनयमाह'एवम्' अनेनैव प्रकारेण, दुष्टमिति-रागद्वेषादिदोषविकृतं शीलं-स्वभावः समाधिराचारो वा यस्यासौ दुःशीलः, प्रत्यनीकः प्राग्वत्, मुखेनाग्रिमावहति मुखमेव वेहपरलोकापकारितया-ऽग्रिरस्य मुधैव वा कार्यु विनैवारयो यस्यासौ मुखाग्रिर्मुधाग्रिर्वा-बहुविधासम्बद्धभाषी, सूत्रत्वाद्वा 'मुहग्गि'त्ति मूलशो-ताग्रतो निष्काश्यते 'सर्वतः' इतिहापि योज्यते, ततश्च सर्वतो निष्काश्यते, सर्वथा कुलगणसङ्घसमवायबहिर्वर्ती विधीयत इति सूत्रार्थः॥ आह-दौःशील्यनिमित्त एवायमविनीतस्य दोषः, प्रत्यनीकतामुखरत्वयोरपि तत्प्रभवत्वात् तत्र चैवमनर्थहेतौ किमसौ प्रवर्तत इति, अत्रोच्यते, पापोपहतमतित्वेन तत्रैवास्याभिरतिरितिकृत्वा, तामेवाह-

मू.(५) *कणकुंडगं जहित्ता णं, विट्ठं भुंजइ सूयरो।*
एवं सीलं जहित्ता णं, दुस्सीले रमइ मिए॥

वृ. कणाः-तन्दुलास्तेषां तन्मिश्रो वा कुण्डकः-तत्क्षोदनोत्पन्नकुक्कुसः कणकुण्डकस्तं 'हित्वा' पाठान्तरतस्त्यक्त्वा वा 'विष्ठां' पुरीषं 'भुंक्ते' अभ्यवहरति 'सूकर' इति गतासूकरो, यथेति गम्यते, एवं 'शीलम्' उक्तरूपं प्रस्तावाच्छोभनं 'हित्वा' प्राग्वत्त्यक्त्वा वा दुष्टं शीलं दुःशीलं तस्मिन् भावप्रधानत्वाद्वा निर्देशस्य दुष्टं शीलमस्येति दुःशीलस्तद्भावो दौःशील्यं तस्मिन्, उभयत्र दुराचारादौ 'रमते' धृतिमाधत्ते मृग इव मृगः अज्ञत्वादविनीत इति प्रक्रमः, इदमत्र हृदयं-यथा मृग उदगीर्णासिपुत्रिकर्गीरिगायनपुरुषहेतुकमायतौ मृत्युरूपमपायमपश्यन्नज्ञः, एवमयमपि दौःशील्यहेतुकमागामिनं भवभ्रमणलक्षणमपायमनालोकयन्नज्ञ एव सन् गतासूकरोपमः सदा पुष्टिदायिकणकुण्डकसदृशं शीलमपहाय विवेकिजनगर्हिततया विष्ठोपमे दुःशीले दौःशील्ये सा रमते, इह च दृष्टान्तेऽपि विभक्त्यभिरतिरेवार्थत उक्ता, तदविनाभावित्वात्तस्याः, यद्वा शुभपरिहारेणाशुभाश्रयणमुभयत्रापि सादृश्यनिमित्तस्तीति नोपमानोपमेयभावविरोध इति सूत्रार्थः॥ उक्तोपसंहारपूर्वकं कृत्योपदेशमाह

मू.(६) *सुणिया भावं साणस्स, सूयरस्स नरस्स य।*
विणए ठविज्ज अप्पाणं, इच्छंतो हियमप्पणो॥

वृ. 'श्रुत्वा' आकर्ण्य 'अभावं' नञः कुत्सायामपि दर्शनादशोभनं भावं-सर्वतो निष्काशनलक्षणं पर्यायं 'सानस्स'त्ति प्राकृतत्वादिवेत्यस्य गम्यमानत्वात् शुन्या एव 'सूकरस्य' उक्तन्यायेन शूकरोपमस्य नरस्य 'च:' पूरणे, यद्वा शुन्याः शूकरस्य च दृष्टान्तस्य नरस्य च दार्ष्टान्तिकस्याशोभनं भावं त्रयाणामप्युक्तरूपं श्रुत्वा, किमित्याह-'विनये' वक्ष्यमाणस्वरूपे, स्थापयेदात्मानम्, आत्मनैवेति गम्यते, 'इच्छन्' वाञ्छन् 'हितम्' ऐहिकमामुष्मिकं च पथ्यम् 'आत्मनः' स्वस्य, इह च पुनर्दृष्टान्ताभिधानमुपसंहारत्वेनाविनये शिष्यस्याशुभभावस्योत्पादनार्थत्वेन वा नाप्रकृतमिति सूत्रार्थः॥ यतश्चैवं ततः किमित्याह-

मू.(७) *विणयमेसिज्जा, सीलं पडीलभे जओ।*

बुद्धवुत्ते नियागट्ठी, न निक्कासिज्जइ कण्हुइ ॥

वृ. 'तस्माद्' इति यस्मादविनयदोषदर्शनादात्मा विनये स्थापनीयस्तस्मात् विनयम् 'एषयेत्' अनेकार्थत्वेन धातूनां पर्यवसितवृत्त्या वा कुर्यात्, एवं ह्यात्मा विनये स्थाप्यत इति, किं पुनरस्य विनयस्य फलं ?, येनैवमत्रात्मनोऽवस्थापनमुद्दिश्यत इत्याशंक्याह-'शीलम्' उक्तरूपं 'प्रतिलभेत' प्राप्नुयात् 'यत' इति विनयात्, अनेन विनयस्य शीलावाप्तिः फलमुक्तम्, अस्यापि किं फलमित्याह-बुद्धैः-अवगततत्त्वैस्तीर्थकरगणधरैरभिहितम्, अभिहितं, तच्च कथमित्याह-निजके च-ज्ञानादि तस्यैव बुद्धैरात्मीयत्वेन तत्त्वत उक्तत्वात्, बुद्धोक्तनिजकं, तदर्थयते-अभिलषतीत्येवंशीलः बुद्धोक्तनिजकार्थी सन्, पठन्ति च 'बुद्धवुत्ते नियागट्ठि त्ति' उक्त रूपैर्युक्तो-विशेषणैरभिहितः, स च द्वादशाङ्गरूप आगमस्तस्मिन् स्थित इति गम्यते, यद्वा बुद्धानाम्-आचार्यादीनां पुत्र इव पुत्रो बुद्धपुत्रः, 'पुत्ता य सीसा य समं विहित्ता' इति वचनात्, स्वरूपविशेषणमेतत्, नितरां यजनं यागः-पूजा यस्मिन् सोऽयं नियागो-मोक्षः, तत्रैव नितरां पूजासम्भवात्, तदर्थी सन्, किमित्याह-'न निष्काश्यते' न बहिष्क्रियते, कुतश्चिद् गच्छगणादेः, किन्तु विनीतत्वेन सर्वगुणाधारतया सर्वत्र मुख्य एव क्रियते इति भावः, इति सूत्रार्थः ॥

मू. (८) निसंते सिया अमुहरि, बुद्धाणमंतिए सया।
अट्ठजुत्ताणि सिक्खेज्जा, निरट्ठाणि उ वज्जए ॥

वृ. नितराम्-अतिशयेन शान्तः-उपशमवान् अन्तः क्रोधपरिहारेण बहिश्च प्रशान्ताकारतया निःशान्तः 'स्याद्' भवेत्, तथा 'अमुखरिः' प्राग्वत् अमुखरो वा सन् 'बुद्धानाम्' आचार्यादीनाम् 'अन्तिके' समीपे, न तु विनयभीत्याऽन्यथैव 'सदा' सर्वकालमर्यते-गम्यत इति अर्थः, अर्तेर्गुणादिकस्थन् स च हेय उपादेयश्चोभयस्याप्यर्थ्यमाणत्वात्, तेन युक्तानि-अन्वितानि अर्थयुक्तानि, तानि च हेयोपादेय याभिधायकानि, अर्थादागमवचांसि, यद्वा-मुमुक्षुभिरर्थ्यमानत्वादर्थो-मोक्षस्तत्र युक्तानि-उपायतया सङ्गतानि अर्थे वा-अभिधेयमाश्रित्य युक्तानि-यतियोजनोचितानि 'शिक्षेत' अभ्यस्येत्, प्रपञ्चितज्ञविनेयानुग्रहाय व्यतिरेकत आह-'निरर्थकानि' उक्तविपरीतानि डित्थडवित्थादीनि, यद्वा वैशिकवात्स्यायनादीनि स्त्रीकथादीनि वा 'तुः' पुनरर्थे 'वर्जयेत्' परिहरेत्, इह च निशान्त इत्यनेन प्रशमादीनामुपलक्षितत्वात् तेषां च दर्शनाविनाभावित्वाद् दर्शनस्य च जिनोक्तभाव श्रद्धानरूपत्वात् तस्यैव दर्शनविनयत्वात्, अर्थतो दर्शनविनयो दर्शितः, उक्तं हि प्राक्-

"दव्वाण सव्वभावा उवइट्ठा जे जहा जिणिंदेहिं।
तं तह सद्दहइ नरो दंसणविनओ हवति तम्हा ॥"

शेषेण तु श्रुतज्ञानशिक्षाऽभिधायिना ज्ञानदर्शन(ज्ञान)विनय उक्तः, तत्स्वरूपमाह-"नाणं सिक्खइ नाणं गुणेइ नाणेन" त्ति सूत्रार्थः ॥ कथं पुनरर्थयुक्तानि शिक्षेतेत्याह-

मू. (९) अनुसासिओ न कुप्पिज्जा, खंतिं सेवेज्ज पंडिए।
बालेहिं सह संसग्गिं, हासं कीडं च वज्जए ॥

वृ. 'अनुशिष्ट' इति अर्थयुक्तानि शिक्ष्यमाणः कथञ्चित् स्खलितादिषु गुरुभिः, परुषोक्त्याऽपि शिक्षितः 'न कुप्येत्' न कोपं गच्छेत्, किं तर्हि कुर्यादित्याह-'क्षान्तिं' परुषभाषणादि-

सहनात्मिकां 'सेवेत' भजेत, पण्डाबुद्धिः सा सञ्जाताऽस्येति पण्डितः, तथा 'क्षुद्रैः' बालैः शीलहीनैर्वा पार्श्वस्थादिभिः 'सह' समं 'संसिग्गं' ति प्राकृततत्वात्संसर्गं, हसनं हासस्तं, क्रीडां च अन्ताक्षरिकाप्रहेलिकादानादिजनितां च 'वर्जयेत्' परिहरेत् सर्वेषामप्येषा विशिष्टशिक्षाक्षितिहेतुत्वात् लोकागमविरुद्धत्वाच्चेति सूत्रार्थः ॥ पुनरन्यथा विनयमाह-

मू.(१०) *मा य चंडालियं कासी, बहुयं मा य आलवे।*
कालेन य अहिज्जित्ता, ततो झाइज्ज इक्कओ॥

वृ. 'मा' निषेधे 'चः' समुच्चये, चण्डः-क्रोधस्तद्वशादलीकम्-अनृतभाषणं चण्डालीकं, भयालीकाद्युपलक्षणमेतत्, यद्वा-चण्डेनाऽऽलमस्य चण्डेन वा कलितश्चण्डालः, स चातिक्रूरत्वाच्चण्डालजातिस्तस्मिन् भवं चाण्डालिकं कर्मेति गम्यते, अथवा अचण्ड! सौम्य! अलीकम्-अन्यथात्वविधानादिभिरसत्यं, गुरुवचनमागमं चेति गम्यते, 'मा कार्षीः' मा विधाः, भगवदुद्दिष्टतिलोत्पाटकस्वेच्छालापिगोशालकवत्, बह्वेव बहुकम्-अपरिमित मालजालरूपं 'मा च' इति प्राग्वत्, आडिति-स्त्र्यादिकथाऽभिव्याप्त्या लपेत्-भाषेत, बह्वालापनात् ध्यानाध्ययनक्षितिवातक्षोभादिसम्भवात्, किं पुनः कुर्यादित्याह-कालः अध्ययनाद्यवसरः प्रथमपौरुष्यादिस्तेन, 'चः' पुनरर्थे, 'अधीत्य' पठित्वा, प्रच्छनाद्युपलक्षणमेतत्, 'ततः' अध्ययनात्, अनन्तरमिति गम्यते, 'ध्यायेत्' चिन्तयेत्, 'एकक' इति भावतो रागद्वेषादिसाहित्यरहितः, द्रव्यतस्तु विविक्तशय्यादिसंस्थः, इत्थं हि चाण्डालिककरणाद्यनुत्थानमधीतार्थस्थिरीकरणं च कृतं भवतीति भावः।

इह च पादत्रयेण साक्षाद्वाग्गुप्तिरुक्ता, ध्यायेदित्यनेन मनोगुप्तिः, आद्यपादोत्तरव्याख्यानद्वयेन तु कायगुप्तिरपि, एताश्च चारित्रान्तर्गता एव, यदुक्तम्-

"पणिहाणजोगजुत्तो पंचहि समितीहि तिहिं गुत्तीहिं।
एस चरित्तायारो अट्ठविहो होइ नायव्वो॥"

न च चारित्राचारस्तत्त्वतश्चरित्रविनयादतिरिच्यते इति देशतस्तस्याप्यनेनाभिधानमिति सूत्रार्थः इत्थमकृत्यनिषेधः कृत्यविधिश्चोपदिष्टः, कदाचिदेतद्विपर्ययसम्भवे च किं करणीयमित्याह-

मू.(११) *आहच्च चंडालियं कट्टु, न निन्हविज्ज कयाइ।*
कडं कडंति भासिज्जा, अकडं नो कडंति॥

वृ. 'आहत्य' कदाचित् चण्डालीकं च चाण्डालिकं चोक्तरूपं यद्वा चण्डश्चालीकं च चण्डालीकं 'कृत्वा' विधाय 'न निन्हुवीत' न कृतमेवेति नापलपेत्, कदाचिदपि, यदा परैरुपलक्षितो यदा वा नोपलक्षितस्तदापीत्यर्थः, किं तर्हि कुर्यादित्याह-'कृतं' विहितं चाण्डालिकादि 'कृतमिति' इति कृतमेव, न भयलज्जादिभिरकृतमपि 'भाषेत' ब्रूयात्, 'अकृतं' तदेवाविहितं 'नो कृतमिति' अकृतामेव भाषेत, न तु मायोपरोधादिना कृतमपि, अन्यथा मृषावादादिदोषासम्भवात्, उपलक्षणत्वाच्चास्य बह्वालपनकालाध्ययनादिविपर्यसम्भवेऽप्येतदेव कृत्यम्, इदं चात्राकृत-कथञ्चिदतिचारसम्भवे लज्जाद्यकुर्वन् स्वयं गुरुसमीपमागत्य-

"जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणति।
तं तह आलोएज्जा मायामयविप्पमुक्को उ॥"

इत्याद्यागममनुस्मरन् कथञ्चित् परैः प्रतीतमप्रतीतं वा मनःशल्यं यथावदालोचयेत्, ततश्चानेन्तरतपोऽन्तर्गताऽऽलोचनाख्याप्रायश्चित्तभेदाभिधानम्, अनेन च शेषतपोभेदानामप्युपलक्षितत्वात् तपोविनयमाह इति सूत्रार्थः ॥ इहैवं पुनः पुनरुपदेशश्रवणाद् यदैव गुरोरुपदेशस्तदैव प्रवर्तितव्यं निवर्तयितव्यं चेति स्यादाशङ्का, तदपनोदायाह-

मू. (१२) *मा गलियस्सेव कसं, वयणमिच्छे पुनो पुनो।*
कसं व दट्ठुमाइन्ने, पावगं परिवज्जए ॥

वृ. 'मा' निषेधे, गलिः-अविनीतः, ऊ वाक्यालङ्कारे गल्यश्वः स इव, कशतीति कशस्तम्, उपलक्षणत्वात् कशप्रहारं, 'वचनं' प्रवृत्तिनिवृत्तिविषयमुपदेशं, प्रस्तावाद्गुरूणाम्, 'इच्छेत्' अभिलषेत्, 'पुनः पुनः' वारं वारं, कोऽभिप्रायः ?-यथा गल्यश्वो दुर्विनीततया न पुनः पुनः कशप्रहारं विना प्रवर्तते निवर्तते वा, नैवं भवताऽपि प्रवृत्तिनिवृत्त्योः पुनः पुनर्गुरुवचनमपेक्षणीयं, किन्तु 'कसं व दट्ठुमाइन्ने' त्ति इवशब्दस्य भिन्नक्रमत्वात् कशं-चर्मयष्टिं दृष्ट्वाऽऽकीर्णो-विनीतः, स चेह प्रस्तावादश्वः, स इव, सूचकत्वात् सूत्रस्य, सुशिष्यो गुरोराकारादि दृष्ट्वा, पापमेव पापकं, गम्यमानत्वादनुष्ठानं परिवर्जयेत्' सर्वप्रकारं परिहरेत्, उपलक्षणत्वादितरच्चानुतिष्ठेत, पठन्ति च-पावगं पडिवज्जइ' त्ति तत्र च पुनातीति पावकं-शुभमनुष्ठानं 'प्रतिपद्येत' अङ्गीकुर्यात्, इहापि प्राग्वदितरत्, परिहरेत्, किमुक्तं भवति ?, यथाऽऽकीर्णोऽश्वः कशग्रहणादिनाऽऽरोहकाभिप्रायमुपलभ्य कशेनाताडित एव तदभिप्रायानुरूपं प्रवर्तते निवर्तते वा, तथा सुशिष्येणा(ष्योऽ)प्याकारादिभिराचार्याशयमवगम्य, वचनेनाप्रेरित एव प्रवर्तते, मा भूदन्यथाऽऽरोहकस्येव गुरोरायास इति सूत्रार्थः ॥ अत्र च निर्युक्तिकृत् गल्याकीर्णौ व्याचिख्यासुः 'तत्त्वभेदपर्यायैर्व्याख्या' इति तत्पर्यायानाह-

नि. [६४] गंडी गली मराली अस्से गोणे य हुंति एगट्ठा।
आइन्ने य विनीए य भद्दए वावि एगट्ठा ॥

वृ. गच्छति प्रेरितः प्रतिपथादिना डीयते च कूर्दमानो विहायोगमनेनेति गण्डिः, गिलत्येव केवलं न तु वहति गच्छति वेति गलिः, म्रियत इव शकट्यादौ योजितो राति च-ददाति लत्तादि लीयते च भुवि पतनेनेति मरालिः, अमी च 'अश्वे' तुरगे 'गोणे च' बलीवर्दे भवन्ति 'एकार्थाः' एकोऽर्थो-दुष्टालक्षणः अनन्तरोक्तनीत्या प्रवृत्तिनिमित्तभेदेऽप्यमीषामिति कृत्वा। 'आकीर्यते' व्याप्यते विनयादिभिर्गुणैरिति आकीर्णः, 'चः' पूरणे, विशेषेणनीतः-प्रापितः प्रेरकचित्तानुवर्तनादिभिः, श्लाघादीति विनीतः, भाति-शोभते स्वगुणैर्ददाति च प्रेरयितुश्चित्तनिर्वृतिमिति भद्रः स एव भद्रकः, चशब्द इहाप्यश्वे गोणे चेति विषयानुवृत्त्यर्थः, अपिशब्द इह पूर्वत्र चानुक्तपर्यायान्तरसमुच्चयार्थः, 'एकार्था' इति प्राग्वदिति गाथार्थः ॥ न चैवं गल्याकीर्णतुल्यशिष्ययोर्गुरोरायासजननाजनने एव गुणदोषौ, किन्तु गलिसदृशस्यानाश्रवत्वादेराकीर्णतुल्यस्य चित्तानुगतत्वादेः सम्भव इति तद्वशतः कोपनप्रसादने अपि, अत एवाह-

मू. (१३) *अनासवा थूलवया कुसीला मिउंपि चंडं पकरंति सीसा।*
चित्तानुया लहु दक्खोववेया पसायए ते हु दुरासयंपि ॥

वृ. 'अनासव' त्ति आ-समन्तात् शृण्वन्ति-गुरुवचनमाकर्णयन्तीत्याश्रवा न तथा प्रतिपासा-

विषयस्य तस्या श्रवणादनाश्रवाः, पठ्यते च- 'अनासुण'त्ति अस्यार्थः, स एव, स्थूलम्-अनिपुणं यतस्ततो भाषितया वचो येषां ते स्थूलवचसः 'कुशीला' इति दुःशीलाः, 'मृदुमपि' अकोपनमपि कोमलालापिनमपि वा 'चण्डं' कोपनं पक्षभाषिणं वा 'प्रकुर्वन्ति' प्रकर्षेण विदधति 'शिष्याः' विनेयाः, सम्भवति ह्येवंविधशिष्यानुशासनाय पुनः पुनर्वचनात्मकं खेदमनुभवतो मृदोरपि गुरोः कोप इति। इत्थं गलितुल्यस्य दोषमभिधायेतरस्य गुणमाह- 'चित्तं-हृदयं प्रक्रमात् प्रेरकस्यानुगच्छन्ति-कर्मपातानपेक्ष्य जात्याश्ववदनुवर्तयन्तीति भक्तानुगाः, 'लघु' शीघ्रमेव दक्षस्य भावो दाक्ष्यम् अविलम्बितकारित्वं तेन 'उववेय'त्ति उपपेता-युक्ता दाक्ष्योपपेताः 'प्रसादयेयुः' सप्रसादं कुर्युः 'ते' इति शिष्याः, 'हु:' पुनरर्थः, दुःखेनाऽऽश्रयन्ति तमतिकोपनत्वादिभिरिति दुराश्रयस्तमपि, प्रक्रमादगुरुं, किं पुनरनुत्कटकषायमित्यपिशब्दार्थः।

अत्रोदाहरणं चण्डरुद्राचार्यशिष्याः, तत्र च सम्प्रदायः- अवंतीजनवए उज्जेनीनयरीए रुद्दणज्जाणे माहुणो समोसरिया, तेसिं, सगासं एगो जवा उदन्तवेसो वयंसमहिओ उवागतो, सो ते वंदिऊण भणति भयवं! अम्हे संसारउ उत्तारेह, पव्वयामित्ति, एस एमेव पवंचतित्ति काऊणं 'घृष्यतां कलिना कलिरि'त्ति चंडरुद्दं आयरियं उवदिसंति, एस ते निच्थारेहित्ति, सोऽवि य सभावेणं फरुसो, तओ सो वंदिऊण भणइ- भगवं! पव्वावेह (हि) ममंति, तेण भणितो- छारं आनेहत्ति, आनिए लोयं काऊण पव्वाविओ, वयंसगा से अद्धीइं काऊण पडिगया, तेऽवि उवस्सयं नियगं गया, विलंबिए सूरे पंथं पडिलेहेइ, परं पच्चूसे बच्चामित्ति विसज्जिओ, पडिलेहिउमागओ, पच्चूसे निग्गया, पुरतो वच्चति(न्ति) भणितो, वच्चंतो पंथातो फिडितो चंडरुद्दो खाणुए पक्खलितो, रुसिएण हा दुट्ठसेहत्ति दंडएण मत्थए आहतो, सिरं फोडितं, तहावि सम्मं सहइ, विमले पहाए चंडरुद्देण रुहिरोग्गलंतमुद्धाणो दिट्ठो, हा! दुट्ठु कयंति संवेगमावण्णेण खामिओ। एवं गुरुप्रसादात् चण्डरुद्राचार्यशिष्यस्येव सकलसमीहितावाप्तिरिति मत्वा मनोवाक्कायैर्गुरुचित्तानुवृत्तिपरैर्भाव्यमिति, अनेनान्तरेण च सूत्रेण प्रतिरूपयोगजनात्मक औपचारिको विनय उक्त इति सूत्रार्थः॥ कथं पुनर्गुरुचित्तमनुगमनीयमित्याह-

मू.(१४) *नापुट्ठो वागरे किंचि, पुट्ठो वा नालियं वए।*
कोहं असच्चं कुव्विज्जा, धारिज्जा पियमप्पियं॥

वृ. 'नापृष्टः' कथमिदम्? इत्याद्यजल्पितः, गुरुणेति गम्यते, 'व्याकुर्वीत' वदेत्, तथाविधं कारणं विना, 'किञ्चित्' स्तोकमपि, पृष्टो वा न 'अलीकम्' अनृतं 'वदेत्' कारणान्तरेण च गुरुभिरतिनिर्भर्त्सितस्ततोऽपि न तावत् क्रुध्येत्, कथञ्चिदुत्पन्नं वा क्रोधम् 'असत्यं' तदोत्पन्नकुविकल्पविफलीकरणेन 'कुर्वीत' विदध्यात्, कथम्?- 'धारयेत्' स्थापयेत्, मनसीति शेषः, 'पियमप्पियं'ति इवाप्योर्गम्यमानत्वात् प्रियमिवेष्टमिव सदा गुणकारणतया अप्रियमपि कर्णकटुकतया तदाऽनिष्टमपि, गुरुवचनमिति गम्यते, अत्र श्लोकपूर्वार्धेन वाचा यथा गुरुरनुवर्तनीयः तथोक्तमुत्तरार्धेन तु मनसेति, अथवा नापृष्ट इति न गुरुणैव किन्तु येन केनचिदपीत्यादिक्रमेण पादत्रयं सामान्येन प्राग्वन्नेयं, नवरं क्रोधम् उपलक्षणत्वान्मानादिकषायं चोत्पन्नमसत्यं कुर्वीत, क्रोधासत्यतायामुदाहरणसम्प्रदायः- कस्सवि कुलपुत्तयस्स भायावेरिएण वावाइओ, तओ सो जननीए भन्नइ- पुत्त! पुत्तघायगं घायसुत्ति, तओ सो तेन जीवग्गहो

गण्हिऊण जननीसमीवमुवणीओ, भणिओ अनेन भावघायय! कहिं ते आहणामित्ति, तेन भणिओ-जहिं सरणागया आहम्मंति, तेण जननी अवलोकिया, ताए भण्णइ-ण पुत्त! सरणागया आहम्मंति, तेण भण्णइ-कहं रोसं सफलं करेमित्ति, तेण भण्णइ-न पुत्त! सव्वत्थ रोसो सफलो कज्जइ, पच्छा सो तेन विसज्जिओ।

एवं क्रोधमसत्यं कुर्वीत, मानादिविफलीकरणे उदाहरणान्यागमादवधारणीयानि, इत्थं मुदितानां क्रोधादीनां विफलीकरणमुपदिष्टं, सम्प्रति यथैषामुदय एव न स्यात् तथोपदेष्टुमाह-'धारयेत्' स्वरूपेणावभासयेत्, न तद्वशगो रागं द्वेषं वा कुर्यात्, 'प्रियं' प्रीत्युत्पादकं शोभनजनापेक्षया स्तुत्यादि, 'अप्रियं' तद्विपरीतं निन्दादि, तत्रोदाहरणसम्प्रदायः- अस्सिवोत्तद्दए नयरे तिन्नि भूयवाईया रायकुलमुवगया भणंति-अम्हे अस्सिव उवसमेमोत्ति, रन्ना भणियं-सुणिमो केणोवाएणंति, तत्थेगो भणइ-अत्थि महेगं भूयं, तं सुरूवं विरूवं च्चिरूवं गोपुरदुवाइसु परियडइ, तं न निहालेयव्वं, तं निहालियं रुसइ, जो पुण तं निहालेति सो विनस्सइ, जो पुण पिच्छिऊण अहोमुहो लाइ सो रोगाओ मुच्चइ, गया भणंति-अलाहि एएण अइरोसणेणंति।

बिइओ भणति-महच्चयं भूयं महतिमहालयं रूवं विउव्वति, लंबोयरं विवृतकुक्षिं पंचसिरं एगपादं विसिहं विस्सरुवं अट्टट्टहासं मुयंतं गायंतं पणच्चंतं, तं विकृतरूपं दट्ठूणं जो पहसति पच्चंचेति वा तस्स सत्तहा सिरं फुट्टइ, जो पुण तं सुहाहिं वायाहिं अभिणंदति थुइपुप्फाईहिं पूएइ सो मच्चहाऽभयातो मुच्चइ, गया भणइ-अलमेएणंपि।

तइतो भणइ-ममंवि एवंविहमेव नातिविसेसकरं भूयमत्थि, प्रियाप्रियकारिणं दरिसणादेव रोगहिंतो मोच्चयति, एवं होउत्ति, तेन तहाकए अम्हे उवसंतं।

एवं साधूवि अमारुष्यत्वे सति शब्दादिप्रतिकूलत्वे च परेहिं परिभूयमाणो पव्वंसिज्जमाणो हसिज्जमाणो वा तथा थुव्वमाणो वा पूइज्जमाणो वा तं प्रियाप्रियं सहेत। अनेन च मनोगुप्त्यभिधानाच्चारित्रविनय उक्तः, इति सूत्रार्थः॥ आह क्रोधासत्यताकरणादिभिरात्मदमनोपाय उक्तः, तत्र च बाह्येष्वपि दमनीयेषु सत्सु किमिति तस्यैव दमनोपाय उद्दिश्यते? किं वा तद्दमने फलमिति,

मू. (१५) *अप्पामेव दमेयव्वो, अप्पा हु खलु दुद्दमो।*
अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य॥

वृ. अतति-सन्ततं गच्छति शुद्धिसंक्लेशात्मकपरिणामान्तरगणीत्यात्मा तमेव 'दमयेत्' इन्द्रियानोइन्द्रियदमेन मनोज्ञेतरविषयेषु रागद्वेषवशतो दुष्टगजाभिवोन्मार्गगामिनं स्वयं विवेकांकुशेनोपशमनं नयेत्, पठन्ति च-'अप्पा चेव दमेयव्वो'नि स्पष्टं, किमेवमुपदिश्यत इत्याह-आत्मैव, हुशब्दस्यैवकारार्थत्वात् 'खलु' इति यस्मात् 'दुर्दमः' दुर्जयः, ततस्तद्दमने दमिता एव बाह्यदमनीया इति, न तद्दमनमुपदिश्यत इति भावः, उक्तं हि- "मल्लमप्पे जिए जियं", कः पुनरेतं गुण इत्याह-आत्मा 'दान्त' उपशममानीतः, सुखमस्यास्तीति सुखी, भवति, क्व? 'अस्मिन्' इत्यनुभूयमानायपि विनेयाभ्यक्षे 'लोके' भवे 'परत्र च' इत्यागामिनि भवान्तरे, दान्ता ऽऽत्मानो हि परमार्यय इहैव सुरैरपि पूज्यन्ते, अदान्ता ऽऽत्मानस्तु चौरपारदारिकादयो विनश्यन्ति, तथा-

"सद्देण म ओ रूवेण पयंगो मच्छुयंगो (य) गंधेण ।
आहारेण य मच्छो वज्झइ फासेण य गईदो ॥"

तदिन्द्रियवशगस्तु इह परत्र च बध्यते, तत्र चोदाहरणम् - दो भायरो चोरा, तेसिं उक्कस्सए साहूणो वासाकाले उवागया, तेहिं वासारत्तपारवसयत्तीए ण छड्डेतेहिं तेसिं चोराणं अन्नं वयं किंचि अपडिवज्जमाणाणं रत्तिं न भोत्तव्वंति चयं दिण्णं । अन्नया तेहिं उद्दाइएहिं सुबहुयं गोमाहिसं आनियं, तत्थ अन्नो महंसि मारेउं पइउमारद्धो, अन्नो मज्झत्थो गया, मंसइत्ता संपहारेन्ति - अद्धगे मंसे विसं पक्खिवामो तो मज्झइत्ताणं दाहामो, तओ अम्हं सुबहुं गोमाहिसं भागेण आगमिस्सइ, मज्झत्तस्वि एवं चेव सामत्थेहिंति, एवं तेहिं विसं पक्खित्तं, आइच्चो य गत्थं गतो, ते भायरो न भुत्ता, इयरे परोप्परं विग्गंजुतेण मज्झमंसेण उवभुत्तेण मया, मरिऊण य कुगइं गया, इयरे इह परलोए य सुहभागिणो जाया, एवं ताव जिब्भिंदियदमे, एवं सेसेसुवि इंदिएसु, 'अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य' इति सूत्रार्थः ॥ किं पुनः परिभावयन्नात्मानं दमयेदित्याह-

मू. (१६) *वरं मे अप्पा दंतो, संजमेन तवेन य ।*
माऽहं परेहिं दम्मंतो, बंधणेहि वहेहि य ॥

वृ. 'वरं' प्रधानं 'मे' मया 'आत्मा' अभिहितरूपस्तदाधाररूपो वा देहः, 'दान्तः' इति दमं ग्राहितः असमञ्जसचेष्टातो व्यावर्तितः, केन हेतुना ? - 'संयमेन' पञ्चाश्रवविरमणादिना, 'तपसा च' अनशनादिना, चशब्दो द्वयोरप्यनर्थक्षतायां मुक्तिहेतुताविरहात् परस्परसापेक्षतासूचनार्थः सम्यग्ज्ञानसमुच्चयार्थो वा, विपर्यये दोषदर्शनाह 'मा' प्राप्नुयां, 'अहम्' इत्यात्मानिर्देशः, 'परैः' आत्मव्यतिरिक्तैः 'दम्यमानो' नित्त आत्मेत्यादिभिः, कैः ?, 'बन्धनैः' वध्रादिविरचितैर्मयूरबन्धादिभिः 'वधैश्च' लगुडलकुटादिताडनैः, अत्रोदाहरणं संयणा ओ गंधहत्थी - अडवीए हत्थिजूहं महल्लं परिवसइ, तत्थ जूहवती जाए जाए गयकलभए विणासेइ, तत्थेगा करिणी आवण्णसत्ता चिंतेइ - जइ कहंचि गयकलभतो जायइ, सो वि एतेन विणासिज्जंतिकाउं लंघंती ओसरइ, जूहाहिवेण जूहे छुब्भइ, पुणो ओसरइ, ताहे वितियतइयदिवसे जूहेण मिलइ, ताहे एगं रिसिआसमपयं दिट्ठं, सा तत्थ आलीणा संढिणया य अणाए गिम्भो, सा पमुया गयकलभं, सो तेहिं रिसिकुमारेहिं सहिओ पुप्फारामं सिंचइ, संयणउत्ति से नामं कयं, वयत्थो जातो अ, जूहं दट्ठूण जूहवतिं हंतूणं जूहं गेण्हइ डिंडवण्णं, गंतूण य अगेण सो आसमो विनासितो, नो अन्नाति कावि एवं काहितित्ति ।

ताहे ते रिसिणो रुसिया, पुप्फफलसमिद्धयपाणो संढियस्स रन्नो सयासं उवगया, कहियं च डिंभेहिं-एरिसो सव्वलक्खणसंपुण्णो गंधहत्थी संयणो नाम, सो अम्हे हत्थिग्गहणाय गतो, सो य हत्थी देवयाए परिगाहितो, तं हं(ए) ओहिणा आभोइयं - जहा अवरद्धं एसो घेप्पति, ताहे ताए सो भणाए-पुत्त ! वरं ते अप्पा दंतो, न यऽसि परेहिं दंभंतो बंधनेहिं वहेहि य, सो एवं भणिओ सयमेव रस्सीए गंतूण आलाणखंभे अल्लियंतो । यथा हि अस्य स्वयंदमनान्महागुणः तथा मुक्त्यर्थिनोऽपि विशिष्टनिर्जरातः, इतरथा त्वकामनिर्जरातो न तथेति सूत्रार्थः ॥

मू. (१७) *पडिनीयं च बुद्धाणं, वाया अदुव कम्मुणा ।*
आवी वा जइ वा रहस्से, नेव कुज्जा कयाइवि ॥

वृ. 'प्रत्यनीकम्' इति प्रतिकूलं, यः पूर्णे, चेष्टितमित्युपस्कारः, भावप्रधानत्वाद्वा निर्देशस्य प्रत्यनीकत्वं, केषाम् ?-'बुद्धानाम्' अवगतवस्तुतत्त्वानां गुरूणामिति यावत्, कथा ?-वाचा, किं त्वमपि किञ्चिज्जानीषे ? इत्येवंरूपया विपरीतप्ररूपणायां प्रेरितस्त्वयैवंविदित्थमस्माकं प्ररूपितमित्याद्यात्मिकया वा, अथवा 'कर्मणा' संस्तारकातिक्रमणकरचरणसंस्पर्शनादिना 'आविः' जनसमक्षं प्रकाशदेश इतियावत्, यदिवा 'रहस्ये' विविक्तोपाश्रयादौ 'न' इति निषेधे 'एवः' अवधारणे, स च 'शत्रोरपि गुणा ग्राह्याः, दोषा वाच्या गुरोरपि'ति कुमतनिराकरणार्थः, 'कुर्यात्' इति विदध्यात्, 'कदाचित्' परुषभाषणादावपि इति। पुनः शुश्रूषणात्मकं तमेवाह-

मू. (१८) न पक्खओ न पुरओ, नेव किच्चाण पिट्ठओ।
न जुंजे ऊरुणा ऊरुं, सयणे न पडिस्सुणे॥

वृ. 'न पक्षतः' दक्षिणादिपक्षमाश्रित्य, उपविशेदिति सर्वत्रोपस्कारः, तथोपवेशने तत्पंक्तिसमावेशतः तन्माम्याापादनेनाविनयभावात्, गुरोरपि वक्त्रावलोकने स्कन्धकन्धरादिव्याघातसम्भवात्, न 'पुरतः' अग्रतः, तत्र वन्दकजनस्य गुरुवदभिमुखलोकनादिनाऽप्रीतिभावात्, 'नैव' इति पूर्ववत्, कृतिः-वन्दकं तदर्हन्ति कृत्वाः 'दण्डादित्वाद् यप्रत्ययः' ते चार्थादाचार्यादयस्तेषां पृष्ठतः' पृष्ठदेशमाश्रित्य, द्वयोरपि मुखादर्शने तथाविधभ्रमवतोऽभावादिदोषसंभवात्, 'न युञ्ज्यात्' न संघट्टयेद् अत्यासन्नोपवेशादिभिः, 'ऊरुणा' आत्मीयेन, 'ऊरुं' कृत्यसम्बन्धिनं, तथाकरणेऽत्यन्ताविनयसम्भवात्, उपलक्षणं चैतत् शेषाङ्गस्पर्शपरिहास्य, 'शयने' शय्यायां शयित आसीनो वेति शेषः, किमित्याह- न प्रतिशृणुयात्, किमुक्तं भवति ?-कदाचिच्छय्यागतो गुरुणाऽऽकारित उक्तो वा कृत्यं प्रति न तथास्थित एवावज्ञया कुर्म एवमित्यादिवचनतः प्रतिजानीयात्, किन्तु गुरुवचनसमनन्तरमेव सम्भ्रान्तचेता विनयविरचिताञ्जलिः समीपमागत्य पादपतनपुरस्सरमनुगृहीतोऽहमिति मन्यमानो भगवन्निच्छामोऽनुशिष्टिमिति वदेदिति सूत्रार्थः॥

मू. (१९) नेव पल्हत्थियं कुज्जा, पक्खपिंडं व संजए।
पाए पसारिए वावि, न चिट्ठे गुरुनंतिए।

वृ. नैव 'पर्यस्तिकां' जानुजंघोपरिवस्त्रवेष्टनाऽऽत्मिकां कुर्यात् 'पक्षपिण्डं वा' बाहुद्वयकायपिण्डात्मकं, 'संयतः' साधुः, तथा पादौ प्रसारयेत् वाऽपि नैव, वा समुच्चयार्थः, अपिः किं पुनरित इतो विक्षिपेदिति निदर्शनार्थः, अन्यच्च-'न तिष्ठेत्' नाऽऽसीत, क्व ?, गुरूणामन्तिके इति, प्रक्रमादतिसन्निधौ, किन्तूचितदेश एव, अन्यथाऽविनयदोषसम्भवात्, अथवा 'पाए पसारिए वावि'त्ति पाठात्, पादौ प्रसारितौ वाऽपि, कृत्वेति शेषः, एकारस्यालाक्षणिकत्वात् प्रसार्य वा न तिष्ठेद्गुरूणामन्तिके उचितप्रदेशेऽपीति, उपलक्षणं चैतद्दण्डपादिकाऽवष्टम्भादीनामिति सूत्रार्थः॥ पुनः प्रतिश्रवणविधिमेव सविशेषमाह-

मू. (२०) आयरिएहिं वाहितो, तुसिणीओ न कयाइवि।
पसायपेही नियागट्ठी, उवचिट्ठे गुरुं सया॥

वृ. 'आचार्यैः' उपलक्षणत्वादुपाध्यायादिभिः 'वाहितो'त्ति व्याहृतः शब्दितः 'तुसिणीओ'त्ति तूष्णीकः तूष्णीशीलः, 'न कदाचिदपि' ग्लानाद्यावस्थायामपि, भवेदिति गम्यते, किन्तु-

"अन्यस्योपरि निपतत्यहितसमाचरणधर्मनिर्वापी।

गुरुवदनमलयनिसृतं वचनरसमधून्दनस्पर्शः ॥''

इति प्रसादोऽयं यदन्यमद्भावेऽपि मामादिशन्ति गुरव इति प्रेक्षितुम्-आलोचनं शीलमस्येति प्रसादप्रेक्षी, पाठान्तरतः 'प्रसादार्थी' वा गुरुपरितोषाभिलाषी 'नियागट्ठी' त्ति पूर्ववत्, 'उपतिष्ठेत' मस्तकेनाभिवन्द इत्यादि वदन् सविनयमुपसर्पेत्, गुरुं 'सदा' सर्वकालमिति।

मू.(२१) *आलवंते लवंते वा, न निसीएज्जा कयाइवि।*
चइत्ता आसनं धीरो, जओ जत्तं पडिस्सुणे॥

वृ. अन्हिति [illegible]-वदति 'लपति वा' वारं वारमनेकधा वाऽभिदधति 'न निषीदेत्' न निषण्णो भवेत्, 'कदाचिदपि' व्याख्यानादिना व्याकुलतायामपि, किन्तु? 'त्यक्त्वा' अपहाय 'आसनं' पादपुञ्छनादि, धिया गजते धीरः, अक्षोभ्यो वा परीषहादिभिः, 'यत' इति यतो यत्नवान् 'अत्तं' ति प्राकृतत्वाद्विन्दुलोपि तस्य च द्वित्वं यद्गुरव आदिशन्ति तत् 'प्रतिशृणुयात्' अवश्यविधेयतया अभ्युपगच्छेदितिभावत्, यद्वा यत इति यत्र गुरवः, तत्र गत्वेति गम्यते, 'यात्रां' संयमयात्रां प्रस्तावाद् गुरूपदिष्टां प्रतिशृणुयादिति सूत्रार्थः॥ पुनः प्रतिरूपविनयमेवाऽऽह-

मू.(२२) *आसनगओ न पुच्छेज्जा, नेव सेज्जागओ कया।*
आगम्मुक्कुडुओ संतो, पुच्छेज्जा पंजलीउडे॥

वृ. 'आसनगतः' इति आसनासीनो न पृच्छेत्, सूत्रादिकमिति गम्यते, नैव 'शय्यागत' इति संस्तारकस्थितः, तथाविधावस्थां विनेत्युपस्कारः, 'कदाचिदपि' बहुश्रुतत्वेऽपि, किमुक्तं भवति?-बहुश्रुतेनापि संशये सति न न प्रष्टव्यं, पृच्छताऽपि नावज्ञया, सदा गुरुविनयस्यानतिक्रमणीयत्वात्, तथा चाऽऽगमः-

''जहाहिअग्गी जलणं नमंसे, नानाहुईमंतपयाहिसित्तं।
एवायरियं उवचिट्ठएज्जा, अनंतनाणोवगओऽवि संतो॥''

किं तर्हि कुर्यादित्याह-'आगम्य' गुर्वन्तिकमेत्य 'उत्कुटुक' इति मुक्तासनः, कारणतो वा पादपुञ्छनादिगतः सन् शान्तो वा 'पृच्छेत' पर्यनुयुञ्जीत, सूत्रादिकमितीहापि गम्यते, प्रकर्षेण-अन्तःप्रोत्थातकेन कृतो-विहितोऽञ्जलिः-उभयकरमीलनात्मकोऽनेनेति प्रकृताञ्जलिः, प्राकृतत्वाच्च कृतशब्दस्य परनिपातः, 'पंजलिउड' त्ति पाठे च प्रकृष्टे-भावान्विततयाऽञ्जलिपुटमस्येति प्राञ्जलिपुट इति सूत्रार्थः॥ ईदृशस्य शिष्यस्य गुरुणा यत् कृत्यं तदाह-

मू.(२३) *एवं विनयजुत्तस्स, सुत्तं अत्थं तदुभयं।*
पुच्छमाणस्स सिस्सस्स, वागरिज्ज जहासुयं॥

वृ.'एवम्' इत्युक्तप्रकारेण 'विनययुक्तस्य' विनयान्वितस्य 'सूत्रं' कालिकोत्कालिकादि 'अर्थं च' तस्यैवाभिधेयं 'तदुभयं' सूत्रार्थोभयं 'पृच्छतः' जीप्सतः 'शिष्यस्य' स्वयंदीक्षितस्योपसम्पन्नस्य वा 'व्यागृणीयात्' विविधमभिव्याप्त्याऽभिदध्यात् व्याकुर्याद्वा प्रकटयेत्, यथा येन प्रकारेण श्रुतम्-आकर्णितं, गुरुभ्य इति गम्यते, न तु स्वबुद्धैवोत्प्रेक्षितमित्यभिप्रायः,

''आयारे सूयविनए विक्खित्तवणे चेव होइ बोद्धव्वे।
दोसस्स य निग्घाए, विनए चउहेस पंडिवत्ती॥''

इत्यागमाभिहितचतुर्विधाचार्यविनयान्तर्गतस्य -

"सुत्तं अत्थं च तहा हियकरं निस्संसयं च वाएइ ।
एसो चउव्विहो खलु सुयविणओ होइ नायव्वो ॥
सुत्तं गाहेति उज्जुत्तो अत्थं च सुणावए पयत्तेणं ।
जं जस्स होइ जोगं परिणामगमाइ तं तु सुयं ॥
निस्संसयमपरिस्सं जाव ममत्तं च ताव वाएइ ।
एसो सुयविणओ खलु निद्दिट्ठो पुव्वसूरीहिं ॥"

इत्याद्यागमाभिहितस्य श्रुतविनयस्य साक्षादभणनं यच्च विनयं प्रादुष्करिष्यामीति प्रतिज्ञाय 'अब्भुट्ठाणं अंजलि' तथा 'दंसणनाणचरित्ते' इत्यादिना ग्रन्थेनैव न तस्य शुद्धस्वरूपाभिधानं, किन्तु 'निसंते सिया अमुहरी' इत्यादि लिङन्तादिपदरूपदेशरूपतया, तदपि प्रसङ्गत एव यथायोगमाचार्यविनयोपदर्शनपरमिति भावनीयमिति सूत्रार्थः ॥ पुनः शिष्यस्य वाग्विनयमाह-

मू. (२४) *मुसं परिहरे भिक्खू, न य ओहारिणिं वए ।*
भासादोसं परिहरे, मायं च वज्जए सया ॥

वृ. 'मृषा' इत्यसत्यं भूतनिह्नवादि 'परिहरेत्' सर्वप्रकारमपि त्यजेत्, भिक्षुः, 'न च' नैव 'अवधारणीं' गम्यमानत्वाद् वाचं गमिष्याम एव वक्ष्याम एव इत्येवमाद्यवधारणात्मिकां 'वदेत्' भाषेत्, किं बहुना ?, 'भाषादोषम्' अशेषमपि वाग्दूषणं सावद्यानुमोदनादिकं परिहरेत्, न च कारणोच्छेदं विना कार्योच्छेद इत्याह-'मायां, चशब्दात् क्रोधादींश्च तद्धेतून् वर्जयेत् 'सदा' सर्वकालमिति सूत्रार्थः ॥ किञ्च-

मू. (२५) *न लविज्ज पुट्ठो सावज्जं, न निरट्ठं न मम्मयं ।*
अप्पणट्ठा परट्ठा वा, उभयस्संतरेण वा ॥

वृ. 'न लपेत्' न वदेत् 'पृष्ट' इति पर्वनुमुक्तः 'सावद्यं' सपापं न 'निरर्थम्' अर्थविगर्हितं दशदाडिमादि एष वन्ध्यासुतो यातीत्यादि वा 'न' नैव, म्रियतेऽनेन राजादिविरुद्धेनो चारितेनेति मर्म तदगच्छति वाचकतयेति मर्मगं, वचनमिति सर्वत्र शेषः, अतिसंक्लेशोत्पादकत्वात् तस्याः,

"तहेव काणं काणत्ति, पंडगं पंडगत्ति वा ।
वाहियं वावि रोगित्ति, तेनं चोरेत्ति नो वए ॥१॥
एएणऽन्नेण अट्ठेनं, परो जेनुवहम्मई ।
आयारभावदोसन्नू, न तं भासेज्ज पन्नवं ॥२॥"

'आत्मार्थम्' आत्मप्रयोजनं 'परार्थं वा' परप्रयोजनम् 'उभयस्से'ति आत्मनः परस्य च, प्रयोजनमिति गम्यते, 'अंतरेण व'त्ति विना वा प्रयोजनमित्युपस्कारः, भाषादोषं परिहरेदित्यनेनैव गते पृष्टविषयत्वादस्यापौनरुक्त्यं, यद्वा भाषादोषो जकारमकारादिरेव तत्र गृह्यत इति न दोषः, सूत्रद्वयेन चानेन वाग्गप्त्यभिधानतश्चारित्रविनय उक्त इति सूत्रार्थः ॥

इत्थं स्वगतदोषपरिहार- मभिधायोपाधिकृतदोषपरिहारमाह-

मू. (२६) *समरेसु अगारेसु, गिहसंधिसु अ महापहेसु ।*
एगो एगित्थीए सद्धिं, नेव चिट्ठे न संलवे ॥

वृ. 'समरेषु' स्वयंकृतेषु, तथा च चूर्णिकृत्-'समरं नाम जत्थ हेट्ठा लोयाग कम्मं कारेंति'

उपलक्षणत्वादस्यान्यत्रापि नीचास्पदेषु 'अगारेषु' गृहेषु 'गृहसन्धिषु च' गृहद्वयान्तरालेषु च 'महापथेषु' राजमार्गादौ, किमित्याह- 'एकः' असहायः एका- असहाया सा चासौ स्त्री च एकस्त्री तथा 'सार्द्धं' सह 'नैव तिष्ठेत्' असंलपन्नेव चोद्भ्रान्तस्थानस्थो न भवेत्, 'न संलपेत्' न तयैव सह संभाषं कुर्यात्, अत्यन्तदुष्टतोद्भावनपरं चैकग्रहणम्, अन्यथा ससहायाम्यापि समक्ष-यया अपि च स्त्रिया सहावस्थानं सम्भाषणं चैवंविधास्तदेषु दोषायैव, प्रवचनमालिन्यादि दोषसम्भवात्, अथवा समर्यन्ते अभिवर्तन्त इति समरा द्रव्यतो जनसंहारकारिणः संग्रामाः भावास्तु स्त्रीणामभिभूतत्वात् ज्ञानादिजीवस्वतत्त्वघातिनः तासामेव दृष्ट्वा दृष्टिसम्बन्धाः, तत्रेह भावसमरैरधिकारः, यतश्चैवं, ततोऽयं भावार्थः -द्रव्यसमरा हि न स्युरपि प्राणापहारिणः, भावसमरास्तु ज्ञानादिभावप्राणापहारिण एव, विशेषतस्त्वेकाकितायां, तत एवमेतेष्वपि दारुणेषु भावसमरेषु सत्सु नैक एकस्त्रियः सम्बन्धिनीषु निषेद्दुं शक्यते, अनेनापि चारित्रविनय एवोक्तः, उपदेशाधिकाराच्च न पौनरुक्त्यम्, एवमन्यत्रापि भावनीयमिति सूत्रार्थः। कदाचित् स्खलिते च गुरुभिः, शिक्षितो यत्कुर्यात् तदेवाह-

मू. (२७) *जं मे बुद्धानुसासंति, सीएण फरुसेण वा।*
मम लाभुत्ति पेहाए, पयओ य (तं) पडिस्सुणे॥

वृ. यन्मां बुद्धा 'अनुशासन्ति' शिक्षां ग्राहयन्ति 'शीतेन' सोपचारावक्त्रसा, 'शीलेन वे'ति पाठः, तत्र शीलं- महाव्रतादि उपचारात्तज्जनकं वचोऽपि शीलं तेन, यद्वा 'शील समाधौ' ततः शीलेन- समाधानकारिणा- भद्र! भवादृशामिदमनुचितमित्यादिना, 'परुषेण' कर्कशेन, उभयत्र वचसेति गम्यते, तत् 'प्रतिशृणुयात्' विधेयतया अङ्गीकुर्यादित्युत्तरेण सम्बन्धः, किमित्यभ-सन्धायेत्याह- मम 'लाभः' अप्राप्तार्थप्राप्तिरूपः, यन्ममानाचारकारिणममी शासन्तीति 'पेहाए'त्ति एकारस्यालाक्षणिकत्वात् प्रेक्ष्य - आलोच्य प्रेक्षया वा एवंविधबुद्ध्या 'पयतो'त्ति प्रयतः प्रय-लवान्, पदतो वा- तथाविधानुस्मर्यमाणसूत्रालापकादिति सूत्रार्थः॥ किमिह परत्र चात्यन्तोपकारि गुरुवचनमपि कस्यचिदन्यथा सम्भवति ?, येनैवमुपदिश्यते इत्याह-

मू. (२८) *अनुसासणमोवायं, दुक्कडस्स य चोयणं।*
हियं तं मन्नए पन्नो, वेस्सं भवइ असाहुणो॥

वृ. 'अनुशासनम्' उक्तरूपम् 'ओवायं'ति उपाये - मृदुपरुषभाषणादौ भवमौपायं, यद्वा 'ओवायंति' सूत्रत्वात् उपपतनमुपपातः - समीपभवनं तत्र भवमौपपातं- गुरुसंस्तारास्तरणादि-श्रामण्यादिकृत्यं 'दुष्कृतस्य च' कुत्सिताचरितस्य प्रेरणं- हा! किमिदमित्थमाचरितमित्याद्या-त्मकं, गुरुविहितमिति गम्यते, 'हितम्' इहपरलोकोपकारि, 'तदि'त्यनुशासनादि मन्यते 'प्राज्ञः' प्रज्ञावान् 'द्वेष्यं' द्वेषोत्पादकं 'भवति' जायते, कस्य ?, 'असाधोः' अपगतभावसाधुत्वस्य, तदनेनासाधोर्गुरुवचनस्याप्यन्यथात्वसम्भव उक्त इति सूत्रार्थः॥ अमुमेवार्थं व्यक्तीकर्तुमाह-

मू. (२९) *हियं विगयभया बुद्धा, फरुसंपि अणुसासणं।*
वेस्सं तं होइ मूढाणं, खंतिसोहिकरं पयं॥

वृ. 'हितं' पथ्यं 'विगतभयाः' सप्तभयरहिताः 'बुद्धाः' अवगततत्त्वाः, मन्यन्त इति शेषः, 'परुषमपि' कर्कशमपि, अनुशासनं शिष्याणां गुरुविहितमिति प्रक्रमः, 'द्वेष्यं' द्वेषोत्पादि

'तद' इत्यनुशासनं भवति 'गुरुजनस्य' अज्ञानस्य, क्षान्तेः - क्षमाया शुद्धिः - आशयविशुद्धता तत्करणं, यद्वा - क्षान्तेः शुद्धिः - निर्मलता क्षान्तिशुद्धिस्तत्करम्, ऋद्धानां विशेषतः क्षान्तिहेतुत्वाद् गुर्वनुशासनस्य, मार्दवादिशुद्धिकरत्वोपलक्षणं चैतद्, अत एव पठ्यते - गम्यते गुणैर्ज्ञानादिभिरिति पदं - ज्ञानादिगुणस्थानमित्यर्थः, अथवा - परुषमपोल्यर्थशब्दो भिन्नक्रमः, ततश्च हितमप्यायत्यां विगतभयाद् 'बुद्धाद' आचार्यादेः, उत्पन्नमिति शेषः, परुषं यच्छ्रुत्यसुखदमनुशासनं, तत्किमित्याह - हेयं तद्भवति मूढानां, शेषं प्राग्वदिति सूत्रार्थः ॥ पुनर्विनयमेवाह -

मू. (३०) आसने उवविट्ठिज्जा, अणुच्चेऽकुक्कुए थिरे।
अप्पुत्थाई निरुत्थाई, निसीज्जा अप्पकुक्कुई ॥

वृ. 'आसनं' पीठादि तदभावे तु भूतलादौ तत्र पीठादौ 'उपतिष्ठेत्' उपविशेत्, 'अनुच्चे' द्रव्यतो नीचे भावतस्त्वल्पमूल्यादौ, गुर्वासनात् इति गम्यते, 'अकुक्कुचे' अस्पन्दमाने, न तु तिनिशफलकवत् किञ्चिच्चलति, तस्य शृङ्गारार्थत्वात्, 'स्थिरे' समपादप्रतिष्ठिततया निश्चले, अन्यथा सत्त्वविराधनासम्भवात्, ईदृशस्यप्यासने अल्पमुत्थातुं शीलमस्येति अल्पोत्थायी, प्रयोजनेऽपि न पुनः पुनरुत्थानशीलः, 'निरुत्थायी' न निमित्तं विनोत्थानशीलः, उभयत्रान्यथाऽनवस्थितत्वसम्भवात्, एवंविधश्च किमित्याह - 'निषीदेत्' आसीत, 'अप्पकुक्कुइ'त्ति अल्पस्पन्दनः, करादिभिरल्पमेव चलन्, यद्वा - अल्पशब्दोऽभावाभिधायी, ततश्चाल्पम् - अमत्, कुक्कुयं'ति कौत्कुचं - करचरणभ्रूभ्रमणाद्यमच्चेष्टात्मकमस्येत्यल्पकौत्कुचः, अनेनाप्यौपचारिकविनयः प्रकारान्तरेणोक्त इति सूत्रार्थः ॥

सम्प्रति चरणकरणविनयात्मिकामेषणासमितिमाह -

मू. (३१) कालेन निक्खमे भिक्खू, कालेन य पडिक्कमे।
अकालं च विवज्जित्ता, काले कालं समायरे ॥

वृ. 'कालेन'त्ति समभ्यर्थे तृतीया, काले प्रस्तावे 'निष्क्रामेत्' गच्छेत् भिक्षुः, अकालनिर्गमे आत्मवलामनादिदोषसम्भवात्, तथा कालेन च 'प्रतिक्रामेत्' प्रतिनिवर्तेत, भिक्षाटनादिति शेषः, इदमुक्तं भवति - अलाभेऽपि 'अलाभोत्ति न सोइज्जा, तवोत्ति अहियासए' इति समयमनुस्मरन्, अल्पं मया लब्धं न लब्धं वेति लाभार्थी नाटयन्नेव तिष्ठेत्, किमित्येवमत आह - 'अकालं' तत्तत्क्रियाया अयोग्यं चेति, यस्माद्विपर्ययकाले प्रस्तावे प्रत्युपेक्षणादिसम्बन्धिनि 'काले'ति तत्तत्कालोचितं क्रियाकलापं 'समाचरेत्' कुर्यात्, अन्यथा कृषीबलकृषीक्रियाया इवाभिमतफलोपलम्भासम्भव इति गर्भार्थः, अनेन च कालनिष्क्रमणादौ हेतुरुक्तः, प्रसङ्गात् शेषक्रियाविषयतया वा नेयं, समुच्चयार्थश्च तदा चशब्द इति सूत्रार्थः ॥ निर्गतश्च यत्कुर्यात्तदाह -

मू. (३२) परिवाडिए न चिट्ठिज्जा, भिक्खू दत्तेसणं चरे।
पडिरूवेण एसित्ता, मियं कालेण भक्खए।

वृ. 'परिपाट्यां' गृहपंक्तेः, तस्यां 'न तिष्ठेत्' न पंक्तिस्थगृहभिक्षोपादानायैकत्रावस्थितो भवति, तत्र दायकदोषाऽवलगनप्रसङ्गात्, यद्वा - पंक्तायां - भोक्तुमुपविष्टपुरुषादिसम्बन्धिन्यां न तिष्ठेत्, अप्रीत्यादिकल्याणतादिदोषसम्भवात्, किञ्च ? 'भिक्षुः' यतिः, दत्तं - दानं तस्मिन् गृहिणा दीयमाने 'एषणां' तद्गतदोषान्वेषणात्मिकां 'चरेत्' आसेवेत, 'चरतिः आसेवायामपि

वर्त्तते' इति वचनात्, अनेन ग्रहणैषणोक्ता. किं विधाय दत्तैषणां चरेत् ? - 'प्रतिरूपेण' प्रधानेन रूपेणेति गम्यते. 'यद्वा-प्रतिप्रतिबिम्बं चिरन्तनमुनीनां यद्रूपं तेन, उभयत्र पतद्ग्रहादिधारणात्मकेन सकलान्यधार्मिकविलक्षणेन, न तु -

'वस्त्रं छत्रं छात्रं पात्रं यष्टिं च वर्जयेद् भिक्षुः ।
त्रपणः परिकरेण च क्रियताऽपि विना न भिक्षाऽपि ॥'

इत्यादिवचनाकर्णनाद् विभूषणात्मकेनैर्पायत्या. अनेन च गवेषणा विधिरुक्तः, ग्रासैषणा विधिमाह- 'मितं' परिमितमात्रभोजनात् स्वाध्यायविघातादिबहुदोषसंभवात्, 'कालेन' इति-

'समोक्कारेण पारित्ता, करित्ता जिनसंथवं ।
सज्झायं पट्ठवित्ता णं, वीसमेज्ज खणं मुनी ॥'

इत्याद्यागमोक्तप्रस्तावेनादुतादिविलम्बितरूपेण वा 'भक्षयेत्' भुञ्जीतेति सूत्रार्थः ॥ यत्रान्यभिक्षुकासंभवस्तत्र विधिरुक्तः, यत्र तु पुराऽऽयातान्यभिक्षुकसम्भवस्तत्र विधिमाह-

मू. (३३) *नाइदूरे अनासन्ने, नन्नेसिं चक्खुफासओ ।*
एगो चिट्ठेज्ज भत्तट्ठं, लंघित्ता तं नइक्कमे ॥

वृ. 'नातिदूरे' सुब्व्यत्ययात् नातिदूरे- अतिविप्रकर्षेति देशे, तिष्ठेदिति सम्बन्धः, तत्र च तन्निर्गमावस्थानागमप्रसङ्गाद् एषणाशुद्धयसम्भवाच्च, तथा 'अनासन्ने'ति प्राग्व्यतिषेधार्थत्वात् नञोऽनासन्ने प्रस्तावान्नातिनिकटवर्त्तिनि भूभागे तिष्ठेत्, तत्र पुराप्रविष्टापरभिक्षुकाप्रीतिप्रसक्तेः 'नान्येषां' भिक्षुकापेक्षया परेषां गृहस्थानां 'चक्षुःस्पर्शत' इति ससम्यर्थे तसिः, ततः चक्षुःस्पर्शौ दृग्गोचरे चक्षुःस्पर्शगो वा दृग्गोचरगतः 'तिष्ठेत्' आसीत, किन्तु विविक्तप्रदेशस्थो यथा न गृहिणो विदन्ति, यदुत-एष भिक्षुको निष्क्रमणं प्रतीक्षते इति, तथा 'एगो'त्ति किमयं मम पुरतः प्रविष्ट इति तदुपरि द्वेषरहितः 'भक्तार्थं' भोजननिमित्तं, न च 'लंघित्त'त्ति उल्लंघ्य, 'तम्' इति भिक्षुकम्, 'अतिक्रामेत्' प्रविशेत्, तत्रापि तदप्रीत्यपवादादिसम्भवाद् । इह च मितं कालेन भक्षयेदिति भोजनमभिधाय यत्पुनर्भिक्षाटनाभिधानं तत् ग्लानादिनिमित्तं स्वयं वा बुभुक्षावेदनीयमसहिष्णोः पुनर्भ्रमणमपि न दोषायेति ज्ञापनार्थम्, उक्तं च -''जइ तेण न संथरे। तओ कारणमुप्पण्णे, भत्तपाणं गवेसए ॥'' पुनस्तद्गतविधिमेवाभिधित्सुराह-

मू. (३४) *नाइउच्चे नाइनीए, नासन्ने नाइदूरओ ।*
फासुयं परकडं पिंडं, पडिगाहिज्ज संजए ॥

वृ. 'नात्युच्चे' प्रासादोपरिभूमिकादौ नीचे वा-भूमिगृहादौ, तत्र तदुत्क्षेपनिक्षेपनिरीक्षणासम्भवाद् दायकापायसम्भवाच्च, यद्वा 'नात्युच्चः' उच्चस्थानस्थितत्वेन ऊर्द्ध्वीकृतकन्धरतया वा द्रव्यतो भावतस्त्वहो ! अहं लब्धिमानिति मदाध्मातमानसः, नीचोऽत्यन्तावनतकन्धरो निम्नस्थानस्थितो वा द्रव्यतः भावतस्तु न मयाऽद्य किञ्चित् कृतोऽप्यवासमिति दैन्यवान्, उभयत्र वा समुच्चयः, तथा 'नासन्ने' समीपवर्त्तिनि 'नातिदूरे' अतिविप्रकर्षवति प्रदेशे, स्थित इति गम्यते, यथायोगं जुगुप्साशंकैषणाशुद्धयसम्भवादयो दोषाः, अथवा अत एव नासन्नो नातिदूरः, प्रगता असव इति प्रत्ययेन मतुबन्तोपादप्रमन्तः - सहजसंसक्तिजन्मानो यस्मात् तत् प्रासुकं, परेण - गृहिणाऽऽत्मार्थं परार्थं वा कृतं - निर्वर्त्तितं परकृतं - किं तत् ? - 'पिण्डम्' आहारं

'प्रतिगृह्णीयात्' स्वीकुर्यात्, 'संयतः' यतिरांत सूत्रार्थः ॥ इत्थं सूत्रद्वयेन गवेषणाग्रहणैषणाविषयं विधिमुक्त्वा ग्रासैषणाविधिमाह -

मू. (३५) अप्पपाणेऽप्पबीए वा, पडिच्छन्ने व संवुडे।
समयं संजओ भुंजे, जयं अप्परिसाडियं ॥

वृ. अल्पशब्दोऽभावाभिधायी, तथाहि सूत्रत्वेन सत्वर्थीलोपात् प्राणाः - प्राणिनस्तत अल्पा - अविद्यमानाः प्राणाः - प्राणिनो यस्मिंस्तदल्पप्राणं तस्मिन् - अवस्थितागन्तुकजन्तु विरहिते, उपाश्रयादाविति गम्यते, तथा अल्पानि - अविद्यमानानि बीजानि - शाल्यादीनि यस्मिन्नतदल्पबीजं तस्मिन्, उपलक्षणत्वाच्चास्य सकलैकेन्द्रियविरहिते, ननु चाल्पप्रमाण इत्युक्तं अल्पबीज इति गतार्थं, बीजानामपि प्राणित्वाद्, उच्यते, मुखनासिकाभ्यां यो विनिश्चरति वायुः स एवेह लोके रूढितः प्राणो गृह्यते, अयं च द्वीन्द्रियादीनामेव संभवति, न बीजादेकेन्द्रियाणामिति कथं गतार्थता ?, तत्रापि 'प्रतिच्छन्ने' उपरिप्रावरणान्विते, अन्यथा सम्पातिमसत्त्वसम्पात सम्भवात्, 'संवृत्ते' पार्श्वतः कटकुट्यादिना सङ्कटद्वारे, अटव्यां कुड्यादिषु वा, अन्यथा दीनादियाचने दानादानयोः पुण्यबन्धप्रद्वेषादिदर्शनात्, संवृतो वा सकलाश्रवद्वारिरुणात् 'समकम्' अन्यैः सह, न त्वेकाकित्वेन रागवत्तया ममूर्छासहिष्णुतया वा, अत्राह च -

"साहवो तो चियत्तेणं, निमंतिज्ज जहक्कमं।
जइ तत्थ कोइ इच्छेज्जा, तेहिं सद्धिं तु भुंजए ॥" त्ति,

गच्छस्थितसामाचारी चेयं गच्छस्यैव जिनकल्पिकादीनामपरेषां मूलत्वख्यापनायोक्ता, उक्तं हि- 'गच्छे च्चिय निम्माओ' इत्यादि, यद्वा 'समयं' ति समयमेव समकं - सम्यविरसादिर्वाभाव्य द्वारादिविशेषरहितं, सम्यग् यतः संयतः यतिरित्यर्थः, 'भुञ्जीत' अश्नीयात् 'जयं' ति यतमानः 'अप्परिसाडियं' ति परिसाटविरहितमिति सूत्रार्थः ॥ यदुक्तं 'यतमानं' इति, तत्र वाग्यतनामाह

मू. (३६) सुकडेति सुपक्केति, सुच्छिन्नं सुहडे मडे।
सुनिट्ठिए सुलट्ठित्ति, सावज्जं वज्जए मुनी ॥

वृ. 'सुकृतं' सुष्ठु निर्वर्तितमन्नादि 'सुपक्वं' घृतपूर्णादि, 'इति' उपप्रदर्शने, 'सुच्छिन्नं' शाकपत्रादि 'सुहृतं' शाकपत्रादेरसितकृतल्यादि घृतादि वा सूपौदनेक्षुकादीनां, तथा 'मडे' त्ति प्रकर्षात् सुष्ठु मृतं घृताद्येव सक्तुसूपादौ, तथा सुष्ठु निष्ठितमत्यन्तिशयेन निष्ठा - रूपप्रकर्षप - र्यन्तात्मिकां गतं, 'सुलट्ठि' त्ति सर्वैरपि रसादिभिः प्रकारैः शोभनमिति, 'इति' एवंप्रकारार्थः, एवंप्रकारमन्यदपि सावद्यं प्रकर्षाद्वचो, वर्जयेन्मुनिः।

यद्वा - सुष्ठु कृतं यदनेनागतेः प्रतिकृतं, सुष्ठु पक्वं मांसाशनादि, सुच्छिन्नोऽयं न्यग्रोधपादपादिः, सुहृतं कदर्यादिर्थजातं, सुहृतो वा चौरादिः, सुमृतोऽयं प्रत्यनीकाधिष्ठवर्णादिः, सुनिष्ठितोऽयं - प्रासादकूपादिः, 'सुलट्ठि' त्ति शोभनोऽयं कर्तुरर्थादीगति सामान्येनैव सावद्यं वचोवर्जयेन्मुनिः। निरवद्यं तं सुकृतमनेन धर्मध्यानादि, सुपक्वमस्य वचनविज्ञानादि, सुच्छिन्नं स्नेहनिगडादि, सुहृतमुपकरणमशिवोपशान्तये, सुहृतं वा कर्मनीकादि, सुमृतस्य पण्डितमरणमर्तुः, तथा सुनिष्ठितोऽसौ साध्वाचारविषयः, 'सुलट्ठि' त्ति शोभनमस्य तपोऽनुष्ठानमित्यादिरूपं, कारणतो वा -

"यत्नपक्वेति व पक्वमालवे, यत्नछिन्नेति व छिन्नमालवे।

पयलालट्ठेनि व क्रम्महेउयं, पहारगाढेत्ति व गाढमालवे ॥"

इत्यामोपदेशात् प्रयत्नकृतपक्वादिरूपं चदेदमविनीतेनगोपदेशदानतो यद्गुरोर्भवति तदुपदेशयितुमाह-

मू. (३७) *रमए पंडिए सासं, हयं भद्दं व वाहए।*
बालं सम्मइ सासंतो, गलिअस्सं व वाहए ॥

वृ. 'रमते' अभिरतिमान् भवति, 'पण्डितान्' विनीतविनेयान्, 'शासत्' इत्याज्ञापयन् कथञ्चित प्रमादस्खलिते शिक्षयित्वा, गुरुरिति शेषः, कमिव कः ?, इत्याह-'हयमिव' अश्वमिव, कीदृशम् ? -भाति पाप्नुते वा भद्रम्तं- कल्याणावहं 'वाहकः' अश्वन्दमः' 'बालम्' अज्ञं 'शाम्यति' खिद्यते शासत्, स हि सकृदुक्त एव न कृत्येषु प्रवर्तते, तत इदं कुरु इदं च मा कार्षीरित्यादि पुनः पुनस्तमाज्ञापयन् शिक्षयित्वा, कमिव कः ?, इत्याह-'गलिम्' उक्तरूपमश्वमिव वाहक इति सूत्रार्थः ॥ गुरोः श्रमहेतुत्वमुदभावयन् बालस्याभिसन्धिमाह-

मू. (३८) *खड्डुयाहिं चवेडाहिं, अक्कोसेहि वहेहि य।*
कल्लाणमणुसासंतं, पावदिट्ठित्ति मन्नइ ॥

वृ. 'खड्डुकाभिः' रज्जुकाभिः 'चपेटाभिः' करतलाघातैः 'आक्रोशैः' असत्यभाषणैः 'वधैश्च' दण्डकादिघातैः, चशब्दादन्यैश्चैवंप्रकारैर्दुःखहेतुभिरनुशासनप्रकारैस्तमाचार्यं 'कल्याणम्' इहपरलोकहितम् 'अनुशासन्तं' शिक्षयन्तं, पापा दृष्टिः-बुद्धिरस्येति पापदृष्टिः, अयमाचार्यं इति मन्यते, यथा-पापोऽयं मां हन्ति निर्घृणत्वात्, चारकपालकवत्, पठन्ति च-'खड्डुया मे'इत्यादि, अत्र व्यवच्छेदफलत्वाद्, वाक्यस्य खड्डुकादय एव मम नापरं किञ्चित् समीहितमस्तीत्यभिसन्धिना कल्याणमनुशासनम(त)माचार्यअ पापदृष्टि मन्यते, यद्वाबालिशतयाऽनुशास्यमानोऽसौ खड्डुकादिरूपा वाचो मन्यत इति सूत्रार्थः ॥ गुरोरतिहितत्वं प्रविकाशयिष्यन्नविनीताभिसन्धिमाह-

मू. (३९) *पुत्तो मे भाय नाइत्ति, साहू कल्लाण मन्नइ।*
पावदिट्ठि उ अप्पाणं, सासं दासं व मन्नइ ॥

वृ. पुत्रो मे भ्राता ज्ञातीयति, अत्रेवार्थस्य गम्यमानत्वात् पुत्र इवेत्यादिवृद्धोऽऽचार्यो मामनुशास्तीति 'साधुः' सुशिष्यः 'कल्याणं' कल्याणहेतुमाचार्यमनुशासनं वा मन्यते, स हि विवेचयति शिष्यः-सौहार्दादसौ मां शास्ति, दुर्विनीतत्वे हि मम किमस्य परिहीयते ?, ममैव त्वर्थ ग्रंश इति। यान्योऽप्येवं किं न मन्यत इत्याह-'पापदृष्टिस्तु' कुशिष्यः पुनरात्मानं 'दासं'ति प्राकृतत्वाद्विद्यानुशासनेनापि शास्यमानं दासमिव मन्यते, यथा असौ दासवन्मामाज्ञापयति, ततोऽस्य शास्तरि पापदृष्टिताऽभिमन्यिरेव सम्भवतीति सूत्रार्थः ॥ विनयसर्वस्वमुपदेष्टुमाह-

मू. (४०) *न कोवए आयरियं, अप्पाणंपि न कोवए।*
बुद्धोवघाई न सिया, न सिया तोत्तगवेसए ॥

वृ. 'न कोपयेत्' न कोपोपेषं कुर्यात्, आचार्यम्, उपलक्षणत्वादन्यमपि विनयार्हम्, 'आत्मानमपि' गुरुभिरतिपरुषभाषणादिनाऽनुशिष्यमाणं न कोपयेत्, कथञ्चित सकोपतायामपि 'बुद्धोपघाती' आचार्योपघातकृत 'न स्यात्' न भवेत्, तथा न स्यात् लुप्यते-व्यथ्यतेऽनेनेति

तोत्रं-द्रव्यतः प्राजनको भावतस्तु तद्योगाद् भावकतया व्यथोपजनकं वचनमेव, तद् गवेषयति किमहममीषां जात्यादिदूषकं वच्मि ?, इत्यन्वेषयतीति तोत्रगवेषकः, प्रक्रमाद्गुरूणां, न स्यादिति चादरख्यापनार्थत्वान्न पुनरुक्तं - बुद्धोपघाती न स्यानत्रोदाहरणं - कश्चिदाचार्यादिगुणि - गुणसम्पत्समन्वितो युगप्रधानः पक्षीणप्रायकर्मा ऽऽचार्यो ऽनियतविहारितया विहर्तुमिच्छन्नपि परिक्षीणजंघाबलः क्वचिदेकस्थान एवावतस्थे, तत्रत्य श्रावकजनेन चैनेषु भगवत्सु सत्सु तीर्थं सनाथमिति विचिन्तयता तद्वयो ऽवस्थासमुचितस्निग्धमधुराहारादिभिः प्रतिदिवसमुपचर्यते स्म, तच्छ्रुत्वाश्च गुरुकर्मतया कदाचिदचिन्तयन्, यथा - कियच्चिरमयमजङ्गमो ऽस्माभिरनुपालनीयः, ततस्तमनशनमादापयितुमिच्छवो ऽतिभक्तश्रावकजनानुदिनदीयमानमुचितमशनादि तस्मै न समर्पयामासुः, अन्तप्रान्तादि च समुपनीय सविषादमिव तत्पुरत उक्तवन्तः - किमिह कुर्मः ?, यदीदृशामपि भवतामुचितमशनादि नामी विवेकविकलतया सदपि सम्पादयितुमीशते, श्राद्धानभिदधति च, यथा - अत्यन्तनिःस्पृहतया शरीरयापनायामपि प्रत्यनपेक्षणः प्रणीतं भक्त-पानमाचार्या नेच्छन्ति, किन्तु संलेखनायैव विशुद्धमध्यवस्यन्तीति ।

ततस तद्वचनमाकर्ण्य मन्युपरिनिभृतचेतसस्तमुपसृत्य सगद्गदं जगदुः - भगवन! भुवनभव-भावस्वभावावधीरितेन्द्रसुचिरतरातीतेष्वपि प्रतपत्सु भवत्सु भुवनमवभासवदिवाभाति, तत्किमयमत्र भवद्भिरकाल एव संलेखनाविधिराग्रहः ?, न च वयममीषां निर्वेदहेतव इति मन्तव्यं, यतः - शिरःस्थिता अपि भवन्तो न भारमस्माकममीषां वा शिष्याणां कदाचिदादधति, ततस्तैरिङ्गितज्ञैरुक्तवान्तं - यथा ऽस्मान्शिष्यमति विजृम्भितमेतत्, किममीषामप्रीतिहेतुना प्राणधारणेन ?, न खलु धर्मार्थिनां कस्यचिदप्रीतिरुत्पादयितुमुचितेति चेतसि विचिन्त्य मुकुलितमेव तत्पुरत उक्तं - कियच्चिरमजङ्गमैरस्माभिरुपरोधनीयास्तपस्विनो भवन्तश्च, तद्वरमुन्मार्चरित-मुत्तमार्थमेव च प्रतिपद्यामहे इति तानसौ संस्थाप्य भक्तमेव प्रत्याचचक्षे । इत्येवं बुद्धोपघाती न स्यादिति सूत्रार्थः ॥ एवं तावदाचार्यं न कोपयेदित्युक्तं, कथञ्चित्

मू. (४१) आयरिय कुविय नच्चा, पत्तिएणं पसायए ।
विज्झविज्जा पंजलिउडे, वएज्जा न पुणोत्ति ।

व्या. 'आचार्यम्' उक्तस्वरूपम्, उपलक्षणत्वादुपाध्यायादिकमपि 'कुपितम्' इति सकोपमनुशासनोदासीनतादिभिः, -

"पुरिसजाएवि तहा विनीयविनयम्मि नत्थि अभिओगो ।
सेसंमि उ अभिओगो जनवयजाए जहा आमे ॥"

इत्यागमात्, कृतबहिष्कोपं वा इष्टप्रदानादिना 'ज्ञात्वा' अवगम्य 'पत्तिएणं'ति आर्षत्वात् प्रतीतिः, प्रयोजनमस्येति प्रातीतिकं - शपथादि, अपिशब्दस्य चेह लुप्तनिर्दिष्टत्वात् तेनापि प्रसादयेत् इदमुक्तं भवति - गुरुकोपहेतुकमबोध्याशातनामुक्त्वभावादिकं विगणयन् यया तया गत्याम तत्प्रसादनमेवोत्पादयेत्, सर्वमपि वा प्रतीत्युत्पादकं वचः प्रातीतिकं तेन प्रसादयेत्, यद्वा 'पत्तिएणं'ति प्रीत्या साम्नैव, न भेददण्डाद्युपदर्शनेन, एतदेवाह - 'विध्यापयेत्' कथञ्चि-दुदीरितकोपानलानप्युशमयेत्, प्रकर्षेण - अन्तःप्रीत्यात्मकेन कृतो विहितो ऽञ्जलिः - उभयकर-मीलनात्मको ऽनेनेति प्रकृताञ्जलिः, प्राकृतत्वाच्च कृतशब्दस्य परनिपातः, प्रकृष्टं वा - भावन्वि-

ततश्चाऽञ्जलिपुटमस्येति प्राञ्जलिपुटः, इत्थं कायिकं गानसं च विध्यापनोपायमभिधाय वाचिकं वक्तुमाह-'वदेत्' ब्रूयात् न पुनरिति, चशब्दो भिन्नक्रमः, वदेदित्यस्यानन्तरं द्रष्टव्यः, ततोऽयमर्थः कथञ्चित् कृतकोपानपि गुरून् विध्यापयन् वदेत् यथा - भगवन्! प्रमादाचरितमिदं मम क्षन्तव्यं, न पुनरित्थमाचरिष्यामीति सूत्रार्थः ॥ साम्प्रतं यथा निरपवादतयाऽऽचार्यकोप एव न स्यात् तथाऽऽह-

मू. (४२)　*धम्मज्जियं च ववहारं, बुद्धोहाऽऽयरियं सया।*
तमायरंतो ववहारं, गरहं नाभिगच्छइ ॥

वृ. धर्मेण - क्षान्त्यादिरूपेणार्जितम्, उपार्जितं धर्मार्जितं, न हि क्षान्त्यादिधर्मविरहितं इमं प्राप्नोतीति, 'च:' पूरणे, विविधं विधिअवहाऽवहरणमनेकार्थत्वादाचरणं व्यवहारस्तं - यतिकर्तव्यतारूपं, 'बुद्धैः' अवगततत्त्वैः आचरितं, 'सदा' सर्वकालं, 'त'मिति मतावस्थितनतया प्रतीतमेव 'आचरन्' व्यवहरन्, यद्वा-यत्तदोर्नित्याभिसम्बन्धात् सुब्व्यत्ययाच्च धर्मार्जितो बुद्धैराचरितश्च यो व्यवहारस्तमाचरन् कुर्वन्, विशेषेणापहरति पापकर्मेति व्यवहारस्तं, व्यवहारविशेषणमेतत्, एवं च किमित्याह-'गर्हाम्' अविनीतोऽयमित्येवंविधां निन्दा 'नाभिगच्छति' न प्राप्नोति, यातीरीति गम्यते। यद्वा-आचार्यमधिकृत्येदमाह, तत्र धर्मेणोपेतो धर्म्यो-न धर्मातिक्रान्तः, 'जियं च ववहारं'ति पाकृतत्वाच्चैवस्य भिन्नक्रमत्वाज्जीतव्यवहारञ्च, अनेन चागमादिव्यवहारव्यवच्छेदमाह, अत एव 'बुद्धैः' आचार्यैराचरितः सदा-सर्वकालं त्रिकाल-विषयत्वात् जीवव्यवहारस्य, य एवंविधो व्यवहारस्तं व्यवहारं-प्रमादात् स्खलितादौ प्रायश्चित्त-दानरूपमाचरन् 'गर्हां' दण्डरुचिरयं निर्घृणो वेत्येवंरूपां जुगुप्सां नाभिगच्छति, आचार्य इति शेषः, न चायं निजक उपकारी वा मम विनेय इति न दण्डनीय इति ज्ञापनार्थं च धर्म्यजीत-विशेषणं, पठन्ति च 'तमायरंतो महावि'त्ति सुगममेवेति सूत्रार्थः ॥ किं बहुना ?-

मू. (४३)　*मणोगयं वक्कगयं, जाणित्ताऽऽयरियस्स उ।*
तं परिगिज्झ वायाए, कम्मुणा उववायए ॥

वृ. मनसि - चेतसि गतं - स्थितं मनोगतं तथा वाक्ये - वचनरचनात्मनि गतं वाक्यगतं, कृत्य-मिति शेषः, वाक्यग्रहणं तु पदव्यत्यर्थसमासार्थाभिधायित्वेन क्वचित्प्रयोजकत्वात्, 'ज्ञात्वा' अवबुध्य 'आचार्यस्य' विनयार्हस्य गुरोः तुशब्दः कार्यगतकृत्यपरिग्रहार्थः, 'तत्' मनोगतादि 'परिगृह्य' अङ्गीकृत्य 'वाचा' वचसा इदमित्थं करोमीत्यात्मकेन 'कर्मणा' क्रियया तन्निर्वर्तनात्मिकया तदुपपादयेत् - विदधीत, पठन्ति च - 'मनोरुइं वक्करुइं, जाणित्ताऽऽयरियस्स उ' अत्र च मनसि रुचिः - अभिलाषस्तामाचार्यस्य ज्ञात्वा - इदममीषां भगवतामभिमतमित्यवगम्य, वाक्ये रुचिः - पर्यवसितकार्यवाञ्छा तां च, शेषं प्राग्वत्, अनेन सूक्ष्मो विनय उक्त इति सूत्रार्थः ॥ स चैवं विनीताविनयतथा यादृक् स्यात्तदाह-

मू. (४४)　*चित्ते अचोइए निच्चं, खिप्पं हवइ सुचोयए।*
जहोवइट्ठं सुकडं, किच्चाइं कुव्वइ सया।

वृ. 'चित्ते' विनीतविनयतयैव सकलगुणाश्रयतया प्रतीतः प्रसिद्ध इतियावत् 'अचोइए'त्ति यथा हि बलाद्विनीतश्चेतः पतोदोत्क्षेपमपि न सहते, कुस्तोन्नपतनम्, एवमयमप्यचोदित एव

प्रतिप्रस्तावं गुरुकृत्यमं प्रवर्तत इति कृतः प्रेरितत्वमस्य ?, 'नित्यं' सदा, न कदाचिदेव, स्वयं प्रवर्तमानोऽपि प्रेरित इव भुजङ्गमादिक्रियासु [illegible] दृष्टान्तेनोदाहरन्नाह- 'क्षिप्रम्' इति शीघ्रं भवति 'भद्रोऽश्व' इति शोभनः प्रेरयितारं, गुणवानिति गम्यते, सोपस्कारत्वाच्च क्षिप्रमेव प्रेरके सति कृत्यमं वर्तते, नानुशयतो विलम्बितमेव, पठ्यते च- 'चित्तं भद्दोइए खिप्पं, पमत्तं थामवं करे' इति, अत्र च 'प्रमत्तः' प्रसक्तिमान, नाहमाज्ञापित इत्यप्रसक्तो भवति, किन्तु ममायमनुग्रह इति मन्यते, क्षिप्रमेव च तत्करोति, 'थामवं'ति स्थाम-बलं तद्वान्, किमुक्तं भवति ?, सति बले करोति, असति च सद्भावमेवाऽऽख्याति, यथाऽक्षमनने कारणेन न शक्नोमीति। क्षिप्रमपि कुर्वन् कदाचिद्व्यग्रतया मर्यादोल्लङ्घनं वा विदध्यात् तद्व्यवच्छेदायाह- 'यथोपादिष्टम्' उपदिष्टानतिक्रमेण, 'सुकृतं सुष्ठु परिपूर्णं कृतं यथा भवत्येवं कृत्यानि 'करोति' निर्वर्तयति, सदा मनो वा शोभनेन प्रकारेणेति सूत्रार्थः ॥ साम्प्रत्युपसंहर्तुमाह

मू. (४५) *नच्चा नमइ मेहावी, लोए कित्ती य जायइ।*
किच्चाणं सरणं होइ, भूयाणं जगई जहा ॥

वृ. 'ज्ञात्वा' अनन्तरमखिलमध्ययनार्थमवगम्य 'नमति' तत्कृत्यकरणं प्रति प्रह्वीभवति 'मेधावी' एतदध्ययनार्थावधारणशक्तिमान् मर्यादावर्ती वा, तद्गुणं वक्तुमाह- लोके कीर्तिः- सुलब्धमस्य जन्म निस्तीर्णरूपो भवोदधिरनेनेत्यादिका श्लाघा च शब्दः 'एकदिग्व्यापिनी कीर्तिः, सर्वदिग्व्यापकं यशः' इति प्रसिद्धेर्यशश्चेति समुच्चिनोति, उभयमपि प्रक्रमान्नत्वेव 'जायते' प्रादुर्भवति, स एव भवति 'कृत्यानाम्' उचितानुष्ठानानामनाकलुषान्तःकरणवृत्तिभिरविनीताविनयैरतिदुरमुत्सादितानु 'शरणम्' आश्रय इत्यर्थः, केषां केव ?, 'भूतानां' प्राणिनां 'जगती' पृथ्वी यथेति सूत्रार्थः ॥ ननु विनयः पूज्यप्रसादनफलः, ततोऽपि च किमवाप्यत इत्याह-

मू. (४६) *पूज्जा जस्स पसीयंति, संबुद्धा पुव्वसंथुया।*
पसन्ना लाभइस्संति, विउलं अट्ठियं सुयं ॥

वृ. पूजयितुमर्हाः पूज्याः- आचार्यादयः 'यस्य' इति विवक्षितशिष्योपदर्शकं सर्वनाम 'प्रसीदन्ति' तुष्यन्ति 'सम्बुद्धाः' सम्यगवगततत्त्वस्तुतत्त्वाः, पूर्व-वाचनादिकालादारतो न तु वाचनादिकाल एव, तत्कालविनयस्य कृतप्रतिक्रियारूपत्वेन तथाविधप्रसादाजनकत्वात्, संस्तुता-विनयविषयत्वेन परिचिताः सम्यक्स्तुता वा सद्भूतगुणोत्कीर्तनादिभिः पूर्वसंस्तुताः, शेषविनयोपलक्षणमेतत्, 'प्रसन्नाः' इति सप्रसादाः, पठ्यते च- 'सम्मनाः' ज्ञानादिगुणपरिपूर्णाः सम्यगविपरीता प्रज्ञा येषां ते सत्प्रज्ञा वा, 'लम्भयिष्यन्ति' प्रापयिष्यन्ति, किमित्याह- 'विपुलं'- विस्तीर्णम्, अर्यत इत्यर्थो-मोक्षः स प्रयोजनमस्येत्यार्थिकं, तदस्य 'प्रयोजन' मिति ठक्, अथवा अर्थः स एव प्रयोजनरूपोऽस्यास्तीत्यार्थिकः, अत इनिठना विति ठन् 'श्रुतम्' अङ्गोपाङ्गप्रकीर्णकादिभेदमागमं, न तु हरहरिहिरण्यगर्भादिवत् साक्षात् स्वर्गादिकम्, अनेन पूज्यप्रसादस्यानन्तरफलं श्रुतमुक्तं, व्यवहितफलं तु मुक्तिरिति सूत्रार्थः ॥

सम्प्रति श्रुतवासौ तस्यैहिकफलमाह-

मू. (४७) *स पुज्जसत्थे सुविनीयसंसए, मनोरुई चिट्ठइ कम्मसंपया।*
तवोसमायारीसमाहिसंवुडे, महज्जुई पंच वयाइं पालिया ॥

वृ. 'स' इति शिष्यः प्रसादितगुरुरधिगतश्रुतः पूज्यं-सकलजनश्लाघादिना पूजार्हं शास्त्रमस्येति पूज्यशास्त्रः, विनीतस्य हि शास्त्रं सर्वत्र विशेषेण पूज्यते, यदि वा प्राकृतत्वात्पूज्यः शास्ता गुरुरस्येति पूजाशास्तृकः, विनीतो हि विनेयः शास्तारं पूज्यमपि विशेषतः पूजां प्रापयति, अथवा पूज्यश्चासौ शास्तश्च सर्वत्र प्रशंसाम्पदत्वेन पूज्यशास्तः, सुष्ठु-अतिशयेन विनीतः-अपनीतः प्रसादितगुरुर्णैव शास्त्रपरमार्थसमर्पणेन संशयो-दोलायमानमानसात्मकोऽस्येति सुविनीतसंशयः, सुविनीता वा संसत्, परिषदस्येति सुविनीतसंसत्कः, विनीतस्य हि स्वयमतिशयविनीतैव परिषद्भवति, 'मनोरुई'त्ति मनसः चेतसः प्रस्तावद् गुरुसम्बन्धिनी रुचिः-प्रतिभासोऽस्मिन्निति मनोरुचिः, 'तिष्ठति' आस्ते, किमुक्तं भवति-अधिगतशास्त्रो हि न कथञ्चिद्गुरूणामप्रीतिहेतुरिति, तथा 'कम्मसंपय'त्ति कर्म-क्रिया दशविधचक्रवालसामाचारीप्रभृतिरितिकर्तव्यता तस्याः सम्पत्-सम्पन्नता तया, लक्षणे तृतीया, ततः कर्मसम्पदोपलक्षितस्तिष्ठतीति सम्बन्धः, हेतौ वा तृतीया, मनोरुचित्वापेक्षया न हेतुत्वम्, अथवा मनोरुचितवे मनोरुचिता तिष्ठति-आस्ते कर्मणां-ज्ञानावरणादीनां सम्पद् उदयादीरणादिरूपा विभूतिः कर्मसम्पद्, अस्येति गम्यते, तदुच्छेदशक्तियुक्तयाऽस्य प्रतिभासमानतयेव तत्स्थतेरुपलक्ष्यमाणत्वात्,

पठ्यते च-'मनोरुई'त्ति तत्र मनसो रुचिः अभिलाषो यस्मिंस्तन्मनोरुचि-स्वप्रतिभासानुरूपं यथा भवत्येवं तिष्ठति, कया ?, 'कम्मसम्पदा' सत्यनुष्ठानमाहात्म्यसमुत्पन्नपुलाकादिलब्धिसम्पत्त्या, पठन्ति च-'मनोरुई चिट्ठइ कम्मसंपया' तत्र च मनोरुचितफलसम्पादकत्वेन मनोरुचितां कर्मसम्पदं-शुभप्रकृतिसम्पाम्, अनुभवन्निति शेषः, नागार्जुनीयास्तु पठन्ति-'मणिच्छियं संपयमुत्तमं गय'त्ति इह च सम्पदं यथाख्यातचारित्रसम्पदं, अन्यत्अ सुगममेव, तपसः-अनशनाद्यात्मकस्य सामाचारीति समाचरणं, यद्वा तपश्च सामाचारी च-न्यक्षतो वक्ष्यमाणस्वरूपा समाधिश्च-चेतसः स्वास्थ्यं तैः संवृतः निरुद्धाश्रवः तपःसामाचारीसमाधिसंवृतः, यद्वा-तपःसामाचारीसमाधिभिः संवृतं संवरणं यस्य स तथाविधः, महती द्युतिः तपोदीप्तिस्तेजोलेश्या वाऽस्येति महाद्युतिः, भवतीति गम्यते, किं कृत्वेत्याह-'पञ्च व्रतानि' प्राणातिपातविरमणादीनि, 'पालयित्वा' निरतिचारं संस्पृश्येति सूत्रार्थः ॥

पुनरस्यैवैहिकमामुष्मिकं च फलं विशेषेणाह-

मू. (४८) *स देवगंधव्वमनुस्सपूइए, चइत्त देहं मलपंकपुव्वयं।*
सिद्धे वा हवइ सासए, देवे वाऽप्परए महिड्ढिए॥ त्तिबेमि

वृ. 'स' तादृश विनीतविनयः, देवैः-वैमानिकज्योतिष्कैः गन्धर्वैश्च-गन्धर्वनिकायोपलक्षितैर्व्यन्तरभुवनपतिभिः मनुष्यैश्च-महाराजाधिराजप्रभृतिभिः पूजितः-अर्चितो देवगन्धर्वमनुष्यपूजितः, 'त्यक्त्वा' अपहाय 'देहं' शरीरं 'मलपंकपुव्वं'ति जीवशुद्धयपहारितया मलवन्मलः स चासौ 'पावे वज्जे वेरे पंके पणए य'त्ति वचनात् पङ्कश्च कर्ममलपङ्कः स पूर्वकार्यात् प्रथमभावितया कारणमस्येति मलपङ्कपूर्वकं, यद्वा-'माओउयं पिऊसुक्कं'त्ति वचनात रक्तशुक्रे एव मलपङ्कौ तत्पूर्वकं, 'सिद्धो वा' निष्ठितार्थो वा 'भवति' जायते 'शाश्वतः' सर्वकालावस्थायी, न तु परपरिकल्पिततीर्थनिकारादिकारणतः पुनरिहागमवानशाश्वतः, सावशेषकर्मवांस्तु देवो वा भवति, 'अप्परए'त्ति अल्पमितिअविद्यमानं रतमिति क्रीडितं

मोहनीयकर्मोदयजनितमस्येति अल्पस्था - स्तोकपरिवारादिः, अल्पजा वा प्रतनुबध्यमानकर्मा, महती - महाप्रमाणा प्रशस्या वा ऋद्धिः - चक्रवर्तिनमपि योधयेत् इत्यादिका विक्रियाशक्तिः तृणाग्रादपि हिरण्यकोटिरित्यादिरूपा वा समृद्धिरस्येति मदर्द्धिकः, देवविशेषणं वा, 'इति:' परिसमाप्तावेवमर्थे वा, एतावद्विनयश्रुतमनेन वा प्रकारेण 'ब्रवीमि' इति गणभृदादिगुरूपदेशतः, न तु स्वोत्प्रेक्षया इति ॥ उक्तो ऽनुगमः, सम्प्रति चतुर्थमनुयोगद्वारं नया इति, नयति - अनेकांशात्मके वस्त्येकांशावलम्बनेन प्रतीतिपथमारोपयति नीयते वा तेन तस्मिंस्ततो वा नयनं वा नयः - प्रमाणप्रवृत्युत्तरकालभावी परामर्श इत्यर्थः, उक्तं च-

"स नएइ तेन तहि वा ततो ऽहवा तत्थुणो व जं नयनं।
बहुहा पज्जायणं संभवओ सो नतो नामं ॥

ननु सन्त्यमी नयाः, एषां तु क इहोपयोगः ?, उच्यते, उपक्रमेणोपक्रान्तस्य निक्षेपेण च यथासम्भवं निक्षिप्तस्य अनुगमेनानुगतस्य चास्यैवाध्ययनस्य विचारणा, उक्तं च-

"संबंधोवक्कमतो समीवमाणीय नत्थनिक्खेजं।
सत्थं तओ ऽनुगम्मइ नएहि नानाविहाणेहिं ॥"

अस्तु नयैर्विचारणा, सा ऽपि प्रतिसूत्रं समस्ताध्ययनस्य वा ?, न तावत् प्रतिसूत्रं, प्रतिसूत्रं, नयावतारनिषेधस्यात्रैवाभिधानात्, अथ समस्ताध्ययनस्य, तदपि न, सूत्रव्यतिरिक्तस्य तस्मासम्भवात्, उच्यते, यदुक्तंप्रतिसूत्रं नयावतारनिषेध इति, तदित्थमेव, यत्तु सूत्रव्यतिरिक्तस्याध्ययनस्यैवासम्भव इति, तदसत्, कथञ्चित् समुदायस्य समुदायिभ्यो ऽन्यत्वात्, शिबिकावाहकपुरुषसमूहवत्, इतरथा प्रत्येकावस्थाविलक्षणकार्यानुदयप्रसङ्गात्, अस्त्वेवं तथा ऽपि किमस्य समस्तनयैर्विचार उत किंयद्भिरेव ?, न तावत् समस्तैरिति पक्षः क्षमः तेषामसंख्यत्वेन तैर्विचारस्य कर्तुमशक्यत्वात्, तथाहि-यावन्तो वचनमार्गास्तावन्त एव नयाः, यथोक्तं-

"जावइया वयणपहा तावइया चेव होंति नयवाया।
जावइया नयवाया तावइया चेव परसमया ॥"

न च निजनिजाभिप्रायविरचितानां वचनमार्गाणां सङ्ख्या ऽस्ति प्रतिप्राणिभिन्नत्वादभिप्रायाणां, नापि कियद्भि रिति वक्तुं शक्यम् अनवस्था प्रसङ्गात् संख्यातीतेषु हि तेषु यावद्भिर्विचारणा क्रियते तावद्भिरपि किं नेत्यनवस्थाप्रेरणायां न नैयत्यावस्थापके हेतुमुत्पश्यामः, अथापि स्याद्-सङ्ख्येयत्वे ऽप्येषां सकलनयासंग्राहिभिर्नयैर्विचारः, ननु तेषामप्यनेकविधत्वात् पुनः-स्वस्थैव, तथाहि-पूर्वविद्भिः सकलनयसंग्राहीणि सप्त नयशतानि विहितानि, यत् प्रतिबद्धं सप्तशतारं नयचक्राध्ययनमासीत्, तत्संग्राहिणः पुनर्द्वादश विध्यादयो, यत्प्रतिपादकमिदानीमपि नयचक्रमास्ते, तत्संग्राहिणो ऽपि सप्त नैगमादयो, यावत् तत्संग्रहे ऽपि द्वयमेवेति संग्राहिनयानामपि तेषामनेकविधत्वात् पूर्ववदनवस्थैव, अथ संक्षिप्तरुचित्वादैदंयुगीनजनानामनेकविधत्वे ऽपि संग्राहिनयानां द्वयेनैव विचारो न शेषैरिति नानवस्था, ननु द्वयमपि द्रव्यपर्यायार्थशब्दव्यवहारनिश्चयज्ञानक्रियादिभेदानेकधेवेति तत्रापि स एवानवस्थालक्षणो दोष इति, अत्र प्रतिविधीयते-इहाध्ययने विनयो विचार्यते, स च मुक्तिफलः, ततो यदेवास्य मुक्तिप्राप्तिनिबन्धनं रूपं तदेव विचारणीयं, तच्च ज्ञानक्रियात्मकमेवेति ज्ञानक्रियानयाभ्यामेव

विचारो न पुनरन्यैरिति।

तत्र ज्ञाननय आह -ज्ञानमेव मुक्त्यवाप्तिनिबन्धनं, तथा च तल्लक्षणाभिधायिनी निर्युक्तिगाथा-

"नायंमि गिण्हियव्वे अगिण्हियव्वंमि चेव अत्थंमि।
जइयव्वमेव इइ जो उवएसो सो नओ नाम॥"

अस्याक्षरार्थः -'ज्ञाते' बुद्धे 'गिण्हियव्वे'त्ति गृह्यते- उपादीयते कार्यार्थिभिरिति ग्रहीतव्यः, कार्यसाधकं इत्युक्तं भवति, उक्तं हि-'गेण्हो सो कज्जसाहतो होइ' तस्मिन्, अग्रहीतव्यः - तद्विपरीतः, स च हेय उपेक्षणीयश्च, उभयोरपि कार्यासाधकत्वात्, तस्मिंश्च, 'चः' समुच्चये, 'एव' इति गुणे, किमित्यत आह पुनर्ग्रहणादौ हेत्याह-'अत्थंमि'त्ति अर्थ्यते इत्यर्थः तस्मिन्-द्रव्ये गुणे वा, यत आह-"अत्थो दव्वं गुणो वावि" 'यतितव्य'मिति यत्नः कार्यः, किमुक्तं भवति ? ग्राह्यः ग्रहीतव्यः इतरश्च परिहर्तव्यः, 'एव:' अवधारणे, स च व्यवहितसम्बन्धः, ततोऽयमर्थः ज्ञात एव ग्रहीतव्येऽग्रहीतव्ये वाऽर्थे यतितव्यम्, अन्यथा प्रवर्तमानस्य फलविसंवाददर्शनात्, तथा चान्यैरप्युच्यते "सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धि"रिति, अज्ञानस्यैव च बहुदोषत्वदर्शनात्, यतो बालैरप्युद्घुष्यते-

"अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि सर्वपापेभ्यः।
अर्थं हितमाहितं वा न वेत्ति येनाऽऽवृतो लोकः॥"

आगमोऽप्येतमेवावस्थितः, यतस्तत्र कर्मनिर्जरणाधीना मुक्तिरुक्ता, कर्मनिर्जरणे च ज्ञानमेवाऽऽत्यन्तिको हेतुः, तद्विरहितानां तामलिप्तभृतीनां कष्टानुष्ठायिनामपि अल्पफलत्वाभिधानात्, उक्तं हि-

"जं अन्नाणी कम्मं खवेइ बहुयाहि वासकोडीहि।
तं नाणी तिहिं गुत्तो खवेइ ऊसासमेत्तेणं॥"

यद्यपि दर्शनसत्तायां चारित्ररहितस्यापि 'सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति' इत्यागमेन मुक्तिप्रतिपादनं, तदपि ज्ञानप्राधान्यख्यापनपरं, दर्शनरहितस्य हि द्वादशाङ्गमप्यज्ञानमेवेति न तत्र कष्टक्रियासम्भवेऽपि मुक्तिः, दर्शनोत्पत्तौ तु क्रियां विनाऽपि मरुदेव्यादीनामिव सम्यग्ज्ञानमात्रादेव मुक्त्यवाप्तिरित्यर्थप्रतिपादकत्वादस्य, अत एव बहुश्रुतपूजाध्ययने बहुश्रुतस्यैव तथा तथा पूज्यताभिधानं, तथा च प्रयोगः यद् येन विना न भवति तत् तन्निबन्धनमेव, यथा बीजाद्यविनाभावी तन्निबन्धन एवांकुरः, ज्ञानाविनाभाविनी च मुक्त्यवाप्तिः, 'इति'त्येवं यः 'उपदेशः' सर्वस्य ज्ञाननिबन्धनत्वाभिधानरूपः, स किमित्याह-'नय' इति प्रस्तावात् ज्ञाननयः, नामेति वाक्यालङ्कारे, उक्तं हि-'इति जो'त्ति एवमिह जो उवएसो जाणणाणत्तो सो त्ति। अयं च ज्ञानदर्शनचारित्रतपउपचारात्मनि पञ्चविधे विनये ज्ञानदर्शनविनयावेवेच्छति, चारित्रतपउपचारविनयांस्तु तत्कार्यत्वात् तदायत्तत्वाच्च गुणभूतानेवेति गाथार्थः।

क्रियानयस्त्वाह-

"सव्वेसिंपि नयाणं बहुविहवत्तव्वयं निसामेत्ता।
तं सव्वनयविसुद्धं जं चरणगुणट्ठिओ साहू॥"

'सर्वेषामपी'ति नैगमादिनयानामितरभेदानामविशुद्धानां विशुद्धानां च, किं पुनर्मूलनयानां

विशुद्धानामेवेत्यपिशब्दार्थः, 'नयानाम्' उक्तरूपाणां बहवो विधाः-प्रकारा यस्यां सा बहुविधा तां, 'वक्तव्यतां' सामान्यमेव विशेषा एव उपर्यनिरपेक्षं चो(वो)भयं, यदिवा द्रव्यं पर्यायाः प्रकृतिः पुरुषो विज्ञानं शून्यमित्यादिस्वस्वाभिप्रायानुरूपार्थप्रतिपादनपरां निशम्य-आकर्ण्य, किमित्याह-'तदि'ति वक्ष्यमाणं सर्वे निरवशेषास्ते च ते नयाश्च सर्वनयास्तेषां, विशुद्धं-निर्दोषतया सम्मतं, यत् किमित्याह-चर्यत इति चरणं-चारित्रं, गुणः साधनमुपकारकमित्यनर्थान्तरं, ततश्चरणं चासौ गुणश्च निर्वाणात्यन्तोपकारितया चरणगुणस्तस्मिन् स्थितः-तदासेवितया निविष्टः, 'साधु'रिति साध्नोति पौरुषेयोधिः क्रियाभिरपवर्गमित्यन्वर्थनामतयोच्यते, अस्यायमाशयः-बहुविधायामपि वक्तव्यतायां क्रियात एव फलप्राप्तिः, तथाहि-तृप्त्यर्थी जलादिकमवलोक-यन्नपि न यावत् पानादिक्रियायां प्रवृत्तस्तावत्तृप्तिलक्षणफलमवाप्नोति, अत एव सम्यग्ज्ञानमपि तदुपयोगितयैव विचार्यते, तथा च तद्विचारप्रवृत्तैरुक्तम्-"न ह्याभ्यामर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियानां विसंवादाद्यत" इति, आगमोऽप्येवमेवावस्थितः, यतस्तत्रापि क्रियाविकलं विफलमेव ज्ञानम्, उक्तं हि-

"जहा खरो चंदनभारवाही, भारस्स भागी न हु चंदनस्स।
एवं खु नाणी चरणेन हीनो, नाणस्स भागी न हु सुग्गई॥"

यदि च ज्ञानमेव मुक्तिसाधनं ज्ञानाविनाभाव्यनुत्तरदर्शनसम्पत्समन्वितानां दशार्हसिंहादीनामपी स्यात्, अथ चाधोगतिगामिन एवैते श्रूयन्ते, यत आह-

"दसारसीहस्स य सेणियस्स, पेढालपुत्तस्स य सच्चइस्स।
अनुत्तरा दंसणसंपया तया, विना चरित्तेण ऽहरं गइं गया॥"

किञ्च-यदि ज्ञानमेव मुक्तिकारणमिष्यते, तदा यदुच्यते, 'विहरति मुहूर्तकालं, देशोनां पूर्वकोटिं च' इत्येतदपि विरुध्येत, ज्ञानेषु निखिलवस्तुविस्तरपरिच्छेदकरूपतां बिभ्रत केवल-ज्ञानमेवोत्तममिति तत्समनन्तरमेव मुक्त्यवाप्तौ कथं विहरणसम्भवः ?, अतः सत्यपि ज्ञाने शैलेश्यवस्थाऽवाप्तौ सर्वसंवररूपक्रियाऽनन्तरमेव मुक्त्यवाप्तिरिति क्रियाया एव मुक्ति-कारणत्वं, प्रयोगश्चात्र-यद् यत्समनन्तरभावि तत् तत्कारणं, यथा पृथिव्यादिसामग्यनन्तरभावी पृथिव्यादिकारणोऽङ्कुरः, क्रियाऽनन्तरभाविनी च मुक्तिरिति, अयं च पञ्चविधेऽपि विनये चारित्रतपउपचारविनयानेवेच्छति, ज्ञानदर्शनविनयौ तु तत्कारणत्वाद् गुणभूतावेवेति।

आह-एवं सति किं ज्ञान तत्त्वमस्तु, आहोस्वित् क्रिया ?, उच्यते, परस्परव्यपेक्षमुभयमिदं मुक्तिकारणं, निरपेक्षं तं न कारणमिति तत्त्वम्, एतदर्थाभिधायिका चेयमेव गाथा 'सव्वेसिंपि नयाणं' इत्यादि, इह च गुणशब्देन ज्ञानमुच्यते, 'बहुविधवक्तव्यात्म्' उक्तरूपां नामादीनां कः कं साधुमिच्छतीत्येवंरूपां वा, निशम्य-श्रुत्वा 'तत् सर्वनयविशुद्धं' तत् सर्वनयसम्मतं यच्चरणगुणस्थितः, साधुरिति, अयमभिप्रायः-यत्तावद् ज्ञानवादिनोक्तम्-यद् येन विना न भवति ततन्निबन्धनमेव, यथा बीजाद्यविनाभावि तन्निबन्धन एवांकुरः, ज्ञानाविनाभाविनी च मुक्तिरिति, अत्राविनाभावित्वमनेकान्तिकतो हेतुः, तथाहि-यथाऽनेन ज्ञाननिबन्धनत्वं मुक्तेः साध्यते, तथा क्रियानिबन्धनत्वमपि, यथा हि ज्ञानं विना नास्ति मुक्तिरिति ज्ञानविनाभाविनो

एवं क्रियामपि विना नासौ भवतीति तदविनाभावित्वमपि समानमेवेति कथं नोभयनिबन्धनत्वसिद्धिः ?, तथा चाह-

"नाणं सविसयनिययं न नाणमित्तेण कज्जनिप्फत्ती ।
मग्गन्नू दिट्ठंतो होइ सचिट्ठो अचिट्ठो य ॥"
जाणंतोऽवि य तरिउं काइयजोगं न जुंजइ जो उ ।
सो बुज्झइ सोएणं एवं नाणी चरणहीनो ॥"

न च मरुदेव्यादीनामपि सर्वसंवररूपा क्रिया नास्ति, एवं क्रियावादिनोऽपि-'यद् यत्समनन्तरभावि तत् तत्कारणं, यथा पृथिव्यादिसामग्र्यनन्तरजन्मा तत्कारणोऽङ्कुरः, तथा च क्रियानन्तरभाविनी मुक्तिरिति यो हेतुरुपन्यस्तः सोऽप्यनेकान्तिकः, यतः स एवं वाच्यः-यदा शैलेश्यवस्थायां सर्वसंवररूपा क्रिया यदनन्तरं मुक्त्यवाप्तिस्तदा ज्ञानमस्ति वा न वेति ?, नास्ति चेच्छैलेश्यवस्थाऽपि कथम्, न ह्ीयं केवलज्ञानं विनाऽवाप्यते, अवाप्तस्त्येव तदा सकलभावस्वभावावभासि केवलज्ञानम्, एवं च सति कथमुभयाविनाभावित्वेऽपि नोभयफलत्वं मुक्तेः, उक्तं च-"सहचारिणेऽवि कहं कारणमेगं न उण एगं" आह-एवं ज्ञानक्रिययोः प्रत्येकं मुक्तेरवापिका शक्तिरसती कथं समुदायेऽपि भवति ?, न हि यद् येषु प्रत्येकं नास्ति तत्तेषां समुदायेऽपि भवति, तथा प्रत्येकमसत् समुदितास्वपि सिकतासु तैलं, प्रत्येकमसती च ज्ञानक्रिययोः मुक्तेरवापिका शक्तिः, तदुक्तम्-

'पत्तेयमभावाओ निव्वाणं समुदियासुवि न सुत्तं ।
नानक्रियासु वुत्तुं सिकयासमुदाय तिल्लं व ॥"

उच्यते, स्यादेवं यदि सर्वथा प्रत्येकं तयोर्मुक्त्यनुपकारितोच्येत, यदा तु तयोः प्रत्येकं देशोपकारिता समुदाये तु सम्पूर्णहेतुतोच्यते तदा न कश्चिदोषः, आह च-

"वीसुं न सव्वहु च्चिय सिकयातिल्लं व साहणाभावो ।
देसोवकारिया जा सा समवायंमि संपुण्णा ॥"

अतः स्थितमेतत्-ज्ञानक्रिये समुदिते एव मुक्तिकारणं न तु प्रत्येकमिति तत्त्वं, तथा च पूज्याः-

"नाणाहीनं सव्वं नाणनओ भणति किं च किरियाए ? ।
किरियाए चरणनओ तदुभयगाहो य सम्मत्तं ॥"
क्वचित् सौत्र्या शैल्या क्वचिदधिकृतप्राकृतभुवा
क्वचिच्चार्थापत्त्या क्वचिदपि समारोपविधिना ।
क्वचिच्चाध्याहारात् क्वचिदविकलप्रक्रमबलादियं
व्याख्या ज्ञेया क्वचिदपि तथाऽऽम्नायवशतः ॥१॥

अध्ययनं १ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे प्रथम अध्ययनस्य भद्रबाहुस्वामिविरचिता निर्युक्ति एवं शान्त्याचार्यविरचिता टीका परिसमाप्ता ।

अध्ययन - २ परीषह विभक्तिः

वृ. ॥ श्रीजिनाय नमः । नमः सर्वविदे । व्याख्यातं विनयश्रुताख्यं प्रथमअध्ययनम्, इदानीं द्वितीयं व्याख्यायते, अस्य चायमभिसम्बन्धः - इहानन्तराध्ययने विनयः सप्रपञ्चः पञ्चप्रकारः उक्तः, स च किं स्वस्थावस्थैरेव समाचरितव्य उत परीषहमहासैन्यसमरसमाकुलितमनोभिरपि ?, उभयावस्थैरपीति ब्रूमः । ननु तर्हि के ऽमी परीषहाः ?, किंरूपाः ?, किञ्चालम्बनमुररीकृत्यैतेषु सत्स्वपि न विनयविलङ्घनमित्याशङ्कापोहाय परिषहास्तत्स्वरूपादि चाभिधेयमित्यनेन सम्बन्धेनायातस्यास्य महार्थस्य महापुरुषस्येव चतुरनुयोगद्वारस्वरूपमुपवर्णनीयं, तत्र च नामनिष्पन्ननिक्षेपस्य परीषह इति नाम, अतस्तन्निक्षेपदर्शनायाह भगवान्निर्युक्तिकारः -

नि. [६५] नासो परीसहाणं चउव्विहो दुव्विहो य(उ) दव्वंमि ।
आगमनो आगमतो नो आगमओ य सो तिविहो ॥

वृ. नियत निश्चितं वाऽऽसनं-नामादिरचनात्मकं क्षेपणं न्यासः-निक्षेप इत्यर्थः, अयं च केषामित्याह-परीति-समन्तात् स्वहेतुभिरुदीरिता मार्गाव्यवननिर्जरार्थं साध्वादिभिः, सह्यन्त इति परीषहास्तेषां, चत्वारो विधाः-प्रकारा अस्येति चतुर्विधो, नामस्थापनाद्रव्यभावभेदात्, तत्र नामस्थापने क्षुण्णे इत्यनादृत्य द्रव्यपरीषहमाह- 'द्विविधो' द्विभेदः, तुः पूरणे, भवति 'द्रव्य' इति द्रव्यविषयः, प्रक्रमात्परिषहः, स च 'आगमनोआगमतो'त्ति आगमतो नोआगमतश्च, तत्र आगमतो ज्ञाता तत्र चानुपयुक्त इत्यागमस्वरूपमतिपरिचितमिति परिहृत्य नोआगमत आह- 'नोआगमतस्तु' नोआगमं पुनराश्रित्य 'स' इति परीषहः 'त्रिविधः' त्रिप्रकार इति गाथार्थः ॥

नि. [६६] जाणगसरीर भविए तव्वइरित्ते य से भवे दुविहे ।
कम्मे नोकम्मे या कम्मंमि य अनुदओ भणिओ ॥

वृ. 'जाणगसरीर'त्ति ज्ञायको ज्ञो वा तस्य शरीरं ज्ञायकशरीरं ज्ञशरीरं वा जीवरहितं सिद्धशिलातलगतं निर्धीधिकागतं वा अहो ! अमुना शरीरसमुच्छ्रयेणोपात्तेन परीषह इति पदं शिक्षितम्, अयं घृतघटोऽभूदितिवत्संभाव्यमानं, तथा 'भविय'त्ति शरीरशब्दस्य काकाक्षिगोलकन्यायेनोभयत्र सम्बन्धात् भव्यशरीरं, तत्र भविष्यति-तेन तेनावस्थात्मना सत्तां प्राप्स्यति यः स भव्यो जीवस्तस्य शरीरं यदद्यापि परीषह इति पदं न शिक्षते एष्यति तु शिक्षिष्यते तदयं घृतघटो भविष्यतीतिवत्संभाव्यमानं नोआगमतो द्रव्यपरीषहः, 'तव्वतिरित्ते य'त्ति ताभ्यां-ज्ञशरीरभव्यशरीराभ्यां व्यतिरिक्तः-पृथग्भूतः तद्व्यतिरिक्तः, स च प्रकृतत्वाद् द्रव्यपरीषहो भवेत्, 'द्विविधः' द्विभेदः, कथमित्याह-क्रियते-मिथ्यात्वाविरतिकषाययोगानुगतेनात्मना निर्वर्त्त्यत इति कर्म तत्र-ज्ञानावरणादिरूपे, 'नोकर्मणि च' तद्विपरितरूपे, चः समुच्चये, दीर्घत्वं च 'ह्रस्वदीर्घौ मिथ' इति प्राकृतलक्षणात्, तत्राद्यमाह- कर्मणि विचार्ये, चः पूरणे, द्रव्यपरीषहः 'अनुदयः' उदयाभावः, प्रक्रमात् परीषहवेदनीयकर्मणामेव, 'भणितः' उक्त इति गाथार्थः ॥

नि. [६७] नोकम्मंमि य तिविहो सच्चित्ताचित्तमीसओ चेव ।
भावे कम्मस्सुदओ तस्स उ दारानिमे हुंति ॥

वृ. नोकर्मणि पुनर्विचार्ये: चस्य पुनरर्थत्वाद्द्रव्यपरीषहः 'त्रिविधः' त्रिभेदः, 'सचित्ता-

त्रिसमासओ'त्ति लुप्तनिर्दिष्टत्वाद्विभक्तेः सचित्तोऽचित्तो मिश्रक इति, समाहारो वा सचित्ताचित्तमिश्रकमिति, प्राकृतत्वाच्च पुंल्लिङ्गता; चः स्वगतानेकभेदसमुच्चये, एवोऽवधारणे इयन्त एवामी भेदाः, तत्र नोकर्मणि सचित्तद्रव्यपरीषहो गिरिनिर्झरजलादिः अचित्तद्रव्यपरीषहश्चित्रकचूर्णादिर्मिश्रद्रव्यपरीषहो गुडाद्रर्कादि, त्रयस्यापि कर्माभावरूपत्वात् क्षुत्परीषहजनकत्वाच्च, इत्थं पिपासादिजनके च दगजलाद्यनेकरूपे नोकर्मद्रव्यपरीषहे इति एवधिया भावनीयं, भावपरीषहः आगमतो ज्ञाता तत्र चोपयुक्तो, नोआगमतस्तु नोशब्दस्यैकदेशवाचित्वे आगमैकदेशभूतमिदमेवाध्ययनं, निषेधवाचित्वे तु तदभावरूपः परीषहवेदनीयस्य कर्मणः उदयः, तथा चाह-'भावे कम्मस्स उदओ'त्ति कर्मणइति परीषहवेदनीयकर्मणां बहुत्वेऽपि जात्यपेक्षयैकवचननिर्देशः 'तस्य च' भावपरीषहस्य 'द्वाराणि' व्याख्यानमुखानि 'इमानि' अनन्तरक्ष्यमाणानि भवन्तीति गाथार्थः ॥ तान्येवाह-

नि.[६८] कतो कस्स व दव्वे समोअरे अहिसास नए य वत्तणा कालो ।
खित्तुद्देसे पुच्छा निद्देसे सुत्तफासे य ॥

वृ. 'कुत' इति कुतोऽङ्गादेरिदमुद्भूतं १, 'कस्य' इति कस्य संयतादेरमी परीषहाः २, 'द्रव्यम्' इति किममीषामुत्पादकं द्रव्यं ३, 'समवतर' इति क्व कर्मप्रकृतौ पुरुषविशेषे वाऽमीषां सम्भवः ?, ४, 'अध्यास' इति कथममीषामध्यासना सहनात्मिका ? ५, 'नय' इति को नयः कं परिषहमिच्छति ?, ६ चः समुच्चये, 'वर्त्तना' इति कति क्षुदादयः एककैस्मिन् स्वामिनि वर्त्तन्ते ७, 'काल' इति कियन्तं कालं यावत् परीषहास्तित्वं ८, 'खेत्ते'त्ति कतरस्मिन्किंयति वा क्षेत्रे ९, 'उद्देशो' गुरोः सामान्याभिधायि वचनं १०, 'पृच्छा' तज्जिज्ञासोः शिष्यस्य प्रश्नः ११, 'निर्देशः' गुरुणा पृष्टार्थविशेषभाषणं १२, 'सूत्रस्पर्शः' सूत्रसूचितार्थवचनं १३, 'चः' समुच्चये, इति गाथासमासार्थः ॥ तत्र कुत इति प्रश्नप्रतिवचनमाह-

नि.[६९] कम्मप्पवायपुव्वे सत्तरसे पाहुडंमि जं सुत्तं ।
सणयं सोदाहरणं तं चेव इहंपि नायव्वं ॥

वृ. कर्मणः प्रवादः-प्रकर्षेण प्रतिपादनमस्मिन्निति कर्मप्रवादं तच्च तत् पूर्वं च तस्मिन्, तत्र बहूनि प्राभृतानीति कतिथे प्राभृते इत्याह-सप्तदशे प्राभृते-प्रतिनियतार्थाधिकाराभिधायिनि, यत् 'सूत्रं' गणधरप्रणीतश्रुतरूपं 'सनयं' नैगमादिनयान्वितं, 'सोदाहरणं' सदृष्टान्तं, 'तं चेव'त्ति चः पूरणे एवोऽवधारणे, ततस्तदेव 'इहापि' परीषहाध्ययने 'ज्ञातव्यम्' अवगन्तव्यं, न त्वधिकं, किमुक्तं भवति ? निरवशेषं तत एवेदमुद्भूत् न पुनरन्यत इति। कस्येति यदुक्तं तदुत्तरमाह-

नि.[७०] तिण्हंपि नेगममनओ परीसहो जाव उज्जुसुत्ताओ ।
तिण्हं सद्दनयाणं परीसहो संजए होइ ॥

वृ. 'त्रयाणामपि' अविरतविरताविरतानां न तु विरतस्यैव नैगमनयः 'परिषहः' क्षुदादिरिति, मन्यत इति शेषः, त्रयाणामपि परीषहवेदनीयासातादिकर्मोदयजनितस्य क्षुधादेस्तत्सहनस्य च यथायोगं सकामाकामनिर्जराहेतोः सम्भवाद्, अनेकगमत्वेन चास्य सर्वप्रकारसंग्रहाहित्वात्, 'जाव उज्जुसुत्ताउ'त्ति सोपस्कारत्वादस्यैवं यावदृजुसूत्रः, कोऽर्थः ?, संग्रहव्यवहारऋजुसूत्रा अपि त्रयाणामपि परीषहं मन्यन्ते, एकैकनयस्य शतभेदत्वेनैतद्भेदानामपि केषाञ्चित् परीषहं

प्रति नैगमेन तुल्यमतत्वात्, 'त्रयाणां' त्रिसङ्ख्यानां, केषाम् ?-शब्दप्रधाना नयाः शब्दनयाः, शाकपार्थिवादिवत् समासः, तेषां-शब्दसमभिरूढैवम्भूतानां, मतेनेति शेषः, परीषहः 'संयते' विरते भवति 'मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहा" इति लक्षणोपेतनिरुपक्रमचरितपरीषह-शब्दमूलस्तत्रैव सम्भवादिति गाथार्थः ॥ द्रव्यद्वारमधिकृत्य नयमतमाह-

नि. [७१] पढमंमि अट्ठ भंगा संगहि जीवो व अहव नोजीवो ।
ववहारे नोजीवो जीवदव्वं तु सेसाणं ॥

वृ. 'प्रथमे' प्रक्रमान्नैगमनये अष्टौ भङ्गाः, स हि 'णे'गेहिमानेहि मिणइत्ती नेगमस्स निरुत्ती" इतिलक्षणादनेकधा कारणमिच्छन् यदैकेन पुरुषादिना चर्मेन्द्रादिना परीषह उदीर्यते तदा परीषह-वेदनीयकर्मोदयनिमित्तत्वेऽपि तस्य तदविवक्षया जीवेनासौ परीषह उदीरित इति वक्ति १, यदा बहुभिस्तदा जीवैः २, यदा अचेतनेनैकेन हृषदादिना जीवप्रयोगरहितेन तदाऽजीवेन ३, यदा तैरेव बहुभिस्तदा अजीवैः ४, यदैकेन लुब्धकादिना बाणादिनैकेन तदा जीवेनाजीवेन च ५, यदा तेनैकेनैव बहुभिः बाणादिभिस्तदा जीवेनाजीवैश्च ६, यदा बहुभिः पुरुषादिभिरेकं शिलादिकमुत्क्षिप्य क्षिपद्भिस्तदा जीवैरजीवने च ७, यदा तु तैरेव मुद्गरादीन् बहून् मुञ्चद्भिस्तदा जीवैश्चाजीवैश्चेति ८ 'संग्रहे' संग्रहनाम्नि नये विचार्यमाणे जीवो 'वा' अथवा नोजीवो हेतुरिति प्रक्रमः, किमुक्तं भवति ?-

जीवद्रव्येणाजीवद्रव्येण वा परीषह उदीर्यते, स हि "संगहियपिंडियत्थं संगहवयणं समासतो वेंती"ति वचनात् सामान्यग्राहित्वैनैकत्वमेवेच्छति न पुनर्द्वित्वबहुत्वे, अस्यापि च शतभेद-त्वाद्यदा चिद्रूपतया सर्वं गृह्णाति तदा जीवद्रव्येण, यदा त्वचिद्रूपतया तदा अजीवद्रव्येण, 'व्यवहारे' व्यवहारनये 'नोजीव' इति अजीवो हेतुः, कोऽर्थः ?, अजीवद्रव्येण परीषह उदीर्यत इत्येकमेव भङ्गमयमिच्छति, तथाहि-'ववहइ विणिच्छियत्थं ववहारो सव्वदव्वेसुं" इति तल्लक्षणं, तत्र च 'विनिश्चितं'मित्येनकरूपत्वेऽपि वस्तुनः सांव्यवहारिकजनप्रतीतमेव रूपमुच्यते, तद्ग्राहकोऽयम्, उक्तं च-

"भमराइ पंचवण्णाइं निच्छए जम्मि वा जलयस्स ।
अत्थे विनिच्छओ जो विनिच्छयत्थुत्ति सो गेज्झो ॥१॥
बहुयरउत्ति व तं चिय गमेइ संतेऽवि सेसए मुयइ ।
संववहारपरतया ववहारो लोगमिच्छंतो ॥२॥"त्ति,

(ततोऽयमाशयः-) 'कालो सभाव नियई पुव्वकयं पुरिसकारणेगंता ।
मिच्छत्तं ते चेव उ समासओ होंति सम्मत्तं ॥"

इत्यागमवचनतः सर्वस्यानेककारणत्वेऽपि कर्म्मकृतं लोकवैचित्र्यमिति प्रायः प्रसिद्धेर्यत् कर्म कारयिष्यति तत्करिष्याम इत्युक्तेश्च कर्मैव कारणमित्याह, तच्चाचेतनत्वेनाजीव एवेति ।

'जीवदव्वं'तुशब्दस्यैवकारार्थत्वात् जीवद्रव्यमेव 'शेषाणाम्' ऋजुसूत्रशब्दसमभिरूढैव-म्भूतानां पर्यायनयानां मतेन, हेतुरिति गम्यते, अयमर्थः-जीवद्रव्येण परीषह उदीर्यत इत्येष एवैषां भङ्गोऽभिमतः, ते हि पर्यायास्तिकत्वेन परीषह्यमाणमेव परीषहमिच्छन्ति, परीषहणं चोपयोगात्मकम्, उपयोगस्य च जीवस्वाभाव्यात् जीवद्रव्यमेव सन्निहितमव्यभिचारि च कारणं,

तद्विपरीतं तु अजीवद्रव्यं दण्डादीत्यकारणं, जीवद्रव्यमिति तु द्रव्यग्रहणं पर्यायनयस्यापि गुणसंहतिरूपस्य द्रव्यस्येष्टत्वात्, तदुक्तम्-''पर्यायनयोऽपि द्रव्यमिच्छति गुणसन्तानरूप''-मिति गाथार्थः ॥ सम्प्रति समवतारद्वारमाह-

नि.[७२] समोयारो खलु दुविहो पयडिपुरिसेसु चेव नायव्वो ।
एएसि नाणत्तं वुच्छामि अहानुपुव्वीए ॥

वृ. 'समवतारः खलु द्विविधः' इति खलुशब्दस्यैवकारार्थत्वात् द्विविध एव, द्वैविध्यं च विषयभेदत इति तमाह-प्रकृतयश्च पुरुषाश्च प्रकृतिपुरुषास्तेषु, कोऽर्थः ?-प्रकृतिषु ज्ञानावरणादिरूपासु पुरुषेषु, चशब्दात् स्त्रीपण्डकेषु च, तत्तद्गुणस्थानविशेषवर्तिषु 'एते'ति एतेषां 'ज्ञातव्यः' अवबोद्धव्यः, 'एतेषां' प्रकृत्यादीनां 'नानात्वं' भेदं वक्ष्ये 'अथ' अनन्तरम् 'आनुपूर्व्या' क्रमेणेति गाथार्थः ॥ तत्र प्रकृतिनानात्वमाह-

नि.[७३] नाणावरणे वेए मोहंमिय अंतराइए चेव ।
एएसुं बावीसं परीसहा हुंति नायव्वा ॥

वृ. ज्ञानावरणे वेद्ये मोहे चान्तरायिके चैव एतेषु चतुर्षु कर्मसु वक्ष्यमाणस्वरूपेषु द्वाविंशतिः परीषहा भवन्ति। अनेन प्रकृतिभेद उक्तः, सम्प्रति यस्य यत्रावतारस्तमाह-

नि.[७४] पन्नाअन्नाणपरीसहा नाणावरणंमि हुंति दुन्नेए ।
इक्को य अंतराए अलाहपरीसहो होइ ॥

वृ. प्रज्ञा चाज्ञानं च प्रज्ञाज्ञाने ते एवोत्सेकवैकल्यव्याकरणतः परीषह्यमाणे परीषहौ, 'ज्ञानावरणे' कर्मणि भवतो 'द्वौ' एतौ, तदुदयक्षयोपशमाभ्यामनयोः सद्भावाद्, एकश्च 'अन्तराये' अन्तरायकर्मण्यलाभपरीषहो भवति, तदुदयनिबन्धनत्वादलाभस्येति गाथार्थः ।

मोहनीयं द्विधेति यत्र तद्भेदे वेदनीये च यत्परिषहावतारस्तमाह-

नि.[७५] अरई अचेल इत्थी निसीहिया जायणा य अक्कोसे ।
सक्कारपुरक्कारे चरित्तमोहंमि सत्तेए ॥

नि.[७६] अरईइ दुगुंछाए पुंवेय भयस्स चेव माणस्स ।
कोहस्स य लोहस्स य उदएण परीसहा सत्त ॥

नि.[७७] दंसणमोहे दंसणपरीसहो नियमसो भवे इक्को ।
सेसा परीसहा खलु इक्कारस वेयणीज्जंमि ॥

वृ. 'अरतिः' इति अरतिपरीषहः, एवमुत्तरेष्वपि परीषहशब्दः सम्बन्धनीयः, 'अचेल'त्ति प्राकृतत्वाद्विन्दुलोपः, अचेलं, 'स्त्री नैषेधिकी याचना चाक्रोशः सत्कारपुरस्कारः' सप्तैते वक्ष्यमाणरूपाः परीषहाः, 'चरित्रमोहे' चरित्रमोहनाम्नि मोहनीयभेदे, भवन्तीति गम्यते, तदुदयभावित्वादेषां ॥ चारित्रमोहनीयस्यापि बहुभेदत्वाद्यस्य तद्भेदस्योदयेन यत्परीषहसद्भावस्तमाह-'अरतेः' अरतिनाम्नश्चारित्रमोहनीयभेदस्य, अचेलस्य जुगुप्सायाः, 'पुंवेय'त्ति सुपोलोपात् पुंवेदस्य, भयस्य चैवं मानस्य क्रोधस्य लोभस्य च उदयेन परीषहाः सप्त, इह चारत्युदयेनारतिपरीषहः जुगुप्सोदयेनाचेलपरीषह इत्यादि यथाक्रमं योजना कार्येति, तथा दर्शनमोहे 'दर्शनपरीषहः' वक्ष्यमाणरूपो, 'नियमसो'त्ति आर्षत्वेन नियमात् भवेद् 'एकः' अद्वितीयः,

'शेषाः' एतदुद्धरिताः, परीषहाः पुनः एकादश 'वेदनीय' वेदनीयनाम्नि कर्मणि संभवन्तीति गाथात्रयार्थः ॥ के पुनस्ते एकादशेत्याह-

नि.[७८] पंचेव आनुपुव्वी चरिया सिज्जा वहे व(य) रोगे य ।
तणफासजल्लमेव य इक्कारस वेयणीज्जंमि ॥

वृ. 'पञ्चैव' पञ्चसंख्या एव, ते च प्रकारान्तरेणापि स्युरित्याह-'आनुपूर्व्या' परिपाट्या, क्षुत्पिपासाशीतोष्णदंशमशकाख्या इति भावः, चर्य्या शय्या वधश्च रोगश्च तृणस्पर्शो जल्ल एव च इत्यमी एकादश वेदनीयकर्माण्युदयवति परीषहा भवन्तीति शेष इति गाथार्थः ॥

सम्प्रति पुरुषसमवतारमाह-

नि.[७९] बावीसं बायरसंपराए चउदस य सुहुमरागंमि ।
छउमत्थवीयराए चउदस इक्कारस जिनंमि ॥

वृ. 'द्वाविंशतिः' द्वाविंशतिसङ्ख्याः प्रक्रमात्परीषहाः 'बादरसंपराये' बादरसम्परायनाम्नि गुणस्थाने, किमुक्तं भवति ?, बादरसम्परायं यावत्सर्वेऽपि परीषहाः सम्भवन्ति, 'चतुर्दश' चतुर्दशसङ्ख्याः, चः पूरणे, 'सूक्ष्मसंपराये' सूक्ष्मसम्परायनाम्नि गुणस्थाने, 'सप्तानां' चारित्रमोहनीयप्रतिबद्धानां दर्शनमोहनीयप्रतिबद्धस्य चैकस्य तत्रासम्भवादिति भावः, 'छद्मस्थवीतरागे' छद्मस्थवीतरागनाम्नि गुणस्थाने, 'चतुर्दश' उक्तरूपा एव, 'एकादश' एकादशसङ्ख्याः 'जिने' केवलिनि, वेदनीयप्रतिबद्धानां क्षुदादीनामेव तत्र भावादिति गाथार्थः ॥

नि.[८०] एसणमनेसणीज्जं तिण्हं अग्गहणऽभोयण नयाणं ।
अहिआसण बोद्धव्वा फासुय सद्दुज्जुसुत्ताणं ॥

वृ. एष्यत इत्येषणम्-एषणाशुद्धं, अनेषणीयं-तद्विपरीतं, सोपस्कारत्वाद्यदन्नादि तस्य, यद्वा 'सुपां संपो भवन्ती'ति न्यायादेषणीयस्य अनेषणीयस्य च, 'अग्गहणऽभोयण'त्ति अग्रहणम्-अनुपादानं, कथञ्चिद्ग्रहणे वा अभोजनम्-अपरिभोगात्मकं 'त्रयाणाम्' अर्थात्त्रैगमसंग्रहव्यवहाराणां नयानां मतेनाध्यासना बोद्धव्येति सम्बन्धः, अभीहि स्थूलदर्शिनः बुभुक्षादिसहनमन्नादिपरिहारात्मकमेवेच्छन्ति, 'फासुग सद्दुज्जुसुत्ताणं'ति शब्दनयानां त्रयाणामृजुसूत्रस्य च मतेन प्रासुकमन्नादि उपलक्षणत्वात् कल्प्यं च गृह्णतो भुञ्जानस्याप्यध्यासनेति प्रक्रमः; ते हि भावप्रधानतया भावाध्यासनामेव मन्यन्ते, सा च नाभुञ्जानस्यैव, किन्तु शास्त्रानुसारिप्रवृत्त्या समतावस्थितस्य प्रासुकमेषणीयं च धर्मधुर्वहनार्थं भुञ्जनस्यापीति गाथार्थः । सम्प्रति नयद्वारमाह-

नि.[८१] जं पप्पं नेगमनओ परीसहो वेयणा य दुण्हं तं ।
वेयण पडुच्च जीवे उज्जुसुओ सद्दस्स पुण आया ॥

वृ. 'यद्' वस्तुगिरिनिर्झरजलादि' प्राप्य आसाद्य क्षुदादिपरीषहा उत्पद्यन्ते नैगमो-नैगमनयो यत्तदोर्नित्याभिसम्बन्धात् तत्परीषह इति वक्तीति शेषः, स ह्येवं मन्यते-यदि तत् क्षुदाद्युत्पादकं वस्तु न भवेत्तदा क्षुदादय एव न स्युः, तदभावाश्च किं केन सह्यत इति परीषहाभाव एव स्यात्, ततस्तद्भावभावित्वात् परीषहस्य तत् प्रधानमिति तदेव परीषहः, प्रस्थकोत्पादककाष्ठप्रस्थकवत्, आह-नैकगमत्वान्नैगमस्य कथमेकरूपतैव परीषहाणामिहोक्ता ?, उच्यते, शतशाखत्वादस्य न सर्वभेदाभिधानं शक्यमिति कश्चिदेव क्वचिदुच्यते, एवं शेषनयेष्वपि यथोक्ताशङ्कायां

वाच्यमिति। 'वेदना' क्षुदादिजनिता असातवेदना, चशब्दात्तदुत्पादकं च परीषहः, 'द्वयोस्तु' पारिशेषयात् संग्रहव्यवहारयोः पुनर्मतेनेति गम्यते, अयं चानयोरभिप्रायः-यदि तावद्गिरिनिर्झरजलादि क्षुदादिवेदनाजनकत्वेन परीषहः, कथमिव क्षुदादिवेदना न परीषहो, निरुपचरितं परीषह्यत इति परीषहलक्षणं वेदनाया एव सम्भवति, उपचरितं तु गिरिनिर्झरजलादौ, तात्त्विकवस्तुनिबन्धन-श्चोपचार इति तदभावे तस्याप्यभाव एव स्यात्, 'वेदनां' क्षुदाद्यनुभवात्मिकां 'प्रतीत्य' आश्रित्य जीवे परीषह इति ऋजुसूत्रः मन्यत इतीहापि गम्यते, अयमस्याशयः-सति हि निरुपचरितलक्षणयोगेऽपि परीषहे स एव परीषहोऽस्तु, किमुपचरितकल्पनया ?, ततो निरुपचरितलक्षणयोगाद्वेदनैव परीषहः, सा च जीवधर्मत्वाज्जीवे नाजीव इति वेदनां प्रतीत्य जीवे परीषह उच्यते, न तु पूर्वेषामिवाजीवेऽपीति, 'शब्दस्ये'ति शब्दाख्यनयस्य साम्प्रतसमभिरूढैवम्भूत-भेदतस्त्रिरूपस्य मतेनात्मा-जीवः, परीषह इति प्रक्रमः, पुनः-शब्दो विशेषं द्योतयति, विशेषश्च परीषहोपयुक्तत्वम्, अयं ह्युपयोगप्रधानः, उपयोगश्चात्मन एवेति परीषहोपयुक्त आत्मैव परीषह इति मन्यते इति गाथार्थः ॥ इदानीं वर्त्तनाद्वारमाह-

नि.[८२] वीसं उक्कोसपए वट्टंति जहन्नओ हवइ एगो।
सीउसिण चरियं निसीहिया य जुगवं न वट्टंति ॥

वृ. विंशतिः उत्कृष्टपदे चिन्त्यमाने परीषहाः वर्त्तन्ते, युगपदेकत्र प्राणिनीति गम्यते 'जघन्यतः' जघन्यपदमाश्रित्य भवेदेकः परीषहः, ननूत्कृष्टपदे द्वाविंशतिरपि किं नैकत्र वर्त्तन्त इत्याह-'सीउसिण'त्ति शीतोष्णे चर्यानैषेधिक्यौ च 'युगपद्' एककालं 'न वर्त्तते' न भवतः, परस्परं परिहारस्थितिलक्षणत्वादमीषां, तथाहि-न शीतमुष्णे न चोष्णं शीते न चर्यायां नैषेधिकी नैषेधिक्यां वा चर्येत्यतो यौगपद्येनामीषामेकत्रासम्भवान्नोत्कृष्टतोऽपि द्वाविंशतिरिति, आह-नैषैधिकीवत्कथं शय्याऽपि न चर्यया विरुध्यते ?, उच्यते, निरोधबाधादितस्त्वङ्गनिकादेरपि तत्र सम्भवान्नैषेधिकी तु स्वाध्यायादीनां भूमिः, ते च प्रायः स्थिरतायामेवानुज्ञाता इति तस्या एव चर्यया विरोध इति गाथार्थः ॥ कालद्वारमाह-

नि.[८३] वासग्गसो अ तिण्हं मुहुत्तमंतं च होइ उज्जुसुए।
सद्दस्स एगसमयं परीसहो होइ नायव्वो ॥

वृ. 'वासग्गसो य'त्ति आर्षत्वाद्वर्षाग्रतः, को ऽर्थः ?-वर्षलक्षणं कालपरिमाणमाश्रित्य, परीषहो भवति इति गम्यते, चः पूरणे, 'त्रयाणां' नैगमसंग्रहव्यवहारनयानां मतेन, ते ह्यनन्तरोक्तन्यायतस्तदुत्पादकं वस्त्वपि परीषहमिच्छन्ति, तच्चैतावत्कालस्थितिकमपि सम्भवत्येवेति, 'मुहुत्तमंतं च' इति प्राकृतत्वादन्तर्मुहूर्तं पुनर्भवति, प्रक्रमात्परीषहः, ऋजुसूत्रे ऋजुश्रुते वा-विचार्यमाणे, स हि प्रागुक्तनीतितो वेदना परीषह इति वक्ति, सा चोपयोगात्मिका, उपयोगश्च 'अंतमुहुत्ताउ परं जोगुवओगा न संती'ति वचनात् आन्तर्मुहूर्तिक एव, 'शब्दस्य' साम्प्रतादित्रिभेदस्य मतेनैकसमयं परीषहो भवति 'ज्ञातव्यः' अवबोद्धव्यः, स ह्युक्तनीतितो वेदनोपयुक्तमात्मानमेव परीषहं मनुते, स चैतस्य पर्यायात्मकतया प्रतिसमयमन्यान्य एव भवतीति समयमेवैतन्मतेन परीषहो युक्त इति गाथार्थः। 'वर्षाग्रतः त्रयाणां परीषह' इति यदुक्तं, तदेव दृष्टान्तेन दृढयितुमाह-

नि. [८४] कंडू अभत्तच्छंदो अच्छीणं वेयणा तहा कुच्छी ।
[illegible] ॥

वृ. 'कंडू' कण्डूतिम्, 'अभक्तच्छन्दं' भक्तारुचिरूपम् 'अक्ष्णोः' लोचनयोः, 'वेदनां' दुःखानुभवं, सर्वत्र द्वितीयार्थे प्रथमा, 'तथे'ति समुच्चये, 'कुच्छि'त्ति सुब्व्यत्ययात् कुक्ष्यो-र्वेदना -शूलादिरूपं 'काशं श्वासं च ज्वरं' त्रयमपि प्रतीतमेव 'अध्यास्त' इति अधिसहते, सप्त वर्षशतानि यावत् ।

अनेन तु सनत्कुमारचक्रवर्त्युदाहरणं सूचितं, स हि महात्मा सनत्कुमारचक्रवर्ती शक्र-प्रशंसाऽसहनसमायातामर्द्धर्यनिर्वेदितशरीरविकृतिरुत्पन्नवैराग्यवासनः पटप्रान्तावलग्नतृण-वदखिलमपि राज्यमपहायाभ्युपगतदीक्षः प्रतिक्षणमभिनवाभिनवप्रवर्द्धमानसंवेगो मधुकर-वृत्त्यैव यथोपलब्धान्नपानोपरचितप्राणवृत्तिरनन्तरोक्तसप्तोद्दण्डकण्डूवादिवेदनाविधुरित-शरीरोऽपि संयमान्न मनागपि सञ्चचाल, पुनस्तत्सत्त्वपरीक्षणायातामिषग्वेषामरोपदर्शित-द्वादशांशुमालिसमांगुल्यवयवश्च तत्पुरतः 'पुव्विं'कडाणं कम्माणं वेइत्ता' इत्यादि संवेगोत्पाद-कमागमवचः प्ररूपयन् स्वयमागत्य शक्रेणाभिवन्दित उपबृंहितश्चेति गाथार्थः ॥ सम्प्रति क्व परीषह इति क्षेत्रविषयप्रश्नप्रतिवचनमाह-

नि. [८५] लोए संथारंमि य परीषहा जाव उज्जुसुत्ताओ ।
तिण्हं सद्दनयाणं परीसहा होइ अत्ताणे ॥

वृ. लोके संस्तारके च परीषहः 'जाव उज्जुसुत्ताउ'त्ति सूत्रत्वात् ऋजुसूत्रं यावद्, अस्य च पूर्वार्द्धस्य सूचकत्वादविशुद्धनैगमस्य मतेन लोके परीषहाः, तत्सहिष्णुर्यतिनिवासभूतक्षेत्रस्यापि चतुर्दशरज्ज्वात्मकलोकानर्थान्तरत्वात्, इत्थमपि च व्यवहारदर्शनाद्, एवमुत्तरोत्तरादिविशुद्ध-विशुद्धतरतद्भेदापेक्षया तिर्यग्लोकजम्बूद्वीपभरतदक्षिणार्द्धपाटलीपुत्रोपाश्रयादिषु भावनीयं, यावदत्यन्तविशुद्धतमनैगमस्य यत्रोपाश्रयैकदेशे अमीषां सोढा यतिस्तत्रामी इति, एवं व्यवहार स्यापि, लोकव्यवहारपरत्वादस्य, लोके च नेह वसति प्रोषित इति व्यवहारदर्शनात्, संग्रहस्य संस्तारके परीषहाः, स हि संगृह्णातीति संग्रह इति निरुक्तिवशात् संग्रहोपलक्षितमेवाधारं मन्यते, संस्तारक एव च यतिशरीरप्रदेशैः संगृह्यते न पुनरुपाश्रयैकदेशादिरिति संस्तारक एवास्य परीषहाः, ऋजुसूत्रस्य तु येष्वाकाशप्रदेशेष्वात्माऽवगाढस्तेष्वेव परीषहाः, संस्तारकादिप्रदेशानां तदणुभिरेव व्याप्तत्वात्, तत्रावस्थानाभावात्, त्रयाणां शब्दनयानां परीषहो भवति आत्मनि, स्वात्मनि व्यवस्थितत्वात्सर्वस्य, तथाहि--सर्वं वस्तु स्वात्मनि व्यवतिष्ठते सत्त्वाद् यथा चैतन्यं जीवे, आह-किमेवं नयैर्व्याख्या ?, निष्पिण्डा ह्यसौ, यदुक्तम्-'नत्थि पुहुत्ते समोयारे'त्ति, उच्यते, दृष्टिवादोद्धृतत्वादस्य न दोषः, तथा च प्रागुक्तम्-'कम्मप्पवायपुव्वे'त्यादि, दृष्टिवादे हि नयैर्व्याख्येत्यत्रापि तथैवाभिधानमिति गाथार्थः ॥ इदानीमुद्देशादिद्वारत्रयमल्पवक्तव्य-मित्येकगाथया गदितुमाह-

नि. [८६] उद्देसो गुरुवयणं पुच्छा सीसस्स उ मुणेयव्वा ।
निद्देसो पुणिमे खलु बावीसं सुत्तफासे य ॥

वृ. उद्दिश्यत इति उद्देशः, क इत्याह-'गुरुवचनं' गुरोः विवक्षितार्थसामान्याभिधायकं वचो,

यथा प्रस्तुतमेव 'इह खलु बावीसं परीसह'त्ति 'पृच्छा शिष्यस्य तु' गुरूद्दिष्टार्थविशेषजिज्ञासो विनेयस्य, तुः पुनः प्रक्रमाद्वचनं 'मुणितव्या' ज्ञातव्या, यथा 'कयरे खलु ते बावीसं परीसहा ?' इति, निर्देशश्चेति निर्देशः -पुनः इमे खलु द्वाविंशतिः, परीषहा इति गम्यते, अनेन च शिष्यप्रश्नानन्तरं गुरोर्निर्वचनं निर्देश इत्यर्थादुक्तं भवति, अत्र चैवमुदाहरणद्वारेणाभिधानं पूर्वयोरप्युक्तोदाहरणद्वयसूचनार्थं वैचित्र्यख्यापनार्थं चेति किञ्चिन्यूनगाथार्थः ॥ इत्थं 'कृत' इत्यादिद्वादशद्वारवर्णनादवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति 'सूत्रस्पर्श' इति चरमद्वारस्य सूत्रालापकनिष्पन्ननिक्षेपस्य चावसरः, तच्चोभयं सूत्रे सति भवतीति सूत्रानुगमे सूत्रमुच्चारणीयं,

मू.(४१/१) 'सुयं मे आउसंतेणं भगवया एवमक्खायं-इह खलु बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइया जे भिक्खू सुच्चा नच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विनिहन्नेजा।

व्. श्रुतम् आकर्णितमवधारितमितियावत् 'मे' मया 'आयुष्मन्नि'ति शिष्यामन्त्रणं, कः कमेववाह ?, सुधर्मस्वामी जम्बूस्वामिनं, किं तत् श्रुतमित्याह-'तेने'ति त्रिजगत्प्रतीतेन 'भगवता' अष्टमहाप्रातिहार्यरूपसमग्रैश्वर्यादियुक्तेन, 'एव'मित्यमुना वक्ष्यमाणन्यायेन 'आख्यातं' सकलजन्तुभाषाभिव्याप्त्या कथितम्, उक्तं च -

"देवा दैवीं नरा नारीं, शबराश्चापि शाबरीम्।
तिर्यञ्चोऽपि हि तैरश्चीं, मेनिरे भगवद्गिरम्॥"

किमत आह-'इहे'ति लोके प्रवचने वा 'खलुः' वाक्यालङ्कारे अवधारणे वा, तत इहैव अन्यस्मै प्रतिपादनीयमित्याह, अन्यथाऽभिधाने प्रत्युतापायसम्भवात्, उक्तं च-

"किं एत्तो पावयरं सम्मं अनहिगयधम्मसब्भावो।
अन्नं कुदेसणाए कड्ढतरायंमि पाडेइ॥"त्ति,

'मये'त्येवनार्थतोऽनन्तरागमत्वमाह, 'भगवते'त्यनेन च वक्तुः केवलज्ञानादिगुणत्वसूचकेन प्रकृतवचसः प्रामाण्यं ख्यापयितुं वक्तुः प्रामाण्यमाह, वक्तृप्रामाण्यमेव हि वचनप्रामाण्ये निमित्तं, यदुक्तम्-'पुरुषप्रामाण्यमेव शब्दे दर्पणसंक्रान्तं मुखमिवोपचारादभिधीयते" 'तेन'ति च गुणवत्त्वप्रसिद्ध्यभिधानेन प्रस्तुताध्ययनस्य प्रामाण्यनिश्चयमाह, संदिग्धे हि वक्तुर्गुणवत्त्वे वचसोऽपि प्रामाण्ये संदिह्येतेति, समुदायेन तु आत्मौद्धत्यपरिहारेण गुरुगुणप्रभावनापरैरेव विनेयेभ्यो देशना विधेया, एतद्भक्तिपरिणामे च विद्यादेरपि फलसिद्धिः, यदुक्तम्-"आयरियभत्तिराएण विज्जा मन्ता य सिज्झंति" अथवा-'आउसंतेनं'ति भगवद्विशेषणम्, आयुष्मता भगवता, चीरजीविनेत्यर्थो, मङ्गलवचनमेतत्, यद्वा-'आयुष्मते'ति परार्थप्रवृत्त्यादिना प्रशस्तमायुर्धारयता, न तु मुक्तिमवाप्यापि तीर्थनिकारादिदर्शनात्पुनरिहायातेन, यथोच्यते कैश्चित्-

"ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदम्।
गत्वाऽऽगच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः॥"

एवं हि अनुन्मूलितनिःशेषरागादिदोषत्वात्तद्वचसोऽप्रामाण्यमेव स्यात्, निःशेषोन्मूलने हि रागादीनां कुतः पुनरिहागमनसम्भव इति। यदिवा-'आवसंतेनं'ति मयेत्यस्य विशेषणं, तत आङिति-गुरुदर्शितमर्यादया वसता, अनेन तत्त्वतो गुरुमर्यादावर्त्तित्वरूपत्वाद्गुरुकुलवा-

सस्य तद्विधानमर्थत उक्तं, ज्ञानादिहेतुत्वात्तस्य, तथा चोक्तं च

"नाणस्स होइ भागी थिरयरतो दंसणे चरित्ते य।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥"

अथवा 'आमुसंतेन' आमृशता भगवत्पादारविन्दं भक्तिः करतलयुगादिना स्पृशता, अनेनैतदाह-अधिगतसमस्तशास्त्रेणापि गुरुविश्रामणादिविनयकृत्यं न मोक्तव्यम्, उक्तं हि-

"जहाहिअग्गी जलणं नमंसे, नानाहुईमंतपयाहिसित्तं।
एवायरियं उवचिट्ठएज्जाअ, अनंतनानोवगतोऽवि संतो ॥" त्ति,

यद्वा-'आउसंतेनं'ति प्राकृतत्वेन तिङव्यत्ययादाजुषमाणेन-श्रवणविधिमर्यादया गुरून् सेवमानेन, अनेनाप्येतदाह-विधिनैवोचितदेशस्थेन गुरुसकाशात् श्रोतव्यं, न तु यथाकथञ्चिद्, गुरुविनयमीत्या गुरुपर्षदुत्थितेभ्यो वा सकाशात्, यथोच्यते-"परिसुट्ठियाण पासे सुणेइ सो *विनयपरिभंसि*"त्ति यदुक्तं *'भगवता आख्यातं द्वाविंशतिः परीषहाः' सन्तीति, तत्र किं भगवता* अन्यतः पुरुषविशेषादपौरुषेयोगमात् स्वतो वा अमी अवगता इत्याह-श्रमणेन भगवता महावीरेण काश्यपेन 'पवेइय'त्ति सूत्रत्वात् प्रविदिताः, तत्र श्राम्यतीति श्रमणः तपस्वी तेन, न तु

"ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः।
ऐश्वर्यं चैव धर्मश्च, सहसिद्धं चतुष्टयम् ॥"

इतिकणादादिपरकल्पितसदाशिवबदनादिसंसिद्धेन, तस्य देहादिविरहात् तथाविधप्रयत्नाभावेनाऽऽख्यानायोगाद्, उक्तं च-

"वयणं न कायजोगाभावे न य सो अनादिसुद्धस्स।
गहणम्मि य नो हेतू सत्थं अत्तागमो कह नु ॥"

'भगवंते'ति च समग्रज्ञानैश्वर्यादिसूचकेन सर्वज्ञतागुणयोगित्वमाह, तथा च यत् कैश्चिदुच्यते-

'हेयोपादेयतत्त्वस्य, साध्योपायस्य वेदकः।
यः प्रमाणमसाविष्टो, न तु सर्वस्य वेदकः ॥' इति,

तदव्युदस्तं भवति, असर्वज्ञो हि न यथावत्सोपायहेयोपादेयतत्त्ववित् भवति, प्रतिपाणि भिक्षा हि भावनामुपयोगशक्त्यः, तत्र कोऽपि कस्यापि कथमपि क्वाप्युपयोगीति कथं सोपायहेयोपादेयतत्त्ववेदनं सर्वज्ञतां विना सम्भवतीति, 'महावीरेण'ति शक्रकृतनाम्ना चरमतीर्थकरेण, 'काश्यपेन' काश्यपगोत्रेण, अनेन नियतदेशकालकुलाभिधायिना सकलदेशकालकलाव्यापिपुरुषाद्वैतनिराकरणं कृतं भवति, तत्र हि सर्वस्यैकत्वादयमाख्याताऽस्मै व्याख्येयमित्यादिविभागाभावत आख्यानस्यैवासम्भव इति, 'प्रविदिताः' प्रकर्षेणअ-स्वयंसाक्षात्कारित्वलक्षणेन ज्ञाताः, अनेन बुद्धिव्यवहितार्थपरिच्छेदवादः परिक्षिप्तो भवति, स्वयंसाक्षात्कारी हि प्रदीपहस्तान्धपुरुषवद्व्यतिरिक्तबुद्धियोगोऽपि कथं कञ्चनार्थं परिच्छेत्तुं क्षमः स्याद् ?, एवं चैतदुक्तं भवति-नान्यतः पुरुषविशेषादेतेऽवगताः, स्वयंसम्बुद्धत्वाद् भगवतः, नाप्यपौरुषेयागमात्, तस्यैवासम्भवाद्, अपौरुषेयत्वं ह्यागमस्य स्वरूपापेक्षमर्थप्रत्यायनापेक्षं वा ?, तत्र यदि स्वरूपापेक्षं तदा तालवादिकरणव्यापारं विनैवास्य सदोपलम्भप्रसङ्गः, न चावृतत्वात् नोपलम्भ इति वाच्यं, तस्य सर्वथा नित्यत्वे आवरणस्याकिञ्चित्करत्वात्, किञ्चिकरत्वे वा

कथञ्चिदनित्यत्वप्रसङ्गाद्, अर्थाथप्रत्यायनापेक्षम्, एवं कृतसङ्केता बालादयोऽपि ततोऽर्थं प्रतिपद्येरन्निति नापौरुषेयागमसम्भव इति।

ते च कीदृशा इत्याह-'यानि'ति परीषहान 'भिक्षुः' उक्तानुरुक्तया, 'श्रुत्वा' आकर्ण्य, गुर्वन्तिक इति गम्यते, 'ज्ञात्वा' यथावदवबुद्ध, 'जित्वा' पुनः पुनरभ्यासेन परिचितान् कृत्वा 'अभिभूय' सर्वथा तत्सामर्थ्यमुपहत्य, भिक्षोश्चर्या-विहितक्रियासेवनं भिक्षुचर्या तथा 'परिव्रजन्' समन्ताद्विहरन् 'स्पृष्टः' आश्लिष्टः, प्रक्रमात्परीषहैरेव, 'नो' नैव 'विनिहन्येत' विविधैः प्रकारैः संयमशरीरोपघातेन विनाशं प्राप्नुयात्, पठन्ति च 'भिक्खायरियाए परिव्वयंतो'त्ति भिक्षाचर्यायां-भिक्षाटने परिव्रजन्, उदीर्यन्ते हि भिक्षाटने प्रायः परीषहाः, उक्तं हि "भिक्खायरियाए बावीसं पिसहा उदीरिज्जंति"त्ति, शेषं प्राग्वत्॥ इत्युक्तः उद्देशः पृच्छामाह-

मू. (४१-२) कयरे तु खलु बावीसं प० जे०

वृ. 'कयरे' किंनामानः 'ते' अनन्तरसूत्रोद्दिष्टाः 'खलुः' वाक्यालङ्कारे, शेषं प्राग्वदिति।

मू. (४१-३) इमे खलु ते बावीसं प० जे०

वृ. 'इमे' अनन्तरं वक्ष्यमाणत्वात् हृदि विपरिवर्तमानतया प्रत्यक्षाः इमे 'ते' इति ये त्वया पृष्टाः, शेषं पूर्ववत्।

मू. (४१-४) तंजहा दिगिंछापरिसहे १ पिवासापरीसहे २ सीयपरीसहे ३ उसिणपरीसहे ४ दंसमसगपरीसहे५ अचेलपरीसहे६ अरइपरीसहे७ इत्थीपरीसहे८ चरियापरीसहे ९ निसीहियापरीसहे १० सिज्जापरीसहे ११ अक्कोसपरीसहे १२ वहपरीसहे १३ जायणापरीसहे १४ अलाभपरीसहे १५ रोगपरीसहे १६ तणफासपरीसहे १७ जल्लपरीसहे १८ सक्कारपुरक्कारपरीसहे १९ पन्नापरीसहे २० अन्नाणपरीसहे २१ सम्मत्तपरीसहे २२

वृ. 'तद्यथे'त्युदाहरणोपन्यासार्थः दिगिञ्छापरीषहः १, पिपासापरीषहः २, शीतपरीषहः ३, उष्णपरीषहः ४, दंशमशकपरीषहः ५, अचेलपरीषहः ६, अरतिपरीषहः ७, स्त्रीपरीषहः ८, चर्यापरीषहः ९, नैषेधिकीपरीषहः १०, शय्यापरीषहः ११, आक्रोशपरीषहः १२, वधपरीषहः १३, याचनापरीषहः १४, अलाभपरीषहः १५, रोगपरीषहः १६, तृणस्पर्शपरीषहः १७, जल्लपरीषहः १८, सत्कारपुरस्कारपरीषहः १९, प्रज्ञापरीषहः २०, अज्ञानपरीषहः २१, दर्शनपरीषहः २२।

इह च 'दिगिंछ'त्ति देशवचनेन बुभुक्षोच्यते, सैवात्यन्तव्याकुलत्वहेतुरप्यसंयमभीरुतया आहारपरिपाकादिवाञ्छाविनिवर्त्तनेन परीति-सर्वप्रकारं सहत इति परीषहः दिगिंछापरीषहः?, एवं पातुमिच्छा पिपासा सैव परीषहः पिपासापरीषहः २, 'श्यैङस्पर्शे' इति नत्वाभावे शीतं-शिशिरः स्पर्शस्तदेव परीषहः शीतपरीषहः ३, 'उष दाहे' इत्यस्यौणादिकनक्प्रत्ययान्तस्य उष्णं निदाघादितापात्मकं तदेव परीषहः उष्णपरीषहः ४, दशन्तीति दंशाः पचादित्वादच्, मारयितुं शक्नुवन्ति मशकाः, दंशाश्च मशकाश्च दंशमशकाः, यूकाद्युपलक्षणं चैतत्, त एव परीषहो दंशमशकपरीषहः ५, चेलाभावो जिनकल्पिकादीनाम् अन्येषां तु भिन्नमल्पमूल्यं च चेलमप्यचेलमेव, अवस्त्राशीलादिवत्, तदेव परीषहोऽचेलपरीषहः ६, रमणं रतिः-संयमविषया धृतिः तद्विपरीता त्वरतिः, सैव परीषहः अरतिपरीषहः ७, स्त्रीयते: स्तृणोतेर्वा स्त्रटि दित्त्वाच्च

स्त्रीपि स्त्री सैव तद्गतरागहेतुर्गतिविभ्रमेङ्गिताकारविलोकनेऽपि-

त्वग्रुधिरमांसभेदस्नय्वस्थिरावणैः मुदुर्गन्धम् ।
कुचनयनजघनवदनं स्त्रीमूर्तिकृतं मन्यते कलम् ॥१॥

(तथा) निष्ठितिं जुगुपसत्यधरस्थं पिबति मोहितः प्रसभम् ।
कुचजघनपरिश्रावं नेच्छति तन्मोहितो भजने ॥२॥

इत्यादि भावनातोऽपिभिधास्यमाननीतितश्च परिषह्यमाणत्वात्परीषहः स्त्रीपरीषहः ८, चरणं चर्या-ग्रामानुग्रामं विहरणात्मिका सैव परीषहः चर्यापरीषहः ९, निषेधनं निषेधः पापकर्म्मणां गमनादिक्रियायाश्च स प्रयोजनमस्या नैषेधिकी-स्मशानादिका स्वाध्यायादिभूमिः निषेद्येति यावत् सैव परीषहो नैषेधिकीपरीषहः १०, तथा शेरतेऽस्यामिति शय्या-उपाश्रयः सैव परीषहः शय्यापरीषहः ११, आक्रोशनमाक्रोशः-असत्यभाषात्मकः स एव परीषहः आक्रोशपरीषहः १२, हननं वधः-ताडनं स एव परीषहो वधपरीषहः १३, याचनं याच्ञा प्रार्थनेत्यर्थः, सैव परीषहः याच्ञापरीषहो १४, लभनं लाभो न लाभोऽलाभः-अभिलषितविषयाप्राप्तिः स एव परीषहः अलाभपरीषहः १५, रोगः-कुष्ठादिरूपः स परीषहो रोगपरीषहः १६, तन्वन्तीति तृणानि, औणादिको नक् ह्रस्वत्वं च, तेषां स्पर्शः तृणस्पर्शः स एव परीषहस्तृणस्पर्शपरीषहः १७, जल्ल इति मलः स एव परीषहो जल्लपरीषहः १८,

सत्कारोवस्त्रादिभिः पूजनं पुरस्कारः-अभ्युत्थानासनादिसम्पादनं, यद्वा सकलैवाभ्युत्थानाभिवादनदानादिरूपा प्रतिपत्तिरिहसत्कारस्तेन पुरस्करणं सत्कारपुरस्कारः ततास्तावेव स एव वा परीषहः सत्कारपुरस्कारपरीषहः १९, प्रज्ञापरीषहः अज्ञानपरीषहश्च प्राग्भावितार्थौ, नवरं प्रज्ञायतेऽनया वस्तुतत्त्वमिति प्रज्ञा-स्वयंविमर्शपूर्वको वस्तुपरिच्छेदः तथा ज्ञायते वस्तुतत्त्वमनेनेति ज्ञानं-सामान्येन मत्यादि तदभावोऽज्ञानं २०-२१, दर्शनं-सम्यग्दर्शनं तदेव क्रियादिवादिना विचित्रतमश्रवणेऽपि सम्यक् परीषह्यमाणं-निश्चलचित्ततया धार्यमाणं परीषहो दर्शनपरीषहः, यद्वा दर्शनशब्देन दर्शनव्यामोहहेतुरैहिकामुष्मिकफलानुपलम्भादिरिह गृह्यते, ततः स एव परीषहो दर्शनपरीषहः २२ ॥ इत्थं नामतः परीषहानभिधाय तानेव स्वरूपतोऽवक्ष्यते-

मू. (५०) *परीसहाणं पविभत्ती, कासवेण पवेइया ।*
तं मे उदाहरिस्सम, आनुपुव्विं सुणेह मे ॥

वृ. 'परीषहाणाम्' अनन्तरोक्तनाम्नां 'प्रविभक्तिः' प्रकर्षेण-स्वरूपसम्मोहाभावलक्षणेन विभागः-पृथक्ता 'काश्यपेन' काश्यपगोत्रेण महावीरेणेतियावत्, 'प्रवेदिता' प्ररूपिता 'ता'मिति काश्यपप्ररूपितां परीषहप्रविभक्तिं 'मे' इति भवताम् 'उदाहरिष्यामि' प्रतिपादयिष्यामि' 'आनुपूर्व्या' क्रमेण शृणुत 'मे' मम प्रक्रमादुदाहरतः, शिष्यादरख्यापनार्थं च काश्यपेन प्रवेदितेति वचनमिति सूत्रार्थः ॥ इह चाशेषपरीषहाणां क्षुत्परीषह एव दुःसह इत्यादितस्तमाह-

मू. (५१) *दिगिंछापरियावेणं, तवस्सी भिक्खु थामवं ।*
न छिंदे न छिंदावए, न पए न पयावए ॥

वृ. दिगिञ्छा-उक्तरूपा तया परितापः-सर्वाङ्गीणसन्तापो दिगिञ्छापरितापस्तेन, छिदादिक्रियापेक्षा हेतौ तृतीया, पाठान्तरं 'दिगिंछापरिगते' बुभुक्षाव्याप्ते 'देहे' शरीरे सति, तपोऽस्या-

स्तीति अतिशायने विनिस्तपस्वीविकृष्टाष्टमादितपोऽनुष्ठानवान्, स च गृहस्थादिरपि स्यादत आह-'भिक्षुः' यतिः, सोऽपि कोहक्-स्थाम-बलं तदस्य संयमविषयमस्तीति स्थामवान्, भूम्नि प्रशंसायां वा मतुप्प्रत्ययः, अयं च किमित्याह 'न छिन्द्यात्' न द्विधा विदध्यात्, स्वयमिति गम्यते, न छेदयेद्वा अन्यैः, फलादिकमिति शेषः, तथा न पचेत् स्वयं, न चान्यैः पाचयेत्, उपलक्षत्वाच्च नान्यं छिन्दन्तं वा पचन्तं वाऽनुमन्येत, तत एव च स्वयं क्रीणीयात्, नापि क्रापयेत् न च परं क्रीणन्तमनुमन्येत, छेदस्य हननोपलक्षणत्वात् क्षुत्प्रपीडितोऽपि न नवकोटी-शुद्धिबाधां विधत्ते इति गाथार्थः ॥

मू.(५२) *कालीपव्वंगसंकासे, किसे धमणिसंतए।*
मत्तन्नोऽसनपानस्स, अदीनमनसो चरे॥

वृ. काली-काकजङ्घा तस्याः पर्वाणि स्थूराणि मध्यानि च तनूनि भवन्ति ततः कालीपर्वाणीव पर्वाणिजानुकूर्परादीनि येषु तानि कालीपर्वाणि, उष्ट्रमुखीवन्मध्यपदलोपी समासः, तथा-विधैरङ्गैः-शरीरावयवैः सम्यक्काशते तपःश्रिया दीप्यत इति कालीपर्वाङ्गसङ्काशः, यद्वा प्राकृते पूर्वापरनिपातस्यातन्त्रत्वाद्ग्रामो दग्ध इत्यादिवत् अवयवधर्मेणाप्यवयवीनां व्यपदेशदर्शना-च्चाङ्गसन्धीनामपि कालीपर्वसदृशतायां कालीभिः सङ्काशानि सदृशान्यङ्गानि यस्य स तथा, स हि विकृष्टतपोऽनुष्ठानतोऽपचितपिशितशोणित इत्यस्थिचर्मावशेष एवंविध एव भवति, अत एव च 'कृशः' कृशशरीरः, धमनयः-शिरास्ताभिः सन्ततो-व्याप्तो धमनिसंततः, एवंविधावस्थोऽपि मात्रां-परिमाणरूपां जानाति इति मात्राज्ञो-नातिलौल्यतोऽतिमात्रोपयोगी, कस्येत्याह-अश्यत इत्यशनम्-ओदनादि पीयत इति पानं-सौवीरादि अनयोः समाहारेऽशनपानं तस्य, तथा 'अदीनमनसो'त्ति सूत्रत्वाददीनमनाः अदीनमानसो वा-अनाकुलचित्तः 'चरेत्' संयमा-ध्वनि यायात्, किमुक्तं भवति ?, अतिबाधितोऽपि क्षुधा नवकोटीशुद्धमप्याहारमवाप्य न लौल्यतोऽतिमात्रोपयोगी तदप्राप्तौ वा दैन्यवान् इत्येवं क्षुत्परिषहमाणा क्षुत्परीषहः सोढो भवतीति सूत्रार्थः ॥ सम्प्रति प्राग्द्वारगाथोपक्षिप्तं सूत्रस्पर्श इति त्रयोदशद्वारं व्याचिख्यासुः सूत्रस्पर्शिक-निर्युक्तिमाह-'सुत्तफासे य'त्ति । तथा-

नि.[८७] कुमारए नई लेणे, सिला पंथे महल्लए।
तावस पडिमा सीसे, अगनि निव्वेअ मुग्गरे॥

नि.[८८] वने रामे पुरे भिक्खे, संथारे मल्लधारणं।
अंगविज्जा सुए भीमे, सीसस्सागमने इय॥

वृ. तत्र सूत्रस्पर्शश्चेति द्वारोपक्षेपः, कुमार इत्यादिना च तद्वर्णनं स्पष्टमेव, नवरं कुमारकादिभिः, प्रत्येकं द्वाविंशतेरपि परीषहाणामुदाहरणोपदर्शनं, तथाहि-'कुमारकः' क्षुल्लकः, 'लेणं'ति लयनं गुहा 'महल्लए'त्ति आर्यरक्षितपिता, सूत्रस्पर्शित्वं चास्य सूत्रसूचितोदाहरणप्रदर्शकत्वादिति किञ्चिदधिकगाथाद्वयार्थः ॥ इदानीं निर्युक्तिकार एव 'न छिन्दे' इत्यादिसूत्रावयवसूचितं कुमार-केत्यादिद्वारोपक्षिप्तं च क्षुत्परिषहोदाहरणमाह-

नि.[८९] उज्जेनी हत्थिमित्तो भोगपुरे हत्थिभूइखुड्डो अ।
अडवीइ वेयणट्टो पाओवगओ य सादिव्वं॥

वृ. उज्जयिनी हस्तिमित्रो भोगकटकपुरं हस्तिभूतिक्षुल्लकश्चात्रव्यां वेदनार्त: पादपोपगतश्च सादिव्यं देवसन्निधानमिति गाथाक्षरार्थ: ॥ भावार्थो वृद्धसम्प्रदायादवसेय:, स चायम्-

तेणं कालेणं तेणं समएणं उज्जेनीए नगरीए हत्थिमित्तो नाम गाहावई, सो मतभज्जिओ, तस्स पुत्तो हत्थिभूइ नाम दारगो, सो तं गहाय पव्वइओ। ते अन्नया कयाइ उज्जेनीओ भोगकडं पत्थिया, अडविमज्झे सो खंते पाए खयक्काए विद्धो, सो असमत्थो जातो, तेन साहुणो भुत्ता-वच्चह तुब्भेऽपि ताव नित्थरह कंतारं, अहं महया कट्ठेण अभिभूतो, जइ मम तुब्भे वहह तो भज्जिहिह, अहं भत्तं पच्चक्खामि, निब्बंधेण ट्ठितो एगपासे गिरिकंदराए भत्तं पच्चक्खाउं। साधू पट्ठिया, सो खुड्डतो भणति-अहंपि इच्छामि, सो तेहिं बला नीतो, जाहे दूरं गतो ताहे वोसंभेऊण पव्वइए नियत्तो, आगतो खंतस्स सगासं, खंतएण भणियं-तुमं कीस आगओ ?, इहं मरिहिसि, सोऽपि थेरो वेयणत्तो तद्दिवसं चेव कालगतो, खुड्डगो न चेव जाणइ जहा कालगतो।

सो देवलोगमुववन्नो, पन्नत्त तेन ओधी पउ[illegible] किं एयं तत्तं वा ?, जाव तं सरीरयं पेच्छइ खुड्डगं च, सो तस्स खुड्डगस्स अनुकंपाए तहेव सरीरगं अनुपविसित्ता खुड्डएण सद्धिं उल्लावितो अच्छइ, तेन भणिओ-वच्चह पुत्त! भिक्खाए, सो भणइ-कहिं ?, तेन भण्णइ-एए धवनिग्गोहादि पायवा, एएसु तन्निवासी पागवंतो, जे तव भिक्खं दाहिंति, तहत्ति भणिउं गतो, धम्मलाभेति रुक्खहेट्ठेसु, ततो सालंकारो हत्थो निग्गच्छउं भिक्खं देइ, एवं दिवसे भिक्खं गिण्हंतो अच्छितो जाव ते साहुणो तंमि देसे दुब्भिक्खे जाए पुणोवि उज्जेणिगं देसं आगच्छंता तेनेव मग्गेण आगया बितिए संवच्छरे, जाव तं गया पएसं, खुड्डगं पेच्छंति वरिसस्स अंते, पुच्छितो भणइ-खंतोऽपि अच्छइ, गया जाव सुक्कं सरीरयं पेच्छंति, तेहिं नायं-देवेन होऊणमनुकंपा कइल्लिया होहित्ति। खंतेन अहियासितो परीसहो न खुड्डएण, अहवा खुड्डएणवि अहियासितो, न तस्स एवं भावो भवइ-जहाऽहं न लभिस्सामि भिक्खं, पच्छा सो खुड्डगो साहूहिं नीओ। यथा च ताभ्यामयं परीषह: सोढस्तथा साम्प्रतस्थमुनिभिरपि सोढव्य इत्येद-प्यर्थ:। उक्त: क्षुत्परीषह:, एवं चाधिसहमानस्य न्यूनकुक्षितयैषणीयाहारार्थं वा पर्यटत: श्रमादिभिरवश्यंभाविनी पिपासा, सा च सम्यक् सोढव्येति तत्परीषहमाह-

मू. (५३) *तओ पुट्ठो पिवासाए, दुगुंछी लद्धसंजमे।*
सीओदगं न सेवेज्जा, वियडस्सेसणं चरे॥

वृ. 'तत' इति क्षुत्परीषहात् तको वा उक्तविशेषणो भिक्षु: 'स्पृष्ट:' अभिद्रुत: 'पिपासया' अभिहितस्वरूपया 'दोगुंछी'ति जुगुप्सी, सामर्थ्यादनाचारस्येति गम्यते, अत एव लब्ध:-अवाप्त: संयम:-पञ्चाश्रवादिविरमणात्मको येन स तथा, पाठान्तरं वा 'लज्जसंजमेत्ति' लज्जा-प्रतीता संयम:-उक्तरूप: एताभ्यां स्वभ्यस्ततया सात्मीभावसमुपगताभ्यामनन्य इति स एव लज्जासंयम:, पठ्यते च 'लज्जासंजए'त्ति तत्र लज्जया सम्यग्यतते-कृत्यं प्रत्यादृतो भवतीति लज्जासंयत:, सर्वधातूनां पचादिषु दर्शनात्,

स एवंविध: किमित्याह-शीतं-शीतलं, स्वरूपस्थतोयोपलक्षणमेतत्, तत: स्वकीयादि-शस्त्रानुपहतम्, अप्रासुकमित्यर्थ:, तच्च तदुदकं च शीतोदकं, 'न सेवेत' न पानादिना भजेत, किन्तु 'विडस्स'त्ति विकृतस्य-वह्न्यादिना विकारं प्रापितस्य प्रासुकस्येतियावत्, प्रक्रमादुद-

कम्य 'एसणं' ति चतुर्थ्यर्थे द्वितीया, ततश्चैषणाय-गवेषणार्थं 'चरेत्', तथाविधकुलेषु पर्यटेत्, अथवा एषणाम्-एषणासमितिं चरेत्, चरतेरासेवायामपि दर्शनात्, पुनः पुनः सेवेत, किमुक्तं भवति? एकवारमेषणाया अशुद्धावपि न पिपासातिरेकतोऽनेषणीयमपि गृह्णंस्तामुल्लङ्घयेदिति सूत्रार्थः ॥ कदाचिज्जनाकुल एव निकेतनादौ लज्जातः स्वस्थ एव चैवं विदधीतेत्यत आह

मू.(५४) *छिन्नावाएसु पंथेसुं, आउरे सुपिवासिए।*
परिसुक्कमुहे दीने, तं तितिक्खे परीसहं॥

वृ. छिन्नः-अपगतः आपातः-अन्यतोऽन्यत आगमनात्मकः अर्थाज्जनस्य येषु ते छिन्नापाताः, विविक्ता इत्यर्थः, तेषु, 'पथिषु' मार्गेषु, गच्छन्निति गम्यते, कीदृशः सन्नित्याह-'आतुरः' अत्यन्ताकुलतनुः, किमिति?, यतः सुष्ठु-अतिशयेन पिपासितः-तृषितः सुपिपासितः, अत एव च परिशुष्क-विगतनिष्ठीवनतयाऽनार्द्रतामुपगतं मुखमस्येति परिशुष्कमुखः स चासौ अदीनश्च-दैन्याभावेन परिशुष्कमुखादीनः 'त'मिति तृट्परीषहं 'तितिक्षेत' सहेत पठ्यते च-'सव्वतो य परिव्वएज्जे' सर्वत इति सर्वान्-मनोयोगादीनाश्रित्य, चः पूरणे 'परिव्रजेत्' सर्वप्रकारसंयमाध्वनि यायात्, उभयत्रापमर्थो-विवक्तदेशस्थोऽप्यत्यन्तं पिपासितोऽस्वास्थ्यमुपगतोऽपि च नोक्तविधि मुल्लङ्घयेत्, ततः पिपासापरीषहोऽध्यासितो भवतीति सूत्रार्थः ॥ इदानीं नदीद्वारमनुसरन् 'सीओदगं न सेवेज्जा' इत्यादिसूत्रावयवसूचितं निर्युक्तिकृत् दृष्टान्तमाह-

नि.[९०] उज्जेनी धनमित्तो पुत्तो से खुड्डओ अ धनसम्मो।
तण्हाइत्तो ऽपीओ कालगओ एलगच्छपहे॥

वृ. उज्जयिन्यां धनमित्रः 'से' इति तस्य पुत्रः क्षुल्लकश्च धनपुत्रशर्म्मा 'तण्हाएत्तो'त्ति तृषितोऽपीतः कालगत एडकाक्षपथ इत्यक्षरार्थः ॥ भावार्थस्तु सम्पदायादवसेयः, स चायम्-

एत्थ उदाहरणं किंचि पडिवक्खेण किंचि अनुलोमेण। उज्जेनी नाम नयरी, तत्थ धनमित्तो नाम वाणियतो, तस्स पुत्तो धनसम्मो नाम दारतो, सो धणमित्तो तेन पुत्तेण सह पव्वइओ। अन्नया ते साहू मज्झण्हवेलाए एलगच्छपहे पट्ठिया, सोऽवि खुड्डुगो तण्हाइत्तो एति, सोऽपि से खंतो सिनेहानुरागेण पच्छओ एति, साहुणोऽपि पुरतो वच्चंति, अन्तरावि नदी समावडिया, पच्छा तेन वुच्चइ-एहि पुत्त! इमं पाणियं पियाहि, सोऽवि खंतो नइं उत्तिन्नो चिंतेति य-मणागं ओसरामि, जावेस खुड्डओ पाणियं पियइ, मा मे संकाए न पाहिन्ति एगंते पडिच्छइ, जाव खुड्डतो पत्तो नइं न पियति।

केइ भणंति-अंजलीए उक्खिवाए अह से चिंता जाया-पियामित्ति, पच्छा चिंतेइ-कहमहं एए हालाहले जीवे पिविस्सं?, न पीयं, आसाए छिन्नाए कालगतो, देवेसु उववण्णो, ओहिं पउत्तो, जाव खुड्डगसरीरं पासति, तहिं अनुपविट्ठो, खंतं ओलग्गति, खंतोऽपि एतिन्ति पत्थितो, पच्छा तेन तेसिं देवेनं साहूणं गोउलाणि विउव्वियाणि, साहूवि तासु वइयासु लक्काईणि गिण्हन्ति, एवं वइयापरंपरेण जाव जनवयं संपत्ता, पच्छिल्लाए वइयाए तेना देवेन विंटिया पम्हुसाविया जाणणनिमित्तं, एगो साहू नियत्तो, पेच्छति विंटियं, नत्थि वइया, पच्छा तेहिं नायं-सादिव्वंति, पच्छा तेन देवेन साहुणो वंदिया, खंतो न वंदिओ, तओ सव्वं परिकहेइ, भणइ-एएण अहं परिचत्तो-तुमं णं पाणियं पियाहित्ति, जदि मे तं पाणियं पियं होन्तं तो संसारं भमंतो, पडिगतो।

एवं अहियासेयव्वं। इत्यवसितः पिपासापरीषहः, क्षुत्पिपासासहनकर्शितशरीरस्य च नितरां शीतकाले शीतसम्बन्ध इति तत्परीषहमाह-

मू. (५५) *चरंतं विरयं लूहं, सीयं फुसइ एगया।*
तत्थेवं पिहियप्पाणं, तरुसंदिट्ठी विहन्नइ॥

वृ. 'चरन्तम्' इति ग्रामानुग्रामं मुक्तिपथे वा व्रजन्तं, धर्ममासेवमानं वा, 'विरतम्' अग्निसमारम्भादेर्निवृत्तं विगतरतं वा 'लूहं'ति स्नानस्निग्धभोजनपरिहारेण रूक्षं, किमित्याह-शृणाति इति शीतं, 'स्पृशति' अभिद्रवति, चरदादिविशेषणविशिष्टो हि सूत्रतां शीतेन बाध्यते, 'एकदे'ति शीतकालादौ प्रतिमाप्रतिपत्त्यादौ वा, ततः किम् ?-'न' नैव वेला-सीमा मर्यादा सेतुरित्यनर्थान्तरं, ततश्चातीति शेषसमयेभ्यः स्थविरकल्पिकापेक्षया जिनकल्पिकापेक्षया च स्थविरकल्पाच्चातिशायिनी वेला शक्त्यपेक्षतया च सर्वथानपेक्षतया च शीतसहनलक्षणा मर्यादां विहन्यात्, को ऽर्थः-अपध्यानस्थानान्तरसर्पणादिभिरतिक्रामेत्, किमेवमुपदिश्यत इत्याह-पापयति पातयति वा भवावर्त इति पापा तादृशी दृष्टिः-बुद्धिरस्येति पापदृष्टिः 'विहन्नइ' इति सूत्रत्वाद्विहन्ति-अतिक्रामत्यतिवेलामिति प्रक्रमः,

अयमत्र भावार्थः पापदृष्टिरेवोक्तरूपमर्यादातिक्रमकारी, ततः पापबुद्धिकृतत्वादस्य सद्गुरूपदेशात् परिहारो विधेयः, पठ्यते च-'नाइवेलं मुणी गच्छे, सुच्चा णं जिनसासनं' तत्र वेला-स्वाध्यायादिसमयात्मिका तामतिक्रम्य शीतेनाभिहतो ऽहमिति 'मुनिः' तपस्वी न 'गच्छेत्' स्थानान्तरमभिसर्पेत्, 'सोच्चे'ति श्रुत्वा णमिति वाक्यालङ्कारे 'जीनशासनं' जिनागमम्-अन्यो जीवो ऽन्यश्च देहस्तीव्रतराश्च नरकादिषु शीतवेदनाः प्राणिभिरनुभूतपूर्वा इत्यादिकम्

मू. (५६) *न मे निवारणं अत्थि, छवित्ताणं न विज्जइ।*
अहं तु अग्गिं सेवामि, इइ भिक्खू न चिंतए॥

वृ. न 'मे' मम मितरां वार्यते-निषिध्यते ऽनेन शीतवातादीति निवारणं-सौधादि 'अस्ति' विद्यते, तथा छविः-त्वक् त्रायते-शीतादिभ्यो रक्ष्यते ऽनेनेति छवित्राणं-वस्त्रकम्बलादि न विद्यते, वृद्धस्तु शरणं-वस्त्रादि तथा छविः-त्वक् त्राणं न विद्यते-न भवति, असौ हि शीतोष्णादीनां ग्राहिकेति व्याचक्षते, अतः 'अहं'मित्यात्मनिर्देशः तुः पुनरर्थः, तद्भावना च येषां निवारणं छवित्राणं वा समस्ति ते किमिति अग्निं सेवेयुः ?, अहं तं तदभावादत्राणः तत्किमन्यत्कोरमौत्यग्निं सेवे 'इती'त्येवं 'भिक्षुः' यतिः 'न चिन्तयेत्' न ध्यायेत्, चिन्तानिषेधे च सेवनं दूरापास्तमिति। इदानीं लयनद्वारं, तत्र च 'नातिवेलं मुनिर्गच्छेदि'त्यादिसूत्रावयवसूचितमाह-

नि. [९१] *रायगिहंमि वयंसा सीसा चउरो उ भद्दबाहुस्स।*
वेभारगिरिगुहाए सीयपरिगया समाहिगया॥

वृ. राजगृहे नगरे वयस्याः शिष्याश्चत्वारस्तु भद्रबाहोर्वैभारगिरिगुहायां शीतपरिगताः समाधिगता इत्यक्षरार्थः॥ भावार्थस्तु वृद्धविवरणादवसेयः, तच्चेदम्

रायगिहे नयरे चत्तारि वयंसा वाणियगा सहवड्ढियया, ते भद्दबाहुस्स अंतिए धम्मं सोच्चा पव्वइया, ते सुयं बहुं अहिज्जित्ता अन्नया कयाइ एगल्लविहारपडिमं पडिवन्ना, ते समावन्नीए

विहरंता पुणोवि रायगिहं नयरं संपत्ता, हेमंतो य वट्टति, ते य भिक्खं काउं तइयाए पोरिसीए पडिनियत्ता, तेसिं च वैभारगिरितेनं गंतव्वं, तत्थ पढमस्स गिरिगुहादारे चरिमा पोरिसी ओगाढा, सो तत्थेव ठिओ, बितियस्स उज्जाने, ततियस्स उज्जानसमीवे, चउत्थस्स नगरब्भासे चेव, तत्थ जो गिरिगुहब्भासे तस्स निरागं ओवं सीं सम्मं सहंतो झवेंतो अ पढमजामो चेव कालगतो, एवं जो नगरसमीवे सो चउत्थं जामं कालगतो, तेसिं जो नगरब्भासे तस्स नगरुण्हार न तहा सीअं तेन पच्छा कालगतो, ते सम्मं कालगया, एवं सम्मं अहियासियव्वं जहा तेहिं चउहिं अहियासियं॥ इदानीं शीतविपक्षभूतमुष्णमिति यदिदा शीतकाले शीतं तदनन्तरं ग्रीष्मे उष्णमिति तत्परीषहमाह-

मू.(५७) *उसिणपरितावेणं, परिदाहेण तज्जिओ।*
घिंसु वा परितावेणं, सायं न परिदेवए॥

वृ. उष्णम्-उष्णस्पर्शवत् भूशिलादि तेन परितापः तेन, तथा 'परिदाहेन' बहिः स्वेदमलाभ्यां वह्निना वा अन्तश्च तृष्णया जनितदाहस्वरूपेण 'तर्जितः' भर्त्सितोऽत्यन्तपीडित इतियावत्, तथा 'ग्रीष्मे' वाशब्दात् शरदि वा 'परितापेन' रविकिरणादिजनितेन तर्जित इति सम्बन्धः, किमित्याह-'सातं' सुखं, प्रतीति शेषः, न परिदेवेत्, किमुक्तं भवति ?-'नारीकुचोरुकरपल्लवोपगूढैः क्वचित्सुखं प्राप्ताः। क्वचिदङ्गारैर्ज्वलितैस्तीक्ष्णैः पक्वाः स्म नरकेषु॥' इत्यादि परिभावयन् हा! कथं मम मन्दभाग्यस्य सुखं स्यादिति प्रलपेत्, यद्वा-'सात'मिति सातहेतुं प्रति, यथा हा! कथं कदा वा शीतकालः शीतांशुकरकलापादयो वा मम सुखोत्पादकाः सम्पत्स्यन्त इति न परिदेवेतेति सूत्रार्थः॥ उपदेशान्तरमाह-

मू.(५८) *उण्हाहितत्तो मेहावी, सिनाणं नाभिपत्थए।*
गायं न परिसिंचेज्जा, न वीजिज्जा य अप्पयं॥

वृ. 'उष्णाभितप्तः' उष्णेनात्यन्तं पीडितो 'मेधावी' मर्यादानतिवर्ती 'स्नानं' शौचं देशसर्वभिदभिन्नं 'नाभिप्रार्थयेत्' नैवाभिलषेत् पठन्ति च-'णो ऽवि पत्थए'त्ति अपेर्भिन्नक्रमत्वात् प्रार्थयेदपि न, किं पुनः कुर्यादिति ?, तथा 'गात्रं' शरीरं 'न परिषिञ्चेत्' न सूक्ष्मोदकबिन्दुभिरार्द्रीकुर्यात्, 'न वीजयेच्च' तालवृन्तादिना 'आत्मयं'ति आत्मानम्, अथवाऽल्पमेवाल्पकं, किं पुनर्बहिति सूत्रार्थः॥

साम्प्रतं शिलाद्वारमनुस्मरन् 'उसिणपरितावेणे' त्यादिसूत्रावयवसूचितमुदाहरणमाह-

नि.[९२] तगराइ अरिहमित्तो दत्तो अरहन्नओ य भद्दा य।
वणियमहिलं चइत्ता तत्तंमि सिलायले विहरे॥

वृ. तगरायामर्हन्मित्रो दत्तोऽर्हन्नकश्च भद्रा च वणिग्महेलां त्यक्त्वा तप्ते शिलातले 'विहरे'त्ति व्यहार्षीदिति गाथाक्षरार्थः। भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-अरहन्नएण सद्धिं पव्वइओ, सो तं खुड्डगं न कयाइ भिक्खाए हिंडावेइ, पढमालियाईहिं किमिच्छएहिं पोसेति, सो सुकुमालो, साहूण अप्पत्तियं, न तरंति किंचि भणिउं।

अन्नया सो खंतो कालगतो, साहूहिं दो तिन्नि वा दिवसे दाउं भिक्खस्स ओयारिओ, सो सुकुमालसरीरो गिम्हे उवरिं हिट्ठा य डज्झति पासे य, तिण्हाभिभूतो छायाए वीसमंतो पउत्थ-

वतियाए वणिधमहिलाए दिट्ठो, ओरालसुकुमालसरीरोत्तिकाउं तीसे तंहि अज्झोववन्नाओ जाओ, चेडीए सद्दाविंतो, किं मग्गसि ?, भिक्खं, दिन्ना से मोयगा, पुच्छितो-कीस तुमं धम्मं करेसि ?, भणइ-सुहनिमित्तं, सा भणइ- तो मए चेव समं भोगे भुंजाहि, सो य उण्हेण तज्जिओ उवसंगिज्जंतो य पडिभग्गो गोगे भुंजति। सो साहूहि सव्वहिं मग्गितो न दिट्ठो अप्पसागारियं पविट्ठो, पच्छा से माया उम्मत्तिया जाया पुत्तसोगेण, नयरं परिभमंती अरहन्नयं विलवंती जं जंहि पासइ तं तंहि सव्वं भणति-अत्थि ते कोइ अरहन्नओ दिट्ठो ?, एवं विलवमाणी भमइ, जाव अन्नया तेन पुत्तेण अंतोलोयणा एस दिट्ठा, पभायंमि य, तंहेव ओयरित्ता पाएसु पडिओ, तं पिच्छिऊण तहेव सत्थचित्ता जाया, ताहे भण्णइ-पुत्त! पव्वयाहि, मा दुग्गइं जाहिसि, सो भणइ-न तरामि काउं संजमं, जदि परं अणसणं करेमि, एवं करेहि, मा य असंजओ भवाहि, मा संसारं भमिहिसि, पच्छा सो तहेव तत्ताए सिलाए पाओवगमनं करेइ, मुहुत्तेण सुकुमालसरीरो उण्हेण विलाओ, पुव्वि तेन नाहियासिओ पच्छा तेनऽहियासितो। एवं अहियासियव्वं। उष्णं च ग्रीष्मे तदनन्तरं वर्षासमयः, तत्र च दंशमशकसम्भव इति तत्परीषहमाह-

मू. (५१) *पुट्ठो य दंसमसएहिं, समरे व महामुनी।*
नागो संगामसीसे व, सूरे अभिहणे परं॥

वृ. 'स्पृष्टः' अभिद्रुतः 'चः' पूरणे दंशमशकैः, उपलक्षणत्वात् यूकादिभिश्च 'समरे व'त्ति 'एदोदुरलोपाविसर्ज्जनीयस्ये'ति रेफात्, ततः समे एव-तदगणनया स्पृष्टास्पृष्टावस्थयोस्तुल्य एव, यद्वा समन्तादरयः-शत्रवो यस्मिंस्तत्समरं तस्मिन्निति संग्रामशिरोविशेषणं, वेति पूरणे, 'महामुनिः' प्रशस्तयतिः, किमित्याह-'नागो संगामसीसे वे'ति इवार्थस्य वाशब्दस्य भिन्नक्रमत्वान्नाग इव-हस्तीव संग्रामस्य शिर इव शिरः-प्रकर्षावस्था संग्रामशिरस्तस्मिन् 'शूरः' पराक्रमवान्, यद्वा शूरो-योधः ततोऽन्तर्भावितोपमार्थत्वाद्वाशब्दस्य च गम्यमानत्वात् शूरवद्वाऽभिहन्यात्, कोऽर्थः ?-अभिभवेत् 'परं' शत्रुम्, अयमभिप्रायः-यथा शूरः करी यद्वा यथा वा योधः शरैस्तुद्यमानोऽपि तदगणनया रणशिरसि शत्रून् जयति, एवमयमपि दंशादिभिरभिद्रूयमानोऽपि भावशत्रुं-क्रोधादिकं जयेदिति सूत्रार्थः॥ यथा च भावशत्रुर्जेतव्यस्तथोपदेष्टुमाह-

मू. (५०) *न संतसे न वारिज्जा, मनंपि नो पउस्सए।*
उवेहे नो हणे पाणे, भुंजंते मंससोणिए॥

वृ. 'न संत्रसेत्' नोद्विजेत्, दंशादिभ्य इति गम्यते, यद्वाऽनेकार्थत्वाद्धातूनां न कम्पयेत्तैस्तुद्यमानोऽपि, अङ्गानीति शेषः, 'न निवारयेत्' न निषेधयेत्, प्रक्रमाद्दंशादीनेव तुदतो, मा भूदन्तराय इति, मनः-चित्तं तदपि, आस्तां वचनादि, 'न प्रदूषयेत्' न प्रदुष्टं कुर्यात्, किन्तु 'उवेहे'त्ति उपेक्षेत-औदासीन्येन पश्येद्, अत एव न हन्यात् 'प्राणान्' प्राणिनो 'भुञ्जानान्' आहारयतो मांसशोणितम्, अयमिहाशयः-अत्यन्तबाधकेष्वपि दंशकादिषु-

शृगालवृकरूपैश्च, नदद्भिर्घोरनिस्वनम्।
आक्षेपत्रोटितस्नायु, भक्ष्यन्ते रुधिरोक्षिताः॥१॥
स्वरूपैः श्यामशबलैर्वालपुच्छैर्भयान्वितैः।

परस्परं विरुध्यदिभर्विलुप्यन्ते दिशोदिशम् ॥२॥
काकगृध्रादिरूपैश्च, लोहतुण्डैर्बलान्वितैः ।
विनिकृष्ताक्षिजिह्वान्त्रा, विचेष्टन्ते महीतले ॥३॥
प्राणोपक्रमणैर्घोरैर्दुःखैरेवंविधैरपि ।
आयुष्यक्षपिते नैव, म्रियन्ते दुःखभागिनः ॥४॥ इत्यादि,

तथा असंज्ञिन एते आहारार्थिनश्च भोज्यमेतेषां मच्छरीरं बहुसाधारणं च यदि भक्षयन्ति किमत्र प्रद्वेषेणेति च विचिन्तयन् तदुपेक्षणपरो न तदुपघातं विदध्यादिति सूत्रार्थः ॥

इदानीं पञ्चमद्वारं, तत्र 'स्पृष्टो दंशमशकै'रित्यादिसूत्रसूचितमुदाहरणमाह-

नि. [९३] चंपाए सुमणुभद्दो जुवराया धम्मघोससीसो य ।
पंथंमि मसगपरिपीयसोणिओ सोऽवि कालगओ ॥

वृ. चम्पायां सुमनोभद्रो युवराजो धर्म्मघोषशिष्यश्च पथि मशकपरिपीतशोणितः सोऽपि कालगत इति गाथाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-

चंपाए नयरीए जियसत्तुस्स रन्नो पुत्तो सुमणभद्दो जुवराया, धम्मघोसस्स अंतिए धम्मं सोऊण निव्विण्णकामभोगो पव्वइतो, ताहे चेव एगल्लविहारपडिमं पडिवन्नो, पच्छा हेट्ठाभूमीए विहरन्तो सरयकाले अडवीए पडिमागतो रत्तिं मसएहिं खज्जइ, सो तं न पमज्जइ, सम्मं सहइ, रत्तीए पीयसोणितो कालगतो । एवं अहियासेयव्वं ॥ इत्यवसितो दंशमशकपरीषहः ॥ अधुना अचेलः संस्तैस्तुद्यमानो वस्त्रकम्बलाद्यन्वेषणपरो न स्यादित्यचेलपरीषहमाह-

मू. (६१) *परिजुन्नेहि वत्थेहिं, होक्खामित्ति अचेलए ।*
अदुवा सचेलए होक्खं, इह भिक्खं न चिंतए ॥

वृ. 'परिजीर्णैः' समन्तात् हानिमुपगतैः 'वस्त्रैः' शाटकादिभिः, 'होक्खामित्ति' इतिभिन्नक्रमः ततो भविष्यामि 'अचेलकः' चेलविकलः अल्पदिनभावित्वादेषामिति भिक्षुं विचिन्तयेत्, अथवा 'सचेलकः' चेलान्वितो भविष्यामि, परिजीर्णवस्त्रं हि मा दृष्ट्वा कश्चित् श्राद्धः सुन्दरतराणि वस्त्राणि दास्यतीति भिक्षुं चिन्तयेत्, इदमुक्तं भवति-जीर्णवस्त्रः सन्न मम प्राक्परिगृहीतमपरं वस्त्रमस्ति न च तथाविधो दातेति न दैन्यं गच्छेत्, न चान्यलाभसम्भावनया प्रमुदितमानसो भवेदिति सूत्रार्थः ॥ इत्थं जीर्णादिवस्त्रतया अचेलं स्थविरकल्पिकमाश्रित्याचेलपरीषह उक्तः, सम्प्रति तमेव सामान्येनाह-

मू. (६२) *एगया अचेलए होइ, सचेले यावि एगया ।*
एयं धम्महियं नच्चा, नाणी नो परिदेवए ॥

वृ. 'एकदा' एकस्मिन् काले जिनकल्पप्रतिपत्तौ स्थविरकल्पेऽपि दुर्लभवस्त्रादौ वा सर्वथा चेलाभावेन सति वा चेले विना वर्षादिनिमित्तप्रावरणेन जीर्णादिवस्त्रतया वा 'अचेलक' इति अवस्त्रोऽपि भवति, पठ्यते च 'अचेलए सया होइ'त्ति तत्र स्वयम्- आत्मनैव न परप्रयोगतः, 'सचेलः' सवस्त्रश्चाप्येकदा स्थविरकल्पिकत्वे तथाविधालम्बनेनावरणे सति, यद्येवं ततः किमित्याह-'एतदि'त्यवस्थौचित्येन सचेलत्वमचेलत्वं च धर्म्यो-यतिधर्म्मः तस्मै हितम्-उपकारकं धर्म्महितं 'ज्ञात्वा' अवबुद्ध्य, तत्राचेलकत्वस्य धर्म्महितत्वमल्पप्रत्युपेक्षादिभिः,

"पंचहिं ठाणेहिं पुरिमपच्छिमाणं अरहंताणं भगवंताणं अचेलए पसत्थे भवइ, तं जहा- अप्पा पडिलेहा १, लघुसिए रूवे २, तवे अनुमए ३, लाघवे पसत्थे ४, विउले इंदियनिग्गहे ५" त्ति, सचेलत्वस्य तु धर्मोपकारित्वमन्याद्यारम्भनिवारकत्वेन संयमफलत्वात्, 'ज्ञानी' नग्ना एव प्रायस्तिर्यग्नारकाः तद्भवभयादेव च मया मन्त्यपि वासांस्यपास्यन्त इत्येवं बोधवान्नो परिदेवयेत्, किमुक्तं भवति ?,- अचेलः सन् किमिदानीं शीतादिपीडितस्य मम शरणमिति न दैन्यमालम्बेत इति सूत्रार्थः ॥ इह च केचिन्मिथ्यात्वाकुलितचेतस इदमित्थं महार्थकर्म्म प्रवादपूर्वोद्धृतप्रस्तुताध्ययनाधीतमपि सचेलत्वं तथा-

सम्यक्त्वज्ञानशीलानि, ततश्चेतोह सिद्धये ।
तेषामुपग्रहार्थाय, स्मृतं चीवरधारणम् ॥१॥
जटी कूर्ची शिखी मुण्डी, चीवरी नग्न एव च ।
तप्यन्नपि तपः कष्टं, मौढ्यद्धिस्त्रो न सिद्धयति ॥२॥
सम्यग्ज्ञानी दयावांस्तु, ध्यानी यस्तप्यते तपः ।
नग्नश्चीवरधारी वा, स सिद्धयति महामुनिः ॥३॥ इति

वाचकवचनानूदितं चानुचितमित्याहुः, तान् प्रति वक्तुमुपक्रम्यते-इह यो यदर्थी न स तन्निमित्तोपादानं प्रत्यनाहतो, यथा घटार्थी मृत्पिण्डोपादानं प्रति, चारित्रार्थिनश्च यतयस्तन्निमित्तं च चीवरमिति, न चास्यासिद्धत्वं, तद्धि तस्य तदनिमित्ततया स्यात्, सा च तत्रास्य बाधाविधायितयौदासीन्येन वा ?, न तावद्बाधाविधायितया, यतोऽसौ पञ्चमव्रतविघातकत्वेन संयक्तिविषयतया कषायकारणत्वेन वा ?, यदि पञ्चमव्रतविघातकत्वेन, तदपि कुतः ?, युक्ति इति चेत्, तन्विदं स्वतन्त्रा सिद्धान्ताधीना वा ?, यदि स्वतन्त्रा ततः सलोमा मण्डूकश्चतुष्पात्त्वे सत्युत्प्लुत्य गमनात्, मृगवत्, अलोमा वा हरिणः, चतुष्पात्त्वे सत्युप्लुत्य गमनात्, मण्डूकवदित्यादिषत्र निर्मूलयुक्तेः साध्यसाधकत्वम्, उक्तं हि-

"यत्नेनानुमितोऽप्यर्थः, कुशलैरनुमातृभिः ।
अभियुक्तैरन्यैरन्यथैवोपपाद्यते ॥"

सिद्धान्ताधीनयुक्तिस्तु तथाविधसिद्धान्ताभावादसम्भविनी, अथास्त्यसौ 'गामे वा नगरे वा अप्पं वा बहुं वा जाव नो परिगिण्हेज्जा' इत्यादिः, तदनुगृहीता युक्तिश्च- यद्यत्परिग्रहस्वरूपं तत्तदुपादीयमानं पञ्चमव्रतविघाति, यथा धनधान्यादि, परिग्रहस्वरूपं च चीवरमिति, नन्वसिद्धोऽयं हेतुः, तथाहि-परिग्रहस्वरूपत्वमस्य किं मूर्च्छाहेतुत्वेन धारणादिमात्रेण वा ?, यदि मूर्च्छाहेतुत्वेन, शरीरमपि मूर्च्छाया हेतुर्न वा ?, न तावदहेतुः, तस्यान्तरङ्गत्वेन दुस्त्यजतरतया च विशेषतस्तद्धेतुत्वाद्, उक्तं च-

"अह कुणसि थूलवत्थाइएसु मुच्छं धुवं सरीरेऽवि ।
अक्केज्जदुल्लभरते काहिसि मुच्छं विसेसेण ॥"

अथास्तु तन्निमित्तमेतत्, तर्हि चीवरवत्तस्यापि किं दुस्त्यजत्वेन मुक्त्यङ्गतया वा न प्रथमत एव परिहारः ?, दुस्त्यजत्वेन चेत् तदपि किमशेषपुरुषाणामुत केषाञ्चिदेव ?, न तावदशेषपुरुषाणां, दृश्यन्ते हि बहवो वह्निप्रवेशादिभिः शरीरं परित्यजन्तः, अथ केषाञ्चित्, तदा वस्त्रमपि

केषाञ्चित् दुस्त्यजमिति तदपि न परिहार्यं, मुक्त्यङ्गतापक्षाश्रयणे च किं चीवरेणापराद्धम् ?, तस्यापि तथाविधशक्तिविकलानां शीतकालादिषु स्वाध्यायाद्युपष्टम्भकत्वेन मुक्त्यङ्गत्वात्, अभ्युपगम्य च मूर्च्छाहेतुत्वमुच्यते-न हि निगृहीतात्मनां क्वचिन्मूर्च्छाऽस्ति, तदुक्तम्-

"सव्वत्थुवहिणा बुद्धा, संरक्खणपरिग्गहे ।
अवि अप्पणोऽवि देहम्मि, नायरंति (यं) ॥"ति,

नापि धारणादिमात्रेण, एवं हि शीतकालादौ प्रतिमापन्नप्रतिपत्त्यादिषु केनचिद्भक्त्यादिनोपनीयमानस्यापि चीवरस्य परिग्रहताप्रसङ्गः, अथ तत्र स्वयंग्रहाभावाददोषः, तर्हि स्वयंग्रहः परिग्रहत्वे हेतुः, तथा न कुण्डिकाद्यपि नोपादेयं, दृष्टेष्टविरोधि चेदम्, अथ तत्र मूर्च्छाया अभावादपरिग्रहत्वम्, एवं सति संयमरक्षणायोपादीयमाने चीवरे तदभावात्तदस्तु, उक्तं च-

"जंपि वत्थं व पायं वा, कंबलं पायपुंछणं ।
तंपि संजमलज्जट्ठा, धरंति परिहरंति य ॥"

अथ संसक्तिविषयतया, यद्येवमाहारेऽपि सा किमस्ति नास्ति वा ?, न तावन्नास्ति, कृमिकण्डूपदाद्युत्पातस्य तत्र प्रत्यक्षाणि प्रतीतत्वात्, अथास्ति परं यतनया न दोषः, तदितरत्रापि तुल्यं, कषायकारणत्वेन चेत्, तत्किमात्मनः परेषां वा ?, यद्यात्मनस्तदा श्रुतमपि केषाञ्चिद हङ्कारहेतुत्वेन कषायकारणमिति तदपि नोपादेयं स्यात्, अथ विवेकिनां न तदहंकृतिहेतुः, "प्रथमं ज्ञानं ततो दये"ति नीतितो धर्मोपकारि चेति तदुपादानं, चीवरेऽपि समानमेतत्, अथ चीवरस्य धर्मानुपकारित्वादतुल्यता, ननु कुत एतदवसितं, किमचीवरास्तीर्थकृत इति श्रुतेरुत जिनकल्पाकर्णनात्, 'जिनाचेलपरीषहो मुनि' रिति वचनतो वा ?, न तावदाद्यो विकल्पः, सूत्रे हि तीर्थकृतामचीवरत्वं कदाचित्सर्वदा वा ?, कदाचिच्चेत्को वा किमाह ?, कदाचिदस्माकमप्यस्याभिमतत्वात्, अथ सर्वदा, तत्र, 'सव्वेऽवि एगदूसेण निग्गया जिनवरा चउवीस' मिति वचनात्, अथ तत्र 'एगदोसेणं' तिपाठः, सर्वेऽपि संसारदोषेण एकेन निर्गता इतिकृत्वा, नन्वेवमनवस्था, सर्वत्र सर्वैरपि स्वेच्छारचितपाठानां सुकरत्वात्, किं च-तीर्थकृतामचीवरत्वं तेषामेव तद्धर्मोपकारीति निश्चयोऽस्तु, नापरेषां, न हि यदेव तेषां धर्मोपकारी तदेवेतरेषामपि, अन्यथा यथा न ते परोपदेशतः प्रवर्तन्ते यथा च छद्मस्थावस्थायां परोपदेशं दीक्षां वा न प्रयच्छन्ति, तथाऽन्यैरपि विधेयमिति मूलच्छेद एव तीर्थस्य, उक्तं च-

"न परोवएसविसया न य छउमत्था परोवएसंपि ।
देंति न य सिस्सवग्गं दिक्खंति जिना जहा सव्वे ॥१॥
तह सेसेहि य सव्वं कज्जं जइ तेहिं सव्वसाहम्मं ।
एवं च कओ तित्थं ? न चेदचेलत्ति कोगाहो ? ॥२॥"

अथ जिनकल्पाकर्णनात्, तत्र हि न किञ्चिदुपकरणमिति चीवरस्याप्यभावः, तथा च न तस्य धर्मोपकारिता, ननु जिनकल्पिकानामुपकरणाभावः, प्रवादतः आगमतो वा ?, न तावदाद्यपक्षो, न हि वसति किलात्र वटवृक्षे रक्ष इत्यादिनिर्मूलप्रवादानां प्रमाणता, नाप्यागमतः, तेषामपि तत्र शक्त्यपेक्षयोपकरणप्रतिपादनात्, तदुक्तम्-

"जिनकप्पियादओ पुण सोवहओ सव्वकालमेगंतो ।

उवगरणमामेसिं पुरिसावेक्खाए बहुभेयं ॥"

अथवा अस्तु जिनकल्पिकानामुपकरणाभावः, तथापि धृतिशक्तिसंहननश्रुतातिशययुक्तानामेव तत्प्रतिपत्तिः अथ स्थाप्यपुरुषाणामपि ?, यद्याद्यो विकल्पस्तत्किमेवंविधाः सम्प्रत्यपि सन्ति न वा ?, सन्ति चेदुपलब्धिलक्षणप्राप्ता उपलभ्येरन्, अनुपलब्धिलक्षणप्राप्ताश्च कुतः सत्त्वेन निश्चीयन्ते ?, अथ न सन्ति, तादृशामेव जिनकल्पप्रतिपत्तिः, तर्हि वृथैव

"मनपरमोहिपुलाए आहारग खवग उवसमे कप्पे ।
संजमतिय केवलि सिज्झणा य जंबुम्मि वोच्छिन्ना ॥"

इत्यागमवचनानामाश्रयणं, यदि स्थाप्यपुरुषाणामपीति कल्प्यते, तिरश्चामपि तत्कल्पनाः स्तु, अथ देशविरतिभाज एव त इति न तेषां तत्प्रतिपत्तिः, तर्हि सर्वविरतिस्तत्कारणं, तथा च तद्वता एकेन यत्कृतं तत्किमखिलैरपी तद्वद्भिराचरणीयमथ तथाविधशक्तियुक्तैरेव ?, यद्याद्यो विकल्पस्तदैकस्मिन् मासषण्मासादिकं तपश्चरन्यैरपि तच्चरणीयं स्याद्, अथ द्वितीयः पक्षस्तर्हि जिनकल्पोऽपि तथाविधशक्तियुक्तैरेव प्रतिपत्तव्यः, अथ तथाविधशक्तिविकलानां तत्पक्षरतां बहुतरदोषसम्भव इति न तच्चरणं, तदिहापि तुल्यं, तथाहि सम्भवत्येवेदानीन्तनयतीनां तथाविधशक्तिसंहननविकलतया हिमकणानुषक्तशीतादिषु बहुतरदोषहेतुकमनगारादिकं तथा तथाविधाच्छादनाभावातः शीतादिखेदितानां शुभध्यानाभावेन सम्यक्त्वादिविचलनम्, उक्तं च वाचकैः -

"शीतवाततपैर्दंशैर्मशकैश्चापि खेदितः ।
ना सम्यक्त्वादिषु ध्यानं, न सम्यक् संविधास्यति ॥"

यच्च 'जिताचेलपरीषहो मुनि' रिति वचनतो न चीवरं धर्मोपकारीति, तत्र जिताचेलपरीषहत्वं चेलाभावनैवाहोश्चिदेषणाशुद्धतत्परिभोगेनापि ?, यदि चेलाभावेनैव, ततः क्षुत्परीषहजयनमप्याहाराभावेनैवेति व्रतग्रहणकाल एवानशनमायातम्, एतच्च भवतोऽपि नाभिमतं, ततः परिशुद्धोपभोगितया जिताचेलपरीषहत्वमिति द्वितीय एव पक्षः, स चास्मत्पथवर्त्येवेति न कुतोऽपि चीवरस्य धर्मानुपकारित्वनिश्चयः, अथ परेषां कषायकारणत्वेन चारित्रबाधकत्वं चीवरस्य, तर्हि धर्मादयोऽपि कस्यचित् कषायकारणं न वा ?, न तावन्न, तेऽपि कस्यचित्कषायहेतव इति चीवरवत्तेऽपि हातव्याः, आह च -

"अत्थि य किं किंचिजए जस्स व कस्स व कसायबीजं तं ।
वत्थुं न होज्ज ? एवं धम्मोऽवि तुमे न घेतव्वो ॥१॥
जेण कसायनिमित्तं जिनोऽवि गोसालसंगमाईणं ।
धम्मो धम्मपरावि य पडिनीयाणं जिनमयं च ॥२॥

अथैषां मुक्त्यङ्गतया कषायहेतुत्वेऽपि न हेयता, तदिहापि समानम्, उक्तं च वाचकसिद्धसेनेन-

"मोक्षाय धर्मसिद्ध्यर्थं, शरीरं धार्यते यथा ।
शरीरधारणार्थं च, भैक्षग्रहणमिष्यते ॥१॥
तथैवोपग्रहार्थाय, पात्रं चीवरमिष्यते ।
जिनैरुपग्रहः साधोरिष्यते न परिग्रहः ॥२॥" इत्यादि,

औदासीन्येनापि न चीवरस्य चारित्रं प्रत्यनिमित्तता, तस्य तदुपकारित्वात्, यच्च यत्रोपकारि न तत्तस्मिन्नुदासीनं, यथा तन्त्वादयः पटे, चारित्रोपकारि च चीवरं, तथाहि-संयमात्मके चारित्रे, न च तस्य तत्परिहरेण शुद्धिरिति, आगमश्च-

"किं सञ्जमोवयारं करेइ वत्थाइ जइ मई सुणसु ।
सीयत्ताणं ताणं जलणतणगयाण सत्ताण ॥१॥
तह निसि चाउक्कालं सज्झायज्झाणसाहणमिसीणं ।
हिममहियावासोसारयाइरक्खाणिमित्तं तु ॥२॥"

इत्यतः स्थितमेतत्-चारित्रनिमित्तं चीवरमिति नासिद्धता हेतोः, विरुद्धत्वानैकान्तिकत्वे तूक्तानुसारतः परिहर्तव्ये । ततश्च-

"निर्ग्रन्थानाममलज्ञानयुतैस्तीर्थकृद्भिरुक्तानि ।
सम्यग्व्रतानि यस्मान्नैर्ग्रन्थ्यमतः प्रशंसन्ति ॥१॥
रागाद्युपचयहेतुं नैर्ग्रन्थ्यं स्वप्रवृत्तितस्तेषाम् ।
तद्वृद्धिरतोऽवश्यं वस्त्रादिपरिग्रहयुतानाम् ॥२॥

इत्यादि दुर्मतिपरिस्पन्दितमपकर्णनीयम् । सम्प्रति 'महल्लेसिद्धारं, तत्र च 'एयं धम्महियं नच्चे'त्यादिसूत्रसूचितं दृष्टान्तमाह-

नि.[९४] वीयभय देवदत्ता गंधारं सावयं पडियरित्ता ।
लहइ सयं गुलियाणं पज्जोएण नी(नाति) ओज्जेनिं ॥

नि.[९५] दट्ठूण चेडिमरणं पभावई पव्वइत्तु कालगया ।
पुक्खरकरणं गहणं दसउरपज्जोयमुयणं च ।

नि.[९६] माया म रुद्दसोमा पिया य नामेन सोमदेवत्ति ।
भाया य फग्गुरक्खिय तोसलिपुत्ता य आयरिया ॥

नि.[९७] सिहगिरि भद्दगुत्ते वयरक्खमणा पढित्तु पुव्वगयं ।
पव्वाविओ य भाया रक्खियखमणेहि जनओ य ॥

वृ. वीतभये देवदत्ता गन्धारं श्रावकं प्रतिजागर्यं लभते शतं गुलिकानां प्रद्योतेनानीतोज्जयिनीं, दृष्ट्वा चेटीमरणं प्रभावती प्रव्रज्या कालगता पुष्करकरणं ग्रहणं दशपुरप्रद्योतमोचनं च, माता च रुद्रसोमा पिता च नाम्ना सोमदेव इति भ्राता च फल्गुरक्षितः तोसलिपुत्राश्चाचार्याः सिंहगिरिभद्रगुप्ताभ्यां च वज्रक्षमणात्पठित्वा पूर्वगतं प्रव्रजितश्च भ्राता रक्षितक्षमणैर्जनकश्चेति गाथाचतुष्टयाक्षरार्थः ॥

भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-जीवसामिपडिमावत्तव्वयं दसपुरुप्पत्तिं च भाणिऊणं ताव भाणियव्वं जाव अज्जवयरसामिनो सयासे नव पुव्वाणि दसमस्स य पुव्वस्स किंचि अहिज्जिऊण अज्जरक्खिया दसपुरमेव गया, तत्थ सव्वो सयणवग्गो पव्वाविओ-माया भाया भगिनी, जो सो तस्स खंतो सोऽवि तेसिं अनुरागेणं तेहिं चेव समं अच्छइ, नो पुण लिंगं गेण्हइ लज्जाए, किह समणातो पव्वइस्सं ?, इत्थं मम भृयातो सुण्हातो णत्तुगोतो, तासिं पुरतो न तरामि नग्गो अच्छिउं, एवं सो तत्थ अच्छइ, बहुसो आयरिया भणंति, ताहे सो भणति-

जइ मम जुवलएणं कुंडियाए छत्तेणं उवहणाहि जन्नोवइएण य समं पव्वावेह तो पव्वयामि, पव्वइतो सो पुण चरणकरणसज्झायं अनुयत्ततेहिं गिण्हाविय्वो, ताहे ते भणंति-अच्छह तुब्भे कट्ठिपट्टएणं, सोऽवि थेरो भणइ-छत्तएणं विना न तरामि अच्छिउं, छत्तयंपि, करगेण विना दुक्खं उच्चारपासवणं वोसिरिउं, बंभसुत्तगंपि अच्छउत्ति, अवसेसं सव्वं परिहरइ।

अन्नया य चेइयाइं वंदिउं गया, आयरिया चेडगरूवाणि गाहेंति, भणह-सव्वे वंदामो एगं छत्तइल्लं मोत्तुं, एवं भणितो, ताहे सो जाणति-इमे मम पुत्ता णत्तुया य वन्दिज्जंति, अहं कीस न वंदिज्जामि ?, ताहे भणति-किमहं अपव्वइओत्ति ?, ताणि भणंति-किं पव्वइयगाणोवाणहकरगबंभसुत्तछत्तगाणि भवंति ?, ताहे सो जाणति-एयाणिंवि ममं पडिच्चोएंति, ता छड्डेमि, ताहे पुत्तं भणति अलाहि पुत्तगा ! छत्तेणं, ताहे ते भणंति-अलाहि, जाहे उण्हं होहिंति ताहे कप्पो उवरिं करेहत्ति, एवं ताणि मोत्तुं करइल्लुं, तत्थ से पुत्तो भणति-मत्तएणं चेव सन्नाभूमिं गम्मइ, एवं जन्नोवइयं च मुयइ,

ताहे आयरिया भणंति-को वा अम्हे न जाणइ जहा बंभणा, एवं ताणि तेन मुक्काणि, पच्छा ताणि पुणो भणंति सव्वे वंदामो मोत्तूण कट्ठिपट्टइल्लं, ताहे सो रुट्ठो भणति-सह अज्जयपज्जएहिं मा वन्दह, अन्ने वंदिहंति ममं, एयं कट्ठिपट्टयं न छड्डेमि, तत्थ य साहू भत्तपच्चक्खायंतो, ताहे तस्स निमित्तं कट्ठिपुट्ठवोसिरणट्ठयाए आयरिया भणंति-एयं महाफलं हवइ जो साधुं, वहइ, तत्थ य पढमपव्वइया सत्तिया तुमे भणिज्जह-अम्हे एयं वहामो, एवं ते उवट्ठिया, तत्थ य आयरिया भणंति-अम्हं सयणवग्गो मा निज्जरं पावउ ?, भो तुब्भे चेव सव्वे भणह अम्हे च्चेव वहामो, ताहे सो थेरो भणति-किं पुत्ता ! एत्थ बहुतरया निज्जरा ?, आयरिया-भणंति-बाढं, किं एत्थ भणियव्वं ?, ताहे सो भणति-तो खाइ खहंपि वहामि, आयरिया भणंति-एत्थ उवसग्गा उप्पज्जंति, चेडरूवाणि लग्गंति, यदि तरसि अहियासेउं, अह नाहियासेसि ताहे अम्हं न सुंदरं ताहे अम्हं न सुंदरं भवति, एवं सो थिरो कओ, जाहे सो उक्खित्तो साहू मग्गओ वच्चइ, पच्छओ संजईओ ठिआतो, ताहे खुड्डगा भणिआ-एत्ताहे कट्ठिपट्टयं मुयह, ताहे सो मुत्तुमारद्धो, ताहे अन्नेहिं भणिओ-मा मोच्चिहि, तत्थ से अन्नेण कट्ठिपट्टओ पुरओ काऊण दोरेण बद्धो, ताहे सो लज्जिओ तं वहइ, मग्गतो मम पिच्छंति सुण्हाओ अ, एवं तेनवि उवसग्गो उट्ठिओत्तिकाऊण चूढं, पच्छा आगतो तहेव, ताहे आयरिया भणंति-किं अज्ज खंता ! इमं ?, ताहे सो भणइ-सो एस अज्ज पुत्त ! उवसग्गो उवट्ठिओ, आनेह साडयं, ताहे भणइ-किं व साडएणंति ?, जं दट्ठवं तं दिट्ठं, चोलपट्टओ चेव मे भवउ, एवं ता सो चोलपट्टंपि गिण्हाविओ। तेन पुव्वं अचेलपरिसहो नाहियासितो पच्छाऽहियासिओत्ति। अचेलस्य चाप्रतिबद्धविहारिणः शीतादिभिरभिभूयमानत्वेनारतिरप्युत्पद्येतातस्तत्परीषहमाह-

सू. (६३) *गामानुगामं रीयंतं, अनगारमकिंचनं।*
अरई अनुप्पविसे, तं तितिक्खे परीसहं॥

वृ. ग्रसते बुद्ध्यादीन् गुणान् इति ग्रामः स च जिगमिषतः अनुग्रामश्च-तन्मार्गानुकूलः अननुकूलगमने प्रयोजनाभावाद् ग्रामानुग्रामं, यद्वा ग्रामश्च महान् अनुग्रामश्च स एव लघुर्ग्रामाणुग्रामम्, अथवा-ग्रामंमिति रूढिशब्दत्वादेकस्मादग्रामादन्यो ग्रामः ततोऽपि चान्यो ग्रामानुग्राम-

मुच्यते, नगरोपलक्षणमेतत्, ततो नगरादीश्च, किमित्याह- 'रीयंत'ति तिङन्तप्रत्ययाद्रीयमाणं-विहरन्तम् 'अणगारम्' उक्तस्वरूपम् 'अकिञ्चनं' नास्य किञ्चन प्रतिबन्धास्पदं धनकनकाद्य-स्तीत्य-किञ्चनो-निष्परिग्रहः, तथाभूतम् 'अरतिः' उक्तरूपा 'अनुप्रविशेत्' मनसि लब्धास्पदा भवेत्, 'त'मित्यरतिस्वरूपं 'तितिक्षेत' सहेत परीषहमिति सूत्रार्थः ॥ तत्सहनोपायमेवाह-

मू. (६४)　　*अरइं पिट्ठओ किच्चा, विरओ आयरक्खए।*
धम्मारामे निरारंभो उवसंते मुणी चरे॥

वृ. 'अरति' संयमविषयां मोहनीयकर्म्मप्रकृतिरूपां पृष्ठतः कृत्वा कोऽर्थः ?, धर्मविघ्नहेतु-रियमितिमत्या तिरस्कृत्य, किमित्याह- 'विरतः' हिंसादिभ्य उपरतः, आत्मा रक्षितः, दुर्गति-हेतोरपध्यानादेरेतेनत्यात्मरक्षितः, आहिताग्न्यादिषु दर्शनात् क्तान्तस्य परनिपातः, आयो वा ज्ञानादिलाभो रक्षितोऽनेनेत्यायरक्षितः धर्म्मे श्रुतधर्मादौ आडित्यभिव्याप्त्या रमते-रतिमान् भवतीति धर्मारामः, यद्वा-धर्म एव सततमानन्दहेतुतया प्रतिपाल्यतया वा आरामो धर्मारामस्तत्र, स्थित इति गम्यते, निर्गत आरम्भाद्-असत्क्रियाप्रवर्त्तनलक्षणणात् निरारम्भः 'उपशान्तः' क्रोधाद्युपशमात् 'मुनिः' सर्वविरतिप्रतिज्ञाता चरेत्, 'पलिओवमं झिज्जइ सागरोवमं, किमंग पुन मज्झ इमं मनोदुहं'ति विचिन्तयन्संयमाध्वनि यायात्, न पुनरुत्पन्नारतिरपि अवधावनानु-प्रेक्षी भवेद्। इह च विरतादिविशेषणानि अरतितिरस्करणफलतया, यद्वा यत एव विरतोऽत एवात्मरक्षित इत्यादिहेतुफलतया नेयानीति सूत्रार्थः ॥

इदानीं तापसद्वारमनुस्मरन् 'अरई अनुप्पवेसे' इत्यादि-सूत्रसूचितमुदाहरणमाह-

नि. [९८]　　अयलपुरे जुवराया सीसो राहस्स नगरीमुज्जेनिं।
अज्जा राहक्खमणा पुरोहिए रायपुत्तो य॥

नि. [९९]　　कोसंबीए सिट्ठी आसी नामेन तावसो तहियं।
मरिऊण सूयरोरग जाओ पुत्तस्स पुत्तोनि॥

वृ. अचलपुरे युवराजः शिष्यो राहस्य नगरीमुज्जयिनीम् आर्या राहक्षमणाः पुरोहितो राजपुत्रश्च कौशाम्ब्यां श्रेष्ठी आसीत्तत्रान्यो तापसः तत्र मृत्वा 'सूयरोरगो' त्ति सुपो लापः शूकर उरगो जातः पुत्रस्य पुत्र इति गाथाद्वयाक्षरार्थः ॥ एतदर्थस्तु सम्प्रदायादवसेयः, स चायम्-

अचलपुरं नाम पतिट्ठाणं, तत्थ जियसत्तू राया, तस्स पुत्तो जुवराया, सो राहायरियाण अंतिए पव्वइओ। सोय अन्नया विहरंतो गतो तगरं नगरिं, तस्स य राहायरियस्स सज्झंतेवासी अज्जरा-हस्खमणा नाम उज्जेनीए विहरंति, तओ आगया साहुणो तगरं, गया रममीवं, ते पुच्छिया-निरुवस्सगंति, भणंती-रायपुत्तो पुरोहियपुत्तो य वाहिंति, तस्स जुवरायपव्वतियगस्स सो रायपुत्तो भतिज्जतो, मा संसारं भमिहितित्ति आपुच्छिऊण आयरिए गओ उज्जेणिं, भिक्खवेलाए उग्गा-हेऊण पट्ठितो, आयरिएहिं भणिओ-अच्छाहि, सो भणइ-न अच्छामि, नवरं दाएह तं पंडनीयघरं, वेज्झगो भणिओ-वच्च दाएहि, तेन दाइयं, सो तत्थ गतो, वीसत्थो पविट्ठो, तत्थ ते दोऽवि अच्छंति.

ते तं पिच्छिऊण उट्ठिया, तेनवि महया सद्देणं धम्मलाभियं, ते भणंति-अहो! लट्ठं पव्वइयगो अम्हंतेन गतो, वंदामोत्ति, भणंति ते आयरिया! तुब्भे गाइउं जाणह ?, तेन भणियं-आमं जाणामो, तुब्भे वाएह, ते आढत्ता, जाव न जाणंति, तेन भण्णइ-एरिसगा चेव तुब्भे कोलियगा,

न किंचि जाणह, ते रुट्ठा उद्धाइया, तेन घेत्तुं तीसे निजुद्धं जाणंतएण सव्वं संभो खोडिया, बद्धमं ताव पिट्ठिया, ते हम्मंता राडिं करेंति, परियणो जाणइ-सो एस पव्वइओ हम्मंतो राडिं करेइ, सोऽवि गतो, पच्छा तेहिं दिट्ठो, नवि जीवंति, नवि मरंति, नवरं निग्गिरंति एक्केक्कं दिट्ठीए, पच्छा रन्नो सिद्धं पुरोहियस्स य-जहा कोऽवि पव्वइयगो, तेन दोऽवि जणा संखलेनूण पुक्का, पच्छा राया सव्वबलेनागतो पव्वइगाए मूले, सोऽवि साहू एक्कपासे अच्छइ परियट्टंतो, राया आयरियाणं पाए पडिओ, पसायमावज्जह, आयरिओ भणइ-अहं न याणामि, महाराय! इत्थ एगो साहू पाहुणो, जइ परं तेन होज्जा, राया तस्स मूलमागतो, पव्वाभिन्नाओ य, ततो तेन साहुणा भणितो-भिरत्थु ते रूवपरिणयस्स, जो तुमं अप्पणो पुत्तमंडाणवि निग्गहं न करेसि, पच्छा राया भणइ-पसायं करेह, भणइ-जइ परं पव्वयंति तो णं मोक्खो, अन्नहा नत्थि, राइणा पुरोहिएण य भण्णइ-एवं होउ, पव्वयंतु, पुच्छिआ भणंति-पव्वयामो, पुव्वं लोओ कतो, पच्छा मुक्का, पव्वइया। सो य रायपुत्तो निस्संकिओ चेव धम्मं करेइ, पुरोहियपुत्तस्स पुण जाइमओ, अम्हे मुंडाए पव्वाविया, एवं ते दोऽवि कालं काऊण देवलोगेसु उववन्ना।

इओअ य कोसंबीए नयरीए तावसो नाम सेट्ठी, सो मरिऊण नियघरे सूयरो जाओ, जातिस्सरो, ततो तस्स चेव दिन्नसगो पुत्तेहिं मारितो, पच्छा तहिं चेव घरे उरगो जाओ, तहिंपि जाइस्सरो जातो, तत्थऽवि अंतो घरे मा म्वाहितिति मारितो, पच्छा पुणोऽपि पुत्तस्स पुत्तो जातो, तत्थवि जाइं सरमाणो चिंतेइ किंहमहं अप्पणो सुण्हं अंबंति वाहरिहामि, पुत्तं वा तायंति, पच्छा मूयत्तणं करेइ, पच्छा महंतीभूओ साहूणं अंतीणो, धम्मो ऽनेन सुतो।

इतो य सो धिज्जाइयदेवो महाविदेहे तित्थयरं पुच्छइ-किमहं सुलहबोहिओ दुल्लभबोहिओत्ति?, ततो सामिणा भणितो-दुल्लभबोहिओऽसि, पुणोऽवि पुच्छइ-कत्थऽहं उववज्जिउकामो?, भगवया भण्णइ-कोसंबीए मूयस्स भाया भविस्ससि, सो य मूओ पव्वइस्सइ, सो देवो भगवंतं वंदिऊण गओ मूयगस्सगामं, तस्स सो बहुयं दव्वजायं दाऊण भणइ-अहं तुज्झ पिउघरे उववज्जिस्सामि, तीसे य दोहलओ अंबएहिं भविस्सइ, अमुगे पव्वए अंबगो सयापुप्फफलो कओ मए, तुमं ताए पुरओ नामगं लिहिज्जासि, जहा-तुब्भं पुत्तो भविस्सइ, जइ तं मम देसि तो ते आनेमि अंबफलाणित्ति, तओ ममं जायं संतं तहा करिज्जासि जहा धम्मं संबुज्झामित्ति, तेन पडिवन्नं गतो देवो।

अन्नया कतिवयदिवसेसु चउऊण तीए गब्भे उववन्नो, अकाले अंबदोहलो जाओ, स मूयगो नामगं लिहति-जइ मम गब्भं देसि ता आनेमि अंबगाणि, ताए भण्णइ-दिज्जासि, तेन आनिआणि अंबफलाणि, अवनीओ दोहलो, कालेन दारगो जाओ, सो तं खुड्डगं चेव होतं साहूण पाएसु पाडेइ, सो धाहातो, करेति, न य वंदति, पच्छा संतपरितंतो मूगो पव्वइतो, सामलं काऊण मतो, तेन ओही पउत्तो, जाव नेण सो दिट्ठो, पच्छा नेन तस्स जलोयरं कयं, जेन न सक्केति उट्ठिउं, सव्वेवेज्जेहिं पच्चक्खातो, सो देवो डोंबरूवं काऊण घोसंतो हिंडइ-अहं वेज्जो सव्वगाही उवसमेमि, सो भणइ-मज्झं पोट्टं सज्जवेहि, तेन भणियं-तुब्भं असज्झो वाही, यदि परं तुमं ममं चेव ओलग्गसि तो ते सिज्झावेमि, सो भणति-वच्चामि, तेन सज्झविओ, गतो तेन सद्धिं, तेन तस्स सत्थकोसगो अल्लविओ, सो ताए देवमायाए अतीव भारितो, जाव पव्वइया एगंमि

पएसे पढंति, विज्जेण भण्णइ-जइ पव्वयसि तो मुयामि, सो तेन भारेण अतीव परिताविज्जंतो चिंतेइ-वरमे पव्वइउं, भणइ- पव्वयामि. पव्वइओ. देवे गतेनाचिरस्स उप्पव्व-इओ, तेन देवेन ओहिणा पिच्छिऊण सो चेव से पुणोऽवि वाही कओ, तेनेव उवाएण पुणोऽवि पव्वाविओ.

एवं एक्कसि दो तिन्नि वारा उप्पव्वइतो, तइया वारए गच्छइ देवोऽवि तेनेव समं, तणभारं गहाय पलित्तयं गामं पविसति, तेन भण्णइ-किं तणभारएण पलित्तं गामं पविससि ?, तेन भण्णइ-कहं तमं कोहमानमायालोभसंपलित्तं गिहिवासं पविसासि ?, तहावि न संबुज्झइ, पच्छा दोऽवि गच्छंति, नवरं देवो अडविए उप्पहेणं संपट्ठितो, तेन भण्णइ-कहं एत्तो तं पंथं मोत्तूण पविससि ?, देवेण भण्णइ-कहं तमं मोक्खपहं मोत्तूणं संसारेऽवि पविससि ?, तहावि न संबुज्झइ, पुणो एगंमि देवकुले वाणमंतरो अच्चंतो हिट्ठाहुत्तो पडइ, सो भणइ- अहो वाणमंतरो ! अधन्नो अपुण्णो य जो उवरिहुत्तो कओ अच्चयओ य हेट्ठाहुत्तो पडइ, तेन देवेन भण्णइ-अहो ! तुमंपि अधन्नो जो उप्पराहुत्तो ठविओ अच्चणिज्जो य ठाणं पुनो पुनो उप्पव्वयसि, तेन भण्णइ-कोऽसि तुमं ?, तेन मूयगरूवं दंसियं, पुव्वभवो से कहितो, तो सो भणइ-को पच्चओ ?, जहाऽहं देवो आसि. पच्छा सो देवो तं गहाय गओ वेयड्ढपव्वयं, सिद्धाययानं कूडं च, तत्थ तेन पुव्वं चेव संगारो कतिल्लओ जहा-यदि अहं न संबुज्झेज्ज तो एयं ममच्चयं कुंडलजुयलं नामयंकियं सिद्धाययनपुक्खरिणीए दरिसिज्जासि, तेन से दंसियं, सो तं कुंडलं सनामकियं पिच्छिऊण जाइस्सरो जातो, संबुद्धो पव्वइतो जाओ, संजमे य से रती जाया, पुव्वं अरती आसि, पच्छा रति जाया। उत्पन्नसंयमारतेश्च स्त्रीभिरुपनिन्द्यमाणस्य तदभिलाष प्रादुः-ष्यादतस्तत्परीषहमाह-

मू. (६५) *संगो एस मनुस्साणं, जाओ लोगंसि इत्थिओ।*
जस्स एया परिन्नाया, सुकडं तस्स सामन्नं॥

वृ. सजन्ति-आसक्तिमनुभवन्ति रागादिवशगा जन्तवोऽत्रेति सङ्गः 'एषः' अनन्तरं वक्ष्यमाणो 'मनुष्याणां' पुरुषाणां, तमेवाह-'या' इत्यविशेषाभिधानं ततो याः काश्चन मानुष्यो देव्यस्तिरश्च्यो वा, 'लोगंसि'त्ति लोके तिर्यग्लोकादौ 'स्त्रियो' नार्यश्च, एताश्च हावभावादिभिः अत्यन्तमासक्तिहेतवो मनुष्याणामित्येवमुक्तम्, अन्यथा हि गीतादिष्वपि सजन्त्येव मनुष्याः, मनुष्योपादानं च तेषामेव मैथुनसंज्ञातिरेकः प्रज्ञापनादौ प्ररूपित इति, अतः किमित्याह-'यस्य' इति यतेः 'एताः' स्त्रियः परीति-सर्वप्रकारं ज्ञाताः परिज्ञाताः, तत्र ज्ञपरिज्ञयेह परत्र च महानर्थ-हेतुतया विदिताः, तथा चागमः-

"विभूसा इत्थिसंसग्गी, पणीयं रसभोयणं।
नरस्सऽत्तगवेसिस्स, विसं तालउडं जहा॥"

प्रत्याख्यानपरिज्ञया च, तत एव च प्रत्याख्याताः, 'सुकडं'ति सुकृतं सुष्ठवनुष्ठितं, पाठान्तरतः-'सुकरं' वा सुखेनैवानुष्ठातुं शक्यं 'तस्स' त्ति सुब्व्यत्ययात्तेन 'सामण्णं'ति श्रामण्यं-व्रतं, किमुक्तं भवति ?- अवद्यहेतुत्यागो हि व्रतं, रागद्वेषावेव च तत्त्वतस्तद्धेतू, उक्तनीतितश्च न स्त्रीभ्यः परं तन्मूलमिति तत्प्रत्याख्यानत एव सुकृतत्वं श्रामण्यस्य, यथोक्तनीतितः स्त्रिय एव दुस्त्यजाः ततस्तत्त्यागे त्यक्तमेवापरमिति तत्प्रत्याख्यानतः सुकृतत्वं श्रामण्यस्योच्यते,

वक्ष्यति हि-

"एए उ संगे समइक्कमित्ता, सुहुत्तगं चेव हवंति मेसा।
जहा महासागरमुत्तरित्ता, नदी भवे अवि गंगासमाणा॥"

इति सूत्रार्थः। अतः किं विधेयमित्याह-

सू. (६६) एवमायाय मेहावी, पंकभूयाउ इत्थीओ।
नो ताहिं विनिहन्निज्जा, चरे अत्तगवेसए॥

वृ. 'एवम्' इत्यनन्तरोक्तेन प्रकारेणात्यन्तासक्तिहेतुत्वलक्षणेन 'आज्ञाय' स्वरूपाभिव्याप्त्या अवगम्य 'मेधावी' अनवधारणशक्तिमान् पङ्कः-कर्दमः तद्भूताः-मुक्तिपथप्रवृत्तानां विबन्धकत्वेन मालिन्यहेतुत्वेन च तदुपमाः, तुरवधारणार्थः, ततः पङ्कभूता एव स्त्रियः, पठ्यते च-'एवमादाय मेहावी जहा एया लहुस्सग'त्ति 'एवम्', अनन्तर एव वक्ष्यमाणमर्थम् 'आदाय' बुद्ध्या गृहीत्वा मेधावी, तमेवाह-'यथे'त्युपदर्शने, 'एताः' स्त्रियः 'लहुस्सग'त्ति तुच्छाशयत्वादिना लघ्व्यः, ततः किमित्याह-'नो' नैव 'ताभिः' 'स्त्रीभिः' 'विनिहन्यात्' विशेषेणसंयमजीवितव्यव्यपरोपणात्मकेनातिशयेन च-सामस्त्यतदुच्छेदरूपेणतिपातयेत्, आत्मानमिति गम्यते, कृत्यमाह-'चरेत्' धर्मानुष्ठानमासेवेत, आत्मानं गवेषयते-कथं मयाऽऽत्मा भवान्निस्तारणीय इत्यन्वेषयते आत्मगवेषकः, 'सिद्धिः स्वरूपापत्ति'रिति वचनात् सिद्धिर्वा आत्मा, ततः कथं ममासौ स्यादित्यन्वेषकः आत्मवगेषको, यद्वा आत्मानमेव गवेषयते इत्यात्मगवेषकः, किमुक्तं भवति ?-चित्रालङ्कारशालिनीरपि स्त्रियोऽवलोक्य तद्दृष्टिन्यासस्य दुष्टतावगमात् झगिति ताभ्यो दृगुपसंहारत आत्माऽन्वेष्टैव भवति, उक्तं हि-

"चित्तभित्तिं न निज्झाए, नारिं वा सुअलंकियं।
भक्खरंपिव दट्ठूणं दिट्ठिं पडिसमाहरे॥"

इति सूत्रार्थः॥ सम्प्रति प्रतिमाद्वारं विवृण्वन् 'यस्यैताः परिज्ञाता' इत्यादिसूत्रसूचितं चैदंयुगीनजनदार्ढ्योत्पादकं दृष्टान्तमाह-

नि.[१००] उसभपुरं रायगिहं पाडलिपुत्तस्स होइ उप्पत्ती।
नंदे सगडाले थूलभद्द सिरिए वररुई य॥

नि.[१०१] तिण्हं अनगाराणं अभिग्गहो आसि चउण्ह मासाणं।
वसहीभित्तनिमित्तं को कहि वुत्थो ? निसामेह॥

नि.[१०२] गणियाघरम्मि इक्को वुत्थो बीओ उ वग्घवसहीए।
सप्पवसहीइ तइओ को दुक्करकारओ इत्थं ?॥

नि.[१०३] वग्घो वा सप्पो वा सरीरपीडाकारा उ भइयव्वा।
नाणं व दंसणं वा चरित्तं(यं) व न पच्चला भित्तुं॥

नि.[१०४] भयवंपि थूलभद्दो तिक्खे चंकम्मिओ न उण छिन्नो।
अग्गिसिहाए वुत्थो चाउम्मासे न उण दड्ढो॥

नि.[१०५] अन्नोऽवि य अनगारो भणमाणोऽहंपि थूलभद्दसमो।
कंबलओ चंदनयाइ मइलिओ एगराईए॥

वृ- वृषभपुरं राजगृहं पाटलिपुत्रस्य भवत्युत्पत्तिः, नन्दः शकडालः स्थूलभद्रः सिरियको वररुचिश्च, त्रयाणामनाराधकानां अभिग्रह आगतः 'चउण्हं मासाणं' मुख्यत्वयाच्चतुर्षु मासेषु वसतिमात्रनिमित्तं, कः कुत्रोषितः ?, निशामयत-गणिकागृह एको, द्वितीय उषितस्तु व्याघ्रव सतौ, सर्पवसतौ तृतीयः, को दुष्करकारकोऽत्र ?, तेषु मध्ये व्याघ्रो वा सर्पो वा शरीरपीडाकरौ तु भक्तव्यौ, ज्ञानं वा दर्शनं वा चारित्रं वा न प्रत्यलौ भेत्तुं, भगवानपि स्थूलभद्रः तीक्ष्णे-निशितासिधारादौ चंक्रमितो न पुनश्छिन्नः, अग्निशिखायामुषितश्चातुर्मास्यां न पुनर्दग्धः, अन्योऽपि चानगारो भणनहमपि स्थूलभद्रसमः कम्बलशब्दनिकायाम्- उच्चाभूमौ मलिनित इति गाथाषट्कार्थः ॥ एतदर्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-

पुव्विं खिइप्पइट्ठियं नाम नयरं, तत्थ वत्थुंमि खीणे चणगपुरं निविट्ठं, ततो उसहपुरं, ततो रायगिहं, ततो चंपा, ततो पाडलिपुत्तं इच्चाइ भाणियव्वं जाव सगडाले पंचत्तमुवगते नंदेन सिरितो भणितो कुमारामच्चत्तणं पडिवज्जाहि, सो भणइ-मम भाया जेट्ठो थूलभद्दो वारसमं वरिसं गणियाघरं पविट्ठस्स, सो सद्दाविओ भणइ-चिंतेमि, राया भणइ-असोगवणियाए चिंतेहि, सो तत्थ अतिगतो चिंतेति-केरिसं भोगकज्जं वक्खित्तचाणं ?, पुनरवि नगरं जातियव्वं होहिंति, एए नाम परिनामदुस्सहा भोगत्ति पंचमुट्ठियं लोयं काऊण पाऊयं कंबलरयणं छिंदित्ता रओहरणं काउं रन्नो मूलं गतो, एयं चिंतिय, राया भणइ-सुचिंतं, विनिग्गतो, राया चिंतेइ-पिच्छामि किं कवडत्तनेण गणियाघरं पविस्सइ न वत्ति ? पासायतलगओ पेच्छइ, नवरं मयगकलेवरस्स जनो ओसरइ, मुहाणि य ठवए, सो मज्झेण गतो, राया भणइ-निव्विण्णकामभोगो भगवंति सिरिओ ठाविओ । सो संभूयगविजयस्स मूले पव्वतितो, थूलभद्दसामीवि संभूयविजयाणं मूले घोरागारं तवं करेइ, विहरंता पाडलिपुत्तं आगया, तिण्णि अनगारा अभिग्गहे गिण्हंति-एक्को सीहगुहाए, तु पेहंतओ सीहो उवसंतो, अन्नो सप्पगुहाए, सोऽवि दिट्ठीविसो उवसंतो, थूलभद्दो कोसाघरे, सा तुट्ठा, परीसहपराजिओ आगओत्ति, भणइ-किं करेमि ?, उज्जाणघरे ठाणं देहि, दिन्नं, रत्तिं सव्वालङ्कारविभूसिया आगया, चाडुयं पकया, सो मंदरोपमो अकंपो, ताहे सब्भावेण पडिसुणेइ, धम्मो कहितो, साविगा जाया, भणति-जति रायवसेणं अन्नेणं समं वसेज्जा, इयरहा बंभचारिणीवयं गिण्हति ।

ताहे सीहगुहाओ आगओ चत्तारि मासे उववासं काऊणं, आइरिएहिं ईसत्ति अब्भुट्ठिओ, भणिओ य-सागयं दुक्करकारगस्सत्ति, एवं सप्पईत्तोऽवि, थूलभद्दसामी तत्थेव गणियाघरे भिक्खं गिण्हइ, सोऽवि चउमासेसु पुन्नेसु आगतो, आयरिया संभमेण उट्ठिया, भणिओ य-सागयं ते अइदुक्करदुक्करकारगस्सत्ति, ते भणंति दोण्णिवि-पेच्छह आयरिया रागं वहति अमच्चपुत्तोत्ति, वितियए वरिसारत्ते सिंहगुहाखमनो भणति-गणियाघरं वच्चामित्ति अभिग्गहं गिण्हइ, आयरिया उवउत्ता, नारिओ, अप्पडिसुणंतो गतो, वसही मग्गिया, दिण्णा, सा सब्भावेण ओरालियसरीरा विभूसिया अविभूसियआ वा, सुणति धम्मं, सो तीसे सरीरे अज्झोववन्नो, ओभासइ, सा न इच्छति, भणति-जति नवरि किंचि देसि, किं देमि ?, सयसहस्सं, सो मग्गिउमारद्धो, नेवाल-विसये सावतो, जो तहिं जाइ तस्स सयसहस्समुल्लं कंबलं देइ, तहिं गतो, तेन दिन्नं सङ्घरायाणएणत्ति, एगत्थ चोरेहिं पंथो बद्धो, सउणो वासति-सयसहस्संति, चोरसेनावई जाणइ,

नवरि संजयं पेच्छइ, वोलीणो, पुणो वासति-सयहसहस्सं गतं, तेन सेनावइणा गंतूण पलोइओ, सब्भावं पुच्छिओ भणति-अत्थि कंबलो, गणिकाए नेमि, मुक्को गतो, तीसे दिन्नो, ताए चंदनिकाए छूढो, सो भणइ मा विनासेहि, सा भणइ तुमंपि एरिसओ चेव होहिसि, उवसामेति लद्धवुद्धी, इच्छामि अनुसट्ठिं. गतो, पुणो आलोएत्ता विहरइ।

आयरिएणं भणिओ-एवं दुक्करदुक्करकारओ थूलभद्दो पुव्विं खरीका(दुअक्खरिया)इच्छइ, इदानीं सट्ठी जाया, अदिट्ठदोसा तुमे पत्थियसि उवालद्धो, एवं चेव विहरंति। सा गणिका गहियस्स रन्ना दिन्ना, तं अक्खाणं जहा नमोक्कारे। जहा थूलभद्देणित्थीपरीसहो अहियासितो तहा अहियासिग्गव्वो, न उ जहा तेन नो अहियासितोत्ति। अथ चैकत्र वसतस्तथा स्त्रीजनसंसर्गतो मन्दसत्त्वस्य भवति अतो नैकस्थेन भाव्यं, किन्तु चर्यापरीषहः सोढव्य इति तमाह-

मू.(६७) एग एव चरे लाढे, अभिभूय परीसहे।
गामे वा नगरे वावि, निगमे वा रायहानीए॥

वृ. 'एक एवे'ति रागद्वेषविरहितः 'चरेत्' अप्रतिबद्धविहारेण विहरेत्, सहायवैकल्यतो वैकस्तथाविधगीतार्थो, यथोक्तम्-

"न या लभिज्जा निउणं सहायं, गुणाहियं वा गुणतो समं वा।
एक्कोऽपि पावाइं विवज्जयंतो, विहरेज्ज कामेसु असज्जमाणो॥"

'लाढे'त्ति लाढयति प्रासुकैषणीयाहारेण साधुगुणैर्वाऽऽत्मानं यापयतीति लाढः, प्रशंसाभिधायि वा देशीपदमेतत्, पठ्यते च-'एग एगे चरे लाढं'ति तत्र चैकः-असहायः प्रतिमाप्रतिपन्नादिः स चैको रागादिवैकल्याद् 'अभिभूय' निर्जित्य 'परिषहान्' क्षुदादीन्, क्व पुनश्चरेदित्याह-'ग्रामे' चोक्तरूपे 'नगरे वा' करविरहितसन्निवेशे 'अपिः' पूरणे 'निगमे वा' वणिग्निवासे 'राजधान्यां' वा प्रसिद्धायाम्, उभयत्र वाशब्दानुवृत्तेः, मडम्बाद्युपलक्षणं चैतद्, आग्रहाभावं चानेनाहेति सूत्रार्थः॥ पुनः प्रस्तुतमेवाह-

मू.(६८) असमाणो चरे भिक्खू, नेव कुज्जा परिग्गहं।
असंसत्तो गिहत्थेहिं अनिकेओ परिव्वए॥

वृ. न विद्यते समानोऽस्य गृहिण्याश्रयामूर्च्छितत्वेन अन्यतीर्थकेषु वाऽनियतविहारादिनेत्यसमानः-असदृशो, यद्वा समानः-साहङ्कारो न तथेत्यसमानः, अथवा '(अ)समाणो'त्ति प्राकृतत्वादसन्निवासन्, यत्रास्ते तत्राप्यसंनिहित एवेति हृदयं, सन्निहितो हि सर्वः स्वाश्रयस्योदन्तमावहति अयं तु न तथेत्येवंविधः सन् 'चरेत्' अप्रतिबद्धविहारतया विहरेत्, 'भिक्षुः' यतिः, कथमेतत् स्यादित्याह-नैव कुर्यात् 'परिग्रहं' ग्रामादिषु ममत्वबुद्ध्यात्मकम्, अत्राह च-"गामे कुले वा नगरे व देसे, ममत्तभावं न कहिंचि कुज्जा", इदमपि यथा स्यात्तथाह-'असंसक्तः' असम्बद्धो 'गृहस्थैः' गृहिभिः 'अनिकतः' अविद्यमानगृहो, नैकत्र बद्धास्पदः, 'परिव्रजेत्' सर्वतो विहरेत्, न (ना) नियतदेशादौ गृहिसम्पर्कः, एकत्र बद्धास्पदत्वे नियतदेशादिविहारितायां वा स्यादपि ममत्वबुद्धिः, तदभावे तु निरवकाशैवेयमिति भाव इति सूत्रार्थः॥ अत्र च शिष्यद्वारमनुसरन् 'असमानो चरे' इत्यादि-सूत्रसूचितमुदाहरणमाह-

नि.[१०६] कोल्लयरं वत्थव्वो दत्तो सीसो अ हिंडओ तस्स।

उवहरइ धाईपिंडं अंगुलिजलणा य सादिव्वं ॥

वृ. 'कोल्लयरे' कुल्लयरनाम्नि नगरे वास्तव्यः, आचार्य इति शेषः, दत्तः शिष्यश्च हिण्डकः तस्य उपहरति धात्रीपिण्डमंगुलिज्वलनाच्च सादेव्यमिति गाथाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्- कोल्लयरे नगरे वत्थव्वा सङ्गमथेरा आयरिया, दुब्भिक्खे तेहिं संजया विसज्जिया, तं नगरं नवभागे काऊण जंघाबलपरिहीणा विहरन्ति, नगरदेवया य तेसिं किर उवसंता, तेसिं सीसो दत्तो नामं आहिंडितो, चिरेण कालेणं उदंतवाहतो आगतो, सो तेसिं पडिस्सयं न पविट्ठो नियया वासति, भिक्खवेलाए उवग्गाहियं हिंडंताणं संकिलिस्सति, कुंढो सड्ढकुलाइं न दावेइत्ति, तेहिं णायं, एगत्थ सिद्धिकुले रेवतियाए गहियतो दारतो, छम्मासा रोवंतस्स, आइरिएहिं चप्पुडिया कया, मा रोवति, वाणमंतरीए मुक्को.

तेहिं तुट्ठेहिं पडिलाहिया जहिच्छिएणं, सो विसज्जितो, एयाणि कुलाणीति, आयरिया सुचिरं हिंडिऊण अंतपंतं गहाय आगया, समुद्दिट्ठा, आवस्सए आलोयणाए आलोएहि, भणति- तुब्भेहिं सभं हिंडिओ मि, धाईपिंडो ते भुत्तो, भणति- अह सुहमाइं पिच्छह त्ति पदुट्ठो, देवयाए अड्ढरत्ते वासं अंधकारो य विगुव्वितो, एसो हीलेइत्ति, आयरिएहिं भणिओ- अतीहित्ति, सो भणइ- अंधकारोत्ति, आयरिएहिं अंगुली दाइया, सा पज्जलिया, आउट्टो आलोएइ, आयरियावि से नवभागे कहेंति। ततश्च यथा महात्मभिरमीभिः सङ्गमस्थविरैश्चर्यापरीषहोऽध्यासितः तथान्यैरपि अध्यासितव्य इति ॥ यथा चायं ग्रामादिष्वप्रतिबद्धेनाभिसह्यते एवं नैषेधिकीपरीषहोऽपि शरीरादिष्वप्रतिबद्धेनाधिसहनीय इति तमाह-

मू. (६९) *सुसाणे सुन्नगारे वा, रुक्खमूले व एगओ।*
अकुक्कुए निसीएज्जा, न य वित्तासए परं ॥

वृ. शवानां शयनमस्मिन्निति श्मशानं तस्मिन्- पितृवने, शून्यो हितमिति वाक्ये 'उगवादिभ्यो यदि'त्यत्र 'शुनः संप्रसारणं वा दीर्घत्व'मिति वचनतो यति संप्रसारणे दीर्घत्वे च शून्यम्- उद्वसं तच्च तत् अगारं च शून्यागारं तस्मिन्वा, वृक्ष्यत इति वृक्षः तस्य मूलं- अधोभूभागो वृक्षमूलं तस्मिन्वा, 'एकः' उक्तरूपः स एवैककः, एको वा प्रतिमाप्रतिपत्त्यादौ गच्छतीत्येकगः, एकं वा कर्म्मसाहित्यविगमतो मोक्षं गच्छति- ततप्राप्तियोग्यानुष्ठानप्रवृत्तेर्यातीत्येकगः, 'अकुक्कुचः' अशिष्टचेष्टारहितो 'निषीदेत्' तिष्ठेत्, 'न च' नैव वित्रासयेत् 'परम्' अन्यं, किमुक्तं भवति ?-

'पडिमं पडिवज्जया मसाणे, नो भायए भयभेरवाइं दिस्स।
विविहगुणतवोरए य निच्चं, न सरीरं चाभिकंखए सभिक्खू ॥'

इत्यागममनुस्मरन् श्मशानादावप्येककोऽप्यनेकभयानकोपलम्भेऽपि न स्वयं संबिभीयात्, न च विकृतस्वरमुखविकारादिभिरन्येषां भयमुत्पादयेत्, यद्वा 'अकुक्कुए' त्ति अकुत्कुचः कुत्स्यादिविरूपनाभयात्कर्मबन्धहेतुत्वेन कुत्सितं हस्तपादादिभिरस्पन्दमानो निषीदेत्, न च 'वित्रासयेत्' विक्षोभयेत् 'परम्' उन्दुरादि, मा भूदसंयम इति सूत्रार्थः ॥

तत्र च तिष्ठतः कदाचिदुपसर्गोत्पत्तौ यत् कृत्यं तदाह-

मू. (७०) *तत्थ से चिट्ठमाणस्स, उवसग्गेऽभिधारए।*

संकाभीओ न गच्छेज्जा, उड्ढिया अन्नमासणं ॥

वृ. 'तत्र' इति श्मशानादौ 'से' तस्य तिष्ठतः, पठ्यते च 'अच्छमाणस्स' त्ति आसीनस्य उप -सामीप्येन सृज्यन्ते तिर्यग्मनुष्यामरैः कर्मवशगैरात्माना क्रियन्त इत्युपसर्गाः ते 'अभिधारयेयुः' अनभिविनेयार्थत्वादभिधारयेयुरिव, कोऽर्थः ?, उत्कटतयाऽत्यन्तोत्सिक्तरिपुवत् आभिमुख्यीकुर्युरिव, यथैते सज्जा वयं तत् प्रगुणीभूयाभिमुखैः स्थैर्यमिति, वद्वा सोपस्कारत्वात् सूत्रानामुपसर्गाः सम्भवेयुः ततस्तानभिधारयेत्- किमेते ममाचलितचेतसः कर्तुमलमिति चिन्तयेत्, पठ्यते च 'उवसग्गभयं भवे' इति सुगमं, 'शङ्कामीत इति' तत्कृतापकारशङ्कातो भीतः -त्रस्तो 'न गच्छेत्' न यायादुत्थाय, कोऽर्थः ?, तत् स्थानमपहाय अन्यदपरं आश्रयते अस्मिन्निति आसनं -स्थानमिति सूत्रार्थः ॥ अग्निद्वारमधुना, तत्र च 'शङ्काभीतो न गच्छेज्ज' त्ति सूत्रावयवमर्थतः, स्पृशन् उदाहरणमाह-

नि.[१०७] निक्खंतो गयउराओ कुरुदत्तसुओ गओ य साकेयं ।
पडिमाट्ठियस्स कुडिआ आगया अग्गि जालिंति ॥

वृ. 'निष्क्रान्तः' प्रव्रजितो गजपुरात् कुरुदत्तसुतो गतश्च साकेतं प्रतिमास्थितस्य 'कुडिय' त्ति हलावेषका (आगता) अग्निं शिरसि ज्वलार्यन्त इति गाथाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-

हत्थिणाउरे नयरे कुरुदत्तसुतो नाम इब्भपुत्तो तेहारुवाणं थेराणमंतिए पव्वतितो, सो कयाइ एगल्लविहारपडिमं पडिवन्नो, साएयस्स नयरस्स अदूरसामंते चरिमा ओगाढा, तत्थेव पडिमं ठिओ चच्चरे, तओ एगाता गामातो गाविती हिरियाती, तेन ओगासेण नीयाती, जाव मग्गमाणा कुडिया आगया, जाव साहू दिट्ठो, तत्थ दुवे पंथा, पच्छा ते न जाणंति- कयरेण मग्गेण नीयाती ?, ते साहुं पुच्छंति- कयरेण मग्गेण नीयाओ ?, ताहे सो भगवं न वाहरति, तेहिं रुट्ठेहिं न वाहरंतिकाऊण सीसे पट्टियाए पालिं बंधिऊण चियागतं अंगारं घेत्तूण सीसे छूढा, गया य, सो भगवं सम्मं सहइ। तेन स यथा सम्यक् सोढो नैषेधिकीपरीषहः तथाऽन्यैरपि साधुभिः सहनीय इति ॥ नैषेधिकीतश्च स्वाध्यायादि कृत्वा शय्यां प्रति निवर्तेतातस्तत्परीषहमाह-

मू.(७१) उच्चावयाहिं सिज्जाहिं, तवस्सी थामवं ।
नाइवेलं विहन्निज्जा, पावदिट्ठी विहन्नइ ॥

वृ. ऊर्द्ध चिता उच्चा, उपलिप्ततलाद्युपलक्षणमेतत्, यद्वा शीतातपनिवारकत्वादिगुणैः शय्यान्तरोपरिस्थितत्वेनोच्चाः तद्विपरीतास्त्वनुच्चाः, अनयोर्द्वन्द्वः उच्चावचाः, नानाप्रकारा वोच्चावचास्ताभिः, 'शय्याभिः' वसतिभिः, 'तपस्वी' प्रशस्यतपोऽन्वितो, भिक्षुः प्राग्वत्, 'स्थामवान्' शीतातपादिसहने प्रति सामर्थ्यवान्, 'नातिवेलं' स्वाध्यायादिवेलातिक्रमेण 'विहन्यात्' हनेर्गतावपि वृत्तेरत्राहं शीतादिभिरभिभूत इति स्थानान्तरं गच्छेत्, यद्वा 'अतिवेलाम्' अन्यसमयातिशायिनीं मर्यादां -समतारूपामुच्चां शय्यामवाप्याहो ! सभाग्योऽहं यस्येदृशी सकलदुःखोत्पादिनी मम शय्येति अवचावासौ वा अहो । मम मन्दभाग्यता येन शय्यामपि शीतादिनिवारिकां न लभे इति हर्षविषादादिना 'न विहन्यात्' नोल्लङ्घयेत्, किमित्येवमुपदिश्यत

इत्याह-'पावदिट्ठी विहन्नइ'त्ति प्राग्वदिति सूत्रार्थः ॥ किं पुनः कुर्यादित्याह

मू.(७२) *पइरिक्कमुवस्सयं लद्धुं, कल्लाणं अदुव पावगं ।*
किमेगरायं करिस्सइ ?, एवं तत्थऽहियासए ॥

वृ. 'पइरिक्के' स्त्र्यादिविरहितत्वेन विविक्तमव्याबाधं वा 'उपाश्रयं' वसतिं 'लब्ध्वा' प्राप्य 'कल्याणं' शोभनम् 'अदुव'त्ति अथवा 'पापं' पांशुत्करकीर्णत्वादिभिरशोभनं, किं ?, न किञ्चित्, सुखं दुःखं चेति गम्यते, एकरात्रिवचनं तदेकरात्रं 'करिष्यति' विवासयतीति, कल्याणः पापको वोपाश्रय इति प्रक्रमः, कोऽभिप्रायः ?-केचित् पुरोपचितसुकृता विविधमाणिक्किरणोद्योतितासु महाधनसमृद्धासु महाराजतरजतोपचितभित्तिषु मणिनिर्मितोरुस्तम्भासु तदितरे तु जीर्णविशीर्णभग्नकटकस्थूणापटलसंवृतद्वारासु तृणकचवरतुषपुञ्जकोत्करपांशुबुसभस्मविण्मूत्रावसङ्कीर्णासु श्वनकुलमार्जारमूत्रप्रसेकदुर्गन्धिष्वाजन्म वसतिषु वसन्ति, मम त्वद्यैवेयमीदृशी श्वोऽन्या भविष्यतीति किमत्र हर्षेण विषादेन वा ?, मया हि धर्मनिर्वाहाय विविक्तत्वमेवाश्रयस्यान्वेष्यं, किमपरेण ?, 'एवमि' त्यमुना प्रकारेण 'तत्रे' ति कल्याणे पापके वाऽऽश्रये 'अध्यासीत' सुखं दुःखं वाऽधिसहेत, प्रतिमाकल्पिकापेक्षं चैकरात्रमिति, स्थविरकल्पिकापेक्षया तु कतिपया रात्रयः, दिवसोपलक्षणं च रात्रिग्रहणमिति सूत्रार्थः ॥ अत्र निर्वेदद्वारम्, इह च 'अदुव पावगं' ति सूत्रावयवमर्थतः स्पृशन् उदाहरणमाह निर्युक्तिकारः-

नि.[१०८] *कोसंबी जन्नदत्तो सोमदत्तो य सोमदेवो य ।*
आयरिय सोमभूई दुण्हंपि य होइ नायव्वं ॥

नि.[१०९] *सन्नाइगमण वियडंवेरग्गा दोवि ते नईतीरे ।*
पाओवगया नईपूरएण उदहिं तु उवनीया ॥

वृ. कौशाम्बी यज्ञदत्तः सोमदत्तश्च सोमदेवश्च आचार्यः सोमभूतिर्द्वयोरपि च भवति ज्ञातव्यः, स्वज्ञातिगमनं विकटवैराग्यात् द्वावपि तौ नदीतीरे पादपोपगतौ नदीपूरकेणोदधिं तूपनीतौ इति गाथाद्वयाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम् -

कोसंबीए नयरीए जन्नदत्तो धिज्जाइओ, तस्स दो पुत्ता, सोमदत्तो सोमदेवो य, ते दोऽवि निव्विण्णकामभोगा पव्वतिया सोमभूई अणगारस्स अंतिए, बहुस्सुया बहुआगमा य जाया, ते अन्नया य सन्नायपल्लिमागया, तेसिं मायापियरो उज्जेणिं गतेल्लिया, तहिं च विसए धिज्जाइणो वियडं आवियंति, तेहिं तेसिं वियडं अन्नेण दव्वेण मेलेऊण दिन्नं, केऽवि भणंति-वियडं चेव अयाणंताण दिन्नं, तेहिवि य तं विसेसं अयाणमाणेहिं पीयं, पच्छा वियडत्ता जाया, ते चिंतेंति-अम्हेहिं अंजुत्तं कयं, पमाओ एस, वरं भत्तं पच्चक्खायंति ते एगाए नदीए तीरे तीसे कट्ठाणं उवरिं पाओवगया, तत्थ अकाले वरिसं जायं, पूरो य आगतो, हरिया, वुज्झमाणा य उदएण समुद्दं नीया। तेहिं समं अहियासियं, अहाउयं पालियं, सेज्जापरीसहो अहियासतो समविसमाहिं सेज्जाहिं। एवं एसो अहियासियव्वोत्ति। शय्यास्थितस्य तदुपद्रवेऽप्युदासीनस्य तथाविधशय्यातरोऽन्यो वा कश्चिदाक्रोशेदतस्तत्परीषहमाह-

मू.(७३) *अक्कोसेज्ज परो भिक्खुं, न तेसिं पइ संजले ।*
सरिसो होइ बालाणं, तम्हा भिक्खू न संजले ॥

वृ. 'अक्कोसेज्ज' त्ति आक्रोशेत्-तिरस्कुर्यात् 'परः' अन्यो धर्मापेक्षया धर्मबाह्य आत्मव्य तिरिक्तो वा 'भिक्षुं' यतिं, यथा धिग्मुण्ड ! किमिह त्वमागतोऽसीति ?, 'न तेसिं' ति सुपो वचनस्य च व्यत्ययान्न तस्मै 'प्रतिसज्ज्वलेत्' निर्यातनं प्रतिगृह्णीयात्प्रत्याक्रोशदानतः सज्ज्वलेत्, तन्निर्यातनार्थं देहदाहलौहित्यप्रत्याक्रोशाभिघातादिभिरग्निवन्न दीप्येत, सज्ज्वलनकोपमपि न कुर्यादिति सज्ज्वलेदित्युपादानं, किमेवमुपदिश्यत इत्याह-'सदृशः' समानो भवति, सज्ज्वलन्निति प्रक्रमः, केषां ! 'बालानाम्' अज्ञानां, तथाविधक्षपकवत्, यथा-कश्चित् क्षपको देवतया गुणैश्चर्जितया सततमभिवन्द्यते, उच्यते च-मम कार्यमावेदनीयम्, अन्यदैकेन धिग्जातिना सह योद्धुमारब्धः, तेन च बलवता क्षुत्क्षामशरीरो भुवि पातितः ताडितश्च, रात्रौ देवता वन्दितुमायाता, क्षपकस्तूष्णीमास्ते, ततश्चासौ देवतयाऽभिहितो-भगवन्! किं मयाऽपराद्धं ?, स प्राह-न तस्य त्वया दुरात्मनो ममापकारिणः किञ्चित्कृतं, सा चावादीत्-मया विशेषः को ऽप्युपलब्धो यथाऽयं श्रवणोऽयं च धिग्जातिरिति, यतः कोपाविष्टौ द्वावपि समानौ सम्पन्नाविति, ततः सति प्रेरणेति प्रतिपन्नं क्षपकेणेति। उक्तमेवार्थं निगमयितुमाह-'तम्हा'त्ति यस्मात्सदृशो भवति बालानां तस्मादिभक्षुर्न सज्ज्वलेदिति सूत्रार्थः ॥ कृत्यापदेशमाह-

मू. (७४) *सोच्चा ण फरुसा भासा, दारुणा गामकंटए।*
तुसिणीओ उवेक्खेज्जा, न ताओ मणसी करे॥

वृ. 'श्रुत्वा' आकर्ण्य, णमिति वाक्यालङ्कारे 'परुषाः' कर्कशाः 'भाषा' गिरो दारयन्ति नन्दसत्त्वानां संयमविषयां धृतिमिति दारुणाः ताः, ग्रामः-इन्द्रियग्रामस्तस्य कण्टका इव ग्रामकण्टकाः-प्रतिकूलशब्दादयः, कण्टकत्वं चैषां दुःखोत्पादकत्वेन मुक्तिमार्गप्रवृत्तिविघ्नहेतुतया च, तदेकदेशत्वेन परुषभाषा अपि तथोक्ताः, भाषाविशेषणत्वेऽपि चात्राविष्टलिङ्गत्वात्पुंल्लिङ्गता, 'तूष्णीकः' तूष्णीशीलो न कोपात् प्रतिपरुषभाषी, एवंविधश्च 'जो सहइ हु गामकंटए अक्कोसपहारतज्जणाओ य'त्ति इत्यागमं परिभावयन् 'उपेक्षेत' अवधीरयेत्, प्रक्रमात्परुषभाषा एव, कथमित्याह-न ता मनसि कुर्यात्, तद्भाषिणि द्वेषाकरणेनेति भाव इति सूत्रार्थः ॥ इदानीं मुद्गरद्वारं व्याचिख्यासुः 'सुच्चा ण'न्ति सूत्रसूचितमुदाहरणमाह-

नि.[११०] रायगिहि मालगारो अज्जुणओ तस्स भज्ज खंदसिरी।
मुग्गरपाणी गोट्ठी सुदंसणो वंदओ नीइ॥

वृ. राजगृहे मालाकारोऽर्जुनकस्तस्य भार्या स्कन्दश्रीः मुद्गरपाणिर्यक्षो गोष्ठी सुदर्शनो वन्दको 'निरेति' वन्दनार्थं निर्गच्छतीति गाथाक्षरार्थः ॥ भावार्थस्तु सम्प्रदायादवगम्यः, स चायम्-रायगिहे नयरे अज्जुनगो नाम मालागारो परिवसति, तस्स भज्जा खंदसिरी नामा, तस्स रायगिहस्स नयरस्स बहिया मोग्गरपाणी नाम जक्खे अज्जुनगस्स कुलदेवयं, तस्स मालागारस्स आरामस्स पन्थे चेव जक्खो। अन्नया खंदसिरि भत्तं तस्स भत्तारस्स नेउं गया, अग्गाइं पुप्फाइं घेत्तुं घरं गच्छति, मोग्गरपाणिघरए य ट्ठियाए दुल्लहियाए गोट्ठीएहिं छहिं जणेहिं दिट्ठा, ते भणंति-एसा अज्जुनमालागारस्स भज्जा ऽपहिरूवा, गिण्हामो णं, तेहिं सा गहिया, छवि जना तस्स जक्खस्स पुरतो भोगे भुंजंति, सोऽवि मालागारो निच्चकालमेव अग्गेहिं वरेहिं पुप्फेहिं जक्खं अच्चेइ, अच्चिउकामो ततो आगच्छइ, ताए ते भणिया-एसो मालागारो आगच्छति तो तुब्भे

भए किं विसज्जेहिह ?, तेहिं नायं-एयाए पियं, तेहिं भणियं-मालागारं बंधामो, तेहिं सो बद्धो अवहोडेण, जक्खस्स पुरतो बंधिऊण पुरतो चेव से भारियं भुंजंति,

सा य तस्स भत्तारस्स मोहुप्पाइयाइं इत्थिसहाइं करेइ, पच्छा सो मालागारो चिंतेति-एवं अहं जक्खं निच्चकालमेव अग्गेहिं वरेहिं पुप्फेहिं अच्चेमि, तहावि अहं एयस्स पुरतो चेव एवं कीरामि, जइ एत्थ कोइ जक्खो होंतो तो अहं न कीरतो, एवं सुव्वत्तं एयं कट्ठं नत्थि एत्थ कोइ मोग्गरपाणी जक्खो, ताहे सो जक्खो अनुकंपंतो मालागारस्स सरीरमनुपविट्ठो, तडतडस्स बंधे छेत्तूण लोहमयं पलसहस्सनिप्फन्नं मोग्गरं गहाय अण्णाइट्ठो समाणो ते छप्पि इत्थिसत्तमे पुरिसे घाएति, एवं दिने छइत्थिसत्तमे पुरिसे घाएमाणे विहरइ, जनवतोऽवि रायगिहातो नगरातो न ताव निग्गच्छइ जाव सत्त घातियाइं।

तेणं कालेणं तेणं समएणं भगवं महावीरे समोसरिए, जाव सुदंसनो सेट्ठी वंदतो नोइ, अज्जुनएण दिट्ठो, सागारपडिमं ठिओ, न तरइ अक्कमिउं, परिपेरंतेहिं भमित्ता परिसंतो, अज्जुनतो सुदंसणं अनिमिसाए दिट्ठीए अवलोएइ, जक्खोऽवि मोग्गरं गहाय णेऽ।ऽ, पंडितो जाणुगतो, उट्ठिओ य तं पुच्छइ-कहिं गच्छसि ?, भणइ- मामिं वंदिउं, सोऽवि गतो, धम्मं सोच्चा पव्वतितो। रायगिहे भिक्खं हिंडंतो सयणमारगोत्ति लोएणं अक्कोसिज्जइ नानापगारेहिं अक्कोसेहिं, सो सम्मं सहइ, सहंतस्स केवलनाणं समुप्पन्नं ॥ एवमन्यैरपि साधुभिः आक्रोशपरीषहः सोढव्यः ॥ कश्चिदाक्रोशमात्रेणातुष्यन्नधमाधमो वधमपि विदध्यादिति वधपरीषहमाह-

मू. (७५) *हओ न संजले भिक्खू, मनंपि नो पउस्सए।*
तितिक्खं परमं नच्चा, भिक्खुधम्मंमि चिंतए ॥

वृ. 'हतः' यष्ट्यादिभिः ताडितो 'न सञ्ज्वलेत्' कायतः कम्पनप्रत्याहननादिना वचनतश्च प्रत्याक्रोशदानादिना भृशं ज्वलन्तमिवात्मानं नोपदर्शयेत्, भिक्षुः 'मनः' चित्तं तदपि 'न प्रदूषयेत्' न कोपतो विकृतं कुर्वीत, किन्तु 'तितिक्षा' क्षमां

'धर्मस्य दया मूलं न चाक्षमावान् दयां समाधत्ते ।
तस्माद्यः क्षान्तिपरः स साधयत्युत्तमं धर्मम् ॥'

इत्यादिवचनतः 'परमां' धर्मसाधनं प्रति प्रकर्षवतीं 'ज्ञात्वा' अवगम्य 'भिक्षुधर्मे' यतिधर्मे, यद्वा भिक्षुधर्मं क्षान्त्यादिकं वस्तुस्वरूपं वा चिन्तयेत्, यथा -क्षमामूल एव मुनिधर्मः, अयं चास्य निमित्तं कर्म्मोपचिनोति, अस्मद्दोष एवायम्, अतो नेमं प्रति कोप उचित इति सूत्रार्थः ॥

मू. (७६) *समणं संजयं दंतं, हणिज्जा कोऽवि कत्थवि।*
नत्थि जीवस्स नासुत्ति, न तं पेहे असाहुवं ॥

वृ. 'समणं' श्रमणं सममनसं वा -तथाविधवधेऽपि धर्मं प्रति प्रहितचेतसं, श्रमणश्च शाक्यादिरपि स्यादित्याह-'संयतं' पृथ्व्यादिव्यापादननिवृत्तं, सोऽपि कदाचिल्लाभादिनिमित्तं बाह्यवृत्त्यैव सम्भवेदत आह-'दान्तम्' इन्द्रियनोइन्द्रियदमेन 'हन्यात्' ताडयेत्, 'कोऽपि' इति तथाविधोऽनार्यः 'कुत्रापि' ग्रामादौ, तत्र किं विधेयमित्याह-नास्ति 'जीवस्य' आत्मन उपयोगरूपस्य 'नाशः' अभावः, तत्पर्यायविनाशरूपत्वेन हिंसाया अपि तत्र तत्राभिधानाद्, 'इति'त्यस्माद्धेतोः न 'त'मिति घातकं प्रेक्षेत असाधुमर्हति यत्प्रेक्षणं भ्रुकुटिभङ्गादियुक्तं

तदसाधुवत्, किन्तु रिपुजयं प्रति सहायोऽयमितिधिया साधुवदेव प्रेक्षेतेति भावः, अथवा अपेक्षम्यमानत्वात्र तं प्रेक्षेतापि असाधुना तुल्यं वर्तते इति असाधुवत्, किं पुनरपकारायोपतिष्ठेत् संक्लिश्नाति वा ?, असाधुर्हि सत्यां शक्तौ प्रत्यपकारायोपतिष्ठते असत्यां तु विकृतया दृशा पश्यति संक्लेशं वा कुरुत इत्येवमभिधानं, पठ्यते च-'न य पेहे असाधुयं' ति चकारस्यापिशब्दार्थस्य भिन्नक्रमत्वात् प्रेक्षेतापि न चिन्तयेदपि न, कम् ?, -'असाधुतां' तदुपरि द्वेषस्यभावतां, पठन्ति च-'एवं पेहिज्ज संजतो' इति सूत्रार्थः ॥ अधुना त्रयेनि द्वारं, तत्र 'हतो न सज्ज्वलेदि' त्यादि सूत्रमर्थतः स्पशन्नुदाहरणमाह-

नि.[१११] सावत्थी जियसत्तू धारिणि देवी य खंदओ पुत्तो ।
धूआ पुरंदरजसा दत्ता सा दंडईरन्नो ।

नि.[११२] मुनिसुव्वयंतेवासी खंदगपमुहा य कुंभकारकडे ।
देवी पुरंदरजसा दंडजा पालग मरूए य ॥

नि.[११३] पंचसया जंतेणं वहिआ उ पुरोहिएण रुट्ठेणं ।
रागद्दोसतुलग्गं समकरणं चिंतयंतेहिं ॥

वृ. श्रावस्ती जितशत्रुर्धारिणी देवी च स्कन्दकः पुत्रो दुहिता पुरन्दरयशा दत्ता सा दण्डकिराजाय, मुनिसुव्रतान्तेवासिनः स्कन्दकप्रमुखाश्च कुम्भकारकटे देवी पुरन्दरयशा दण्डकिः पालकः मरुकश्च पञ्च शतानि यन्त्रेण घातितानि तुः पूरणे पुरोहितेन रुष्टेन पालकेन रागद्वेषयोस्तुलाग्रमीव-तदनभिभाव्यत्वेन रागद्वेषतुलाग्रं 'समकरणं' माध्यस्थ्यपरिनामं भावयद्भिः, स्वकार्यं साधितमिति शेषः, इति गाथात्रयाक्षरार्थः ॥ भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

सावत्थीए नयरीए जियसत्तू राया, धारिणी देवी, तीसे पुत्तो खंदओ नाम कुमारो, तस्स भगिनी पुरंदरजसा, सा कुंभकारकडे नयरे दंडगी नाम राया तस्स दिन्ना, तस्स य दंडकिस्स रन्नो पालगो नाम मरुतो पुरोहितो। अन्नया सावत्थीए मुनिसुव्वयसामी तित्थयरो समोसरिओ, परिसा निग्गया, खंदतोऽवि निग्गतो, धम्मं सोच्चा सावगो जाओ।

अन्नया सो पालकमरुतो दूयत्ताए आगतो सावत्थिं नयरिं, अत्थाणिमज्झे साहूणं अवण्णं वयमाणो खंदएणं निप्पिट्ठपसिणवागरणो कतो, पोतसमावण्णो, तप्पभिइं चेव खंदगस्स छिद्दाणि चारपुरिसेहिं मग्गावितो सिक्खइ, जाव खंदगो पंचजनसएहिं कुमारोलग्गएहिं सद्धिं मुनिसुव्वयसामिसगासे पव्वतितो, बहुसुतो जातो, ताणी चेव से पंच सयाणि सीसत्ताए अणुन्नायाणि। अन्नया खंदओ सामिमापुच्छइ-वच्चामि भगिनीसगासं, सामिणा भणियं-उवसग्गो मारणंतितो, भणइ-आयहगा विरायहगा वा ?, सामिणा भणियं-सव्वे आयहगा तुमं मोत्तुं, सो भणइ-लद्धं, जदि एत्तिया आराहगा, गओ कुंभकारकडं, मरुएण जहिं उज्जाने ठिओ तहिं आउहाणि भूमियाणि, राया वुग्गाहिओ-जहा एस कुमारो परीसहपराइतो एएण उवाएण तुमं मारित्ता रज्जं गिण्हिहिति, जदि ते विपच्चतो उज्जानं पलोएहि, आउहाणि ओलइयाणि दिट्ठाणि, ते बंधिऊण तस्स चेव पुरोहियस्स समप्पिया, तेन सव्वे घाणिसजंतेन पीलिया, तेहिं सम्मं अहियासियं, तेसिं केवलनाणं उप्पन्नं सिद्धा य। खंदतोऽवि पासे ठविओ, लोहियचिक्खिल्लेहिं भरिज्जंतो सव्वतो पच्छा जंते पीलितो निदानं काऊण अग्गिकुमारेसु उववन्नो।

तंपि से एगहरणं रुहिरलित्तं पुरिसहत्थेत्ति काउं गिद्धेहिं पुरंदरजसाते पुरतो पाडियं, साधि तद्दिवसं अभिर्ति करेइ जहा साधू न दीसंति, तं च ताए दिट्ठं, पव्वभिन्नाओ य कंचवतो, निसिज्जातो छिन्नातो, ताए चेव दिन्नो, ताए नायं-जहा ते मारिया, ताए खिंसितो राया-पाव! विनट्ठोऽसि, ताए चिंतियं-पव्वयामि, देवेहिं मुनिसुव्वयसगासं नीया, तेनवि देवेन नगरं दड्ढं सजनव्वयं, अण्णंवि दंडगारण्णयंति भन्नइ! अस्यास्य च वगाख्या भवति, तेन द्वारगाथायां वनमित्युक्तम्। एत्थ तेहिं साहूहिं वहपरीसहे, अहियासितो साधूं, एवं अहियासेयव्वं, न जहा संजयेण नाहियासियं। परैरभिहतस्य च तथाविधौषधादि ग्रासादि च सदोपयोगि यतेर्याचितमेव भवतीति याञ्चापरीषहमाह-

मू. (७७) *दुक्करं खलु भो! निच्चं, अनगारस्स भिक्खुणो।*
सव्वं से जाइयं होइ, नत्थि किंचि अजाइयं॥

वृ. दुःखेन क्रियत इति दुष्करं-दुरनुष्ठानं, खलुर्विशेषणे निरुपकारिण इति विशेषं द्योतयति, 'भो' इत्यामन्त्रणे 'नित्यं' सर्वकालं, यावज्जीवमित्यर्थः, अनगारस्स भिक्षोरिति च प्राग्वत्, किं तत् दुष्करमित्याह-यत् 'सर्वम्' आहारोपकरणादि 'से' तस्य याचितं भवति, नास्ति 'किञ्चिद्' दन्तशोधनाद्यपि अयाचितं, ततः सर्वस्यापि वस्तुनो याचनमिति गम्यमानेन विशेष्येण दुष्करमित्यस्य सम्बन्ध इति सूत्रार्थः॥ ततश्च-

मू. (७८) *गोयरग्गपविट्ठस्स, हत्थे नो सुप्पसारए।*
सेओ अगारवासोत्ति, इइ भिक्खू न चिंतए॥

वृ. गोरिव चरणं गोचरः, यथाऽसौ परिचितापरिचितविशेषमपहायैव प्रवर्त्तते तथा साधुरपि भिक्षार्थी, तस्याग्र्यं-प्रधानं यतोऽसौ एषणायुक्तौ गृह्णाति न पुनर्गौरिव यथा कथञ्चित्, तस्मिन् प्रविष्टो गोचराग्रप्रविष्टः तस्य, 'पाणिः' हस्तो 'नो' नैव सुखेन प्रसार्यते पिण्डादिग्रहणार्थं प्रवर्त्तत इति सुप्रसारः स एव सुप्रासरकः, कथं हि निरुपकारिणा परः प्रतिदिनं प्रणयितुं शक्यः, उत्तरत्रेति-शब्दस्य भिन्नक्रमत्वाद्, 'इतो'त्यस्माद्धेतोः, 'श्रेयान्' अतिशयप्रशस्यः 'अगारवासो' गार्हस्थ्यं, तत्र हि न कश्चिद्याच्यते, स्वभुजार्जितं च दीनादिभ्यः संविभज्य भुज्यते, 'इती'त्यनादिभिक्षुः न चिन्तयेद्, यतो गृहवासो बहुसावद्यो निरवद्यवृत्त्यर्थं च तत्परित्यागः, ततः स्वयंपचनादिप्रवृत्तेभ्यो गृहिभ्यः पिण्डादिग्रहणं न्याय्यमिति भाव इति सूत्रार्थः॥ साम्प्रतं रामद्वारं, तत्र 'दुक्करं खलु भो! निच्चं' इति सूत्रमर्थतः स्पृशन्नुदाहरणमाह-

नि. [११४-१] जायणपरीसहंमि बलदेवो इत्थ होइ आहरणं।

वृ. याञ्चापरीषहे बलदेवोऽत्र भवत्याहरणम्-उदाहरणम्। अत्र सम्प्रदायः-जया सो वासुदेवसवं वहंतो सिद्धत्थेणं पडिबोहिओ कण्हस्स सरीरगं सक्कारेउं कयसामातितो लिंगं पडिवज्जिउं तुंगीसिहरे तवं तप्पमाणो मासेन-कहिं भिच्चाण भिक्खट्ठं आसीसं?, तेन कट्ठा-हाराईण भिक्खं गिण्हइ, न गामं नयरं वा अल्लियति।

तेन सो नाहियासितो जायणापरीसहो, एवं न कायव्वं। अन्ने भणंति-बलदेवस्स भिक्खं भमंतस्स बहुओ जनो तस्स रूवेणावक्खित्तो न किंति अन्नं जाणइ, तच्चित्तो चेव चिट्ठइ, तेन सो न हिंडइ गामागरादि, जहागयपहियाहितो चेव भिक्खं जायतित्ति, एस जायणापरीसहो

परत्थो। एवं शेषसाधुभिरपि याच्ञापरीषहः सोढव्यः ॥ याच्ञाप्रवृत्तश्च कदाचिल्लाभान्तरायदोषतो न लभेतापीत्यलाभपरीषहमाह-

मू. (७९) परेसु गासमेसिज्जा, भोयणे परिनिट्ठिए।
लद्धे पिंडे आहरिज्जा, अलद्धे नाणुतप्पए ॥

वृ. 'परेषु' इति गृहस्थेषु 'ग्रासं' कवलम्, अनेन च मधुकरवृत्तिमाह, 'एषयेद्' गवेषयेत् भुज्यत इति भोजनम्-ओदनादि तस्मिन् 'परिनिष्ठिते' सिद्धे, मा भूत्प्रथमगमनानर्थक्यं याचकादिप्रवृत्तेः, ततश्च 'लब्धे' गृहिभ्यः ग्रासे 'पिण्डे' आहारे 'अलब्धे वा' अप्राप्ते वा नानुतप्येत संयतः, तद्यथा- अहो! ममाधन्यता यदहं न किञ्चिल्लभे, उपलक्षणत्वाल्लब्धे वा लप्स्यमानमिति न हृष्येत, यद्वा लब्धेऽप्यल्पेऽनिष्टे वा सम्भवत्येवानुताप इति सूत्रार्थः ॥

किमालम्बनमालम्ब्य नानुतप्येतेत्याह-

मू. (८०) अज्जेवाहं न लब्भामि, अवि लाभो सुए सिया।
जो एवं पडिसंविक्खे, अलाभो तं न तज्जए ॥

वृ. 'अद्यैव' अस्मिन्नेवाहन्यहं 'न लभे' न प्राप्नोमि, 'अपिः' सम्भावने, सम्भाव्यत एतत् 'लाभः' प्राप्तिः 'श्वः' आगामिनि दिने 'स्याद्' भवेत्, उपलक्षणं श्च इत्यन्येद्युरन्यतरेद्युर्वा मा वा भूदित्यनास्थामाह, य 'एवम्' उक्तप्रकारेण 'पडिसंविक्खे' त्ति प्रतिसमीक्षते ऽदीनमनाः अलाभमाश्रित्यालोचयति, 'अलाभः' अलाभपरीषहः तं 'न तर्जयति' नाभिभवति, अन्यथाभूतस्त्वभिभूयत इति भावः ॥ अत्र लौकिकमुदाहरणम् -

वासुदेवबलदेवमच्चगदारुगा अस्सवहिया अडवीए नग्गोहपायवस्स अहे रत्तिं वासोवगया, जामग्गहणं, दारुगस्स पढमो जामो, कोहो पिसायरूवं काऊण आगतो, दारुगं भणइ- आहारत्थी ऽहं उवागओ, एए सुत्ते भक्खयामि युद्धं वा देहि, दारुगेण भणियं-बाढं, तेन सह संपलग्गो, दारुगो य तं पिसायं जहा जहा न सक्केइ निहणिउं तहा तहा रुम्भति, जहा जहा रुम्भइ तहा तहा सो कोहो वड्ढति, एवं सो दारुगो किच्छपाणो तं जामगं निव्वाहेइ, पच्छा सच्चगं उट्ठावेइ, सच्चगो ऽवि तहेव पिसाएण किच्छपाणो कतो, ततिए जामे बलदेवं उट्ठवेइ, एवं बलदेवो ऽवि चउत्थे जामे वासुदेवं उट्ठवेइ, वासुदेवो तेन पिसाएण तहेव भणितो,

वासुदेवो भणति-मं अनिज्जिउं कहं मम सहाए खाहिसि ?, जुद्धं लग्गं, जहा जहा जुज्झइ पिसाओ तहा तहा वासुदेवो अहो बलसंपुन्नो अयं मल्लो इति तूसए, जहा जहा तूसए तहा तहा पिसाओ परिहायति, सो तेन एवं खविओ जेन भेत्तुं उयट्टीए छूढो, पभाए पस्सए ते भिन्नजानुकोप्परे, केणेति पुट्ठो भणति-पिसाएण, वासुदेवो भणति-स एस कोवो पिसायरूवधारी मया पसंतयाए जितो, उयट्ठिणीए नीणेऊण दरिसिओ। इति सूत्रार्थः ॥

सम्प्रति 'पुरे'त्यद्वारं, 'पुरा' इति पूर्वस्मिन् काले कृतं कर्मेति गम्यते, तत्र च 'नानुतप्येज्ज संजए'त्ति सूत्रावयवमर्थतः स्पृशन्नुदाहरणमाह-

नि. [११४-२] किसिपारासरढंढो अलाभए होइ आहरणं ॥

वृ. कृषिपराशरः पाराशरः कृषिपाराशरो जन्मान्तरनाम्ना 'ढण्ढ' इति ढण्ढणकुमारः 'अलाभके' अलाभपरीषहे भवत्याहरणमिति गाथापश्चार्द्धाक्षरार्थः। भावार्थस्तु वृद्धसम्प्रदायादवसेयः,

एगंमि गामे एगो पारासरो नाम, तम्मि य अत्थे पारासरा अत्थि, सो पुन किमाए कुसलो सरीरेण किसो तेनं किसपारासरो, सो य तम्मि गामे आउत्तियं राउलियं चरिं वाहेइ, ते य गोणादो दिवसं छाएल्लया भत्तवेलं पडिच्छंति, पच्छा ते भत्तेच्चि आनीए भोगउकामे भणइ-एक्केक्कं हलवंभं देह, तो पच्छा भुंजह, तेहिं छहिंवि हलमाईहिं बहुयं वाहियं, तेन तहिं बहुयं अंतराइयं बद्धं, भरिऊण अन्नेण सुकयविसेसेण वासुदेवस्स पुत्तो जातो ढंढोत्ति, अरिट्ठनेमिसगासे पव्वइतो, अंतरायं कम्मं उदिन्नं, फीयाए बारवईए हिंडंतो न लभति, कहिंचिवि जया लभति तदा जं वा तं वा, तेन सामी पुच्छितो, तेहिं कहियं जहावत्तं, पच्छा तेन अभिग्गहो गहितो, जहा-परस्स लाभो न गिण्हियव्वो । अन्नया वासुदेवो पुच्छइ तित्थयरं-एएसि अट्ठारसण्हं समणसाहस्सीणं को दुक्करकारतो ?, तेहिं भणियं, जहा-ढंढो अनगारो,

अलाभपरीसहो कहिओ, सो कहिं ?, सामी भणइ-नगरिं पविसंतो पच्छिहिसि, दिट्ठो पविसंतेनं, हत्थिखंधाओ ओवयिऊण वंदिओ, सो य इक्केण इब्भेण दिट्ठो, जहा महप्पा एस जो वासुदेवेन वंदितो, सो य तं चेव घरं पविट्ठो, तेन परमाए सद्धाए मोयगेहिं पडिलाभितो, भगिऊण सामिस्स दावइ पुच्छइ य-जहा मम अलाभपरीसहो खीणो ?, पच्छा सामिणा भन्नति-न खीणो, एस वासुदेवस्स लाभो, तेन परलाभं न उवजीवामित्तकाउ अमुच्छियस्स परिट्ठवितस्स केवलनाणं समुप्पन्नं । एवं अहियासियव्वो अलाभपरीसहो जहा ढंढेण अनगारेण ॥

अलाभाच्चान्तप्रान्ताशिनां कदाचिद्रोगाः समुत्पद्येरन्निति रोगपरीषहमाह-

मू. (८१) *नच्चा उप्पइयं दुक्खं, वेदनाए दुहट्टिए ।*
अदीणो ठावए पन्नं, पुट्ठो तत्थऽहियासए ॥

वृ. 'ज्ञात्वा' अभिगम्य 'उत्पतितम्' उद्भूतं, दुःखयति इति दुःखं प्रस्तावात् ज्वरादिरोगास्तं 'वेदनया' स्फोटपृष्ठग्रहाद्यनुभवरूपया दुःखेनार्त्तः-पीडितः क्रियते यद् दुःखार्त्तितः, एवंविधोऽपि 'अदीनः' अविक्लवः 'स्थापयेत्' दुःखार्त्तितत्वेन चलन्तीं स्थिरीकुर्यात् 'प्रज्ञां' स्वकर्म्मफलमेवैतदिति तत्त्वधियं, 'स्पृष्टः' इत्यपेर्लुप्तनिर्द्दिष्टत्वात् व्याप्तोऽपि एजमन्दादिभिः, यद्वा पुष्ट इव पुष्टो व्याधिभिरविक्लवतया 'तत्रेति' प्रज्ञास्थापने सति रोगोत्पाते वा 'अध्यासीत' अधिसहेत, प्रक्रमाद्रोगजनितदुःखमिति सूत्रार्थः ॥

स्यादेतत्-चिकित्सया किं न तदपनोदः क्रियते ? इत्याह-

मू. (८२) *तेगिच्छं नाभिनंदिज्जा, संचिक्खऽत्तगवेसए ।*
एयं खु तस्स सामन्नं, जं न कुज्जा न कारवे ॥

वृ. 'चिकित्सां' रोगप्रतिकाररूपां 'नाभिनन्देत्' अनुमतिनिषेधाच्च दुरापास्तें करणकारणे 'समीक्ष्य' स्वकर्मफलमेवैतत् भुज्यत इति पर्यालोच्य, यद्वा 'संचिक्ख'त्ति 'अचां सन्धि लोपौ बहुलम्' इत्येकारलोपे 'संचिक्खे' समाधिना तिष्ठेत, न कृजनकर्करायतादि कुर्यात्, आत्मानं-चारित्रात्मानं गवेषयति-मार्गयति कथमयं मम स्यादित्यात्मगवेषकः, किमित्येवमत आह-'एतद्' अनन्तरमभिधास्यमानं 'खु'त्ति खलु, स च यस्मादर्थः, ततो यस्मादेतत् 'तस्य' श्रमणस्य 'श्रामण्यं' श्रमणभावो यन्न कुर्याज्ज कारयेत्, उपलक्षणत्वान्नानुमन्येत, प्रक्रमात् चिकित्सां, जिनकल्पिकाद्यपेक्षं चैतत्, स्थविरकल्पापेक्षया तु 'जं न कुज्जा' इत्यादौ सावद्यमिति गम्यते,

अयमत्र भावः- यस्मात्करणादिभिः सावद्यपरिहार एव श्रामण्यं, मालद्य च प्रायश्चित्तिकित्सा, ततस्तां नाभिनन्देद्, एतदप्यौत्सर्गिकम्, अपवादतस्तु सावद्याऽप्येषामियमनुमतैव, यदुक्तम् "काहं अच्छित्ति अदुवा अहोहं, तवोविहाणेण य उज्जमिस्सं। गणं व नेतोऽवि सारविस्सं, सालंबसेवी समुवेति मोक्खं ॥" इति सूत्रार्थः ॥ इदानीं भिक्षेति द्वारं, तत्र च 'तिगिच्छं नाभिनंदिज्जा' इति सूत्रावयवमधिकृत्य स्पृशन्नुदाहरणमाह-

नि.[११५] महुराइ कालवेसिय जंबुय अहिठत्थ मुग्गसेलपुरं।
गया पडिसेहेइ जंबुयरूवेण उवसग्गं ॥

वृ. मथुरायां कालवेसिको जम्बुकोऽभ्युषितो मुद्गशैलं पुरं गत्वा प्रतिषेधयति जम्बुकरूपेण उपसर्गमिति गाथाक्षरार्थः। भावार्थस्तु सम्प्रदायावगम्यः, स चायम-

महुराए जियसत्तुणा रन्ना काला नाम वेसा उवडिरूवंति काउं ओगेहे छूढा, तीसे पुत्तो कालाए कालवेसिओ कुमारो, सो तहारूवाणं थेराणं अंतिए धम्मं सोऊण पव्वतितो, एगल्लविहारपडिमं पडिवन्नो, गतो मुग्गसेलपुरं, तहिं तस्स भगिनी हयसुत्तस्स रन्नो महिला, तस्स साहुस्स अरतिया, ततो तीए भिक्खाए सह ओसहं दिन्नं, सो य अहिगरणंति मनं पच्चक्खाति।

तेन य कुमारत्ते सियालाणं सद्दं सोऊण पुच्छिया ओलग्गिया-केसिं एस सद्दो सुच्चति ?, ते भणंति-एए सियाला अड्ढविवासिणो, तेन भणति एए बंधिऊण मम आणेह, तेहिं सियालो बंधिऊण आनितो, सो तं हणइ, सो हम्मंतो खिखिएइ, ततो सो रतिं विंदइ, सो सियालो हम्मंतो मतो, अकामनिज्जराए वाणमंतरो जाओ, तेन वाणमंतरेण सो भत्तपच्चक्खायगंतिकाउं रक्खावेंति पुरिसेहिंति, मा कोइ से उवसग्गं करिस्सइत्ति, जाव ते पुरिसा नं थाणं एंति ताव तीए सोआलीए खइतो, जाहे ते पुरिसा ओस्सरिआ ताहे सद्दं करेंती खाति, जाहे आगया ताहे न दीसति, सोऽवि उवसग्गं सम्मं सहति खमति, एवं अहियासेयव्वं ॥ रोगपीडितस्य शयनादिषु दुःसहतर(ः)-तृणस्पर्श इत्येतदनन्तरं तत्परीषहमाह-

मू.(८३) *अचेलगस्स लूहस्स, संजयस्स तवस्सिणो।*
तणेसु सुयमाणस्स, हुज्जा गायविराहणा ॥

वृ. अचेलकस्य रूक्षस्य संयतस्य तपस्विन इति प्राग्वत्, तरन्तीति तृणानि-दर्भादीनि तेषु शयानस्योपलक्षणत्वात् आसीनस्य वा भवेत् गात्रस्य-शरीरस्य विराधना-विदारणा गात्रविराधना, अचेलकत्वादीनि तु तपस्विविशेषणानि मा भूत्सचेलस्य तृणस्पर्शासम्भवेनारूक्षस्य तत्सम्भवेऽपि स्निग्धत्वेनासंयतस्य च शुषिरहरिततृणोपादानेन तथाविधगात्रविराधनाया असम्भव इति ॥ ततः किमित्याह-

मू.(८४) *आयवस्स निवाएणं, तिदुला हवइ वेयणा।*
एवं नच्चा न सेवंति, तंतुजं तणतज्जिया ॥

वृ. 'आतपस्य' घर्मस्य निपातो निपातस्तेन 'तिउल' नि सूत्रत्वात्तौदिक्ख, यद्वा त्रोन्-प्रस्तावत् मनोवाक्कायान्, विभाषितण्यन्तत्वात् चुरादीनां दोलतीव स्वरूपचलनेन त्रिदुला, पाठान्तरस्तु-'अतुला विपुला वा' भवति वेदना, एवं च किमित्याह-'एतद्' अनन्तरोक्तं पाठानन्तरतः 'एवं' ज्ञात्वा 'न सेवन्ते' न भजन्ते, आस्तरणायेति गम्यते, तन्तुभ्यो जातु तन्तुजं, पठ्यते

च-**तंतयं** 'ति तत्र तन्त्रं-वेमशिलेखन्यादिकादि तस्माज्जातं तन्त्रजम्, उभयत्र वस्त्रं कम्बलं वा, तृणैस्तर्जिताः-निर्भर्त्सिताः तृणतर्जिताः, किमुक्तं भवति यद्यपि तृणैरत्यन्तविलिखितशरीरस्य गवक्किरणसम्पर्कसमुत्पन्नस्वेदवशतः क्षतक्षारनिक्षेपरूपैव पीडोपजायते तथाऽपि-

'प्रदीप्ताङ्गारकल्पेषु, वज्रकुण्डेष्वसंख्यिषु ।
क्रूजन्तः करुणं केचित्, दह्यन्ते नरकाग्निना ॥१॥
अग्निभीताः प्रधावन्तो, गत्वा वैतरणीं नदीम् ।
शीततोयामिमां ज्ञात्वा, क्षाराम्भसि पतन्ति ते ॥२॥
क्षारदग्धशरीराश्च, मृगाङ्गेनोज्झिताः, पुनः ।
असिपत्रवनं यान्ति, च्छायायां कृतबुद्धयः ॥३॥
शक्त्यष्टिप्रासकुन्तैश्च, खड्गतोमरपट्टिशैः ।
छिद्यन्ते कृपाणास्तत्र पतदिभ्रवातकम्पितैः ॥४॥'

इत्यादिकः शैदतरा नरकेषु परवशेन मयाऽनुभूता वेदनास्तत्किंयतीयं ?, भूयांश्च लाभः स्ववशस्य सम्यक् सहन इति परिभावनातो न तत्परिजिहीर्षया वस्त्रं कम्बलादिकमुपाददते, जिनकल्पिकापेक्षं चैतत्, स्थविरकल्पिकाश्च सापेक्षसंयमत्वात्सेवन्तेऽपीति सूत्रार्थः ॥

अत्र संस्थाद्वारमनुसरन् 'तिउला हवइ वेण' त्ति सूत्रसूचितमुदाहरणमाह-

नि.[११६] सावत्थीइ कुमारो भद्दो सो चारिओत्ति वेरज्जे ।
खारेण तच्छियंगो तणफाससहं विसहे ॥

वृ. श्रावस्त्यां कुमारो भद्रः स 'चारिकः' चर इति वैराज्ये क्षारेण तक्षिताङ्गः तृणस्पर्शपरीषहं 'विसहे' त्ति विषहते, स्मेति विशेष इति गाथार्थः ॥ भावार्थस्तु सम्प्रदायावसेय, स चायम्-

सावत्थीए नयरीए जियसत्तू राओ पुत्तो भद्दो नाम, सो निव्विण्णकामभोगो तहारूवाणं थेराणमंतिते पव्वतितो, कालेण य एगल्लविहारपडिमं पडिवन्नो, सो विहरंतो वेरज्जे चारिउत्तिकाऊण गहिओ, सो य पंतावेऊण खारेण तच्छिओ, सो दब्भेहिं वेढिऊण मुक्को, सो दब्भेहिं लोहियसंमीलिएहिं दुक्खाविज्जंतो सम्मं सहइ ॥ एवं शेषसाधुभिरपि सम्यक् सोढव्यः तृणस्पर्शपरीषहः ॥ तृणानि च मलिनान्यपि कानिचित् स्युरिति तत्सम्पर्कात् स्वेदतो विशेषेण जल्लसम्भव इत्यनन्तरं तत्परीषहमाह-

मू.(८५) *किलिन्नगाए पंकेण, मेहावी व रएण वा ।*
घिंसु वा परितावेणं, सायं नो परिदेवए ॥

वृ. क्लिन्नमनेकार्थत्वाद्धातूनां निचितं पाठान्तरतः क्लिष्टं वा-बाधितं गात्रं-शरीरमस्येति क्लिन्नगात्रः क्लिष्टगात्रो वा, मेधावी-

"वाहितो वा अरोगी वा, सिणाणं जो उ पत्थए ।
वोक्कंतो होइ आयारो, जढो हवइ संजमो ॥"

इत्यागममनुस्मरन् न स्नानरूपमर्यादानतिवर्ती, केन पुनः क्लिन्नगात्रः क्लिष्टगात्रो वेत्याह-'पङ्केन' वा स्वेदार्द्रमलरूपेण 'रजसा' वा तेनैव काठिन्यं गतेन पांशुना वा, भिन्नकालत्वाच्चानयोर्वा ग्रहणं, 'घिंसु व' त्ति ग्रीष्मे, वाशब्दाच्छरदि वा, परिः-समन्तात्तापः परितापस्तेन,

हतौ तृतीया किमुक्तं भवति ?, परितापात्प्रस्वेदः प्रस्वेदाच्च पङ्करजसी ततः क्लिन्नगात्रता क्लिष्टगात्रता वा भवति, एवंविधश्च किमित्याह- 'सातं' सुखम्, आश्रित्येति शेषः 'नो परिदेवेत्' न प्रलपेत्- कथं सदा वा ममैवं मलदिग्धदेहस्य सुखानुभवः स्यात् ?, इति सूत्रार्थः ॥

किं तर्हि कुर्यादित्याह-

मू. (८६) वेएज्ज निज्जरापेही, आरियं धम्मनुत्तरं।
जाव सरीरभेओत्ति, जल्लं कारण धारए ॥

वृ. 'वेदयेत्' सहेत, जल्लजनितं दुःखमिति प्रक्रमः, कीदृशः सन् इत्याह-निर्जरणं निर्जरा कर्मणामात्यन्तिकः क्षयस्तामपेक्षते-कथं ममासौ अ स्यादित्यभिलषतीति निर्जरापेक्षी, क्व एवं कुर्यादित्याह- आगच्छेयधर्मेभ्यो यात इत्यार्यस्तं 'धर्मं' श्रुतचारित्ररूपं नास्त्युत्तरं-प्रधानमन्य दस्मादित्यनुत्तरं गम्यमानत्वात् प्रस्तुतो ज्ञातृभिरुपदिष्टः, एतच्च सामर्थ्यादुक्तमप्यर्थमा दरख्यापनाय निगमनव्याजेन पुनराह- 'जाव सरीरभेओ'त्ति सूत्रत्वात्, 'यावत्' इति मर्यादायां शरीरस्य भेदो- विनाशस्तं मर्यादीकृत्य, किमित्याह- 'जल्लं' कठिनतापन्नं मलम्, उपलक्षणत्वात् पङ्करजसी च 'कायेन' शरीरेण धारयेत्, दृश्यन्ते हि केचिदिन्द्राग्निदग्धानीव गिरिशिखराणिः विच्छायकृष्णदेहाः शीतोष्णवातातपादिभिः परिशोषितपरिदग्धोपहतशरीराः रजोऽवगुण्ड तमलदिग्धदेहाः, अकामनिर्जरतश्च न कश्चिदेषां गुणो, मम तु सम्यक् सहमानस्य महान् गुण इति मत्वा न तदपनयनाय स्नानादि कुर्यात्, यतः-"न शक्यं निर्मलीकर्तुं, गात्रं स्नानशतैरपि।
अश्रान्तमेव श्रोतोभिरुद्दिगस्रावभिर्मलम् ॥" पठ्यते च-'वेइंतो निज्जरापेहि'त्ति वेदय मानः-सहमानः, शेषं प्राग्वद्, अत्र केचिच्चतुर्थपादमधीयते, 'जल्लं काए न ठव्वए'त्ति अत्रो द्वर्तनग्रहणमुद्वर्तयेदपि न, किं पुनः स्नायात् ?, यद्वा-'वेइज्ज'त्ति विद्यात्-जानीयाद्धर्ममाचारम्, अर्थाद्यतीनां, ज्ञात्वा च 'ज्ञानस्य फलं विरतिरि'ति जल्लं कायेन धारयेत्, तथा 'वेयंतो'त्ति विदन्- जानानोऽन्यत्तथैवेति सूत्रार्थः ॥ अत्र 'मलधारिणो'त्ति द्वारमनुसरन् 'सायं नो परिदेवए' इति सूत्रावयवमर्थतः स्पृशन्नुदाहरणमाह-

नि.[११७] चंपाए सुनंदो नाम सावओ जल्लधारणदुगंछी।
कोसंबीइ दुगंधी उप्पन्नो तस्स सादिव्वं ॥

वृ. चंपायां सुनन्दो नाम श्रावको जल्लधारणजुगुप्सी कौशाम्ब्यां दुर्गन्धिरुत्पन्नः, तस्य सादिव्यं-सदेवत्वमित्यक्षरार्थः ॥ भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

चंपाए नयरीए सुनन्दो नाम वाणियगो सावगो, अवण्णाए चेव जो जं मग्गेइ साहू तस्स तं चेव देइ ओसहभेसज्जाइयं सत्तुगाइयं च, सव्वभंडिओ सो, तस्स अन्नया गिम्हे सुसाहूणो जल्लपरिदिद्धंगा आवणं आगया, तंसि गंधो जल्लस्स ताण ओसहाणं गंधवभिभविउं उक्कलति, तेन सुगंधदव्वभाविएण चिंतियं-सव्वं लद्धं साहूण जदिनाम जल्लं उव्वट्टिता तो सुंदरं होंतं, एवं सो तस्स ठाणस्स अनालोइयपडिक्कंतो कालगतो कोसंबीए नयरीए इब्भकुले पुत्तत्ताए आगतो, सो निव्विण्णकामभोगो धम्मं सोऊण पव्वतितो, तस्स तं कम्ममुदिन्नं, दुरभिगंधो जातो, तओ जतो जतो वच्चंति तओ तओ उड्डाहा, पच्छा साहूहिं भणितो-तुमं मा निग्गच्छ उड्डाहो, पंडिस्सए अच्छाहि, रत्तिं देवयाए सो काउस्सग्गं करेइ, पच्छा देवयाए सुगंधो कतो, सो जहा नाम कोट्ठपुडाण

वा अन्नेसिं वा विरिसद्दुदव्वाण जारिसो गंधो तारिसो गंधो जातो, पुणोऽवि अङ्काहो, पुणोऽवि देवयागहणं, साभाविगगंधो जातो।

तेन नाहियासिओ जल्लपरीसहो। एवं शेषसाधुभिर्न करणीयम। जल्लोपलिप्तश्च शुचीन् सत्क्रियमाणान् पुरस्क्रियमाणांश्चापरानुपलभ्य सत्कारपुरस्काराभ्यां स्पृहयेदतस्तत्परीषहमाह-

मू.(८७) *अभिवादन अब्भुट्ठाणं, सामी कुज्जा निमंतणं।*
जे ताइं पडिसेवंति, न तेसिं पीहए मुनी॥

वृ. 'अभिवादनं' शिरोनमनचरणस्पर्शनादि पूर्वमभिवादये इत्यादिवचनं 'अभ्युत्थानं' सम्भ्रममासनमोक्षणं 'स्वामी' राजादिः 'कुर्यात्' विदधीत 'निमन्त्रणम्' अद्य भवद्भिर्भिक्षा मदीयगृहे ग्रहीतव्येत्यादिरूपं, 'ये' इति स्वयूथ्याः परतीर्थिका वा 'तानि' अभिवादनादीनि 'प्रतिसेवन्ते' आगमनिषिद्धान्यपि भजन्ते, न तेभ्यः स्पृहयेत्-यथा सुलब्धजन्मानोऽमी य एवमेवंविधैरभिवादनादिभिः सत्क्रियन्त इति 'मुनिः' अनगार इति सूत्रार्थः॥ किंच-

मू.(८८) *अनुक्कसाई अप्पिच्छे, अन्नाएसि अलोलुए।*
रसेसु नानुगिज्झिज्जा, नानुतप्पिज्ज पन्नवं॥

वृ. उत्कर्षितः, सत्कारादिषु शेत इत्येवं शील उत्कशायो न तथा अनुत्कशायी, यद्वा प्राकृतत्वादणुकषायी सर्वधनादित्वादिनि, कोऽर्थः?-न सत्कारादिकमकुर्वति कुप्यति, तत्सम्पत्तौ वा नाहङ्कारवान् भवति, यत उक्तम्-

"पलिमंथ महं वियाणिया, जावि य वंदन पूयणा इहं।
सुहुमे सल्ले दुरुद्धरे, इति संखाइ मुनी न मज्जइ॥"

न वा तदर्थं छद्म तत्र वा गृद्धिं विधत्ते, अत एवाल्पा-स्तोका धर्मोपकरणप्राप्तिमात्रविषयत्वेन न तु सत्कारादिकमितया महती अल्पशब्दस्याभाववादित्वेनाविद्यमाना वा इच्छा-वाञ्छा वा यस्येति अल्पेच्छः, इच्छायाश्च कषायान्तर्गतत्वेऽपि पुनरल्पत्वाभिधानं बहुतरदोषत्यो-पदर्शनार्थम्, अत एव च अज्ञातो जातिश्रुतादिभिः एषति उञ्छति अर्थात् पिण्डादीत्यज्ञातैषी, कुतः पुनरेवम्?, यतः 'अलोलुपः' सरसौदनादौषु न लाम्पट्यवान्, एवंविधोऽपि सरसाहार-भोजिनोऽपरान् वीक्ष्य कदाचिदन्यथा स्यात् अत आह-सरसेषु-रसवतम्योदनादिषु, पाठान्तरतो-'रसेषु वा' मधुरादिषु 'नानुगृध्येत् नाभिकाङ्क्षां कुर्वीत, रसगृद्धिवर्जनोपदेशश्च तदगृद्धित एव बालिशानामभिवादनादिस्पृहासम्भवात्, तथा न 'तेभ्यो' रसगृद्धेभ्यः स्पृहयेन्मुनिः, पाठान्तर-तश्च नानुतप्येत् तीर्थान्तरीयान्नृपत्यादिभिः सत्क्रियमाणानवेक्ष्य, किमेतत्परित्यागेनाहमत्र प्रव्रजितः?, इति, प्रज्ञा-हेयोपादेयविवेचनात्मिका मतिरस्तीह, अनेन सत्कारकारिणि तोषं न्यत्कारकारिणि च द्वेषमकुर्वताऽयं परीषहोऽध्यासितव्य इत्युक्तं भवतीति सूत्रार्थः॥ अत्र 'अङ्गविद्ये'ति द्वारमनुसरन् सूत्रोक्तमर्थं व्यतिरेकोदाहरणेन स्पष्टयन्नाह-

नि.[११८] मथुराइ इंददत्तो पुरोहिओ साहुसेवओ सिट्ठी।
पासायनिज्जपाडण पायच्छिज्जेंदकीले य॥

वृ. मथुरायामिन्द्रदत्तः पुरोहितः साधुसेवकः श्रेष्ठी प्रासादविद्यापातनं पादच्छेदश्चेन्द्रकीले चास्य भिन्नक्रमत्वादिति गाथासंस्कारः॥ एतदर्थश्च सम्प्रदायादवसेयः, स चायम्-

चिरकालपडट्ठियाए महुराए इंददत्तेणं पुरोहिएणं पासायगएणं हेट्ठेणं साधुस्स वच्चंतस्स पाओ ओलंबितो सीसे कतोत्तिकाउं, सो य साधुणा सिट्ठिणा दिट्ठो, तस्सामरिसो जाओ, दिट्ठं भो ! एएण पावेणं साहुस्स उवरिं पादो कतोत्ति, तेन पइन्ना कया- अवस्स मए एयस्स पादो छिंदेयव्वो, तस्स छिद्दाणि मग्गइ, अलभमानो अन्नया आयरिआण सगासे गंतूण वंदित्ता परिकहेइ, तेहिं भन्नइ- का पुच्छा ?, अहियासेयव्वो सक्कारपुरक्कारपरीसहो, तेन भणियं माए एइणा कालिया. आयरिएहिं भन्नइ-एयस्स पुरोहियस्स किं घरे वट्टइ ?, तेन भन्नइ--एयस्स पुरोहियस्स पासाओ कएइतो, तस्स पवेसणे रन्नो भत्तं करेहिंति, तेहिं भन्नइ-जाहे राया पविसइ तं पासायं ताहे तुमं रायं हत्थेण गहेऊण अवसारिज्जासि जहा - पासाओ पडति, ताहेऽहं पासायं विज्जाए पाडिस्सं. तेन तहा कयं. सेट्ठिणा रन्ना भणितो -एएण तुब्भे मारिया आसि. रुट्ठेण रन्ना पुरोहितो सावगस्स अप्पितो, तेन तस्स इंदकीले पादो कतो, पच्छा छिन्न(ज्जो), एवं काउं इयरो विसज्जितो। तेन नाहियासितो सक्कारपुरक्कारपरीसहो इति। यथा तेन श्राद्धेनासौ न सोढो न तथा विधेयं, किन्तु साधुवत्सोढव्यः, इह पूर्वत्र च श्रावकपरीषहाभिधानमाद्यनयचतुष्टय मतेनेति भावनीयम्, उक्तं हि प्राक् "तिण्हंपि नेगमनतो परीसहो जाव उज्जमुत्ताओ"त्ति, अङ्गं चात्र पादो, विद्या च प्रासादपातनविद्या॥ साम्प्रतमनन्तरोक्तपरीषहान् जयतोऽपि कस्यचिज्ज्ञानावरणापगमात् प्रज्ञाया उत्कर्षे अपरस्य तु तदुदयादपकर्षे उत्सेकव्यवस्तव्यसम्भव इति प्रज्ञापरीषहमाह-

मू.(८९) से नूनं मए पुव्वं, कम्माऽनाणफला कडा।
जेनाहं नाभिजाणामि, पुट्ठो केणइ कण्हुई।

मू.(९०) अह पच्छा उइज्जंति, कम्माऽनाणफलाकडा।
एवमासासि अप्पाणं, नच्चा कम्मविवागयं॥

वृ. सेशब्दो मागधप्रसिद्ध्याऽथशब्दार्थे उपन्यास, 'नूनं' निश्चितं 'मये'ति आत्मनिर्देशः 'पूर्वं' प्राक् क्रियन्त इति कर्माणि तानि च मोहनीयादीन्यपि सम्भवन्त्यत आह- अज्ञानम्-अनवबोधस्तत्फलानि ज्ञानावरणरूपाणीत्यर्थः 'कृतानि' ज्ञाननिन्दाभिरुपार्जितानि, यदुक्तम्-

ज्ञानस्य ज्ञानिनां चैव, निन्दाप्रद्वेषमत्सरैः।
उपघातैश्च विघ्नैश्च, ज्ञानघ्नं कर्म बध्यते॥

'मये'त्यभिधानं च स्वयमकृतस्योपभोगासम्भवाद्, उक्तं च-

"शुभाशुभानि कर्माणि, स्वयं कुर्वन्ति देहिनः।
स्वयमेवोपभुज्यन्ते, दुःखानि च सुखानि च॥"

कुत एतदित्याह-येन हेतुना अहं 'नाभिजानामि' नाभिमुख्येनावबुद्धये पृष्टः केनचित् स्वयमजानता जानता वा 'कण्हुई'त्ति सूत्रत्वात् कस्मिंश्चित् सूत्रादौ वस्तुनि वा, प्रगुणोऽपीत्यभिप्रायः। न हि स्वयं स्वच्छस्फटिकवदतिनिर्मलस्य प्रकाशरूपस्यात्मनोऽप्रकाशकत्वं किन्तु ज्ञानावृत्तिवशत एव, उक्तं हि-

"तत्र ज्ञानावरणीयं नाम कर्म भवति येनास्य।
तत्पञ्चविधं ज्ञानमावृतं रविरिव मेघैस्तथा॥"

अथवा 'से नूनं'ति सेशब्दः प्रतिवचनयाचनोऽथशब्दस्यार्थे, स हि केनचित्किञ्चित्पर्यनुयुक्तः

तथाविधविमर्शाभावेन स्वयमजानन् कुत एतन्ममाज्ञानमिति चिन्तयन् गुरुवचनमनुसृत्यात्मानमात्मनैव प्रति वक्ति, 'मे' इत्यथ 'नूनं' निश्चितमेतत्, शेषं प्राग्वत् । आह- यदि पूर्वं कृतानि कर्माणि किं न तदैव वेदितानि ?, उच्यते, अथेति वक्तव्यान्तरोपन्यासे 'पश्चाद' अन्याभोत्तरकालम् 'उदीयन्त' विपच्यन्ते कर्माण्यज्ञानफलानि कृतानि, अलर्कमूषिकविषविकारवत् तथाविधद्रव्यसान्निध्यादेव तेषां विपाकदानात्, ततस्तद्विघातायैव यत्नो विधेयो न तु विषादः, 'एवम्' अमुना प्रकारेण 'आश्वासय' स्वस्थीकुरु, कम् ?, आत्मानं, मा वैक्लव्यं कृथा इत्यर्थः, उक्तमेव हेतुं निगमयन्नाह- ज्ञात्वा कर्मविपाकं, कर्मणां कुत्सितविपाकम् ।

स्थं प्रज्ञाऽपकर्षमाश्रित्य सूत्रद्वयं व्याख्यातम्, एतदेव तदुत्कर्षपक्ष एवं व्याख्यायते- प्रज्ञोत्कर्षवतैवं परिभावनीयं- 'मे' इत्युपन्यासे नूनं मया पूर्वं 'कर्माणि' अनुष्ठानानि ज्ञानप्रशंसादीनि, ज्ञानमिह विमर्शपूर्वको बोधः, तत्फलानि कृतानि येनाहं ना अपिशब्दस्य लुप्तनिर्दिष्टत्वान्नाऽपि- पुरुषोऽप्यभिजानामि 'पृष्टः' पर्यनुयुक्तः 'केनापि' अविवक्षिततविशेषेण, सर्वेणापीत्यर्थः, 'कर्म्मिश्चिद' यत्र तत्रापि वस्तुनि, 'अथे'त्युत्कर्षानन्तरम्, 'अपत्थ'त्ति अपथ्यानि आयतिकटुकानि कर्माण्यज्ञानफलानि 'उदिज्जंति'त्ति सूत्रत्वान्निर्देश्यन्त्येनोदेष्यन्ति, वर्त्तमानसामीप्ये वर्त्तमानवद्वा इत्यनेन वर्त्तमानसामीप्ये वा लटि उदीर्यन्ते, सन्निहितकाल एवोदेष्यन्तीत्यर्थः, अयं चाशयः- उत्सेको हि ज्ञानावरणकारणमवश्यवेद्यं च तत्, तदुदये च कुतो ज्ञानम् ?, अनियते वाऽस्मिन्क उत्सेकः ?, इत्येवमालोचयन्नाश्वासय- प्रज्ञावलेपाविलुप्तचेतनमात्मानं स्वस्थीकुरु ज्ञात्वा कर्मविपाकम्, इह च तन्त्रन्यायेन युगपदर्थद्वयसम्भवः, तन्त्रं च दैर्घ्यप्रसारिताः तन्तवः, ततो यथा तदेकमनेकस्य तिरश्चीनस्य तन्तोः संग्रादि तथा यदेकेनानेकार्थस्याभिधानं स तन्त्रन्याय इति सूत्रद्वयार्थः ॥

अत्र सूत्रद्वारं, सूत्रं चागमः, अस्मिंश्च प्रस्तुतसूत्रसूचितमुदाहरणमाह-

नि.[१२०] उज्जेनी कालखमणा सागरखमणा सुवन्नभूमीए ।
इंदो आउयसेसं पुच्छइ सादिव्वकरणं च ॥

वृ. उज्जयनी कालक्षपणाः सागरक्षपणाः सुवर्णभूमौ इन्द्रः आयुष्कशेषं पृच्छति सादिव्यकरणं चेति गाथाक्षरार्थः ॥ भावार्थस्तु सम्प्रदायात् ज्ञातव्यः, स चायम्-

उज्जेनीए कालगायरिया बहुसुया, तेसिं सीसो न कोइ इच्छइ पढिउं, तस्स सीसस्स मोसो बहुसुओ सागरखमनो नाम सुवन्नभूमिए गच्छेणं विहरइ, पच्छा आयरिआ तत्थ पलाइउं गया सुवण्णभुमिं, सो य सागरखमनो अनुओगं कहइ, पन्नापरीसहं न सहइ, भणइ-खंता ! गयं एयं तुब्भ सुयखंधं ?, तेन भणइ-गयंति, तो सुण, सो सुणावेउं पयत्तो । ते य सेज्जायरनिबंधे कहिए तस्सिस्सा सुवन्नभूमि जतो चलिया, लोगो पुच्छति विदं गच्छंतं-को एस आयरिओ गच्छइ ?, तेन भणइ-कालगा आयरिया, तं जनपरंपरएण फुसंतं कोइं सागरसमनस्स संपत्तं, जहा- कालगा आयरिआ आगच्छंति, सागरखमनो भणइ-खंतग ! सच्चं मम पितामहो आगच्छति ?, तेन भण्णति-न जाणं, मयावि सुयं, आगया य साहुणो, सो अब्भुट्ठिओ, सो तेहिं साधूहिं भन्नति-खमासमणा केइ इहागया ?, पच्छा सो संकिओ भणइ-खंतो परं इक्को आगओ, न उन जाणामि खमासमणा, सो पच्छा खामेंति, भणति-मिच्छामिदुक्कडं जं एत्थ मए आसादिया,

पच्छा भणति-खमासमणा ! केरिसं अहं वक्खाणेमि ?, खमासमणेण भण्णति-लट्ठं, किन्तु मा गव्वं करेह, को जाणति ?, कस्स को आगमोत्ति ?, पच्छा धूलिणाएण चिक्खल्लपिंडएण य आहरणं करेंति। न तहा कायव्वं जहा सागरखमणेण कयं। ताण अज्जकालगाण समीवं सक्को य आगंतुं निओयजीवे पुच्छति, जहा अज्जरक्खियाणं तहेव जाव सादिव्वकरणं च। इदं च प्रज्ञासद्भावमङ्गीकृत्योदाहरणमुक्तं, तदभावे तु स्वयमभ्यूह्यमिति ॥ इदानीं प्रज्ञाया ज्ञानविशेषरूपत्वात्तद्विपक्षभूतत्वादज्ञानस्य तत्परीषहमाह, सोऽप्यज्ञानभावाभावाभ्यां द्विधैव, तत्र भावपक्षमङ्गीकृत्येदमुच्यते-

मू.(११) *निरट्ठगंमि विरओ, मेहुणाओ सुसंवुडो।*
जो सक्खं नाभिजाणामि, धम्मं कल्लाण पावगं ॥

मू.(१२) *तवोवहाणमादाय, पडिमं पडिवज्जओ।*
एवंपि मे विहरओ, छउमं न नियट्टति ॥

वृ. 'निरट्ठगंमि'त्ति अर्थः-प्रयोजनं तदभावो निरर्थं तदेव निरर्थकं तस्मिन् सति, 'विरतः' निवृतः, कस्मात् ?, मिथुनस्य भावः कर्म वा मैथुनम्-अब्रह्म तस्मात्, आश्रवान्तरविरतावपि यदस्योपादानं तदस्यैवातिगृद्धिहेतुतया दुस्त्यजत्वात्, उक्तं हि- "दुप्पच्चया इमे कामा" इत्यादि, सुष्ठु संवृतः सुसंवृतः-इन्द्रियनोइन्द्रियसंवरणेन, यः 'साक्षात्' इति परिस्फुटं नाभिजानामि 'धर्मं' वस्तुस्वभावं 'कल्लाण'त्ति बिन्दुलोपात्कल्याणं शुभं 'पापकं' वा तद्विपरीतं, वत्यस्य गम्यमानत्वात्, यद्वा धर्मम्-आचारं कल्यः-अत्यन्तनीरुक्तया मोक्षस्तमानयति (अर्णाति)-प्रज्ञापयतीति कल्याणो-मुक्तिहेतुस्तं, पापकं वा नरकादिहेतुम्, अयमाशयः-यदि विरतौ कश्चिदर्थः सिद्धेरेवं ममाज्ञानं भवेत्, कदाचित् सामान्यचर्ययैव न फलावाप्तिरत आह-

तपो-भद्रमहाभद्रादि उपधानम्-आगमोपचाररूपमाचाम्लादि 'आदाय' स्वीकृत्य चरित्वेतियावत् 'प्रतिमां' मासिक्यादिभिक्षुप्रतिमां 'पडिवज्जिय'त्ति प्रतिपद्याङ्गीकृत्य, पठ्यते च-'पडिमं पडिवज्जओ'त्ति प्रांतपद्यमानस्य-अभ्युपगच्छतः, 'एवमपि' विशेषचर्ययाऽपि, आस्तां सामान्यचर्ययेत्यपि शब्दार्थः, 'विहरतो'त्ति निष्प्रतिबन्धत्वेनानियतं विचरतः छादयतीति छद्म-ज्ञानावरणादिकर्म 'न निवर्त्तते' नापैतीति भिक्षुः न चिन्तयेदित्युत्तरेण सम्बन्धः। अज्ञानाभावपक्षे तु समस्तशास्त्रार्थनिष्कनिकषोपलकल्पना(ता)यामपि न दर्पाध्मातमानसो भवेत्, किन्तु-

'पूर्वपुरुषसिंहानां विज्ञानातिशयसागरानन्त्यम्।
श्रुत्वा साम्प्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति ?. ॥'

इति परिभावयन् विगलितावलेपः सन्नेवं भावयेत्-'णिरट्ठयं' सूत्रद्वयम्, अक्षरगमनिका सैव, नवरं 'निरट्ठयंमिऽवि' निरर्थकेऽपि प्रक्रमात् प्रज्ञावलेपे रतो, मैथुनात् सुसंवृतः सन्निरुद्धात्मा सन् योऽहं 'साक्षात्' समक्षं नाभिजानामि धर्मं कल्याणं पापकं वा, अयमभिप्रायः-'जे एगं जाणति से सव्वं जाणति (जे सव्वं जाणति) से एगं जाणति'इत्यागमात् छद्मस्थोऽहमेकमपि धर्मं वस्तुस्वरूपं न तत्त्वतो वेद्मि, ततः साक्षाद्भावस्वभावावभासि चेत्र विज्ञानमस्ति किमितोऽपि मुकुलितवस्तुस्वरूपपरिज्ञानतोऽवलेपेनेति भावः, तथा तपउपधानादिभिर-

प्युपक्रमणहेतुभिः उपक्रमयितुशक्ये छद्मनि दारुणे वैरिणि प्रवर्तति कः किल ममाहङ्कारावसर इति। साम्प्रतमावृत्त्या पुनः सूत्रद्वारमङ्गीकृत्य प्रकृतसूत्रोपक्षिप्तमज्ञानसद्भाव उदाहरणमाह-

नि.[१२१] परितंतो वायणाए गंगाकूले पिया असगडाए।
संवच्छरेहऽहिज्जइ बारसहि असंखयज्झयणं ॥

वृ. 'परितान्तः' खिन्नो वाचनया गङ्गाकूले पिताऽशकटाया: संवत्सरैरधीते द्वादशाभिरसंस्कृताध्ययनमिति गाथाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्

गंगाकूले दोन्नि साहू पव्वइया भायरो, तत्थ एगो बहुसुतो एगो अप्पसुतो, तत्थ जो सो बहुसुतो सो सीसेहिं सुत्तत्थनिमित्तमुवसप्पंतेहिं दिवसतो विरेगो नत्थि, रत्तिंपि पडिपुच्छणसिज्झणगाहिं सुइयं न लहइ जो सो अप्पसुतो सो रत्तिं सव्वं सुयइ। अन्नया कयाई सो आयरिओ निद्दापरिखेदितो चिंतेति-अहो मे भाया पुण्णवंतो जो सुयइ, अम्हं पुण मंदपुण्णाणं सुइउंपि न लब्भइ, तेन नाणावरणिज्जं कम्मं बद्धं, सो तस्स ठाणस्स अणालोइयपडिक्कंतो कालमासे कालं किच्चा देवलोएसु उववन्नो। तओ चुतो इहेव भारहे वासे आहीरघरे दारतो जातो, कमेण वड्ढितो जोव्वणत्थो वीवाहितो, दारिया जाया, अतीव रूववती, सा य भद्दकन्नया।

कयाइ ताणि पियापुत्ताणि अन्नेहिं आहीरेहिं समं सगडं भरेऊण नगरिं विक्किनणट्ठा पत्थिआणि, सा य कन्नया सारत्थं तस्स सगडस्स करेइ, ततो ते गोवदारया तीए रूवेणाक्खित्ता तीसे सगडस्स अब्भासयाइं सगडाइं खंडंति तं पलोइंता, ताइं सव्वाति सगडाति उप्पेणं भग्गाइं, तओ तीए नामं कयं-असगडत्ति, असगडाए पिया असगडपिया। तस्स तं चेव वेरग्गं जायं, ते दारियं परिणावेउं सव्वं च घरसारं दाऊण पव्वतितो।

तेन तिन्नि उत्तरज्झयणाणि जाव अहीयाणि, ताव असंखे उद्दिट्ठे तं नाणावरणं कम्ममुदिन्नं, गया दो दिवसा अंबिलछट्ठेणं, न एगो सिलोगो ठाति, आयरिएहिं भन्नति-उद्देहि जा एयमज्झयणमसंखयमणुन्नविज्जति, सो भणति-एयस्स केरिसो जोगो ?, आयरिया भणंति-जाव न उद्देति ताव आयंबिलं, सो भणति-अलाहि मे अणुन्नाए नं, एवं तेन अदीनेन आयंबिलाहारेणं बारसहिं संवच्छरेहिमहिज्झियमज्झयणमसंखयं, खविअं तं कम्मं, सेसं लहुं चेव अहिज्जियं ॥ एवमज्ञानपरीषहः सोढव्यः, प्रतिपक्षे च भौमद्वारं, तत्राप्येतत्सूत्रसूचितमिदमुदाहरणं-

नि.[१२२] इमं च एरिसं तं च तारिसं पिच्छ केरिसं जायं ?।
इय भणइ थूलभद्दो सन्नाइघरं गओ संतो ॥

वृ. 'इदं चे'ति द्रव्यम् 'ईदृशमि'ति स्तम्भमूलस्थितमतिप्रभृतं च, अतिशयज्ञानित्वेन तस्य हृदि विपरिवर्त्तमानतया द्रव्यस्येदया निर्देशः, 'तच्चे'ति तस्याज्ञानतः परिग्राहं 'तादृशमि'ति विप्रकृष्टदुर्गदेशान्तरविषयं, पश्य की दृशं ? केन सदृशं ? जातं, न केनापि, कश्चिद्गहे सति द्रव्ये द्रव्यार्थी बहिर्भ्राम्यति ?, इति भावः, 'इती'त्येवं भणति स्थूलभद्रः 'स्वज्ञातिः' अत्यन्तसुहृत्तदगृहं गतः सन्निति गाथार्थः ॥ सम्प्रदायश्चात्र-

थूलभद्दो आयरिओ बहुसुतो, तस्स एगो पुव्वि मित्तो होत्था, सन्नायगोऽवि य। सो सूरो विहरंतो तस्स घरं गतो महिलं पुच्छति-सो अमुको कहिं गतोत्ति ?, सा भणइ-वाणिज्जेणं, तं च घरं पुव्वि लद्धं आसि, पच्छा सडियपडियं जायं, तस्स पुव्विल्लएहिं एगस्स खंभस्स हेट्ठा

भूमीए दव्वं निहेज्जयं, तं सो आयरितो नाणेन जाणति, पच्छा तेनं तओहुत्तं हत्थं काउं भण्णति-'इमं च एरिसं तं च चारित्तमित्यादिगाथा' इमं च एरिसं दव्वजायं, सो अन्नाणेणं भमइ, एवं च भणमाणे जनो जाणति, जहा-घरमेव पुव्विं लट्ठं इयाणिं तु खडियपडियं दट्ठुं अभिच्चयाणि-रूवणत्थं भयवं दंसेइ। सो य आगतो, महिलाए सिट्ठं-जहा थूलभद्दो आगतो आसि, सो भणति थूलभद्देण किंचि भणियं ? न किंचि, नवरं खंभहुत्तं हत्थं दावंतो भणियाइओ-'इमं च एरिसमित्यादि' तेन पंडरिए नायं-जहा एत्थ अवस्सं किंचि अत्थि, तेन खाणियं जाव नानापगारारयनान भरियं कलसं पेच्छइ। तेन नानापरीसहो नाहियासिओ। नैवं शेषसाधुभिः कर्त्तव्यम्। इह च प्रज्ञाज्ञानयोर्भावाभावाभ्यां सूत्रे परीषहत्वेनोपवर्णनं निर्युक्तौ चाज्ञानपरीषह तथैवदोदहारणद्वयोपवर्णनमन्यत्रापि यथासम्भवमेवं भावनीयमिति ज्ञापनार्थं ॥

साम्प्रतमज्ञानादर्शनेऽपि संशयीत कश्चिदिति तत्परीषहमाह-

सू. (१३) नत्थि नूनं परे लोए, इड्ढी वावि तवस्सिणो।
अदुवा वंचिओमित्ति, इइ भिक्खू न चिंतए ॥

वृ. 'नास्ति' न विद्यते 'नूनं' निश्चितं 'परलोको' जन्मान्तरमित्यर्थः, भूतचतुष्टयात्मकत्वाच्छरीरस्य, तस्य चेहैव पातात्, चैतन्यस्य च भूतधर्मभूतत्वात्, तदतिरिक्तस्य चात्मनः प्रत्यक्षतोऽनुपलभ्यमानत्वात्, 'ऋद्धिर्वा' तपोमाहात्म्यरूपा, अपिः पूरणे, कस्य ? -तपस्विनः, सा च आमर्शौषध्यादिः-

'पादरजसा प्रशमनं सर्वरुजां साधवः क्षणात्कुर्युः।
त्रिभुवनविस्मयजननान् दर्शुः कामांस्तृणायग्राह्या ॥१॥
धर्माद्तलोन्मिश्रितकाञ्चनवर्षादिसर्गसामर्थ्यम्।
अद्भुतभीमोरुशिलासहस्रसम्पातशक्तिश्च ॥२॥'

इत्यादिका च, तस्या अप्युपलभ्यमानत्वादिति भावः, 'अदुव'त्ति अथवा, किंबहुना ?-वञ्चितोऽस्मि भोगानामिति गम्यते 'इति'त्यमुना शिरस्तुण्डनोपवासादिना यातनात्मकेन धर्मानुष्ठाने, उक्तं च-"तपांसि यातनाश्चित्राः, संयमो भोगवञ्चना" इत्यादि, 'इति'त्यनन्तरमुपदर्शितं भिक्षुः 'न चिन्तयेत्' न ध्यायेत्, परिफल्गुरूपत्वादस्य, तथाहि-यत्तावदुक्तं 'भूतचतुष्टयात्मकत्वाच्छरीरस्य जन्मान्तराभाव' इति, तदसत्, न हि शरीरस्य जन्मान्तरानुयायित्वमभ्युपाभिरुच्यते, किन्त्वात्मनः, न च भूतधर्म्म एव चैतन्ये आत्मव्यपदेशः, तस्य तद्धर्मत्वेनोत्तरत्र निषेत्स्यमानत्वात्, यदपि ऋद्धिर्वा तपस्विनो नास्ति, तदपि वचनामात्रमेव, अथात्मनऋद्धिनां चाभावे अनुपलभ्यो हेतुरुक्तः, सोऽपि स्वसम्बन्धी सर्वसम्बन्धी वा ?, तत्र न तावदात्मनोऽभावो स्वसम्बन्ध्यनुपलम्भो हेतुः, स्वयं तस्य घटादिवदुपलभ्यमानत्वात्, यथैव हि घटादिगता रूपादया उपलभ्यन्ते, तथा आत्मगता अपि ज्ञानसुखादय इति नात्र महदन्तरमुत्पश्यामः, उक्तं चाश्वसेनवाचकेन-"आत्मप्रत्यक्ष आत्माऽय"मित्यादि, अथायं न दृग्गोचर इति नास्तीत्युच्यते, नायमप्येकान्तो, यतस्तेनैवोक्तम्-"न च नास्तीह तत् सर्वं चक्षुषा यन्न गृह्यते" अन्यथा चैतन्यमपि न दृग्गोचर इति तस्याप्यसत्त्वं स्यात्, अथ तत् स्वसंविदितमिति मदुच्यते, अयमपि तथाभूत

एवेति सत्यास्तु, उक्तं हि-

अस्त्येव चात्मा प्रत्यक्षो, जीवो ह्यात्मानमात्मना ।
अहमस्मीति संवेत्ति, रूपादीनि यथेन्द्रियैः ॥"

इति, किं बहुना ?, यथा चैतन्यमस्तीत्यभ्युपगम्यते तथाऽऽत्माप्यभ्युपगन्तव्यः, तथा चाह-

"ज्ञानं स्वस्थं परस्थं वा, यथा ज्ञानेन गृह्यते ।
ज्ञाता स्वस्थः परस्थो वा, तथा ज्ञानेन गृह्यताम् ॥"इति,

अथ सर्वसम्बन्ध्यनुपलम्भ आत्माभावे हेतुः, अयमप्यसिद्धः, अहमस्मीति प्रत्ययेन प्रतिप्राणि स्वात्मनः केवलिनां च सर्वात्मनामुपलम्भस्य प्रतिषेद्धुमशक्यत्वात्, । एवमृद्धीनामप्यभावे सर्वसम्बन्ध्यनुपलम्भोऽसिद्धः स्वसम्बन्धी तु नियतदेशकालोपेक्षोऽन्यथा वा ?, प्रथमपक्षे को वा किमाह ?, कश्चित्कदाचित्तासामनुपलम्भस्य (उपलम्भस्य) चास्माकमपि संमतत्वात्, द्वितीयपक्षे पुनरनैकान्तिकता, देशादिविप्रकृष्टानामनुपलम्भेऽपि सत्त्वात्, दृश्यते च क्वचिन्न कदाचित् चरणरेणुस्पर्शादितो गोगोपशमादि, ततश्चेहापि कालान्तरे महाविदेहादिषु सर्वकालमृद्धन्तराणामपि सम्भवस्यानुमीयमानत्वात्, यदपि-वञ्चितोऽस्मीति भोगसुखानामनेन शिरस्तुण्डमुण्डनोपवासादिना यातनात्मकेन धर्मानुष्ठानेनेति, तदप्यसमीक्षिताभिधानं, भोगसुखानां दुःखानुषक्तत्वेन तत्त्ववेदिनामनादेयत्वात्, तथा च वात्स्यायनोऽप्याह-"तद्यथा-विषयसम्पृक्तमन्नमनादेयमेवं दुःखमानुषक्तं सुखमनादेय" मिति, प्रयोगश्च-यद्विपक्षानुविद्धं न तत्तत्त्वतस्तदेव, यथा विषव्याप्तिश्रमन्नम्, अतृप्तिकाङ्क्षाशोकादिनिमित्तं च वैषयिकं सुखं, न चास्यासिद्धता, कालत्रये यथायोगमतृप्त्यादीनां प्रतिप्राणि स्वसंविदितत्वात्, नापि तपसो यातनात्मकत्वं, मनइन्द्रिययोगानामहान्यैव तत्प्रतिपादनात्, उक्तं हि-

"मनइन्द्रिययोगानामहानिश्चोदिता जिनैः ।
यतोऽत्र तत्कथं तस्य, युक्ता स्यात् दुःखरूपता ? ॥"

शिरस्तुण्डमुण्डनादेश्च किञ्चित्पीडात्मकत्वेऽपि समीहितार्थसम्पादकत्वेन न दुःखदायकता,

"दृष्टा चेष्टार्थसंसिद्धौ, कायपीडाऽप्यदुःखदा ।
रत्नादिवणिगादीनां, तद्वदत्रापि भाव्यताम् ॥"

प्रयोगश्च-यदिष्टार्थप्रसाधकं न तत्कायपीडात्मकत्वेऽपि दुःखदायि, यथा रत्नवणिजामध्वश्रमादि, इष्टार्थप्रसाधकं च तपः, न चास्याप्यसिद्धता, प्रशमहेतुत्वेन तपसस्तत्परिपक्वतारतम्यात्परमानन्दतारतम्यस्यानुभूयमानत्वेन तत्प्रकर्षे तस्यापि प्रकर्षानुमानात् प्रयोगश्च-यत्तारतम्येन यस्य तारतम्यं तस्य प्रकर्षे तत्प्रकर्षः, यथाऽग्नितापप्रकर्षे तपनीयविशुद्धिप्रकर्षः, अनुभूयते च प्रशमतारतम्येन परमानन्दतारतम्यं, लोकप्रतीतत्वाच्चेति सूत्रार्थः ॥ तथा-

मू. (१४) *अभू जिना अत्थि जिना, अदुवावि भविस्सइ ।*
मुसं ते एवमाहंसु, इति भिक्खू न चिंतए ॥

व्. 'अभूवन्' आसन् 'जिनाः' रागादिजेतारः, अस्तीति विभक्तिप्रतिरूपको निपातः, ततश्च विद्यन्ते जिनाः, अस्य कर्मप्रवादपूर्वससदशप्रभाभृतोद्धततया वस्तुतः सुधर्मस्वामिनैव जम्बुस्वामिनं प्रति प्रणीतत्वात्, तत्काले च जिनसम्भवदित्थमुक्तं, विदेहादिक्षेत्रान्तरापेक्षया

वेति भावनीयं, 'अदुवे'ति अथवा, अपिः भिन्नक्रमो 'भविस्सइ'त्ति वचनव्यत्ययाद्भविष्यन्ति, जिना इत्यपि 'मृषा' अलीकं, 'ते' जिनास्तित्ववादिनः, 'एवम्' अनन्तरोक्तन्यायेन 'आहंसु'त्ति आहुः ब्रुवत इति भिक्षुर्न चिन्तयेत्, जिनस्य सर्वज्ञाभिप्रायप्रतिक्षेपादिषु प्रमाणोपपन्नतया प्रतिपादनात्, तदुपदेशमूलत्वाच्च सकलैहिकामुष्मिकव्यवहाराणामिति सूत्रार्थः ॥ इदानीं शिष्यागमनद्वारं, तत्र च 'नत्थि नूणं परे लोए' इति सूत्रावयवसूचितमुदाहरणमाह-

नि.[१२३] ओहाविउकामो ऽवि य अज्जासाढो उ पणीयभूमीए।
काऊण गयरूवं पच्छा सीसेण अनुसिट्ठो ॥

वृ. 'अवधावितुकामोऽपि' उत्प्रव्रजितुकामोऽपि, चः पूरणे, आर्याषाढस्तु 'पणितभूमौ' व्यवहारभूमौ हट्टमध्य इत्यर्थः, कृत्वा राजरूपं पश्चाच्छिष्येणानुशिष्ट इति गाथाक्षरार्थः ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्-अत्थि वच्छाभूमीए अज्जासाढा नामायरिया बहुस्सुया बहुसीसपरिवारा य, तत्थ गच्छे जो कालं करेइ तं निज्जावेंति भनपच्चक्खाणाइणा, तो बहवो निज्जामिया। अन्नया एगो अप्पायुः सीसो आयरहेउं [illegible]-देवगतो आगंतूण मज्झदारेणं देज्जासु, न य सो आगतो वक्खित्तचित्तत्तणओ, पच्छा सो चिंतेइ-सुबहुं कालं किलिट्ठोऽहं, सलिंगेणं चेव ओहावइ, पच्छा तेन सीसेण देवलोगगएण आभोइतो, पेच्छइ-ओहावेंतं, पच्छा तेन तस्स पहे गामो विउव्वितो, नडपेच्छा य, सो तत्थ छम्मासे पेक्खंतो अच्छितो, न छुहं न तण्हं कालं वा दिव्वप्पभावेण वेएति, पच्छा तं संहरिउं गामस्स बाहिं विजने उज्जाणे छद्दाए सव्वालंकारविभूसिए विउव्वति संजमपरिक्खत्थं, दिट्ठो तेन ते, गिण्हामि एसिमाहरणगाणि, वरं सुहं जीवंतोत्ति, सो एगं पुढविदारयं भणइ- आनेहि आभरणगाणि, सो भणइ- भगवं! एगं ताव मे अक्खाणयं सुणेहि, तओ पच्छा गिण्हिज्जासि, भणइ-सुणेमि, सो भणइ-एगो कुंभकारो, सो मट्टियं खणंतो तडीए अक्कंतो, सो भणइ-

नि.[१२४] जेन भिक्खं बलिं देमि, जेन पोसेमि नायए।
सा मे मही अक्कमइ, जायं सरणओ भयं ॥

वृ. 'जेन'त्ति प्राकृतशैल्या यया भिक्षां बलिं ददामि, यथाक्रमं भिक्षुदेवेभ्य इति गम्यते, 'जेन'त्ति यया पोषयामि 'नायए'त्ति ज्ञातीन्, सा 'मे'त्ति मां मही 'आक्रामति' अवष्टभ्नाति 'जातम्' उत्पन्नं, शरणतो भयम् इति श्लोकार्थः ॥ अयमिहोपनयः-चौरभयादहं भवन्तं शरणमागतः, त्वं च एवं विलुम्पसि, ततो ममापि जातं शरणतो भयम्, एवमुत्तरत्राप्युपनया भावनीयाः, तेन भणइ-अइपंडियवाइतोऽसित्ति घेत्तूण आभरणगाणि पडिग्गहे छूढाणि। गओ पुढविकाइतो, इदानिं आउक्काओ बीओ, सोऽपि अक्खाणयं कहेइ-जहा एगो तालायरो कहाकहओ पाडलओ नाम, सो अन्नया गंगं उत्तरंतो उवरि वुट्ठोदएण हीरति, तं पासिऊण जनो भणइ-

नि.[१२५] बहुस्सुयं चित्तकहं, गंगा वहइ पाडलं।
वुज्झमाणग! भद्दं ते, लव ता किंचि सुहासियं ॥

वृ. 'बहुश्रुतं' बहुविद्यं 'चित्रकथं' नानाकथाकथकं गङ्गा वहति 'पाडलं' पाटलनामकम्, उह्यमानक! भद्रं ते, 'लप' ब्रूहि 'ता' इति तावद्यावदद्यापि दूरं न नीयस इति भावः, 'किञ्चित्' अल्पं 'सुभाषितं' सूक्तमिति श्लोकार्थः ॥ सोऽवादीत्

नि.[१२६] जेन रोहंति बीयाणि, जेन जीयंति कासया।
तस्स मज्झे विवज्जामि, जा० ॥

वृ. 'येन' जलेन 'रोहन्ति' प्रादुर्भवन्ति बीजानि, येन 'जीवन्ति' प्राणधारणं कुर्वन्ति कर्षकाः' कृषीबलाः तस्य मध्ये 'विवर्जयामि' त्ति विपद्ये म्रिये, जातं शरणतो भयमिति श्लोकार्थः ॥ तस्सवि तहेव गिण्हति एस आउक्कातो गतो, इयाणिं तेउक्कातो तइतो, तहेव अक्खाणयं कहेइ- एगस्स तावसस्स अग्गिणा उडओ दड्ढो, पच्छा सो भणति-

नि.[१२७] जमहं दिया य राओ य, तप्पेमि महुसप्पिसा।
तेन मे उट्टओ दड्ढो, जा० ॥

वृ. यमहं दिवा च रात्रौ च 'तर्पयामि' प्रीणयामि मधुसर्पिषा, तेनार्थादग्निना मे 'ओटजः' तापसाश्रमो दग्धो, जातं शरणतो भयमिति श्लोकार्थः ॥ अथवा-

नि.[१२८] वग्घस्स मए भीएणं, पावगो सरणं कओ।
तेन दड्ढं ममं अंगं, जा० ॥

वृ. 'वग्घस्स' त्ति मुख्यलोपात् 'व्याघ्रात्' पुण्डरीकात् मया भीतेन 'पावकः' अग्निः शरणीकृतः, तेनाङ्गंशरीरं मम दग्धं, जातं शरणतो भयमिति श्लोकार्थः ॥ तस्सवि तहेव गिण्हइ। एस तेउक्काओ, इदानिं वाउक्काओ चउत्थो, तहेव अक्खाणयं कहेति- जहा एगो जुवाणो घननिचियसरीरो, सो पच्छा वाएहिं गहितो, अन्नेन भण्णति-

नि.[१२९] लंघणपवणसमत्थो पुव्वं होऊणअ संपइं कीस ?।
दंडयगहियग्गहत्थो वयंस ! को नामओ वाही ?।

वृ. लङ्घनम् उत्प्लुत्य गमनं प्लवनं धावनं तत्समर्थः पूर्वं भूत्वा साम्प्रतं 'कीस' त्ति कस्मात्, 'दण्डगयहियग्गहत्थो' त्ति प्राकृतत्वात् गृहीतदण्डाग्रहस्तो, गच्छसीति गम्यते, तदयं ते वयस्य ! किंनामको व्याधिरिति गाथार्थः ॥ स प्राह-

नि.[१३०] जिट्ठासाढेसु मासेसु, जो सुहो वाइ मारुओ।
तेन मे भज्जए अंगं, जा० ॥

वृ. ज्येष्ठाषाढयोर्मासयोर्यः शुभशैत्यादिगुणान्वितत्वेन शोभनो वाति 'मारुतो' वायुः, तेन (मे मम) भज्यतेऽङ्गं, तस्य मेघोन्नतिसम्भवत्वेन वातप्रकोपादिति भावः, एवं च जातं शरणतो भयं, धर्म्मार्हितानां हि शरणमयमिति श्लोकार्थः ॥ अथवा-

नि.[१३१] जेन जीवंति सत्ताणि, निगोहंमि अनंतए।
तेन मे भज्जए अंगं, जायं० ॥

वृ. 'जेन' इत्यादि, येन वातेन जीवन्ति सत्त्वानि 'निगोदे' प्रक्रमाद्वातस्य 'अनन्तके' अपरिमिते, तेन मे भज्यतेऽङ्गं जातं शरणतो भयमिति श्लोकार्थः ॥ तस्सवि तहेव गिण्हइ। एस वाउक्काओ गतो, इयाणिं वणस्सइकाइतो पंचमो, तहेव अक्खायं कहेति, जहा एगंमि रुक्खे केसिंपि सउणाण आवासो, तहियं पिल्लगाणि जायाणि, पच्छा रुक्खाब्भासाओ वल्ली उट्ठिया, रुक्खं वेढंती उवरिं विलग्गा, वेल्लीअनुसारेण सप्पेण विलग्गिऊण ते पिल्लगा खइया, पच्छा सेसगा भणन्ति-

नि.[१३२] जाव वुच्छं सुहं वुच्छं, पादवे निरुवद्दवे ।
मूलाउ अट्ठिया वल्ली, जा० ॥

वृ. यावदुषितं सुखमुषितं पादपे निरुपद्रवे, इदानीं मूलादुत्थिता वल्ली ततो वृक्षादेव तत्त्वतो भयं, स चोक्तनीत्या शरणमिति जातं शरणतो भयमिति श्लोकार्थः ॥ तस्सवि तहेव गिण्णइ। एस वणस्सतिकातो गतो, इदानिं तसकाओ छट्ठो, तहेव अक्खाणयं कहेइ -जहा एकं नगरं परचक्केण रोहियं, तत्थ य बाहरियाए मायंगा, ते अब्भिंतरएहिं नीणिज्जंति, बाहिं परचक्केण घेप्पंति, पच्छा केनवि अन्नेण भण्णति-

नि.[१३३] अब्भिंतरया खुभिया, पिल्लंति(य) बाहिरा जना ।
दिसं भयह मायंगा !, जा० ॥

वृ. 'अभ्यन्तरकाः' नगरमध्यवर्त्तिनः 'क्षुभिताः' परचक्रात्रस्ताः 'प्रेरयन्ति' निष्काशयन्ति, मा भूदत्रादिक्षय एभ्यो वा भेदः, चशब्दो भिन्नक्रमः, ततो 'बाह्याश्च' परचक्रलोका उपद्रवन्ति, भवत इति गम्यते, नगरसत्का एत इति, अतो दिशं भजत मातङ्गाः !, यतो जातं शरणतो भयं, नगरं हि भवतां शरणं, तत एव भयमिति श्लोकार्थः ॥ अथवा एगत्थ-नयरे समंसेव राया चोरो पुरोहिओ अंडिओ (डइलोत्ति), ताहे तेनवि खिज्जंति, चक्कस्स नाओ अन्नमन्नं भणति-

नि.[१३४] जत्थ राया सयं चोरो, भंडिओ य पुरोहिओ ।
दिसं भयह नायरिया !, जायं० ॥

वृ. यत्र राजा स्वयं चौरः स्वपुरं मुष्णाति, भण्डकश्च पुरोहितः, अतो दिशं भजत नागरका! जातं शरणतो भयमिति श्लोकार्थः ॥

अहवी एगस्स धिज्जातियस्स धूया, सा य जोव्वणत्था, पडिरूवदंसणिज्जा, सो धिज्जातितो तं पासिऊण अज्झोववन्नो, तीसे कएण अतीव दुब्बली भूतो, बंभणीए पुच्छीतो-निव्वंधे कए कहियं, ताए भन्नति-मा अधिइं करेसं, तहा करेमि जहा कंणइ पओएण संपत्ती हवति, पच्छा धूयं भणइ-अम्ह पुव्वि दारियं जक्खा भुंजंतिय पच्छा वरस्स दिज्जइ, तो तव काल-पक्खचउद्दसीए जक्खो एही, मा तं विमाणेसु, मा य तत्थ तुमं उज्जोयं काहिसि, तीएवि जक्ख-कोउहल्लेण दीवओ सरावेण ढवितो नीतो, सो य आगतो, सो तं परिभुंजिऊण रत्तिं किलंतो पासुत्तो, इमाए कोउएण सरावं फेडियं, नवरं पेच्छइ पियरं, ताए नायं-जं होउ तं होउ, इच्छाए भुंजामि भोए, पच्छन्न ताइं रहकिलंताइं उग्गए सूरे न पडिबुज्झंति, पच्छा बंभणी मागहियं भणइ-

नि.[१३५] अइरुग्गयए य सूरिए, चेइयथूभगए य वायसे ।
भित्तीगयए य आयवे, सहि ! सुहिओ हु जनो न बुज्झइ ॥

वृ. अचिरोद्गतके च सूर्ये, कोऽभिप्रायः ?-प्रथमोदिते रवौ, चैत्यस्तूपगते च वायसे, अनेनोच्चे विवखतीत्याह, भित्तिगते चातपे, अमेन चोच्चतरइति, सखि! सुखितो हुर्वाक्यालङ्कारे जनो 'न बुध्यते' न निद्रां जहाति, अनेनात्मनो दुःखितत्वं प्रकटयति, सा हि भर्तृविरहदुःखिता रात्रौ न निद्रा लब्धवतीति मागधिकार्थः ॥ पच्छा सा तीसे धूया पडिसुणित्ता पडिभणति मागहियं-

नि.[१३६] तुम एव य अम्म हे ! लवे, मा हु विमाणय जक्खमागयं ।
जक्खहडए हु तायए, अत्ति दानि विमग्ग तायगं ॥

वृ. त्वमेव चाम्ब ! मातः हे इत्यामन्त्रणे 'अलापीः' उक्तवती शिक्षासमये यथा - 'मा हु'त्ति मैव 'विमाणय'त्ति विमेम्या विमुखं कृथा यक्षमागतं, यक्षाहृतको 'हु'त्ति खलु तातको ऽन्यमिदानीं 'विमार्गय' अन्वेषय तातकमिति मागधिकार्थः ॥ पच्छा सा भिज्जाइणी भणइ-

नि.[१३७] नवमास कुच्छीइ धालिया, पासवणे पुलिसे य मद्दिए।
धूया मे गेहिए हडे, सलणए असलणए य मे जायए ॥

वृ. नव मासान् कुक्षौ धारिता या, प्रश्रवणं पुरीषं च मर्दितं यस्या इति गम्यते, 'धूय'त्ति दुहिता च, गम्यमानत्वात्तया, 'मे' मम 'गेहको' भर्त्ता 'हृतः' चौरितो ऽतो हेतोः, शरणकमशरणकम्, अपकारित्वान्मे जातमिति मागधिकार्थः ॥ अहवा एगेण भिज्जाइएण तलायं खणाविय, तत्थेव पालोए दसे देउलमागमो चेवायाओ, सो य भित्तूण अप्पनिज्जेहिं पुत्तेहिं तस्स चेव तलाए जत्ते मारिउं निज्जति, सो य जाईस्सरो निज्जमाणो अप्पनिज्जियाएभासाए वुव्वुयइ अप्पणा चेव सोयमाणो, जहा मम चेव मए पवत्तियं, एवं सो वेवमाणो साहुणा अतिसयनाणिना एगेन दीसति, तेन भणियं-

नि.[१३८] सयमेव य लुक्ख लोचिया, अप्पानिया य वियडिं खाणिया।
ओवाइयलद्धओ य सि, किं छेला ! वेवेति वाससी ? ॥

वृ. स्वयमेव च आत्मनैव च 'रुक्ख'त्ति सुब्लोपाद्वृक्षा रोपिताः, भवतेति गम्यते, आत्मीया च 'वियडिं'त्ति देशीवचनतः तडागिका खानिता, याचितस्य-प्रार्थितस्य प्राप्तेरुपरि देवेभ्यो देयमुपयाचितं तेनैव लब्धः-अवसरः दुरापत्वेनोपयाचितलब्धः स एवोपयाचितलब्धको ऽसि त्वमिति, किं छगलक ! 'वेवेति वाससि ?- आरसस्वीति मागधिकार्थः ॥

ततो सो छगलको तेन पढिएणं तुण्हिक्को ठिओ, तेन भिज्जाइएण चिंतियं- किंपि पव्वइयएण पढियं, तेन एस तुण्हिक्को ठिओ, तओ सो तवस्सिं भणति- किं भगवं ! एस छगलको तुब्भेहिं पढियमेत्ते चेव तुण्हिक्कोठिओ, तेन साहुणा तस्स कहियं- जहा एस तुब्भ पिया, किमभित्राणं ?, तेन भणियं- अहंपि जाणामि, किं पुण एसो कहिहिइ, तेन छगलगेण पुव्वभवे पुत्तेण समं निहाणगं निहियं, तं गंतूणं पाएहिं खडखडेइ, एयमभिन्नाणं, पच्छा तेन मुक्को, साहुसमीवे धम्मं सोउण भत्तं पच्चक्खाएऊण देवलोयं गतो। एवं तेन सरणमिति काउं तडागारामे जण्णो य पवत्तिओ, तमेव असरणं जायं। एवंविधो ऽत्र समवतारः- एवं तुम्हं अम्हे गया सरणं। इह च पूर्वकं मनुष्यजातेस्त्रसस्य स्मरणार्थमुदाहरणत्रयमिदं तु तिर्यग्जातेरिति भावनीयम्। सो तहेव तस्स आहरणगाणि घित्तूण सिग्घं गंतुं समाढत्तो पंथे, नवरिं संजइं पासति मंडियंटिविडिक्कियं, तेन सा भण्णइ-

नि.[१३९] कडए ते कुंडले य ते, अंजियक्खि ! तिलयते य ते।
पवयणस्स उड्डाहकारिए। दुट्ठा सेहि ! कताऽसि आगया ? ॥

वृ. कटकौ च 'ते' तव कुण्डले च ते अञ्जिताक्षि ! तिलकश्च 'ते' त्वया कृतः, प्रवचनस्य उड्डाहकारिके। दुष्टशिक्षिते कुतो ऽस्यागतेति मागधिकार्थः ॥ दर्शनपरीक्षार्थं च साध्वीविकरणं। सैवमुक्ता सतीदमाह-

नि.[१४०] राईसरिसवमित्ताणि, परछिद्दाणि पाससि।

अप्पणो बिल्लमित्ताणि, पासंतो ऽवि न पासति ॥

वृ. राजिकासर्षपमात्राणि परच्छिद्राणि पश्यन्यात्मनो बिल्वमात्राणि पश्यन्नपि न पश्यतीति श्लोकार्थः ॥ तथा-

नि.[१४१] समणो ऽसि संजओ असि, बंभयारी समलेट्ठुकंचणे ।
विहारियक्खाओ य ते, जिट्ठज्ज ! किं ते पडिग्गहे ॥

वृ. श्रमणो ऽसि बहिर्वृत्त्या ब्रह्मचारी समलोष्टकाञ्चनो विहारिकाख्यातकश्च ते - यथाऽहं पुणो ऽवि गच्छति, नवरं पेच्छति खंधावारमितं, तस्स किर नीवट्टमाणो दंडियस्सेव सवडहुत्तो गतो, तेन हत्थिखंधा ओरुहिता वंदितो भणिओ य भयवं ! अहो परमं मंगलं निमित्तं च जं साहू अज्ज मए दिट्ठो, भयवं ! ममानुग्गहत्थं फासुयाएसणिज्जं इमं मोयगादि संबलो घेप्पति, सो निच्छइ, भायणे आभरणगाणि छूढाणि मा दीसिहिंति, तेन दंडिएण बला मोडिऊण पडिग्गहो गहिओ, जाव मोयगे छुहति तावे पेच्छइ आभरणयाणि, तेन सो खरंटिओ उबालद्धो य, पुणो ऽवि संबोहिआ- जहा न जुज्जइ तुम्हं एवं विपरिनामो, मज्झं च अनागमनकारणं सुणेसु-

"संकेतदिव्वपेमा विसयसत्ता ऽसमत्तकत्तव्वा ।
अणहीणमनुयकज्जा नरभवमसुहं न इंति सुरा ॥"

पच्छा दिव्वं देवरूपं काऊण पडिगतो । तेन पुव्वि दंसणपरीसहो नाहियासितो, पच्छा अहियासितो ॥ एवं शेषसाधुभिरपि सहनीयो दर्शनपरीषहः ॥ इहोदाहरणोपदर्शकत्वात् प्रकृतनिर्युक्तेः कथं सूत्रस्पर्शकत्वमिति यत्कैश्चिदुच्यते, यदुक्तं, सूत्रसूचितार्थाभिधायित्वात् तस्याः तदभिधानस्य तत्त्वतः सूत्रव्याख्यानरूपत्वेन सूत्रस्पर्शकत्वादिति । किं च- 'कालीपव्वंगसकासे' इत्यादिना क्षुदादिभिरत्यन्तपीडितस्यापि यत्परीषहणमुक्तं, तत्र मन्दसत्त्वस्य कस्यचिदश्रद्धानात् सम्यक्त्वविचलितमपि सम्भवेदिति तद्दृढोकार्थं दृष्टान्तभिधान-मर्थतः सूत्रस्पर्शकमिति व्यक्तमेवैतत्, न च केषाञ्चिदिहोदाहरणानां निर्युक्तिकालादर्वाक्काल-भावितेत्यन्योक्तत्वमाशङ्कनीयं, स हि भगवांश्चतुर्दशपूर्ववित् श्रुतकेवली कालत्रयविषयं वस्तु पश्येत्येवेति कथमन्यकृतत्वाशङ्केति । सम्प्रत्यध्ययनार्थोपसंहारमाह-

मू.(१५) *एए परीसहा सव्वे, कासवेण पवेइया ।*
जे भिक्खू न विहन्निज्जा, पुट्ठो केनइ कुण्हइ ॥

वृ. 'एते' अनन्तरमुपदर्शितस्वरूपाः, 'परीषहाः' क्षुदादयः 'सर्वे' द्वाविंशतिसंख्या अपि न तु कियन्त एव 'काश्यपेन' श्रीमन्महावीरेण 'प्रवेदिताः' प्ररूपिताः, 'जे'त्ति यानुक्तन्यायेन ज्ञात्वेति शेषः, 'भिक्षुः' यतिर्न चैव 'विहन्येत' पराजीयेत, को ऽर्थः ?, -संयमात्प्रात्येत, 'स्पृष्टो' बाधितः केनापि प्रक्रमाद्द्वाविंशतेरेकतरेण दुर्ज्जयेनापि परीषहेण 'कण्हइ'त्ति कुत्रचित् देशे काले वा इति सूत्रार्थः ॥

इतिः परिसमाप्तौ, ब्रवीमीति सुधर्मस्वामी जम्बूस्वामिनमाह । नयाः पूर्ववत् ।

अध्ययनं-२ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
द्वितीयं अध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं-३ -चातुरंगियं

वृ. नमः श्रुतदेवतायै ॥ उक्तं परिषहाध्ययनं, सम्प्रति चतुरङ्गीयमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने परीषहसहनमुक्तं, तच्च किमालम्बनमुररीकृत्य कर्त्तव्यमिति प्रश्नसम्भवे मानुषत्वादिचतुरङ्गदुर्लभत्वं तदालम्बनमनेनोच्यते इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य चत्वार्यनुयोगद्वाराणि, [illegible] निक्षेपः, तत्र चतुरङ्गीयमिति द्विपदं नाम, अतश्चत्वारो निक्षेप्तव्याः अङ्गं च, न चैकं विना चत्वार इत्येक एव तावन्निक्षेपमर्हतीति मन्वान आह निर्युक्तिकृत्-

नि.[१४२] नामंठवणादविए माउयपय संगहिक्कए चेव।
पज्जव भावे य तहा सत्तेए इक्कगा हुंति ॥

वृ. इहैककशब्दस्यैकत्र निर्दिष्टस्यापि प्रक्रान्तत्वेन सर्वत्र सम्बन्धात्, नामैककः स्थापनैककोद्रव्यैककः, 'उयपय'त्ति सुपो लोपान्मातृकापदैककः संग्रहैककः 'चः' समुच्चये, एवेति पूरणे, 'पज्जव'त्ति प्राग्वत् पर्यवैककः 'भावे' भावैककः, 'चः' पूर्ववत्, तथे'ति शेषानामपि निरुपचरितवृत्तितया तुल्यत्वाद, उपसंहर्तुमाह 'सत्तेते' अनन्तरोक्ता एकका भवन्ति, एतद् व्याख्या च दशवैकालिकनिर्युक्तावेव निर्युक्तिकृता कृतेत्यत्रोदासितं, स्थानाशून्यार्थं तु तदुक्तमेव किञ्चिदुच्यते-तत्र नामैककः यस्यैकक इति नाम, स्थापनैककः पुस्तकादिन्यस्त एककाङ्कः, द्रव्यैककः सचित्तादिस्त्रिधा-तत्र सचित्त एककः पुरुषादिरर्थः, अचित्तः फलकादिः, मिश्रो वस्त्रादिर्विभूषितः पुरुषादिरेव, मातृकापदैककः 'उप्पन्ने इ वा विगमे इ वा धुवे इ वा' इति, एषां मातृकावत्सकलवांमयमूलतयाऽवस्थितानामन्यतरद्विशक्षितम्, अकारादयक्षरात्मिकाया वा मातृकाया एकतरोऽकारादि, संग्रहैककः येनैकनापि ध्वनिना बहवः संगृह्यन्ते, यथा जातिप्राधान्ये व्रीहिरिति, पर्यायैककः शिवकादिरेककः पर्यायो, भावैककः औदयिकादिभावानामन्यतमो भाव इति गाथार्थः ॥ इत्थमविनाभाविताऽऽक्षिप्तमेककं निक्षिप्य प्रस्तुतमेव चतुष्कं निक्षेप्तुमाह-

नि.[१४३] नामं ठवणा दविए खित्ते काले य गणन भावे य।
निक्खेवो य चउण्हं गणनसंखाइ अहिगारो ॥

वृ. तत्र नामस्थापने क्षुण्णे 'द्रव्ये' विचार्ये सचित्ताचित्तमिश्राणि द्रव्याणि चतुःसङ्ख्यतायाविवक्षितानि, 'क्षेत्रे' चतुःसङ्ख्यापरिच्छिन्ना आकाशप्रदेशमा यत्र वा चत्वारो विचार्यन्ते, 'काले च' चत्वारः समयावलिकादयः कालभेदाः यदा वा अमी व्याख्यायन्ते, गणनायां चत्वार एको द्वौ त्रयश्चत्वार इत्यादिगणनान्तःपातिनो, भावे च चत्वारो मानुषत्वादयोऽभिधास्यमाना भावाः, एषां मध्ये केनाधिकारः ?, उच्यते, गणनासङ्ख्ययाऽधिकारः, किमुक्तं भवति ?-गणनाचतुर्भिरधिकारः, तैरेव लक्ष्यमाणानामङ्कानां गण्यमानतया तेषामेवोपयोगित्वादिति गाथार्थः ॥

नि.[१४४] नामंगं ठवणंगं दव्वंगं चेव होइ भावंगं।
एसो खलु अंगस्स निक्खेवो चउव्विहो होइ ॥

वृ. नामाङ्गं स्थापनाङ्गं द्रव्याङ्गं चैव भवति भावाङ्गम्, एतत् खलु 'अङ्गस्स' इति प्राकृतत्वात्,

अङ्गस्य निक्षेपश्चतुर्विधो भवतीति गाथासमासार्थः ॥ अत्र च नामस्थापने प्रसिद्धत्वादनादृत्य द्रव्याङ्गमभिधित्सुराह-

नि.[१४५] गंधंगमोसहंगं मज्जाउज्जंसरीरजुद्धंगं ।
एत्तो इक्किक्केपि य नेगविहं होइ नायव्वं ॥

वृ. 'गन्धाङ्गम्' औषधाङ्गम्, 'मज्जाउज्जंसरीजुद्धंगं'ति बिन्दोरलाक्षणिकत्वाद्द्वशब्दस्य च प्रत्येकमभिसम्बन्धात् मद्याङ्गमातोद्याङ्गं शरीराङ्गं युद्धाङ्गमिति षड्विधं द्रव्याङ्गम्, 'एत्तो'त्ति सुब्व्यत्ययादेषु-गन्धाङ्गादिषु मध्ये एकैकमपि च अनेकविधं भवति ज्ञातव्यमिति गाथाक्षरार्थः ॥ भावार्थं तु विवक्षुराचार्यो 'यथोद्देशं निर्देश' इति न्यायमाश्रित्य गन्धाङ्गं प्रतिपादयन्नाह

नि.[१४६] जमदग्गिजडा हरेणुअ सबरनिवंसणयं सपिण्णियं ।
रुक्खस्स य बाहिरिया मल्लियवासिय कोडी अग्घइ ॥

वृ. तत्र 'जमदग्निजटा' बालकः 'हरेणुका' प्रियंगुः 'शबरनिवसनकं' तमालपत्रं, 'सपिन्नियं'-ति पिन्नि-पिन्निका श्यामकाख्यं गन्धद्रव्यं तया सह सपिन्निकं, वृक्षस्यस्य च बाह्या त्वक् चातुर्जातकाङ्गं प्रतीतैव 'मल्लियवासियं'ति मल्लिका जातिस्तद्वासितमनन्तरोक्तद्रव्यजातं, चूर्णीकृतमिति गम्यते, कोटिम् अर्हति, कोटिमूल्यार्हं भवति, महार्घतोपलक्षणं चैतत् ॥

नि.[१४७] ओसीरहरिवेराणं पलं पलं भद्ददारुणो करिसो ।
सयपुप्फाणं भागो भागो य तमालपत्तस्स ॥

वृ.तथा 'ओसीरं' प्रसिद्धं, 'हीवेरो' बालकः, पलं पलमनयोः, तथा 'भद्रदारोः' देवदारोः कर्षः, 'सयपुप्फाणं'ति वचनव्यत्ययात् शतपुष्पायाः भागो, भागश्च तमालपत्रस्य, भाग इह पलिकामात्रम् ॥

नि.[१४८] एयं न्हायं एयं विलेवनं एस चेव पडवासो ।
वासवदत्ताइ कओ उदयनमभिधारयंतीए ॥

वृ. अस्य माहात्म्यमाह- एतत् स्नानमेतद्विलेपनमेष चैव पटवासः 'वासवदत्तया' चण्डप्रद्योतदुहित्रा 'कृतो' विहितः 'उदयनं' वीणावत्सराजम् 'अभिधारयन्त्या' चेतसि वहन्त्या, अनेन परचित्ताक्षेपकत्वमस्य माहात्म्यमुक्तमिति सूत्रार्थः ॥ औषधाङ्गमाह-

नि.[१४९] दुन्नि य रयणी माहिंदफलं च तिन्नि य समूसणंगाइं ।
सरसं च कणयमूलं एसा उदगट्ठमा गुलिआ ॥

नि.[१५०] एसा उ हरइ कंडुं तिमिरं अवहेडयं सिरोरोगं ।
तेइज्जगचाउत्थिग मूसगसप्पावरुद्धं च ॥

वृ. 'द्वे रजन्यौ' पिण्डदारुहरिद्रे माहेन्द्रफलं च' इन्द्रयवाः, त्रीणि च समूषणं-त्रिकटुकं तस्याङ्गानिसुण्ठीपिप्पलीमरिचद्रव्याणि, 'सरसं च' आर्द्रं 'कनकमूलं' बिल्वमूलमेषा 'उदकाष्ठमे'त्युदकमष्टमं यस्यां सा तथा, 'गुटिका' वटिका, अस्याः फलमाह-एषा तु हन्ति कण्डुं तिमिरम् 'अवहेडय'न्ति अर्द्धशिरोरोगं समस्तशिरोव्यथं, 'तेइज्जगचाउत्थिग'त्ति सुब्लोपे तार्तीयीकचातुर्थिकौ, रूढ्या ज्वरौ, 'मूषकसर्प्यापगद्धम्' उन्दरादिदष्टं, च: समुच्चय इति गाथाद्वयार्थः ॥ मद्याङ्गमाह-

नि.[१५१] सोलस दक्खा भागा चउरो भागा य धाउगीपुप्फे।
आढगमो उच्छुरसे मागहमाणेन मज्जंगं ॥

वृ. षोडश द्राक्षा भागाश्चत्वारो भागाश्च 'धातकीपुष्पे' धातक्यां पुष्पविषयाः 'आढगमो'त्ति आर्षत्वादाऽऽढकक: 'इक्षुरसे' इक्षुरसविषये, आढकः इह केन मानेनेत्याह-'मागधमानेन' दो असती एसती उ' इत्यादिरूपेण 'मद्याङ्गं' मदिराकारणं भवतीति गाथार्थः ॥ आतोद्याङ्गमाह-

नि.[१५२] एग मुगुंदा तूरं एगं अहिमारुदारुयं अग्गी।
एगं सामलीपुंडं बद्धं आमेलओ होइ ॥

वृ. 'एकमुकुन्दा तूर्यम्' इति एकैव मुकुन्दा वाद्यविशेषो गाम्भीर्यस्वरत्वादिना तूर्यकार्यकारित्वात् तूर्यम्, अनेनास्यान्यिशिष्टमातोद्याङ्गत्वमेवाह, किमेवैकैव मुकुन्दा तूर्यम् ?, सोपस्करात्वाद्यथैकमभिमारस्य वृक्षविशेषस्य दारुकंकाष्ठमभिमारदारुकम् 'अग्निः' विशेषतोऽग्निजनकत्वाद्, यथा वा 'एकं शाल्मलीपोण्डं' शाल्मलीपुष्पं बद्धमामोडको भवति, आमोडकः पुष्पोन्मिश्रो बालबन्धविशेषः, स्फारत्वादस्य, इत्थं दृष्टान्ताभिधायितयेदं व्याख्यायते, प्रसङ्गतो वाऽन्यदङ्गामोडकाङ्गयोरप्यभिधानमिति सूत्रार्थः ॥ शरीराङ्गमाह-

नि.[१५३] सीसं उरो य उदरं पिट्ठी बाहा य दुन्नि ऊरू य।
एए खलु अट्ठंगा अंगोवंगाइ सेसाइं ॥

वृ. 'शिरश्च उरः' चः प्राग्वद्, उदरं 'पिट्ठी'त्ति प्राकृतत्वात्पृष्टं बाहू द्वौ ऊरू च एतान्यष्टाङ्गानि, प्राग्वल्लिङ्गव्यत्ययः, 'खलुः' अवधारणे, एतान्येवाङ्गानि, अङ्गोपाङ्गानि 'शेषाणि' नखादीनि, उपलक्षणत्वादुपाङ्गानि च कर्णादीनि, यत उक्तम्-

"होंति उवंगा कण्णा नासच्छी जंघ हत्थ पाया य।
नह केस मंसु अंगुलि ओट्ठा खलु अंगुवंगाइं ॥"

इति गाथार्थः ॥ साम्प्रतं युद्धाङ्गमाह-

नि.[१५४] जाणावरणपहरणे जुद्धे कुसलत्तणं च नीई अ।
दक्खत्तं ववसाओ सरीरमारोग्गया चेव ॥

वृ. 'जाणावरणपहरणे'त्ति यानं च-हस्त्यादि, तत्र सत्यपि न शक्नोत्यभिभवितुं शत्रुम् अत आवरणं-कवचादि, सत्यप्यावरणे प्रहरणं विना किं करोतीति प्रहरणं च-खड्गादि, यानावरणप्रहरणानि, यदि युद्धे कुशलत्वं नास्ति किं यानादिना ? इति 'युद्धे' संग्रामे 'कुशलत्वं च' प्रावीण्यरूपं, सत्यप्यस्मिन्नीतिं विना न शत्रुजयनम् अतो 'नीतीश्च' अपक्रमादिलक्षणा, सत्यामपि चास्यां दक्षत्वाधीनो जयः ततो 'दक्षत्वम्' आशुकारित्वं, सत्यप्यस्मिन्निर्व्यवसायस्य कुतो जय इति 'व्यवसायो' व्यापारः, तत्रापि यदि न शरीरमहीनाङ्गं ततो न जय इति शरीरम्-अथात् परिपूर्णाङ्गं, तत्राप्यारोग्यमेव जयायेति 'आरोग्गय'त्ति अरोगता, चः समुच्चये, एवोऽवधारणे, ततः समुदितानामेवैषां युद्धाङ्गत्वमिति सूत्रार्थः ॥ भावाङ्गमाह-

नि.[१५५] भावंगंपि य दुविहं सुअमंगं चेव नोसुयंगं च।
सुयमंगं बारसहा चउव्विहं नोसुअंगं च ॥

वृ. भावाङ्गमपि च द्विविधं 'सुयमङ्गं'त्ति श्रुताङ्गं चैव नोश्रुताङ्गं च, श्रुताङ्गं द्वादशधा-

आचारादि, भावाङ्गता चास्य क्षायोपशमिकभावान्तर्गतत्वात्, उक्तं- हि-''भावे खओवसमिए दुवालसंगंपि होइ सुयणाण'ति, चतुर्विधम्' चतुष्प्रकारं नोश्रुताङ्गं तं, नोशब्दस्य सर्वनिषेधार्थत्वात् अश्रुताङ्गं पुनः, मकारश्च सर्वत्रालाक्षणिक इति गाथार्थः ॥ एतदेवाह

नि.[१५६] माणुस्सं धम्मसुई सद्धा तवसंजमंमि विरिअं च ।
एए भावंगा खलु दुल्लभगा हुंति संसारे ॥

वृ. 'मानुष्यम्' मनुजत्वम्, अस्य चादावुपन्यास एतद्भवा एव शेषाङ्गभावात्, 'धर्मश्रुतिः' अर्हत्प्रणीतधर्माधर्माकर्णनं, 'श्रद्धा' धर्मकरणाभिलाषः, तपः-अनशनादिः तत्प्रधानः संयमः पञ्चाश्रवविरमणादिरतपःसंयमः, मध्यपदलोपी समासः, तपश्च संयमश्च तपःसंयमं तमिति समाहारो वा तस्मिन्, 'वीर्यं च' वीर्यान्तरायक्षयोपशमसमुत्था शक्तिः, अस्य च द्विष्ठस्याप्येकत्वेन विवक्षितत्वान्नोक्तसङ्ख्याविरोधः, एतानि भावाङ्गानि, 'खलु' निश्चितम् दुर्लभकानि भवन्ति संसारे, लिङ्गव्यत्ययश्च प्राकृतत्वाद्, एतच्चानुक्तावपि सर्वत्र भावनीयमिति गाथार्थः ॥ इह द्रव्याङ्गेषु शरीराङ्गं भावाङ्गेषु च चरणं [इह चरणमिति सङ्केतकार्थिकं वाक्यं] -

नि.[१५७] अंग दसभाग भेए अवयवाऽसगल चुन्न खंडे अ ।
देस पएसे पव्वे साह पडल पज्जवखिले अ ।

नि.[१५८] दया य संजमे लज्जा, दुगुंछाऽछलणा इअ ।
तितिक्खा य अहिंसा य, हिरि एगट्ठिया पया ॥

वृ. अङ्गं दशभागो भेदोऽवयवोऽसकलश्चूर्णः खण्डो देशः प्रदेशः पर्व शाखा पटलं पर्यवखिलं चेति शरीराङ्गपर्याया इति वृद्धाः । व्याख्यानिकरस्तु अविशेषतोऽमी अङ्गपर्यायाः, तथा दशभाग इति दशा भाग इति च भिन्नावेव पर्यायावित्याह । चः समुच्चये, सूत्रत्वाच्च सुपः क्वचिदश्रवणमिति ॥ संयमपर्यायानाह-दया च संयमो लज्जा जुगुप्साऽछलना, इतिशब्दः स्वरूपपरामर्शकः पर्यन्ते योक्ष्यते, तितिक्षा चाहिंसा च ह्रीश्चेत्येकार्थिकानि- अभिन्नाभिधेयानि पदानि सुबन्तशब्दरूपाणि, पर्यायाभिधानं च नानादेशजविनेयानुग्रहार्थमिति गाथाद्वयार्थः ॥ क्षेत्रादिदुर्लभत्वोपलक्षणं चेह मानुष्यत्वादिदुर्लभत्वाभिधानमित्यभिप्रायेणाह-

नि.[१५९] माणुस्स खित्त जाई कुल रूवारोग्ग आउयं बुद्धी ।
सवणुग्गह सद्धा संजमो अ लोगंमि दुलहाइं ॥

वृ. 'मानुष्यम्' मनुष्यभावः, 'क्षेत्रम्' आर्यं 'जातिः' मातृसमुत्था 'कुलं' पितृसमुत्थम् 'रूपम्' अन्यूनाङ्गता 'आरोग्यं' रोगाभावः 'आयुष्यं' जीवितं 'बुद्धिः' परलोकप्रवणा 'श्रवणं' धर्मसम्बद्धम् 'अवग्रहः' तदवधारणम्, अथवा श्रवणाः-तपस्विनः तेषामवग्रहः-सुन्दर एत इत्यवधारणं श्रवणावग्रहः, श्रद्धा संयमश्च प्राग्वत्, एतानि लोके दुर्लभानि, प्राक् चतुर्णां दुर्लभत्वमुक्तम्, इह तु मानुषत्वं क्षेत्रादीनामायुष्कपर्यन्तानामुपलक्षणं, श्रवणं च बुद्ध्यवग्रहयोः, पुनश्च मानुषत्वादीनामिहाभिधानं विशिष्टक्षेत्रादियुक्तानामेवैषां मुक्त्यङ्गत्वमिति ख्यापनार्थम्, केचित्

''इन्दियलद्धी निव्वत्तणा य पज्जत्ति निरुवहय खेमं ।
धाणारोग्गं सद्धा गाहग उवओग अट्ठो य ॥''

'इन्द्रियलब्धिः' पञ्चेन्द्रियप्राप्तिः 'निर्वर्त्तना च' इन्द्रियाणामेव निष्पादना 'पर्याप्तिः' समस्त-

पर्याप्तिता 'निरुवहय'त्ति निरुपहतम्, उपहतेरभावात्, सा च गर्भस्थस्य कुब्जत्वादिभिर्जातस्य च भित्त्यादिभिः, 'क्षेमम्' देशसौस्थ्यम् 'भागम्' सुभिक्षं विभवो वा 'आरोग्यम्' नीरोगता 'श्रद्धा' उक्तरूपा 'ग्राहकः' शिक्षयिता गुरुः 'उपयोगः' स्वाध्यायद्युपयुक्तता 'अर्थः' धर्म्म विषयमर्थित्वम्, एतानि दुर्ल्लभानीति गम्यते, इह च पुनः श्रद्धाग्रहणं तन्मूलत्वादशेषकल्याणानां तस्या दुर्लभत्वख्यापनार्थमिति गाथार्थः ॥ यदुक्तं-मनुष्यादिगात्राङ्गानि दुर्लभानि' इति, तत्र मानुष्याङ्गदुर्लभत्वसमर्थनाय दृष्टान्तमा(ताना)ह-

नि.[१६०] चुल्लग पासग धन्ने जूए रयणे अ सुमिण चक्के य।
चम्म जुगे परमाणू दस दिट्ठंता मनुअलंभे ॥

वृ. 'चोल्लगं' परिपाटीभोजनम्, पाशको धान्यं द्यूतं रत्नं च 'सुमिण'त्ति स्वप्नः चक्रं च चर्म युगं परमाणुर्दश दृष्टान्ता 'मनुयलम्भे'ति भावप्रधानत्वान्निर्देशस्य मनुजत्वप्राप्ताविति गाथा-समासार्थः ॥ व्यासार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम् -

"बंभदत्तस्स एगो कण्हडितो ओल(य)ग्गतो बहुसु आवईसु अवत्थासु य सव्वत्थ सहातो आसि, सो य रज्जं पत्तो, बारससंवच्छरितो अहिसंतो, कप्पडिओ तत्थ अल्लियावेंपि न लहइ, ततो अनेन उवातो चिंतितो-उक्काहणाउ पबंधेऊण गयवाहेहिं समं पहावितो, रन्ना दिट्ठो, उइण्णेणं अवगूहितो, अन्नो भणंति-तेन दारपालं सेवमाणेण बारसमे संवच्छरे गया दिट्ठो, ताहे रया तं दट्ठुणं संभंतो, इमो सो वरातो मम सुहदुक्खसहायगो, एत्ताहे करोमि वित्तिं, ताहे भणइ किं देमित्ति ?, सो ऽवि भणति-देहि करचोल्लए घरे घरे सव्वंमि भरहे निट्ठियं, ताहे पुणोऽवि तुम्ह घरे आढवेऊंण भुंजामि, राया भणइ-किं ते एएण ?, देसं ते देमि, तो सुहं छत्तच्छायाए हत्थिखंधवरगतो हिंडिहिसि, सो भणइ-किं मम एद्दहेण आउट्टेण ?, ताहे से दिन्नो चोल्लगो, तओ पढमदिसे रायाणो घरे जिमितो, तेन से जुवलयं दीणारे य दिण्णो, एवं सो परिवाडीए सुसज्जेसु राउलेसु बत्तीसाए रायवरसहस्सेसु, तेसिं खद्धा भोइया, तत्थ य नयरीए अनेगाओ कुलकोडीओ, नगरस्स चेव सो कया अंतं काही ?, ताहे गामेसु, ताहे पुणो भारहवासस्स। अवि सो वच्चेज्ज अंतं, न य माणुसत्तणाओ भट्ठो पुणो मानुसत्तणं लहइ १ ॥

'पासग'त्ति चाणक्कस्स सुवण्णं नत्थि ताहे केणवि उवाएण विढविज्जा सुवण्णं, ताहे जंतपासया कया, केई भणंति-वरदिण्णया, ततो एगो दुक्खो पुरिसो सिक्खवितो, दोनारथालं भरियं, सो भणइ-यदि मम कोइ जिनइ तो थालं गिण्हउ, तो अहं अहं जिनामि तो एगं दीनारं जिनामि, तस्स इच्छाए जंतं पडति अतो न तीरइ जिणिउं, जह सो न जिप्पइ एवं मानुसलंभोऽवि। अवि नाम सो जिप्पेज्ज न य मानुसाओ भट्ठो पुणो मानुसत्तणं २ ॥

'धन्ने'त्ति जत्तियाणि भरहे धन्नाणि ताणि सव्वाणि पिंडियाणि, एत्थ पत्थो सरिसवाण छूढो, ताणि सव्वाणि अदूयालियाणि, तत्थेगा जुण्णा थेरी सुप्पं गहाय ते विनेज्जा, पुणोऽपि पत्थं पूरेज्जा ?, अवि सा दिव्वपसाएण पूरेज्ज न वि मानुसत्तणं ३ ॥

'जूए' जहा एगो राया, तस्स सभा अट्ठोत्तरखंभसयसन्निविट्ठा, जत्थ अत्थाणियं देइ, एक्केक्को य खंभो अट्ठसयंसितो, तस्स रन्नो पुत्तो रज्जकंखी चिंतेइ-थेरो राया, मारेऊणं रज्जं गेण्हामि, तं चामच्चेणं नायं, तेन रन्नो सिट्ठं, तओ रायां तं पुत्तं भणति-अम्हं जो न सहइ अनुक्कमं सो जूयं

खेलइ, जो जिनइ रज्जं से दिज्जइ, कहं पुण जिणियव्वं ?, उच्चं एगो आतो, अवसेसा अम्हं आया, जइ तुमं एगेण आएण अट्ठसयरस खंभाणं एक्केक्कं अंसियं अट्ठसयवारा जिनसि तो तुज्झ रज्जं, अवि देवया विभासा ४ ॥

'रयणे' जहा एगो वाणियओ वुड्ढो, रयणाणि से अत्थि, तत्थ य महे अन्ने वाणियया कोडिअ-पडागाओ उब्भवेंता, तेऽवि वाणियगा समंततो पंडिगया पारसकूलाईणि, थेरो आगतो, सुवं जहा विक्कीयाणि, तं अल्लाडेइ, लहुं रयणाणि आणेह, ताहे ते सव्वतो हिंडिउमाढत्ता, किं ते सव्वरयणाणि पिंडिज्जा ?, अवि य देवप्पभावेण ऽवि य विभासा ५ ॥

'सुविनए' त्ति एगेण कप्पडिएण सुविनंते चंदो गिलितो, कप्पडियाण य कहियं, ते भणंति संपुण्णचंदमंडलसरिसं पोलियं लहेरसि, सद्धा घरछाइणियाए, अन्नेणावि दिट्ठो, सो गहाऊण पुप्फफलाणि गहाय सुविनयपाढगस्स कहेइ, तेन भणियं-राया भविस्ससि। इओ य सत्तमे दिवसे तत्थ राया मतो अपुत्तो, सो य निव्विन्नो अच्छइ जाव आसो अहिवासितो आगतो, तेन तं दट्ठूणं हिसियं पयक्खिणीकतो य, तओ य विलइओ पट्ठो, एवं सो राया जातो। ताहे सो कप्पडिओ सुणेइ, जहा तेनवि दिट्ठो एरिसो सुविनतो, सो आएसफलेण किर राया जातो, सो चिंतेइ-वच्चामि जत्थ गोरसो, तं पिवेत्ता सुयामि, जाव पुणोऽवि तं सुमिणं पेच्छामि, अवि पुणो सो पेच्छेज्जा न मानुसातो ६ ॥

'चक्के' ति दारं, इंदपुरं नामं नयरं, इंददत्तो नाम राया, तस्स इंदाणं सरिसाणं देवीणं बावीसं पुत्ता, अन्ने भणंति-एक्काए चेव देवीए पुत्ता, राइणो पाणसमा, अन्ना एक्का अमच्चधूया, सा परं परिणेतेन दिट्ठिल्लिया, अन्नया कयाति रिउण्हाया समाणी अच्छइ, रायणा दिट्ठा, कस्स एसानि, तेहिं भणियं-तुम्ह देवी एसा, ताहे सो ताए समं एक्करत्तिं वसितो, सा य रिउण्हाया, तीसे गब्भो लग्गो, सा य अमच्चेण भणिल्लिया-जया तुमे गब्भो आहूतो होइ तया ममं साहेज्जसु, ताहे तस्स कहियं, दिवसो मुहुत्तो जुच्च राएण उल्लविओ सायंकारो, तेन तं पत्तए लिहियं, सो सारवेइ, नवण्हं मासाणं दारतो जातो, तस्स दासचेडाणि तद्दिवसं जायाणि, तंजहा-अग्गियतो पव्वइतो बहुलिया सागरो य, तेन सहजायगाणि, तेन कलाइरियस्स उवणीतो, तेन लेहाइयातो गणिय-प्पहाणातो कलाओ गाहितो, जाहे ताओ गाहेंति आयरिया ताहे ताणि कड्ढंति विउलेंति य, पुव्वपरिच्चएणं ताणि रोलिंति, तेन ताणि चेव न गणियाणि, गहियातो कलातो।

ते अन्ने बावीसं कुमारा गाहिज्जंता आयरियं पिट्ठंति, अवयणाणि य भणंति, जति सो आइरितो पिट्ठेति ताहे गंतुण माऊणं साहिंति, ताहे ताओ आयरियं खिंसंति-कीस आहणसि ?, किं सुलभाणि पुत्तजम्माणि ?, अतो ते न सिक्खिया। इओ य महुराए जियसत्तू राया, तस्स सुया निव्वुईनाम दारिया, सा रन्नो अलंकिया उवनीया, राया भणइ-जो ते रोयइ भत्तारो, तो ताए नायं-जो सूरो वीरो विक्कंतो सो मम भत्तारो होइ, सो पुण रज्जं दिज्जा, ताहे सा बलं वाहणं गहाय गया इंदपुरं नयरं, तस्स इंददत्तस्स रन्नो बहवे पुत्ता, इंददत्तो तुट्ठो चिंतेइ-नूनं अन्नेहिंतो राईहिं लद्धयरो, आगया, ततो तेन ऊसियपडायं नयरं कारियं,

तत्थ एगंमि अक्खे अट्ठ चक्काणि, तेसिं पुरओ ठिया धीउल्लिया, सा अच्छिम्मि विंधियव्वा, तओ इंददत्तो राया संनद्धो निग्गओ सह पुत्तेहिं, सावि कण्णा सव्वालंकारविभूसिया एगंमि

पासे अच्छइ, सो रंगो रायाणो ते य दंडभडभोइया जारिसो दीवईए, तत्थ रन्नो जेट्ठपुत्तो सिरिमाली नाम कुमारो, सो भणिओ-पुत्त! एसा दारिया रज्जं च घेत्तव्वं, अतो विघेहि पुत्तलियंति, ताहे सो अकयकरणो तस्स समूहस्स मज्झे धणुं चेव गिण्हउं न तरइ, कहवि तेण गहियं, तेन जओ वच्चउ तओ वच्चउ त्ति मुक्को सरो, सो चक्के अब्भिडिऊण भग्गो, एवं करेंति एगं अरगं वोलीणो करेंति दोण्णि, अन्नेसिं बाहिरेण चेव नेइ, ताहे राया अद्दिति पकतो-अहो! अहं एएहिं धरिसित्तोत्ति, ततो अमच्चेण भणितो-कीस अधिइं करेसि?, राया भणइ-एएहिं अहं अप्पहाणो कतो, अमच्चो भणइ-अत्थि अन्नो तुम्ह पुत्तो मम भूयाए तणतो, सुरिंददत्तो नाम, सो समत्थो विंधिउं, अभिन्नाणि य से कहियाणि, कहिं?,

सो दरसितो, ततो राइणा अवगूहितो भण्णति-जुत्तं तव अट्ठ रहचक्कं भेत्तूण पुत्तलियं अच्छिमि विंधेत्ता रज्जं सुकलत्तं निव्वुइं दारियं संपाविंतए, तओ कुमारो जहा आणवेहिसि भणिऊण ठाणं ठाइऊणं धणुं गेण्हति, ताणि उवि दासरूवाणि चाउद्दिसिं ठियाणि रोडंति, अन्ने य उभयपासिं गहियखग्गा दो जना, जइ कहवि लक्खस्स चुक्कइ ततो सीसं छिंदेयव्वंति. सोऽवि उज्झातो पासे ठितो भयं देइ-मारिज्जसि जइ चुक्कसि. ते बावीसंपि कुमारा मा एसो विंधिस्सइत्ति ते विसेसलुंठणाणि विग्घाणि करेंति, तओ ताणि चत्तारि ते य दो पुरिसे बावीसं च कुमारे अगणितो ताणं अट्ठण्हं रहचक्काणं अंतरं जाणिऊण तंमि लक्खे निरुद्धाए दिट्ठीए अन्नं मयं अकुणमाणेण सा धीउल्लिया वामे अच्छिमि विद्धा, तओ लोगेण ओक्किट्ठिकन्नणायकलयलोम्मिस्सो साहुक्कारो कतो, जहा तं चक्कं दुक्खं भेत्तुं एवं मानुस्सत्तणंति ७ ॥

'चम्मे'त्ति एगो दहो जोयणसंयसहस्सविच्छिन्नो चम्मावणद्धो, एगं से मज्झे छिद्दं, जत्थ कच्छभस्स गीवा मायइ, तत्थ कच्छभो वाससए गए गीवं पसारेइ, तेन कहवि गीवा पसारिया, जाव तेन छिद्देण गीवा निग्गया, तेन जोइसं दिट्ठं कोमुईए पुप्फफलाणि य, सो गतो, सयणिज्जगाणं दाएमि, आणित्ता सव्वओ घुलति, नवि पेच्छंति, अवि सो मानुसातो ८ ॥'जुगे'त्ति

पुव्वंते होज्ज जुगं अवरंतु तस्स होज्ज समिला उ।
जुगछिद्दंमि पवेसो इय संसइओ मनेयलंभो ॥१॥
जहि समिला पब्भट्ठा सागरसलिलं अनोरपारंमि।
पविसेज्जा जुगछिद्दं कहवि भमंती भमंतम्मि ॥२॥
सा चंडवायवीईपणोल्लिया अवि लभेज्ज जुगछिद्दं।
न य मानुसाउ भट्ठो जीवो पडिमाणुसं लहइ ॥३॥

इति गाथाभ्यो जुगोदाहरणमवसेयम् ॥ इदानिं परमाणू, जहा एगो खंभो महप्पमाणो, सो देवेन चुण्णेऊणं अविभागिमाणि खंडाणि काऊण नलियाए पक्खित्तो, पच्छा मंदरचूलियाए ठाऊण फूमितो, तानि नट्ठाणि, अत्थि कोऽवि?, तेहिं चेव पुग्गलेहिं तमेव खंभं निव्वत्तेज्ज?, नो इणमट्ठे समट्ठे, एस अभावो, एवं भट्ठो मानुसातो न पुणो। अहवा सभा अनेगखंभसयसंनिविट्ठा, सा कालंतरेण झामिया पडिया, अत्थि पुण कोऽवि?, तेहिं चेव पोग्गलेहिं करेज्जा?, नोत्ति, एवं मानुस्सं दुल्लभं ॥ लद्धेऽवि मानुष्यत्वे श्रुतिरपि दुर्ल्लभेति दर्शयन्नाह-

नि.[१६०] आलस्स मोहऽवन्ना थंभा कोहा पमाय किविनत्ता।

भय सोगा अन्नाणा वक्खेव कुतूहला रमणा ॥

नि.[१६१] एएहिं कारणेहिं लद्धूण सुदुल्लहंपि माणुस्सं ।
न लहइ सुइं हिअकरिं संसारुत्तारिणिं जीवो ॥

वृ. 'आलस्यात्' अनुद्यमस्वरूपात्, न धर्माचार्यसकाशं गच्छति न शृणोति च इति सर्वत्र शेषः, 'मोहात्' गृहकलत्रतनयताजनितवैचित्र्यात्मकात् हेयोपादेयविवेकाभावात्मकाद्वा, 'अवज्ञातो' यथा किममी मुण्डश्रमणा जानन्ति ? इति, 'अवर्णाद्वा' साध्वश्लाघात्मकात् यथाऽमि मलदिग्धदेहाः सकलसंस्काररहिताः प्राकृतप्रायवयस इत्यादिरूपात्, 'स्तब्धात्' जात्यादिसमुत्थादहङ्कारात् कथमहं प्रकृष्टगतिरेनमुपसर्प्यामीत्यादिरूपात्, 'क्रोधाद्' अप्रीतिरूपात् आचार्यादिविषयात्, महामोहोपहतो हि कश्चिदाचार्यादिभ्योऽपि कुप्यति, 'प्रमादात्' निद्रादिरूपात्, कश्चिद्धि निद्रादिप्रमत्त एवाऽऽस्ते, 'कृपणत्वात्' द्रव्यव्ययासहिष्णुत्वलक्षणात्, यद्यहममीषामन्तिकं गमिष्याम्यवश्यंभावी द्रव्यव्यय इति वरं दूरत एषां परिहार इति, 'भयात्' कदाचित्नरकादिवेदनाश्रवणोत्पन्नसाध्वसात्, निःसत्त्वो हि नरकादिभयमावेदयन्तीत्यमी इति भयान्न पुनः श्रोतुमिच्छति, 'शोकाद्' इष्टवियोगोत्थदुःखात् कश्चिद्धि प्रियप्रणयिनीमरणादौ शोकग्रस्तोवास्ते, 'अज्ञानात्' मिथ्याज्ञानात्-'न मांसभक्षणे दोषो, न मद्ये न च मैथुने' इत्यादिरूपात् 'व्याक्षेपाद्' इदमीदानीं कृत्यमिदं च इदानीमिति बहुकृत्याव्याकुलतात्मकात्, 'कुतूहलाद्' इन्द्रजालाद्यवलोकनगोचरात्, 'रमणात्' कुर्कुटादिक्रीडात्मकात्, क्वचित्सुप्तोऽश्रवणं प्राग्वत्, प्रक्रान्तार्थनिगमनायाह-'एभिः' अनन्तरोक्तस्वरूपैः 'कारणैः' आद्यस्यादिहेतुभिः 'लद्धूण सुदुल्लहंपि'त्ति अपेर्भिन्नक्रमत्वाल्लब्ध्वाऽपि 'सुदुर्लभम्' अतिशयदुरापं 'मानुष्यं' मनुजत्वं 'न लभते' न प्राप्नोति 'श्रुतिं' धर्मश्रवणात्मिकां कीदृशीम् ?-'हितकरीम्' इहपरत्र च तथ्यपथ्यविधायिनीम्, अत एव संसारादुत्तारयति-मुक्तिप्रापकत्वेन निस्तारयति इति संसारोत्तारणी तां 'जीवः' जन्तुः इति गाथार्थः ॥ इत्थं धर्मश्रुतिदुर्लभत्वमभिधाय तल्लाभेऽपि श्रद्धादुर्लभत्वमाह-

नि.[१६२] मिच्छादिट्ठी जीवो उवइट्ठं पवयणं न सद्दहइ ।
सद्दहइ असब्भावं उवइट्ठं वा अनुवइट्ठं ॥

नि.[१६३] सम्मदिट्ठी जीवो उवइट्ठं पवयणं तु सद्दहइ ।
सद्दहइ असब्भावं अनभोगा गुरुनिओगा वा ॥

वृ. मिथ्या इति-विपरीता दृष्टिः-बुद्धिरस्येति मिथ्यादृष्टिः, जीवः 'उपदिष्टं' गुरुभिराख्यातं 'प्रवचनम्' आगमं 'न श्रद्धत्ते' इदमित्थमिति न प्रतिपद्यते, कदाचित्तद्विपरीतमपि न श्रद्दधातीत्याह-'श्रद्धत्ते' तथेति प्रतिपद्यते, किं तदित्याह-अविद्यमानाः सन्तः परमार्थसन्तो भावाजीवादयोऽभिधेयभूता यस्मिन् तदसद्भावम्, सर्वव्याप्यादिरूपात्मादिप्रतिपादकं कुप्रवचनमिति गम्यते, 'उपदिष्टं' परेण कथितं, वाशब्दस्य भिन्नक्रमत्वात् अनुपदिष्टं वा-स्वयमभ्यूहितमिति

इत्थं श्रद्धादुर्लभत्वमभिधाय साम्प्रतं लब्धाया अप्युपघातसम्भवमाह-'समं' गाहा, तथा सम्यक् इति-प्रशंसार्थोऽपि निपातः, यद्वा सम्यञ्चति-जीवादीनवैपरीत्येनाव गच्छति इति सम्यक् तथा दृष्टिः अस्येति सम्यग्दृष्टिः जीव उपदिष्टं प्रवचनं, तुशब्दो मिथ्यादृष्टितः सम्यग्दृष्टेर्विशेषमाह, 'श्रद्धत्ते' निःशङ्कं प्रतिपद्यते, तत्किमसौ प्रवचनमेव श्रद्धत्ते इत्याह-श्रद्धत्ते 'असद्भावम्'

उक्तस्वरूपम् 'अनाभोगात्' अज्ञानात्, तथा 'गुरवः' धर्माचार्यास्तेषां नियोगः-व्यापारणं गुरुनियोगस्तस्माद्वा, कश्चिद्धि सम्यग्दृष्टिर्विशेषतो जीवादिस्वरूपानवगमाद् गुरुप्रत्ययाच्चातत्त्वमपि तत्त्वमिति प्रतिपद्यते। तदेवं प्रथमगाथया मिथ्यात्वहेतुकत्वमश्रद्धानस्योक्तम्, द्वितीयगाथया पुनस्तदभावेऽप्यनाभोगगुरुनियोगहेतुकत्वं, तथा च मिथ्यात्वादितद्धेतूनां व्यापित्वादश्रद्धानभूयस्त्वेन श्रद्धानदुर्लभतोक्ता भवतीति गाथाद्वयपरमार्थः ॥

ननु किमेवंविधा अपी केचिदत्यन्तमृजवः सम्भवेयुः ? ये स्वयमागमानुसारिमतयोऽपि गुरूपदेशतोऽन्यथापि प्रतिपद्येरन्, एवमेतत्, तथाहि-जमालिप्रभृतीनां निह्नवानामकशिष्यास्तद्भक्तियुक्ततया स्वयमागमानुसारिमतयोऽपि गुरुप्रत्ययाद्विपरीतमर्थं प्रतिपन्नाः, उक्तं हि-"तए णं जमालिस्स अनगारस्स एवमाइक्खमानस्स एवं भासंतस्स एवं पन्नवेमानस्स एवं परूवेमानस्स अत्थि एगयया समणा निग्गंथा एयमट्ठं सद्दहंति पत्तियंति रोयंति" इत्यादि। के पुनरमी असद्भावं प्रतिपन्ना इत्याह

नि.[१६४] बहुरयपएसअव्वत्तसमुच्छ दुगतिगअबद्धिगा चेव।
एएसिं निग्गमणं वुच्छामि अहानुपुव्वीए ॥

वृ. 'व्याख्यानतो विशेषप्रतिपत्तिः' इति न्यायात् बहुषु-क्रियानिष्पत्तिविषयसमयेषु रताः, कोऽर्थः ?-बहुषु एव समयेषु क्रियानिष्पत्तिरित्यसद्भावं प्रतिपन्नाः १, 'एएसि'त्ति सूचकत्वादस्य अन्त्यप्रदेशजीववादिनः अन्त्यएव प्रदेशो जीव इत्यभ्युपगताः २, अव्यक्ताः-'सत्या सत्यभामे'तिवत् अव्यक्तवादिनः, न अत्र व्यक्त्या यतिरयमयतिर्वा इत्यादिरूपतया वस्तु विज्ञातुं शक्यं, ततः सर्वमव्यक्तमेवेति प्रतिज्ञावन्तः ३, 'समुच्छ'त्ति सूत्रत्वात् सामुच्छेदाः, तत्र समिति सामस्त्येन निरन्वयात् अदिति-ऊर्ध्वं क्षणादुपरि भवनात् छेदो-नाशः समुच्छेदस्तं विदन्ति तत्त्वधिया सामुच्छेदाः,

एषां द्वन्द्वे बहुरतप्रदेशाव्यक्तसामुच्छेदाः, द्विकं क्रियाविषयमेकसमयमनुभूयमानमिह गृह्यते, तत्प्रतिज्ञातायोऽप्युपचारात् द्विकाः, एवं त्रिकं-जीवाजीवनोजीवराशित्रयं तदभ्युपगन्तापयमेषामस्तीति अबद्धिकाः, एषां द्वन्द्वे द्विकत्रिकाबद्धिकाः, चः समुच्चये एवेति पूरणे। अत्र कः कस्य शिष्य इत्याशङ्क्याऽपोहार्थमेतन्निर्गमाभिधित्सया सम्बन्धमाह-'एएसिं' एतेषामनन्तरमुपदर्शितानां, निर्गमनं-यस्य यत उत्पत्तिः तदात्मकं 'वक्ष्यामि' परिभाषिष्ये, 'अथे'त्यानन्तर्ये 'आनुपूर्व्या' क्रमेणेति गाथार्थः ॥ प्रतिज्ञातमेवाह-

नि.[१६५] बहुरय जमालिपभवा जीवपएसा य तीसगुत्ताओ।
अव्वत्ता ऽऽसाढाओ सामुच्छेया ऽऽसमित्ताओ ॥

नि.[१६६] गंगाए दोकिरिया छलुगा तेरासिआण उप्पत्ति।
थेरा य गुट्ठमाहिल पुट्ठमबद्धं परूविंति ॥

वृ. 'बहुरताः' उक्तरूपाः, जमालेः प्रभवः-एतत्तीर्थापेक्षया प्रथमतः उपलब्धेरेषां, न पुनः सर्वथोत्पत्तिरेव, प्रागप्येवंविधाभिधायिसम्भवात्, ते अमी जमालिप्रभवाः, 'जीवपएसा य'त्ति प्रस्तावात्प्रदेश इत्यन्त्यप्रदेशो जीवो येषां ते प्रदेशजीवाः, प्राकृतत्वाच्च व्यत्ययः, ते च तिष्यगुप्तात्, 'अव्यक्ताः' अव्यक्तवादिनः आषाढात्, सामुच्छेदा अश्वमित्रात्, 'गङ्गात्' इति

गङ्गाचार्यात्, द्वे क्रिये वदन्ति द्वैक्रियाः, 'छलुग' त्ति षट्पदार्थप्रणयनादुलूकगोत्रत्वाच्च षडुलूकस्तस्मात्, त्रीणि राशिभिर्दीव्यन्ति-जिगीषन्तीति त्रैराशिकास्तेषामुत्पत्तिः, 'स्थविराश्च' स्थिरीकरणकारिणः 'गोट्ठामाहिल' त्ति गोष्ठमाहिलाः 'स्पृष्टम्' कञ्चुकवत् छुप्तम् 'अबद्धम्' न क्षीरनीरवदन्योऽन्यानुगतं, कर्मेति गम्यते, 'परूपयन्ति' प्रज्ञापयन्ति, तत्कालापेक्षया तद्, बहुवचनं च पूज्यत्वात्, तच्च स्थविरत्वं च पूर्वपर्यायापेक्षया, अनेन च गोष्ठमाहिलादबद्धिकानामुत्पत्तिरित्युक्तं भवति इति गाथाद्वयार्थः ॥ यथा बहुरता जमालिप्रभवाः तथा चाह-

नि. [१६७] जिट्ठा सुदंसण जमालि अनुज्ज भावत्थि तिंदुगुज्जाणे ।
पंच सया य सहस्सं ढंकेण जमालि मुत्तूणं ॥

वृ. अक्षरार्थः सुगमः, नवरम्, 'अनुज्ज' त्ति अनवद्याङ्गी ॥ भावार्थस्तु वृद्धसम्प्रदायादवसेयः.

स चायम् 'तेणं' कालेणं तेणं समएणं कुंडपुरं नयरं, तत्थ सामिस्स जेट्ठा भगिणी सुदंसणा नाम, तीए पुत्तो जमाली, सो सामस्सि मूले पव्वइओ पंचहिं सएहिं समं, तस्स य भज्जा सामिणो धूया अनुज्जंगीनामा वोय नामं पियदंसणा, सावि समणु पव्वतिया सहस्सपरिवारा, तहा भाणियव्वं जहा पन्नत्तीए, एक्कारस अंगा अहीया, सामिणा अणुन्नातो सावित्थं गतो पंचसयपरिवारो, तत्थ य तिंदुगुज्जाणे कोट्ठगे चेतिते सपोसहो, तत्थ से अंतपंतेहिं रोगो उप्पण्णो, न तरइ सइट्ठतो अच्छिउं, ताहे सो समणे-मम संज्जासंथारगं करेह, तेहिं काउमारद्धो, पुणो अधरो भणति-कतो ? कज्जति ?, ते भणंति- न कओ, अज्जवि कज्जति, ताहे तस्स चिंता जाता-जत्र समणे भगवं० आइक्खति 'चलमाणे चलिए उदीरिज्जमाणे उदीरीए जाव निज्जरिज्जमाणे निज्जिन्ने' तं च मिच्छा,

इमं पच्चक्खमेव दीसति-सेज्जासंथारए कज्जमाणं अकडे, संथरिज्जमाणे असंथरिए, जम्हा णं एवं तम्हा चलणमाणेऽवि अचलिए उदीरिज्जमाणेवि अनुदीरिए निज्जरिज्जमाणेवि अनिज्जिन्ने, एवं संपेहेइ, एवं संपेहित्ता निग्गंथे सद्दावेइ, सद्दावित्ता एवं वयासी-जंणं समणे भगवं महावीरे एवमाइक्खइ-चलमाणे चलिए उदीरिए, जाव निज्जरिज्जमाणे निज्जरिए, तं णं मिच्छा, इमं पच्चक्खमेव दीसइ-सिज्जासंथारए कज्जमाणे अकडे, जाव तम्हा णं अनोज्जिन्ने। तए णं जमालिस्स एवमाइक्खमाणस्स अत्थेगतिया निग्गंथा एयमट्ठं सद्दहंति, अत्थेगइया नो सद्दहंति, जे सद्दहंति ते णं जमालिं चेव अनगारं उवसंपज्जित्ता णं विहरंति, तत्र ये न श्रद्दधति ते एवमाहुः भगवन्! मतोऽयमाशयः-

यथा घटः पटो नैव, पटो वा न घटो यथा ।
क्रियमाणं कृतं नैव, कृतं न क्रियमाणकम् ॥

प्रयोगश्च-यौ निश्चितभेदौ न तयोरैक्यं, यथा घटपटयोः, निश्चितभेदे च कृतक्रियमाणके, अत्र चासिद्धो हेतुः, तथाहि-कृतक्रियमाणे किमेकान्तेन निश्चितभेदे ? अथ कथञ्चिद् ?, यद्येकान्तेन तत्किं तदैक्ये सतोऽपि करणप्रसङ्गतः १ उत क्रियानुपरमप्राप्ते २ राहोस्वित् प्रथमादिवसमेष्वपि कार्योपलम्भप्रसक्ते ३ स्यं क्रियावैफल्याऽऽपतितो ४ दीर्घक्रियाकालदर्शनानुपपत्तेर्वा ५ ?, तत्र न तावत्सतोऽपि करणप्रसङ्गत इति युक्तम्, असत्करणे हि खपुष्पादेरेव

करणमापद्यत इति कथञ्चित्सत एव करणमस्माभिरभ्युपगतं, न चाभ्युपगतार्थस्य प्रसञ्जनं युज्यते ?, नापि क्रियानुपरमप्राप्तेः, यत इह क्रिया किमेकविषया भिन्नविषया वा ?, यद्येकविषया न कश्चिद्दोषः, तत्र हि यदि कृतं क्रियमाणमुच्यते, तत्र क्रियाऽऽवेशसमय एव कृतत्वाभिधानात्, उक्तं हि-"क्रियाकालनिष्ठाकालयोरैक्य"मिति, अथैवमपि कृतक्रियमाणयोरैक्ये कृतस्य सत्त्वात् सतोऽपि करणे तदवस्थः प्रसङ्गः, तद्मत्, पूर्वं हि लब्धसत्ताकस्य क्रियायामयं प्रसङ्गः स्यात्, न तु क्रियासमकालसत्तावतो, अथ भिन्नविषया क्रिया तदा सिद्धसाधनं, प्रतिसमयमन्यान्यकारणतया वस्तुनोऽभ्युपगमन भिन्नविषयक्रियानुपरमस्यास्माकं सिद्धत्वात् २, अथ प्रथमादिसमयेष्वपि कार्योपलम्भप्रसक्तेरिति पक्षः, क्रियमाणस्य हि कृतत्वे प्रथमादिसमयेष्वपि सत्त्वादुपलम्भः प्रसज्यत इति, तदपि न, तदा हि शिवकादीनामेव क्रियमाणता, ते चोपलभ्यन्त एव, उक्तं च-

"अन्नारम्भे अन्नं कइ दीसउ ? जह घडो पडारम्भे ।
सिवकादतो न कुम्भो कह दीसइ सो तदद्धाए ॥"

घटगताभिलाषतया च मूढः शिवकादिकरणेऽपि घटमहं करोमीति मन्यते, तथा चाह-

"पइसमयकज्जकोडीनिरवेक्खो घडगयाभिलासोऽसि ।
पइसमयकज्जकालं थूलमइ घडं मिलाएसि ॥" ३,

नापि क्रियावैफल्याऽऽपत्तिः, यतः प्रागेव प्राप्तसत्ताकस्य करणे क्रियवैफल्यं स्यात्, न तु क्रियमाणकृतत्वे, तत्र हि क्रियमाणं क्रियापेक्षमिति तस्याः साफल्यमेव, अनेकान्तवादिनां च केनचिद्रूपेण प्राक् सत्त्वेऽपि रूपान्तरेण करणं न दोषाय ४, दीर्घक्रियाकालदर्शनानुपपत्तेरित्यपि न युक्तं, यतः शिवकाद्युत्तरोत्तरपरिणामविशेषविषय एव दीर्घक्रियाकालोपलम्भो न तु घटक्रियाविषयः, उक्तं हि-

"पइसमउप्पन्नाणं परोप्परावलक्खनाण सुबहूणं ।
दीहो किरियाकालो जइ दीसइ किंथ कुंभस्स ? ॥"

अथ कथञ्चिन्निश्चितभेदे कृतक्रियमाणे, तत्तीर्थकुदुक्तमेव, निश्चयव्यवहारानुगत्वात्, तद्वचसः, तत्र च निश्चयनयाऽऽश्रयेण कृतक्रियमाणयोरभेदो, यदुक्तम्-

"क्रियमाणं कृतं दग्धं, दह्यमानं स्थितं गतम् ।
तिष्ठच्च गम्यमानं च निष्ठितत्वात् प्रतिक्षणम् ॥"

व्यवहारनयमतेन तु नानात्वमप्यनयोः, तथा च क्रियमाणं कृतमेव, कृतं तु स्यात्क्रियमाणं क्रियवेशसमये, क्रियोपरमे पुनरक्रियमाणमिति उक्तं, च-

तेणंह कज्जमाणं नियमेण कयं कयं तु भयनिज्जं ।
किंञ्चिदिह कज्जमाणं उवरयकिरियं च होज्जाहि ॥

किञ्च भवतो मतिः-क्रियान्त्यसमय एवाभिमतकार्यभवनं, तत्रापि प्रथमसमयादारभ्य कार्यस्य किञ्चित्किञ्चिन्निष्पत्तिरेष्टव्या, अन्यथा कथमकस्मादन्त्यसमये सा भवेद् ?, उक्तं च-

"आद्यतन्तुप्रवेशे च, नोतं किञ्चिद्यदा पटे ।
अन्त्यतन्तुप्रवेशे च, नोतं स्यान्न पटोदयः ॥१॥

तस्मादाद्यद्वितीयाऽऽदितन्तुयोगात्प्रतिक्षणम्।
किञ्चित्किञ्चिदुतं तस्य, यदुतं तदुतं ननु ॥२॥"

इह प्रयोगः - यद्यस्याः क्रियायाः आदिसमये न भवति तत्तस्या अन्त्यसमयेऽपि न भवि, यथा घटक्रियादिसमयेऽभवन्पटः, न भवति च कृतक्रियमाणयोर्भेदे क्रियादिसमये कार्यम्, अन्यथा घटान्त्यसमयेऽपि पटोत्पत्तिः स्यात्, एवं च-

'यथा वृक्षो धवश्चेति, न विरुद्धं मिथो द्वयम्।
क्रियमाणं कृतं चेति, न विरुद्धं तथोभयम् ॥'

प्रयोगश्च - यद्येनाविनाभूतं न तत्तत एकान्तेन भिद्यते, यथा वृक्षत्वाद्धवत्वं, कृतत्वाविनाभूतं च क्रियमाणत्वमिति। सकललोकप्रसिद्धत्वाच्च घटपटयोः तदाश्रयेणैवमुक्तं संस्तारकादावपि योज्यं, तत् प्रतिपद्यस्व भगवन् 'चलमाणे चलिए' इत्यादि तीर्थकृद्वचोऽत्यन्तमवितथमिति। स चैवमुच्यमानोऽपि न प्रतिपन्नवान्, ततश्च-

जाहे न ट्ठाति ताहे ते निग्गंथा जमालिस्स अंतिआतो जहा पन्नतीए जाव सामिं उवसंपज्जित्ता णं विहरंति। साऽवि य णं पियदंसणा ढंकस्स कुम्भकारस्स घरे ठिया, सा आगया चेइयवंदिया ताहे पवंदिया, तंपि पन्नवेइ, साऽवि विप्पडिवन्ना तस्स नेहानुरागेण, पच्छा आगया अज्जाणं परिकहेइ, तं च ढंकं भणति, सो जाणइ - जहा एसा विप्पडिवन्ना नाहच्चतेणं, ताधे सो भणति अहं न याणामि एयं विसेसयरं, एवं तोसे अन्नया कयाइ सज्झायपोरिसिं करेंतीए तेणं भायणाणि उव्वत्तेंतेणं ततो हुत्तो इंगालो छूढो, जहा तीसे संघाडी एगदेसंमि दड्ढा, सा भणइ-इमा अज्ज! संघाडी दड्ढा, ताहे सो भणति- तुब्भे चेव पन्नवेह-जह डज्झमाणमडज्झं, केण तुज्झं संघाडी दड्ढा?, जतो उज्जुसुयणयमयातो वीरजिणिंदवयणावलंबीणं जुज्जेज्ज डज्झमाणं डज्झं वोत्तुं न तुज्झंति, ततो तहत्ति पडिसुणेति, इच्छामो अज्जो! सम्मं पडिचोयणा, ताहे सा गंतूण जमालिं पन्नवेति, सो जाहे न गिण्हति, ताहे सहस्सपरिवारा सामिं उवसंपज्जित्ता णं विहरइ।

इमोऽवि ततो लहुं चेव गतो चंपं नयरिं, सामिस्स अदूरसामंते ठिच्चा सामिं भणति- जहा णं देवाणुप्पियाणं बहवे अंतेवासी समणा निग्गंथा छउमत्था भवित्ता छउमत्थावक्कमणेणं अवक्कंता, नो खलु अहं तहा छउमत्तो भवित्ता छउमत्थावक्कमणेणं अवक्कंते, अहं णं उप्पन्न-नाणदंसणधरे अरहा जिने केवली भवित्ता केवलिअवक्कमणेणं अवक्कंते, तए णं भगवं गोयमो जमालिं एवं वयासी-नो खलु जमाली! केवलिस्स नाणे वा दंसणे वा सेलंसि वा थंभंसि वा जाव कहिंसि आवरिज्जइ वा निवारिज्जति वा, जदि णं तुमं जमालि! उप्पन्ननाणदंसणधरे तो णं इमाइं दो वागरणाइं वागरेहि-सासए लोए? असासए?, सासए जीवे असासए?,

तए णं से जमाली भगवया गोयमेणं एवं वुत्ते समाणे संकिए कंखिए जाव नो संचाएति भगवतो गोयमस्स किंचिवि पमोक्खमक्खाइत्तएत्ति तुसिणीए संचिट्ठति, जमालित्ति समणे भगवं महावीरे जमालिं एवं वयासी-अत्थि णं जमाली! मम बहवे अंतेवासी छउमत्था जे णं पहू एयं वागरणं वागरित्तए, जहा णं अहं, नो चेव णं एयप्पयारं भासं भासित्तए, जहा णं तुमं, सासए लोए जमालि!, जन्न कयाइ नासी न कयाइ न भवइ न कयाइ न भविस्सइ भुवं च भवइ भविस्सइ य धुवे जाव निच्चे, असासए लोए जमाली!, जं णं उस्सप्पिणी भवित्ता ओसप्पिणी

भवइ ओसप्पिणी भवित्ता उस्सप्पिणी भवइ, सासए जीवे जमाली !, जं न कयाइ नासी जाव निच्चे, असासए, जओ नेरतिते भवित्ता तिरिक्खजोणिए भवति, तिरिक्खजोणिए भवित्ता मनुस्से भवति, मनुस्से भवित्ता जोणीए देवे भवति,

तते णं से जमाली सामिस्स एवं आइक्खमानस्स एयमट्ठं नो सद्दहति, अपत्तियति सामिस्स अंतियातो अवक्कमति, अवक्कमेत्ता बहूहि असब्भावुब्भावणाहिं मिच्छत्ताभिणिवेसेहि य अप्पाणं च परं च तदुभयं च वुग्गाहेमाणे उप्पाएमाणे बहूइं वासाइं सामन्नपरियायं पाउणति, बहूहि छट्ठट्ठमादीहिं भावेति, भावित्ता अद्धमासियाए संलेहणाए अप्पाणं झोसेइ, झोसित्ता तीसं भत्ताइं अनसणयाइ छेदेति, छेदित्ता तस्स ठाणस्स अनालोइयपडिक्कंतो कालमासे कालं किच्चा लंतए कप्पे तेरससागरोवमट्ठितिकेसु देवेसु देवकिब्बिसेसु देवेसु देवत्ताए उववन्ने। एवं जहा पन्नतीए, जाव अंतं काहिति। एवाए दिट्ठीए बहुए जीवे रया तेण बहुरयत्ति भन्नति, अहवा बहुसु समयेसु कज्जसिद्धि पडुच्च रया सत्ता बहुरया इति। यथा जीवप्रदेशास्तिप्यगुप्तात् तथाऽऽह-

नि.[१६८] रायगिहे गुणसिलए वसु चउदसपुव्वि तीसगुत्ताओ।
आमलकप्पा नगरि मित्तसिरि कूरपिंडाहि॥

वृ. अक्षरार्थः क्षुण्णो॥ भावाऽर्थस्तु सम्प्रदायादवसेयः, स चायम्-बीतो सामिणो सोलस-वासाति उप्पाडियनाणस्स तो उप्पन्नो। तेणं कालेन तेणं समएणं रायगिहे गुणसिले चेतिए वसु नाम भगवंतो आयरिया चोद्दसपुव्वी समोसढा, तस्स सीसो तीसगुत्तो नाम, सो आयप्पवायपुव्वे इमं आलावगुं अज्जाएइ- 'एगे भंते ! जीवपएसे जीवेत्ति वत्तव्वं सिया ?.

नो इणमट्ठे समट्ठे, एवं दो जीवप्पएसा तिन्नि संखेज्जा असंखेज्जा वा जाव एगपएसूणे ऽवि य णं जीवे नो जीवेत्ति वत्तव्वं सिया, जम्हा कसिणे पडिपुण्णलोगागासप्पएससमतुल्लप्पएसे जीवेत्ति वत्तव्व'मित्यादि, एत्थ सो विपडिवन्नो, जदि सव्वे जीवप्पएसा एगप्पएसहीणा जीव-व्ववएसं न लहंति तो णं सो चेव एगे जीवप्पएसे जीवति, तद्भावभावित्वात् जीवव्ववएस-स्सत्ति, स चैवं विवदमानः स्थविरैरभाणि- भद्र ! भवतोऽयमाशयः भवतोऽयमाशयः-

यथा संस्थान एवास्ति, घटस्तेन तदात्मकः।
तदन्त्यदेश एवास्ति, जीवस्तेन तदात्मकः॥

प्रयोगश्च-यस्मिन्नेव सति यद्भवति तत्तदात्मकं, यथा संस्थान एव सति भवन् घटस्तदा-त्मकः, अन्त्यदेश एव च सति भवत्यात्मा, अत्रासिद्धो हेतुः, तथाहि-कथमात्मनोऽन्त्यप्रदेशे एव सति भावः ?, अथ शेषप्रदेशेषु सत्सु अप्यसौ नास्तीति, तत्किमस्य शेषप्रदेशानां च कश्चिद्वि-शेषोऽस्ति न वा ?, नास्ति चेत्किं न शेषप्रदेशभावेऽप्यस्य सद्भावः, अथास्ति चेत्, स किं पूरणत्व १ मुपकारित्व २ मागमाभिहितत्वं ३ वा ?, यदि पूरणत्वं तत्किं वस्तुतो विवक्षातो वा ?. वस्तुतश्चेत्किमस्यैव पूरणत्वं ?, न शेषप्रदेशानाम्, अथास्यैव अन्त्यत्वाद्, अन्त्यत्वमप्यात्म-प्रदेशापेक्षं तदवष्टब्धाकाशप्रदेशापेक्षं वा ?, न तावदात्मप्रदेशापेक्षम्, आत्मप्रदेशानां कथञ्चि-त्पार्थोवदावर्त्तमानत्वेनानवस्थितानामयमन्त्योऽनन्त्यश्चायमिति विभागाभावात्, ये पुनरष्टौ स्थिराः ते मध्यवर्तिन एव, नापि तदवष्टब्धाकाशप्रदेशापेक्षं, तेषामशेषदिक्षु पर्यन्तसम्भवे-नैकस्यैवान्त्यत्वाभावात्, देशान्तरसंचारे चानवस्थितत्वात्, न च वस्तुतोऽन्त्यस्यैव पूरणत्वं,

द्वितीयादीनामपि पूरणत्वाद्, अन्यथा तथा तथा व्यपदेशानुपपत्तेः, विवक्षातोऽपि न, यतोऽसौ स्वस्याशेषपुरुषाणां वा ?, यद्यशेषपुरुषाणां नेयं नियता, न हि सर्व एव भवदभिमतमेकं पूरणमाचक्षते, नापि स्वस्य, यतोऽन्या अपि कुतो नियतत्वम् ?, अथान्त्यत्वाद् एतदपि कुतो नियमतः ?, 'एगे भंते ! जीवप्पएसे जीवत्ति वत्तव्वं सिया ! इत्यादिनिरूपणायां पर्यन्तभवनात्, तन्नियमोऽपि कुतो ?, विवक्षानियमात्, एवं सति चक्रकाख्यो दोषः, तथाहि-विवक्षानैयत्य मन्त्यत्वात्, तच्चैयत्यं च निरूपणायां पर्यन्तभवनात्, नन्नियमोऽपि विवक्षानियमादिति, एवं सति चक्रवत् पुनः पुनरावर्तते इति, यदि च पूरणत्वमन्त्यस्य विशेषः तदा तच्छेषप्रदेशापेक्षमेवेत्यन्त्या-विनाभावित्वे तदविनाभावित्वमपि बलादापततीति सकलप्रदेशानिनाभावित्वान्नदात्मकत्वसिद्धिः, भाप्युपकारित्वं विशेषः, यतस्तदन्येषामपि कथं न ?, किमात्मप्रदेशा एव न ते ?, यद्वाऽऽत्मप्रदेशत्वेऽप्येककाः इति ?, न तावदाद्यः पक्षः, अशेषाणामात्मप्रदेशत्वेन वादिप्रतिवादिनोरिष्टत्वात्, अथात्मप्रदेशत्वेऽप्येककाः इति, एकत्वं त्वन्मतान्त्यप्रदेशसहायकाभावात् परस्परसाहायकविरहतो वा ?, यदि त्वन्मतान्त्यप्रदेशसहायकाभावात् शेषप्रदेशानुपकारित्वं, त्वन्मतस्यान्त्यस्यापि तत्साहायकासत्त्वात् तदस्तु, युक्तं च बहूनामुपकारित्वम्, एकस्य तु तदभावो, यदुक्तम्-

"जुत्तो य तदुवयारो देसूणे न उ पएसमेत्तंमि ।
जह तंतूणंमि पडे पडोवयारो न तंतुंमि ॥"

नापि परस्परसहायकासत्त्वात्, यतस्तत्किं त्वत्कल्पितान्त्यप्रदेशतो न्यूनत्वे तदभावे वा ?, यदि न्यूनत्वे तत्किं शक्तितोऽवगाहनातो वा ?, न तावच्छक्तितः, एकपटतन्तूनामिवैकात्मप्रदेशानां तन्न्यूनत्वायोगात्, भाप्यवगाहनातः, सर्वेषामाप्यमीषामेकैकाकाशप्रदेशावगाहित्वेन तुल्यत्वात्, तदभावपक्षे चान्त्यप्रदेशस्येव शेषप्रदेशानामप्यात्मोपकारित्वं सिद्धमेव, आगमाभिहितत्वं च विशेषकमुच्यमानं तदन्यतामेव सूचयति, यतः स्फुटमेवागमवचनं "कसिणे पडिपुन्ने लोगागासपएसतुल्लपएसे जीवत्ति वत्तव्वं सिय" त्ति, ततश्च-

भवन्सर्वस्वदेशेषु, पटो यद्वत्तदात्मकः ।
भवन्सर्वस्वदेशेषु, तद्वदात्मा तदात्मकः ॥

प्रयोगश्च-यो यावत्स्वप्रदेशाविनाभावी स तदात्मको, यथा घटः, सकलस्वप्रदेशाविनाभावी च जीव इति, एवं च प्रज्ञाप्यमानोऽपि जाहे न ठाइ, ताहे से काउस्सग्गो कतो, एवं सो बहूहिं असब्भावभावनाहिं मिच्छत्ताभिनिवेसेहि य अप्पाणं परं उभयं च वुग्गाहेमाणो गतो आमलकप्पं नयरिं, तत्थ अंबसालवणे ठितो, तत्थ मित्तसिरीनाम समणोवासतो, तप्पमुहा य अन्नेऽवि निग्गया आगया साहुणोत्ति, सोऽवि जाणति-जहा एए निन्हगत्ति, पच्छा सो पलवेति, सोऽवि जाणति, तथावि माईट्ठाणेणं गतो धम्मं सुणति, सो ते न विरोहेति पन्नवेहामि णं, एवं सो कम्मं पडिच्छंतो जाव तस्स संखडी विउला विच्छिन्ना जाया, ताहे ते निमंतिया, तुब्भे चेव मम घरे पादाद्यारक्रमणं करेह, एवं ते आगया, ताहे तस्स निविट्ठस्स तं विउलं खज्जयं नीनियं, ताहे सो एक्केकातो खंडं खंडं च देति, कूरस्स कुसणस्स वत्थस्स, ते जाणंति-एस पच्छा पुणो दाहिति, पच्छा पाएसु पडितो, सयणं च भणति-वंदेह, साहू पडिलाभिया, अहो अहं धन्नो ! जं तुब्भे ममं चेव घरमागया,

ताहे भणंति किह धरिसिया ? अम्हे, ताहे सो भणति-ननु तुब्भं सिद्धंतो पज्जंतवयव-पेत्ततोऽक्खयनी, यदि सच्चमिणं तो का विहंसणा ? मित्तीमहरा उ, तुब्भे मए ससिद्धंतेण पडिलाभिया, जदि नवरि वद्धमानसामिस्स तनएण सिद्धंतेण तो पडिलाभेमि, एत्थ संबुद्धा, इच्छामो अज्जो ! संमं पडिगोयमा, ताहे पच्छा सावएण पडिलाभिया, मिच्छादुक्कडं च णं कयं, एवं ते सव्वे संजोहिया आलोइयपडिक्कंता विहरंति॥ यथा अव्यक्ता आषाढात्तथाऽऽह-

नि.[१६९] सिरविजयपोलासाढे जोगे तद्दिवसहियसूले य।
सोहम्मि नलिनगुम्मे रायगिहे पुरि य बलभद्दे॥

वृ. अक्षरार्थः सुगमः॥ भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

तेणं कालेनं तेणं समएणं समणस्स भगवतो दो वाससयाणि चोद्दसुत्तराणि सिद्धिं गयस्स, ततो ततितो उप्पन्नो। सेयविया नयरी, पोलासं उज्जानं, तत्थ अज्जासाढा नाम आयरिया वायणायरिया य, तेसिं च बहवे सीसा आगाढजोगपडिवन्नया अज्झायंति, तेसिं रत्तिं किसूइया जाया, निरुद्धा वाएण, न दे(ने)ति कोइ उवट्ठवितो जाव कालगया, सोहम्मे नलिनिगुम्मे विमाने उववन्ना, ओहिं पउंजंति, जाव पेच्छंति तं सरीरगं, ते य साहुणो आगाढजोगपडिवन्नगा, एएऽवि न जाणंति, ताहे तं चेव सरीरं अनुपविट्ठो, पच्छा उट्ठवेन्ति, वेरत्तियं पकरेइ, एवं तेन तेसिं दिव्वप्पभावेणं लहुं चेव समाणियं, पच्छा निप्फन्नेसु तेसु भणंति-खमह भंते! जमेत्थ मए असंजएण वंदाविया, अहं अमुगदिवसं कालगतिल्लतो, एवं सो खामेत्ता गतो, तेऽवि तं सरीरगं छड्डेऊण इमे एयरूवे अब्भत्थिए सव्वेवि पडिवन्ना-एच्चिरं कालं असंजतो वंदिओत्ति, ताहे अव्वत्तभावं भावेंति, जहा सव्वं अव्वत्तं भणेज्जाह, संजतोऽवि वा देतोऽवि वा, मा मुसावाओ भवेज्जा असंजयवंदणं च, जहा तेमं ममं न पत्तियसि, जह संजतो न वा ?, तुमंपि एवं भाणियव्वो, एवं संजती देवी वा, एवं विभासा। एवं ते असब्भावेण अप्पाणं परं उभयं च वुग्गाहेमाणा विहरंति। अनुशास्तिस्तु-मारब्धाश्च स्थविरैः-यथा देवानांप्रिया ! इदं युष्माकमाकूतं-

यस्मान्न शक्यते कर्त्तुं, क्वचिज्ज्ञानेन निश्चयः ?।
तस्मादव्यक्तमेवास्तु, वस्तुतत्त्वाविनिश्चयात्॥

प्रयोगश्च-यत् ज्ञानं न तन्निश्चयकारि, यथेदमाचार्यगोचरं ज्ञानं, ज्ञानं चेदं यत्यादिविषयं वेदनम्, अनिश्चयकारित्वे च ज्ञानस्य निश्चयाधीनत्वात्, वस्तुव्यक्तेरव्यक्तत्वसिद्धिः, ननु चेदमनुमानं ज्ञानमेव, ततश्चैतदपि निश्चयकारि न वा ?, यदि निश्चयकारि वृथाऽस्य प्रयोगः, स्वसाध्यनिश्चयाकरणात्, शेषज्ञानानां चानिश्चिद्वैव निश्चयकारिता, किञ्च-यज्ज्ञानं न तन्निश्चयकारीति, प्रतिज्ञायां सर्वथा निश्चयकारित्वाभावः साध्यते कथञ्चिद्वा ?, यदि सर्वथा तदा श्रुतज्ञानस्यापि ज्ञानत्वादनिश्चयकारित्वे स्वर्गापवर्गसाधकत्वेन तदुपदर्शितेषु तपःप्रभृतिष्वप्यनिश्चयात् कथं न शिरोलुञ्चनादेरानर्थक्यम् ?, अथ तस्य स्वयमनिश्चयकारित्वेऽपि तद्वक्तरि तीर्थकृति प्रत्ययात्तस्यापि निश्चयकारितेति न दोषः, तर्हि किं न तत एवालयविहारादिदर्शनेन यत्यादिष्वपि तद्भावनिश्चयाद्वन्दनाविधिः, उक्तं च-

"जइ जिनमयं पमाणं मुनित्ति ता बज्झकरणसंसुद्धं।
देवंपि वंदमाणो विसुद्धभावो विसुद्धो उ॥"

सर्वथा निश्चयकारित्वाभावे च ज्ञानस्य प्रतिदिनोपयोगिनि भक्तपानादावपि भक्ष्याभक्ष्यादि विभागाभाव एव प्राप्तो, यत उक्तम्-

"को जाणइ किं भत्तं किमतो किं पाणयं जलं मज्जं ? ।
किमलावुं माणिक्कं किं सप्पो चोवरं हारो ? ॥१॥
को जाणति किं सुद्धं किमसुद्धं किं सजीवमज्जीवं ? ।
किं पक्कं किमपक्कं ? तत्तमतत्तं तओ सत्तं ॥२॥"

अथ कथञ्चिदेव निश्चयकारित्वाभावः साध्यते, यतः प्रतिसमयमन्यान्यसूक्ष्मपरिणामरूपेण भक्तादि न निश्चेतुं शक्यं, स्थिरस्थूलरूपतया च निश्चीयत एवेति नोक्तदोषः, एवं सति यत्यादिष्वप्यान्तरपरिणामरूपेणानिश्चयो बहिर्वेषादिरूपेण तु निश्चय एवास्तु, अथ यत्यादिषु प्रकृताचार्यवत् अन्यथात्वमपि सम्भवति, एतदपेक्षोऽऽदिवशतो भक्तादिष्वपि समानम्, यदि च निश्चयनयेन निश्चयस्य कर्तुमशक्यत्वात्बहुशो दृष्टिसंवादं भक्तादिज्ञानं व्यवहारतो निश्चयकारि, तर्हि यत्यादिज्ञानमपि तत एव तथाऽस्तु, युक्तं चैतत्, छद्मस्थावस्थायां व्यवहारनयाश्रयत्वात् सर्वप्रेक्षावताम्, अन्यथा हि तीर्थोच्छेदप्रसङ्गः, तदुक्तम्-

"छउमत्थसमयचज्जा ववहारनयानुसारिणी सव्वा ।
तं तह समायरंतो सुज्झइ सव्वोवि मूढइ (मनो) ॥१॥
जइ जिनमयं पवज्जह ता मा ववहारणिच्छए मुयह ।
ववहारणउच्छेए तित्थुच्छेओ जतो ऽवस्सं ॥२॥"

ततश्च- बहुशो दृष्टिसंवादं, सत्यं संव्यवहारतः ।
भक्तादिष्विव विज्ञानं, वस्तु व्यक्तं तदिष्यताम् ॥

प्रयोगश्च यत् ज्ञानं बहुशो दृष्टिसंवादं तत्सत्यं, यथा भक्तादिज्ञानं, बहुशो दृष्टिसंवादं च यत्यादिज्ञानम्, इत्याद्यनुशिष्यमाणः अहं सदा तु न गुरुवचनमिष्टवन्तः ताहे अनिच्छन्ता य बाहाविहेणं काउस्सग्गेणं उग्घाडिया, जाहे रायगिहं नयरिं गया, तत्थ मोरियवंसप्पसूतो बलभद्दो नाम राया समणोवासतो, तेन ते आगमिया-जहा इहं आगमियत्ति, ताहे तेनं गोहा आणत्ता-तच्चइह गुण सिलए पव्वतिगया, ते इहं आणेह, ता तेहिं आणीया भणिया य-लहुं कडगमद्देण महह, ताहे हत्थीहिं कडएहिं य आणिएहिं भणंति-अम्हे जाणामो जहा तुमं सावतो, सो भणति-कहिंथ सावतो ?, तुब्भेऽत्थ केऽवि चोरा नु चारिगा नु अभिमरा नु ?, ते भणंति-अम्हे समणा निग्गंथा, सो भणति-किह तुब्भे समणा ?, तुब्भे अव्वत्ता, तुब्भे समणा वा चारिगा वा, अहंपि समणोवासतो वा न वा, तम्हा पडिलग्गह ववहारणयं, ततो ते संबुद्धा लज्जिया पडिवन्ना निस्संकिया समणा निग्गंथा मोत्ति, ताहे अंबाडिया, खंतेहि य मउएहि य मए तुम्ह संबोहणट्ठा कयं, मुक्का खामिया य ॥ यथा सामुच्छेदा अश्वमित्रात्तथाऽऽह-

नि. [१७०] मिहिलाए लच्छिघरे महगिरि कोडिन्न आसमित्तो अ ।
नेउणमनुप्पवाए रायगिहे खंडरक्खा य ॥

वृ. सुगमा॥ एतद्भावार्थाभिव्यञ्जकस्तु सम्प्रदायोऽयम्- "सामिस्स दो वाससयाणि चोद्दुत्तराणि सिद्धिं गयस्स, तो चउत्थो उप्पन्नो, मिहिलानयरीए लच्छीगिहं चेइयं, महागिरी आयरिया,

तत्थ तेसिं सीसो कोडीन्नो, तस्सवि आसमित्तो सीसो. सो पुण अनुप्पवाए पुव्वे तइयवत्थु. तत्थ छिन्नछेयणयवत्तव्वयाए आलावतो जहा-सव्वे पदुप्पन्नसमयणेरइया वोच्छिज्जिस्संति, एवं जाव वेमाणियत्ति.' एवं तस्स तंमि वितिगिच्छा जाया-जहा सव्वे संजया वोच्छिज्जिस्संति, एवं सव्वेसिं समुच्छेदो भविस्सइत्ति, ताहे तस्स तत्थ थिरं चित्तं जायं. भण्यते चाचार्यैर्यथा-भद्र ! तवायमाशयः-

अस्ति कारणमुत्पादे, विनाशे नास्ति कारणम् ।
उत्पत्तिमन्तः सर्वेऽपि, विनाशे नियतास्ततः ॥

प्रयोगश्च-ये यद्भावं प्रत्यनपेक्षास्ते, तद्भावनियताः, यथा अन्त्या कारणसामग्री स्वकार्यजनने, अनपेक्षाश्च विनाशं प्रति भावाः, अत्र च विनाशनैयत्यं भावानां किं वैश्रसिकं विनाशमाश्रित्य साध्यते प्रायोगिकं वा ?, यदि वैश्रसिकं किं सर्वथा कथञ्चिद्वा ?, कथञ्चित्पक्षे सिद्धसाधनं, सरस्तरङ्गवत्सततमुदयव्ययवत्त्वेन केषाञ्चित्पर्यायाणां तद्रूपेण वस्तुषु वैश्रसिकविनाशनैयत्यस्य सिद्धत्वाद्, अथ सर्वथा विनाशः साध्यते तर्हि प्रत्यक्षनिराकृतः पक्षः, द्रव्यरूपेणावस्थितस्यैव वस्तुनः दर्शनात्, अन्यथा द्वितीयादिसमयेषु वस्तुनोऽभावप्रसङ्गः, वस्त्वन्तरोत्पत्तेरदोष इति चेत् किं न तद्भेदेन प्रतिभाति ?, अथ मायागोलकवत्सादृश्यात्, तत्र, प्रत्यक्षेणैकत्वग्रहादेव भेदाप्रतिभासात्, अथ भ्रान्तमेवैकत्वग्राहि प्रत्यक्षम्, एवं च सति चक्रकाख्यो दोषः, एकत्वग्राहिणो हि प्रत्यक्षस्य भ्रान्तत्वं प्रकृतानुमानप्रामाण्ये, तच्च सादृश्याद्भेदाप्रतिभासे, स चैकत्वग्राहिणः प्रत्यक्षस्य भ्रान्तत्वे, तदपि प्रकृतानुमानप्रामाण्ये इति तदेवावर्तते, ऐहिकामुष्मिकव्यवहारविलुप्तिश्च सर्वथा नाशे, तथा चाह-

"तित्ती समो किलामो सारिक्ख विपक्खपच्चयाईणि ।
अज्झयणं झाणं भावना य का सव्वणासम्मि ? ॥१॥
अन्नन्नो पइगासं भोत्ता अन्नोन्नसोऽवि का तित्ती ? ।
गन्तादओवि एवं इय संववहारवोच्छित्ती ॥२॥"

अथ सन्तानाश्रयो व्यवहारः, सन्तानोऽपि सन्तानिभ्यः किं भिन्नो न वा ?, यदि भिन्नो वस्तुसन्न वा ?, यदि न वस्तुसन्न, किं तेन शशविषाणेनेव कल्पितेन ?, वस्तुसत्त्वेऽपि क्षणिकोऽक्षणिको वा ?, यद्यक्षणिकस्तेनैव प्रकृतानुमानव्यभिचारः, क्षणिकत्वे च तदवस्थैव व्यवहारविलुप्तिः, अथाभिन्नः, तथाहि-सदृशापरापरक्षणप्रबन्धः सन्तानः, स च सन्तानिन एव, तदसत्, यतः सर्वथोच्छेदे प्राग्भावित्वमेव कारणस्य कारणत्वं, तच्च विसदृशक्षणापेक्षयाऽपि समानमिति कथं सदृशक्षणस्यैवोत्पत्तिः ? येन तत्प्रबन्धः सन्तान उच्यते, अथ सदृशक्षणस्यैवोत्पत्तिदृष्टा, तर्हि वस्तु कथंचित् स्थितिमपि दृष्टमिति तथैवास्तु, सजातीयेतरव्यावृत्तवस्तुवादिनां च न किञ्चित्तात्त्विकं सादृश्यम्, अतात्त्विकं च स्वप्नपुण्यमिव न तत्त्वविचारोपयोगि, पूर्वापरविनिर्लुठितैकक्षणाभ्युपगमे च सन्तानिनोऽप्यसन्त एवेत्ययुक्तस्ततो भेदाभेदविचारः, अथ प्रायोगिकं विनाशमाश्रित्य भावानां विनाशनैयत्यं साध्यते, तर्हि तस्य हेत्वन्वयव्यतिरेकानुविधायित्वेनानपेक्षत्वमसिद्धम्, तथाहि- तत्किं विनाशहेतूनामसामर्थ्यादथ वैयर्थ्यात्कृतकत्वे विनाशस्यापि विनाशप्रसङ्गतो वा ?, यद्यसामर्थ्यात्तत्किं विनाशस्य तुच्छरूपतया कर्तुमशक्यत्वेन वस्त्वन्तरो-

त्पादव्यापृतत्वेन वा ?, तत्राद्यपक्षे विनाशस्य तुच्छरूपत्वमसिद्धं, यतो जैनानामुत्तरावस्थोत्पाद एव पूर्वावस्थाप्रच्युतिर्नान्या, यदुक्तम्-

"कपालानां तु य(स)त्पादः, स एव च घटव्ययः ।
अन्यो न दृश्यते नाशो, मध्ये कुम्भकपालयोः ॥"

न चानयोरेकत्वे विरोधो, रूपादिभेदादस्याद्, यदुक्तम्-

"एकत्वेऽपि विरुद्धत्वं, न चोत्पादविनाशयोः ।
निमित्तभेदभूतत्वान्नरपुत्रपितृत्ववत् ॥"

सिद्धे चैकत्वे पूर्वविनाशाभूत एवोत्तरोत्पाद इत्यनयोस्तुल्य एव हेतुव्यापारः, ततो भावान्तरोत्पादव्यापृतत्वेनेत्यपि प्रत्युक्तम्, उक्तं च

"अन्यदुत्तरसम्भूतिः, पूर्वनाशाविनाकृता ।
नाविनाश्य ततः पूर्वं, प्रकुर्याद्धेतुरुत्तरम् ॥"

अथ वैयर्थ्यात् स्वयं हि विनश्वरस्वभावो भाव इति किं तस्य विनाशहेतुना ?, नन्वेवं नाशस्वभावत्वाद्वस्तुन उत्पाद एव न स्यात्, नाशोत्पादयोर्विरुद्धत्वेन त्वयाऽभ्युपगतत्वात्, अविरुद्धताभ्युपगमे वा जैनमतानुप्रवेशः, यदपि-'कृतकत्वे विनाशस्यापि विनाशप्रसङ्ग' इति, तदप्यत एव न दोषाय, तथाहि-कपालोत्पादस्यैव कपालत्वं, कपालोत्पादश्च कणेभ्यो नान्य इति तेषामेव विनाशः, स भोचयसम्मत एव, न च कृतकेनावश्यं विनष्टव्यं, सम्यग्दर्शनादिकृतत्वे सिद्धत्वादिपर्यायाणामविनाशित्वाद्, अविनाशित्वं च साद्यपर्यवसितत्वात्तेषाम्, उभये हि पर्यायाः-स्थिराश्च अस्थिराश्च, यदुक्तम्-

"स्थिरः कालान्तरस्थायी, पर्यायोऽक्षणभंगुरः ।
क्षणिकश्च क्षणादूर्ध्वमतिष्ठन्नस्थिरो मतः ॥" ततश्च-

यस्माच्चाशोऽपि जन्मैव, कादाचित्कः सहेतुकः ।
तस्मान्न सर्वथैवामी, भावाः क्षणविनश्वराः ॥

प्रयोगश्च-यत्कादाचित्कं तत्सहेतुकं, यथोत्पादः, कादाचित्कत्वं च विनाशस्य उत्पत्तिक्षणानन्तरमेव भावात्, समकालभावित्वे च विनाशाभ्रातृत्वेनोत्पादाभावे सर्वशून्यतापत्तेः, इह विनाशस्य कादाचित्कत्वमापाद्य तद्बलेन सहेतुकत्वमापादितं, तच्च परप्रसिद्धानेव हेतूनपेक्ष्य, स्वप्रसिद्धा तु न किञ्चिदहेतुकं नाम, द्रव्यादिचतुष्टयापेक्षत्वेन सर्वस्य तद्धेतुकत्वात्, तत् प्रतिपद्य स्व पर्यायनयाङ्गीकारतः कथञ्चिदुच्छेदि वस्तु, द्रव्यार्थिकनयाश्रयणाच्च कथञ्चिन्नित्यमिति,

"जमणंतपज्जवमयं वत्थुं भवनं च चित्तपरिणामं ।
ठीतिभवभंगरूवं निच्चानिच्चाइं तोऽभिमतं ॥१॥
सुखदुक्खबंधमोक्खा उभयनयमयाणुवत्तिणो जुत्ता ।
एगयरपरिच्चाए इय(ह) संववहारवोच्छित्ती ॥२॥"

एवं प्रज्ञाप्यमानोऽपि यतो नेच्छति ततोऽसौ निह्नवोक्ति नाऊण उग्घाडितो, सो समुच्छेयणवायं वागरंतो हिंडेति जहा सुण्णो लोगो भविस्सति, असब्भावभावनाहिं भावितो रायगिहं गतो, तत्थ खंडरक्खा आरक्खियया समणोवासया, ते च सुंकवाला, ते य आगमिल्लिया, तेहिं मारिउमारद्धा,

ताहे ते भीया भणंति- अम्हेहिं सयं जहा तुम्मे सड्ढा तहावि एत्तिए अयंजए संजए भारेह, ते भणंति जे ते पव्वइया ते वोच्छिन्ना अन्ने चोरा वा चारिया वा जाव सयमेव विनस्सिहिह, को तुब्भे विनासेति ?, तुब्भं चेव सिद्धंतो, जइ परं सामिस्स सिद्धंतेण ते चेव तुब्भे, तेहिं चेव अम्हेहिं विनासेज्जह, जतो तं चेव वत्थु कालादिसामग्गिं पप्प पढमसमयिकत्तेण वोच्छिज्जइ दुसमयकत्तेण उप्पज्जति, एवमाइ, तिसमयगंरइया वोच्छिज्जंति चउसमया उप्पज्जंति, एवं पंचसमयगयावि, एत्थं सो वितिगिच्छंतो खणिगवायं पत्तवेइ, एत्थ ते संबुद्धा भणंति-इच्छामो अज्जो ! सम्मं पडिचोयणा एवमेवं तहत्ति, एवं ते संबोहिया मुक्का खामिया पडिवन्ना य ॥ यथा गङ्गाद् द्विक्रियास्तथा चाह-

नि.[१७१] नइखेडजनव उल्लग महगिरि धनगुत्त अज्जगंगे य।
किरिया दो रायगिहे महातवो तीरमणिनाए ॥

वृ. क्षुण्णा ॥ सम्प्रदायश्चायम्- सामिस्स अट्ठवीसाइं दोवाससयाइं सिद्धिं गयस्स तो पंचमतो उप्पन्नो, उल्लुगा नाम नई, तीसे तीरि उल्लुगतीरं नगरं बीए तीरे खेडत्थाम, तत्थ महागिरीणं आयरियाणं सीसो धनगुत्तो नाम, तस्स सीसो गंगदेवो नाम आयरितो, सो पुव्विमे तडे उल्लुगतीरे नयरे, आयरिया से अवरिमे तडे, ताहे सो सरदकाले आयरियं वंदतो उच्चलितो, सो य उवरितो खल्लीडो, तस्स उण्हुगं नइं उत्तरंतस्स सा खल्ली उण्हेण उज्झति, हेट्ठा य सीयलेण पाणिएण सीयं, ताहे सो चिंतेति - जहा सुत्ते भणियं -एगा किरिया वेइज्जति- सीया उसिणा वा, अहं दो किरियाओ वेएमि, तो दो किरिआओ एगसमएण वेइज्जंति, ताहे आयरियाण साहइ, तेहिं भणियं-मा अज्जो ! पत्तवेहि, नत्थि एयं जं एगसमएण दो किरियाओ वेइज्जंति, तथाहि तवाशयः-

तथा प्रतीयमानत्वाद्धेतं श्वेततया यथा।
यौगपद्येन किं नेष्टमुपयोगद्वयं तथा ? ॥

प्रयोगश्च-यद्यथा प्रतीयते तत्तथाऽस्ति, यथा श्वेतं श्वेततया, प्रतीयते च यौगपद्येनोपयोगद्वयं, तस्मात्र यौगपद्येनोपयोगद्वयप्रतीतिः, किं क्रमानुपलक्षणमात्रेण यद्वैकत्रोपयुक्तस्यान्यत्राप्युपयोगनिश्चयेन ?, यदि क्रमानुपलक्षणमात्रेण, तदाऽनैकान्तिको हेतुः, उत्पलशतव्यतिभेदादिषु प्रतीयमानस्यापि यौगपद्यस्याभावात्, अथ तत्र सूच्याः सूक्ष्मत्वेनाशुसञ्चारित्वेन च समयादिगत एव क्रमः, स च समयादिसौक्ष्म्यान्न लक्ष्यत इति यौगपद्याभिमानः, एवं सत्यत्रापि मनसोऽतीन्द्रियत्वेन सूक्ष्मत्वादत्यन्तास्थिरतयाऽऽशुसञ्चारित्वाच्च शिरश्चरणगतत्वगिन्द्रियदेशयोः सञ्चरणक्रमः समयादिसौक्ष्म्यान्न लक्ष्यते, तत उपयोगयौगपद्याभिमान इत्यस्तु, उक्तं च- "सुहुमासुचरं चित्तं" ति, तथा-

"समयादिसुहुमयातो मन्नसि जुगवंपि भिन्नकालंपि।
उप्पलदलसयवेहं व जह व तमलायचक्कंति ॥"

किञ्च-यत्रेन्द्रियपञ्चकमपि सञ्चरन्मनोदुर्ल्लक्षं, अत एव दीर्घां शुष्कां तिलशष्कुलिकां भक्षयतो बुद्धस्य पञ्च ज्ञानानि समुत्पन्नानीति कैश्चिदुच्यते, तत्रैकेन्द्रियस्य देशान्मनः सञ्चरल्लक्ष्यिष्यत इति दुराशयम्, इह च सञ्चरणमुपयोगागमनम्, अन्यथा शरीरव्यापिनः तस्य सञ्चारायोगात्, अथात्रानुमानसिद्धः क्रम इति यौगपद्याभावः, तथाहि - यत क्रियावत् तत् क्रमेणैव देशान्तर-

स्कन्दि, यथाऽऽदित्यः, क्रियावच्च सूर्य्यादि, इदमपि समानमत्रापि, यौ दूरदेशौ न तयोर्युग-पदेकस्य सञ्चारो यथा त्रिमर्यादि-ध्यशिखरयोर्देवदत्तस्य, दूरदेशौ च शिरश्चरणगात-त्वगिन्द्रियदेशावित्यनुमानेन मनसः क्रमसञ्चारसिद्धेः, स्यादेतद्- आगमसिद्धमुपयोगयोगपद्यं, न च तद् युगपन्मनसः सञ्चारं विनेति न मनसः क्रमसञ्चारसाधकानुमानोत्थानम्, आगमसिद्धता चास्य बहुबहुविधादिग्राहित्वाभिधानेनाव्यग्रहादीनामनेकग्रहणस्य तत्रोक्तत्वात्, तदभिधानाच्च युगपदनेकोपयोगताऽप्युक्तैवेति, नन्वत्रानेकग्रहणं किं सामान्यविशेषाणां ग्रहणमपेक्ष्य केवल-विशेषाणां वा ?, न तावदाद्यः पक्षो यतोऽनुवृत्तिव्यावृत्तिरूपेण विलक्षणत्वं सामान्यविशेषाणां, तथा चाह-'य एकत्र ग्रहणपरिणामः स नान्यत्रे'ति कथं युगपत्सामान्यविशेषग्रहणम् ?, अथ द्वितीयः पक्षः, उक्तं हि-''विशेषाणां व्यावृत्तिरूपेणाविलक्षणत्वात् युगपद्ग्रहणापि ग्रहणम्,' तन्न, विरुद्धत्वादस्य, तथाहि-विशेषाश्चाविलक्षणाश्चेति परस्परविरुद्धं वचः, अथ भिन्नेष्वपि विशेषेष्वभिन्नं सामान्यमिति तद्रूपेण तेषां ग्रहणम्, इदमस्माभिरिष्टमेव, उक्तं च-

''उसिणेयं सीयेणं न विभागेनोवओगदुगमिहं।
होज्जा समदुगगहणं सामन्नं वेयणामेत्तं ॥''

न चैवमनेकग्रहणं युगपदनेकोपयोगित्वाविनाभावि येन तदभिधानात्तदप्युक्तं भवेत्, तथा च पूज्याः-

''बहुबहुविहाइगहणं ननूवओगबहुआ सुएऽभिहिया।
तमणेगग्गहणं चिय उवओगानेगया नत्थि ॥''

अथैकत्रोपयुक्तस्यान्यत्राप्युपयोगनिश्चयेनेति पक्षः, सोऽपि न, यस्माद्यद्यन्यत्रोपयुक्तमपि मनोऽन्यत्राप्युपयुज्यमानं निश्चीयेत तदा कश्चित् व्याक्षिप्तमनाः पुरः सन्निहितपदार्थान्तरेऽप्युप-योगं लक्षयेत्, न चैवं, तदुक्तम्-

''अन्नत्तिणिउत्तमन्नं विनितोगं लहति जइ मनो तेनं।
हत्थि त्थियंपि पुरतो किमन्नचित्तो न लक्खेइ ? ॥

(ततश्च स्थितमेतत्-) गवावहितचित्तस्य, नोपयोगो यथा गजे।
शीतोपयुक्तचित्तस्य, नोपयोगस्तथाऽऽतपे ॥

प्रयोगश्च-य एकत्रावहितचित्तो न सोऽन्यस्य ग्राहको, यथा गवावहितचित्तो हस्तिनः, शीतावहितचित्तश्च शीतवेदनाकाले जीवः, इत्थं संज्ञ्युपयोगमाश्रित्योक्तं, सामान्येन तु-

कारणं परिणाम्येकोपयुक्तनिजशक्तिकम्।
तदैवाशक्तमन्यस्मिन्नुपयुक्तं (योक्तुं) मृदादिवत् ॥

प्रयोगश्च-यत्परिणामि कारणमेकत्रोपयुक्तशक्तिकं न तदैव तदन्यत्रोपयुज्यते, यथा घटोपयुक्ता मृत् शरावादिषु, शीतवेदनोपयुक्तश्च तत्काले जीवः, उक्तं च-

''उवओगमतो जीवो उवउज्जइ जेण जंमि तं कालं।
सो तम्मओवओगो होइ जहिंदोवओगम्मि ॥१॥
सो तदुव ओगमेत्तोवउत्तसत्तित्ति तस्समत्तो य।
अत्थंतरोवओगं जाउ कहं केण वंसेण ? ॥२॥''

एवं प्रज्ञाप्यमानोऽपि असद्दहंतो असब्भावभावणाए अप्पाणं परं उभयं च वुग्गाहेति, साहुणो पन्नवेति परंपरेण सुयं आयरिएहिं, वारिओ, जाहे न ट्ठाइ ताहे उग्घाडितो, सो हिंडंतो रायगिहं गतो, महातलोतीरप्पभे पासवणे, तत्थ मणिनागो नाम नागो, तस्स चेइए ठाइ सो, तत्थ य परिसामज्झे कहेति-जहा एवं खलु जीवा एगसमएण दो किरिया वेएंति, ताहे तेन नागेन तीसे चेव परिसाए मज्झे भणितो मा एयं पन्नवणं पन्नवेहि, न एसा पन्नवणा सुट्ठु दुट्ठुसेहा !, अहं एच्चिरं कालं वद्धमानसामिस्स मूलं सुणामि-जहा एगा किरिया वेदिज्जइ, तुमं विसिट्ठतरातो जातो?, ता छड्ड एयं वायं, मा ते दोसेण सेहामि, एयं ते न सुंदरं, भगवया एत्थ चेव समोसरिएण वागरियं, एवं सो पन्नवितो अब्भुगवतो, उवट्ठिओ भणति-मिच्छामि दुक्कडं॥ यथा बहुलकात् त्रैराशिकाना-मुत्पत्तिस्तथाऽऽह-

नि.[१७२] पुरिमंतरंजि भूयगुह बलसिरि सिरिगुत्त रोहगुत्ते य।
परिवाय पुट्ठसाले पोसण पडिसेहणा वाए॥

वृ. स्पष्टा॥ सम्प्रदायस्त्वयम्: पंचसया चोयाला सिद्धिं गतस्स वीरस्स तो तेरासियदिट्ठी उप्पन्ना, अंतरंजिया नाम नयरी, तत्थ भूयगुहं नामं चेइयं, तत्थ सिरिगुत्ता नाम आयरिया ठिया, तत्थ बलसिरीनाम राया, तेसिं पुण सिरिगुत्ताणं थेराणं सेहो य रोहगुत्तो नाम, सो पुन अन्नगामे तियल्लतो, पच्छा तत्तो एति। तत्थ य एगो परिव्वायगो पोट्टं लोहपट्टेण बंधेऊण जंबुसाहं च गहाय हिंडति, पुच्छिओ भणति-नाणेणं पोट्टं फुट्टति, तो लोहपट्टेण बद्धं, जंबूसाला य जहा एत्थं जंबूद्दीवे नत्थि मम पडिवादी, ताहे तेन पडहतो नीणाविंतो, जहा सुन्ना परप्पवाया, तस्स य लोगेणं पोट्टसालो नामं कयं, पच्छा तेन रोहगुत्तेण वारियं-मा वाएह पडहयं, अहं से वायं देमि, एवं सो पडिसोहित्ता गतो आयरियाणं आलोएति, एवं मे पडहगो खोभितो, आयरिया भणंति-दुट्ठु कयं, सो विज्जा-बलिओ वाएअ पराजिओऽवि विज्जाहिं उट्ठेति, आह च-

नि.[१७३] विच्छुय सप्पे मूसग मिगी वराही य कागि पोयाइं।
एयाहिं विज्जाहिं सो उ परिव्वायगो कुसलो॥

वृ. सुगमा॥ सो भणइ-किं सक्का एत्ताहे निलोक्किउं?, ताहे तस्स आयरिया इमातो विज्जातो सिद्धिलियातो दिंति तस्स पडिवक्खा-

नि.[१७४] मोरिय नउलि बिराली वग्घी सीही य उलुगि ओवाइ।
एयाओ विज्जाओ गिण्ह परिव्वायमहणीओ॥

वृ. सगुमा॥ रयहरणं च से अभिमंतिऊण दिन्नं, जइ अन्नंपि उट्ठेति ततो रयहरणं भमाडेज्जाहि, अजज्जो होहिसि, इंदेणऽवि न सक्का जेउं, तो एयातो विज्जातो गहाय गतो सभं, भाणियं चनेनं-एस किं जाणति?, एयस्सेव पुव्वपक्खो होउ, परिवायतो चिंतेति एए निउणा, अतो एयाण चेव सिद्धंतं गेण्हामि, जहा मम दो रासी-जीवरासी अजीवरासी य, ताहे इयरेण तिन्नि रासी कया, सो जाणइ-जहा एएण मम सिद्धंतो गहितो, तेन तस्स बुद्धिं परिभूय तिन्नि रासी ठविया-जीवा अजीवा नोजीवा य, जीवा-संसारत्थाई अजीवा-घडाई नोजीवा-घरकोलियाच्छिन्नपुच्छाई, दिट्ठंतो दंडो, जहा दंडस्स आदि मज्झो अग्गं च, एवं सव्वभावावि तिविहा, एवं सो तेन निप्पिट्ठपसिणवागरणो कतो, ताहे सो परिव्वायगो रुट्ठो विच्छुए मुयति, ताहे पडिमाले

मोरे मुयइ, तेहिं विच्छुएहिं हएहिं पच्छा सप्पे मुयइ, ताहे तेसिं पडिघायए नउले मुयति, ताहे उंदरे तेसिं मज्जारे, ताहे मिगे तेसिं वग्घे, ताहे सूयरे तेसिं सेहिं, ताहे कागे तेसिं उलूगे, ताहे पोयाणि, पोयगणी सउलिया,

तीसे संघाति-ओलावी, एवं जाहे न तरइ ताहे गद्दभी मुक्का, तेन य सा ग्यहरतेण आहया, ताहे तस्सेव परिव्वायगस्स उवरिं छेरित्ता गया, ताहे सो परिव्वायगो हीलिज्जंतो निच्छूढो, एवं सो तेनं परिव्वायगो पराजितो, ताहे आगतो आयरियस्स सगासे, आलोएइ, ताहे आयरिएहिं भणियं-कीस ते उड्डिएण न भणियं ?-नत्थि तिन्नि रासी, एयस्स बुद्धि परिभूय मए पन्नविया, ता इदानिंपि एंतुं भणाहि, सो नेच्छति, मा उब्भावणा होहिंति न पडिसुणेइ, पुनो पुनो भणिओ भणइ-को य एत्थ दोसो ?, किं च जायं ? जइ तिन्नि रासी भणिया, अत्थि चेव तिन्नि रासी, अज्जो ! अमुब्भावो तित्थयराण य आसायणा, तहावि न पडिवज्जति, एवं सो आयरिएहिं समं संपलग्गो, ताहे आयरिया रायउलं गया, भणंति-तेन मम सीसेण अवसिद्धंतो भणितो, अम्हं दुवे चेव रासी, इयाणिं सो विपाडवन्नो, तो तुब्भे अम्हं वायं सुणेज्जाह, तं पडिसुणंति, तत्थ रायसभाए मज्झे स्त्रो पुरतो आवडियं ॥ ततस्तं श्रीगुप्तगुरुरवोचत्तत्भद्राभिभत्म्व, प्रत्युवाच-

"यस्मादजीववज्जीवान्नोजीवोऽपि विभिद्यते ।
तथैवाध्यक्षगम्यत्वादस्तु राशित्रयं ततः ॥

प्रयोगश्च-यद्यतो विलक्षणं तत्ततो भिन्नं, यथा जीवादजीवो, विलक्षणश्च जीवान्नोजीवः, ततश्च जीवाजीवौ द्वौ नोजीवश्चेति राशित्रयसिद्धिः, गुरुराह-असिद्धोऽयं हेतुः, यस्माजीवान्नो-जीवस्य वैलक्षण्यं लक्षणभेदेन देशभेदेन वा ?, न तावल्लक्षणभेदेन जीवलक्षणानां स्फुरणादीनां त्वदभिमते नोजीवेऽपि जीवदेशे गृहगोकिलाद्युटितपुच्छादावभेदेन दर्शनात्, नापि देशभेदेन, स हि जीवात् पृथग्भावे भवेदन्यथा वा ?, यदि पृथग्भावे स किं विश्रसातः प्रयोगतो वा ?, विश्रसातश्चेत् पुद्गलानामिव नोजीवानां स्वतश्चटनविचटनधर्मत्वेनान्यसम्बन्धिनामन्यत्र सञ्चारतः सुखदुःखाद्यात्मधर्मसङ्कीर्णतापत्तिः, तदुक्तम्-

"अह खंधो इव संघायभेयधम्मा स तो ऽवि सव्वेसिं ।
अवरोप्परसंचारे सुहाइगुणसंकरो पत्तो ॥"

तथात्वे च कृतनाशाकृताभ्यागमौ, अथ प्रयोगतस्तन्न, अमूर्तद्रव्यत्वादिभिर्नभस इव जीवस्य खण्डशो विनाशयितुमशक्यत्वात्, तथात्वे वा सर्वनाशादिदोषप्रसङ्गः, उक्तं च-

"दव्वामुत्तता कयभावादविकारदरिसणातो य ।
अविनासकारणेहिं नभसोव्व न खंडसो नासो ॥१॥
नासे य सव्वनासो जीवस्स न सो य जिनमयच्चातो ।
तत्तो य अनिम्मोक्खो दिक्खावेफल्लदोसो य ॥२॥"

किञ्च-अयं कुतो निश्चीयते ?, अथ गृहकोकिलाच्छिन्नपुच्छशरीरान्तराले जीवस्यासत्त्वात्, तदसत्त्वं च तदग्रहणात्, तर्हि तत्तदग्रहणमौदारिकशरीररूपेण सर्वथा वा ?, न तावादाद्यः पक्षो, यतो न जीवस्यौदारिकमेवैकं शरीरं येन तदग्रहणेन तदमत्त्वनिश्चयः स्यात् द्वितीयपक्षे पुनरनैकान्तिकमग्रहणं, दीपरश्मीनामिव भित्त्यादिकमन्तरेण विनौदारिकशरीरमशरीरस्य सूक्ष्मशरीरस्य

वा सतोऽपि जीवस्याग्रहणात्, तथा चोक्तम्-

"सञ्झामोत्तिगयातो नागासे जह पदीवरस्सीतो ।
तह जीवलक्खणाइं देहे न तयंतरालंमि ॥१॥
देहग्गहियं न गिण्हइ निग्गतसत्तो नातिसुहुमदेहं च ।
तम्हा सेहो होइ विनाहा जीवरूवो भवंतरगतो व्व ॥२॥"

अथान्यथेति पक्षः, तत्र चापृथग्भूतोऽपि भिन्नादेश इति पुच्छादि नोजीवो जीवाद्विलक्षणः, उच्यते, इहापि पुच्छादेर्नोजीवत्वं स्वल्पतरप्रदेशत्वेन समभिरूढनयाश्रयणेन वा ?, यद्यल्पतरप्रदेशत्वेन तदा पुच्छवत् शेषावयवानामेकैकशो नोजीवता अजीवावयवानां च नोअजीवतेति राशिबहुत्वम्, अथ यथा जीवाजीवानां बहुत्वेऽपि जात्याश्रयणात् न राशिबहुत्वं तथा तदेकदेशानामपि, तथापि राशिचतुष्टयापत्तिः, उक्तं च-

"एवं च रासतो ते न तिन्नि चत्तारि संपसज्जंति ।
जीवा तहा अजीवा नोजीवा नोअजीवा य ॥"

अथाभिन्नलक्षणत्वादजीवान्नोअजीवो न भिद्यते इति न दोषः, तर्हि तद्वदेव जीवान्नोजीवोऽपि न भेत्स्यतीति राशिद्वयसिद्धिः, यत्तु समभिरूढनयाश्रयणेनेति त(त्त)न्मतानाभिज्ञेनोक्तं, स हि जीवादेशं नोजीवमिच्छन्नपि न राशिभेदमिच्छति, सर्वनयानामपि चैकमत्यमत्रार्थे, सर्वनयमतत्वे च जिनमतस्य किमेकतरनयमतेन ?, तदुक्तम्-

"न य रासिभेयमिच्छति तुमं व नोजीवमिच्छमाणोऽवि ।
अन्नोवि मतो नेच्छइ जीवाजीवाहियं किंचि ॥"
इच्छउ व समभिरूढो देसं नोजीवमेगणइयं तु ।
मिच्छत्तं संमत्तं सव्वनयमयावरोहेणं ॥"

ततश्च- सहाजीवेन तद्देशो, यथैको लक्षणैक्यतः ।
सह जीवेन तद्देशः, तथैको लक्षणैक्यतः ॥

प्रयोगश्च-यद्येनैकलक्षणं न तत्ततो भिन्नं, यथा अजीवान्नोअजीवः, एकलक्षणश्च नोजीवो जीवेनेति, एवं सम्यग् गुरुभिः, सहोक्तिप्रत्युक्तिकया, जहा एगदिवसं तहा छम्मासा गया, ताहे राया भणइ-मम रज्जं सीयति, ताहे आयरिएहिं भणियं-इच्छाए मए एच्चिरं कालं धरितो, इत्ताहे णं पासह कल्लं दिवसे आगते समाणे निग्गहामि, ताहे पभाए भणए-कुसियावणे परिक्खज्जउ, तत्थ सव्वदव्वाणि अत्थि, आनेह-जीवे अजीवे नोजीवे, ताहे देवयाए जीवा अजीवा दिन्ना, नोजीवे नत्थित्ति भणति, अजीवे वा पुणो देंति, एवमादिगाणं चोयालसएण पुच्छाण निग्गहितो, नयरे य घोसियं-जयइ महइ महा वद्धमाणसामिन्ति, सो य निव्विसओ कओ, पच्छा निन्हतोत्ति काऊण उग्घाडितो, छड्डुतो एसो, तेन वसेसियसुत्ता कया, छउलूगो य गोत्तेणं, तेन छलूओत्ति जातो, चोयालसयं पुण इमं-तेन छ मूलपयत्था गहिया, तंजहा-दव्वगुणकम्मसामन्नविसेससमवाया, तत्थं दव्वं नवहा, तंजहा-पुढवी आऊ तेऊ वाऊ आगासं कालो दिसा जीवो मनं, गुणा सत्तरस, तंजहा-रूवं रसो गंधो फासो संखा परिमाणं पुहुत्तं संजोगो विभागो परत्तं अपरत्तं बुद्धी सुहं दुक्खं इच्छा दोसा पयत्तो, कम्मं पंचहा-उक्खेवणं अक्खेवणं आउंटणं

पसाणं गमनं च, सामन्नं तिविहं- महासामन्नं सत्तासामन्नं, सामन्नविसेससामन्नं। तत्थ महासामन्नं पदम्मवि पदार्थेषु पदार्थत्वबुद्धिकारि, सत्ता सामान्यं त्रिपदार्थसद्बुद्धिविधायि, सामान्य-विशेषसामान्यं द्रव्यत्वादि, अन्ये तु व्याचक्षते-त्रिपदार्थसत्कर्मी सत्ता, सामान्यं द्रव्यत्वादि, सामान्यविशेषः पृथिवीत्यादिः, विसेसो एगविहो, एवं समवाओऽवि, अन्ने भणंति-सामन्नं दुविहं-परमापरं च, विसेसो दुविहो-अंतविसेसो य अनंतविसेसो य, एते छत्तीसं, एक्केक्कंमि चतारि विगप्पा, पुढवी अपुढवी नोपुढवी नोअपुढवी, एवमवादिष्वपि, तत्थ पुढविं देहत्ति गड्डिया देंति, अपुढविं देहत्ति लोआइ, नोपुढविं देहत्ति न किंचि देंति, पुढविवइरित्तं वा घणो देइ, नो अपुढविं देहत्ति न किंच देंति, एवं जहासंभवं विभासा। स्थविराश्च गोष्ठमाहिलाः स्पृष्टमबद्धं प्ररूपयन्ति यथा तथाऽऽह-

नि. [१७५] दसपुरनगरुच्छुघरे अज्जरक्खिय पुसमित्ततियगं च।
गुट्ठामाहिल नव अट्ठ सेसपुच्छा य विज्झस्स ॥

वृ. अस्याः संस्कारः सुकरः॥ अर्थस्तु सम्प्रदायादवसेयः, स चावश्यकचूर्णितोऽवगन्तव्यः, नवरमिहोपयोगि किञ्चिदुच्यते-

पंचसया चुलसीया तइया सिद्धिं गयस्स वीरस्स।
अबद्धियाण दिट्ठी, दसपुरनयरे समुप्पन्ना ॥

ते दोन्निदवोदया रक्खिज्जा दसपुरं गया, महुराए अकिरियवाई उट्ठितो, जहा नत्थि माया नत्थि पिया एवमादिणाहियवादी, तत्थ संघसमवातो कतो, तत्थ पुण वादी नत्थि, ताहे इमंसि पयट्टियं, इमे य जुगप्पहाणा, ताहे आगया, तेसिं साहेंति, ते य महल्ला, ताहे तेहिं गोट्ठामाहिलो पयट्टिओ, तस्स य वायलद्धी अत्थि, सो गतो; सो तेन वाए पराजितो, सोऽवि ताव तत्थ सड्ढेहिं आभट्ठो वरिसारत्ते ठितो अच्छति, ततो आयरिया समिक्खंति, को गणहरो हवेज्जा ?, ताहे दुब्बलियापूस्समित्तो समिक्खितो, जो पुण तेसिं सयणवग्गो सो बहुओ, तेसिं गोट्ठामाहिलो वा फग्गुरक्खितो वा अनुमतो, गोट्ठामाहिलो आयरियाण माउलओ, तत्थ आयरिया सव्वे सद्दावित्ता दिट्ठं-तं करेंति-

निप्फावकुडो तेल्लकुडो घयकुडो य, तं पुण हेट्ठाहोत्ता कया निप्फाया सव्वं नेंति, तेल्लमवि नेंति तत्थ पुण अवयवा लग्गंति, घयकुडे बहुं चेव लग्गति, एवमेवाहमज्जो! दुब्बलियापूसमित्तं पइ सुत्तत्थतदुभएसु निप्फावकुडसमाणो जातो, फग्गुरक्खियं पति तेल्लकुडसमाणो, गोट्ठामाहिलं पइ घयकुडसमाणो, एवमेस सुत्तेण अत्थेण य उववेतो तुब्भं आयरितो होउ, तेहिं सव्वं पडिच्छियं, इयरोऽवि भणितो-जहाऽहं वट्टितो फग्गुरक्खियस्स गोट्ठामाहिलस्स तहा तुब्भेहिवि वट्टियव्वं, तानिवि भणियाणि-जहा तुब्भे ममं वट्टियाइं तहा एयस्सवि वट्टेज्जाह, अविय-अहं कए वा अकए वा न रूसामि एस न खमीहित्ति, एवं दोवि वग्गे अप्पाहेत्ता भत्तं पच्चक्खाय कालगया देवलोगं गया, इयरेणऽवि सुयं-जहा आयरिया कालगया, ताहे आगतो पुच्छइ-को गणहरो ठवितो ?, कुडगदिट्ठंतो य सुतो, ताहे वोसुं पडिस्सए ठाइऊण पच्छा आगतो, ताहे तेहिं सव्वेहिं अब्भुट्ठितो, इह चेव ठाह, ताहे नेच्छइ, सोऽवि बाहिंठितो अन्नाणि वुग्गाहेति, ताणि न सक्केइ।

इतो य आयरिया अत्थपोरिसिं करेंति, सो न सुणइ-भणइ-तुब्भेत्थ निप्फावकुडा कहेह,

तेसु उद्दितेसु विज्झो अनुभासति, अट्ठगं कम्मं अवाए पुव्वं कम्मं पन्नवेज्जासि, तीतस्स य कम्मस्स य कहं बंधो ?, तत्थ ते भणंति-बद्धं पुट्ठं निकाईयं, बद्धं जहा सुइकलावो, पुट्ठं जहा घननिरंतरातो कयाओ, निकाईयं जहा तावेऊण पिट्टिया, एवं कम्मं रागदोसेहिं जीवो पडमं बंधइ, पच्छा तं परिणामं अमुंचंतो पुट्ठं करेति, तेणेव संकिलिट्ठपरिणामेण तं अमुंचंतो किंचि निकाएति, निकाईयं निरुवक्कमं, उदएण नवरि वेइज्जइ, अन्नहा तं न वेइज्जति, ताहे सो गोट्ठामाहिलो वारेति, एत्तियं न भवति, अन्नायावि अम्हेहिं सुयं-जइ एत्तियं कम्मं बद्धं पुट्ठं निकाचियं एवं भो मोक्खो न भविस्सति, तो खाउ किह बज्झइ ?, भणइ-सुणेह-

नि.[१७६] पुट्ठो जहा अबद्धो कंचुइणं कंचुओ समन्नेइ ।
एवं पुट्ठमबद्धं जीवं कम्मं समन्नेइ ॥

सू. जहा सो कंचुकिणं पुरिसं फुसति, न उण सो कंचुओ सरीरेण समं बद्धो, एवं चेव कम्मंपि पुट्ठं, न उण बद्धं जीवपएसेहिं समं, जस्स बद्धं तस्स कम्मसंसारवुच्छित्ती न भविस्सति, ताहे सो भणति-एत्तियं आयरिएहिं अम्हं भणियं, एसो न याणति, ताहे सो संकितो समाणो पुच्छतो गतो, मा मए अन्नहा गाहियं हवेज्जा, ताहे पुच्छिया आर्याराया, तैरुक्तम्-यथा तस्यायमाशयः-

यतो यद्भेत्स्यते तेन, स्पृष्टमात्रं तदिष्यताम् ।
कञ्चुकी कञ्चुकेनैव कर्म भेत्स्यति चात्मनः ॥

प्रयोगः-यद्येन भविष्यत्पृथग्भावं तत्तेन स्पृष्टमात्रं, यथा कञ्चुकः कञ्चुकिना, भविष्यत्पृथग्भावं च कर्म्म जीवेन, अत्र प्रष्टव्योऽयम्-कञ्चुकवत्स्पृष्टमात्रता कर्म्मणः किमेकैकजीवप्रदेशपरिवेष्टनेन सकलजीवप्रदेशप्रचयपरिवेष्टनेन वा ?, यद्येकैकजीवप्रदेशपरिवेष्टनेन तत्किमिदं परिवेष्टनं मुख्यमौपचारिकं वा ?, यदि मुख्यं सिद्धान्तविरोधः, मुख्यं हि परिक्षेपणमेव परिवेष्टनम्, एवं च भिन्नदेशस्य कर्मणो ग्रहणं, सिद्धान्ते तु यत्राकाशदेशे य आत्मप्रदेशोऽवगाढः तेन तत्रैवावगाढं कर्म्म गृह्णाते इत्युक्तम्, अत एवाह शिवशर्माचार्यः-

"एगपएसोगाढं सव्वपएसेहि कम्मुनो जोगं ।
गेण्हइ जहुत्तहेऊ साईयमणाइयं वावि ॥"

अथौपचारिकं यथा हि कञ्चुकी कञ्चुकेनेवावेष्टव्यश्चावृतश्च, एवं जीवप्रदेशा अपि कर्म्मप्रदेशैरिति मुख्यपरिवेष्टनाभावेऽपि तेषां तत्परिवेष्टनमुच्यते, तर्हि स्फुटैवास्मदिष्टबन्धसिद्धिः, अस्माकमप्यनन्तकर्म्माणुवर्गणाभिरात्मप्रदेशानामुक्तरूपपरिवेष्टनस्यैव बन्धत्वेनेष्टत्वात्, आगमश्चात्र-"एगमेगे आयपएसे अनंताणंताहिं कम्मवग्गणाहिं आवेढियपरिवेढिय त्ति" ततश्च विपर्ययसाधनाद्विरुद्धो हेतुः, सकलजीवप्रदेशप्रचयपरिवेष्टनेनेत्यस्मिन्नपि पक्षे भिन्नदेशकर्म्मग्रहणेन तथैव सिद्धान्तविरोधः, तथा तत्र बहिः प्रदेशबन्धान्न कर्म्मणः सम्भवति, ततश्च मलस्येव न तस्य भवान्तरानुवृत्तिः, एवं च पुनर्भवाभावः, सिद्धानां वा पुनर्भवाऽऽपत्तिः, न च मलस्य शरीरेण स्पृष्टतया दृष्टान्तवैषम्यं, शरीरात्मप्रदेशानामन्योऽन्यमविभागेनावस्थानाद्, अन्यथा हि मृणालस्पर्शाद्यनुभवप्रसङ्गः, किञ्च-इयं देहान्तः सातादिवेदना सनिबन्धना निर्निबन्धना वा ?, निर्निबन्धना चेत्किं न सिद्धानामपि ?, सनिबन्धनत्वे च किं पयःपानादि-

दृष्टहेतुकैव यद्वा कर्म्मनिबन्धनाऽपि ?, यदाऽऽद्यः पक्षस्तर्हि बहिर्वेदनापि दृष्टा बाह्यहेतुकैवेति किं कर्म्मकल्पनया ?, अथ कर्म्महेतुकाऽपि तर्हि तत्किं यत्रैव स्थितं तत्रैव वेदनानिबन्धनमुतान्यत्रापि ?, यदि तत्रैव तर्हि त्वन्मतेन बहिरेवैतद्-दवस्थितमित्यन्तः सातादिवेदनोच्छेदप्रसङ्गः, अथान्यत्रापि तद्वेदनानिबन्धनं तर्हि किं नैकात्म स्थितं सर्वात्मस्वपि ?, उक्तं च-

"जइ वावि भिन्नदेसंपि वेयणं कुणइ कम्ममेयं ते ।
कह अन्नसरीरगयं न वेयणं कुणति अन्नस्स ?, ॥"

तथा च कृतनाशाकृताभ्यागमप्रसङ्गः, अथ येनैव कृतं तस्यैव तन्निबन्धनं, तथापि पाद-वेदनायां शिरोवेदनाऽऽपत्तिः, अथ सञ्चारित्वात्तस्यान्तरप्यवस्थानमिति नान्तः सातादिवेदनोच्छेदप्रसङ्गः, एवं तर्हि न कञ्चुकतुल्यता, तस्य बहिरेव नियतत्वात्, युगपदुभयत्र वेदनाऽभावप्रसङ्गश्च, यथा च बहिःस्थमन्तःसञ्चारितया वेदनाहेतुरेवमन्तःस्थितं बहिःसञ्चारितया तद्धेतुरिति विपर्ययकल्पनाऽपि किं न ?, नियामकाभावात्, सञ्चारित्वे च कर्म्मणो वायोरिव न भवान्तरानुवृत्तिः, तदुक्तम्-"नं भवंतरमन्नेई सरीरसंचारतो तदनिलो व्व" त्ति. किञ्च काञ्चनोपलयोरपि पृथग्भावोऽस्ति वा न वा ?, न तावन्नास्ति प्रत्यक्षतस्तदर्शनात्, अस्तित्वे च यथा भविष्यत्पृथग्भावित्वेऽपि तयोरविभागावस्थानेन सृष्टमात्रता तथा जीवकर्म्मणोरपि स्यात्, न च काञ्चनसत्तैव तत्र पूर्वं नास्ति, चाकचिक्यदर्शनात्प्रत्यक्षतः, तथा यत्र यन्नास्ति न तस्य ततः उत्पादः, सिकताभ्य इव तैलस्येत्यनुमानतश्च तत्सिद्धेः, ततश्च-

'यत्र यद्वेदनाहेतुः, कर्म्म तत्रस्थमेव तत् ।
सर्वत्र वेदनाहेतुः, कर्म सर्वत्रगं ततः ॥'

प्रयोगश्च-यत्र यद्वेदनानिमित्तं कर्म तत्रस्थमेव तद् अन्यथा दर्शितन्यायेनातिप्रसङ्गाद्, वेदनाहेतुश्च सर्वत्रात्मप्रदेशेषु कर्म इत्याद्याचार्योक्तं तेन गंतूण सिट्ठं, एत्तियं भणियं आयरिएहिं, एवं पुनरवि सो संलीणो अच्छइ, समप्पउ ततो खोभेहामि । अन्नया नवमे पुव्वे पच्चक्खाणे साहूणं जावज्जीवाए तिविहं तिविहेण पाणातिवायं पच्चक्खामि, एयं पच्चक्खाणं वण्णिज्जइ, ताहे सो भणति-अवसिद्धंतो, न होति एवं पुन, कहं कायव्वं ?, सुणेह-

नि. [१७७] पच्चक्खाणं सेयं अपरिमाणेण होइ कायव्वं ।
जेसिं तु परीमाणं तं दुट्ठं होइ आसंसा ॥

वृ. सव्वं पच्चक्खामि पाणाइवायं अपरिमाणाए तिविहं तिविहेणं, एवं सव्वं आवकहियं. किं निमित्तं परिमाणं न कीरति ?. जो सो आसंसादोसो सो नियत्तिता भवति, जावजीवाए पुन भणंतेण परिमाणेण अब्भुवगयं भवति, जहाऽहं हणिस्सामि पाणाई, एतन्निमित्तं अपरिमाणाए कायव्वं ॥ स चैवं वदन्विनेयेनाभिदधे यथाऽयं भवदाशयः-

सावधि स्यादभिष्वङ्गि, गृहिणामित्वरं यथा ।
प्रत्याख्यानं तथा चेदं, यावज्जीवं यतेरपि ॥

प्रयोगः-यत्परिमाणवत् प्रत्याख्यानं तत्साभिष्वङ्गं, यथा गृहिणामित्वरप्रत्याख्यानं, परिमाणवच्च यतेरपि यावज्जीवं सर्वसावद्यप्रत्याख्यानमित्ययमनैकान्तिको हेतुः, तथाहि-किमत्र परिमाण-

वस्त्वभावेन साभिष्वङ्गता साध्यते उत आशंसयाऽपि ?, प्रथमपक्षे किं यतेरद्धाप्रत्याख्यानमस्ति न वा ?, यद्यस्ति किं पौरुष्यादिपदोपेतमितरथा वा ?, यदि पौरुष्यादिपदोपेतं किं न परिणामवत्त्वेन साभिष्वङ्गता ?, अथ न समतास्थितत्वात् तर्हि परिमाणवत्त्वमनैकान्तिकम्, अथाभिप्रायमेव तत्र पौरुष्यादिपदोपादानम्, एवं सति प्रव्रज्यादिन एवानशनापत्तिः, तथा च-''निप्फादिया य सीसा दीहो परिवालितो य परियातो' इत्याद्यागमविरोधः, न चाद्धाप्रत्याख्यानं नास्त्येव यतेरिति पक्षः, 'अनागतमइक्कंतं' इत्यागमेन तस्याभिधानात्,

द्वितीयपक्षे तु नैवमस्याशंसा-यथा भवान्तरे सावद्यमहं सेविष्ये, येन साभिष्वङ्गता स्यात्, यद्यपि यावज्जीवेति पदोच्चारणं तदपि व्रतभङ्गभयादेव, तदुक्तम् -''वयभंगभयाउ च्चिय जावज्जीवंति निद्दिट्ठं'' किञ्च-परिणामवत्त्वेन साभिष्वङ्गतां साधयतस्तवाकृतपरिमाणं प्रत्याख्यानमिति, तत्र च नत्रा परिमाणाभावमात्रमुच्यते वस्त्वन्तरविधिर्वा ?, यदि परिमाणाभावमात्रं तदा तस्याभिष्वङ्गहेतुत्वेनैव निषेधः, तद्धेतुत्वं च तस्यानैकान्तिकमनन्तरमेवोक्तमिति किं तन्निषेधेन ?, अथ वस्त्वन्तरविधिस्तत्र वस्त्वन्तरं शक्तिरनागरताद्धा वा ? यदि शक्तिस्तत्र किं यावच्छक्तिस्तावन्मम प्रत्याख्यानम् अथ यावति विषये शक्तिस्तावतीति ?, प्रथमपक्षे शकनक्रियापरिमाणपरिमितत्वात्, प्रत्याख्यानस्य परिमाणवत्त्वमेवोक्तं भवतीति स्ववचनविरोधः, प्रत्याख्यानानवस्था चैवं, शक्तेरनियतत्वात्, तथा चानीत्यागरूपत्वं, तदभावे च प्रायश्चित्ताभावः, द्वितीयपक्षे तु प्राणवधाद्यन्यन्तरविरतावपि संयतत्वापत्तिः, शक्त्यपेक्षत्वात्तद्धेतुप्रत्याख्यानस्य,

''एत्तियमेत्ती सन्नित्ति नातियारो न यावि पच्छित्तं।
न य सव्वव्वयनियमो एएण य संजयत्तंति॥''

अथानागताद्धा तत्रापि किं भावः प्रत्याख्यानं व्यञ्जनं वा ?, न तावद् व्यञ्जनं स्वप्नादावपि तदुच्चारणे प्रत्याख्यानप्रसङ्गात् प्रमादतः, शक्तिवैकल्पतो वा व्यञ्जनस्खलने तदभावापत्तेश्च, ततः प्रथमपक्ष एवावशिष्यते, तत्र च सदा सावद्यमहं न सेविष्ये इति तस्य भाव उत कदाचिदिति ?, यदि आद्यपक्षस्तदा मृतस्यापि तत्सेवायामपरिपूर्णप्रतिज्ञत्वेन व्रतभङ्गप्रसङ्गः, तथा सिद्धानामपि संयतत्वापत्तिः, सकलानागताद्धाप्रत्याख्यानधारित्वात्। एवं च 'सिद्धे नो चारित्ती नो अचारित्ती' इत्यागमविरोधः, अथ द्वितीयपक्षस्तत्र किं यथा भावस्तथा व्यञ्जनमथान्यथा ?, यदि यथा भावस्तथा व्यञ्जनम् एवं सति विज्ञातविषयादेरेव प्रत्याख्यानमन्यथा तद्भङ्गप्रसङ्गः, ततश्च जीवन्नहं सावद्यं न सेविष्ये मृतस्य तु कर्मोदयस्वाभाव्यादवश्यंभाविन्यविरतिरित्ययमेव तस्य भावः, तथा च यथाभावं व्यञ्जनोच्चारणे बलादापतितं यावज्जीवेति, तथा च जीवनावधित्वादपरिणामत्वहानिः, अन्यथा व्यञ्जनोच्चारणमिति पक्षे च परिस्फुटैव मृषाभाषिता, ज्ञात्वा अन्यथाभिधानात्, उक्तं च-

''जो पुन अव्वयभावं भुणमाणोऽवस्सभाविनं भणति।
वयमपरिमाणमेवं पच्चक्खं सो मुसावाइ॥''

ततश्च- 'नाशंसातो यतस्तस्य, यावज्जीवेति पठ्यते।
किन्तु भङ्गभयादेव, तस्मादस्तु यथास्थितम्॥'

प्रयोगश्च- यत्र नाशंसा न तत्सावधित्वेऽपि साभिष्वङ्गं, यथा कायोत्सर्गो, न विद्यते च

यतिप्रत्याख्याने यावज्जीवेति पदेऽप्याशंसेति, इत्यादि जहा आयरिएहिं भणियं तहा मव्वं भणंति, जहा एत्तियं भणियं आयरिएहिं, जेऽवि अन्ने थेरा बहुस्सुया अन्नागच्छेसा तेऽवि पुच्छिया, एत्तियं चेव भणंति, ताहे भणति -तुब्भे किं जाणह ?, तित्थयरेहिं एत्तियं भणियं, तेहिं भणियं-तुमं न जाणसि, जाहे न ट्ठाइ ताहे संघसमवातो कतो, देवयाए काउस्सग्गो कतो, जा सड्ढिया सा आगया, भणइ-संदिसहत्ति, ताहे भणिया-वच्च तित्थयरं पुच्छ, किं ?, जं गोट्ठामाहिलो भणइ तं सच्चं ?, दुब्बलियाप्पमुहो संघो जं भणइ तं सच्चं ?, ताहे सा भणति मम अनुचलं देह, काउस्सग्गो दिन्नो, ताहे सा गया, तित्थयरं पुच्छितो, तेहिं वागरियं-जहा संघो सम्मावादी, इयरो मिच्छावादी, निण्हवो एस सत्तमो, ताहे आगया, भणिओ-ओस्सारेह, संघो सम्मावादी, एस मिच्छावादी निण्हवो, ताहे सो भणति-एसा अप्पिड्ढिया वराई, का एयाए सत्ती गंतुण ?, तीसेऽवि न सद्दहति, ताहे पूसमित्ता भणंति -जहा अज्जो ! पडिवज्जउ, मा उग्घाडिज्जिहिसि, नेच्छति, ताहे सो संघेणं वज्झोकतो बारसविहेणं संभोएणं, तंजहा-

"उवहि १ सुय २ भत्तपाने ३ अंजलीपग्गहे ति य ४ ।
दायणा ५ निकाए य ६ अब्भुट्ठाणेत्ति आवरे ७ ॥
किइकम्मस्स य करणे ८ वेयावच्चकरणे इय ९ ।
समोसरणसन्निसेज्जा १० कहाए य ११ निमंतणा १२ ॥"

एस बारसविहो, सत्तरभेतो जहा पंचकप्पे ॥ इत्युक्ता अल्पतरविसंवादिनो निह्नवाः, प्रसङ्गत एव बहुतरविसंवादिनं बोटिकमाह-

नि.[१७८] रहवीरपुरं नयरं दीवगमुज्जाण अज्जकण्हे अ ।
सिवभूइस्सुवहिमि पुच्छा थेराण कहणा य ॥

वृ. अक्षरार्थः सुगमः ॥ भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

छव्वाससएहिं नवोत्तरेहिं सिद्धिं गयस्स वीरस्स ।
तो बोडियाण दिट्ठी रहवीरपुरे समुप्पन्ना ॥

तेणं कालेनं तेणं समयेणं रहवीरपुरं कव्वडं, तत्थ दीवगं नाम उज्जानं, तत्थ अज्जकण्हा आयरिया समोसढा। तत्थ एगो सिवभूई नाम साहस्सिमल्लो, सो रायाणं उवगतो, तुमं ओलग्गामित्ति, जा परिक्कमामित्ति, रायाए अन्नया भणितो वच्च भाइघरे किण्हचउद्दसीए बलिं देहि, सुरा पसुतो दिन्नो, अन्ने य पुरिसा भणिया-एयं बीहाविज्जाह, सो गंतूण माइबलिं दाऊण छुहिओमित्ति तत्थेव सुसाणे तं पसुं पओलित्ता खाइ, ते य गोहा सिवारसिएहिं समंता भैरवं रवं करेंति, तस्स रोमुब्भेओऽवि न काज्जइ, तओ अब्भुट्ठिओ गतो, तेहिं सिट्ठं, वित्ती दिन्ना।

अन्नया सो राया दंडे आणवेति-जहा महुरं गेण्हह, ते सव्वबलेणं उद्धाइया, ततो अदूरसामंतेणं गंतूण भणंति-अम्हे न पुच्छियं-कयरं महुरं वच्चामो, राया य अविण्णवणिज्जो, ते गुंगुयंता अच्छंति, सिवभूई आगतो भणति-किं भो ! अच्छह ?, तेहिं सिट्ठं, तो भणति-दोऽवि गिण्हामो समं चेव, ते भणंति-न सक्का, दो भागिएहिं एक्केक्काए बहू कालो होतित्ति, सो भणति-जं दुज्जयं तं मम देह, भणितो जा निज्जाइ, भणइ-

सूरे त्यागिनि विद्वषि च वसति जनः स च जनाद्गुणी भवति ।

गुणवति धनं धनाच्छ्रीः श्रीमत्याज्ञा ततो राज्यम् ॥

एवं भणित्ता पहाविओ पंडुमहुरंतेणं, तत्थ पंच्चंतागि तावि उमारद्धो, दुग्गे ठितो, एवं ताव जाव नगरसेसं जायं, पच्छा नगरमवि गहियं ओवरइत्ता, ततो निवेइयं तेन रन्नो, तुट्ठेन भणियं- किं देमि ?, सो चिंतियं भणति-जं मए गहियं तं सुगहियं, जहिच्छतो भविस्सामि, एवं होउ- त्ति। एवं सो य बाहिं चेव हिंडंतो अड्ढरत्ते आगच्छति वा न वा, तस्स भज्जा ताव न जेमेइ सुयति वा जाव नागतो भवति, सावि निव्विन्ना।

अन्नया मायरं सा वड्ढेति-तुम्ह पुत्तो दिवसे २ अड्ढरत्ते एति, अहं जग्गामि, छुहातिया अच्छामि, ताहे ताए भणइ मा दारं देज्जाहि, अहं अज्ज जग्गामि, सो दारं मग्गति, इयरीय अंबाडितो, भणितो य-जत्थ इमाए वेलाए उग्घाडियाणि तत्थ सच्च, तस्स भवियव्वयाए तेन मग्गंतेण उग्घाडितो साहुपडिस्सतो दिट्ठो, तत्थ गतो, वंदति, भणइ पव्वावेह मए, नेच्छंति, सयं लोओ कतो, ताहे से लिंगं दिन्नं, ते विहरिया। पुणोऽवि आगयाणं रन्ना कंबलरयणं से दिन्नं, आयरिएण- किं एएण जईणं ?, किं गहियंति भणिऊण तस्स अनापुच्छाए फालियं, निसेज्जातो कयातो, ततो स कसाइतो। अन्नया जिनकप्पिया वन्निज्जंति जहा-

'जिनकप्पिया य दुविहा पाणीपाया पडिग्गहधरा य।
पाउरणमपाउरणा एक्केक्का ते भवे दुविहा ॥

इत्यादि, सो भणइ-किं एस एवं न कीरइ ?, तेहिं भणियं-एस वोच्छिन्नो, ममं न वोच्छिज्जइत्ति सो चेव परलोगत्थिणा कायव्वो ॥ तत्रापि सर्वथा निष्परिग्रहत्वमेव श्रेयः, सूरिभिरुक्तम्-

धर्मोपकरणमेवैतत्, न तु परिग्रहस्तथा ॥
जन्तवो बहवस्सन्ति, दुर्दर्शा मांसचक्षुषाम्।
तेभ्यः स्मृतं दयार्थं तु, रजोहरणधारणम् ॥१॥
आसने शयने स्थाने, निक्षेपे ग्रहणे तथा।
गात्रसंकुचने चेष्टे, तेन पूर्वं प्रमार्जनम् ॥२॥

तथा- सन्ति सम्पातिमाः सत्त्वाः, सूक्ष्माश्च व्यापिनोऽपरे।
तेषां रक्षानिमित्तं च, विज्ञेया मुखवस्त्रिका ॥३॥

किंच- भवन्ति जन्तवो यस्मादन्नपानेषु केषुचित्।
तस्मात्तेषां परीक्षार्थं, पात्रग्रहणमिष्यते ॥४॥

अपरं च- सम्यक्त्वज्ञानशीलानि, तपश्चेतीह सिद्धये।
तेषामुपग्रहार्थाय, स्मृतं चीवरधारणम् ॥५॥
शीतवातातपैर्दंशैर्मशकैश्चापि खेदितः।
मा सम्यक्त्वादिषु ध्यानं, न सम्यक् संविधास्यति ॥६॥
तस्य त्वग्रहणे यत् स्यात्, क्षुद्रप्राणिविनाशनम्।
ज्ञानध्यानोपघातो वा, महान् दोषस्तदैव तु ॥७॥

यः पुनरतिसहिष्णुतयैतदन्तरेणापि न धर्मबाधकस्तस्य नैतदस्ति, तथा चाह-

''य एतान् वर्जयेद्दोषान्, धर्मोपकरणाहते।

तस्य त्वग्रहणं युक्तं, यः स्वाञ्जिन इव प्रभुः ॥"

स च प्रथमसंहनन एव, न चेदानीं तदस्तीत्यादिकया प्रागुक्तया च युक्त्योच्यमानोऽसौ कर्म्मोदयेन चीवराइयं छड्डेत्ता गतो, तस्स उत्तरा भइणी, उज्जाने ठियस्स वंदिया गया, तं च दट्ठूण तोएवि चीवरातियं सव्वं छड्डियं, ताहे भिक्खाए पविट्ठा, गणियाए दिट्ठा, मा अम्ह लोगो विरज्जिहिति उरे से पोत्ती बद्धा, सा नेच्छति, तेन भणियं- अच्छउ एसा तव देवयादित्ता। तेन य दो सीसा पव्वाविया-कोडिन्नो कोट्टवीरो य, तओ सीसाण परंपरफासो जातो ॥

एतदर्थोपसंहारिके भाष्यगाथे-

भा.[१] ऊहाए पन्नत्तं बोडियसिवभूइउत्तरेहि इमं।
मिच्छादंसणमिणमो रहवीरपुरे समुप्पन्नं ॥

भा.[२] बोडियसिवभूइओ बोडियलिंगस्स होइ उप्पत्ती।
कोडिन्नकोट्टवीरा परंपराफासमुप्पन्ना ॥

वृ. 'ऊहया' स्वाविवक्षात्मिकया "प्रज्ञप्तं" प्ररूपितं, बोटिकशिवभूतिः स चोत्तरा च तद्भगिनी बोटिकशिवभूत्युत्तरे ताभ्याम् 'इदम्' अनन्तरोक्तं, यत्रास्योत्पत्तिरतदाह-मिथ्यादर्शनम् 'इणमो'त्ति आर्षत्वादिदं रथवीरपुरे समुत्पन्नम् ॥ बोटिकशिवभूतेर्बोटिकलिङ्गस्य भवत्युत्पत्तिः, पठ्यते च-'बोडियलिङ्गस्स आसि उप्पत्ती,' तत्र च कौण्डिन्यकोट्टवीरौ परम्परा-अव्यवच्छिन्नशिष्यप्रशिष्यसंतानलक्षणा तस्याः स्पर्शो यत्र तत्परम्परास्पर्शं यथा भवत्येवमुत्पन्नौ, अनेन कौण्डिन्यकोट्टवीराभ्यां बोटिकसन्तानस्योत्पत्तिरुक्ता भवतीति गाथाद्वयार्थः ॥ इयता ग्रन्थेन श्रद्धादुर्ल्लभत्वमुक्तम्, अस्याश्च सम्यक्त्वरूपत्वात् सम्यक्त्वपूर्वकत्वाच्च संयमस्य तस्याप्यनेनैव दुर्ल्लभत्वमुक्तमेवेति भावनीयं। तथा चत्वारीत्यङ्गमित्यस्य च व्याख्याने चतुरङ्गेभ्यो हितं तत्स्वरूपव्यावर्णनेन चतुरङ्गीयमिति व्युत्पत्तिः सुज्ञानेवेति निर्युक्तिकृता नोपदर्शिता। गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं, तच्च-

मू.(१६) चत्तारि परमंगाणि, दुल्लहाणिह जंतूणो।
माणुसत्तं सुई सद्धा, संजमंमि य वीरियं ॥

वृ. 'चत्वारि' चतुःसङ्ख्यानि परमाणि च तानि प्रत्यासन्नोपकारित्वेन अङ्गानि च मुक्तिकारणत्वेन परमाङ्गानि 'दुर्ल्लभानि' दुःखेन लभ्यन्त इतिकृत्वा दुष्प्रापाणि 'इह' अस्मिन्संसारे, कस्य? जायत इति जन्तुस्तस्य देहिन इत्यर्थः, पठ्यते च-'देहिन' इति, कानि पुनस्तानि?-मनसि शेते मानुषः, अथवा मनोरपत्यमिति वाक्ये "मनोर्जातावञ्यतौ पुक् च" इत्यञि प्रत्यये पुगागमे च मानुषस्तद्भावः मानुषत्वं- मनुजभावः, 'श्रवणं' श्रुतिः, सा च 'अर्थप्रकरणादिभ्यः सामान्यशब्दा अपि विशेषेऽवतिष्ठन्ते' इति न्यायाद्धर्मविषया, श्रद्धाऽपि तत एव धर्मविषया, 'संयमे' आश्रवविरमणाद्यात्मनि, चः समुच्चये भिन्नक्रमः, ततो विशेषेणेर्यति-प्रवर्त्तयति आत्मानं तासु तासु क्रियास्विति वीर्य्यं च-सामर्थ्यविशेष इति सूत्रार्थः ॥

तत्र यथा मानुषत्वं दुर्ल्लभं तथा दर्शयितुमाह-

मू.(१७) समावन्नाण संसारे, नानागोत्तासु जाइसु।

कम्मा नानाविहा कट्टु पुढो विस्संभिया पया ॥

वृ. 'सम्' इति समन्तात् आपन्नाः-प्राप्ताः समापन्ना णं इति वाक्यालङ्कारे, क्वेत्याह-संसारे, तत्रापि क्व ?-नाना इत्यनेकार्थः, गोत्रशब्दश्च नामपर्यायः, ततो नानागोत्रासु-अनेकाभिधानासु जायन्ते जन्तव आस्विति जातयः-क्षत्रियाद्याः तासु, अथवा जननानि जातयः ततो जातिषु-क्षत्रियादिजन्मसु नाना-हीनमध्यमोत्तमभेदेनानेकं गोत्रं यासु तास्तथा तासु, अत्र हेतुमाह-क्रियन्त इति कर्माणि-ज्ञानावरणीयादीनि 'नानाविधानि' अनेकप्रकाराणि 'कृत्वा' निर्वर्त्य 'पुढो'त्ति पृथग् भेदेन, किमुक्तं भवति ?-एकैकशः, 'विस्संभिय'त्ति विन्दोरलाक्षणिकत्वाद् विश्वं-जगद् बिभर्ति-पूरयन्ति क्वचित्कदाचिदुत्पन्ना सर्वजगद्व्यापनेन विश्वभृतः, उक्तं च-

"नत्थि किर सो पएसो लोए वालग्गकोडिमित्तो ऽपि ।
जम्मणमरणाबाहा जत्थ जिएहिं न संपत्ता ॥"

इदमुक्तं भवति-अवाप्यापि मानुषत्वं स्वकृतविचित्रकर्मानुभावतः पृथग्जातिभागिन्य एव भवन्ति, काः-'प्रजाः' जनसमूहरूपाः, तदनेन प्राप्तमानुषत्वानामपि कर्मवशाद्विविधगति-गमनं मनुषत्वदुर्ल्लभत्वे हेतुरुक्तः, यद्वा संसारे कर्माणि नानाविधानि कृत्वा पृथगिति भिन्नासु नानागोत्रासु-अनेककुलकोटीपलक्षितासु जातिषु-देवाद्युत्पत्तिरूपासु समापन्नाः-सम्प्राप्ता वर्त्तन्त इति गम्यते, नेति प्राग्वत्, 'विश्रम्भिताः' सञ्जातविश्रम्भाः सत्यः प्रक्रमात्कर्म्मस्वेव तद्विपाकदारुणत्वापरिज्ञानात् काः ?, प्रजायन्ते इति प्रजाः-प्राणिन इति सम्बन्धः, तदनेन प्राणिनां विविधदेवादिभवभवनं मूलत एव मनुजत्वदुर्ल्लभत्वे कारणमुक्तामिति सूत्रार्थः ॥

मू. (१८) *एगया देवलोएसु, नरएसु ऽवि एगया ।*
एगया आसुरे काये, आहाकम्मेहिं गच्छइ ॥

वृ. 'एकदा' इत्येकस्मिन् शुभकर्मानुभवकाले दीव्यन्तीति देवाः तेषां लोकाः-उत्पत्ति-स्थानानि देवगत्यादिपुण्यप्रकृत्युदयविषयतथा लोक्यन्त इतिकृत्वा तेषु देवलोकेषु, नरान् कायन्ति-योग्यतयाऽऽह्वयन्तीति नरकाः तेषु रत्नप्रभादिषु नारकोत्पत्तिस्थानेषु, अपिशब्दस्य चार्थत्वात्तेषु च, 'एकदा' अशुभानुभवकाले, तथा 'एकदा' तथाविधभावनाभावितान्तः-करणावसरे, असुराणामयमासुरस्तम्-असुरसम्बन्धिनं, चीयत इति कायस्तं, निकायमित्यर्थः, बालतपः प्रभृतिभिरपि तत्प्राप्तिरिति दर्शनार्थं देवलोकोपादानेऽपि पुनरासुरकायग्रहणम्, अथवा देवलोकशब्दस्य सौधर्मादिषु रूढत्वात्तदुपादानमुपरितनदेवोपलक्षणम्, इदं चाधस्तनदेवोप-लक्षणमिति न पौनरुक्त्यम्, 'आहाकम्मेहि'त्ति आधानम्-आधाकरणमित्यर्थः, तदुपलक्षितानि कर्माण्याधाकर्माणि तैः, किमुक्तं ?-स्वयंविहितैरेव सरागसंयममहारम्भासुरभावना-दिभिर्देवनारकासुरगतिहेतुभिः क्रियाविशेषैः यथाकर्मभिर्वा-तत्तद्गत्यनुरूपचेष्टितैः 'गच्छति' याति, इति सूत्रार्थः ॥ तथा-

मू. (१९) *एगया खत्तिओ होइ, तओ चंडालबुक्कसो ।*
तओ कीडपयंगो य, तओ कुंथू पिवीलिया ॥

वृ. 'एकदे'ति मनुष्यजन्मानुरूपकर्म्मप्रकृत्युदयकाले 'खत्तिय'त्ति 'क्षण हिंसायां' क्षणनानि क्षतानि तेभ्यस्त्रायत इति क्षत्रियो-राजा भवति, 'तत' इति तदनन्तरं तको वा प्राणी 'चण्डालः'

प्रतीतः, यदि वा शूद्रेण ब्राह्मण्यां जातश्चण्डालः, 'चोक्कसो' वर्णान्तरभेदः, तथा च वृद्धाः "बंभणेन सुद्दीओ जातो निसाउत्ति वुच्चति, बंभणेन वेस्सीए जातो अंबट्ठोत्ति वुच्चति, तत्थ निसाएणं जो अंबट्ठीतो जातो सो बुक्कसो भन्नति" इह च क्षत्रियग्रहणादुत्तमजातयः चण्डाल-ग्रहणान्नीचजातयो बुक्कसग्रहणाच्च सङ्कीर्णजातय उपलक्षिताः, 'ततो' मानुषत्वादुद्धृत्येति शेषः, 'कीटः' प्रतीतः 'पतङ्गः' शलभः, चः समुच्चये, ततस्तको वा 'कुन्थु पिपीलिक'त्ति, चशब्दस्य लुप्तनिर्दिष्टत्वात् कन्थुः पिपीलिका च, भवतीति सर्वत्र सम्बध्यते, शेषतिर्यग्भेदोपलक्षणं चैतदिति सूत्रार्थः ॥ किमित्थं पर्यटन्तस्ते निर्विद्यन्ते न वेत्याह-

मू. (१००) *एवमावट्टजोणीसुं, पाणिनो कम्मकिब्विसा।*
न निव्विज्जंति संसारे, सव्वट्ठेसु व खत्तिया ॥

मू. (१०१) *कम्मसंगेहि संमूढा, दुक्खिया बहुवेयणा।*
अमानुसासु जोणीसु, विनिहम्मंति पाणिणो ॥

वृ. 'एवम्' अमुनोक्तन्यायेन आवर्त्तनम् आवर्त्तः-परिवर्त्त इति योऽर्थो, युवन्ति-मिश्रीभवन्ति कार्मणशरीरिण औदारिकादिशरीरैरासु जन्तवो जुषन्ते सेवन्ते ता इति वा योनयः, आवर्त्तोपलक्षिता योनयः आवर्त्तयोनयः तासु, 'प्राणिनः' जन्तवः, कर्म्मणा-उक्तरूपेण किल्बिषाः-अधमाः कर्म्मकिल्बिषाः, प्राकृतत्वाद्वा पूर्वापरनिपातः किल्बिषाणि-क्लिष्टतया निकृष्टान्यशुभानुबन्धीनि कर्म्माणि येषां ते किल्बिषकर्म्माणः, 'न निर्विद्यन्ते' कदैतद्विमुक्तिरिति नोद्विजन्ते, क्व वा आवर्त्तयोनयः ? इत्याह-'संसारे' भवे, केष्विव के न निर्विद्यन्ते ? इत्याह-सर्वे च ते अर्थ्यन्त इत्यर्थाश्च-मनोज्ञशब्दादयो धनकनकादयो वा सर्वार्थास्तेष्विव 'क्षत्रियाः' राजानः, किमुक्तं भवति ?- यथा मनोज्ञान् शब्दादीन् भुञ्जानानां तेषां तर्षोऽभिवर्धते, एवं तासु तासु योनिषु पुनः पुनरुत्पत्त्यां सत्यां कलंकलीभावमनुभवतामपि भवाभिनन्दिना प्राणिनामिति, कथमन्यथा न तत्प्रतिघातार्थमुद्यच्छयुरिति भावः ।

पाठान्तरं वा-'सव्वट्ठ इव खत्तिय'त्ति इवो भिन्नक्रमः, ततः सर्वैः शयनादिभिरर्थैः-प्रयोजनमस्येति सर्वार्थः क्षत्रियः, स चार्थाद्भ्रष्टराज्यः तद्वत्, ततो यथाऽसौ न निर्विद्यते, अर्थात्सर्वार्थान् प्रार्थयमानः, तथैतेऽपि प्राणिनः सुखान्यभिलषन्तोऽनिर्विद्यमानश्च, कर्म्मभिः-ज्ञानावरणीयादिभिः, सङ्गाः-सम्बन्धाः कर्मसङ्गास्तैः, यद्वा कर्माणि-उक्तरूपाणि तत्तक्रियाविशेषात्मकानि वा, तथा सज्यन्तेऽमीषु जन्तव इति सङ्गाः-शब्दादयोऽभिष्वङ्गविषयाः, ततश्च कर्माणि च सङ्गाश्च कर्म्मसङ्गाः तैः सम् इति भृशं मूढाः-वैचित्त्यमुपागताः सम्मूढाः, 'दुःखम्' असातात्मकं जातमेषामिति दुःखिताः, कदाचित्तन्मानसमेव स्यादत आह-'बहुवेदनाः' बह्वयो वेदनाः-शरीरव्यथा येषां ते तथा, मनुष्याणामिमामानुष्या न तथाऽमानुष्याः, तासु-नरकतिर्यगाभियोग्यादिदेवदुर्गतिसम्बन्धिनीषु 'योनिषु' अभिहितरूपासु 'विनिहन्यन्ते' विशेषेण निपात्यन्ते, अर्थात्कर्म्मभिः, कोऽर्थः ?-न तत उत्तारं लभन्ते 'प्राणिनः' जन्तवः, तदनेन सत्यप्यावर्त्ते निर्वेदाभावात् कर्म्मसङ्गसंमूढाः दुःखहेतुनरकादिगत्यनुसरणेन प्राणिनो मनुजत्वं न लभन्त इत्युक्तमिति सूत्रद्वयार्थः ॥ कथं तर्हि तदवाप्तिः ? इत्याह-

मू. (१०२) *कम्माणं तु पहाणाए, आनुपुव्वी कयाइ उ।*

जीवा सोहिमणुप्पत्ता, आययंति मणुस्सयं ॥

वृ. 'कर्मणां' मनुजगतिविबन्धकानाम् 'तु:' पूर्वस्माद्विशेषद्योतक: 'पहाणाए'त्ति प्रकृष्टं हानम्-अपगम: प्रहाणं तस्यापो-लाभ: प्रहाणाय: तस्मिन्, यद्वा सूत्रत्वात् प्रहाणौ प्रहान्या वा तद्विबन्धकानन्तानुबन्ध्यादिकर्मसु प्रहीणेषु, कृतश्चिदीश्वरानुग्रहादेस्तदप्राप्ते:, अन्यथा हि तद्वैफल्यापत्ति:, एतेन-'अन्यो जन्तुरनीशोऽयमात्मन: सुखदु:खयो। ईश्वरप्रेरितो गच्छेत्, श्वभ्रं वा स्वर्गमेव वा ॥' इत्यपास्तं भवति, अथ कथं पुनस्तेषां प्रहाणिरित्याह-'आनुपूर्व्या' क्रमेण न तु झगित्येव, तयापि 'कयाइ उ'त्ति तुशब्दस्यैवकारार्थत्वात्कदाचिदेव न सर्वदा, 'जीवा:' प्राणिन: 'शुद्धीम्' क्लिष्टकर्म्मविगमात्मिकाम् अनु-तद्विघातिकर्मापगमस्य पश्चात्प्राप्ता: 'आददते' स्वीकुर्वन्ति मनुष्यतां, पाठान्तरतश्च 'जायन्ते मणुस्सयं (सत्तवं)'ति सुबलत्वत्यया(न्म)नुष्यतायां, तदैव तन्निर्वर्त्तकमनुजगत्यादिकर्मोदयादिति भाव:, अनेन मनुजत्वविबन्धककर्मापगमस्य तथाविधकालादिसव्यपेक्षत्वेन दुरापतया मनुष्यत्वदुर्ल्लभत्वमुक्तमिति सूत्रार्थ: ॥

कदाचिदेत-दवाप्तौ श्रुति: सुलभैव स्यादत आह-

मू. (१०३) *माणुस्सं विग्गहं लद्धुं, सुती दुल्लहा।*
जं सोच्चा पडिवज्जंति, तवं खंतिमहिंसयं ॥

वृ. 'मानुस्सं'ति सूत्रत्वान्मानुष्यकं मनुष्यसम्बन्धिनं विशेषेण गृह्यते आत्मना कर्म्मपरतन्त्रेणेति विग्रहस्तं मनुजगत्याद्युपलक्षितमौदारिकशरीरं 'लद्धुं'ति अपेक्ष्यमाणत्वात् लब्ध्वापि, 'श्रुति:' आकर्णनं, कस्य ?-धारयति दुर्गतौ निपततो जीवानिति धर्म्म:, तथा च वाचक:-

"प्राग्लोकबिन्दुसारे सर्वाक्षरसन्निपातपरिपठित:।
धृञ् धारणाऽर्थो धातुस्तदर्थयोगाद् भवति धर्म्म: ॥"
दुर्गतिभयप्रपाते पतन्तमभयकरदुर्ल्लभत्राणे।
सम्यक् चरितो यस्माद्धारयति तत: स्मृतो धर्म: ॥२॥

तस्य-एवमन्वर्थनाम्नो धर्मस्य 'दुर्ल्लभा' दुरापा प्रागुत्कालस्यादिहेतुत:, स च-

मृद्वी शय्या प्रातरुत्थाय पेया, भक्तं मध्ये पानकं चापराह्णे।
द्राक्षाखण्डं शर्करा चार्धरात्रे, मोक्षश्चान्ते शाक्यपुत्रेण दृष्ट: ॥"

इत्यादिसुगतादिकल्पितोऽपि स्याद् अतस्तपोद्वायाह-यं धर्म्मं श्रुत्वा 'प्रतिपद्यन्ते' अङ्गीकुर्वन्ति 'तप:' अनशनादि द्वादशविधम् 'क्षान्ति' क्रोधजयलक्षणां मानादिजयोपलक्षणं चैषा, 'अहिंसयन्ति' अहिंसकताम्-अहिंसनशीलताम्, अनेन च प्रथमव्रतमुक्तम्, एतच्च शेषव्रतोपलक्षणम्, एतत्प्रधानत्वात्तेषाम्, एतद्वृत्तितुल्यानि हि शेषव्रतानि, एवं च तपस: क्षान्त्यादिचतुष्कस्य महाव्रतपञ्चकस्य चाभिधानादशविधस्यापि यतिधर्म्मस्याभिधानम्, इह च यद्यपि श्रुते: शाब्दं प्राधान्यं तथापि तत्त्वतो धर्म एव प्रधानं, तस्या अपि तदर्थत्वादिति, स एव यच्छब्देन परामृश्यते, अथवा काक्वा नीयते-'यद्' यस्मात् श्रुत्वा प्रतिपद्यन्ते तप: प्रभृति ना श्रुत्वा 'सुच्चा' जाणति कल्लाणं, सोच्चा जाणति पावगं' इत्याद्यागमात्, तत एवमतिमहार्थतया दुरापेयमिति सूत्रार्थ: ॥ श्रुत्यवाप्तावपि श्रद्धादुर्ल्लभतामाह-

मू. (१०४) *आहच्च सवणं लद्धुं, सद्धा परमदुल्लहा।*

सोच्चा नेयाउयं मग्गं, बहवे परिभस्सइ ॥

वृ. 'आहत्त्य' इति कदाचित् 'श्रवणम्' प्रक्रमाद्धर्माकर्णनम्, उपलक्षणत्वान्मनुष्यत्वं च लब्ध्वेति, अपि शब्दस्य गम्यमानत्वात् लब्ध्वापि-अवाप्यापि 'श्रद्धा' रुचिरूपा प्रक्रमाद्ध-र्म्मविषयैव 'परमदुर्ल्लभा' अतिशयदुरापा, कुतः पुनः परमदुर्ल्लभत्वमस्या इत्याह-'श्रुत्वा' आकर्ण्य न्यायेन चरति-प्रवर्त्तते नैयायिकः, न्यायोपपन्न इत्यर्थः, तं 'मार्गम्' सम्यग्दर्शनाद्यात्मकं मुक्तिपथं बहवः नैक एव, परि इति सर्वप्रकारं 'भस्सइ'त्ति भ्रश्यन्ति-च्यवन्ते प्रक्रमान्नैयायिक-मार्गादेव, यथा जमालिप्रभृतयो, यच्च प्राप्तमप्ययैति तच्चिन्तामणिवत् परमदुर्ल्लभमेवेति भावः। इहैव केचिन्निह्नववक्तव्यतां व्याख्यातवन्तः, उचितं चैतदप्यास्तां(प्यस्ति) इति सूत्रार्थः॥ एतत्त्रयावाप्तावपि संयमवीर्यदुर्ल्लभत्वमाह-

मू. (१०५) सुइं च लद्धुं च, वीरियं पुन दुल्लहं।
बहवे रोयमाणा वि, नो य णं पडिवज्जइ ॥

वृ. श्रुतिं चशब्दान्मनुष्यत्वं च 'लद्धुं'ति प्राग्वल्लब्ध्वापि, श्रद्धां च वीर्यं प्रक्रमात् संयमविषयं, पुनःशब्दस्य विशेषकत्वाद्विशेषेण दुर्लभं, यतः बहवः नैके एव रोचमाना अपि-न केवलं प्राप्तमनुष्यत्वाः शृण्वन्तो वेत्यपिशब्दार्थः, श्रद्दधाना अपि, नो चेति चशब्दस्यैवकारार्थत्वान्नैव 'ण'मिति वाक्यालङ्कारे अथवा 'णो य ण'न्ति सूत्रत्वान्नो एतं 'पडिवज्जंति'त्ति तत एव प्रतिपद्यन्ते चारित्रमोहनीयकर्म्मोदयतः, सत्यकिश्रेणिकादिवन्न कर्तुमभ्युपगच्छन्तीति सूत्रार्थः॥

मू. (१०६) माणुसत्तंमि आयाओ, जो धम्मं सोच्च सद्दहे।
तवस्सी वीरियं लद्धुं, संवुडो निद्धुणे रयं ॥

वृ. 'मानुषत्वे'मनुजत्वे 'आयातः' आगतः, विमुक्तं भवति ?-मानुषत्वं प्राप्तो, य इत्य-निर्दिष्टस्वरूपो य एव कश्चिद्धर्म्मं श्रुत्वा 'सद्दहे'त्ति श्रद्धते-रोचयते 'तपस्वी' निदानादिविरहितया प्रशस्यतपोऽन्वितः, कथं ?- 'वीर्यं' संयमोद्योगं लब्ध्वा 'संवृत्तः' स्थगितसमस्ताश्रवः, स किमित्याह-'निद्धुणे'त्ति निर्धुनोति-नितरामपनयति रज्यते अनेन स्वच्छस्फटिकवच्छुद्ध-स्वभावोऽप्यात्माऽन्यथात्वमापाद्यत इति रजः-कर्म्म बध्यमानकं बद्धं च, तदपनयनाच्च मुक्तिं प्राप्नोतीति भावः, उभयत्र लिप्स्यमानसिद्धौ चेति लट्, इह च श्रद्धानेन सम्यक्त्वमुक्तं, तेन च ज्ञानमाक्षिप्तं, प्रदीपप्रकाशयोरिव युगपदुत्पादात्ततयोः, तथा च 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इति न विरुध्यत इति सूत्रार्थः॥

इत्थमामुष्मिकं मुक्तिफलमुक्तम्, इदानीमिहैव फलमाह-

मू. (१०७) सोही उज्जुभूयस्स, धम्मो सुद्धस्स चिट्ठति।
निव्वाणं परमं जाइ, घयसित्तेव पावए ॥

वृ. 'शुद्धिः' कषायकालुष्यापगमो, भवतीति गम्यते, 'ऋजुभूतस्य' चतुरङ्गप्राप्त्या मुक्तिं प्रति प्रगुणीभूतस्य, तथा च 'धर्म्मः' क्षान्त्यादिः 'शुद्धस्य' शुद्धिप्राप्तस्य 'तिष्ठति' अविचलित-तयाऽऽस्ते इति, अशुद्धस्य तु कदाचित्कषायोदयात्तद्विचलनमपि स्यादित्याशयः, तदवस्थौ च 'निर्वाणं' निर्वृतिर्निर्वाणं स्वास्थ्यमित्यर्थः 'परमं' प्रकृष्टम् 'एगमासपरियाए समणे वंतरियाणं तेयलेसं वीईवयति' इत्याद्यागमेनोक्तं 'नैवास्ति राजराजस्य तत्सुख'मित्यादिना च वाचक-

वचनेनानूदितं 'याति' प्राप्नोति, क इव ?-'घयसित्तेव'त्ति इवस्य भिन्नक्रमत्वात् घृतेन सिक्तो घृतसिक्तः पुनातीति पावकः-अग्निः, लोकप्रसिद्धया, समयप्रसिद्धया तु पापहेतुत्वात्पापकः तद्वत्, स च न तथा तृणादिभिर्दीप्यते यथा घृतेनेत्यस्य घृतसिक्तस्य निर्वृतिरनुगीयते, ततो विशेषेणास्य दृष्टान्तत्वेनाभिधानमिति भावनीयं, यद्वानिर्वाणमिति जीवन्मुक्तिं याति-

"निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम्।
विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् ॥"

इति वचनात्, कथंभूतः सन् ?-घृतसिक्तपावक इव-तपस्तेजसा ज्वलिततत्वेन घृततर्पित तार्पिसमान इति सूत्रार्थः ॥ पठन्ति च नागार्जुनीयाः-

"चउद्धा संपयं लद्धुं, इहेव ताव भायते ।
तेयते तेजसंपन्ने, घयसित्तेव पावए ॥ त्ति"

तत्र चतुर्धा-चतुष्प्रकारां, संपदां-सम्पत्तिं प्रक्रमान्मनुष्यत्वादिविषयां लब्ध्वा इहैव लोके तावद्, आस्तां परत्र, 'भ्राजते' ज्ञानश्रिया शोभते, 'तेजते' दीप्यते तेजसा-अर्जितपोजनितेन सम्पन्नो-युक्तस्तेजःसम्पन्नः, शेषं प्राग्वदिति । इत्थमामुष्मिकमैहिकं च फलमुपदर्श्याह-

मू. (१०८) *विगिंच कम्मुणो हेउं, जसं संचिणु खंतिए ।*
पाढवं सरीरं हिच्चा, उड्ढं पक्कमती दिसं ॥

वृ. 'विगिञ्च'त्ति वेविगिधि पृथक् कुरु 'कर्मणः' प्रस्तावान्मानुषत्वादिविबन्धकस्य 'हेतुम्' उपादानकारणं-मिथ्यात्वाविरत्यादिकं, तथा यशोहेतुत्वाद्यशः-संयमो विनयो वा, यदुक्तम्-

"एवं धम्मस्स विनओ, मूलं परमो से मोक्खो ।
जेन किर्त्ति सुयं सिग्घं, नीस्सेसं चाभिगच्छइ ॥"

इति, तत् 'सञ्चिणु' भृशमुपचितं कुरु, कया ?-क्षान्त्या, उपलक्षणत्वान्मार्दवादिभिश्च, ततः किं स्यादित्याह-'पाढवं'ति पार्थिवमिव पार्थिवं शीतोष्णादिपरिषहसहिष्णुतया समदुःख-सुखतया च पृथिव्यामिव भवं, पृथिवी हि सर्वंसहा, कारणानुरूपं च कार्यमिति भावो, यदि वा पृथिव्या विकारः पार्थिवः, स चैह शैलः, ततश्च शैलेशीप्राप्त्यपेक्षयाऽतिनिश्चलतया शैलोपमत्वान्परप्रसिद्धया वा पार्थिवं 'शरीरं' तनुं 'हित्वा' त्यक्त्वा ऊर्ध्वं दिशमिति सम्बन्धः, 'प्रक्रामति' प्रकर्षेण गच्छति येन भवानिति उपस्कारः, यद्वा सोपस्कारत्वात् सूत्राणामेवं नीयते-यत एवं कुर्वन् भव्यजन्तूरूर्ध्वं दिशं प्रक्रामति ततस्त्वमतिदृढचेता इत्थमित्थं च कुर्वित्युपदिश्यते, प्रक्रामतीति वर्त्तमानसामीप्ये वर्त्तमाननिर्देश आसन्नफलावाप्तिसूचक इति सूत्रार्थः ॥ इत्थं येषां तद्भव एव मुक्त्यवाप्तिस्तान् प्रत्युक्तं, येषां तु न तथा तान्प्रत्याह-

मू. (१०९) *विसालिसेहिं सीलेहिं, जक्खा उत्तर उत्तरा ।*
महासुक्का व दिप्पंता, मन्नंता अपुणोच्चयं ॥
मू. (११०) *अप्पिया देवकामाणं, कामरूवविउव्विणो ।*
उड्ढं कप्पेसु चिट्ठंति, पुव्वा वाससया बहू ॥

वृ. 'विसालिसेहिं'ति मागधदेशीयभाषया विसदृशैः स्वस्वचारित्रमोहनीयकर्मक्षयोपशमापेक्षया विभिन्नैः 'शीलैः' व्रतपालनात्मकैरनुष्ठानविशेषैः, किम् ? -इज्यन्ते पूज्यन्त इति

यक्षाः, यान्ति वा तथाविधर्द्धिसमुदयेऽपि क्षयमिति यक्षाः, ऊर्ध्वं कल्पेषु तिष्ठन्तीति उत्तरेण सम्बन्धः, 'उत्तरोत्तराः' उत्तरोत्तरविमानवासिनः उत्तरो वा उपरितनस्थानवर्त्युत्तरः-प्रधानो येषु ते ऽमी उत्तरोत्तराः 'महाशुक्ला' अतिशयोज्ज्वलतया चन्द्रादित्यादयः, त इव 'दीप्यमानाः' प्रकाशमानाः, अनेन शरीरसम्पदुक्ता, सुखसम्पदमाह-'मन्यमाना' मनसि अवधारयन्तः शब्दादिविषयावाप्तिसमुत्पन्नरतिसागरावगाढतया ऽतिदीर्घस्थितितया वा, किम् ?-न पुनश्चवनम् अपुनश्चयवस्तम्-अधस्तिर्यगादिषूत्पत्त्यभावं, यदुक्तं 'मन्यमाना अपुनश्चयव'मिति, तत्रोक्तमेव हेतुं सूत्रकृदाह 'अप्पिया' इत्यादिना, 'अर्प्पिताः' प्राक्कृतसुकृतेन लौकिता इव, केषाम् ?-काम्यन्ते-अभिलष्यन्ते इति कामा देवानां कामा देवकामाः-दिव्याङ्गनाङ्गस्पर्शादयः, 'काम-रूपविउव्विणो'त्ति सूत्रत्वात्कामरूपविकरणाः-यथेष्टरूपाभिनिर्वर्त्तनशक्तिसमन्विताः, कुर्वन्ति हि ते उत्तरवैक्रियाणि समवसरणागमनादिषु तथा तथेति, येऽपि प्रयोजनाभावान्न कुर्वन्ति तेषामपि शक्तिरस्त्येवेत्येवमुच्यते, 'ऊर्ध्वं' कल्पोपरिवर्त्तिषु ग्रैवेयकेष्वनुत्तरविमानकेषु च कल्पेषु सौधर्म्मादिषु यदि वा-ऊर्ध्वम्-उपरि कल्प्यन्ते विशिष्टपुण्यभाजामवस्थितिविषयतयेति सौधर्म्मादया ग्रैवेयकादयश्च सर्वेऽपि कल्पा एव तेषु 'तिष्ठन्ति' आयुःस्थितिमनुपालयन्ति पूर्वाणि-वर्षसप्ततिकोटिलक्षषट्पञ्चाशत्कोटिसहस्रपरिमितानि बहूनि, जघन्यतोऽपि पल्योपमस्थितित्वात्, तत्रापि च तेषामसङ्ख्येयानामेव सम्भवात्, एवं वर्षशतात्यपि बहूनि. पूर्ववर्षशतायुषामेव चरणयोग्यत्वेन विशेषतो देशनौचित्यमिति ख्यापनार्थमित्थमुपन्यास इति सूत्रार्थः ॥ तत्किमेषामेतावदेव फलमित्याशङ्क्याह-

मू.(१११) तत्थ ठिच्चा जहाठाणं, जक्खा आउक्खए चुया ।
उवेंति माणुसं जोणिं, से दसंगेऽभिजायाह ॥

वृ. 'तत्र' तेषूक्तरूपोत्पत्तिस्थानेषु 'स्थित्वा' इत्यासित्वा 'यथास्थानम्' इति यद्यस्य स्वानुष्ठानानुरूपं यदिन्द्रादिपदं तस्मिन् यक्षाः 'आयुःक्षये' स्वजीवितावसाने 'च्युताः' भ्रष्टाः 'उवेन्ति'त्ति उपयन्ति मनुष्याणामियं मानुषी तां 'योनिम्' उत्पत्तिस्थानं, तत्र च 'से' इति स सावशेषकुशलकर्मा कश्चिज्जन्तुः दशाङ्गानि भोगोपकरणानि वक्ष्यमाणान्यस्येति दशाङ्गः अभिजायते, एकवचननिर्देशस्तु विसदृशशीलतया कश्चिद्दशाङ्गः कश्चित्रयाङ्गादि रपि जायत इति वैचित्र्यसूचनार्थः, यद्वा 'से' इति सूत्रत्वात् तेषां दशानामङ्गानां समाहारो दशाङ्गी, प्राकृत-त्वाच्च पुंसा निर्देशः, 'अभिजायते' उपभोग्यतयाऽभिमुख्येनोत्पद्यत इति सूत्रार्थः ॥

मू.(११२) खित्तं वत्थु हिरण्णं च, पसवो दासपोरुसं ।
चत्तारि कामखंधाणि, तत्थ से उववज्जइ ॥
मू.(११३) मित्तवं नाइवं होइ, उच्चागोते य वन्नवं ।
अप्पायंके महापन्ने, अभिजाय जसो बले ॥

वृ. 'क्षि निवासगत्योः' क्षियन्ति निवसन्त्यस्मिन्निति क्षेत्रं-ग्रामारामादि सेतुकेतूभयात्मकं वा, तथा वसन्त्यस्मिन्निति वास्तु-खातोच्छ्रितोभयात्मकं 'हिरण्यं' सुवर्णम्, उपलक्षणत्वात् रूप्यादि च, 'पशवः' अश्वादयः, दास्यते-दीयते एभ्य इति दासाः पोष्यवर्गरूपास्ते च पौरु-षेयं-सूत्रत्वात्पौरुषेयं च-पदातिसमूहः दासपौरुषेयं, 'चत्वारः' चतुःसङ्ख्याः, अत्र हि क्षेत्रं

वास्त्वति चैको हिरण्यमिति द्वितीयः पशव इति तृतीयो दासपौरुषेयमिति चतुर्थः, एते किमित्याह-काम्यत्वात् कामाः-मनोज्ञशब्दादयः, तद्धेतवः स्कन्धाः पुद्गलसमूहाः ततः कामस्कन्धाः, यत्र भवन्तीति गम्यते, प्राकृतत्वाच्च नपुंसकनिर्देशः, 'तत्र' तेषु कुलेषु 'से' इति स 'उपपद्यते' जायते। अनेन चैकमङ्गमुक्तं, शेषाणि तु नवाङ्गन्याह -मित्राणि-सहपांशुक्रीडितादीनि सन्त्यस्येति मित्रवान्, ज्ञातयः-स्वजनाः सन्त्यस्येति ज्ञातिमान् भवति, उच्चैः-लक्ष्म्यादिक्षयेऽपि पूज्यतया गोत्रं-कुलमस्येत्युच्चैर्गोत्रः, यः समुच्चये, वर्णः-श्यामादि, स्निग्धत्वादिगुणैः प्रशस्योऽस्येति वर्णवान्, 'अल्पातंकः' आतङ्कविरहितो नीरोग इत्यर्थः, महती प्रज्ञाऽस्येति महाप्रज्ञः-पण्डितः, 'अभिजातः' विनीतः, स हि सर्वजनाभिगमनीयो भवति, दुर्विनीतस्तु शेषगुणान्वितोऽपि न तथेति, अत एव च 'जसो'त्ति यशस्वी, तथा च सति 'बले'त्ति बली कार्यकारणं प्रति सामर्थ्यवान्, उभयत्र सूत्रत्वान्मत्वर्थीयलोपः, एकैकोऽपि हि मित्रत्वादिगुणस्तत्तत्कार्याभिनिर्वर्तनक्षमः, किं पुनरमी समुदिताः ?, शरीरसामर्थ्याच्चेह बलोक्तिः ॥ तत्किमेवंविध-गुणसम्पत्समन्वितं मानुषत्वमेव तत्फलमित्याह

मू. (११४) भोच्चा माणुस्सए भोए, अप्पडिरूवे अहाउयं।
पुव्विं विसुद्धसद्धम्मे, केवलं बोहिं बुज्झिया ॥

वृ. 'भुक्त्वा' आसेव्य 'मानुष्यकान्' मनुष्यसम्बन्धिनः भुज्यन्त इति भोगाः-मनोज्ञशब्दादयस्तान्, अविद्यमानं प्रतिरूपमतिप्रकर्षवत्त्वेनानन्यतुल्यमेषामित्यप्रतिरूपाः तान्, 'यथायुः' आयुषोऽनतिक्रमेण पूर्वं-पूर्वजन्मविशुद्धो निदानादिरहितत्वेन 'सद्धर्म्मः(र्मा)' शोभनो धर्मोऽस्येति विशुद्धसद्धर्मा, केवलत्वाच्च 'धर्मादिनिच् केवला'दिति इत्यनिच् भवति, 'केवलाम्' अलकङ्कां 'बोधिं' जिनप्रणीतधर्म्मप्राप्तिलक्षणां 'बुध्ध्वा' अनुभूय प्राप्येतियावत् ॥ ततोऽपि किमित्याह-

मू. (११५) चउरंगं दुल्लहं मच्चा, संजमं पडिवज्जिया।
तवसा धुतकम्मंसे, सिद्धे भवति सासए ॥

वृ. चतुर्णामङ्गानां समाहारश्चतुरङ्गो तामभिहितस्वरूपां 'दुर्लभा' दुष्प्रापां 'मत्वा' ज्ञात्वा 'संयमं' सर्वसावद्ययोगविरतिरूपं 'प्रतिपद्य' आसेव्य, 'तपसा' बाह्येनाभ्यन्तरेण च धुतम् अपनीतं, कर्म्मांसित्ति-कार्म्मग्रन्थिकपरिभाषया सत्कर्म्मानेनेति धुतकर्मांशः, तदपनयनाच्च बन्धादौ-नामप्यर्थतोऽपनयनमुक्तमेव, यद्वा धुताः कर्म्मणोंऽशा-भागा येन स तथाविधः, किमित्याह-सिद्धो भवति, स च किमाजीविकमतपरिकल्पितसिद्धवत् पुनरिहैति उत नेत्यत आह-'शाश्वतः' शश्वद्भवनात्, शश्वद्भवनं च पुनर्भवनिबन्धनकर्म्मबीजात्यन्तिकोच्छेदात्, तथा चाह-

"दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नांकुरः।
कर्म्मबीजे तथा दग्धे, न रोहति भवांकुरः ॥"

इति, इह पुनस्तस्येहागमनकल्पनमतिमोहविलसितं, तथा च स्तुतिकृत्-"दग्धेन्धनः पुनरुपैति भवं प्रमथ्य, निर्वाणमप्यनवधारितभीरुनिष्ठः। मुक्तः स्वयंकृतभवश्च परार्थशूरस्त्वच्छा-

सनप्रतिहतेष्विह मोहराज्यम् ॥" इति सूत्रार्थः ॥ इतिः परिसमाप्तौ, ब्रवीमि प्राग्वदिति ॥

उक्तोऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वदेव ।

अध्ययनं - ३ समाप्तम्

मुनि दीपरत्नसागरेण संशोधीता सम्पादिता उत्तराध्ययनसूत्रे तृतीयअध्ययनस्य भद्रबाहुस्वामिरचिता निर्युक्तिः एवं शान्त्याचार्य रचिता टीका परिसमाप्ता ।

अध्ययनं - ४ असंस्कृतं

वृ. ॥ॐ नमः ॥ उक्तं तृतीयमध्ययनम्, अधुना चतुर्थावसरः, तस्य चायमभिसम्बन्धः, इहानन्तराध्ययने चत्वारि मनुष्यत्वादीन्यङ्गानि दुर्लभान्युक्तानि, इह तु तत्प्राप्तावपि महते दोषाय प्रमादो महते च गुणायाप्रमाद इति मन्यमानः प्रमादाप्रमादौ हेयोपादेयतयाऽऽह । इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि प्राग्वद् व्यावर्णनीयानि तावद् यावन्नाम-निष्पन्ने निक्षेपे प्रमादाप्रमादमिति नाम, ततश्च प्रमाद इत्यप्रमाद इति च निक्षेपव्यमित्युभय-निक्षेपप्रतिपादविषयाऽऽह निर्युक्तिकृत्-

नि. [१७९] नामंठवणपमाओ दव्वे भावे य होइ नायव्वो ।
एवेम अप्पमाओ चउव्विहो होइ नायव्वो ॥

वृ. 'नामंठवणपमाए' त्ति, प्रमादशब्द उभयत्र सम्बध्यते, ततश्च नामप्रमादः स्थापनाप्रमादः, 'दव्वे' इति द्रव्यप्रमादः 'भावे य त्ति' भावप्रमादश्च भवति ज्ञातव्यः, 'एवमेवे' त्ति नामस्थापना-द्रव्यभावभेदत एव अप्रमादश्चतुर्विधो भवति ज्ञातव्य इति गाथार्थः ॥

इह च नामस्थापने प्रतीते इत्यनादृत्य द्रव्यभावप्रमादावभिधित्सुराह-

नि. [१८०] मज्जं विसय कसाया निद्दा विगहा य पंचमी भणिया ।
इअ पंचविहो एसो होइ पमाओ य अपमाओ ॥

वृ. माद्यन्ति येन तत् मद्यं, यद्वशाद्गम्यागम्यवाच्यावाच्यादिविभागं जनो न जानाति, अत एवाह-"कार्याकार्ये न जानीते, वाच्यावाच्ये तथैव च । गम्यागम्ये च यन्मूढो, न पेयं मद्यमित्यतः ॥" विषीदन्ति-धर्मं प्रतिनोत्सहन्त एतेष्विति विषयाः, यद्वाऽऽसेवनकाले मधुरत्वेन परिणामे चातिकटुकत्वेन विषस्योपमां यान्तीति विषयाः, अत एवाविवेकिलोकाऽऽसेविता विवेकि-लोकपरित्यक्ताश्च, तदुक्तम्-

"आपातमात्रमधुरा विपाककटवो विषोपमा विषयाः ।
अविवेकिजनाऽऽचरिता विवेकिजनवर्जिताः पापाः ॥"

कष्यतेऽस्मिन् प्राणी पुनः पुनरावृत्तिभावमनुभवति कषयोपलकष्यमाणकनकवदिति कषः-संसारस्तस्मिन् आ-समन्तादयन्ते-गच्छन्त्येभिरसुमन्त इति कषायाः, यद्वा कषाया इव कषायाः, यथा हि तुवरिकादिकषायकलुषिते वाससि मञ्जिष्ठादिरागः, श्लिष्यति चिरं चावतिष्ठते तथैतत्कलुषित आत्मनि कर्म सम्बध्यते चिरतरस्थिति कं च जायते, तदायत्तत्वात् तत्स्थितेः, उक्तं हि शिवकर्मणा "जोगा पयडिपएसं ठितिअनुभागं कसायओ कुणइ" इत्यादि, एतदुष्टता च निरुक्त्यैव भाविता, 'निद्द' त्ति नितरां द्रान्ति-गच्छन्ति कुत्सितामवस्थामिहामुत्र चानयेति

निद्रा, तद्वशाद्धि प्रदीपनकादिषु विनाशमिहैवानुभवन्ति, धर्मकार्येष्वपि शून्यमानसत्वान्न प्रवर्तन्ते, तथा चाह-

"जागरिया धम्मीणं अहमीणं च सुत्तया सेया।
वच्छाहिवभगिणीए अकहिंसु जिनो जयंतीए॥"

विरूपा स्त्री भक्तचौरजनपदविषयतयाऽसम्बद्धभाषितया च कथा विकथा, तत्प्रसक्तो हि परगुणदोषोदीरणादिभिः, पापमेवोपार्जयति, अत एवाह वाचकः-

"यावत् परगुणदोषपरिकीर्त्तने व्यापृतं मनो भवति।
तावद्वरं विशुद्धे ध्याने व्यग्रं मनः कर्तुम्॥"

इह च चूर्णिकृतेन्द्रियाण्येव पञ्चमप्रमादतया व्याख्यातानि, तत्र च विषयग्रहणेऽपि पुनरिन्द्रियग्रहणं विषयेष्वपीन्द्रियवशत एव प्रवर्त्तन्त इति तेषामेवातिदुष्टता-ख्यापकं, महासामर्थ्या अपि ह्येतद्वशादुपघातमाप्नुवन्ति, आह च वाचकः-"इह चेन्द्रियप्रसक्ता निधनमुपजग्मुः, तद्यथा-गार्ग्यः सत्यकिर्नैकर्द्धिगुणं प्राप्तोऽनेकशास्त्रकुशलोऽनेकविद्याबलसम्पन्नोऽपी"-त्यादि। एते च तत्तत्पुद्गलोपचितद्रव्यरूपतया विवक्ष्यमाणा द्रव्यप्रमादा आत्मनि च रागद्वेषपरिणतिरूपतया विवक्षिता भावप्रमाद इति हृदयम्, अत एव न भावप्रमादः पृथगुक्तः। उपसंहारमाह-'इती'त्यनन्तरमुपदर्शितः पञ्चविधः पञ्चप्रकारः 'एष' इति इहैवोच्यमानतया [illegible] 'पमादे' प्रमादे प्रकर्षेण मद्यत्वेनेति प्रमादः अप्रादश्च तदभावरूपः पञ्चविधो, भावस्य चैकत्वेऽपि प्रतिषेध्यापेक्षया पञ्चविधत्वमिति गाथार्थः॥ प्रस्तुतयोजनामाह-

नि.[१८१] पंचविहो अ पमाओ इहमज्झयणंमि अप्पमाओ य।
वन्निज्जए उ जम्हा तेन पमायप्पमायंति॥

वृ. पञ्चविधः चशब्दस्तद्गतभेदसूचकः प्रमादः 'इह' अस्मिन्नध्ययने अप्रमादश्च पञ्चविधो वर्ण्यते, तुशब्दोऽन्याध्ययनेभ्यो विशेषं द्योतयति, यस्माद्धेतोस्तेन प्रमादाप्रमादमित्येतदुच्यत इति गाथार्थः॥ इत्यवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिष्पन्ननिक्षेपावसरः, स च सूत्रे सति भवति, तच्चेदम्-

मू.(११६) असंखयं जीविय मा पमायए, जरोवणीयस्स हु नत्थि ताणं।
एवं वियाणाहि जने पमत्ते, कन्नू विहिंसा अजया गहिंति॥

वृ. संस्क्रियत इति संस्कृतं न तथा शक्रशतैरपि सतो वर्द्धयितुं त्रुटितस्य वा कर्णपाशवदस्य सन्धातुमशक्यत्वात्, किं तत् ?,-'जीवितं' प्राणधारणरूपं, ततः किमित्याह-मा प्रमादिः, किमुक्तं भवति ? यदीदं कथञ्चित् संस्कर्तुं शक्यं स्यात् चतुरङ्गयवासावपि न प्रमादो दोषायैव स्यात्, यदा त्विदमसंस्कृतं तदैतत्परिक्षये प्रमादिनस्तदतिदुर्ल्लभमिति मा प्रमादं कृथाः, कुतः पुनरसंस्कृतम् ?-जरया-वयोहानिरूपया उपनीतस्य-प्रक्रमान्मृत्युसमीपं प्रापितस्य, प्रायो हि जरानन्तरमेव मृत्युरित्येवमुपदिश्यते, हुर्हेतौ, यस्मान्न अस्ति-विद्यते त्राणं-शरणं येन मृत्युतो रक्षा स्यात्, उक्तं च वाचकैः-

"मङ्गलैः कौतुकैर्योगैर्विद्यामन्त्रैस्तथौषधैः।
न शक्ता मरणात् त्रातुं, सेन्द्रा देवगणा अपि॥"

यद्वा स्यादेतत्-वार्द्धके धर्मं विभास्यामीत्याशङ्क्याह जरामुपनीतः-प्रापितो गम्यमानत्वात् स्वकर्म्मभिर्जरोपनीतस्तस्य नास्ति त्राणं, पुत्रादयोऽपि हि न तदा पालयन्ति, तथा चात्यन्तमबधीरणास्पदस्य न धर्म्मं प्रति शक्तिः श्रद्धा वा भाविनी, यद्वा त्राणं येनासावपनीयते पुनर्यौवनमानीयते न तादृक्करणमस्ति, ततो यावदसौ (त्वां) नाभिभवति तावद्धर्म्मे मा प्रमादीः, उक्तं हि-

"तद्यावदिन्द्रियबलं जरया रोगैर्न बाध्यते प्रसभम्।
तावच्छरीरमूर्च्छां त्यक्त्वा धर्मे कुरुष्व मतिम्॥"

जरोपनीतस्य च त्राणं नास्तीत्यत्राङ्गणो दृष्टान्तः, तत्र च सम्प्रदायः-

उज्जेनी नयरी जियसत्तू राया, तस्स अङ्गणो मल्लो, सव्वज्झेसु अजेतो। इतो य समुद्दतडे सोपारयं नयरं, तत्थ सिंहगिरी राया, सो य मल्लाणं जो जिणति तस्स बहुं दव्वं देति, सो य अङ्गणो तत्थ गंतूण वरिसे वरिसे पडागं हरति, राया चिंतेइ-एस अन्नाओ रज्जाओ आगतूण पडागं हरति, एसा ममं ओहावणत्ति पडिनिक्खमति, तेण मच्छितो एगो दिट्ठो वसं दिंतो, बलं च से विन्नासियं, नाऊण पोसितो, पुणरवि अङ्गणो आगतो, सो य किर मल्लजुद्धं होहितित्ति अनागते चेव संगतो नयराओ अप्पणो पत्थयणस्स बयल्लं गरुअं अव्वाबाहेणं एति, संपत्तो सोपारयं, जुद्धे पराजिओ मच्छियमल्लेणं, गतो सयं आवासं चिंतेइ-एयस्स वुड्ढी तरुणस्स मम हानी, अन्नं मग्गइ मल्लं, सुणेति सुरट्ठाए अत्थित्ति, एतेणं भरुकच्छारणीगामे दूरेलकूवियाए करिसतो दिट्ठो, एक्केणं हलं वाहेइ, एक्केणं फलहीतो उप्पाडेति, तं दट्ठूण ठितो, पेच्छामि ताव से आहारेति, आवासा मुक्का, भज्जा य से भत्तं गहाय आगया, पत्थिया, कूरस्स उब्भज्जिय घडतो पेच्छति, जिमितो सण्णाभूमिं गतो, तत्थ परिक्खइ, सव्वं संवट्टि, म वेवालियंपि वसहिं तस्स घरं मग्गति, दिन्ना।

इतो य संकहा य, पुच्छइ-का जीविका ?, तेन कहिए भणति अहं अङ्गणो तुमं इस्सरं करेमित्ति, तीसे महिलाए कप्पासमोल्लं दिन्नं, सा य उवलेट्ठा, उज्जेनिए गया, तेणवि वमनविरेयणाणि कयाणि, पोसितो निसुद्धं सिक्खावितो, पुणरवि महिमाकाले तेणेव विहिणा आगतो, पढमदिवसे फलहियमल्लो, मच्छियमल्लोवि, जुद्धे एक्को अज्जितो एक्को अपराजितो, रायावि बीयदिवसे होहिइत्ति अतिगतो इमेवि सए २ आलए गया, अङ्गणेण फलहियमल्लो भणितो-कहेहि पुत्ता! जं ते दुक्खावियं, तेण कहियं, मक्खित्ता मल्लितो सेएणं पुणरवीकतो, मच्छियम्मवि रन्ना संमद्दगा विसज्जिया, भणइ-अहं तस्स पिउणोऽपि न बीहेमि, सो को वराओ ?, बीयदिवसे समजुद्धा, तईयदिवसे अंबप्पहारो नीसहो वइसाहं ठितो मच्छितो, अङ्गणेण भणितो-फलहित्ति, तेन फलिहग्गहेण कड्ढितो सीसे कुंडिकागहेण, सक्कारितो गतो उज्जेनिं। तत्थ य विमुक्कजुज्झवावारो अच्छति, सो य महल्लोत्तिकाउं परिभूयए सयणवग्गेणं, जहाअयं संपयं न कस्सइ कज्जस्स खमोत्ति, पच्छा सो माणेणं तेसिं अणाढच्छाए कोसंबिए नयरिए गतो, तत्थ वसभेत्तं उवरेगमतिगतो रसायणं उवजीवेति, सो बलिट्ठो जातो, जुद्धमहे पवत्तेति, रायमल्लो निरंगणो नाम, तं निहणति, पच्छा राया मण्णुइतो-मम मल्लो आगंतूणा विहणितोत्ति न पसंसई, रायाणे य अपसंसंते सव्वो रंगो तुण्हिक्को अच्छति, इतो य अङ्गणेण राइणो जाणणनिमित्तं भण्णति

"साहह वण! सउनाणं साहह भो सउनिगा सउनिगाणं।

निहतो निरंगणो अट्टेणेण निक्किवत्तसत्थेणं ॥"

एवं भणियमेत्ते राइणा एस अट्टणोत्तिकाउं तुंडेण भूमिजतो, दव्वं च से पज्जत्तियं आमरणंतियं दिन्नं, सयणवग्गो य से तं सोउं तस्स सगासमुवगतो, भायवडणमाईहिं पत्तियावेउं दव्वलोभेणं अल्लियावितो, पच्छा सो चिंतेइ-ममं एते दव्वलोभेण अल्लियावेंति, पुणोऽवि मम परिभविस्संतित्ति, जरापरिगतो अहं न पुणो सुमहल्लेणावि पयत्तेणं संकिस्सं जुवत्तं काउं, तं जावऽज्जवि सचेट्ठो ताव पव्वयामित्ति संपहारेउं पव्वतितो ॥ एवं जरोपनीतस्याट्टनस्येवान्यस्यापि न त्राणं-बन्धुभिः पालनं जगतो वा रक्षणम्, 'एव' मित्येवं प्रकारं पाठान्तरतः-एनं वा-अनन्तरोक्तमर्थं 'विजानीहि' विशेषेण विविधं वा अवबुध्यस्व, तथैतच्च वक्ष्यमाणं जानीहि, यथा 'जनाः' लोकाः 'प्रमत्ताः' प्रमादपराः, उभयत्र सूत्रत्वादेकवचनं, 'कम्' अर्थं प्रकृमात् त्राणं, नु इति वितर्के, विविधम्-अनेकधा हिंस्रा-हिंसनशीलाः, आर्षत्वद्वा वीति त्रिश्रव्यान् स्वेषु स्वेषूत्पत्तिस्थानेष्वनाकुलमवस्थितान् जन्तून् हिंसन्तीति विहिंसाः, तथा अयताः-ततत्पापस्थानेभ्योऽनुपरताः 'गहन्ति'त्ति सूत्रत्वाद् गमिष्यन्ति, ग्रहीष्यन्ति वा-स्वीकरिष्यन्ति, किमुक्तं भवति ?-

एवमेते प्रमत्तादोविशेषणान्विता जनाः स्वकृतैरीदृग्भिः कर्म्मोभिर्नरकादिकमेव यातनास्थानं गमिष्यन्ति ग्रहीष्यन्ति वा, यद्वैवं नीयते-असंस्कृतं जीवितमिति मा प्रमादीरित्यादि (दौ) गुरुणोक्ते कदाचिच्छिष्यो वदेत्-बहुरयं जनः प्रमत्तः, तद्दहमपि भविष्यामीत्याशङ्क्य गुरुराह-भद्र ! एवं जानीहि जनः प्रमत्तो विहिंस्रोऽयतः 'कन्नु'त्ति कामप्यवक्तव्यां नरकादिगतिमसौ गमिष्यति ग्रहीष्यति वा, अतः किं तव विवेकिन एवंविधजनव्यवहाराश्रयणेन ?, सूत्रत्वाच्चैकत्वेऽपि बहुवचनमिति सूत्रार्थः ॥ असंस्कृतं जीवितमित्युक्तम्, अतस्तद् व्याचिख्यासुराह

नि.[१८२] उत्तरकरणेण कयं जं किंची संखयं तु नायव्वं ।
सेसं असंखयं खलु असंखयस्सेस निज्जुत्ती ॥

वृ. मूलतः स्वहेतुभ्य उत्पन्नस्य पुनरुत्तरकालं विशेषाधानात्मकं करणमुत्तरकरणं तेन कृतं निर्वर्त्तितं, 'यत्किञ्चिदि' त्यविवक्षितघटादि, यत्तदोर्नित्यमभिसम्बन्धात् तत् संस्कृतं, तुः आवधारणे, स चैवं याज्यते-यदुत्तरकरणकृतं तदेव संस्कृतं ज्ञातव्यं, 'शेषम्' अतोऽन्यत्संस्कारानुचितं विदीर्णमुक्ताफलोपममसंस्कृतमेव, खलुशब्दस्यैवकारार्थत्वात्, असंस्कृतमितस्य सूत्रावयवस्य 'एषा' वक्ष्यमाणलक्षणा निर्युक्तिः, बहुवक्तव्यतया च प्रतिज्ञानम्, अथवा यथाऽऽचाराङ्गपञ्चमाध्ययनस्य 'आवन्ती'त्यादानपदेन नाम तथा अस्याप्यसंस्कृतमिति नाम, ततश्चासंस्कृतनाम्नोऽस्यैवाध्ययनस्यैषा नामनिष्पन्ननिक्षेपनिर्युक्तिस्तत्प्रस्ताव एव व्याख्यातव्येति गाथार्थः ॥ सम्प्रति संस्कृतप्रतिषेधादसंस्कृतं विज्ञायत इति संस्कृतशब्दस्य निक्षेपो वाच्यः, तत्र च यद्यपि समित्युपसर्गोऽप्यस्ति तथाऽपि धात्वर्थद्योतकत्वात्तस्य करणस्यैव चात्र धात्वर्थत्वात्तदेव निक्षेपुमाह निर्युक्तिकृत-

नि.[१८३] नामंठवणाकरणं खित्ते काले तहेव भावे य ।
एसो खलु करणंमी निक्खेवो छव्विहो होइ ॥

वृ. नाम स्थापना द्रव्यं क्षेत्रं कालः 'तथैवे'ति तेनैव वस्तुरूपतालक्षणेन प्रकारेण 'भावे य'त्ति भावश्च, एष एव-अनन्तरोक्तः, खलुशब्दस्यैवकारार्थत्वात्, 'करणे' करणविषये 'निक्षेपो'

व्या०, षड्विधो भवति, किमुक्तं भवति ?- नामकरणादिभेदेन निक्षिप्यमाणं षड्विधमेव करणं भवतीति गाथार्थः ॥ तत्र च नामकरणं करणमिति नामैव नाम्नो वा करणं नामकरणं-प्रियङ्करशुभङ्कराद्यभिधानाधानं, यदिवा नामतः करणं नामकरणं यत्पूज्यनामापेक्षया पूजादि विधानं, स्थापनाकरणम्अक्षनिक्षेपादि, यो वा यस्य करणस्याकारः, तथा च भाष्यकृत-

"नामं नामस्स व नामतो य करणंति नामकरणंति।
ठवणाकरणं नामो करणागारो य जो जस्स ॥"

द्रव्यकरणं तु द्रव्यमेव क्रियत इति करणं, कृत्यल्युटोऽप्यन्यत्रापीति। कर्म्मण्यपिल्युटो दर्शनात्, भावसाधनपक्षे तु द्रव्येण द्रव्यस्य द्रव्ये वा यथासम्भवं क्रियात्मके करणं, तथा चाह-

"तं तेणं तस्स तंमि व संभवतो उ किरिया मया करणं।
दव्वस्स व दव्वेण व दव्वंमि व दव्वकरणंति ॥"

तच्चागमनोआगमभेदतो द्विधा, तत्रागमतो ज्ञाता तत्र चानुपयुक्तो, नोआगमतस्तु ज्ञशरीर-भव्यशरीरतद्व्यतिरिक्तभेदात्त्रिधा, तत्र ज्ञशरीरभव्यशरीरद्रव्यकरणे प्रतीते एवेत्यनाहृत्य तद्व्यतिरिक्तमाह-

नि. [१८४] दव्वकरणं तु दुविहं सन्नाकरणं च नो य सन्नाए।
कडुकरणमट्ठकरणं वेलूकरणं च सन्नाए ॥

वृ. द्रव्यकरणं, तुशब्दो नोआगमत इदमिति विशेषद्योतकः, 'द्विविधं' द्विप्रकारं संज्ञाकरणं च 'नो य सन्नाए'त्ति करणमिति प्रक्रमात्, चशब्दो भिन्नक्रमः, ततश्च नोसंज्ञाकरणं च। तत्र संज्ञाकरणमाह- 'कटकरणं' कटनिर्वर्त्तकं चित्राकारमयोभयं पाइल्लयादि, 'अर्थकरणम्' अर्थाभिनिर्वर्त्तकमधिकरण्यादि येन द्रम्मादि निष्पाद्यते, अर्थार्थं वा करणमर्थकरणं यत्र राज्ञोऽर्थाश्चिन्त्यन्ते, अर्थ एव वा तैस्तैरुपायैः क्रियत इत्यर्थकरणं, वेलुकरणं च रूतपूणिकानिर्वर्त्तकं चित्राकारमयं वेणुशलाकादि, 'संज्ञायां' संज्ञाकरणे, आह-नामकरणसंज्ञाकरणयोः कः प्रतिविशेषो ?, न हि नामसंज्ञाशब्दयोरर्थान्तरविषयत्वमुत्पश्यामः, उच्यते, इह नामकरणं करणमित्यभिधानमात्रं, संज्ञाकरणं तु यत्रान्वर्थोऽस्ति, संज्ञाकरणेषु हि कटकरणादिषु क्रियतेऽनेनेति करणमित्यनुगतोऽर्थः प्रतीयते, द्रव्यरूपाणि चैतानि, करणमितिरूढ्या तु संज्ञाकरणान्युच्यन्ते,

"सन्ना नामंति मई तणओ नामं जमहिहाणं।
जं वा तवत्थविवले कीरति दव्वं तं दवणपरिणामं ॥
वेलुकरणादि न हि तं तयत्थमुत्रं न वा सद्दो ॥१॥
जइ न तदत्थविहीणं तो किं दव्वकरणं ?, जतो तेणं।
दव्वं कीरति सन्नाकरणंतिअ य करणरूढीओ ॥२॥"

नोसंज्ञाकरणं तु यत्करणमपि सत्र तत् संज्ञया रूढं, उक्तं हि-नोसन्नाकरणं पुण दव्वस्सारूढकरणसन्नंपि"ति गाथार्थः ॥ एतदेव भेदतोऽभिधातुमाह-

नि. [१८५] नोसन्नाकरणं पुन पओगसा वीससा य बोद्धव्वं।
साईअमणाईअं दुविहं पुन विस्ससाकरणं ॥

वृ. नोसंज्ञाकरणं पुनः 'पओगसा वीससा य'त्ति सूत्रत्वात् प्रयोगतो विश्रसातश्च बोद्धव्यं, तत्र प्रयोगः-जीवव्यापारः तद्धेतुकं करणं प्रयोगकरणं, उक्तं च-

"होइ पजाओ जीवव्वावारो तेन जं विणिम्मानं।
सज्जीवमजीवं वा पओगकरणं तयं बहुहा॥"

एतद्विपरीतं तु विश्रसाकरणं, तत्र पश्चादुक्तमप्यल्पवक्तव्यमिति विश्रसाकरणमाह-सहादिना वर्त्तते सादिकं ततोऽन्यत्त्वनादिकमिति भेदतो द्वैविध्यं, पुनरिति मूलभेदापेक्षया, विश्रसाकरणम्-उक्तरूपमिति गाथार्थः॥ तत्रानादिकं वक्तुमाह-

नि.[१८६] धम्माधम्मागासा एयं तिविहं भवे अनाइयं।
चक्खुसुअचक्खुप्फासे एयं दुविहं तु साईयं॥

वृ. धर्माधर्माकाशानामन्योऽन्यसंबलनेन सदाऽवस्थानमनादिकरणं, न हि तत्कदाचिन्नासीन्नास्ति न भविष्यति वा, उक्तं हि-"धम्माधम्मणहाणं अनाइसंहायणाकरणं" न च करणमनादि च विरुद्धमिति साध्यं, यतोऽन्योऽन्यसमाधानं करणमभिप्रेतं, न त्वन्योऽन्यनिर्वर्त्तनम्, आह च-"अन्नोऽन्नसमाहाणं जहिहं करणं न निव्वत्ति" इह च धर्माधर्माकाशानां करणमिति वक्तव्ये कथञ्चित्क्रियाक्रियावतोरभेददर्शनार्थमनुकूलितक्रियत्वख्यापनार्थं वा धर्माधर्माकाशाः करणमित्युक्तम्, 'एतद्' अनन्तरोक्तं 'त्रिविधं' त्रिप्रकारं 'भवेत्' स्यात् अनादिकं करणमिति प्रक्रमः। इत्थमनादिकं पश्चात्त्रिर्दिष्टमपि पश्चानुपूर्व्यपि व्याख्याङ्गमिति ख्यापनाय उक्तं, सम्प्रति तु सादिकमाह-'चक्खुमचक्खुप्फासे'त्ति स्पर्शशब्दः प्रत्येकमभिसम्बध्यते, ततश्चक्षुषा स्पृश्यते-गृह्यमाणतया युज्यत इति चक्षुःस्पर्शं-स्थूलपरिणतिमत्पुद्गलद्रव्यम् अतोऽन्यदचक्षुःस्पर्शम्, 'एवं दुविहं तु'त्ति एतद्द्विविधमेव, तुशब्दस्यैवकारार्थत्वात् सादिकमिति गाथार्थः॥

नि.[१८७] खंधेसु अ दुपएसाइएसु अब्भेसु अब्भरुक्खेसुं।
निप्फन्नगाणि दव्वाणि जाणि तं वीससाकरणं॥

वृ. 'स्कन्धेषु च' परमानुसङ्घयात्मकेषु द्विप्रदेशादिकेषु आदिशब्दात्त्रिप्रदेशादिपरिग्रहः, परमाणवश्चानेनैवोपलक्षिताः, 'अभ्रेषु' प्रतीतेषु 'अभ्रवृक्षेषु' तद्विशेषेष्वेव वृक्षाकारेषु, उपलक्षणं चैतदिन्द्रधनुरादीनां, तथा च सम्प्रदायः-चक्खुप्फासियं जं चक्खुसा दीसइ, तं पुण अब्भा अब्भरुक्खा एवमाइ'। दृश्यते च 'अब्भेसु विज्जमादीसु'त्ति तत्र च यदि विद्युत्प्रतीतैव गृह्यते तदा तस्याः सजीवत्वात्तच्छरीरस्य चौदारिकशरीरकरणाख्यप्रयोगकरणत्वप्रसक्तिः, अथ विद्योतन्त इति विद्युन्ति तानि आदिर्येषां तानि विद्युदादीन्यग्नीनि तेष्वित्यभ्रविशेषणतया व्याख्यायते, आदिशब्दाच्च धूम्रादिपरिग्रह इति, तदा नोक्तदोषः, परमप्रातीतिकं सामायिकानिर्युक्तौ चाभ्रादीन्येव विश्रसाकरणमुक्तं, तद्यथा-

"चक्खुसमचक्खुसंपि य सादियं रूविवीससाकरणं।
अब्भाणुप्पभितीणं बहुहा संघायभेयकयं॥" त्ति,

नेह तत्त्वनिश्चयः, तेषु द्विप्रदेशादिष्वभ्रादिषु वा किमित्याह-निष्पन्नान्येव निष्पन्नकानि, जीवव्यापारं विनैव भेदसङ्घाताभ्यां लब्धसत्ताकानि द्रव्याणि तद्विश्रसाकरणं सादि, चाक्षुषमचाक्षुषं वेति प्रक्रमः, द्विप्रदेशादिकरणानि हि सङ्घाताद् भेदात् सङ्घातभेदाभ्यां च विनाऽपि

जीवप्रयोगं निष्पद्यन्ते, निष्पन्नान्यपि च न चक्षुषा वीक्ष्यन्ते इत्यचाक्षुषं विश्रसाकरणम्, अभ्रादिकरणानि तु स्वयं निष्पद्यन्ते चक्षुषा च वीक्ष्यन्त इति चक्षुषं विश्रसाकरणम्, अत्र च पश्चादुद्दिष्टस्याचाक्षुषस्य प्रथममाभिधानं तत्प्राधान्यख्यापनपूर्वकमिति गाथार्थः ॥ सम्प्रति प्रयोगकरणमाह-

नि. [१८८] दुविहं पओगकरणं जीवेतर मूल उत्तरं जीवे ।
मूले पंचसरीरा तिसु अंगोवंगनामं च ॥

वृ. 'द्विविधं' द्विभेदं-प्रयोगकरणं 'जीवत्ति' जीवप्रयोगकरणम् 'इयरे'त्ति अजीवप्रयोगकरणं, तत्र जीवेनउपयोगलक्षणेन यदौदारिकाशरीरमभिनिर्वर्त्त्यते तज्जीवप्रयोगकरणं, तच्च द्विधा-मूलकरणमुत्तरकरणं च, तत्र 'मूल' इति मूलकरणं विचार्यमाणं 'पञ्च' इति पञ्चसङ्ख्यावच्छिन्नानि विशीर्यन्ते-उत्पत्तिसमयतः प्रभृति पुद्गलविघटनाद्विनश्यन्तीति शरीराणि-औदारिकवैक्रियाहारकतैजसकार्म्मणानि, इह च विषयविषयिणोरभेदोपचारेण करणविषयत्वाच्छरीराण्यपि करणमुक्तं, मूलत्वं चोत्तरोत्तरावयवव्यक्त्यपेक्षया, ततश्च यदवयवविभागविरहितमौदारिकशरीराणां प्रथममभिनिर्वर्त्तनं तत् मूलकरणं, 'तिसु अंगोवंगणामं चे'ति, चशब्दः प्रकृतमनुकर्षति, तच्चेह प्रक्रमादुत्तरकरणमेवानुकृष्यते, ततश्च त्रिषु-औदारिकवैक्रियाहारेषु तैजसकार्म्मणयोस्तदसम्भवादङ्गोपाङ्गनामैवोत्तरकरणमिति सम्बन्धः, अत्र चाङ्गोपाङ्गनामशब्देनाङ्गोपाङ्गनामकर्म्मनिर्वर्त्तितान्यङ्गोपाङ्गानि गृह्यन्ते, कार्ये कारणोपचारात्, आह च-

"सज्जीवं मूलुत्तरकरणं मूलकरणं जमादीए ।
पंचण्हं देहाणं उत्तरमादीतियस्सेव ॥"

इति गाथार्थः ॥ कानि पुनस्तान्यङ्गानीत्याह-

नि. [१८९] सीसमुरोयरपिट्ठी दो बाहू अ हुंति ऊरू अ ।
एए अट्ठंगा खलु अंगोवंगाइं सेसाइं ॥

नि. [१९०] हुंति उवंगा कन्ना नासऽच्छी जंघ हत्थ पाया य ।
अंगोवंगा अंगुलिनहकेसामंसु एमाइ ॥

वृ. तत्राद्या प्रागवत्, नवरम् अङ्गोपाङ्गानि उपलक्षणत्वादुपाङ्गानि च शेषाणि, तानि वक्ष्यन्त इति शेषः, तत्रोपाङ्गानि कर्णौ नासे अक्षिणी जङ्घे हस्तौ पादौ च, अङ्गोपाङ्गानि अंगुलयो नखाः केशाः स्मश्रु 'एवमादीनि' एवंप्रकाराण्युत्तरकरणं, वृद्धास्त्वङ्गान्यपि मूलकरणमिति मन्यन्ते, आपेक्षिकत्वाच्च मूलोत्तरत्वयोरुभयथाऽप्यविरोध इति गाथाद्वयार्थः ॥ इदमेवान्यथाऽऽह-

नि. [१९१] तेसिं उत्तरकरणं बोद्धव्वं कण्णखंधमाईयं ।
इंदियकरणा तानि य उवघायविसोहिओ हुंति ॥

वृ. 'तेषाम्' आद्यानां त्रयाणां शरीराणामुत्तरकरणं 'बोद्धव्यम्' अवगन्तव्यं, 'कण्णाखंधमादीयं'ति तत्रौदारिकस्य कर्णयोर्वृद्धापादनं स्कन्धस्य च मर्दनादिना दृढीकरणम्, आदिशब्दादन्तरागादिकरणपरिग्रहः, एवं वैक्रियस्यापि, आहारकस्य तु नास्त्येव, गमनादिना वा तस्याप्युत्तरकरणमिति ग्राह्यं। तथा इन्द्रियाणां-चक्षुरादीनां करणानि अवस्थान्तरोपादनानि इन्द्रियकरणानि, तानि च 'उपघातविशुद्धितः' उपघातात् विशुद्धेश्च भवन्ति, तत्रोपघातादिपाद्यभ्यवहारतोऽन्धबधिरताद्यापादनानि विशुद्धितश्च ब्राह्मीसमीरञ्जनादिना स्पष्टताद्यापादनान्युत्तरकरणं भवति,

पठ्यते च-'इंदियकरणं च तह'त्ति अत्र चैकवचनान्ततया सर्वं व्याख्येयमिति गाथार्थः ॥ अथवाऽन्यथा करणमुच्यते-

नि.[११२] संघायणपरिसाडणउभयं तिसु दोसु नत्थि संघाओ।
कालंतराइ तिण्हं जहेव सुत्तंमि निद्दिट्ठं ॥

वृ. 'संघायणे'ति संहन्यमानानां-संयुज्यमानानामौदारिकादिपुद्गलानां तैजसकार्मणपुद्गलैः सह यदात्मनस्तत्तत्पुद्गलग्रहणात्मिकासु तदनुकूलक्रियासु वर्त्तनात्मकं प्रयोजकत्वं सा सङ्घातना, तथा परिः-समन्ताच्छटतां पृथग्भवतामौदारिकादिपुद्गलानां यदात्मनस्तान्प्रति तत्तच्छरीरविमोक्षात्मकं प्रयोजकभवनं सा परिशाटना, उभावभिहितावयवावस्येति उभयं-सङ्घातनापरिशाटनाकरणं। किमिदं त्रयमपि पञ्चस्वप्यौदारिकादिषु अथान्यथेत्याह-त्रिष्वाद्येषु, किमुक्तं भवति?-औदारिकवैक्रियाहारकेषु, 'द्वयोः' तैजसकार्म्मणयोः, किमित्याह-'नास्ति' न विद्यते, कोऽसौ?-सङ्घातः, तदभावाच्च सङ्घातनापि नास्तीति भावः, सा हि प्रथमत उत्पद्यमानस्य जीवस्य तैलभृततप्ततापिकाप्रक्षिप्तापूपवत् तैलसदृशानौदारिकादिपुद्गलानाददानस्यैवौदारिकादिष्वपि वर्ण्यते न च तैजसकार्मणयोः प्रथमत उपादानसम्भवः, अनादिसंहतिमत्त्वात्तयोः, परिशाटना तु शैलेशीचरमसमये, प्रतिसमयं सङ्घातनापरिशाटनोभयं च शब्दत्वेव, कालान्तरादि त्रयाणामित्यस्यायमर्थः-त्रयाणां सङ्घातनापरिशाटनोभयेषां कालः-कियत्कालं सङ्घातना परिशाटनोभयं चेत्येवमात्मकः अन्तरं च सङ्घातनायाः सकृदवाप्तौ पुनः कियता कालेनावाप्तिरेवंरूपम्, एवं परिशाटनाया उभयस्य च, आदिशब्दात् सादित्वानादित्वं च, किमित्याह-'यथैवे'ति येनैव प्रकारेण 'सूत्रे' सामायिकाध्ययने 'निर्दिष्टा' इति आर्षत्वात् 'निर्दिष्टं' प्रतिपादितमिति गाथार्थः ॥ एतच्चातिदिष्टमपि निर्युक्तिकृता विनेयानुग्रहार्थं सम्प्रदायत उच्यते,

एयाणि तिन्निवि करणाणि कालतो मग्गिज्जंति-तत्थोरालियसंघायकरणं एगसमइयं, जं पढमसमओववन्नगस्स, जहा तेहे ओगाहिमतो छूढो तप्पढमयाए आइयति, एवं जीवोऽवि उववज्जंतो पढमे समये गेण्हति ओरालियसरीरपाओग्गाइं दव्वाइं, न पुन मुंचति किंचिवि, परिसाडणावि समओ, मरणकालसमए एगंततो मुंचति न गिण्हति मज्झिमकाले किंचि गेण्हइ किंचि मुंचति, जहण्णेणं खुड्डागं भवग्गहणं तिसमऊणं तिन्नि पलिओवमाइं समऊणानि-

दो विग्गहंमि समया समओ संघायणाय तेहूणं।
खुड्डागभवग्गहणं सव्वजहन्नो ठितीकालो ॥१॥
उक्कोसो समऊणो जो सो संघयणासमयहीणो।
किह न दुसमयविहीणो साडणसमए विहोणंमि ॥२॥
भन्नति भवचरिमंमिवि समए संघायसाडणा चेव।
परभवपढमे साडणमतो तदूणो न कालोत्ति ॥३॥
जइ परपढमे साडो निव्विग्गहतो य तंमि संघातो।
ननु सव्वसाडसंघायणातो समए विरुद्धातो ॥४॥
आचार्य आह- जम्हा विग्गच्छमाणं विगयं उप्पज्जमाणमुपत्तं।
तो परभवादिसमए मोक्खादानन न विरोहो ॥५॥

चुतिसमए नेहभवो इह देहविमोक्खतो जहातीतो ।
तह परभवोवि न तहिं तो सो को होइ संसारी ? ॥६॥
ननु जह विग्गहकाले देहाभावेऽवि परभवग्गहणं ।
तह देहाभावंमिवि होज्जंभवोऽवि को दोसो ? ॥७॥
जं चिय विग्गहकालो देहाभावेऽवि तो परभवो सो ।
चुतिसमए उ न देहो न विग्गहो जइ स को होउ ? ॥८॥
इदानीं अंतरसंघायंतरकालो जहन्नयं खुड्डुयं तिसमऊणं ।
दो विग्गहंमि समया तइयो संघायणासमओ ॥९॥
तेहूणं खुड्डुभवं धरिउ परभवमविग्गहेणं वा ।
गंतूण पढमसमए संघाययतो स विच्चेओ ॥१०॥
इदानीं संघायपरिसाडंतरं -उभयंतरं जहन्नं समओ निव्विग्गहेण संघाए ।
परमं सतिसमयाति तेत्तीसं उदहिणामाइं ॥११॥
अनुभविउं देवादिसु तेत्तीसमिहागयस्स ततियंमि ।
समए संघाययतो दुविहं साडंतरं वोच्छं ॥१२॥
खुड्डु(ड्डा) गभवग्गहणं जहन्नमुक्कोसयं च तेत्तीसं ।
तं सागरोवमाइं सपुन्ना पुव्वकोडी य ॥१३॥

आह-इह क्षुल्लभवग्रहणं पूर्णमौदारिकसर्वशाटयोर्जघन्यमन्तरमुक्तं, तच्च 'परभवपढमे साडो' इति वचनात्समयोनमेव प्राप्नोतीति कथं न विरोधः ?, उच्यते, निश्चयनयमतमिदं 'परभवपढमे साडो'त्ति, स ह्युत्तरपर्यायोत्पादमेव पूर्वस्य विनाशमेवाह विगच्छदेव च विगतमुत्पद्यमानमेव चोत्पन्नं, यत उक्तम्-"जम्हा विगच्छमानं विगय"मित्यादि, तथा चास्य य एवोत्तरभवोत्पादः स एव पूर्वभवपरित्यागः, एवं च यदैवोत्तरभवौदारिकपुद्गलानां सङ्घातस्तदैव पूर्वभवौदारिकपुद्गलानां शाट इति परभवप्रथमसमय एवैतदभिप्रायेण शाटः, व्यवहारनयमतेन त्वन्य एवोत्तरस्योत्पादः अन्य एव च पूर्वस्य विनाशो, विनष्टस्यैव च विनष्टता उत्पन्नस्यैव चोत्पन्नता, ततो न य एवोत्तरभवोत्पादः स एव पूर्वभवपरित्यागः, एवं चान्यदैवोत्तरभवौदारिकपुद्गलानां सङ्घातोऽन्यदैव च पूर्वभवौदारिकपुद्गलानां शाटः, ततो नास्य परभवप्रथमसमय एव सङ्घातशाटौ, किन्तु पूर्वभवान्त्यसमय एव शाटः उत्तरभवाद्यसमय एव सङ्घातः, तथा निश्चयव्यवहारनयात्मकत्वाज्जिनमतस्य यदाऽसौ क्षुल्लकभव उत्पद्यते तदा व्यवहारनयस्याश्रयणात्पूर्वभवान्त्यसमय एव शाटो विवक्ष्यते, यदा तु तत उद्वर्त्तते तदा निश्चयनयाङ्गीकरणात्परभवप्रथमसमय एवोत्पाद इति परिपूर्णमेव क्षुल्लकभवग्रहणमौदारिकसर्वशाटयोर्जघन्यमन्तरमिति न कश्चिद्विरोधः । इदानिं विउव्वियस्स-

वेउव्वियसंघातो समतो सो पुन विउव्वणादीसो ।
ओरालियाण अहवा देवादीणाइगहणंमि ॥१॥
उक्कोसो समयदुगं जो समय विउव्विउं मतो बितिए ।
समए सुरेसु वच्चइ निव्विग्गहओ य जंतस्स ॥२॥

उभयग्गहणं समतो सो पुन दुसमयविउव्वियमयस्स।
परमतराइं संघायसमयहीणाइं तेत्तीसं ॥३॥

वेउव्वियसरीरपरिसाडणकालोऽवि समयतो चेव॥ इदानिं अंतरं-वेउव्वियसरीरसंघायंतरं जहन्नेणं एगं समयं, सोऽवि य पढमसमए विउव्विय मयस्स विग्गहेणं तइए समए वेउव्विएसु देवेसु संघायंतस्स भवति, अहवा ततियसमए विउव्विय मयस्स अविग्गहेणं देवेसु संघायंतस्स संघायपरिसाडंतरं जहन्नेणं समय एव, सो पुणोऽचिरं विउव्विय मयस्स अविग्गहेणं संघायंतस्स भवति। साडस्स अंतरं-जहन्नेणं अंतोमुहुत्तं। तिण्हवि एतेसिं उक्कोसेणं अनंतं कालं-वणस्सइकालो। इदानिं आहारयस्स-

आहारे संघाओ परिसाडो य समयं समो होइ।
उभयं जहन्नमुक्कोसयं च अंतोमुहुत्तं तु ॥१॥
बंधनसाडुभयाणं जहन्नमंतोमुहुत्तमंतरणं।
उक्कोसेणमवड्ढं पोग्गलपरियट्ट देसूणं ॥२॥
तेयाकम्माणं पुन संताणाणादितो न संघातो।
भव्वाण होज्ज साडो सेलेसीचरिमसमयंमि ॥३॥

गतं जीवमूलप्रयोगकरणम्, उत्तरप्रयोगकरणमाह-

नि.[१९३] इत्तो उत्तरकरणं सरीरकरणं पओगनिप्फन्नं।
तं भेयाऽनेगविहं चउविहमिणं समासेणं ॥

नि.[१९४] संघायणा य परिसाडणा य मीसे तहेव पडिसेहो।
पडसंखसगडथूणा उट्ठतिरिच्छाण करणं च ॥

वृ. 'इत' इति मूलप्रयोगकरणादनन्तरम् 'उत्तरकरण'मिति उत्तरप्रयोगकरणम्, उच्यते इति गम्यते, तत्कतरदित्याह-शरीरं च तत्करणं च तां तां क्रियां प्रति साधकतमत्वेन शरीरकरणं तस्य प्रयोगः-वीर्यान्तरायक्षयोपशमजजीववीर्यव्यापारः तेन निष्पन्नं शरीरकरण-प्रयोगनिष्पन्नम्, अत एव शरीरनिष्पत्त्यपेक्षयाऽस्योत्तरत्वमिति भावनीयं, 'तत्' इत्युत्तरकरणं 'भेदात्' इति भेदमाश्रित्य 'अनेकविधम्' अनेकप्रकारम्, इदमत्र तात्पर्यम्-संसारिणां कार्याणि विसदृशरूपाणि बहूनि दृष्टानि, अतस्तत्साधनैरपि करणैर्बहुभिरेव भवितव्यं, न च तानि विस्तरतो वक्तुं शक्यानि अत आह-

'चतुर्विधं' चतुरूपम्, 'इदम्' इत्युत्तरकरणं, समासेन, उच्यत इति शेषः, तदेवाह-'सङ्घातना च' संघातनाकरणं 'परिशाटना च' परिशाटनाकरणं 'मिस्से'त्ति मिश्रं सङ्घातनापरिशाटनाकरणं तथैव 'प्रतिषेधः' इति सङ्घातनापरिशाटनाशून्यम्, अमीषां चोदाहरणानि दर्शयन्नाह-पटे सङ्घातनैव तन्तुसङ्घातनिष्पन्नत्वात्तस्य, शङ्खे परिशाटनैव परिशाट्यमानत्वादेवास्य, शकटे उभयं यतस्तत्र किञ्चित्सङ्घात्यते कीलकादि किञ्चिच्च परिशाट्यतेऽधिकत्वगादि, स्थूणानामुभया-भावः, तथा च 'उट्ठतिरिच्छाणं'ति भावप्रधानत्वा दस्योर्ध्वतिर्यक्त्वयोः करणं, चशब्दान्नम-नोन्नमनादि च तत्रोत्तरकरणं च, न तं सङ्घातनापरिशाटना च. आह-इदमप्यजीवानां क्रियत इत्यजीवकरणमेव, तत्कथमस्य जीवकरणत्वेनोपन्यासः?, उच्यते, जीवेन क्रियत इति विवक्षया

जीवकरणत्वेनेदमुक्तमित्यदोष इति गाथार्थः ॥ अजीवप्रयोगकरणमाह-

नि.[१९५] अजियप्पओगकरणं दव्वे वन्नाइयाण पंचण्हं ।
चित्तकरणं कुसुंभाईसु विभासा उ सेसाणं ॥

वृ. अस्याक्षरार्थः सुगमः ॥ भावार्थस्त्वयं-

जं जं निज्जीवाणं कीरइ जीवप्पओगओ तं तं ।
वण्णादि रूवकम्मादि वावि तदजीवकरणन्ति ॥

उक्तं द्रव्यकरणं, क्षेत्रकरणमाह-

नि [१९६] न विना आगासेणं कीरइ जं किंचि खित्तमागासं ।
वंजणपरिआवन्नं उच्छुकरणमाइअं बहुहा ॥

वृ. आह- नित्यत्वात्क्षेत्रस्य करणं न संगच्छते तत्कथं क्षेत्रकरणसम्भवः ?, उच्यते, न विनाऽऽकाशेन 'क्रियते' निर्वर्त्यते 'यदि'ति यस्मात् 'किञ्चिदपि' अल्पमपि द्व्यणुकस्कन्धादि, अतस्तत्प्राधान्याद् द्रव्यकरणमपि क्षेत्रकरणमुच्यते इत्युपस्कारः, ननु यद्याकाशेन विना न किञ्चित् क्रियते तदाऽऽकाशकरणमेवास्तु किं क्षेत्रकरणेन ?, उच्यते, 'क्षेत्रम्' इति क्षेत्रशब्दवाच्यमाकाशं, तथा च पर्यायशब्दत्वादनयोरित्थमभिधानमदुष्टमेवेति भावः, तच्च व्यञ्जनशब्दस्तस्य पर्यायः- अन्यथा च भवनं व्यञ्जनपर्यायः तमापन्नं- प्राप्तं व्यञ्जनपर्यायापन्नम्, 'उच्छुकरणमाइयं'ति प्रक्रमान्मकारस्य चागमिकत्वादिक्षुक्षेत्रकरणादिकं 'बहुधा' बहुप्रकरणम्, एकत्वेऽपि क्षेत्रस्येक्षुक्षेत्रकरणादिरूपेणाभिलापस्य बहुप्रकारत्वात्, तथा च सम्प्रदायः-वंजणपरियावन्नं नाम जं खेत्तंति अभिलप्पति तंजहा- उच्छुखेत्तकरणं सालिखेत्तकरणं तिलखित्तकरणं एवमादि' अथवा यस्मिन् क्षेत्रे करणं क्रियते वर्ण्यते वा तत् क्षेत्रकरणमिति गाथार्थः ॥

नि.[१९७] कालो जो जावइओ जं कीरइ जंमि जंमि कालंमि ।
ओहेणं नामओ पुन हवंति इक्कारसकरणा ॥

वृ. कालो 'यः' समयादिर्यावत्परिमाणः यत्करणनिष्पत्तावपेक्षाकारणत्वेन व्याप्रियते, किमुक्तं भवति ?-यस्य भोजनादेर्यावता घटिकाद्वयादिना कालेन निष्पत्तिस्तस्य स एव कालः करणं, तस्यैव तत्र साधकतमत्वेन विवक्षितत्वात्, यदि वा यत्करणं 'क्रियते' निष्पाद्यते यस्मिन् काले तस्य स एव कालः करणं कालकरणम् अत्राधिकरणसाधनत्वेन विवक्षितत्वात्करणशब्दस्य, 'ओघेने'ति नामादिविशेषानपेक्षमेतत्कालकरणं, तथा च वृद्धाः-'कालकरणं जं जावतिएण कालेन कीरति, जंमि वा कालंमि'त्ति, इहापि कालस्याकृत्रिमत्वेन करणासम्भवादित्थमुपन्यासः, नामतः पुनर्भवन्त्येकादश 'करणानि' कालविशेषरूपाणि चतुर्यामप्रमाणानि, करणत्वं चैषां ततत्क्रियासाधकतमत्वादिति गाथार्थः ॥ कानि पुनस्तानीत्याह-

नि.[१९८] बवं च बालवं चेव, कोलवं थीविलोअणं ।
गराइ वणियं चेव, विट्ठी हवइ सत्तमी ॥

नि.[१९९] सउणि चउप्पयं नागं, किंसुग्घं करणं तहा ।
एए चत्तारि धुवा, सेसा करणा चला सत्त ॥

वृ. बवं च बालवं चैव कौलवं स्त्रीविलोचनं गरादि वणिजं चैव विष्टिर्भवति सप्तमी ।

शकुनि चतुष्पदं नागं किंस्तुघ्नं करणं तथा, 'एतानी'ति शकुन्यादीनि चत्वारि 'ध्रुवाणी'-त्यवस्थितानि, शेषाणि करणानि 'चलानि' अनवस्थितानि सप्तेति श्लोकद्वयार्थः ॥

कस्य पुनः क्व ध्रुवत्वमित्याह-

नि.[२००] किण्हचउद्दसिरत्तिं सउणिं पडिवज्जए सया करणं ।
इत्तो अहक्कमं खलु चउप्पयं नाग किंछुग्घं ॥

वृ. कृष्णचतुर्दश्यां रात्रौ शकुनिः प्रतिपद्यते, स्वरूपमिति शेषः, किं कदाचिदेवेत्याह-'सदा' सर्वकालम्, अत्रैव हेत्वन्तरमाह; करणं प्राधान्यं, अत ऊर्ध्वं 'यथाक्रमं' यथा-परिपाटि 'खलुः' अवधारणे ततो यथाक्रममेव, चतुष्पदं नागं किंस्तुघ्नमिति, तत्रामावास्यायां दिने चतुष्पदं रात्रौ नागं प्रतिपदि च दिने किंस्तुघ्नमिति गाथार्थः ॥

सप्तविधकरणानयनोपायप्रतिपादिकेयं पूर्वाचार्यगाथा-

"पक्खतिहितो दुगुणिया दुरूवणीहा य सुक्कपक्खंमि ।
सत्तहिए देवसियं तं चिय रूवाहियं रत्तिं ॥

एसाऽत्थ भावना-अभिमयदिणंमि करणजाणणत्थं पक्खतिहितो दुगुणियंति-अहिगयतिहिं पडुच्च अतीयातो दुगुणिज्जंति, जहा सुद्धचउत्थीए दुगुणा अट्ठ हवंति, 'दुरुवहीणं'ति, सत्तहिए देवसियं करणं हवइ, एत्थ य भागा छच्चेव, तओ ववाइयक्कमेण चउप्पहरियकरणभावेण चउत्थिए दिवसे तो वणियं हवइ, त चिय रूवाहियं 'रत्तिं'ति रत्तीए विट्ठी, कण्हपक्खे दोरूवा न पाडिज्जंति, एवं सव्वत्थ भावणा कायव्वा भणियं च-

"किण्हनिसितईयदसमी सत्तमि चाउद्दसीसु अह विट्ठी ।
सुक्कचउत्थिअकारसिणिसि अट्ठमी पुन्निमा य दिवा ॥१॥

लौकिका अप्याहुः-

"कृतुरा सदिवा दर भूतदिवा, शुचराष्टदिवैकरपूर्णदिवा ।
यदी चन्द्रगतिश्च तिथिश्च समा, इति विष्टिगुणं प्रवदन्ति बुधाः ॥२॥"

"सुद्धस्स पडिवइ निसि पंचमिदिणि अट्ठमीए रइं तु ।
दिवसस्स बारसी पुण्णिमाय रत्तिं बवं होति ॥१॥
बहुलस्स चउत्थीए दिवा य तह सत्तमीएँ रत्तिंपि ।
एक्कारसीए दिवसे बवकरणं होइ नायव्वं ॥२॥"

इति सम्प्रदायार्थः ॥ प्रागुद्दिष्टं भावकरणमाह-

नि.[२०१] भावकरणं तु दुविहं जीवाजीवेसु होइ नायव्वं ।
तत्थ उ अजीवकरणं तं पंचविहं तु नायव्व ॥

वृ. भावः-पर्यायः तस्य करणं भावकरणं, तत्पुनः तुशब्दस्य पुनरर्थत्वात् 'द्विविधं' द्विभेदं, कथमित्याह-जीवाजीवेषु भवति 'ज्ञातव्यम्' अवबोद्धव्यं, किमुक्तं भवति ? जीवविषय-मजीवविषयं च, तत्राल्पवक्तव्यत्वादजीवभावकरणमेवादावुपदर्शयति-'तत्थ जमजीव-करणं'ति तत्र-तयोर्द्वयोर्मध्ये यदजीवकरणं तत् 'पञ्चविधं तु' पञ्चप्रकारमेव 'ज्ञातव्यम्' अवसेयमिति गाथार्थः ॥ एतदेव स्पष्टयितुमाह-

नि.[२०२] वण्णरसगंधफासे संठाणे चेव होइ नायव्वं ।
पंचविहं पंचविहं दुविहऽदुविहं च पंचविहं ॥

वृ. वर्णरसगन्धस्पर्शे संस्थाने चैव, उभयत्र विषयसप्तमी, ततो वर्णादिविषयं भवति ज्ञातव्यम्, अजीवकरणमिति प्रक्रमः, तत्र वर्णः पञ्चविधः कृष्णादि, रसः पञ्चविधस्तिक्तादिः, गन्धो द्विभेदः-सुरभितिरश्च, स्पर्शोऽष्टविधः-कर्कशादिः, संस्थानं पञ्चविधं-परिमण्डलादि, एतद्भेदात्करणमप्येतद्विषयमेतावद्भेदमेव, अत एवाह-'पञ्चविध'मित्यादि, ननु द्रव्यकरणात्कोऽस्य विशेषः ?, उच्यते, इह पर्यायापेक्षया तथाभवनमभिप्रेतं, द्रव्यकरणे तु द्रव्यस्यैव तथा तथोत्पादो द्रव्यास्तिकमतापेक्षयेति विशेषः, उक्तं च-

"अपरप्पओगजं(ओ) जं अजीवरूवादि पज्जयाउत्थं ।
तमजीवभावकरणं तप्पज्जाअप्पणावेक्खं ॥१॥
को दव्वविस्ससाकरणाउ विसेसो इमस्स ? ननु भणियं ।
इह पज्जयऽवेक्खाए दव्वट्ठियनयमयं तं च ॥२॥"

इति गाथार्थः ॥ उक्तजीवभावकरणं, साम्प्रतं जीवभावकरणमाह-

नि.[२०३] जीवकरणं तु दुविहं सुयकरणं चेव नो य सुयकरणं ।
बद्धमबद्धं च सुयं निसीहमनिसीहबद्धं तु ॥

वृ. जीवभावकरणं पुनः, तुशब्दस्य पुनरर्थत्वात्, 'द्विविधं' द्विप्रकारं, श्रुतस्य करणं श्रुतकरणं, भावकरणत्वं चास्य श्रुतस्य क्षायोपशमिकभावान्तर्गतत्वात्, चैवेति पूरणे, 'नो य सुयकरणं'ति चशब्दस्य व्यवहितसम्बन्धत्वात् नोश्रुतकरणं च। तत्राद्यमभिधित्सुराह-'बद्धं' ग्रथितम् 'अबद्धं च' एतद्विपरीतं 'श्रुते' श्रुतविषयं, करणमिति प्रक्रमः, तत्र च 'निसीहमनिसीहबद्धं तु'त्ति बद्धं द्विविधं-निशीथमनिशीथं च, तुशब्दश्चानयोरबद्धस्य च लौकिकलोकोत्तरभेदसूचकः, ततश्च निसीथं रहसि यत्पठ्यते व्याख्यायते वा, तच्च लोकोत्तरं निशीथादि लौकिकं बृहदारण्यकादि, अनिशीथमेतद्विपरीतं, तच्च लोकोत्तरमाचारादि लौकिकं पुराणादि, अबद्धमपि लौकिकलोकोत्तरभेदेन द्विभेदमेव, तत्र लोकोत्तरं यथैका मरुदेव्यत्यन्तस्थाविरा सिद्धा स्वयम्भूरमणे मत्स्यपद्मयोर्वलयवर्ज्जानि सर्वसंस्थानानि सन्ति, विष्णुकुमारमहर्षेर्योजनलक्षणप्रमाणशरीरविकरणं कुरुडविकुरुडौ कुणालायां स्थितावतिवृष्ट्या च तत्राशः तयोश्चाशुभानुभावात्सप्तमनरकपृथिवीगमनं कृणालानाशाच्च भगवतो वीरस्य त्रयोदशे समायां केवलज्ञानोत्पत्तिरित्यादि अनेकप्रकारमाचार्यपरम्परायातं, लौकिकं त्वबद्धं द्वात्रिंशद्बत्तिकाः षोडश करणानि पञ्च स्थानानि, तद्यथा-

आलीढं प्रत्यालीढं वैशाखं मण्डलं समपदं च, तत्रालीढं दक्षिणं पादमग्रतः कृत्वा वामपादं पृष्ठतः सारयति, अन्तरं द्वयोरपि पादयोः पञ्च पदानि, एतद्विपरीतं तु प्रत्यालीढं, वैशाखं पुनः पार्ष्णी अभ्यन्तरतः कृत्वा समश्रेण्या व्यवस्थापयति, अग्रिमतलौ बहिर्भृतौ कार्यौ, मण्डलं द्वावपि पादौ दक्षिणवामतोऽवसार्य ऊरू आकुञ्चति, यथा मण्डलं भवति, अन्तरं चत्वारि पादानि, समपदं पुनः स्थानं द्वावपि पादौ समौ नैरन्तर्येण स्थापयति, एतानि पञ्च स्थानान्यबद्धानि, शयनकरणं च षष्ठमिति गाथाक्षरार्थः ॥ उक्तं श्रुतकरणमधुना नोश्रुतकरणमाह-

नि.[२०४] नोसुयकरणं दुविहं करणं तह य जुंजणाकरणं ।
गुण तवसंजमजोगा जुंजण मणवायकाए य ॥

वृ. इह हि नोशब्दस्य सर्वनिषेधाभिधायित्वात् श्रुतकरणं यत्र भवति तन्नो श्रुतकरणं, तच्च द्वेधा-गुणकरणं 'तथा च' तेनैव नो श्रुतत्वलक्षणेन प्रकारेण योजनाकरणं च, एतत्स्वरूपमाह-'गुण'त्ति प्रक्रमाद् गुणकरणं, किमित्याह-तपश्च संयमश्च तपःसंयमौ तयोर्गत्यगुणयोर्योगाः-तत्करणरूपा व्यापारास्तपःसंयमयोगाः, किमुक्तं भवति ?-तपःकरणम्-अनशनादि संयमकरणं च-पञ्चाश्रवविरमणादि गुणकरणमुच्यते, गुणत्वं च तपःसंयमयोः कर्म्मनिर्जराहेतुत्वेनात्मोपकारित्वात्, 'जुंजण'त्ति योजनाकरणं 'मणवयणकाए य'त्ति चशब्दोऽवधारणे, विषयसप्तमी चेयं, ततो मनोवाक्कायविषयमेव, तत्र मनोविषयं सत्यमनोयोजनाकरणादि चतुर्धा, वाग्विषयमपि सत्यवाग्योजनाकरणादि चतुर्धैव, कायविषयं त्वौदारिककाययोजनाकरणादि सप्तधा, ततश्च द्वाभ्यां चतुष्काभ्यां सप्तकेन च मीलितेन पञ्चदशविधं योजनाकरणं, योजयति ह्येतत्पञ्चदशविधमपि कर्म्मणा सहात्मानमिति, आह च-"मनवयणकायकिरिया पन्नरसविहा उ जुंजणाकरण"मिति गाथार्थः ॥ येन करणेनात्र प्रकृतं तदाह-

नि.[२०५] कम्मगसरीरकरणं आउअकरणं असंखयं तं तु ।
तेणऽहिगारो तम्हा उ अप्पमा(ए) चरित्तंमि ॥

वृ. 'कर्म्मकशरीरकरणं' कार्मणदेहनिर्वर्त्तनं, तदपि ज्ञानावरणादिभेदतोऽनेकविधमित्याह-'आयुःकरणम्' इति आयुषः-पञ्चमकर्म्मप्रकृत्यात्मकस्य करणं-निर्वर्त्तनमायुःकरणं, तत्किमित्याह-'असंखयं तं तु'त्ति तत्पुनरायुः करणमसंस्कृतं-नोत्तरकरणेन त्रुटितमपि पटादिवत्सन्धातुं शक्यं, यतः-

"फुट्टा तुट्टा व इहं पडमादी संधयंति नयनिउणा ।
सा कावि नत्थि नोई संधिज्जइ जीवियं जीए ॥"

एवं च 'स्वरूपतो हेतुतो विषयतश्च व्याख्ये'ति स्वरूपतो हेतुतश्च 'उत्तरकरणेण कय'मित्यादिना ग्रन्थेन व्याख्यातम्, अनेन त्वायुष्ककरणस्यासंस्कृतत्वोपदर्शनेन विषयतः, इदानीं तूपसंहारमाह-'तेणऽहिगारो'त्ति 'तेने'त्यायुःकर्मणाऽसंस्कृतेनाधिकारः, 'तम्हा उ'त्ति तस्मात् तुशब्दोऽवधारणार्थः, तस्य च व्यवहितः सम्बन्धः, ततोऽयमर्थः-यस्मादसंस्कृतमायुःकर्म तस्मात् 'अप्रमाद एव' प्रमादाभाव एव, 'चरित्र' इति चरित्रविषयः कर्त्तव्य इति गाथार्थः ॥ एवं च व्याख्यातं संस्कृतम्, एतद्विपरीतं चासंस्कृतमिति ।

सम्प्रति सूत्रमनुश्रियते तत्र चासंस्कृतं जीवितमिति जरोपनीतस्य न त्राणमिति च मा प्रमादीरित्युक्तेऽर्थस्यापि पुरुषार्थतया सकलैहिकामुष्मिकफलनिबन्धनतया च तदुपार्जनं प्रत्यप्रमादो विधेय इति केषाञ्चित्कदाशयः, यत आह-

"धनेर्दुष्कुलीनाः कुलीनाः क्रियन्ते, धनैरेव पापात्पुनर्निस्तरन्ति ।
धनिभ्यो विशिष्टो न लोकेऽस्ति कश्चिद्धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥"

इति, तन्मतमपाकर्तुमाह-

मू.(११७) *जे पावकम्मेहि धनं मनुस्सा, समाययंती अमतिं गहाय ।*

पहाय ते पास पयट्ठिए नरे, वेरानुबद्धा नरयं उवेंति ॥

वृ. 'य' इति ये केचनाविवक्षितस्वरूपाः 'पापकर्मभिः' इति पापोपादानहेतुभिरनुष्ठानैः 'धनं' द्रव्यं 'मनुष्याः' मनुजाः तेषामेव प्रायस्तदर्थोपायप्रवर्त्तनादित्थमुक्तं, 'समाददते' स्वीकुर्वन्ति, 'अमतिम्' इति प्राग्वत्रजः कुत्सायामपि दर्शनात् कुमतिम्-उक्तरूपां 'गहाय'त्ति गृहीत्वा सम्प्रधार्य, पठ्यते च-'अमयं गहावे'ति अशोभनं मतममतं-नास्तिकादिदर्शनम्, अथवा अमृतमिवामृतम्-आत्मनि परमानन्दोत्पादकतया तच्च प्रक्रमाद्धनं 'पहाय'त्ति प्रकर्षेण तन्मध्यादल्पस्याप्यग्रहणात्मकेन हित्वा-त्यक्त्वा 'तानि'ति धनैकरसिकान् 'पश्य' अवलोकय, विनेयमेवाह, 'पयट्ठिए'त्ति आर्षत्वात् स्वत एवाशुभानुभावतः प्रवृत्तान् प्रवर्त्तितान्वा. प्रक्रमात्पापकर्मोपार्जितधनेनैव, मृत्युमुखमिति गम्यते, 'नरान्' पुरुषान्, पुनरुपादानमादरख्यापकमेकान्तक्षणिकपक्षनिरासार्थं वा, एकान्तक्षणिकपक्षे हि न यैरेव धनमुपार्जितं तेषामेव प्रवर्त्तनं, तथा च बन्धमोक्षाभावश्चेति भावः, एतच्च पश्य वैरं-कर्म्म 'वेरं' वज्जे य कम्मे य' इति वचनात् तेन अनुबद्धाः-सततमनुगताः 'नरकं' रत्नप्रभादिकं नारकनिवासम् 'उपयान्ति' तद्भवभावितया सामीप्येन गच्छन्ति, त एवं मृत्युमुखप्रवृत्ता इति प्रक्रमः, यदि वा पाशा इव पाशाः स्त्र्यादयस्तेषु प्रवृत्तास्तैर्वा प्रवर्त्तिताः पाशप्रवृत्ताः पाशप्रवर्त्तिता वा नरकमुपयान्तीति सम्बन्धः, ते हि द्रव्यमुपार्ज्य स्त्र्यादीन्भोगैरश्नन्त, तदाभरत्वाच्च नरकगतिभाज एव भवन्तीति भावः, शेषं प्राग्वत्।

तदनेन सूत्रेण धनमिहैव मृत्युहेतुतया परत्र च नरकप्रापकत्वेन तत्त्वतः पुरुषार्थ एव न भवतीति तत्त्यागतो धर्म्मं प्रति मा प्रमादीरित्युक्तं भवति, नरकप्राप्तिलक्षणश्चायो न प्रत्यक्षेणागम्यते (म्यत इती) हैव मृत्युलक्षणापायदर्शनमुदाहरणं, तत्र च वृद्धसम्प्रदायः-एगंमि नयरे एगो चोरो, सो रत्तिं विभवसंपण्णेसु घरेसु खत्तं खणिउं सुबहुं दविनजायं घेत्तुं अप्पणो घरंगदेसं कूवं सयमेव खणित्ता तत्थ दविनजायं पक्खिवइ, जाहेच्छियं च सुक्कं दाऊण कण्णगं विवाहेउं पसूयं संतिं रत्तिं उद्दवेत्ता तत्थेवागडे पक्खिवइ, मा मे भज्जा चेडरूवाणि य परूढपणयाणि होऊण रयणाणि परस्स पयासेस्संति, एवं कालो वच्चति। अन्नया तेणंगा कन्नया विवाहिया अतीव रूवस्सिणी, सा पसूया संता तेण न मारिया, दारगो य, सो अट्ठवरिसो जाओ, तेन चिंतियं-अइचिरं कालं विधारिया, एयं पुव्वं उद्दवेउं पच्छा दारयं उद्दविस्संति, तेण सा उद्दवेउं अगडे पक्खित्ता, तेण य दारगेण गिहाओ निग्गच्छिऊण धाधाकया, लोगो मिलिओ, तेण भण्णइ-एएण मम माया मारियत्ति, रायपुरिसेहिं सुयं, तेहिं गहितो, दिट्ठो कूवो दव्वभरितो, अट्ठाणि य मूलहूणि, सो बंधिऊण रायसभं समुवणीतो जायणापगारेहिं, सव्वं दव्वं दवावेऊण कुमारेण मारितो। एवमन्येऽपि धनं प्रधानमिति तदर्थं प्रवर्त्तमानास्तदपहायैहैवानर्थावाप्तितो नरकमुपयन्तीति सूत्रार्थः॥ इदानीं कर्मणामवश्यतामभिदधत् प्रकृतमेवार्थं दृढयितुमाह-

सू. (११८) तेने जहा संधिमुहं गहीए, सकम्मुणा किच्चइ पावकारी।
एवं पया पेच्च इहं च लोए, कडाण कम्माण न मोक्खो अत्थि ॥

वृ. 'स्तेनः' चौरः यथेति दृष्टान्तोपदर्शने सन्धिः-क्षत्रं तस्य मुखमिव मुखं-द्वारं तस्मिन् 'गृहीतः' आत्तः 'स्वकर्मणा' आत्मीयानुष्ठानेन, किम् ?-कृत्यते' छिद्यते, 'पापकारी'

पातकनिमित्तानुष्ठानसेवी, कथं पुनरसौ कृत्यत इति चेद्-अत्रोच्यते सम्प्रदायः एगंमि नयरे एगो चोरो, तेन अभिज्जतो घरगस्स फलगनिचयस्स पागारकविसोसगसंनिहं खत्तं खणियं, खत्ताणि अनेगागाराणि-कलमागिइं नंदावत्तसंठियं पडमागिइं पुरिसागिइं च, सो य तं कविसीसगसंठियं खत्तं खणंतो घरसामिए निवेइओ, ततो तेन अद्धपविट्ठो पाएसु गहितो, मा पविट्ठो संतो पहरनेन पहरिस्सतित्ति, पच्छा चोरेणवि बाहिरत्थेण हत्थे गहिओ, सो तेहिं दोहिवि बलवंतेहि उभयहा कड्ढिज्जमाणो सयंकियपागारकविसीसगेहिं फालिज्जमाणो अत्ताणो विलवित्ति।

एवमनुनवादाहरणदर्शितन्यायेन 'प्रजाः' हे प्राणिनः ! 'पेच्छ'त्ति पेक्षध्वं, प्राकृतत्वाद्वचनव्यत्ययः, एतच्च यत्रापि नोच्यते तत्रापि भावनीयम्, 'इह' अस्मिन् 'लोके' जन्मनि, आस्तां परलोक इत्यपिशब्दार्थः, 'कृतानां' स्वयंविरचितानां 'कर्म्मणां' ज्ञानावरणादीनां 'न मोक्षः' न मुक्तिः, ईश्वरादेरपि तद्विमोचनं प्रत्यसामर्थ्याद्, अन्यथा सकलसुखित्वाद्यापत्तेः, इदमुक्तं भवति-यथाऽसावर्थग्रहणवाञ्छया प्रवृत्तः स्वकृतनैव क्षत्रस्वननात्मकोपायेन कृत्यते, न तस्य स्वकृतकर्मणो विमुक्तिः, एवमन्यस्यापि तत्तदनुष्ठानतोऽशुभकारिणो न ततो विमुक्तिः, किन्तु तदिहापि विपच्यत एवेति, पठ्यते च-'एवं पया पेच्च इहं च'त्ति, इहापि कृत्यत इति सम्बध्यते, कृत्यत इव कृत्यते तथाविधबाधानुभवनेन, काऽसौ ?-प्रजा, क्व ?-'प्रेत्य' परभवे, 'इहं चे'ति इहलोके, किमिति ?-उच्यते-यावता इह तु तत्तद्विरूपगतमनाह-यत् 'कृतानां' कर्म्मणां मोक्षो नास्ति ॥ इह परत्र वा वेद्यमेवावश्यं कर्मेति, अथवा 'एवं पया पेच्च इहंपि लोए, न कम्मुणो पोहति तो कयाती' एवं प्रजा ! आमन्त्रणपदमेतत्, प्रेत्येह लोके च यतः प्राणिनः कृत्यन्ते 'ता' इति ततो हेतोः 'कदाचित्' कस्मिंश्चित्काले 'ने'ति निषेधे 'कम्मुणो'त्ति कर्म्मणः प्रस्तावात् कुत्सितानुष्ठानाय स्पृहयेत्-नाभिलाषमपि कुर्याद् आस्तां तत्करणमित्याकूतं, तदभिलषणस्यापि बहुदोषत्वात्, तथा च वृद्धाः-

एगंमि नयरे एगेन चोरेण रत्तिं दुरवगाढे पासाए आरोढुं विभग्गेण खत्तं कयं, सुबहुं च दव्वजायं नीणियं, नियघरं चऽनेन संपाविय। पहायाए रयणीए न्हाय समालद्ध सुद्धं वासो तत्थ गतो, को किं भासतित्ति जाणणत्थं, जइ तावज्ज लोगो मं न यानिस्सइ ता पुनोवि पुव्वट्ठिइए चोरिस्सामीत्ति संपहारिऊण तेमि य खत्तट्ठाणे गओ, तत्थ य लोगो बहू मिलितो संलवति-कहं दुरारोहे पासए आरोढुं विभग्गेण खत्तं कयं ? कहं च खुड्डुलएणं खत्तदुवारेणं पविट्ठो ?, पुणो य सह दव्वेण निग्गओत्ति। सो सुणेउं हरिसितो चिंतेइ-सच्चमेयं, किहऽहं एएण निग्गतोत्ति ?, अप्पाणो उदरं च कडिं च पलोएउं खत्तमुहं पलोएति।

सो य रायनिउत्तेहिं पुरिसेहिं कुसलेहिं जाणितो, रायणो उवनीतो सासितो य ॥ एवं पापकर्म्मणामभिलषणमपि सदोषमिति न विदधीतेति सूत्रार्थः ॥ इह कृतानां कर्म्मणामवन्ध्यत्वमुक्तं, तत्र च कदाचित् स्वजनत एव तन्मुक्तिर्भविष्यति, अमुक्तौ वा विभज्यैवामी धनादिवद् भोक्षयन्त इति कश्चिन्मन्येत अत आह-

मू. (११९) *संसारमावन्न परस्स अट्ठा, साहारणं जं च करेति कम्मं।*
कम्मस्स ते तस्स उ वेयकाले, न बंधवा बंधवयं उवेंति॥

वृ. पाठान्तरेऽपि पापकर्मस्पृहणं सदोषमिति निषिद्धं, ततस्तत्रापि स्यादेतत्-यथेह सर्व साधारणं तथाऽमुष्मिन्नपि भविष्यत्यत आह-'संसार' सूत्रं, संसरणं-संसारः तेषु तमुच्चावचेषु पर्यटनं तम् आपन्नः प्राप्तः, 'परस्य' आत्मव्यतिरिक्तस्य पुत्रकलत्रादेः, 'अर्थात्' इति अर्थं प्रयोजनमाश्रित्य 'सावरयं'त्ति चरमस्याशब्दार्थत्वाद्भिन्नक्रमत्वाच्च सादरं वा यदात्मनोऽन्येषां चैतद् भविष्यतीत्यभिसन्धिपूर्वकं 'करोति' निर्वर्तयति भवान्, कर्महेतुत्वात् कर्म क्रियत इति वा कर्म-कृष्यादिकर्म तस्यैव कृष्यादेः 'ते' तव हे कृष्यादिकर्मकर्तः! 'तस्य' परार्थस्य साधारणस्य वा, तुशब्दोऽपिशब्दार्थः, आस्तामात्मानिमित्तं कृतस्येत्यभिप्रायः, 'वेदनं' वेदो विपाकः तत्तत्कर्मफलानुभवनं तत्काले 'न' इति निषेधे, अवधारणफलत्वाद्वाक्यस्य नैव 'बान्धवाः' स्वजनाः, यदर्थं तत्कर्म कृतवान् करोषि वा ते 'बान्धवतां' बन्धुभावं नहि भजनापनयानादिना 'उवेंति'त्ति उपयन्तीति, यतश्चैवमतस्तदुपरि प्रेमादिप्रमादपरिहारतो धर्म एवावहितेन भाव्यं, तथाविधाभीरीव्यंसकवणिग्वत्। तथा च वृद्धाः-

एगंमि नयरे एगो वाणियगो अंतरावणेसु ववहरइ, एगा आभीरी उज्जुगा दीरूवए घेत्तुण कप्पासनिमित्तमुवट्ठिया, कप्पासो य तया समग्घो वट्टति, तेन वाणियएण एगस्स रूवस्स दो वारा तोलेउं कप्पासो दिन्नो, सा जाणइ-दोण्हवि रूवगाण दिन्नोत्ति, सा पोट्टलयं बंधिऊण गया, पच्छा वाणियतो चिंतेति-एस रूवगो मुहा लद्धो, ततो अहं एयं उवभुंजामि, तेन तस्स रूवगस्स सप्पियं घयं गुलो विक्किणिउं घरे विसिज्जउं भज्जा संलत्ता-घयपुण्णे करेज्जासित्ति, ताए कया घयपुण्णा, जामाउगो से सवयंसो आगतो, सो ताए परिवेसिता घयपुण्णेहिं, सो भुंजिउं गतो, वाणियतो न्हानपयतो भोयणत्थमुवगतो, सो ताए परिवेसितो साभाविएण भत्तेण, भणति-किं न कया घयउरा?, ताए भन्नति-कया, परं जामाउएण सवयंसेण खतिया?, सो चिंतेति-पेच्छ जारिसं कयं मया, सा वराई आभीरी वंचेउं परनिमित्तं अप्पा अवुत्तेण संजोईओ, सो य सचिंतो सरीरचिंताए निग्गतो, गिम्हो य वट्टति, सो मज्झण्हवेलाए कयसरीरचिंतो एगस्स रुक्खस्स हेट्ठा वीसमति, साहू य तेणोगासेण भिक्खणिमित्तं जाति, तेन सो भण्णति-भगवं! एत्थं रुक्खच्छायाए विस्सम मया समाणंति, साहुणा भणियं-तुरियं मए नियकज्जेण गंतव्वं, वणिएण भणियं-किं भवयं! कोऽवि परकज्जेणावि गच्छइ?, साहुणा भणियं-जहा तुमं नियभज्जाइनिमित्तं किलिस्ससि, स मर्मणोव स्पृष्टः, तेनेव एक्कवयणेण संबुद्धो भणति-भयवं! तुम्हे कत्थ अच्छह?, तेन भन्नइ-उज्जाणे, ततो तं साहुं कयपज्जत्तियं जाणिऊण तस्स सगासं गतो, धम्मं सोउं भणति-पव्वयामि जाव सयणं आपुच्छिऊणं, गतो नियगं घरं, बंधवे भज्जं च भणइ-जहा आवणे ववहरंतस्स तुच्छो लाभगो, ता दिसावाणिज्जं करेस्सामि, दो य सत्थवाहा, तत्थेगो मुल्लभंडं दाऊण सुहेण इट्ठपुरं पावेइ, तत्थ विढत्ते न किंचि गिण्हति, बीओ न किंचि मुल्लभंडं देति, पुव्वविढत्तं च विलुंपेति, तं कयरेण सह वच्चामि?, सयणेण भणियं-पढमेण सह वच्चसु, तेहिं सो समणुन्नातो बंधुसहितो गओ उज्जाणं, तेहिं भन्नति-कयरो सत्थवाहो?, तेन भन्नति-ननु परलोगसत्थवाहो एस साहू असोगच्छायाए उवविट्ठो नियएणं भंडेणं ववहारावेइ, एएण सह निव्वाणपट्टणं जामित्ति पव्वइतो। यथा चायं वणिक् स्वजनस्वत्वमालोचयन् प्रव्रज्यां प्रत्यादृतः, तथाऽन्यैरपि विवेकिभिर्यतितव्यं, तथा च वाचकः-

"रोगाघ्रातो दुःखार्दितस्तथा स्वजनपरिवृतोऽतीव ।
क्वणति करुणं सवाष्पं रुजं निहन्तुं न शक्तौऽसौ ॥१॥
माता भ्राता भगिनी भार्या पुत्रस्तथा च मित्राणि ।
न घ्नन्ति ते यदि रुजं स्वजनबलं किं वृथा वहसि ? ॥२॥
रोगहरणेऽप्यशक्ताः प्रत्युत धर्म्मस्य ते तु विघ्नकराः ।
मरणाच्च न रक्षन्ति स्वजनपराध्यां किमभ्यधिकम् ? ॥३॥
तस्मात् स्वजनस्यार्थे यदिहाकार्यं करोषि निर्लज्ज ।
भोक्तव्यं तस्य फलं परलोकगतेन ते मूढ ! ॥४॥
तस्मात् स्वजनस्योपरि सङ्गं परिहाय निर्वृतो भूत्वा ।
धर्म्मं कुरुष्व यत्नाद्यत्परलोकस्य पथ्यदनम् ॥५॥

इति सूत्रार्थः ॥ इत्थं तावत् स्वकृतकर्म्मभ्यः स्वजनान्न मुक्तिरित्युक्तम्, अधुना तु द्रव्यमेव तन्मुक्तये भविष्यतीति कस्यचिदाशयः स्यादत आह-

मू. (१२०) *वित्तेण ताणं न लभे पमत्ते, इमंमि लोए अदुवा परत्थ ।*
दीवप्पणट्ठे व अनंतमोहे, नेयाउयं दट्ठुमदट्ठुमेव ॥

वृ. 'वित्तेन' द्रविणेन 'त्राणं' स्वकृतकर्मणो रक्षणं 'न लभते' न प्राप्नोति इति, कीदृक ?- 'प्रमत्तः' मद्यादिप्रमादवशगः, क्व ?-'इमंमि'त्ति अस्मिन्ननुभूयमानतया प्रत्यक्ष एव 'लोके' जन्मनि, 'अदुवे'ति अथवा 'परत्रे'ति परभवे, कथं पुनरिहापि जन्मनि न त्राणाय ?, अत्रोच्यते वृद्धसम्प्रदायः-

एगो किल राया इंदमहाईए कम्हि ऊसवे अत्तपुरे निग्गच्छंते घोसणं घोसावेइ-जहा सव्वे पुरिसा नयरातो निग्गच्छंतु, तत्थ पुरोहियपुत्तो रायवल्लभो वेसाघरमणुपविट्ठो घोसिएऽवि न निग्गतो, सो रायपुरिसेहिं गहितो, तेन वल्लभेण न तेसिं किंचि दाऊण अप्पा विमोइतो, दप्पायमाणो विवदंतो रायसगासमुवणीतो, राइणावि वज्झो आणत्तो, पच्छा पुरोहिओ उवट्ठितो भणति- सव्वस्सेपि य देमि मा मारिज्जउ, तोऽवि न मुक्को, सूलाए भिन्नो । एवमन्येऽपि न वित्तेन शरणमिहैव तावदाप्नुवन्ति, आस्तामन्यजन्मनि, तन्मूर्छावतः पुनस्तस्याधिकतरं दोषमाह- 'दीवे'त्यादि वृत्तार्द्धं, तत्र च दीवमित्येतत्पदं संस्कारमनपेक्ष्यैव निक्षेप्तुमाह निर्युक्तिकृत्-

नि.[२०६] दुविहो य होइ दीवो दव्वदीवो अ भावदीवो य ।
इक्किक्कोऽवि अ दुविहो आसासपगासदीवो अ ।

वृ. 'द्विविधश्च' द्विभेद एव भवति, दीवेति प्राकृतपदोपात्तोऽर्थो, द्रव्यभावभेदात्, तथा चाह-दव्वदीवो य भावदीवो यत्ति, पुनरयमेकैकोऽपि द्विविधः, द्वैविध्यमेवाह-'आसास'त्ति आश्वासयति अत्यन्तमाकुलितानपि जनान् स्वस्थीकरोतीत्याश्वासः, स एव दीवत्तिपदसम्बन्धात् प्राकृतस्य शतमुखत्वादाश्वासद्रुप इति भवति, तथा प्रकाशयति-घनतिमिरपटलावगुण्ठितमपि घटादि प्रकटयतीति प्रकाशः, सर्वधातूनां पचादिषु दर्शनात्, स चासौ दीप्यत इति दीपश्च प्रकाशदीपः, स च भवति दीवत्तिपदवाच्य इति गाथार्थः ॥ पुनरनयोरपि भेदमाह-

नि.[२०७] संदीनमसंदीनो संधिअमस्संधिए अ बोद्धव्वे ।

भावासगासे अ एवं दुविहो गुणिकिक्को ॥

वृ. संदीयते-जलप्लावनात् क्षयमाप्नोतीति सन्दीनः, तदितरस्त्वसन्दीनः, तथा 'संजोगिमे य'त्ति संयोगिमः, यस्तैलवर्त्त्यग्निसंयोगेन निर्वृत्तः, असंयोगिमश्च तद्विपरीत आदित्यबिम्बादिः स ह्येक एव प्रकाशक इति 'ज्ञातव्यः' अवबोद्धव्यः, पठ्यते च 'सन्धियमस्सन्धिय य बोद्धव्वे' इहापि 'सन्धितः' संयोजितः, तद्विपरीतस्तु 'असन्धितः' असंयोजितः, 'आसासपगासे य'त्ति आश्वासद्वीपः प्रकाशदीपश्च, यथाक्रमं चेह सम्बन्धः, तत्राश्वासद्वीपः, सन्दीनासन्दीनः, प्रकाशदीपश्च संयोगिमासंयोगिम इति, अयं च द्रव्यत एवेति व्यामोहापनयनायाह-'भावे ऽपि' भावविषयोऽपि, 'दुविह'त्ति द्विधा, 'पुन'रिति प्रथमभेदापेक्षम्, 'एकैकः' इत्याश्वासद्वीपः प्रकाशदीपश्च, इदमुक्तं भवति-

यथा द्रव्यतोऽपारनीरधिविमग्नानां कदा कदैतदन्तः स्यात् इत्याकुलितचेतसामाश्वासनहेतुरश्वासद्वीपः, एवं संसारसागरमपारमुत्तरीतुमनसामात्यन्तमुद्वेजितानां भव्यानामाश्वासनहेतुः सम्यग्दर्शनं भावाश्वासद्वीपः, तत्र हि द्रव्यद्वीप इव वीचिभिः कुवादिभिरमी नोह्यन्ते नापि मकरादिभिरवानन्तानुबन्धिभिः क्रोधादिभिरतिरौद्रैरभ्युपद्रूयन्ते, यथा च द्रव्याश्वासद्वीपः प्लाव्यमानतयैकः सन्दीनः तथाऽयमपि भावाश्वासद्वीपः सम्यग्दर्शनात्मकः कश्चित् क्षायोपशमिक औपशमिको वा पुनरनन्तानुबन्ध्युदये मिथ्यात्वोदयेन जलोत्पीलेनेव प्लाव्यते, ततस्तन्निबन्धनैर्जलचरैरिवानेकदुःखैरुपताप्यत इति सन्दीन उच्यते, यस्तु क्षायिकसम्यक्त्वलक्षणो न जलोत्पीलेनेव मिथ्यात्वोदयेनाक्रम्यते अत एव च न तत्स्थस्तन्निबन्धनापायैः कथञ्चिद्युज्यते असावसन्दीनो भावद्वीपः, तथा यथैव तमसाऽन्धीकृतानामपि प्रकाशदीपः तत्प्रकाश्यं वस्तु प्रकाशयति एवमज्ञानमोहितानां ज्ञानमपीति भावप्रकाशदीप उच्यते, अयमप्येकः संयोगिमोऽन्यश्चान्यथा, तत्र यः श्रुतज्ञानात्मको भावदीपः अक्षरपदपादश्लोकादिसंहतिनिर्वर्त्तितः स संयोगिमः, यस्त्वन्यनिरपेक्षा निरपेक्षतया च न संयोगिमः स केवलज्ञानात्मकोऽसंयोगिमो भावदीप इति गाथार्थः ॥ व्याख्यातं सूत्रस्पर्शिकनिर्युक्त्या 'दीव'त्ति सूत्रपदम्, अत्र च प्रकाशदीपेनाधिकृतं, ततश्च 'दीवप्पणट्ठे वत्ति' प्रकर्षेण नष्टो-दृष्टयगोचरतां गतः प्रणष्टो दीपोऽस्येति प्राकृतत्वात्प्रणष्टदीपः, आहिताग्न्यादेरकृतिगणत्वाद्वा दीपप्रणष्टः तद्वदिति दृष्टान्तः, अत्र सम्प्रदायः-

जहां केइ धातुवाइया सदीवगा अग्गिं इंधनं च गहाय बिलमणुपविट्ठा, सो तेसिं पमाएण दीवो अग्गीवि विज्झातो, ततो ते विज्झायदीवगीया गुहातममोहिया इतो ततो सव्वतो परिभमंति, परिभमंता अपडियारमहाविसेहिं सप्पेहिं डक्का दुरुत्तरे अहे निवडिया, तत्थेव निहणमुवगता। एवं अनन्तः-अपर्यवसितः, तद्भवापेक्षया प्रायस्तस्यानपगमात्, मुह्यते येनासौ मोहो-ज्ञानावरणदर्शनावरणमोहनीयात्मकः, ततश्चानन्तो मोहोऽस्येति अनन्तमोहः, किमित्याह-'नेयाउयं'ति निश्चित आयो-लाभो न्यायो-मुक्तिरित्यर्थः, स प्रयोजनमस्येति नैयायिकस्तं, सम्यग्दर्शनादिकं मुक्तिमार्गमिति गम्यते, 'दट्ठु'ति अन्तर्भूतापिशब्दार्थत्वाद्दृष्ट्वाऽपि-उपलभ्याप्यदृष्टेव भवति, तद्दर्शनफलाभावात्, अथवा 'अदट्ठुमेव'त्ति प्राकृतत्वाददृष्टैव भवति, इदमाक्तम्-यथैष गुहान्तर्गतः प्रमादात् प्रणष्टदीपः प्रथममुपलब्धवस्तुतत्त्वोऽपि दीपाभावे तददृष्टैव जायते, तथाऽयमपि जन्तुः कथञ्चित् कर्म्मक्षयोपशमादेः सम्यग्दर्शनादिकं मुक्तिमार्गं

भावप्रकाशदीपतः श्रुतज्ञानात्मकात् दृष्टोऽपि वित्तादिव्यासक्तिततस्तदावरणोदयाददृष्ट एव भवति, तथा च न केवलं स्वतस्त्राणाय वित्तं न भवति, किन्तु कथञ्चित् त्राणहेतुं सम्यग्दर्शनादिकमप्यवासमुपहन्तीति सूत्रार्थः ॥ एवं धनादिकमेव सकलकल्याणकारि भविष्यतीत्याशङ्कायां तस्य कुगतिहेतुत्वं कर्म्मणश्चाबध्यत्वमुपदर्शयं यत् कृत्यं तदाह-

मू. (१२१) *सुत्तेसु यावी पडिबुद्धजीवी, नो विस्ससे पंडिय आसुपन्ने।*
घोरा मुहुत्ता अबलं सरीरं, भारंडपक्खी व चरऽप्पमत्तो॥

वृ. 'सुत्तेसु' द्रव्यतः शयानेषु भावतस्तु धर्म्म प्रत्यजाग्रत्सु, चः पादपूरणे, 'यशब्दः' समाहारेतरेतरयोगसमुच्चयावधारणपादपूरणाधिकवचनादिष्वि'ति वचनात्, अपिः सम्भावने, ततोऽयमर्थः-सुप्तेष्वप्यास्तां जाग्रत्सु च, किमित्याह प्रतिबुद्ध-प्रतिबोधः द्रव्यतो जाग्रता भावतस्तु यथावस्थितवस्तुत्त्वावगमस्तेन जीवितुं-प्राणान् धर्तुं शीलमस्येति प्रतिबुद्धजीवी, यदि वा प्रतिबुद्धो-द्विधाऽपि प्रतिबोधवान् जीवतीत्येवंशीलः-प्रतिबुद्धजीवी, कोऽभिप्रायः ?-द्विधा प्रसुप्तेष्वपि अविवेकिषु न गतानुगतिकतयाऽयं स्यादिति, किन्तु प्रतिबुद्ध एव यावज्जीवमास्ते, तत्र च द्रव्यनिद्राप्रतिषेधे अगडदत्तोदाहरणं, तत्र च वृद्धवादः-

उज्जेणीए जियसत्तुस्स रन्नो अमोहरहो नाम रहितो, तस्स जसमती नाम भज्जा, तीसे अगडदत्तो नाम पुत्तो, तस्स य बालभावे चेव पिया उवरतो। सो य अन्नया अभिक्खणं रोयमाणिं मायरं पुच्छइ, तीए निब्बंधेण कहियं-जहा एस अमोहपहारी रहिओ तुह पिउसन्तियं रिद्धिं पत्तो, तं च पच्चक्खकडुयं, तुमं च अकयविज्जं दट्ठुं अंतो अईव डज्झामि, तेण भणियं-अत्थि कोई जो मं सिक्खावेति, तीए भणियं-अत्थि कोसंबीए दढप्पहारी नाम पिउमित्तो, गतो कोसंबिं, दिट्ठो दढप्पहारी ईसत्थसत्थरहचरियाकुसलो आयरितो, तेण पुत्तो विव निप्फाइओ इंसत्थे कुंतादिपाडियक्के जंतमुक्के य अन्नासुवि कलासु। अन्नया गुरुजणाणुन्नातो सिद्धविज्जो सिक्खादंसणं काउं रायकुलं गतो, तत्थ य असक्खिंडगहणाइयं जेहासिक्खियं सव्वं दाइयं, जहा सव्वो जणो हयहियओ जातो, राया भणइ-नत्थि किंचि अच्छेरयं, नेव य विम्हितो, भणति-किं किं ते देमि ?, तेण विन्नवितो-सामि ? तुब्भे ममं साधुकारं न देह किं मे अन्नेण दानेनेति।

अस्सिं चेव देसकाले पुरजणवएण राया विन्नविओ-देवानुप्पियाणं पुरे अमुयपुव्वं संधिछेज्जं संपयं च दव्वहरणं परिमोसो य केणवि कयं, तं अरहंतु णं देवानुप्पिया! नगरस्स सारक्खणं काउं, ततो आणत्तो राइणा नगरारक्खो-सत्तरत्तस्स अब्भंतरे जहा घेप्पति तहा कुणसुत्ति, तं च सोऊण एस थक्को मम गमणस्सत्ति परिगणंतेण विन्नवितो राया, जहा-अहं सत्तरत्तस्स अब्भंतरे चोरे सामि! तुब्भपायमूलं उवणेस्सामि, तं च वयणं रायणा पडिसुयं, अनुमन्नियं च एवं कुणसुत्ति। तओ ओ हट्ठतुट्ठमाणसो निग्गतो रायकुलातो, चिंतियं च नेनं-जहा दुट्ठपुरिसतक्करा पाणागाराइट्ठाणेसु नानाविहलिंगवेसपडिच्छन्ना भमंति, अतो अहमेयाणि ठाणाणि अप्पणा चारपुरिसेहि य मग्गावेमि, मग्गावेऊण निग्गतो नयरातो, निद्धाइऊण इक्कतो एक्कस्स सीयलच्छायस्स सहयारस्स पायवस्स हेट्ठा निविट्ठो दुब्बलमयलवत्थो, चोरगहणोवायं चिंतयंतो अच्छति, नवरि जंकंपि भुणमुणायंतो तं चेव सहयारपायवच्छायमुवगतो परिव्वायतो, अंबपल्लवसाहं भंजिऊण निविट्ठो, दिट्ठो य तेण ओबद्धपिंडितो दीहजंघो, दट्ठूण य आसंकितो

हियएण-पावकम्मसूयगाइं लिंगाइं, नूनं एस चोरोत्ति, भणितो य सो परिव्वायगेण-वच्छ! कुतो तुमं किंनिमित्तं वा हिंडसि?, ततो तेण भणियं भयवं! उज्जेणीतो अहं पक्खीणवित्तो हिंडामि, तेण भणियं-पुत्त! अहं ते विउलं अत्थसारं दलयामि, अगलदत्तो भणति-अनुग्गहिओऽम्हि तुब्भेहिं।

एवं च अदंसणो गतो दिनयरो, अइक्कंता संझा, कड्ढियं तेन तिदंडातो सत्थयं, बद्धो परियरो, उट्ठितो भणति-नगरं अइगच्छामोत्ति, ततो अगलदत्तो ससंकितो तं अनुगच्छइ, चिंतेति य-एस सो तक्करोत्ति, पविट्ठो नयरं, तत्थ य उत्ताणनयणपेच्छनिज्जं कम्मविपुन्नविभवसिरिसूयगं भवणं, तत्थ मा सिरिवच्छसंठाणं संधिं छेत्तूण अतिगतो परिव्वायतो, नीनेऊणातो अनेगभंडभरियातो पेडातो, तत्थ यतं ठवेऊण गतो, अगडदत्तेण चिंतियं-अंतगमणं करेमि, ताव य आगतो परिव्वायतो जक्खदेउलातो सइएल्लए दालिद्दपुरिसे घेत्तूण, तेन ते य ताओ पेडातो गिण्हाविया, निद्धाइया य सव्वे नयरातो भणति य परिव्वायतो-पुत्त! इत्थ जिन्नुज्जाणे मुहुत्ताणं निद्दाहिनोयं करेमो जाव रत्ती गलति, ततो गमिस्सामोत्ति, ततो तेन लविय-ताय! एवं करेमित्ति, ततो तेहिं पुरिसेहिं ठवियाओ पेडातो, निद्दावसं च उवगया, तो सो य परिव्वायतो अगलदत्तो य सज्जं अत्थरिऊण अल्लियसुइयं काऊण अच्छंति।

तओ य अगलदत्तो सणियं उट्ठेऊण अवक्कंतो रुक्खसंछन्नो अच्छति, ते य पुरिसा निद्दावसं गया जाणिऊण वीसंभघाइणा परिव्वायएण मारिया, अगलदत्तं च तत्थ सत्थरे अपेच्छमाणो मग्गिउं पयत्तो, मग्गंतो य साहापच्छाइयसरीरेण अभिमुहमागच्छंतो अंसदेसे असिणा आहतो, गाढपहारोकंतो पडितो, पच्चागयसन्नेण य भणितो अगलदत्तो-वच्छ! गिण्ह इमं असिं, वच्च मसाणस्स पच्छिमभागं, गंतूण संतिज्जाघरस्स भित्तिपासे सद्दं करेज्जासि, तत्थ भूमिघरे मम भगिनी वसति, ताए असिं दाएज्जसु, सा ते भज्जा भविस्सति, सव्वदव्वस्स य सामी भविस्ससि, अहं पुण गाढपहारो अइक्कंतजीवोत्ति। तओ य अगलदत्तो असिलट्ठिं गहाय, दिट्ठा य सा ततो भवणवासिनीविव पेच्छणिज्जा, भणइ-य-कतो तुमंति?, दाइतो अगलदत्तेण असिलट्ठी, विसन्नवयणहियएए सोयं निगूहंतीए ससंभमं अतीनीतो संतिज्जाघरं, दिन्नं आसनं, उवविट्ठो अगलदत्तो ससंकितो, से चरियं ठवलक्खेइ य, सा अतिआयरेण सयणिज्जं एइ, भणइ य-इत्थ वीसामं करेह, तओ न सो निद्दावसमुवगतो वक्खित्तचित्ताए, अन्नं ठाणं गंतूण ठिओ पच्छन्नं, तहिं च सयणिज्जे पुव्वसज्जिया सिला, सा ताए पाडिया चुन्निया य सज्जा, सा य हट्ठतुट्ठमाणसा भणति-हा हओ भाउघायगोत्ति, अगडदत्तोऽवि ततो निद्धाइऊण बालेसु घेत्तूण भणति-हा दासीए धीए को मं घायइत्ति?, तओ सा पाएसु निवडिया सरणाऽऽगयामिति भणति, तेनाससिया, मा बीहेहित्ति। सो तं घेत्तूण गतो राउलं, पूजितो रन्ना पुरजनवएण य, भोगान य भागीजातोत्ति।

एवं अन्नेऽपि अपमत्ता इहेव कल्लाणभाइणो भवंति। उक्तो द्रव्यसंसेषु प्रतिबुद्धजीविनो दृष्टान्तः, भावसंसेषु तु तपस्विनः, ते हि मिथ्यात्वादिमोहितेष्वपि जनेषु यथावदवगमपूर्वकमेव संयमजीवितं धारयन्तीति, एवंविधश्च किं कुर्यादित्याह-न विश्वस्यात्, प्रमादेष्विति गम्यते,

किमुक्तं भवति ?-बहुजनप्रवृत्तिदर्शनान्नैतेऽनर्थकारिण इति न विश्रम्भवान् भवेत् 'पण्डितः' प्राग्वत्, आशु-शीघ्रमुचितकर्त्तव्येषु यतितव्यमिति प्रज्ञा-बुद्धिरस्येति-आशुप्रज्ञः, किमिति आशुप्रज्ञः ?, यतो घूर्णयन्तीति घोराः-निरनुकम्पाः, सततमपि प्राणिनां प्राणापहारित्वात्, क एते ?, 'मुहूर्त्ताः' कालविशेषाः, कदाचिच्छरीरबलाद् घोरा अप्यमीन प्रभविष्यन्तीत्यत आह-'अबलं' बलविरहितं न मृत्युदायिनो मुहूर्त्तान् प्रति सामर्थ्यवत्, किं तत् ? - शरीरम्, एवं तर्हि किं कृत्यमित्याह-'भारण्डपक्खीव चरऽप्पमत्तो' इति पतत्यनेनेति पक्षः सोऽस्यास्तीति पक्षी भारण्डश्चासौ पक्षी च भारण्डपक्षी स यद्वप्रमत्तश्चरति तथा त्वमपि प्रमादरहितश्चर विहितानुष्ठानमासेवस्व, अन्यथा हि यथाऽस्य भारण्डपक्षिणः पक्ष्यन्तरेण सहान्तर्वर्त्तिसाधारणचरणसम्भवात् स्वल्पमपि प्रमाद्यतोऽवश्यमेव मृत्युः तथा तवापि संयमजीविताद् भ्रंश एव प्रमाद्यत इति सूत्रार्थः ॥ अमुमेवार्थं स्पष्टयन्नाह-

मू. (१२२) *चरे पयाइं परिसंकमाणो, जं किंचि पासं इह मन्नमाणो।*
लाभंतरे जीविय वूहइत्ता, पच्छा परिन्नाय मलावधंसी ॥

वृ. 'चरेत्' गच्छेत 'पदानि' पादविक्षेपरूपाणि 'परिशङ्कमानः' अपायं विगणयन्, किमित्येवमत आह-'यत्किञ्चिद्' गृहस्थसंस्तवाद्यल्पमपि पाशमिव पाशं संयमप्रवृत्तिं प्रति स्वातन्त्र्योपरोधितया 'मन्यमानो' जानानः, यद्वा 'चरेदि'ति संयमाध्वनि यायात्, किं कुर्वन् ?-'पदानि' स्थानानि, धर्म्मस्येति गम्यते, तानि च मूलगुणादीनि 'परिशङ्कमानो' मा ममेह प्रवर्तमानस्य मूलगुणेषु मालिन्यं स्खलना वा भविष्यतीति परिभावयन् प्रवर्त्तेत, 'जं किंचि' त्ति यत्किञ्चिदल्पमपि दुश्चिन्तितादि प्रमादपदं मूलगुणादिमालिन्यजनकतया बन्धहेतुत्वेन पाशमिव पाशं मन्यमानः, तदयमुभयत्राभिप्रायः-यथा भारण्डपक्षी अपरसाधारणान्तर्वर्त्तिचरणतया पदानि परिशङ्कमान एव चरति यत्किञ्चिद्वरकादिकमपि पाशं मन्यमानः, तथाऽप्रमत्तश्चरेत्, ननु यदि परिशङ्कमानश्चरेत्तर्हि सर्वथा जीवितनिरपेक्षेणैव प्रवर्त्तितव्यं, तत्सापेक्षतायां हि कदाचित्कथञ्चिदुक्तदोषसम्भव इत्याशङ्क्याह-'लाभंतरे'त्यादि वृत्तार्द्धं, लम्भनं लाभः-अपूर्वार्थप्राप्तिः अन्तरं-विशेषः, लाभश्चासावन्तरं च लाभान्तरं तस्मिन् सतीत्यर्थः, किमुक्तं भवति ?

यावद्विशिष्टविशिष्टतरसम्यग्ज्ञानदर्शनचारित्रवासिरितः सम्भवति तावदिदं 'जीवितं' प्राणधारणात्मकं 'बृंहयित्वा' अन्नपानोपयोगादिना वृद्धिं नीत्वा, तदभावे प्रायस्तदुपक्रमणसम्भवादित्थमुक्तं, 'खुहा पिवासा य वाही य'त्ति वचनात् क्षुदादीनामप्युपक्रमणकारणत्वेनाभिधानाद्, इह च बृंहयित्वेव बृंहयित्वेति व्याख्येयम्, अन्यथा ह्रासंस्कृतं जीवितमिति विरुध्यत इति भावनीयं, ततः किमित्याह-'पश्चात्' लाभविशेषप्राप्त्युत्तरकालं 'परिज्ञाय'त्ति सर्वप्रकारैरवबुध्य यथेदं नेदानीं प्राग्वत्सम्यग्दर्शनादिविशेषहेतुः, तथा च नातो निर्जरा, न हि जरया व्याधिना वा अभिभूतं तत् तथाविधधर्माधानं प्रति समर्थम्, उक्तं हि-

"जरा जाव न पीलेति, वाही जाव न वड्ढति।
जाविंदिया न हायंति, ताव धम्मं समायरे॥"

एवं ज्ञपरिज्ञया परिज्ञया ततः प्रत्याख्यानपरिज्ञया च भक्तं प्रत्याख्याय, सर्वथा जीवितनिरपेक्षो भूत्वेति भावः, मलवदत्यन्तमात्मनि लीनतया मलः-अष्टप्रकारं कर्म्म तदपध्वंसत

इत्येवंशीलः मलापध्वंसी-मलविनाशकृत, स्यादिति शेषः, ततो यावल्लाभं देहधारणमपि गुणायैवेति भावः, यद्वा जीवितं बृंहयित्वा लाभान्तरे-लाभविच्छेदेऽन्तर्वर्तिश्च मलाश्रयत्वान्मलः-औदारिकशरीरं तदपध्वंसी स्यात्, कोऽर्थः ?-जीवितं त्यजेद्, इदमुक्तं भवति-अयमस्यैको हि गुणो मानुष्यमवाप्य लभ्यते धर्म्म इति भावयन् यावदितस्तल्लाभः तावदिदं बृंहयेत्, लाभविच्छेदं सम्भाव्य संलेखनादिविधानतस्त्यजेत् ॥ इह च यावल्लाभधारणे मण्डिकचौरोदाहरणं, तत्र च सम्प्रदायः-

विन्नागयडे नयरे मंडितो नाम तुन्नातो परदव्वहरणपसत्तो आसी, सो य दुट्ठगंडो भिन्नि जने पगासेंतो जाणुदेसेण निच्चमेव अद्धयालेवलित्तेण रायमग्गे तुन्नागस्स सिप्पमुवजीवति, चंकमतोऽवि य दंडपरिएणं पाएण किलिस्संतो कहिंवि चकमति, रत्तिं च खत्तं खणिऊण दव्वजायं घेत्तूण नगरसंनिहिए उज्जानेगदेसे भूमिघरं, तत्थ निक्खिवति, तत्थ य से भगिनी कन्नगा, चिट्ठति, तस्स भूमिघरस्स मज्झे कूवो, जं च सो चोरो दव्वेण पलोभेउं सहायं दव्ववोढारं आणेति तं सा से भगिनी अगडसमीवे पुव्वणत्थासणे निवेसेउं पायसोयलक्खेण पाए गिण्हिऊण तम्मि कूवे पविक्खवइ, गतो सो तदेव विवज्जइ, एवं कतो अच्चंति नयरे मुसंतस्स, चोरगाहा तं न सक्केति गिण्हउं, तओ नयरे उवरतो जातो।

तत्थ मूलदेवो राया, सो कहं राया संवुत्तो ?-उज्जेनीए नयरीए सव्वगणियापहाणा देवदत्ता नाम गणिया, तीए सद्धिं अयलो नाम वाणियदारतो विभवसंपन्नो मूलदेवो य संवसइ, तीए मूलदेवो इट्ठो, गणियामाऊए अयलो, सा भणति-पुत्ति! किमेएणं जूइकारेणंति ?, देवदत्ताए भन्नति-अम्मो! एस पण्डितो, तीए भन्नइ-किं एस अम्ह अब्भहियं वित्ताणं जाणति, अयलो बाहत्तरिकलापंडिओ एव, तीए भन्नति-वच्छ! अयलं भण-देवदत्ताए उच्छुं खाइउं सद्धा, तीए गंतूण भणिलो, तेन चिंतियं-कओ खु ताइं अहं देवदत्ताए पणतितो, तेन सगडं मोरूण उच्छुयलट्ठीण उवणीयं, ताए भण्णति-किमङ्गं हत्थिणी ?, तीए भणियं-वच्च मूलदेवं भण-देवदत्ता उच्छुं खाइउं अहिलसति, तीए गंतूण से कहियं, तेन य कइ उच्छुलट्ठीतो छल्लेउं गंडलीतो काउंचाउज्जायगादिसुवासियातो काउं पेसियाओ, तीए भण्णति-पिच्छ विण्णाणंति, सा तुण्हिक्का ठिया, मूलदेवस्स पओसमावन्ना अयलं भणति-अहं तहा करेमि जहा मूलदेवं गिण्हिस्सिसि, तेन अट्ठसयं दीनाराण तीए भाडिनिमित्तं दिन्नं, तीए गंतुं देवदत्ता भन्नति-अज्ज अयलो तुमे समं वसिही, इमे दीनारा दत्ता, अवरण्हवेलाए गंतुं भणति-अयलस्स कज्जं तुरियं जायं तेन गामं गतोत्ति, देवदत्ताए मूलदेवस्स पेसियं, आगतो मूलदेवो,

तीए समाणं अच्छइ, गणिया माऊण अयलो य अप्पाहितो, अन्नाओ पविट्ठो बहुपुरिससमग्गो वेढिउं गब्भगिहं, मूलदेवो अइसंभमेण सयणीयस्स हिट्ठा निलुक्को, तेन लक्खितो, देवदत्ताए दासचेडीतो संवुत्तातो अचलस्स सरीरऽब्भंगादि घेत्तुं उवट्ठिया, सो य तंमि चेव सयणीए ठियनिसन्नो भणइ-इत्थ चेव सयणीए ठियं अब्भंगेहि, तातो भणंति-विनासिज्जइ सयणीयं, सो भणइ-अहं एत्तो उक्किट्ठतरं दाहामो, मया एवं सुविनो दिट्ठो, सयणीयऽब्भंगणउव्वलनण्हानादि कायव्वं, ताहि तधा कयं, ताहे ण्हाणगोल्लो मूलदेवो अयलेण कालेसु गहाय कड्ढितो, संलत्तो य ऽनेन-वच्च मुक्कोऽसि, इयरहा ते अज्ज अहं जीवियस्स विवत्तामि, जदि मया जारिसो

होज्जादि ता एवं मुच्चेज्जाहि(सि) अयलाभिहितो तओ मूलदेवो अवमानितो लज्जाए निग्गओ उज्जेनीए, पत्थयणविरहितो बेन्नायडं जतो पत्थितो.

एगो से पुरिसो मिलितो, मूलदेवेन पुच्छितो-कहिं जासि ?, तेन भन्नति-बिन्नायतडंमि, मूलदेवेन भण्णति-दोऽवि समं वच्चामोत्ति, तेन संलत्तं-एवं भवउत्ति, दोऽवि पट्ठिया, अंतरा य अडवी, तस्स पुरिसस्स संबलं अत्थि, मूलदेवो विचिंतेइ-एसो मम संबलेण संविभागं करेहिंति, इण्हिं सुते परं ताए अप्पाए वच्चति, ता से दिन्नि दिवसे छिन्ना अडवी, मूलदेवेन पुच्छितो-अत्थि एत्थ अब्भासे गामो ?, तेन भन्नति-एस नाइदूरे पंथस्स गामो, मूलदेवेन भणितो-तुमं कत्थ वससि ?, तेन भण्णति-अमुगत्थ गामे, मूलदेवेन भणितो-तो खाइ अहं एयं गामं वच्चामि, तेन से पंथो उवदिट्ठो, गओ तं गामं मूलदेवो, तत्थऽनेन भिक्खं हिंडतेन कुम्मासा लद्धा. पवत्तो य कालो वट्टति, सो य गामातो निग्गच्छइ, साहू य मासखमण-पारणएण भिक्खानिमित्तं पविसति, तेन य संवेगमावन्नेण पगए भत्तीए तेहिं कुम्मासेहिं सो साधू पडिलाभितो, भणियं चऽनेनं 'धन्नाणं खु नराणं कोम्मासा हुंति साहुपारणए' देवयाए अहासन्निहियाए भन्नति-पुत्त ! एतीए गाहाए पच्छद्धे जं मग्गसि तं देमि,

गणियं च देवदत्तं दंतिसहस्सं च रज्जं च ॥

देवयाए भण्णति-अचिरेण भविस्सतित्ति, ततो गतो मूलदेवो बेन्नायडं, तत्थ खत्तं खणंतो गहितो, वज्झाए नीणिज्जइ, तत्थ पुण अपुत्तो राया मओ, आसो अहियासिओ, मूलदेव-सगासमागतो, पडिहायणं रज्जे अहिसित्तो राया जाओ, सो पुरिसो सद्दाविओ, सो अनेण भणितो-तुब्भं तणियाए आसाते आगतो अहं, इहरहा अहं अंतरालं चेव विवज्जंतो, तेन तुज्झं एस मया गामो दत्तो, मा य मम सगासं एज्जसुत्ति, पच्छा उज्जेणीएण रन्ना सद्धिं पीतिं संजोएति, दाणमाण-संपूतियं च काउं देवदत्तं अनेण मग्गितो, तेन पच्चुवगारसंधिएण दिन्ना, मूलदेवेन अंतेउरं छूढा, ताए समं भोगे भुंजति।

अन्नया अयलो पोयवहणेण तत्थागतो, सुक्के विज्जंते भंडे जाति पाए दव्वनूमणाणि ठाणाणि तानि जानमाणेण मूलदेवेन सो गिण्हावितो, तुमे दव्वं नूमियंति पुरिसेहिं बद्धिऊण रायसयासमुवणीतो, मूलदेवेन भण्णति-तुमं मम जानसि ?, सो भणति-तुमं राया को तुमं न जाणइ ?, तेन भण्णइ-अहं मूलदेवो, सक्कारिउं विसज्जितो, एवं मूलदेवो राया जातो। ताहे सो अन्नं नगरारक्खयं ठवेति, सोऽवि न सक्को चोरं गिण्हउं, ताहे मूलदेवो सयं नीलपडं पाउणिऊण रत्तिं निग्गतो, मूलदेवो अनज्जंतो एगाए सभाए निविट्ठो अच्छति, जाव सो मंडियचोरो आगंतूण भणति-को इत्थ अच्छति ?, मूलदेवेन भणियं-अहं कप्पडितो, तेन भण्णइ-एहि मनूसं करेमि, मूलदेवो उट्ठितो, एगंमि ईसरघरे खत्तं खयं, सुबहुं दव्वजायं नीनेऊण मूलदेवस्स उवरिं चडाविउं पट्ठिया नयरबाहिरियं, जातो मूलदेवो पुरतो, चोरो असिणा कड्ढिएण पिट्ठओ एइ, संपत्ता भूमिघरं, चोरो ते दव्वं निहिणिउमारद्धो भणिया अनेन भगिणी-एयस्स पाहुणयस्स पायसोयं देहि, ताए कूवतडसन्निविट्ठे आसणे संणिवेसितो, ताए पायसोयलक्खेण पाओ गहिओ कूवे छुहामित्ति, जाव अतीव सुकुमारा पाया, ताए नायं-जहेस कोइ भूयपुव्वरज्जो विहलियगो, तीए अनुकंपा जाया, तओ ताए पायतले सन्निवेसो नस्सत्ति, मा मारिज्जिहिसित्ति, ततो पच्छा सो पलातो, ताए

बोलो कतो नट्ठो नट्ठोत्ति, सो असिं कड्ढिऊण मग्गतो लग्गो, मूलदेवो रायप्पहे अइसन्निकिट्ठं नाऊण चच्चरासन्नंतरितो ठितो, चोरो तं सिवलिंगं एस पुरिसोत्ति काउं कंकग्गेण असिणा दुहा काऊण पडिनियत्तो, गतो भूमिघरं, तत्थ वसिऊण पहायाए रयणीए तओ निग्गंतूण गतो बीहिं, अंतरावणे तुन्नागस्स करेति, रायणा पुरिसेहि सद्दावितो,

तेन चिंतियं जहा सो पुरिसो नूनं न मारितो, अवस्सं च सो एस राया भविस्सइत्ति, तेहिं पुरिसेहिं आनितो, रायणा अब्भुट्ठाणेण पूइतो, आसणे निवेसावितो, स बहुं च पियं आभासिउं संलत्तो-मम भगिनीं देहित्ति, तेन दिन्ना, विवाहिया, रायणा भोगा य से संपदत्ता, कइसुवि दिणेसु गएसु रायणा मंडितो भणिओ-दव्वेण कज्जंति, तेन सुबहुं दव्वजायं दिन्नं, रायणा संपूइतो, अन्ना पुनो मग्गितो पुनोऽवि दिन्नं, तस्स य चोरस्स अतीव सक्कारसम्माणं पउंजंति, एएण पगारेण सव्वं दव्वं दवाविंतो, भगिणी से पुच्छति, ताए भण्णति इत्तियं दिन्नं, तओ पुव्वावेइयलक्खाणुसारेण सव्वं दवावेऊणं मंडितो सूलाए आरोवितो ॥ दृष्टान्तानुवाद-पूर्वकोऽयमिहोपनयः-यथाऽयमकार्यकार्यपि मण्डिको यावल्लाभं मूलदेवनृपतिना धारितः तथा धर्मार्थिनाऽपि संयमोपहतिहेतुकमपि जीवितं निर्जरालाभमभिलषता तल्लाभं यावद्धार्यमिति, न च तद्धारणे संयमोपरोध एव, यथाऽऽगमं हि प्रवृत्तस्य तत्तदुपष्टम्भकमेवेति भावनीयम्, इत्यलं प्रसङ्गेनेति सूत्रार्थः ॥ सम्प्रति यदुक्तं 'जीवितं बृंहयित्वा मलापध्वंसी स्यादि'ति तत्किं स्वान्न्यत एव उता यथेत्याह-

मू. (१२३) छंदोनिरोहेण उवेति मुक्खं, आसे जहा सिक्खियवम्मधारी।
पुव्वाइ वासाइ चरऽप्पमत्तो, तम्हा पुनी खिप्पमुवेति मुक्खं ॥

वृ. छन्दो-वशस्तस्य निरोधः छन्दोनिरोधः-स्वच्छन्दतानिषेधः तेन 'उपैति' उपयाति 'मोक्षं' मुक्तिं, किं मुक्तं भवति ?-गुरुपरतन्त्रतया स्वाग्रहाग्रहयोगितां विना तत्र प्रवर्त्तमानोऽपि संक्लेशविकल इति न कर्म्मबन्धभाक्, किन्त्वविकलचरणतया तन्निर्जरणमेवाप्नोति, अप्रवर्त्तमानोऽपि चाहारादिष्वाग्रहग्रहाकुलितचेताः 'छद्दुमदसमे'त्यादिवचनादनन्तसंसारिताद्यनर्थभागेव भवति, तत्सर्वथा तत्परतन्त्रेणैव मुमुक्षुणा भाव्यं, तस्यैव सम्यग्ज्ञानादिसकलकल्याणहेतुत्वाद्

"नाणस्स होइ भागी थिरयरतो दंसणे चरित्ते य।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥"

यद्वा छन्दसा-गुर्वभिप्रायेण निरोधः-आहारादिपरिहाररूपः छन्दोनिरोधः तेनैवोक्तन्यायतो मुक्त्यवाप्तिः, तत्तद्वस्तुविषयाभिलाषात्मिका इच्छा वा छन्दः तन्निरोधेन मुक्तिः, तस्या एव तद्विबन्धकत्वात्, तथा च लौकिका अप्याहुः-

"श्लोकार्धेन हि तद्वक्ष्ये, यदुक्तं ग्रन्थकोटिभिः।
तृष्णा च सं(चेत्सं) परित्यक्ता, प्राप्तं च परमं पदम् ॥"

अथवा छन्दो वेद आगम इत्यनर्थान्तरं, ततः छन्दसा 'आणाए च्चिय चरण'मित्यादिना निरोधः-इन्द्रियादिनिग्रहात्मकः छन्दोनिरोधः तेनोपैति मोक्षं, न तु सर्वथा जीवितं प्रत्यनपेक्षतया, तथा च समयविदः-

"सव्वत्थ संजमं संजमातो अप्पाणमेव रक्खेज्जा।
मुच्चइ अइवायातो पुणो ऽवि सोही न याविरती॥"

अत्रोदाहरणमाह-अश्वो यथा 'शिक्षितो' वल्गनप्लवनधावनादिशिक्षां ग्राहितो वृणोति-आच्छादयति शरीरकमिति वर्म्म-अश्वतनुत्राणं तद्धरणशीलो वर्म्मधारी, शिक्षितश्चासौ वर्म्मधारी च शिक्षितवर्म्मधारी, अनेन शिक्षकतन्त्रतया ऽस्य स्वान्त्र्यापोहमाह, ततो ऽयमर्थः-यथा ऽश्वः स्वान्त्र्यविरहात्प्रवर्तमानः समरशिरसि न वैरिभिरुपहन्यत इति तन्मुक्तिमाप्नोति, स्वतन्त्रस्तु प्रथममशिक्षितो रणमवाप्तस्तैरुपहन्यते, अत्र च सम्प्रदायः-

एगेन रण्णा दोण्हवि कुलपुत्ताणं दो आसा दिन्ना सिक्खावणपोसणत्थं, तत्थेगो कालोचिएण जवसोगासणेणं संरक्खमाणो धावियलालियवग्गियाईयातो कलातो सिक्खावेइ, बीओ को एयस्स इट्ठजवसजोगासणं दाहिइत्ति घरेट्ठ वाहेइ न तु सिक्खावेइ, सेसं अप्पणा भुंजति। संगामकाले उवट्ठिए ते रण्णा वुत्ता-तेसु चेवास्सेसु आरोढुं झत्ति आगच्छह, संपत्ता, भणिया य राइणा-पविसह संगामं, तत्थ नट्ठमोऽसिसिक्खापुण्णतणओ गोभूमजंतगजुत्त इव तत्थेव भमिउमाढत्तो, तं च पउ उवलक्खेउं हयसारहि काऊण गृहीतवन्तः।

दृष्टान्तानुवादपूर्वकोऽयमुपनयः-यथाऽसावश्वः, तथा धर्मार्थ्यपि स्वातन्त्र्यविरहितो मुक्तिमवाप्नोति, अत एव च 'पूर्वाणि' उक्तपरिमाणानि 'वर्षाणि' वत्सराणि, कालात्यन्तसंयोगे द्वितीया, किमित्याह-'चर' इति सततमागमक्रियामासेवस्व, कथम् ?-'अप्रमत्तः' गुरुपारतन्त्र्यापहारिप्रमादपरिहर्ता, 'तत्थ'त्ति तस्मात् अप्रमादचरणादेव, मन्यते जानाति जीवादिनीति मुनिः-तपस्वी 'क्षिप्रं' शीघ्रम् उपैति मोक्षं, ननु छन्दोनिरोधोऽपि तत्त्वतो ऽप्रमादात्मक एवेति कथं न पुनरुक्तदोषः ?, उच्यते, अप्रमाद एवादरः कार्य इति ख्यापनार्थत्वादध्ययनार्थोज्जीवनार्थत्वाच्चास्य न पौनरुक्त्यमिति भावनीयं, पूर्वाणि वर्षाणीति च एतावदायुषामेव चारित्रपरिणतिरिति दर्शनार्थमुक्तमिति सूत्रार्थः॥ ननु यदि छन्दोनिरोधेन मुक्तिः, अयमन्त्यकाल एव तर्हि विधीयतामित्याहशङ्कयाह, यद्वा यदि पश्चान्मलापध्वंसी स्यात् तदैव छन्दोनिरोधादिकमपि तद्धेतुभूतमस्त्वत आह-

मू. (१२४) स पुव्वमेवं न लभेज्ज पच्छा, एसोवमा सासयवाइयाणं।
विसीदति सिढिले आउयंमि, कालोवणीए सरीरस्स भेए॥

वृ. 'स' इति यत्तदोर्नित्याभिसम्बन्धात् यः प्रथममेवाप्रमत्ततया भावितमतिर्न भवति स तदात्मकं छन्दोनिरोधं 'पुव्वमेवं'ति एवंशब्दस्यात्रोपमार्थत्वात्पूर्वमिवान्त्यकालात् मलापध्वंससमयाद्वा अभावितमतित्वात्, 'न लभेत्' न प्राप्नुयात्, सम्भावने लिङ्, ततश्च लाभसम्भावनाऽपि न समस्ति, किं पुनस्तल्लाभ इति, 'पश्चात्' अन्त्यकाले मलापध्वंससमये वा, 'एसोवम'त्ति एषा-अनन्तरमभिहितस्वरूपा उप-सामीप्येन मीयते-परिच्छिद्यते स्वयंप्रसिद्धया अपरमप्रसिद्धं वस्त्वनयेत्युपमा, केषां ?-शाश्वता इव वदितुं शीलमेषामिति शाश्वतवादिनः उष्ट्रकोशिवत् कर्त्तर्युपमाने इति निनिः, तेषां शाश्वतवादिनाम्-आत्मनि मृत्युनियतकालभाविनपश्यताम्, इदमिहाकूतं, यो हि छन्दोनिरोधमुत्तरकालमेव करिष्यामीति वक्ति सोऽवश्यं शाश्वतवादी, स

चैवं प्रज्ञाप्यते-यथा भद्र! इदानीं भवतस्तत्कालात्पूर्वमसावुक्तहेतुतो न समस्ति, तथोत्तरकालमप्यसौ प्रमादिनस्तव न भवितेति, यदि वा एषा उपमेति-उपेत्युपयोगपूर्वकं मेति ज्ञानमुपमा सम्प्रधारणा यदुत पश्चाद्धर्मं करिष्यामः इति शाश्वतवादिनां-निरुपक्रमायुषां, ये निरुपक्रमायुष्कतया शाश्वतमिवात्मानं मन्यन्ते तेषां युज्येतापि, न तु जलबुद्बुदसमानायुषां, तथा चासावुत्तरकालमपि छन्दोनिरोधमनाप्नुवन 'विषीदति' कथमहमकृतसुकृतः सम्प्रत्यनर्वाक्पारं भवाम्भोधिं भ्राम्यान् भविष्यामीत्येवमात्मकं वैक्लव्यमनुभवति, कदा?-शिथिलयति आत्मप्रदेशान् मुञ्चति 'आयुषि' मनुष्यभवोपग्राहिण्यायुः कर्म्मणि, 'कालोवणीय'त्ति कालेन-मृत्युना स्वस्थितिक्षयलक्षणेन वा समयेनोपनीतः-उपढौकितः तस्मिन्, क्व? इत्याह-'शरीरस्य' औदारिककायात्मकस्य 'भेदे' सर्वपरिशाटतः पृथग्भावे, तदिदमैदम्पर्यम्-भावित एव न प्रमादवदिभर्भाव्यं, तथा चाह-

"गमनं किमद्य किं श्वः कदाऽपि वा सर्वथा ध्रुवं क्वापि?।
इति जानन्नपि मूढस्तथापि मोहात्सुखं शेते॥"

इति सूत्रार्थः॥ किं पुनः पूर्वमिव पश्चादपि छन्दोनिरोधं न लभत इत्याह-

मू.(१२५) खिप्पं न सक्केइ विवेगमेउं, तम्हा समुट्ठाय पहाय कामे।
समेच्च लोगं समता महेसी, आयाणरक्खी चरमप्पमत्तो॥

वृ. 'क्षिप्रं' तत्क्षण एव 'न शक्नोति' न समर्थो भवति, किं कर्त्तुम्?-'एतुं' गन्तुं प्राप्तुमितियावत्, कम्?-'विवेकं' द्रव्यतो बहिःसङ्गपरित्यागरूपं भावतस्तु कषायपरिहारात्मकं, न ह्यकृतपरिकर्म्मा झगिति तत्परित्यागं कर्त्तुमलम्, अत्रोदाहरणं ब्राह्मणी-

एगो मरुतो परदेसं गंतूण साहापारतो होऊण सविसयमागतो, तस्साऽन्नेण मरुतेण स्वङ्गपलालितोकाउं दारिकादत्ता, सो य लोए दक्खिण्णातो लहति, परे विभवे वड्ढति तेन सीसे भारियाए सुबहुं अलंकारं कारियं, सा निच्चमंडिया अच्छइ, तेन भण्णइ-एस पच्चंतगामो, ता तुमं एयाणि आभरणगाणि तिहिपव्वणीसु आविधाहि, कहिंचोग उवगच्छेज्जा तो सुहं गोविज्जंति, सा भणइ-अहं ताए वेलाए सिग्घभावे अवनेस्संति। अन्नया तत्थ चोरा पडिया, तमेव निच्चमंडियागिहं अनुपविट्ठा, सा तेहिं सालंकिया गहिया, सा य पणीयभोयणत्ता मंसोवचित्तगणीपाया न सक्केइ कडगाईणि अवणेउं, ततो चोरेहिं तीसे हत्थे छेत्तूण अवनीया, गेण्हउं च निग्गया।

एवमन्योऽपि प्रागकृतपरिकर्म्मा न तत्काल एव विवेकमेतुं शक्नोति, मलापध्वंसस्तं तथा सति दुरुपास्त एवेति, न च मरुदेव्युदाहरणं तत्राप्यभिधेयम्, आश्चर्यरूपत्वादस्य, न ह्येवं तीव्रभावा बहवः सम्भवन्ति, यत एवं तस्मात् 'सम्' इति सम्यक्प्रवृत्त्या 'उत्थाये'ति च पश्चाच्छन्दोनिरोत्स्याम इत्यालस्यत्यागेनोद्यमं विधाय, तथा 'पहाय कामे'त्ति प्रकर्षेण-मनसाऽपि तदचिन्तनात्मके 'हित्वा' त्यक्त्वा कामान् इच्छामदनात्मकान् 'समेत्य' सम्यग्ज्ञात्वा 'लोकं' समस्तप्राणिसमूहं, कया?-'समतया' समशत्रुमित्रतया क्वचिदकृतद्विष्टतयेतियावत्, तथा च महर्षिः, सन् महः-एकान्तोत्सवरूपत्वान्मोक्षस्तमिच्छतीत्येवंशीलो महैषी वा, किमुक्तं भवति?-विषयाभिलाषविगमान्निर्निदानः सन् आत्मानं रक्षत्यपायेभ्यः कुगतिगमनादिभ्य इत्येवंशील आत्मरक्षी, यद्वाऽऽदीयते-स्वीक्रियते आत्महितमनेनेत्यादानः-संयमः तद्रक्षी 'चरमप्पमत्तो'त्ति

मकारोऽलाक्षणिकः, ततश्चाप्रमत्तः-प्रमादरहितः, इह च-प्रमादपरिहारपरिहार्योरैहिकमुदाहरणं वणिग्महिला, तत्र च सम्प्रदायः-

एगा वाणियमहिला पउत्थपतिया सगीरसुस्सूसापरा दासभयगकम्मकरे निज्जिज्जभियगे न नियोजयति, न य तेसिं कालोवयन्नं जहिच्छं आहारं भत्तिं वा देति, ते सव्वे नट्ठा, कम्मंतपरिहानीए विभवपरिहानी, आगतो वाणियओ एवंविहं परिसक्कण पच्छा तेन निच्छूढा। अन्ने तु पुक्खलेणं सुंकेणं वेरेति, लद्धा य तेन, तेन तीसे नियगा भण्णंति-जइ अप्पाणं रक्खइ ता परिनेमित्ति, ताए य उमुणियपरमत्थाए दुग्गयकन्नगाए सोउं नियगा भणंति रक्खामि(क्खिहिइ)-अप्पगं, सा तेन विवाहिया, गतो वाणिज्जेणं, मावि दासभयगकम्मकरातीणं संदेसं दाउं तेसिं पुव्वाण्हिककालके भोयणं देइ महुरगाहि च वायाहि उच्छाहेइ, भइं च तेसिं अकालपरिहीनं देइ, न य नियगसरीरसुस्सूसापरा, एवमप्पाणं रक्खंतीए भत्ता उवागओ, सो एवंविहं परिसक्कण तुट्ठो, तेन सव्वस्सामिणी कया। इत्थं तावदिहैव गुणायाप्रमादो दोषाय च प्रमादः आस्तामन्यजन्मनोत्यभिप्रायेणात्रैवैहिकोदाहरणाभिधानमिति परिभावनीयमिति सूत्रार्थः॥

प्रमादमूलं च रागद्वेषाविति सोपायं तत्परिहारमाह-

मू. (१२६) *मुहुं मुहुं मोहगुणे जयंतं, अनेगरूवा समणं चरंतं।*
फासा फुसंती असमंजसं च, न तेसु भिक्खू मनसा पउस्से॥

वृ. 'मुहुर्मुहुः' वारं वारं, सततप्रवृत्त्युपलक्षणमेतत्, मोहयति-जानानमपि जन्तुमाकुलयति प्रवर्त्तयति चान्यथेहेति मोहः तस्य गुणाः मोहगुणाः-तदुपकारिणः शब्दादयः, तान् 'जयंतं' अभिभवन्तं, किमुक्तं भवति?-अविच्छेदतस्तज्जयप्रवृत्तं यद्वा कथञ्चिन्मोहनीयात्यन्तोदयतः एकदा तैः पराजितमपि पुनः पुनस्तज्जयं प्रति प्रवर्त्तमानं न तु तत एव विमुक्तमंयमोद्योगम्, 'अनेकरूपाः' अनेकमिति-अनेकविधं परुषविषमसंस्थानादिभेदं रूपं-स्वरूपमेषामिति अनेकरूपाः, श्रमणं चरन्तं प्राग्वत्, 'फास'त्ति स्पृशन्ति स्वानि स्वानीन्द्रियाणि गृह्यमाणतया इति स्पर्शाः-शब्दादयस्ते 'स्पृशन्ति' गृह्यमाणतयैव सम्बन्धन्ति, 'असमंजसम्' अननुकूलमिति क्रियाविशेषणमेतत्, चशब्दोऽवधारणे, असमञ्जसमेव, अथवा स्पर्शनविषयाः-स्पर्शाः स्पृशन्ति, स्पर्शोपादानं चास्यैव दुर्जयत्वाद्यापित्वाच्च, न 'तेषु' स्पर्शेषु 'भिक्षुः' मुनिः, मनसा उपलक्षणत्वाच्च वाचा कायेन च, यद्वाऽपिशब्दस्य लुप्तनिर्दिष्टत्वान्मनसाऽपि आस्तां वाचा कायेन वा, 'पदूसे'त्ति प्रदूष्येत् प्रदिध्याद्वा, किमुक्तं भवति?-कर्कशसंस्तारकादिस्पर्शादौ हन्तोपतापिता वयमेतेयेति न चिन्तयेत् नैव वा वदेत्परिहरेद्वा तमिति॥

मू. (१२७) *मंदा य फासा बहुलोभणिज्जा, तहप्पगारेसु मणं न कुज्जा।*
रक्खेज्ज कोहं विनएज्ज मानं, मायं न सेवेज्ज पहिज्ज लोहं॥

वृ. 'मंदा ये'ति सूत्रं, तथा मन्दायन्तीति मन्दाः-हिताहितविवेकिनमपि जनमन्यतां नयन्तीतिकृत्वा, चशब्दः पूर्वापेक्षया समुच्चये, स्पर्शाः प्राग्वच्छब्दादयः, बहून् लोभयन्ति-विमोहयन्तीति बहुलोभनीयाः 'अन्यत्रापी'ति वचनात् कर्त्तव्यनीयः, अनेनात्याक्षेपकत्वमुक्तं, 'तहप्पगारेसु'त्ति अपेक्ष्यमाणत्वात्तथाप्रकारेष्वतिबहुलोभनीयेष्वपि मृदुस्पर्शमधुरसादिषु 'मनः' चित्तं न कुर्यात्, अथवा धातूनामनेकार्थत्वान्न निवेशयेत्, यद्वा सङ्कल्पात्मकमेव मनः,

तलं मन इति सङ्कल्पमपि 'न कुर्यात्' न विदध्याद् आस्तां तत्प्रवर्तनमिति, अथवा मन्दबुद्धित्वान्मन्दगमनत्वाद्वा मन्दाः - स्त्रियः ता एव स्पर्शप्रधानत्वात् स्पर्शाः, ततश्च मन्दाश्च स्पर्शाः, बहूनां कामिनां लोभनीयाः - गृद्धिजनका बहुलोभनीयाः, यास्वत्सु 'तहप्पगारासु' त्ति निष्प्रकम्पत्वेन, तथाप्रकारासु बहुलोभनीयासु मनोऽपि न कुर्याद्, इह च स्त्रीणामेव बहुतरापायहेतुत्वादित्थमुच्यते, तथा चाह-

"स्पर्शेन्द्रियप्रसक्ताश्च, बलवन्तो मदोत्कटाः ।
हस्तिबन्धकिसंरक्ता, बध्यन्ते मत्तवारणाः ॥" इति

एवं च पूर्वसूत्रेण द्वेषस्य परिहार उक्तः, अनेन च रागस्य, स तु कथं भवतीत्यत आह- 'रक्षयेत्' निवारयेत्, कम्?-क्रोधम्' अप्रीतिलक्षणं, 'विनयेत्' अपनयेत् 'मानम्' अहङ्कारात्मकं, 'मायां' परवञ्चनबुद्धिरूपां न कुर्यात्, 'प्रजह्यात्' परित्यजेत् 'लोभम्' अभिष्वङ्गस्वभावं, तथा च क्रोधमानयोर्द्वेषात्मकत्वान्मायालोभयोश्च रागरूपत्वान्निग्रह एव तत्परिहृतिरिति भावनीयम् । अथवा स्पर्शपरिहारमभिदधता चतुर्थव्रतमुक्तं, तच्च 'अबंभचेरं घोरं पमायं दुरहिट्ठमं'त्ति वचनान्महाप्रमादरूपस्याब्रह्मणो निरोधकृदिति, तदभिधानाद्धिंसादिनिरोधोऽप्युक्त एवेति, अनेनार्थतो मूलगुणाभिधानं, रक्षेत् क्रोधमित्यादिना च पिण्डादिकमयच्छते यच्छतो वा न कषायवशगो भवेदित्युत्तरगुणोक्तिरिति सूत्रद्वयार्थः ॥ सम्प्रति यदुक्तं- 'तम्हा समुट्ठाय पहाय कामे' इत्यादि, तत्कदाचिच्चरकादिष्वपि भवेत् अत आह - यद्येतावता चारित्रशुद्धिरुक्ता, सा च न सम्यक्त्वविशुद्धिमपहायातस्तदर्शमिदमाह-

मू. (१२८) जे संखया तुच्छपरप्पवादी, ते पेज्जदोसानुगया परज्झा ।
एए अहम्मुत्ति दुगुंछमाणो, कंखे गुणे जाव सरीरभेए ॥ त्तिबेमि

वृ. 'ये' इति अनिर्दिष्टस्वरूपाः, संस्कृता इति न तात्त्विकशुद्धिमन्तः किन्तूपचरितवृत्तयः, यद्वा संस्कृतागमप्ररूपकत्वेन संस्कृताः, यथा सौगताः, ते हि स्वागमे निरन्वयोच्छेदमभिधाय पुनस्तेनैव निर्वाहमपश्यन्तः परमार्थतोऽन्वयि द्रव्यरूपमेव सन्तानमुपकल्पयांबभूवुः, साङ्ख्याश्चैकान्तनित्यतामुक्त्वा तत्त्वतः परिणामरूपां चैव पुनरविर्भावतिरोभावावुक्तवन्तो, यथा वा-

"उक्तानि प्रतिषिद्धानि, पुनः सम्भावितानी च ।
सापेक्षनिरपेक्षाणि, ऋषिवाक्यान्यनेकशः ॥"

इतिवचनाद्वचनानिषेधनसम्भवादिभिरुपस्कृतस्मृत्यादिशास्त्रा मन्वादयः, अत एव 'तुच्छ'त्ति तुच्छा यदृच्छाभिधायितया निःसाराः 'परप्पवाइ'त्ति परे च ते स्वतीर्थकल्पव्यतिरिक्ततया प्रवादिनश्चपरप्रवादिनः, ते किमित्याह- 'पेज्जदोसाणुगया' प्रेमद्वेषाभ्यामनुगताः प्रेमद्वेषानुगताः, तथाहि- सर्वथा संवादिनि भगवद्वचसि निरन्वयोच्छेदैकान्तनित्यत्वादिकल्पनं वचननिषेधनसम्भावनादि वा न रागद्वेषाभ्यां विनेति भावनीयम्, अत एव च 'परज्झ'त्ति देशीपरत्वात्परवशा रागद्वेषग्रहग्रस्तमानसतया न ते स्वतन्त्राः, यदि त एवंविधास्ततः किमित्याह- 'एते' इति अर्हन्मतबाह्याः, अधर्महेतुत्वादधर्मः, 'इती'त्यमुनोल्लेखेन 'दुगुंछमाणो'त्ति जुगुप्समानः उन्मार्गानुयायिनोऽमी इति तत्स्वरूपमवधारयन्, न तु निन्दन्, निन्दायाः सर्वत्र निषेधात्, तदेवंविधश्च किं कुर्यादित्याह- 'काङ्क्षेत्' अभिलषेत् 'गुणान्' सम्यग्दर्शनचारित्रात्मकान् भगवदागमाभिहितान्, किं

नियतकालमेवौतान्यथेत्याह-यावच्छरीरात् औदारिकात्पञ्चप्रकाराद्वा भेदः-पृथग्भावः शरीरभेदो, मरणं विमुक्तिर्वेतियावत्, अनेनैवं समुत्थानं कामप्रहाणादि च तत्त्वतः, अन्यत्र तु संवृत्तिमदित्युक्तम्, एवं च काङ्क्षात्मकसम्यक्त्वातिचारपरिहाराभिधानतः समकत्वशुद्धिर्वेति सूत्रार्थः ॥ इति परिसमाप्तौ, ब्रवीमीति पूर्ववत्, उक्तोऽनुगमः, सम्प्रति नयाः, ते च पूर्ववत् ॥

अध्ययनं - ४ समाप्तम् ।

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे तृतीयं अध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं-५ अकाममरणं

वृ. ॥ उक्तं चतुर्थमध्ययनं, साम्प्रतं पञ्चममारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने-'काङ्क्षेत् गुणान् यावच्छरीरस्य भेद' इत्यभिदधता मरणं यावदप्रमादोऽनुवर्णितः, ततो मरणकालेऽप्यप्रमादो विधेयः, स च मरणविभागपरिज्ञानत एव भवति, ततो हि बालमरणादि हेयं हीयते पण्डितमरणादि चोपादेयमुपादीयते, तथा च तत्त्वतोऽप्रमत्तता जायते, इत्यनेन, सम्बन्धेनाऽऽयातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयमुपवर्ण्यं तावद्यावन्नामनिष्पन्ननिक्षेपे 'अकाममरणीयम्' इति नाम, तत्र च काममरणप्रतिपक्षोऽकाममरणम्, अतः कामानां मरणस्य च निक्षेपः कार्यः तत्र काममरणयोर्निक्षेपं प्रतिपादयितुमाह निर्युक्तिकृत्-

नि.[२०८] कामाण उ निक्खेवो चउव्विहो छव्विहो य मरणस्स ।
कामा पुव्वुद्दिट्ठा पगयमिहं पेयकामेहिं ॥

वृ. काम्यन्त इति कामास्तेषां, तुः पूरणे निक्षेपश्चतुर्विधः, षड्विधश्च मरणस्य, भवतीत्युभयत्र गम्यते, तत्र कामाः पूर्वोद्दिष्टाः पूर्वं-श्रामण्यपूर्वकनाम्नि दशवैकालिकद्वितीयाध्ययने उद्दिष्टाः-कथिताः, तत्र तेषामनेकधा वर्णनात्, यैरत्र प्रकृतं तान् दर्शयितुमाह-'प्रकृतम्' अधिकृतम्, 'अभिप्रेतकामैः' इच्छाकामैरिति गाथार्थः ॥ षड्विधं मरणमिति यदुक्तं, तत्र नामस्थापने प्रतीते एवेत्यनादृत्य शेषचतुष्टयमाह । अन्ये त्वत्र नामादिषड्विधनिक्षेपोद्देशाभिधायिनीमपि गाथामधीयते, तत्र नामस्थापने प्राग्वत्, द्रव्यादिचतुष्टयाभिव्यञ्जनामर्थमाह

नि.[२०९] दव्वमरणं कुसुंभाइएसु भावि आउक्खओ मुणेयव्वो ।
ओहे भवतब्भविए मनुस्सभविएण अहिगारो ॥

वृ. द्रव्यस्य मरणं द्रव्यमरणं, कुसुम्भादिकेषु, आदिशब्दादिन्धनादिपरिग्रहः, यद्यस्य स्वकार्यसाधनंप्रति समर्थं रूपं तत्तस्य जीवितमिति रूढं, तदभावस्तु मरणं, ततश्च कुसुम्भादे रञ्जनादि स्वकार्यसामर्थ्यं जीवितं, तदभावस्तु मरणं, तथा च लोके मृतं कुसुम्भकमरञ्जकं, मृतमन्त्रव्यञ्जनमित्याद्युपदिश्यते, क्षेत्रमरणं तु यस्मिन् क्षेत्रे मरणम्-इङ्गिनीमरणादि वर्ण्यते क्रियते वा, यदा वा तस्य शस्याद्युत्पत्तिक्षमत्वमुपहन्यते तदा तत् क्षेत्रमरणं, कालमरणं यस्मिन् काले मरणमुपवर्ण्यते क्रियते वा, कालस्य वा ग्रहोपरागादिना वृष्ट्यादिस्वकार्याकरणम्, एते च सुगमत्वान्नोक्ते, तत्त्वतो द्रव्यमरणाभिन्नत्वाच्च निर्युक्तिकृता पृथग् नोक्ते, यत्तु निक्षेपगाथायां षड्विध इतिवचनात् अनयोर्भेदनाभिधानं तद्विवक्षितवस्तुवैशिष्ट्यदर्शकं, न हि ताभ्यां विना नियत-

देशत्वादिकं वस्तुनो वैशिष्ट्यमाख्यातुं शक्यमिति, 'भावे' भावविषये निक्षेपे आयुषो-जीवितस्य क्षयो ध्वंसः आयुःक्षयो 'मुणितव्वो' ज्ञातव्यो, मरणमित्युपस्कारः, तदपि च त्रिविधम्-'ओहे'त्ति ओघमरणं-सामान्यतः सर्वप्राणिनां प्राणपरित्यागात्मकं भवति, भवमरणं-यन्नारकादेर्नरकादिभवविषयतया विवक्षितं, 'तब्भविय'त्ति तद्भविकमरणं यस्मिन्नेव मनुष्यभवादौ मृतः पुनस्तस्मिन्नेवोत्पद्य यन्म्रियते इति व्याख्यानिकाभिप्रायो, वृद्धास्तु व्याचक्षते-'तं भावमरणं दुविहं-ओघमरणं तब्भवमरणं च, तथा तद्भवमरणस्वरूपं च 'जो जम्मि भवग्गहणे मरइ'। तत्र च 'ओहे तब्भमरणे' इति पाठो लक्ष्यते। इह चैषां येनाधिकारस्तमाह-'मनुस्सभविएणं'ति मनुष्यभवभाविना भवमरणान्तर्वर्तिना मनुष्यभविकमरणेनाधिकारः-प्रकृतम्, इति गाथार्थः सम्प्रति विस्तरतो मरणवक्तव्यतार्विषयं द्वारगाथाद्वयमाह-

नि.[२१०] मरणविभत्तिरूवण अनुभावो चेव तह पएसग्गं।
कइ मरइ एगसमयं ? कइखुत्तो वावि इक्किक्के ?॥

नि.[२११] मरणंमि इक्कमिक्के कइभागो मरइ सव्वजीवाणं ?।
अनुसमय संतरं वा इक्किक्कं किच्चिरं कालं ?॥

वृ.तत्र मरणस्य विभक्तिः-विभागस्तस्य प्ररूपणा-प्रदर्शना मरणविभक्तिप्ररूपणा, कार्येति शेषः, अनुभागश्च-रसः, स च तद्विषयस्यायुःकर्मणः, तत्रैव तत्संभवात्, मरणे हि तदभावात्मनि कथं तत्सम्भव इति भावनीयम्, एवेति पूरणे, तथा प्रदेशानां-तद्विषयायुःकर्मपुद्गलात्मकानाम् अग्गं-परिमाणं प्रदेशाग्रं, वाच्यमिति गम्यते, 'कति' कियन्ति मरणानी, अङ्गीकृत्य इति शेषः, म्रियते-प्राणांस्त्यजति, जन्तुरिति गम्यते, 'एगसमयं'ति सुब्व्यत्ययात् एकस्मिन् समये 'कइखुत्तो'त्ति कतिकृत्वः कियतो वारान्, 'वा' समुच्चये, अपिः पूरणे, 'एक्केक्कंति' एकैकस्मिन् वक्ष्यमाणभेदे मरणे म्रियते इति योज्यम्, 'मरणे' वक्ष्यमाणभेद एवैकैकस्मिन् 'कतिभागो'त्ति कतिसङ्ख्यो भागो म्रियते, 'सर्वजीवानाम्' अशेषजीवानाम् 'अनुसमयं'ति प्रतिसमयं निरन्तरमितियावत्, अन्तरं-व्यवधानं सहान्तरेण वर्त्तत इति सान्तरं, वा विकल्पे, किमुक्तं भवति ?-एषु कतरन्निरन्तरं सान्तरं वा ?, तथैकैकं 'कियच्चिरं' कियत्परिमाणं कालं सम्भवतीति गाथाद्वयाक्षरार्थः॥ भावार्थं तु स्वत एव वक्ष्यति निर्युक्तिकारः-तत्र च 'यथोद्देशं निर्देश' इति न्यायतः प्रथमं द्वारमाश्रित्याह-

नि.[२१२] आवीचि ओहि अंतिय वलायमरणं वसट्टमरणं च।
अंतोसल्लं तब्भव बालं तह पंडियं मीसं॥

नि.[२१३] छउमत्थमरण केवलि वेहाणस गिद्धपिट्ठमरणं च।
मरणं भत्तपरिन्ना इंगिनी पाओवगमणं च॥

वृ. इह च मरणशब्दस्य प्रत्येकमभिसम्बन्धात् आवीचिमरणम् १ अवधिकरणम् २ 'अन्तिय'त्ति आर्षत्वादत्यन्तमरणं ३ 'वलायमरणं'ति तत एव वलन्मरणं ४ वशार्त्तमरणं च ५ अन्तःशल्यमरणं ६ तद्भवमरणं ७ बालमरणं ८ तथा पण्डितमरणं ९ मिश्रमरणं १० छद्मस्थमरणं ११ केवलिमरणं १२ 'वेहानसं'ति तत एव वैहायसमरणं १३ गृध्रपृष्ठमरणं १४ 'मरणं भत्तपरिण्ण'त्ति भक्तपरिज्ञामरणम् १५ इङ्गिनीमरणं १६ पादपोपगमनमरणं १७ चेतिगाथाद्वयार्थः॥

सम्प्रत्यतिबहुभेददर्शनान्मा भूत् कस्यचिदश्रद्धानमिति सम्प्रदायगर्भं निगमनमाह-

नि.[२१४] सत्तरसविहाणाइं मरणं गुरुणो भणंति गुणकालिआ।
तेसिं नामविभत्तिं वुच्छामि अहानुपुव्वीए ॥

वृ. सप्तदश-सप्तदशसङ्ख्यानि विधीयन्ते- विशेषाभिव्यक्तये क्रियन्त इति विधानानि-भेदाः 'मरणे' मरणविषयाणि 'गुरवः' पूज्यास्तीर्थकृद्गणभृदादयो 'भणन्ति' प्रतिपादयन्ति, गुणैः-सम्यग्दर्शनज्ञानादिभिः कलितायुक्ता गुणकलिताः, न तु वयमेव इत्याकूतं, वक्ष्यमाण-ग्रन्थसम्बन्धनार्थमाह-'तेषां' मरणानां नाम्नाम्-अभिधानानामनन्तरमुपदर्शितानां विभक्तिः-अर्थतो विभागो नामविभक्तिस्तां 'वक्ष्ये' अभिधास्ये, 'अथे'त्यनन्तरमेव आनुपूर्व्या-क्रमेणेति-

नि.[२१५] अनुसमयनिरंतरमवीइसन्नियं तं भणंति पंचविहं।
दव्वे खित्ते काले भवे य भावे य संसारे ॥

वृ. 'अनुसमयं' समयमाश्रित्य, इदं च व्यवहितसमयाश्रयणतोऽपीति मा भूदव्याप्तिरत आह-निरन्तरं, न मान्तरम्, अन्तरालासम्भवात्, किं तदेवंविधम् ?-'अवीइसंनियं'ति प्राकृतत्वादा-समन्ताद्वीप्सया इव वीचयः प्रतिसमयमनुभानायुषोऽपरायुर्दलिकोदयात् पूर्वपूर्वादलिकविच्युतिलक्षणाऽवस्था यस्मिंस्तदाऽवीचि, ततश्च वीचीति संज्ञा संजाता अस्मिंस्तारकादित्वात् 'तदस्य सञ्जातं तारकादिभ्य इतजि' त्यनेनेत्यावीचिसंज्ञितम्, अथवा वीचिः-विच्छेदस्तदभावादवीचि तत्संज्ञितम्, उभयत्र प्रक्रमान्मरणं, यद्वा संज्ञितशब्दः प्रत्येकमभिसम्बध्यते, ततश्च अनुसमयसंज्ञितं-निरन्तरसंज्ञितम् अवीचिसंज्ञितमिति एकार्थिकान्येतानि, 'तत्' त्यावीचिमरणं 'भणन्ति' प्रतिपादयन्ति 'पञ्चविधं' पञ्चप्रकारं, गणधरादय इति गम्यते, अनेन च पारतन्त्र्यं द्योतयति, तदेवाह-

'दव्वे'त्ति द्रव्यावीचिमरणं 'खेत्ते'त्ति क्षेत्रावीचिमरणं 'काले'त्ति कालावीचिमरणं 'भवे य'त्ति भवावीचिमरणं च 'भावे य'त्ति भावावीचिमरणं च, संसार इत्याधारनिर्देशः, तत्रैव मरणस्य सम्भवात्, तत्र द्रव्यावीचिमरणं नाम यन्नारकतिर्यग्नामराणामुत्पत्तिसमयात् प्रभृति निजनिजायुः कर्मदलिकानामनुसमयमनुभवनाद्विघटनं, तच्च नारकादिभेदाच्चतुर्विधम्, एवं नरकादिगतिचातुर्विध्यापेक्षया तद्विषयं क्षेत्रमपि चतुर्धैव, ततस्तत्प्राधान्यापेक्षया क्षेत्रावीचिमरणमपि चतुर्धैव, 'काल'इति यथाऽऽयुष्ककालो गृह्यते, न त्वद्धाकालः, तस्य देवादिष्वसम्भवात्, स च देवायुष्ककालादिभेदाच्चतुर्विधः, ततस्तत्प्राधान्यापेक्षया कालावीचिमरणमपि चतुर्विधम्, एवं नरकादिचतुर्विधभवापेक्षया भवावीचिमरणमपि चतुर्धैव, तेषामेव च नारकादीनां चतुर्विधमायुःक्षयलक्षणं भावं प्राधान्येनापेक्ष्य भावावीचिमरणमपि चतुर्धैव वाच्यमिति गाथार्थः ॥

अधुनाऽवधिमरणमाह-

नि.[२१६-१] एमेव ओहिमरणं जानि मओ तानि चेव मरइ पुनो।

वृ. 'एवमेव' यथाऽऽवीचिमरणं द्रव्यक्षेत्रकालभवभावभेदतः पञ्चविधं, तथाऽवधिमरणमपीत्यर्थः। तत्स्वरूपमाह-यानि मृतः, सम्प्रतीति शेषः, तानि चैव 'मरइ पुणो'त्ति आपत्त्यात्तिङ्व्यत्ययेन मरिष्यति पुनः, किमुक्तं भवति-अवधिः-मर्यादा, ततश्च यानि नारकादिभवनिबन्धनतयाऽऽयुःकर्मदलिकान्यनुभूय म्रियते, यदि पुनस्तान्येवानुभूय मरिष्यति तदा तद्

द्रव्यावधिमरणं, सम्भवति हि गृहीतोज्झितानामपि कर्मदलिकानां पुनर्ग्रहणम्, परिणाम-वैचित्र्याद्, एवं क्षेत्रादिष्वपि भावनीयं। पश्चार्द्धेनाऽऽत्यन्तिकमरणमाह-

नि. [२१६-२] एमेव आइयंतियमरणं नवि मरइ ताइ पुनो ॥

वृ. 'एवमेव' अवधिमरणवदात्यन्तिकमरणमपि द्रव्यादिभेदतः पञ्चविधं, विशेषस्त्वयम्-'नामि मरइ ताइ पुनो'त्ति अपिशब्दस्यैवकारार्थत्वान्नैव तानि द्रव्यादीनि पुनर्म्रियते, इदमुक्तं भवति यानि नरकाद्यायुष्कतया कर्मदलिकान्यनुभूय म्रियते मृतो वा न पुनस्तान्यनुभूय मरिष्यति, एवं क्षेत्रादिष्वपि वाच्यं, त्रीण्यपि चामून्यवीच्यवध्यात्यन्तिकमरणानि प्रत्येकं पञ्चानां द्रव्यादीनां नारकादिगतिभेदेन चतुर्विधत्वाद्विंशतिभेदानीति गाथार्थः ॥ साम्प्रतं वलन्मरणमाह-

नि. [२१७] संजमजोगविसन्ना मरंति जे तं वलायमरणं तु।
इंदियविसयवसगया मरंति जे तं वसट्टं तु ॥

वृ. संयमयोगाः संयमव्यापारास्तैस्तेषु वा विषण्णाः संयमयोगविषण्णा अतिदुश्चरं तपश्चरणमाचरितुमक्षमाः व्रतं च मोक्तुमशक्नुवन्तः कथञ्चिदस्माकमितो मुक्तिरस्त्विति चिन्तयन्तो म्रियन्ते यत्तद्वलतां-संयमान्निवर्त्तमानानां मरणं वलन्मरणं, तुर्विशेषणे, भग्नव्रतपरिणतीनां वर्त्तनामेवैतदिति विशेषयति, अन्येषां हि संयमयोगानामेवासम्भवात् कथं तद्विषादः ? तदभावे च तदिति। पश्चार्द्धेन वशार्तमाह-इन्द्रियाणां-चक्षुरादीनां विषयाः-मनोज्ञरूपादय इन्द्रिय-विषयास्तद्वशं गताः-प्राप्ता इन्द्रियविषयवशगताः स्निग्धदीपकलिकाऽवलोकनाकुलितपतङ्गवत म्रियन्ते यत्तद्वशार्त्तमरणं, कथञ्चिद्द्रव्यपर्यायभेदादेवमुच्यते, एवं पूर्वत्रापि भावनीयं, तुशब्द एषामप्यध्यवसानभेदतो वैचित्र्यख्यापनार्थ इति गाथार्थः ॥ अन्तःशल्यमरणमाह-

नि. [२१८] लज्जाइ गारवेण य बहुस्सुयमएण वाऽवि दुच्चरिअं।
जे नं कहंति गुरूणं न हु ते आराहगा हुंति ॥

नि. [२१९] गारवपंकनिबुड्डा अइयारं जे परस्स न कहंति।
दंसणनाणचरित्ते ससल्लमरणं हवइ तेसिं ॥

वृ. तत्र 'लज्जया' अनुचितानुष्ठानसंवरणाऽऽत्मिकया 'गौरवेण च' सातर्द्धिरसगौरवात्मकेन, मा भूत्ममालोचनार्हमाचार्यमुपसर्पतस्तद्वन्दनादिना तदुक्ततपोऽनुष्ठानासेवनेन च ऋद्धिरससातागौरवसम्भवः इति, 'बहुश्रुतमदेन वा' बहुश्रुतोऽहं तत्कथमल्पश्रुतोऽयं मम शल्यमुद्धरिष्यति ?, कथं चाहमस्मै वन्दनादिकं दास्यामि ? अपभ्राजना हि इयं मम इत्यभिमानेन, अपिः पूरणे, ये गुरुकर्म्माणो 'न कथयन्ति' नालोचयन्ति, केषाम् ?, 'गुरुणाम्' आलोचनार्हाणामाचार्यादीनां, किं तद् ?-'दुश्चरितं' दुरनुष्ठितम् इति सम्बन्धः, 'न हु' नैव 'ते' अनन्तरमुक्तरूपा आराधयन्ति-अविकलतया निष्पादयन्ति सम्यग्दर्शनादीनि इत्याराधका भवन्ति, ततः किमित्याह-गौरवं पङ्क इव कालुष्यहेतुतया तस्मिन् निबुड्डा-इति प्राकृतत्वान्निमग्ना इव निमग्नाः तत्क्रोडीकृततया, लज्जामदयोरपि प्रागुपादाने यदिह गौरवस्यैवोपादानं तदस्यैवातिदुष्टताख्यापनार्थम्, 'अतिचारम्' अपराधं ये 'परस्य' आचार्यादेः न कथयन्ति, किंविषयम् ? इत्याह-'दर्शनज्ञानचारित्र' दर्शनज्ञानचारित्रविषयं, तत्र दर्शनविषयं शङ्कादि ज्ञानविषयं कालातिक्रमादि चारित्रविषयं समित्यननुपालनादि, शल्यमिव शल्यं कालान्तरेऽप्यनिष्टफलविधानं

प्रत्यवन्ध्यतया, सह तेन सशल्यं तच्च तन्मरणं च सशल्यमरणम्-अन्तःशल्यमरणं भवति, 'तेषां' गौरवपङ्कमग्नानामिति गाथाद्वयार्थः ॥ अस्यैवात्यन्तपरीहार्यतां ख्यापयन् फलमाह-

नि.[२२०] एयं ससल्लमरणं मरिऊण दुरंतमि ।
सुइरं भमंति जीवा दीहे संसारकंतारे ॥

वृ. 'एतद्' उक्तस्वरूपं सशल्यमरणं यथा भवति तथेत्युपस्कारः, सुब्व्यत्ययाद्वा एतेन-सशल्यमरणेन 'मृत्वा' त्यक्त्वा प्राणान्, के ?-जीवा इति सम्बन्धः, किम् ?-'सुचिरं भ्रमन्ति' बहुकालं पर्यटन्ति, क्व ?-संसारः कान्तारमिवातिगहनतया संसारकान्तारः तस्मिन्निति सप्तम्यर्थः, कीदृशि ? महद्भयं यस्मिन् तन्महाभयं तस्मिन्, तथा दुःखेनान्तः-पर्यन्तो यस्य तद्दुरन्तं तस्मिन्, तथा 'दीर्घे' अनादौ केषाञ्चिदपर्यवसिते चेति तत् सर्वथा परिहर्तव्यमेवेति भाव इति गाथार्थः ॥

नि.[२२१] मोत्तुं अकम्मभूमगनरतिरिए सुरगणे अ नेरइए ।
सेसाणं जीवाणं तब्भवमरणं तु केसिंचि ॥

वृ. 'मुक्त्वा' अपहाय, कान् ? 'अकम्मभूमगनरतिरिए'त्ति सूत्रत्वात् अकर्म्मभूमिजाश्च ते देवगुरूत्तरकुर्वादिपूत्पन्नतया नरतिर्यञ्चश्च अकर्म्मभूमिजनरतिर्यञ्चस्तान्, तेषां हि तद्भावनन्तरं देवेष्वेवोत्पादः, तथा 'सुरगणांश्च' सुरनिकायान्, किमुक्तं भवति ?-चतुर्निकायवर्तिनोऽपि देवान्, निरयो-नरकः तस्मिन् भवा नैरयिकाः, इहापि चशब्दानवृत्तेस्तांश्च मुक्त्वेति सम्बन्धः, तेषां देवानां च तद्भावनन्तरं तिर्यग्मनुष्येष्वेवोत्पत्तेः, 'शेषाणाम्' एतद्व्यतिरिक्तानां कर्म्मभूमिजनरतिरश्चां 'जीवानां' प्राणिनां तद्भवमरणं, तेषामेव पुनस्तत्रोत्पत्तेः, तद्धि यस्मिन् भवे वर्त्तते जन्तुस्तद्भवयोग्यमेवायुर्बद्ध्वा पुनस्तत्क्षयेण म्रियमाणस्य भवति, तुशब्दस्तेषामपि सङ्ख्येयवर्षायुषामेवेति विशेषख्यापकः, असङ्ख्येयवर्षायुषां हि युगलधार्मिकत्वादकर्म्मभूमिजानामिव देवेष्वेवोत्पादः, तेषामपि न सर्वेषां, किन्तु 'केषाञ्चित्' तद्भावोत्पादानुरूपमेवायुः कर्म्मोपचिन्वतामिति गाथार्थः ॥ अत्रान्तरे प्रत्यन्तरेषु 'मोत्तूण ओहिमरणं' इत्यादिगाथा दृश्यते, न चास्या भावार्थः सम्यगवबुध्यते, नापि चूर्णिकृताऽसौ व्याख्यातेति उपेक्ष्यते ॥

सम्प्रतिबालपण्डितमिश्रमरणस्वरूपमाह-

नि.[२२२] अविरयमरणं बालं मरणं विरयाण पंडियं विंति ।
जाणाहि बालपंडियमरणं पुन देसविरयाणं ॥

वृ. विरमणं विरतं-हिंसाऽनृतादेरुपरमणं न विद्यते तद् येषां तेऽमी अविरताः तेषां-मृतिसमयेऽपि देशविरतिमप्रतिपद्यमानानां मिथ्यादृशां सम्यग्दृशां वा मरणमविरतमरणं-बालमरणमिति ब्रुवत इति सम्बन्धः, तथा 'विरतानां' सर्वसावद्यनिवृत्तिम[illegible]वतां मरणं 'पण्डित'मिति प्रक्रमात्पण्डितमरणम्, 'विंति'त्ति ब्रुवते तीर्थकरगणधरादयः, जानीहि "बालपण्डितमरण"मिति मिश्रमरणं, पुनःशब्दः पूर्वापेक्षया विशेषं द्योतयति, देशात् सर्वविषयापेक्षया स्थूलप्राणिव्यपरोपणादेर्विरता देशविरतास्तेषामिति गाथार्थः ॥ एवं चरणद्वारेण बालादिमरणत्रयमभिधाय ज्ञानद्वारेण छद्मस्थमरणकेवलिमरणे प्रतिपादयितुमाह-

नि.[२२३] मनपज्जवोहिनाणी सुअमइनाणी मरंति जे समणा ।
छउमत्थमरणमेयं केवलिमरणं तु केवलिणो ॥

वृ. मनःपर्यवज्ञानिनोऽवधिज्ञानिनश्च, ज्ञानिशब्दस्य प्रत्येकमभिसम्बन्धात्, श्रुतज्ञानिनो मतिज्ञानिनश्च 'म्रियन्ते' प्राणांस्त्यजन्ति ये 'श्रमणाः' तपस्विनः छादयन्ति छद्मानि-ज्ञानावरणादीनि तेषु तिष्ठन्तीति छद्मस्थाः तेषां मरणं छद्मस्थमरणमेतत्, इह च प्रथमतो मनःपर्यायनिर्देशो विशुद्धिकृतप्राधान्यमङ्गीकृत्य चारित्रिण एव तदुपजायत इति स्वामिकृतप्राधान्यापेक्षो वा, एवमवध्यादिष्वपि यथायोगं स्वधियैव हेतुरभिधेयः, केवलिमरणं तु ये केवलिनः-उत्पन्नकेवलाः सकलकर्म्मपुद्गलपरिशाटतो म्रियन्ते तज्ज्ञेयमिति शेषः, उभयत्राभेदनिर्देशः प्राग्वदिति गाथार्थः ॥ साम्प्रतं वैहायसगृध्रपृष्ठमरणे अभिधातुमाह-

नि.[२२४] गिद्धाइभक्खणं गिद्धपिट्ठ उब्बंधणाइ वेहासं ।
एए दुन्निवि मरणा कारणजाए अणुन्नाया ॥

वृ. 'गृद्धाः' प्रतीतास्ते आदिर्येषां शकुनिकाशिवादीनां तैर्भक्षणं गम्यमानत्वादात्मनः तदनिवारणादिना तद्भक्ष्यकरिकरभादिशरीरानुप्रवेशेन च गृध्रादिभक्षणं, तत् किमुच्यत इत्याह 'गिद्धपिट्ठ'त्ति गृध्रैः स्पृष्टं-स्पर्शनं यस्मिंस्तद्गृध्रस्पृष्टं, यद्वा गृध्राणां पृष्ठं पृष्ठमुपलक्षणत्वादुदरादि च मर्तुर्यस्मिंस्तद्गृध्रपृष्ठम्, स ह्यालक्तकपूर्णिकापुटप्रदानेनाप्यायमानं गृध्रादिभिः, पृष्ठादौ भक्षयतीति, पक्षान्निर्दिष्टस्यापि चास्य प्रथमतः प्रतिपादनमत्यन्तमाहसत्त्वविषयतथा कर्म्मनिर्जरां प्रति प्राधान्यख्यापनार्थम्, 'उब्बंधणाइ वेहासंति' उत्-ऊर्ध्वं वृक्षशाखादौ बन्धनमुद्बन्धनं तदादिर्यस्य तरुगिरिभृगुप्रपातादेरात्मजनितस्य मरणस्य तदुद्बन्धनादि 'वेहास'न्ति प्राकृततत्त्वाद्यलोपे वैहायसम्, उद्बद्धस्य हि विहायस्येव भवनमीति तत्प्राधान्यविवक्षयेत्थमुक्तम्। आह-एवं गृध्रपृष्ठस्याप्यात्मघातरूपत्वाद्वैहायसिकेऽन्तर्भावः, सत्यमेतत्, केवलमल्पसत्त्वैरध्यवसातुमशक्यताख्यापनार्थमस्य भेदेनोपन्यासः, ननु-

"भावियजिनवयणाण, मित्तरहियाण नत्थि हु विसेसो ।
अत्ताणंमि परंमि य तो वज्जे पीडमभएवि ॥"

इत्यागमः, एते चानन्तरोक्ते मरणे आत्मविघातकारिणी, तथा चात्मपीडाहेतुरिति कथं नागमविरोधः ?, अत एव च भक्तपरिज्ञानादिषु पीडापरिहाय 'चत्तारि विचित्ताइं विगईणिज्जूहियाइं' इत्यादिसंलेखनाविधिः पानकादिविधिश्च तत्र तत्राभिहितः, दर्शनमालिन्यं चोभयथेत्यशङ्क्याह-'एते' अनन्तरोक्ते 'द्वे अपि' गृध्रपृष्ठवैहायसाख्ये मरणे' 'कारणजाते' कारणप्रकारे दर्शनमालिन्यपरिहारादिके उदायिनृपानुमृततथाविधाचार्यवत्, अनुज्ञाते, तीर्थकृद्गणधरादिभिरिति, अनेन च सम्प्रदायानुसारितां दर्शनयत्नन्यथाकथने श्रुताशातनाया अतिदुरन्तत्वमाह इति गाथार्थः ॥ साम्प्रतमन्त्यमरणत्रयमाह-

नि.[२२५] भत्तपरिन्ना इंगिनी पाओवगमं च तिन्नि मरणाइं ।
कन्नसमज्झिमजेट्ठा थिइसंघयणेन उ विसिट्ठा ॥

वृ. भक्तं-भोजनं तस्य परिज्ञा-ज्ञपरिज्ञया ऽनेकधेदमस्माभिर्भुक्तपूर्वमेतद्धेतुकं चावद्यमिति परिज्ञानं, प्रत्याख्यानपरिज्ञया च-

"सव्वं च असनपानं चउव्विहं जा य बाहिरा उवही ।
अब्भितरं च उवहिं जावज्जीवं च वोसिरे ॥"

इत्यागमवचनाच्चतुर्विधाहारस्य वा यावज्जीवमपि परित्यागात्मकं प्रत्याख्यानं भक्तपरिज्ञोच्यते, इङ्गयते-प्रतिनियतप्रदेश एव चेष्टयते अस्यामनशनक्रियायामितीङ्गिनी, पादैः-अधः-प्रसर्पिमूलात्मकैः पिबति पादपो-वृक्षः, उपशब्दश्चोपमेतिवत्सादृश्येऽपि दृश्यते, ततश्च पादपमुपगच्छति-सादृश्येन प्राप्नोतीति पादपोपगमं, किमुक्तं भवति ?-यथैव पादपः क्वचित् कथञ्चिन्निपतितः समःविषमभूमिभागव्यवस्थितोऽवयवविक्षेपो वा ने, तथाऽयमपि भगवान् यद् यथा समविषमदेशेष्वङ्गमुपाङ्गं वा प्रथमतः पतितं न तत्ततश्चलयति, तथा च प्रकीर्णकृत

निच्चल निप्पडिकम्मो निक्खिवए जं जहिं जहा अंगं ।
एयं पाओवगमं नीहारिं वा अनीहारिं ॥१॥
पातोवगमं भणियं सम विसमो पायवोव्व जह पडितो ।
नवरं परप्पतोगा कंपेज्ज जहा फलतरूव्वं ॥२॥"

चः समुच्चये, इह चैवंविधानशनोपलक्षितानि मरणान्यप्येवमुक्तानि, अत एवाह-त्रीणि मरणानीति, एतत्स्वरूपं च यथेदं विधेयं यच्चात्र सपरिकर्म्म अपरिकर्म्म च इत्यादिकं सूत्रकार एवोत्तरत्र तपोमार्गनाम्नि त्रिंशत्तमाध्ययनेऽभिधास्यत इति निर्युक्तिकृता नोक्तम्। द्वारनिर्देशानन्तरमवश्यं किञ्चिद्वाच्यमितिमत्वेदमाह-'कण्णस'त्ति सूत्रत्वात्, कनिष्ठं-लघु जघन्यमितियावत्, मध्यमं-लघुज्येष्ठयोर्मध्ये भावि, ज्येष्ठम्-अतिशयवृद्धमुत्कृष्टमित्यर्थः, एषां द्वन्द्वः तत एतानि, धृतिः-संयमं प्रति चित्तस्वास्थ्यं संहननंशरीरसामर्थ्यहेतुः वज्रऋषभनाराचादि ताभ्यां, प्राकृतत्वाच्चैकवचननिर्देशः, समाहाराश्रयणाद्वा, तुशब्दात्सपरिकर्म्मापरिकर्म्मतादिभिश्च विशेषैर्विशिष्टानि-विशेषवन्ति, इदमुक्तं भवति-यद्यपि त्रितयमप्येतत्-

"धीरेणऽवि मरियव्वं कापुरिसेणवि अवस्स मरियव्वं ।
तम्हा अवस्समरणे वरं खु धीरत्तणे मरिउं ॥
संसाररंगमज्झे धीबलसंनद्धबद्धकच्छातो ।
हंतूण मोहमल्लं हरामि आराधनपडागं ॥२॥
जह पच्छिमम्मि काले पच्छिमतित्थयरदेसियमुयारं ।
पच्छा निच्छयपत्थं उवेमि अब्भुज्जयं मरणं ॥३॥"

इति शुभाशयतयैव प्रतिपत्तेः, फलमपि च विमानिकतामुक्तिलक्षणं त्रयस्यापि समानं,

"एयं पच्चक्खाणं अनुपालेऊण सुविहिओ सम्मं ।
वेमाणितो व देवो हवेज्ज अहवाऽवि सिज्झिज्जा ॥"

तथापि विशिष्टविशिष्टतरविशिष्टतमधृतिमतामेव तत्प्राप्तिरिति कनिष्ठत्वादिस्तद्विशेष उच्यते, तथाहि-भक्तपरिज्ञामरणमार्यिकादीनामप्यस्ति, यत उक्तम्-

"सव्वावि य अज्जाओ सव्वेऽवि य पढमसंघयणवज्जा ।
सव्वेऽवि देसविरया पच्चक्खाणेण उ मरंति ॥"

अत्र हि प्रत्याख्यानशब्देन भक्तपरिज्ञैवोक्ता, तत्र प्राक् पादपोपगमनादेरन्यथाऽभिधानात्, इङ्गिनीमरणं तु विशिष्टतरधृतिसंहननवतामेव सम्भवतीत्यार्यिकादिनिषेधत एवावसीयते, पादपोपगमनं तु नाम्नैव विशिष्टतमधृतिमतामेवेत्युक्तप्रायं, ततश्च वज्रऋषभनाराचसंहननिनामे-

वैतत्, उक्तं हि-

"पढमंमि य संघयणे वट्टंते सेलकुड्डसामाणे ।
तंसिंपि य वोच्छेओ चोद्दसपुव्वीण वोच्छेए ॥"

कथं चान्यथैवंविधविशिष्टधृतिसंहननाभावे-

"पुव्वभवियवेरेणं देवो साहरइ कोऽवि पायाले ।
मा सो चरिमसरीरो न वेयणं किंपि पावेज्जा ॥१॥
तथा 'देवो नेहेन नयइ देवारन्नं व इंदभवनं वा ।
जंहिय इट्ठा कंता सव्वेसुक्का हुंति पुद्गभावा ॥२॥
उप्पन्ने उवसग्गे दिव्वे माणुस्साए तिरिक्खे य ।
सव्वे पराजिनित्ता पाओवगया परिहरंति ॥३॥
पुव्वावरदक्खिणेहिं दाहिणवाएहिं आवडंतेहिं ।
जह नवि कंपइ मेरू तह झाणातो नवि चलंति ॥४॥"

इति मरणविभक्तिकृदुक्तं महासामर्थ्यं सम्भवि, किञ्च तीर्थकरसेवितत्वाच्च पादपोपगमनस्य ज्येष्ठत्वं, इतरयोश्चाविशिष्टसाधुसेवितत्वादन्यथात्वं, तथा चावादि-

"सव्वे सव्वद्धाए सव्वजू सव्वकम्मभूमीसु ।
सव्वगुरू सव्वहिया सव्वे मेरूसु अहिसित्ता ॥१॥
सव्वाहिं लद्धीहिं सव्वेऽवि परीसहे पराजित्ता ।
सव्वेऽवि य तित्थयरा पातोवगया उ सिद्धिगया ॥२॥
अवसेसा अनगारा तीयपडुप्पन्नऽनागया सव्वे ।
केती पातोवगया पच्चक्खाणिंगिणिं केती ॥३॥"

इति कृतं प्रसङ्गेनेति गाथार्थः ॥ इत्थं प्रतिद्वारगाथाद्वयवर्णनात् मूलद्वारगाथायां मरणविभक्तिप्ररूपणाद्वारमनुवर्णितम्, अधुनाऽनुभावप्रदेशाग्रद्वारद्वयमाह-

नि. [२] सोवक्कमे अ निरुवक्कमो अ दुविहो अनुभावमरणंमि ।
आउगकम्मपएसग्गनंतनंता पएसेहिं ॥

वृ. सहोपक्रमेण-अपवर्तनाकरणाख्येन वर्तत इति सोपक्रमश्च, निर्गत उपक्रमान्निरुपक्रमश्च द्विविधो, द्वैविध्यं चोक्तभेदेनैव, कोऽसौ ?-अनुभव-अनुभागः, क्व ?-'मरणे' इत्यर्थात् मरणविषयायुषि, तत्र हि सप्तभिरष्टभिर्वाऽऽकर्षैर्गवामिव मरुषु जलगण्डूषग्रहरूपैर्यत्पुद्गलोपादानं तदनुभागोऽतिदृढ इत्यपवर्तयितुमशक्यतया निरुपक्रमुच्यते, यत्तु षड्भिः पञ्चभिश्चतुर्भिर्वा अन्तर्मुहूर्तैः-दलिकं तदपवर्तनाकरणेनोपक्रम्यते इति सोपक्रमं, न चैतदुभयमप्यायुःक्षयात्मनि मरणे सम्भवति, तथा एति याति च इत्यायुस्तन्निबन्धनं कर्म्म आयुःकर्म्म तस्य विभुक्तमशक्यतया प्रकृष्टा देशाः प्रदेशास्तेषामग्रं-परिमाणमायुःकर्म्मप्रदेशाग्रम्, अनन्तानन्ताः-अनन्तानन्तसङ्ख्यापरिमिता मरणप्रक्रमेऽप्यर्थादायुःपुद्गलास्तद्विषयत्वाच्च मरणस्यैवमुपन्यासः, किमेतावन्तः कृत्स्नेऽप्यात्मनि ?, अत आह-'पएसेहिं' ति प्रक्रमात् सुब्व्यत्ययाच्चात्मप्रदेशेषु,

आत्मप्रदेशो ह्येकैकस्तत्प्रदेशैश्चानन्तानन्तैरवेष्टितः, संवेष्टितः, तथा च वृद्धव्याख्या-इदाणी पदेसग्गं-अनंताणंता आउगकम्मपोग्गला जेहिं एगभेगो जीवपएसो आवेढिय परिवेढितो, इति गाथार्थः ॥ सम्प्रति कति म्रियन्ते एकसमयेनेतिद्वारमाह

नि.[२२७] दुन्नि व तिन्नि व चत्तारि पंच मरणाइ अवीइमरणंमि।
कइ मरइ एगसमयंसि विभासावित्थरं जाणे ॥

नि.[२२८] सव्वे भवत्थजीवा मरंति आवीइअं सया मरणं।
ओहिं च आइअंतिय दुन्निवि एयाइ भयणाए ॥

नि.[२२९] ओहिं च आइअंतिअ बालं तह पंडिअं च मीसं च।
छउमं वेहासमरणं गिद्धपट्ठं विरुज्झंति ॥

वृ. द्वे वा त्रीणि वा, वाशब्दस्योत्तरत्रानुवृत्तेः चत्वारि वा पञ्च वा मरणानि वक्ष्यमाणविवक्षातः प्रक्रमादेकस्मिन् समये सम्भवन्ति, आवीचिमरणे सतीति शेषः, अनेन चास्य सततावस्थित त्वमेतदविवक्षया च तद्यवादिभेदपरिकल्पनेत्याह, कति म्रियन्त एक समये ?, इति चतुर्थद्वारस्य विशेषेण भाषणं विभाषणं विभाषा-व्याख्या विविधैर्वा प्रकारैर्भाषणं विभाषा-भेदाभिधानं तया विस्तरः-प्रपञ्चस्तं विस्तरं जानीहि जानीयाद्वा, निगमनमेतत्, प्रस्तुतमेवार्थं प्रकटयितुमाह-'सर्वे' निरवशेषाः, तत् किं मुक्तिभाजोऽपीत्याह-'भवस्थजीवाः' भवन्त्यस्मिन् कर्म्मवशवर्तिनो जन्तव इति भवः तत्र तिष्ठन्ति भवस्थाः ते च ते जीवाश्चेति विशेषणसमासः, म्रियन्ते, आवीचिकमवीचिकं वा मरणमाश्रित्येति शेषः, यद्वा विभक्तिव्यत्ययादावीचिकेन मरणेन म्रियन्ते 'सदा' सर्वकालं, 'ओहिं च'त्ति अवधिमरणं, चशब्दो भिन्नक्रमः, ततश्च 'आइयंतिय'न्ति आत्यन्तिकमरणं च, द्वे अप्येते 'भजनया' विकल्पनया, किमुक्तं भवति ?-यद्यप्यावीचिमरणवत् अवश्यात्यन्तिकमरणं अपि चतसृष्वपि गतिषु सम्भवतः तथाऽप्यायुःक्षयसमय एव तयोः सम्भवान्न सदाभावः, अत आवीचिकमरणमेव सदेत्युक्तम्, अनेनावीचिमरणस्य सदाभावेन लोकेमरणत्वेनाप्रसिद्धः अविवक्षायां हेतुरुक्त इति भावनीयं।

सम्प्रति 'दोन्निवि' इत्यादि व्यक्तीकरोति-'ओहिं च आइयंतिय'त्ति, चशब्दो भिन्नक्रमः, ततोऽवधिमरणमात्यन्तिकमरणं च, 'बालं' बालमरणं च, तथेत्युत्तरभेदापेक्षया समुच्चये, 'पण्डितं च' पण्डितमरणं, 'मिश्रं' बालपण्डितमरणं च, चशब्दाद्वैहायसगृध्रपृष्ठमरणे, भक्तपरिज्ञेङ्गिनीपादपोपगमनानि च, 'अन्योऽन्येन' परस्परेण विरुध्यन्ते, युगपदसम्भवात्, तत्र चाविरतस्याबध्यात्यन्तिकमरणयोः अन्यतरद्बालमरणं चेति द्वे, तद्भवमरणेन सह त्रीणि, वशार्तेन चत्वारि, कथञ्चिदात्मघाते च वैहायसगृध्रपृष्ठयोरन्यतरेण पञ्च, आह- बलन्मरणान्तःशल्यमरणेन अपि बालमरणभेदावेव, यत आगमः-"बालमरणे दुवालसविहे पन्नत्ते, तंजहा-बलायमरणे वसट्टमरणे असंतोसमरणे तब्भवमरणे गिरिपडणे तरुपडणे जलप्पवेसे जलणप्पवेसे विसभक्खणे सत्थोवहणणे वेहाणसे गिद्धपट्ठे"त्ति, एतेषु च यद्यपि गिरिपतादिषट्कस्य वैहायस एवान्तर्भावः तथापि बलन्मरणान्तःशल्यमरणयोः प्रक्षेपे कथं नोक्तसङ्ख्याविरोधः ?, उच्यते, इहाविरतस्यैव बालमरणं विवक्षितम्।

उक्तं हि-'अविरयमरणं बालमरणं' अनयोस्त्वेकत्र संयमस्थानेभ्यो निवर्तनम्, अन्यत्र

मालिन्यमात्रं विवक्षितं, न तु सर्वथा विरतेरभाव एवेति कथं बालमरणे सम्भवः ?, तथा छद्मस्थमरणमपि विरतानामेव रूढमिति नोक्तसङ्ख्याविरोधः, एवं देशविरतस्यापि दर्शनादि भङ्गभावना कार्या, नवरं बालमरणस्थाने बालपण्डितमरणं वाच्यं, विरतस्य त्ववध्यात्यन्तिकमरणयोरन्यतरत् पण्डितमरणं चेति द्वे, छद्मस्थकेवलिमरणयोश्चान्यतरदिति त्रीणि, भक्तपरिज्ञेङ्गिनीपादपोपगमनानामन्यतरेण सह चत्वारि, कारणिकस्य तु वैहायसगृध्रपृष्ठयोरन्यतरेण सह पञ्च, दृढसंयमं प्रत्येवमुक्तं, शिथिलसंयमस्य त्ववध्यात्यन्तिकमरणयोरन्यतरत्, कुतश्चित्कारणाद्वैहायसगृध्रपृष्ठयोश्चान्यतरदिति द्वे, कथञ्चित्कल्यसम्भवे चान्तःशल्यमरणेन सह त्रीणि, बलन्मरणेन सह चत्वारि, छद्मस्थमरणेन तु पञ्च, पण्डितमरणस्य यथोक्तभक्तपरिज्ञादीनां वा विशुद्धसंयमत्वादस्याभाव एवेति, आह-विरतस्यावस्थाद्वयेऽपि तद्भवमरणप्रक्षेपे कथं न षष्ठमरणसम्भवः ?, उच्यते, विरतस्य देवेष्वेवोत्पाद इति तत्रैवोत्पत्त्यभावत्र तद्भवमरणसम्भव इति गाथात्रयार्थः ॥ गतं कति म्रियन्त एकसमय इति द्वारम्, इदानीं कतिकृत्वो म्रियते एकैकस्मिन् ? इति द्वारमाह-

नि.[२३०] संखमसंखमनंता कमो उ इक्किक्कगंमि अपसत्थे ।
सत्तट्ठग अनुबंधो पसत्थए केवलिंमि सइं ॥

वृ. 'संखमसंखं'त्ति आर्षत्वात् सङ्ख्याः-असङ्ख्याताः असङ्ख्या अविद्यमानसङ्ख्याः अनन्ता-अपर्यवसिता, वारा इति प्रक्रमः, 'कमो उ'त्ति क्रमः परिपाटी, तुशब्दश्च कायस्थितेरल्पबहुत्वापेक्षयाऽयं क्रम इति विशेषद्योतकः, 'एक्केक्कगंमि'त्ति एकैकस्मिन् 'अप्रशस्ते' बालमरणादौ निरूप्यमाणे, तत्र सामान्येन पञ्चेन्द्रियाविरतदेशविरतौ च सङ्ख्याताः, शेषाः पृथिव्युदकाग्नियुद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाः असङ्ख्याताः, वनस्पतयोऽनन्ता, एते हि कायस्थित्यपेक्षया यथाक्रमं बहुबहुतरबहुतमस्थितिभाज इतिकृत्वा ।

प्रशस्ते कति वारा म्रियत इत्याह-'सत्तट्ठग'त्ति सप्त वाऽष्ट वा सप्ताष्टास्तं परिमाणमस्येति सप्ताष्टकः, कोऽसौ ?-'अनुबन्धः' सातत्येन भवनं तन्मरणानामिति, ततोऽयमर्थः-सप्त वा अष्ट वा वारा म्रियते, क्व ?-'प्रशस्तके' सर्वविरतिसम्बन्धिनि पण्डितमरणे, इह च चारित्रस्य निरन्तरमवप्त्यसम्भवात् तद्वत एव च प्रशस्तमरणभावादर्थाद् व्यवधानामपि देवभवैरयं श्रीयते, 'केवलिनि' यथाख्यातचारित्रवति समुत्पन्नकेवले 'सइं'ति सकृदेकमेव मरणमिति । उक्तं कतिकृत्वो म्रियत एकैकस्मिन्निति द्वारं, सम्प्रति कतिभाग एकैकस्मिन्मरणे म्रियत इति द्वारमाह-

नि.[२३१] मरणे अनंतभागो इक्किक्के मरइ आइमं मोत्तुं ।
अनुसमयाई नेयं पढमचरिमंतरं नत्थि ॥

वृ. 'मरणे' प्रागुक्तरूपे अनन्तभाग एकैकस्मिन् म्रियते, किं सर्वस्मिन्नपि ? नेत्याह-'आदिमम्' आवीचिमरणं, तस्यैवाद्यत्वात्, 'मुक्त्वा' अपहाय, इयमत्र भावना-शेषमरणस्वामिनो हि सर्वजीवापेक्षया अनन्तभाग एवेति तेष्वनन्तो भागो म्रियत इत्युच्यते, आवीचिमरणस्वामिनस्तु सिद्धविरहिताः सर्व एव जीवाः, ते चानन्ता इतिकृत्वाऽनन्तभागहीनाः सर्वे जीवा म्रियन्त इत्युच्यते । उक्तं कतिभागो म्रियते एकैकस्मिन्निति द्वारम्, अधुनाऽनुसमयद्वारमाह-

'अनुसमय'त्ति समयं समयमनु अनुसमयं, वीप्सायामव्ययीभावः, ततश्चानुसमयं-सततम्,

'आदि' प्रथममावीचिमरणं 'ज्ञेयम्' अवबोद्धव्यं, यावदायुस्तस्य प्रतिपादनात्, शेषाणां त्वायुषोऽन्त्यसमय एवैकत्र भावादनुसमयतानभिधानं, बहुसमयविषयत्वादनुसमयतायाः; तथा च वृद्धव्याख्या—"पढमे जाव आउं धरइ सेसाणं एगसमयं जहिं मरइ" न च 'मासं पाओवगया' इत्यागमेन विरोधः, तत्र पादपोपगमनशब्देन निश्चेष्टताया एवाभिधानात्, मरणस्य तु तत्राप्यायुस्त्रुटिसमय एव सद्भावात्, तुः पूरणे। गतमनुसमयद्वारम्, इदानीं सान्तरद्वारमाह—तत्र प्रथमचरमयोरन्तरं—व्यवधानं 'नास्ति' न विद्यते, प्रथमस्यावीचिमरणस्य सदा सम्भवात्, चरमस्य भवापेक्षया केवलिमरणस्य पुनर्मरणाभावादिति भाव इति गाथार्थः॥ शेषाणामपि किमेवमित्याह

नि.[२३२] सेसाणं मरणाणं नेओ संतरनिरंतरो उ गमो।
साई सपज्जवसिया सेसा पढमिल्लुगमनाइ॥

वृ. शेषाणां मरणानाम्—अवधिमरणादीनां पञ्चदशानां ज्ञेयः, सहान्तरेण—व्यवधानेन वर्तत इति सान्तरः, निष्क्रान्तोऽन्तरात्निरन्तरश्च, तुःशब्दस्य समुच्चयार्थत्वात्, उक्तं हि—"तुशब्दो विशेषणपादपूरणावधारणसमुच्चयेषु" को ऽसौ ?—गम्यते अनेन वस्तुस्वरूपमिति गमः—प्ररूपणा, इदमुक्तं भवति—यदाऽन्यतरद्बालमरणादिकं प्राप्य म्रियते मृत्वा च भवान्तरं मरणान्तरमनुभूय पुनस्तदेवाप्नोति तदा सान्तरमिति प्ररूपणा, यदा तु बालमरणादिकमवाप्य पुनस्तदेवाव्यवहितमाप्नोति तदा निरन्तरं भवति, तत्प्ररूपकत्वाच्चेह गमोऽपि सान्तरो निरन्तरश्चेत्युक्तः। सम्प्रति गाथापश्चार्धेन कालद्वारमाह—सादीनि च सपर्यवसितानि च सादिसपर्यवसितानि 'शेषाणि' षोडश वक्ष्यमाणापेक्षया अवधिमरणादीनि, एकसामयिकतायास्तेषामभिहितत्वात्, प्रवाहापेक्षया तु शेषभङ्गोपलक्षणमेतत्, प्रवाहतोऽपि भङ्गत्रयपतितानि शेषमरणानि सम्भवन्ति, तथा च वृद्धाः—"बालमरणाणि अनाइयाणि वा अपज्जवसियाणि वा, अनादियाणि वा सपज्जवसियाणि, पंडियमरणाणि पुण साइयाणि सपज्जवसियाणि" मुक्त्वावासौ तदुच्छित्तिसम्भवादिति भावः, 'पढमिल्लुगं'ति प्रथमकम्—आवीचिमरणम् 'अनादि' आदिरहितं प्रवाहापेक्षयेति भावः, प्रतिनियतायुः पुद्गलापेक्षया तु साद्यपि सम्भवति, उपलक्षणत्वाच्चास्यापर्यवसितं च अभव्यानां, भव्यानां पुनः सपर्यवसितमपीति गाथार्थः॥ सम्प्रत्यतिगम्भीरतामागमस्य दर्शयन्नात्मौद्धत्यपरिहारायाह भगवान् निर्युक्तिकारः—

नि.[२३३] सव्वे एए दारा मरणविभत्तीइ वन्निआ कमसो।
सगलनिउणे पयत्थे जिनचउदसपुव्वि भासंति॥

वृ. 'सर्वाणि' अशेषाणि 'एतानि' अनन्तरमुपदर्शितानि 'द्वाराणि' अर्थप्रतिपादनमुखानि 'मरणविभक्तेः' मरणविभक्त्यपरनाम्नोऽस्यैवाध्ययनस्य 'वर्णितानि' प्ररूपितानि, मयेति शेषः, 'कमसो'त्ति प्राग्वत् क्रमतः, आह—एवं सकलापि मरणवक्तव्यतोक्ता उत नेत्याह—सकलाश्च—समस्ता निपुणाश्च—प्रभवादयो जिनचतुर्दशपूर्विणो 'भाषन्ते' व्यक्तमधिदधति, अहं तु मन्दमतीत्वान्न तथा वर्णयितुं क्षम इत्यभिप्रायः, स्वयं चतुर्दशपूर्विणो 'भाषन्ते' व्यक्तमभिदधति, अहं तु मन्दमतित्वान्न तथा वर्णयितुं क्षम इत्यभिप्रायः, स्वयं चतुर्दशपूर्वित्वेऽपि यच्चतुर्दशपूर्व्युपादानं, तत्तेषामपि षट्स्थानपतितत्वेन शेषमाहात्म्यख्यापनपरदुष्टमेव, भाष्यगाथा वा द्वारगाथाद्यादारभ्य लक्ष्यन्त इति प्रेर्यानवकाश एवेति गाथार्थः॥

इहैव प्रशस्ताप्रशस्तमरणविभागमाह-

नि.[२३४] एगंतपसत्था तिन्नि इत्थ मरणा जिनेहि पन्नत्ता।
भत्तपरिन्ना इंगिनी पाउवगमनं च कमजिट्ठं॥

वृ. एकान्तेन नियमेन प्रशस्तानि-श्लाघानि 'त्रीणि' त्रिसङ्ख्यानि 'अत्र' एतेष्वनन्तराभिहितेषु मरणेषु मरणानि 'जिनैः' केवलिभिः 'प्रज्ञप्तानि' प्ररूपितानि, तान्येवाह- भक्तपरिज्ञा इङ्गिनी 'पाउवगमनं' चेति पादपोपगमनं च, इदमपि त्रयं किमेकरूपमित्याह-क्रमेण-परिपाट्या ज्येष्ठम्-अतिशयप्रशस्यं क्रमज्येष्ठं यथोत्तरं प्रधानमित्यर्थः। शेषमरणान्यपि यानि प्रशस्तानि तेषामत्रैवान्तर्भावः, इतराणि कानिचित् कथञ्चित् प्रशस्तानि, अप्रशस्तानि तु सर्वथैवाप्रशस्तानीति गाथार्थः॥ इह च येनाधिकाररत्नदाह-

नि.[२३५] इत्थं पुन अहिगारो नायव्वो होइ मणुअमरणेणं।
मुत्तुं अकाममरणं सकाममरणेण मरियव्वं॥

वृ. 'अत्र' एतेषु मरणेषु, पुनःशब्दो वाक्योपन्यासार्थः, अधिकारो ज्ञातव्यो भवति मनुजमरणेन, किमुक्तं भवति ?-मनुष्यभवसम्भविना पण्डितमरणादिना, तान्येव प्रत्युपदेशप्रवृत्तेः। सम्प्रत्युक्तार्थसंक्षेपद्वारेणोपदेशसर्वस्वमाह-मुक्त्वाऽकाममरणं -बालमरणाद्यमप्रशस्तं 'सकाममरणेन' भक्तपरिज्ञादिना प्रशस्तेन मर्तव्यमिति गाथार्थः॥

गतो नामनिष्पन्ननिक्षेपः, सम्प्राप्ते सूत्रानुगमे सूत्रोच्चारणीये, तच्चेदम्-

सू.(१२१) अन्नवंसि महोहंसि, एगे तरइ दुरुत्तरं।
तत्थ एगे महापन्ने, इमं पण्हमुदाहरे॥

वृ. अर्णो-जलं विद्यते यत्रासावर्णवः, अर्णसो लोपश्चेति चप्रत्ययः सकारलोपश्च, स च द्रव्यतो जलधिर्भावतश्च संसारः तस्मिन्, कीदृशि ?- 'महोघंसि'त्ति महानोघः-प्रवाहो द्रव्यतो जलसम्बन्धी भावतस्तु भवपरम्परात्मकः प्राणिनामत्यन्तमाकुलीकरणहेतुः चरकादिमतसमूहो वा यस्मिन् स महौघः तस्मिन्, महत्त्वं चोभयत्रागाधतयाऽदृष्टपरपारतया च मन्तव्यं, तत्र

'एक' इत्यसहायो रागद्वेषादिसहभावविरहितो गौतमादिरित्यर्थः, 'तरति' परं पारमाप्नोति, तत्कालापेक्षया वर्त्तमाननिर्देशः, 'दुरुत्तरं'ति विभक्तिव्यत्ययाद्दुरुत्तरे-दुःखेनोत्तरितुं शक्ये, दुरुत्तरमिति क्रियाविशेषणं वा, न हि यथाऽसौ तरति तथाऽपरैर्गुरुकर्म्मभिः सुखेनैव तीर्यते, अत एव एक इति, सङ्ख्यावचनो वा, एक एव-जिनमतप्रतिपन्नाः, न तु चरकादिमताकुलितचेतसोऽन्ये तथा तरितुमीशत इति, 'तत्रे'ति गौतमादौ तरणप्रवृत्ते 'एक' इति तथाविधतीर्थकरनामकर्मोदयादनुत्तरावाप्तविभूतिरद्वितीयः, किमुक्तं भवति ?-तीर्थकरः, स ह्येक एव भरते सम्भवतीति, 'महापन्ने'त्ति महती-निरावरणतयाऽपरिमाणा प्रज्ञा-केवलज्ञानात्मिका संवित्त अस्येति महाप्रज्ञः, स किं इत्याह-'इमम्' अनन्तरवक्ष्यमाणं हृदि विपरिवर्तमानतया प्रत्यक्षं प्रक्रमात्तरणोपायं, 'पण्हं'ति स्पष्टम्-असन्दिग्धं, पठ्यते च 'पण्हं'ति पृच्छयत इति प्रश्नं-प्रष्टव्यार्थरूपम् 'उदाहरे'त्ति भूते लिट्, तत उदाहरेद्-उदाहृतवान्, पठ्यते च-'अन्नवंसि महोघंसि एगे तिन्ने दुरुत्तरं'ति, अत्र सुब्व्यत्यये विशेषः, ततश्च-अर्णवान्महौघाद्दुरुत्तरात् तीर्ण इव तीर्णः-तीरप्राप्त इतियोगः, एको घातिकर्म्मसाहित्यरहितः, 'तत्रे'ति सदेवमनुजायां परिषदि,

एको ऽद्वितीयः, स च तीर्थकृदेव, शेषं प्राग्वदिति सूत्रार्थः ॥ यदुदाहृतवांस्तदेवाह

मू.(१३०) संतिमे य दुवे ट्ठाणा, अक्खाया मारणंतिया ।
अकाममरणं चेव, सकाममरणं तहा ॥

वृ. सन्तीति प्राकृतत्वात् वचनव्यत्ययेन स्तो-विद्यते 'इमे' प्रत्यक्षे, चः पूरणे, पठ्यते च 'संतिमेए'त्ति स्त एते, मकारोऽलाक्षणिकः, एवमन्यत्रापि यत्र नोच्यते तत्र भावनीयं, 'द्वे' द्वित्वसङ्ख्ये तिष्ठन्त्यनयोर्जन्तव इति स्थाने 'आख्याते' पुरातनतीर्थकृद्भिरपि कथिते, अनेन तीर्थकृतां परस्परं वचनाव्याहतिरुपदर्शिता, ते च कीदृशे ?-'मारणंतिए'त्ति मरणमेवान्तो-निर्जनिजायुषः पर्यन्तो मरणान्तः तस्मिन् भवे मारणान्तिके, ते एव नामत उपदर्शयति-'अकाम-मरणम्' उक्तरूपमनन्तरवक्ष्यमाणरूपं च, वक्ष्यमाणापेक्षया चः समुच्चये, एवेति पूरणे, 'सकाममरणम्' उक्तरूपं वक्ष्यमाणस्वरूपं च तथेति सूत्रार्थः ॥ केषां पुनरिदं कियत्कालं च ?

मू.(१३१) बालाणं अकामं तु, मरणं असतिं भवे ।
पंडियाणं सकामं तु, उक्कोसेण सतिं भवे ॥

वृ. बाला इव बालाः सदसद्विवेकविकलतया तेषाम् 'अकामं तु'त्ति तुशब्दस्यैवकारार्थत्वात् अकाममेव मरणमसकृद्-वारंवारं भवेत्, ते हि विषयाभिष्वङ्गतो मरणमनिच्छन्त एव म्रियन्ते, तत एव च भवाटवीमटन्ति, 'पण्डितानां' चारित्रवतां सह कामेन-अभिलाषेण वर्तते इति सकामं मरणं प्रत्यसंत्रस्ततया, तथात्वं चोत्सवभूतत्वात् तादृशां मरणस्य, तथा च वाचकः-

"सोच्चा ततो पोच्चमिणं नित्थं व्वतियं भयं मरंताणं ।
उत्सवभूतं मन्ये मरणमनापराधवृत्तीनाम् ॥"

न तु परमार्थतः, तेषां सकामं-सकामत्वं, मरणाभिलाषस्यापि निषिद्धत्वाद्, उक्तं हि-

"मा मा हु विंचितेज्जा जीवामि चिरं मरामि य लहुंति ।
जइ इच्छसि तरिउं जे संसारमहोदहिमपारं ॥"ति,

तुः पूर्वापेक्षया विशेषद्योतकः, तच्च 'उत्कर्षेण' उत्कर्षोपलक्षितं, केवलिसम्बन्धीत्यर्थः, अकेवलिनो हि संयमजीवितं दीर्घमिच्छेयुरपि, मुक्त्यवाप्तेः, इतः स्यादिति, केवलिनस्तु तदपि नेच्छन्ति, आस्तां भवजीवितमिति, तन्मरणस्योत्कर्षेण सकामता 'सकृद्' एकवारमेव भवेत्, जघन्येन तु शेषचारित्रिणः सप्ताष्ट वा वारान् भवेदित्याकूतमिति सूत्रार्थः ॥ यदुक्तं-'स्त इमे द्वे स्थाने' तत्राद्यं तावदाह-

मू.(१३२) तत्थिमं पढमं ट्ठाणं, महावीरेण देसियं ।
कामगिद्धे जहा बाले, भिसं कूराणि कुव्वति ॥

वृ. 'तत्रे'ति तयोरकाममरणसकाममरणाख्ययोः स्थानयोर्मध्ये 'इदम्' अनन्तरमभिधास्य-मानरूपं 'प्रथमम्' आद्यं स्थानं, 'महावीरेणे'ति चरमतीर्थकृता, 'तत्रैको महाप्रज्ञः' इति मुकुलि-तोक्तेरभिव्यक्त्यर्थमेतत्, 'देशितं' प्ररूपितं, किं तत् इत्याह-'कामेषु' इच्छामदनात्मकेषु 'गृद्धः' अभिकाङ्क्षावान् कामगृद्धो 'यथा' इत्युपप्रदर्शनार्थः, 'बाल' इत्युक्तरूपो 'भृशम्' अत्यर्थं 'क्रूराणि' रौद्राणि, कर्म्माणीति गम्यते, तानि च प्राणव्यपरोपणादीनि 'कुर्व्वति'त्ति करोति-क्रियया ऽभिनिर्वर्तयति, शक्तावशक्तावपि क्रूरतया तन्दुलमत्स्यवन्मनसा कृत्वा च प्रक्रमाद-

काम एव म्रियते इति सूत्रार्थः ॥ इदमेव ग्रहणकवाक्यं प्रदर्शयितुमाह-

सू. (१३३) जे गिद्धे कामभोगेसु, एगे कूडाय गच्छइ।
न मे दिट्ठे परे लोए, चक्खुदिट्ठा इमा रती ॥

वृ. 'य'इत्यनिर्दिष्टस्वरूपो गृद्धः, काम्यन्त इति कामाः भुज्यन्त इति भोगाः भुज्यन्त इति भोगाः ततश्च कामाश्च ते भोगाश्च कामभोगाः तेषु-अभिलषणीयशब्दादिषु, यद्वा कामौ च शब्दरूपाख्यौ भोगाश्च स्पर्शरसगन्धारूपाः कामभोगाः तेषु, उक्तं हि- "कामा दुविहा पन्नत्ता-सद्दा रूवा य, भोगा तिविहा पन्नत्ता, तंजहा -[illegible]" [illegible] 'एकः' असहायः कूटाय कर्मणे तन्मध्यात् कूटमिव-प्रभूतप्राणिनां यातनाहेतुत्वान्नरक इत्यर्थः, यथैव हि कूटनिपतितो मृगो व्याधैरनेकधा हन्यते, एवं नरकपतितोऽपि जन्तुः परमाधार्मिकैरिति, तस्मै कूटाय, गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ वित्यादिना चतुर्थी, 'गच्छति' याति, यद्वा यो गृद्धः 'कामभोगेष्वि'ति कामेषुस्त्री-सङ्गेषु भोगेषु-धूपनविलेपनादिषु स 'एकः' सुहृदादिसाहाय्यरहितः कूटाय गच्छति, अथवा कूटं द्रव्यतो भावतश्च, तत्र द्रव्यतो मृगादिबन्धनं, भावतस्तु मिथ्याभाषणादि, तस्मै गच्छतीत्यनेकार्थत्वात्, प्रवर्तते, स हि मांसादिलोलुपतया मृगादिबन्धनान्यारभते, मिथ्याभाषणादीनि चासेवत इति, प्रेरितश्च केनचिद्वदति -'न मे'इति न मया 'दृष्टः' अवलोकितः, कोऽसौ ?-'परलोको' भूतभाविजन्मात्मकः, कदाचिद्विषयाधिरतिरप्येवंविधैव स्यादत आह-चक्षुषा लोचनेन दृष्टा-प्रतीता चक्षुर्दृष्टा 'इय'मिति तामेव प्रत्यक्षां निर्दिशति, रम्यतेऽस्यामिति रतिः-स्पर्शनादिसम्भोगजनिता चित्तप्रह्लत्तिः, तस्यायमाशयः-कथं दृष्टपरित्यागतोऽदृष्टपरिकल्पनयाऽऽत्मानं विप्रलभेयमिति सूत्रार्थः ॥ पुनस्तदाशयमेवाभिव्यञ्जयितुमाह-

सू. (१३४) हत्थागया इमे कामा, कालिया जे अणागया।
को जाणइ परे लोए ?, अत्थि वा नत्थि वा पुनो ॥

वृ. हसन्ति तेनावृत्य मुखं घ्नन्ति वा घात्यमनेनेति हस्तस्तम् आगताः-प्राप्ताः हस्तागताः, उपमार्थोऽत्र गम्यते, ततो हस्तागता इव स्वाधीनतया, क एते ?, 'इमे' प्रत्यक्षोपलभ्यमानाः काम्यन्त इति कामाः-शब्दादयः, कदाचिदागामिनोऽप्येवंविधा एव स्युरित्याह-काले सम्भवन्तीति कालिकाः-अनिश्चितकालान्तरप्राप्तयो ये 'अनागता' भाविजन्मसम्बन्धिनः, कथं पुनरमी अनिश्चितप्राप्तय इत्याह-'को जाणइ'त्ति उत्तरस्य पुनःशब्दस्येह सम्बन्धात् कः पुनर्जानाति ?, नैव कश्चित्, यथा-परलोकोऽस्ति नास्ति वेति, अयं चास्याशयः-परलोकस्य सुकृतादिकर्मणां वाऽस्तित्वनिश्चयेऽपि 'को हि हस्तगतं द्रव्यं पादगामि करिष्यति'ति न्यायतः क इव हस्तागतान् कामानपहाय कालिककामार्थं यतेत, तत्त्वतस्तु परलोकनिश्चय एव न समस्ति, तत्र प्रत्यक्षस्याप्रवृत्तेः, अनुमानस्य तु प्रवृत्तावपि गोपालघटिकादिधूमाग्नेयनुमानवदन्यथाऽप्युपलम्भान्निश्चायकत्वासम्भवान्न ततस्तदस्तित्वनिश्चयो नास्तित्वनिश्चयो वा, किन्तु सन्देह एव, न त्वयमेवं विवेचयति-यथाऽवाप्ता अपि कामा दुरन्ततया त्यक्तुचिताः, दुरन्तत्वं च तेषां शल्यविषादिभिरुदाहरणैः प्रतीतमेव, तथा च वक्ष्यति-

"सल्लं कामा विसं कामा, कामा आसीविसोवमा।
कामे पत्थेमाणा, अकामा जंति दुग्गतिं ॥"

न हि विषादीनि मुखमधुराण्यप्यायतिविरसतया विवेकभिर्नहीयन्ते, यदपि परलोकसन्देहाभिधानं तदपि न पापपरिहारोपदेशं प्रति बाधकं, पापानुष्ठानस्यैहैव चौरपारदारिकादिषु महानर्थहेतुतया दर्शनात्, परलोकनास्तित्वानिश्चये च तत्रापि तथानर्थहेतुतया सम्भाव्यमानत्वाद्वल्मीककरप्रवेशनादिवत् प्रेक्षावद्भिः परिहर्तुमुचितत्वात्, न च परलोकास्तित्वं प्रति सन्देहः, तन्निश्चायकानुमानस्य तदहर्जातबालकस्तनाभिलाषादिलिङ्गबलोत्पन्नस्य तथाविधाध्यक्षवदव्यभिचारित्वेन तत्र तत्र समर्थितत्वादित्यलं प्रसङ्गेनेति सूत्रार्थः ॥ अन्यस्तु कथञ्चिदुत्पादितप्रत्ययोऽपि कामान् परिहर्तुमशक्नुवन्निदमाह-

मू. (१३५) जनेन सद्धिं होक्खामि, इति बालं पगब्भइ ।
काम भोगानुरागेणं, केसं संपडिवज्जइ ॥

वृ. जायत इति जनो-लोकस्तेन 'सार्द्धं' सह भविष्यामि, किमुक्तं भवति ?-बहुजनो भोगासङ्गी तदहमपि तद्गतिं गमिष्यामि, यद्वा 'होक्खामि'त्ति भोक्ष्यामि-पालयिष्यामि, यथा ह्ययं जनः कलत्रादिकं पालयति तथाऽहमपि, न हीयान् जनोऽज्ञ इति 'बालः' अज्ञः 'प्रगल्भते' धार्ष्टर्यमवलम्बते, अलीकवाचालतया च स्वयंनष्टः परानपि नाशयति न विवेचयति यथा-किन्मुन्मार्गप्रस्थितेनाविवेकिजनेन बहुनाऽपि ? मम विवेकिनः प्रमाणीकृतेन ?, स्वकृतकर्मफलभुजो हि जन्तवः, स चैवं कामभोगेषु-उक्तरूपेषु अनुरागः-अभिष्वङ्गः कामभोगानुरागः-तेन 'क्लेशम्' इह परत्र च विविधबाधात्मकं 'सम्प्रतिपद्यते' प्राप्नोतीति सूत्रार्थः ॥ यथा च कामभोगानुरागेण क्लेशं संप्रतिपद्यते तथा वक्तुमाह-

मू. (१३६) तओ दंडं समारभति तसेसु थावरेसु य ।
अट्ठाए य अनट्ठाए, भूयग्गामं विहिंसइ ॥

वृ. 'तत' इति कामभोगानुरागात् 'से'इति स धार्ष्टर्यवान् दण्डयते संयमसर्वस्वापहरणेनात्मा अनेनेति दण्डो-मनोदण्डादिस्तं 'समारभते' प्रवर्तत इति, केषु ?-त्रस्यन्ति-तापाद्युपतप्तौ छायादिकं प्रत्यभिसर्पन्तीति त्रसाः-द्वीन्द्रियादयस्तेषु, तथा शीतातपाद्युपहता अपि स्थानान्तरं प्रत्यनभिसर्पितया स्थानशीलाः स्थावरास्तेषु च, अर्थः-प्रयोजनं वित्तावाप्त्यादिः तदर्थमर्थाय, चत्य स्वयहितसम्बन्धत्वात् अनर्थाय च-यदात्मनः सुहृदादेर्वा नोपयुज्यते, ननु किमनर्थमपि कश्चिद्दण्डं समारभते, एवमेतत् तथाविधपशुपालवत् ।

तत्र सम्प्रदायः-यथैकः पशुपालः प्रतिदिनं मध्याह्नगते रवौ अजासु महान्यग्रोधतरुं समाश्रितासु तत्थात्राणतो निर्विण्णो वेणुविदलेन अजोद्गीर्णकोलास्थिभिः तस्य वटस्य पत्राणि छिद्रीकुर्वन तिष्ठति, एवं तेन स वटपादपः प्रायसश्छिद्रपत्रीकृतः, अन्यदा तत्थेगो रायपुत्तो दातियधाडितो तच्छायसमस्सितो य तस्स वडस्स सव्वाणि पत्राणि छिद्रितानि, तो तेन सो पसुपालतो पुच्छितो-केणेयाणि पत्राणि छिद्रीकृतानि ?, तेन भण्णइ-मया, एयाणि क्रीडापूर्वं छिद्रितानि, तेन सो बहुणा दव्वजाएण विलोभेउं भण्णति-सक्केसि जस्साहं भणामि तस्स अच्छीणि छिद्देउं ?, तेन भण्णति-छुड्डु अब्भासत्थो होउ तो सक्केमि, तेन नयरं नीतो, रायमग्गसन्निविट्ठे घरे ठवितो, तस्स रायपुत्तस्स भाया राया, सो तेन मग्गेण अस्सवाहणियाए निज्जइ, एएण भण्णति-एयस्स अच्छीणि पाडेहित्ति, तेन य गोलियधणुयएण भण्णति बूहि वरं, किं ते

प्रयच्छामि ?, तेन भण्णति-मज्झ तमेव गामं देहि जत्थ अच्छामि, तेन सो दिन्नो, पच्छा तेन तम्मि पच्चंतगामे अच्छ रोविओ तुंबीतो य, निप्फन्नेसु तुंबाणि गुलं सिद्धिउं तं गुडतुंबयं भुक्त्वा २ गायंति स-

अट्ठमट्ठं च सिक्खेज्जा, सिक्खियं न निरत्थयं ।
अट्ठमट्ठपसाएण, भुंजए गुडतुंबयं ॥

तेन तानि वडपत्ताणि अनट्ठाए छिद्दियाणि, अच्छीणि पुन अट्ठाए पाडियाणि । दण्डमारभत इत्युक्तं, तत्किमसावारम्भमात्र एवावतिष्ठते इत्याह-'भूयगामं'ति भूता:-प्राणिनस्तेषां ग्राम:-समूहस्तं विविधै: प्रकारैर्हिनस्ति-व्यापादयति अनेन च दण्डत्रयव्यापार उक्त इति सूत्रार्थ: ॥ किमसौ कामभोगानुरागेणैतावदेव करुते ? उतान्यदपीत्याह

मू. (१३७) हिंसे बाले मुसावाई, माईल्ले पिसुने सढे ।
भुंजमाणे सुरं मंसं, सेयमेयंति मन्नइ ॥

वृ. हिंसनशीलो हिंस्र: अनन्तरोक्तनीत्या, तथैवंविधश्च सन्नसौ 'बाल:' उक्तरूपो 'मृषा-वादी'ति अलीकभाषणशील:, 'माईल्ले'त्ति माया-परवञ्चनोपायचिन्ता तद्वान्, 'पिशुन:' परदोषोद्घाटक: 'शठ:' तत्तन्नेपथ्यादिकरणतोऽन्यथाभूतमात्मानमन्यथा दर्शयति, मण्डक-वौरवत्, अत एव च भुञ्जान: 'सुरां' मद्यं 'मांसं' पिशितं 'श्रेय:' प्रशस्यतरमेतदिति मन्यते, उपलक्षणत्वात् भाषते च-'न मांसभक्षणे दोषो, न मद्ये न च मैथुने'इत्यादि, तदनेन मनसा वचसा कायेन चासत्यत्वमस्योक्तमिति सूत्रार्थ: ॥ पुनस्तद्वक्तव्यतामेवाह-

मू. (१३८) कायसा वयसा मत्ते, वित्ते गिद्धे य इत्थिसु ।
दुहओ मलं संचिणइ, सिसुनागुव्व मट्टियं ॥

वृ. 'कायस'त्ति सूत्रत्वात् कायेन-शरीरेण वचसा-वाचा उपलक्षणत्वात् मनसा च 'मत्तो' दृप्त:, तत्र कायमत्तो मदान्धगजवत् यतस्तत: प्रवृत्तिमान्, यद्वाऽहोऽहं बलवान् रूपवान् वेति चिन्तयन् वचसा स्वगुणान् ख्यापयन् अहोऽहं सुस्वर इत्यादि वा चिन्तयन्, मनसा च मदाध्मातमानस: अहोऽहमवधारणाशक्तिसमन्विति वा मन्वानो 'वित्ते' द्रविणे 'गृद्धो' गृद्धिमान्, चशब्दो भिन्नक्रम:, तत: स्त्रीषु च गृद्ध:, तत्र वित्ते गृद्ध इति अदत्तादानपरिग्रहोपलक्षणं, तद्भाव-भावित्वात्तयो:, स्त्रीषु गृद्ध इत्यनेन मैथुनासेवित्वमुक्तं, स हि स्त्रिय: संसारसर्वस्वभूता इति मन्यते, तथा च तद्वच:-

"सत्यं वच्मि हितं वच्मि, सारं वच्मि पुन: पुन: ।
अस्मिन्नसारे संसारे, सारं सारङ्गलोचना: ॥"

तदभिरतिमांश्च मैथुनासेव्येव भवति, स एवंविध: किमित्याह-'दुहतो'त्ति द्विधा-द्वाभ्यां रागद्वेषात्मकाभ्यां बहिरन्त: प्रवृत्त्यात्मकाभ्यां वा प्रकाराभ्यां, सूत्रत्वाद्विविधं वा इहलोक-परलोकवेदनीयतया पुण्यपापात्मकतया वा, 'मूलम्' अष्टप्रकारं कर्म 'संचिनोति' बध्नाति, क इव किमित्याह-'शिशुनागो'गण्डूपदोऽलस उच्यते, स इव मृत्तिकां, स हि स्निग्धतनुतया बहीरेणुभिरवगुण्ठ्यते, तामेव चाश्नीते इति बहिरन्तश्च द्विधापि मलमुपचिनोति, तथाऽयमपि, एतद्दृष्टान्ताभिधाने त्वयमभिप्राय:-यथाऽसौ बहिरन्तश्चोपचितमल: स्वगतरविकरनिकर-

भंस्पर्शतः शुष्यशिहैव क्लिश्यति विनाशं चाप्नोति, तथाऽयमप्युपचितमलः आशुकारिकर्म्मवशात इहैव जन्मनि क्लिश्यति विनश्यति चेति सूत्रार्थः ॥ अमुमेवार्थं व्यक्तीकर्तुमाह-

मू. (१३९) *तओ पुट्ठो आयंकेण, गिलाणो परितप्पति।*
पभीओ परलोगस्स कम्मानुप्पेही अप्पणो ॥

वृ. 'ततो'त्ति तदः ततो वा दण्डारम्भणाद्युपार्जितमलतः स्पृष्टः, केन ?-'आतङ्केन' आशुघातिना शूलविसूचिकादिरोगेण तत्तद्दुःखोदयात्मकेन वा 'ग्लान'इति मन्दोऽपगतहर्षो वा परीति-सर्वप्रकारं तप्यते, किमुक्तं भवति ?-बहिरन्तश्च खिद्यते, 'प्रभीत'इति प्रकर्षेण त्रस्तः, कुतः ?, 'परलोगस्स'त्ति परलोकात्, सुब्व्यत्ययेन गच्छन्त्यर्थे षष्ठी, किमिति ?-क्रियत इति कर्म-क्रिया तदनुप्रेक्षते इत्येवंशीलः, कर्मानुप्रेक्षी, यत इति गम्यते, कस्य ?-आत्मनः, स हि हिंसालीकभाषणादिकामात्मचेष्टां चिन्तयन्न किञ्चिन्मया शुभमाचरितं, किन्तु सदैवाजगरवच्चेष्टितमिति चिन्तयंश्चेतस्यातङ्कतश्च तनावपि खिद्यते, भवती हि विषयाकुलितचेतसोऽपि प्रायः प्राणोपरमसमये ऽनुतापः, तथा चाहुः-

"भविष्यन्तीं भूतानां परिणतिमनालोच्य नियतां, पुरा यद्यत्किञ्चिद्विहितमशुभं यौवनमदात।
पुनः प्रत्यासन्ने महति परलोकैकगमने, तदेवैकं पुंसां व्यथयति जराजीर्णवपुषाम् ॥"

इति सूत्रार्थः ॥ अमुमेवार्थं व्यक्तीकर्तुमाह-

मू. (१४०) *सुया मे नरए ठाणा, असीलाणं च जा गती।*
बालाणं क्रूरकम्माणं, पगाढा जत्थ वेयणा ॥

वृ. 'सुय'त्ति श्रुतानि-आकर्णितानि 'मे' इति मया 'नरके' सीमन्तकादिनाम्नि, कानि ?-'ठाणा' इति लिङ्गव्यत्ययेनोत्पत्तिस्थानानि घटिकालयादीनि येष्वतिसंपीडिताङ्गा दुःखमाकृष्यमाणाः बहिर्निष्क्रामन्ति जन्तवः, यद्वा नरके-रत्नप्रभादिनरकपृथिव्यात्मके स्थानानि सीमन्तकाप्रतिष्ठानादीनि कुम्भीवैतरण्यादीनि वा, अथवा स्थानानिसागरोपमादिस्थित्यात्मकानि, तत्किमियताऽपि परितप्यत इत्यत आह-'अशीलानाम्' अविद्यमानसदाचाराणां या गतिर्नरकात्मिका सा च श्रुतेति सम्बन्धः कीदृशानाम् ?-'बालानाम्' अज्ञानां 'क्रूरकम्माणं' हिंस्रमृषाभाषकादीनां, कीदृशी गतिरित्याह-प्रगाढा नामात्युत्कटतया निरन्तरतया च प्रकर्षवत्यो 'यत्र' यस्यां गतौ वेद्यन्त इति वेदनाः-शीतोष्णशाल्यल्याश्लेषणादयः, तदयमत्राशयः-ममैवंविधानुष्ठानस्यैवेदृश्येव गतिरिति सूत्रार्थः ॥ तथा-

मू. (१४१) *तत्थोववाइयं ठाणं, जहा मे तमणुस्सुयं।*
आहाकम्मेहिं गच्छन्तो, सो पच्छा परितप्पति ॥

वृ. 'तत्रे'ति नरकेषु उपपाते भवमौपपातिकं 'स्थानं' स्थितिः 'यथा' येन प्रकारेण, भवतीति शेषः, 'मे' मया तदित्यनन्तरोक्तपरामर्शे 'अनुश्रुतम्' अवधारितं, गुरुभिरुच्यमानमिति शेषः, औपपातिकमिति च ब्रुवतोऽभ्युपायमाशयः-यदि गर्भजत्वं भवेत् भवेदपि तदवस्थायां छेदभेदादिनारकदुःखान्तरम्, औपपातिकत्वे त्वन्तर्मुहूर्तानन्तरमेव तथाविधवेदनोदय इति कुतस्तदन्तरसम्भवः ?, तथा च-'आहाकम्मेहि'ति आधानमाधाकरणम्, आत्मनेति गम्यते, तदुपलक्षितानि कर्माण्याधाकम्माणि, तैः आधाकर्मभिः-स्वकृतकर्मभिः, यद्वाऽऽर्षत्वात्, 'आहेति'-

आधाय कृत्वा, कर्मणीति गम्यते, तानि कर्माणि: 'गच्छन्' सन्, प्रक्रमान्नरकं, यद्वा 'यथाकर्मभि:' गमिष्यमाणगत्यनुरूपै: तीव्रतीव्रतराद्यनुभावान्वितैर्गच्छंस्तदनुरूपमेव स्थानं, 'स' इति बाल:, 'पश्चादि'त्यायुषि हीयमाने 'परितप्यते' यथा धिङ् माममदनुशायिनं, किमिदानीं मन्दभाग्य: करोमि ?, इत्यादि शोचत इति सूत्रार्थ: ॥ अमुमेवार्थं दृष्टान्तद्वारेण दृढयन्नाह-

मू. (१४२) जहा सागडिओ जाणं, समं हिच्चा महापहं।
विसमं मग्गमोतिन्नो, अक्खभग्गंमि सोयइ ॥

वृ. 'यथे'त्युदाहरणोपन्यासार्थ:, शक्नोति शक्यते वा धान्यादिकमनेन वोढुमिति शकटं तेन चरति शाकटिक:-गन्त्रीवाहक: 'जाणं'ति जानन्नवबुध्यमान: 'समम्' उपलादिरहितं 'हित्वा'त्यक्त्वा, किम् ?-महांश्चासौ विस्तीर्णतया प्राधान्येन च पन्थाश्च महापथ:, 'ऋक्पूरब्धू:पथामानक्षे इत्यकार: समासान्तस्तं, 'विषमम्' उपलादिसंकुलं 'मार्गं' पन्थानं 'ओतिन्नो'त्ति अवतीर्ण:-गन्तुमुपक्रान्त:, पठ्यते च-'ओगाढो'त्ति तत्र चावगाढ आरूढ: प्रपन्न इति चैको ऽर्थ:, अश्नीते नवनीतादिकमित्यक्षो-भू: तस्य भङ्गो-विनाश: अक्षभङ्ग: तस्मिन् पाठान्तरतश्चाक्षे भग्ने, शोचते यथा धिग् मम परिज्ञानं यज्जानन्नपीत्थमपायमवासवानिति सूत्रार्थ: ॥

मू. (१४३) एवं धम्मं विउक्कम्म, अहम्मं पडिवज्जिया।
बाले मच्चुमुहं पत्ते, अक्खे भग्गे व सोयइ ॥

वृ. 'एव'मिति शाकटिकवद् 'धर्मं' क्षान्त्यादिकं यतिधर्मं सदाचारात्मकं वा 'विउक्कम'त्ति व्यतिक्रम्य विशेषेणोल्लङ्घ्य न धर्मो ऽधर्म:, तत्र विपक्षे ऽपि वर्तते इति धर्मप्रतिपक्ष:, तं-हिंसादिकं 'प्रतिपद्य' अभ्युपगम्य 'बाल:' अभिहितरूपो मरणं-मृत्युस्तस्य मुखमिव मुखं मृत्युमुखं-मरणगोचरं 'प्राप्तो' गत:, किमित्याह-अक्षे भग्न इव शोचति, किमुक्तं भवति ?-यथा अक्षभङ्गे शाकटिक: शोचति तथा ऽयमपि स्वकृतकर्मणामिहैव मारणान्तिकवेदनात्मकं फलमनुभवन्नात्मानमनुशोचति, यथा ह्या किमेतज्ज्ञानता ऽपि मयैवमनुष्ठितमिति सूत्रार्थ: ॥ शोचनानन्तरं च किमसौ करोतीत्याह-

मू. (१४४) तओ से मरणंतंमि, बाले संतस्सइ भया।
अकाममरणं मरइ, धुत्ते वा कलिणा जिए ॥

वृ. 'तत' इत्यादङ्कोत्पत्तौ यच्छोचनमुक्तं तदनन्तरं 'से' इति स मरणमेवान्तो मरणान्तस्तस्मिन्, उपस्थित इति शेष:, 'बालो' रागाद्याकुलितचित्त: 'संत्रस्यति' समुद्विजते बिभेतीति यावत्, कुत: ?-'भयात्' नरकगतिगमनसाध्वसाद्, अनेनाकामत्वमुक्तं, स च किमेवं बिभ्यत् मरणाद्विमुच्यते ? उत नेत्याह-अकामस्य अनिच्छतो मरणमकाममरणं तेन, सूत्रे चार्षत्वाद्वितीया, 'म्रियते' प्राणांस्त्यजति, क इव कीदृश: सन् ?-'धूर्त इव' द्यूतकार इव, वाशब्दस्योपमार्थत्वात्, 'कलिना' एकेन, प्रक्रमात् दायेन, जित: सन्नात्मानं शोचति, यथा ह्यमेकेन दायेन जित: सन्नात्मानं शोचति तथा ऽसावपीत्वरैर्विपाककटुभि: संक्लेशबहुलैर्मनुजभोगैर्दिव्यसुखं हारित: शोचन्नेव म्रियत इति सूत्रार्थ: ॥ प्रस्तुतमेवार्थं निगमयितुमाह-

मू. (१४५) एयं अकाममरणं, बालाणं तु पवेइयं।
इत्तो सकाममरणं, पंडियाण सुणेह मे ॥

वृ. 'एतद्' अनन्तरमेव दुष्कृतकर्म्मणां परलोकादिभ्यता यन्मरणमुक्तं तदकाममरणं, बालानामेव, तुशब्दस्यैवार्थत्वात्, 'प्रवेदितं' प्रकर्षेण प्रतिपादितं, तीर्थकृद्गणधरादिभिरिति गम्यते। पण्डितमरणप्रस्तावनार्थमाह-'एत्तो'त्ति इतोऽकाममरणादनन्तरं 'सकाममरणं पण्डितानां सम्बन्धि 'शृणुत' आकर्णयत 'मे' मम, कथयत इत्युपस्कारः इति सूत्रार्थः ॥ यथाप्रतिज्ञातमाह

मू. (१४६) मरणंपि सपुन्नाणं, जहा मे तमणुस्सुयं।
विप्पसन्नमणाघायं, संजयाणं वुसीमओ ॥

वृ. मरणमपि आस्तां जीवितमित्यपिशब्दार्थः, 'पुण कर्म्मणि शुभे' इत्यस्माद्धातोः 'उणादयो बहुल' मिति बहुलवचनादभावे क्यपि पुण्यम्, उक्तं हि-

"पुन कर्म्मणि निर्दिष्टः शुभविशेषप्रकाशको धातुरयम्।
भावप्रत्यययोगाद्विभक्तिनिर्देशसिद्धमेतद्रूपम् ॥"

सह तेन वर्तन्त इति सपुण्यास्तेषां न त्वन्येषामपुण्यवतां, किं सर्वमपि ?, नेत्याह-'यथा' येन प्रकारेण 'मे' मम, कथयत इति गम्यते, तदित्युपक्षेपः, तत्रोपात्तम् 'अनुश्रुतम्' अवधारितं, भवद्भिरिति शेषः, सुष्ठु प्रसन्नं मरणसमयेऽप्यकलुषं कषायकालुष्यापगमान् मनः-चेतो येषां ते सुप्रसन्नमनसः महामुनयस्तेषां ख्यातं -स्वसंवेदनतः प्रसिद्धं सुप्रसन्नमनःख्यातं, यद्वा-'सुप्पसन्नेहि अक्खायं' अत्र च सुष्ठु प्रसन्नैः-पापपङ्कापगमनेनात्यन्तनिर्मलीभूतैः, शेषतीर्थकृद्भिरिति गम्यते, आख्यातं।

पठ्यते च 'विप्पसण्णमणाघायं'ति, तत्र च विशेषेण विविधैर्वा भावनादिभिः प्रकारैः प्रसन्नाऽमरणेऽप्यपहतमोहरेणुतयाऽनाकुलचेतसो विप्रसन्नाः, तत्सम्बन्धि मरणमप्युपचारा-द्विप्रसन्नं, न विद्यते आघातः तथाविधयतनयाऽन्यप्राणिनामात्मनश्च विधिवत् संलिखितशरीरतया यस्मिंस्तदनाघातं, केषां पुनरिदम् ?, उच्यते-'संयतानां' सम्यगिति-सम्यग् यतानां-पापोपरतानां, चारित्रिणामित्यर्थः, 'वुसीमतो'त्ति, आर्षत्वाद्वश्यवतां वश्य इत्यायत्तः, स चेहात्मा इन्द्रियाणि वा, वश्यानि विद्यन्ते येषां ते अमी वश्यन्तः तेषाम् अयमपरः सम्प्रदायार्थः-वसंति वा साहुगुणेहिं वुसीमंतः, अहवा वुसीमा-संविग्गा तेसिं'ति एतच्चार्थात् पण्डितमरणमेव, ततोऽयमर्थः-यथैतत् संयतानां वश्यवतां विप्रसन्नमनाघातं च सम्भवति, न तथाऽपुण्यप्राणिनाम्। 'अन्ते समाहिमरणं अभव्वजीवा न पावेंति'त्ति वचनात्, विशिष्टयोग्यता भाजामेव तत्प्राप्तिसम्भवादिति

मू. (१४७) न इमं सव्वेसु भिक्खूसुं, न इमं सव्वेसु गारिसु।
नानासीला य गारत्था, विसमसीला य भिक्खूणो ॥

वृ. 'नं' त्यवधारणफलत्वाद्वाक्यस्य नैव 'इद'मिति पण्डितमरणं 'सव्वेसु भिक्खूसु'त्ति सूत्रत्वात् सर्वेषां भिक्षूणां परदत्तोपजीविनां व्रतिनामितियावत्, किन्तु केषाञ्चिदेव परोपचित-पुण्यानुभाववतां भावभिक्षूणां, तथा च गृहस्थानां दुरापास्तमेव, अत एवाह-नेदं पण्डितमरणं 'सव्वेसु गारिसु'त्ति सर्वेषामगारिणां गृहिणां, चारित्रिणामेव तत्सम्भवात्, तथात्वे च तेषामपि तत्त्वतो यतित्वाद्, उभयत्र विषयसप्तम्यन्ततया वा नेयं, यथा चैतदेवं तथोपपत्तिमाह-नाना-अनेकविधं शीलं-व्रतं स्वभावो वा येषां ते नानाशीलाः 'अगारस्था' गृहस्थाः तेषां हि नैकरूपमेव शीलं किन्त्वनेकभङ्गसम्भवादनेकविधं, देशविरतिरूपस्य तस्यानेकधाऽभिधानात्, सर्वविरति-

ह्णस्य च तेष्वसम्भवात्, 'विषमग' आंतदुर्लक्षतयाऽतिगहनं विसदृशं वा शीलमेषां विषम-शीलाः, के ते ?-भिक्षवः, न हि सर्वेऽप्यनिदानिनोऽविकलचारित्रिणो वा तत्कालं म्रियन्ते जिनमतप्रतिपन्ना अपि, तीर्थान्तरीयास्तु दूरोत्सारिता एव, तेषु हि गृहिणम्लावदत्यन्तं नानाशीला एव, यतः केचिद्गृहाश्रमप्रतिपालनमेव महाव्रतमिति प्रतिपन्नाः, अन्ये तु सप्त शिक्षापदशतानि गृहिणां व्रतमित्याद्यनेकधैव ब्रुवते, भिक्षवोऽप्यत्यन्तं विषमशीला एव, यतस्तेषु केषाञ्चित्पञ्च-यमनियमात्मकं व्रतमिति दर्शनम्, अपरेषां तु कन्दमूलफलाशितैव इति, अन्येषामात्मतत्त्व-परिज्ञानमेवेति विसदृशशीलता, न च तेषु क्वचिदविकलचारित्रसम्भव इति सर्वत्र पण्डित-मरणाभाव इति सूत्रार्थः ॥ विषमशीलतामेव भिक्षूणां समर्थयितुमाह-

मू.(१४८) संति एगेहि भिक्खूहिं, गारत्था संजमुत्तरा।
गारत्थेहि य सव्वेहि, साहवो संजमुत्तरा॥

वृ. 'सन्ति' विद्यन्ते, एकेभ्यः' कुप्रवचनेभ्यो भिक्षुभ्यः 'गारत्थ'त्ति सूत्रत्वादगारस्थाः संयमेन-देशविरत्यात्मकेनोत्तराः-प्रधानाः संयमोत्तराः, कुप्रवचनभिक्षवो हि जीवाद्यास्ति-क्यादपि बहिष्कृताः सर्वथाऽचारित्रिणश्चेति कथं न सम्यग्दृशो देशचारित्रिणो गृहिणस्तेभ्यः संयमोत्तराः सन्तु ?, एवं सत्यगारस्थेष्वेव तदस्तित्वत्यत आह-'अगारस्थेभ्यश्च सर्वेभ्य' इति अनुमतिवर्जसर्वोत्तमदेशविरतिप्राप्तेभ्योऽपि साधवः संयमोत्तराः, परिपूर्णसंयमत्वात्तेषां, तथा च वृद्धसम्प्रदायः-एगो सावगो साहुं पुच्छति-सावगाणं साहूणं किमंतरं ?, साहुणा भण्णति सरिसवमंदरंतरं, ततो सो आउलीहूणो पुणो पुच्छति-कुलिंगीणं सावगाण य किमंतरं ?, तेण भण्णति-तदेव सरिसवमंदरंतरंति, ततो समासासितो, जतो भणियं-

"देसेक्कदेसविरया समणाणं सावगा सुविहियाणं।
जेसिं परमासंडा सतिमंपि कलं न अग्घंति॥"

तदनेन तेषां चारित्राभावदर्शनेन पण्डितमरणाभाव एव समर्थित इति सूत्रार्थः ॥ ननु कुप्रव-चनभिक्षवोऽपि विचित्रलिङ्गधारिण एवेति कथं तेभ्योऽगारस्थाः संयमोत्तराः, अत आह-

मू.(१४९) चीराजिनं निगिणिणं, जडी संघाडि मुंडिणं।
एयाइंपि न तायंति, दुस्सीलं परियागतं॥

वृ. चीराणि च-चीवराणि अजिनं च-मृगादिचर्म चीराजिनं 'निगिणिनं'ति सूत्रत्वान्नाग्न्यं 'जडि'त्ति भावप्रधानत्वान्निर्देशस्य जटित्वं, सङ्घाटी-वस्त्रसंहतिर्जनिता 'मुंडिणं'ति यत्र शिखाऽपि स्वसमयतश्छिद्यते, ततः प्राग्वत् मुण्डित्वं, 'एतान्यतो'ति निर्जनिजप्रक्रिया-विरचितव्रतिवेषरूपाणि लिङ्गान्यपि, किं पुनर्गार्हस्थ्यमित्यपिशब्दार्थः, किमित्याह- नैव त्रायन्ते भवाद्दुष्कृतकर्मणो वेति गम्यते, कीदृशम् ?-'दुःशीलं' दुराचारं 'परियागयं'ति पर्यायागतं-प्रव्रज्यापर्यायप्राप्तम्, आर्षत्वाच्च याकारस्यैकस्य लोपः, यद्वा-'दुस्सीलंपरियागयं'ति मकारोऽलाक्षणिकः, ततो दुःशीलमेव दुष्टशीलात्मकः पर्यायस्तमागतं दुःशीलपर्यायागतं, न हि कषायकलुषचेतसो बहिर्बकवृत्तिरतिकष्टहेतुरपि नरकादिकुगतिनिवारणायालं, ततो न लिङ्ग-धारणादि विशिष्टहेतुरिति सूत्रार्थः ॥ आह- कथं गृहाद्यभावेऽप्यमीषां दुर्गतिरिति ?, उच्यते-

मू.(१५०) पिंडोलए व दुस्सीले, नरगाओ न मुच्चइ।

भिक्खाए वा गिहत्थे वा, सुव्वए कम्मति दिवं ॥

वृ. 'पिंडोलए व'त्ति वाशब्दोऽपिशब्दार्थः, ततश्च 'पिंडि सङ्घाते' पिण्डयते तत्तद्गृहेभ्य आदाय सङ्घात्यत इति पिण्डः तमवलगति-संबध्नाति पिण्डावलगो-यः स्वयमाहाराभावतः परदत्तोपजीवी सोऽपि, आस्तां गृहादिमानित्यर्थः, दुःशीलः प्राग्वत्, 'नरकात्' स्वकर्मोपस्थापितात् सीमन्तकादेर्न मुच्यते, अत्र चोदाहरणं तथाविधद्रमकः, तत्र च-सम्प्रदायः- रायगिहे नवरं एगो पिंडोलओ उज्जाणियाए विनिग्गए जणे भिक्खं हिंडइ, न य तस्स केणइ किंचि दिन्नं, सो तेसिं वैभारपव्वयकडगसन्निविट्ठाणं पव्वतोवहरिं चडिऊण महतिमहालयं सिलं चालेइ, एएसिं उवरिं पाडेमित्ति रोद्दज्झाइं विच्छुट्टिऊण ततो सिलातो निवडितो सितातलं संचुण्णियसव्वकातो य मरिऊण अप्पइट्ठाणे नरए समुप्पन्नो। तर्हि किमत्र तत्त्वतः सुगतिहेतुरित्याह-'भिक्खाए व'त्ति भिक्षामत्ति अकति वा भिक्षादो भिक्षाको, वा विकल्पे, अनेन यतिरुक्तः, गृहे तिष्ठति गृहस्थः स वा, शोभनं निरतिचारतया सम्यग्भावानुगततया च व्रतं-शीलं परिपालनात्मकमस्येति सुव्रतः, 'क्रामति' गच्छति 'दिवं देवलोकं, मुख्यतो मुक्तिहेतुत्वेऽपि व्रतपरिपालनस्य दिवं क्रामतीत्यभिधानं जघन्यतोऽपि देवलोकप्राप्तिरिति ख्यापनार्थम्,

"अविराहियसामन्नस्स साहुणो सावगस्स य जहन्नो।
उववातो सोहम्मे भणितो तेलोक्कदंसीहिं॥"

अनेन व्रतपरिपालनमेव तत्त्वतः सुगतिहेतुरित्युक्तमिति सूत्रार्थः॥

यद्व्रतयोगाद्गृहस्थोऽपि दिवं क्रामति तद्वक्तुमाह-

मू.(१५१) अगारिसामाइयंगाइं, सड्ढी कारण फासए।
पोसहं दुहओ पक्खं, एगराइं न हावए॥

वृ. अगारिणो-गृहिणः सामायिकं-सम्यक्त्वश्रुतदेशविरतिरूपं तस्याङ्गानि-निःशङ्कताकालाध्ययनाणुव्रतादिरूपाणि अगारिसामायिकाङ्गानि, 'सड्ढि'त्ति सूत्रत्वात् श्रद्धा-रुचिरस्यास्तीति श्रद्धावान्, कायेनेत्युपलक्षणत्वान्मनसा वाचा च 'फासइ'त्ति स्पृशति सेवते, पोषणं पोषः, स चेह धर्मस्य तं धत्त इति पोषधः-आहारपोषधादिः, तं 'दुहतो पक्ख'न्ति तत एव द्वयोरपि सितेतररूपयोः पक्षयोश्चतुर्दशीपूर्णिमास्यादिषु तिथिषु 'एगराइं'ति अपेर्गम्यमानत्वादेकरात्रमपि, उपलक्षणत्वाच्चैकदिनमपि, 'न हावए'त्ति न हापयति-न हानिं प्रापयति, रात्रिग्रहणं च दिवा व्याकुलतया कर्तुमशक्नुवन् रात्रावपि पोषधं कुर्यात्, इह च सामायिकाङ्गत्वेनैव सिद्धेर्यदस्य भेदेनोपादानं तदादरख्यापनार्थमदुष्टमेव, यद्वा-यत एवं गृहस्थोऽपि सुव्रतो दिवं क्रामति अतोऽगारी सामायिकाङ्गानि स्पृशेत् पोषधं च न हापयेदित्युपदेशपरतया व्याख्येयमिति सूत्रार्थः॥

मू.(१५२) एवं सिक्खासमावन्नो, गिहवासेऽवि सुव्वओ।
मुच्चति छविपव्वाओ, गच्छे जक्खसलोगयं॥

वृ. 'एवम्' अमुनोक्तन्यायेन शिक्षया-व्रतासेवनात्मिकया समापन्नो-युक्तः शिक्षासमापन्नो गृहवासेऽपि, आस्तां प्रव्रज्यापर्याय इत्यपिशब्दार्थः, 'सुव्रतः' शोभनव्रतो मुच्यते, कुतः?-छविः-त्वक् पर्वाणि च-जानुकूर्परादीनि छविपर्व तद्योगादौदारिकशरीरमपि छविपर्व ततः, तदनन्तरं च 'गच्छेद्' यायात् यक्षा-देवाः समानो लोकोऽस्येति सलोकस्तद्भावः सलोकता

यक्षैः सलोकता यक्षसलोकता ताम्, इयं च देवगतावेव भवतीत्यर्थादेव गतिमिति, अनेन च पण्डितमरणावसरेऽपि प्रसङ्गतो बालपण्डितमरणमुक्तमिति सूत्रार्थः ॥

मू. (१५३) *अह जे संवुडे भिक्खू, दुण्हमेगयरे सिया ।*
सव्वदुक्खपहीणे वा, देवे वावि महिड्ढिए ॥

वृ. 'अथे' त्यनुप्रदर्शने 'य' इत्यनुद्दिष्टनिर्देशे 'संवृत' इति पिहितसमस्ताश्रवद्वारः 'भिक्षु'रिति भावभिक्षुः, स च द्वयोरन्यतरः एकतरः 'स्यात्' भवेद्, ययोर्द्वयोरन्यतरः स्यात् तावाह-सर्वाणि-अशेषाणि यानि दुःखानि क्षुत्पिपासेष्टवियोगानिष्टसंयोगादीनि तैः प्रकर्षेण-पुनरनुत्पत्त्यात्मकेन हीनो-रहितः सर्वदुःखप्रहीणः, स्यादिति सम्बन्धः, यद्वा-सर्वदुःखानि प्रहीणान्यस्येति सर्वदुःखप्रहीणः आहितात्न्यादेराकृतिगणत्वात् निष्ठान्तस्य परनिपातः, स च सिद्ध एव, ततः स वा देवो वा, अपिः सम्भावने, सम्भवति हि संहननादिवैकल्यतो मुक्त्यनवाप्तौ देवोऽपि स्यादिति, कीदृग् ? महती ऋद्धिः-सुखादिसम्पदस्येति महर्द्धिक इति सूत्रार्थः ॥ आह-गृह्यमाणो देवो वा स्यादिति, यत्र चासौ देवो भवति तत्र कीदृशा आवासाः ? कीदृशाश्च देवा ? इत्याह-

मू. (१५४) *उत्तराइं विमोहाइं, जुइमंताणुपुव्वसो ।*
समाइण्णाइं जक्खेहिं, आवासाइं जसंसिणो ॥

मू. (१५५) दीहाउया दित्तिमंता, समिद्धा कामरूविणो ।
अहुणोववन्नसंकासा, भुज्जो अच्चिमालिप्पभा ।

वृ. 'उत्तरा' उपरिवर्तिनोऽनुत्तरविमानाख्याः, सर्वोपरिवर्तित्वात्तेषां, विमोहा इवात्यन्तवेदादिमोहनीयोदयतया विमोहाः, अथवा मोहो द्विधा-द्रव्यतो भावतश्च, द्रव्यतोऽन्धकारो भावतश्च मिथ्यादर्शनादिः, स द्विविधोऽपि सततरत्नोद्योततत्वेन सम्यग्दर्शनस्यैव च तत्र सम्भवेन विगतो येषु ते विमोहाः, द्युतिः-दीप्तिरत्यतिशायिनी विद्यते येषु ते द्युतिमन्तः, 'अनुपुव्वसो'त्ति प्राग्वदनुपूर्वतः क्रमेण विमोहादिविशेषणविशिष्टाः, सौधर्मादिषु ह्यनुत्तरविमानावसानेषु पूर्वपूर्वापेक्षया प्रकर्षवन्त्येव विमोहत्वादीनि, 'समाकीर्णा' व्याप्ता 'यक्षैः' देवैः, आ-समन्ताद्वसन्ति तेष्विति-त्यावासाः, प्राकृतत्वाच्च सर्वत्र नपुंसकतया निर्देशः, देवास्तु तत्र 'यशस्विनः' श्लाघान्विताः, दीर्घसागरोपमपरिमिततया आयुरेषामिति दीर्घायुषः, 'ऋद्धिमन्तो' रत्नादिसम्पदुपेताः 'समिद्धा' अतिदीप्ताः, 'कामरूपिणः' कामः-अभिलाषस्तेन रूपाणि कामरूपाणि तद्वन्तः, विविध-वैक्रियकरणशक्त्यन्विता इत्यर्थः, न चैतदनुत्तरेष्वनुपपन्नं विशेषणमिति वाच्यं, विकरणशक्तेस्तत्रापि सत्त्वात्, 'अधुनोपपन्नसङ्काशाः' प्रथमोत्पन्नदेवतुल्याः, अनुत्तरेषु हि वर्णद्युत्यादि यावदायुस्तुल्यमेव भवति, 'भूयोऽर्चिमालिप्रभा' इति, भूयःशब्दः प्राचुर्ये, ततः प्रभूतादित्यदीप्तयो न ह्येकस्यैवादित्यस्य तादृशी द्युतिरस्तीति भूयोग्रहणमिति सूत्रार्थः ॥ उपसंहर्तुमाह-

मू. (१५६) *ताणि ठाणाइं गच्छंति, सिक्खित्ता संजमं तवं ।*
भिक्खाए वा गिहत्थे वा, जे संतिपरिनिव्वुडा ॥

वृ. 'तानि' अभिहितरूपाणि तिष्ठन्त्येषु सुकृतिनो जन्तव इति स्थानानि-आवासात्मकानि 'गच्छन्ति' यान्ति, उपलक्षणत्वाद्गता गमिष्यन्ति च, उपलक्षणं चैतत् सौधर्मादिगमनस्य, तत्रापि तेषां केषाञ्चिद्गमनसम्भवात्, 'शिक्षित्वा' अभ्यस्य 'संयमं' सप्तदशभेदं 'तपो' द्वादश-

भेदं, क इत्याह-'भिक्खाए वा गिहत्थे व'त्ति प्राकृतत्वाद्वचनव्यत्ययेन भिक्षाको वा गृहस्थो वा भावतो यतय एवेतियावत्, अत एवाह-'जे' इति ते शान्त्या उपशमेन परिनिर्वृताः-शीतीभूता विध्यातकषायानलाः शान्तिपरिनिर्वृताः, यद्वा-ये केचन 'सन्ति' विद्यन्ते परिनिर्वृताः, अत्र च देवो वा स्यादित्येकवचनप्रक्रमेऽपि यद्बहुवचनाभिधानं तद्याप्त्यर्थं, ततो न य एक एवेश्वराद्यनुगृहीतः स एवं सम्यग्दर्शनादिमानपि दिवं क्रामति किन्तु सर्वोऽपि इत्युक्तं भवतीति सूत्रार्थः ॥ एतच्चाकर्ण्य मरणेऽपि यथाभूता महात्मानो भवन्ति तथाऽऽह-

मू. (१५७) *तेसिं सुच्चा सपुज्जाणं, संजयाणं वुसीमओ ।*
न संतसंति मरणंते, सीलवंता बहुस्सुआ ॥

वृ. 'तेषाम्' अनन्तरोपाहितस्वरूपाणां भावभिक्षूणां 'श्रुत्वा' आकर्ण्योक्तरूपस्थानावाप्तिमिति शेषः, कीदृशाम् ? 'सत्पूज्यानां' सतां पूजार्हाणां, सतां वा पूजा येषां ते सत्पूजास्तेषां 'संयतानां' संयमवतां 'वुसीमओ'त्ति प्राग्वत्, 'न संत्रस्यन्ति' नोद्विजन्ते, कदा ?-मरणे मरणेन वाऽन्तो मरणान्तरस्तस्मिन् आवीचिमरणोपेक्षया वाऽन्त्यमरणे, प्राकृतत्वाच्च परिनिपातः, समुपस्थित इति शेषः, 'शीलवन्तः' चारित्रिणो 'बहुश्रुता' विविधागमश्रवणावदातीकृतमतयः, इदमुक्तं भवति-य एवाविदितधार्मिकगतयोऽनुपार्जितधर्माणश्च त एव मरणाद्उद्विजन्ते, यथा क्वास्माभिर्भूत्वा गन्तव्यमिति, उपार्जितधर्माणस्तु धर्मफलमवगच्छन्तो न कुतोऽप्युद्विजन्ते, यथा-क्वास्माभिर्भूत्वा गन्तव्यं यदुक्तम्

"चरितो निरुपक्लिष्टो धर्म्मो हि मयेति निर्वृतः स्वस्थः ।
मरणादपि नोद्विजते कृतकृत्योऽस्मीति धर्म्मात्मा ॥"

इति सूत्रार्थः ॥ इत्थं सकामाकाममरणस्वरूपमभिधाय शिष्योपदेशमाह-

मू. (१५८) *तुलिया विसेसमायाय, दयाधम्मस्स खंतिए ।*
विप्पसीइज्ज मेधावी, तहाभूएण अप्पणा ॥

वृ. 'तोलयित्वा' परीक्ष्यात्मानं धृतिदार्ढ्यादिगुणान्वितमिति गम्यते, 'विशेषं' प्रक्रमाद्भक्तपरिज्ञादिकं मरणभेदम् 'आदाय' बुद्ध्या गृहीत्वाऽभ्युपगम्येतियावत्, दयाप्रधानो धर्म्मो दयाधर्म्मो-दशविधयतिधर्मरूपः तस्य सम्बन्धिनी या क्षान्तिस्तया, उपलक्षत्वात् मार्दवादिभिश्च, 'विप्रसीदेत्' विशेषेण प्रसन्नो भवेत्, न तु मरणाद्उद्विजेतेति भावः, 'मेधावी' मर्यादावर्ती 'तथाभूतेन' उपशान्तमोहोदयेन, यदिवा-यथैव मरणकालात्प्रागनाकुलचेता अभूत् मरणकालेऽपि तथैवावस्थितेन तथाभूतेनात्मना स्वयमयमपरकल्पोऽपि विप्रसीदेत्-कषायपङ्कापगमतः स्वच्छतां भजेत् न तु कृतद्वादशवर्षसंलेखनतथाविधतपस्विवत्रिजांलोभङ्गादिना कषायितामवलम्बेत मेधावी, किं कृत्वा ?- तोलयित्वा बालमरणपण्डितमरणे, ततश्च 'विशेषं' बालमरणात् पण्डितमरणस्य विशिष्टत्वलक्षणमादायगृहीत्वा तथा दयाधर्मस्येति, चशब्दस्य गम्यमानत्वात्, दयाधर्म्मस्य च-यतिधर्म्मस्य विशेषं-शेषधर्म्मातिशायित्वलक्षणमादायेति सम्बन्धः, कया विप्रसीदेत् ? क्षान्त्या, तथाभूतेनेति निष्कषायेणात्मनोपलक्षित इति सूत्रार्थः ॥

मू. (१५९) *तओ काले अभिप्पेए, सड्ढी तालीसमंतिए ।*
विनएज्ज लोमहरिसं, भेयं देहस्स कंखए ॥

वृ. 'तत' इति कषायोपशमानन्तरं 'काले' मरणकाले 'अभिप्रेते' अभिरुचिते, कदा च मरणमभिप्रेतम् ?, यदा योगा नोत्पसर्प्पयन्ति, 'सड्ढि'त्ति प्राग्वत् श्रद्धावान्, तादृशमिति भयार्त्तं 'अन्तिके' समीपे गुरूणां मरणस्य वा 'विनयेद्' विनाशयेत्, कम् ?-लूनाति लीयन्ते वा तेषु यूका इति लोमानि तेषां हर्षो लोमहर्षस्तं-रोमाञ्च, हा ! मम मरणं भविष्यतीति भयाभिप्राय-सम्प्राप्यं, किं च-'भेदं' विनाशं 'देहस्य' शरीरस्य काङ्क्षेदिव काङ्क्षेत्, त्यक्ततत्परिकर्म्मत्वात्, अथवा 'तालिस'न्ति सुब्व्यत्ययात् तादृशो यादृशः प्रव्रज्याप्रतिपत्तिकाले संलेखनाकाले वा अन्तकालेऽपि तादृशः श्रद्धावान् सन्, उक्तं हि-'जाए सद्धाए निक्खंतो, परियायट्ठाणमुत्तमं। तमेव अनुपालेज्ज'न्ति, ईदृशश्च परीषहोपसर्गजं लोमहर्षं विनयेदिति सम्बन्धः इति सूत्रार्थः ॥

मू. (१६०) *अह कालंमि संपत्ते, आघायाय समुच्छ्यं।*
सकाममरणं मरति, तिण्हमन्नयरं मुनी ॥

वृ. 'अथे'ति मरणाभिप्रायानन्तरं 'काल'इति मरणकाले सम्प्राप्ते 'निप्फाइया य सोसा' इत्यादिना क्रमेण समायाते 'आघाताय'त्ति आर्षत्वात् आघातयन् संलेखनादिभिरुपक्रमकारणैः समन्ताद् घातयन्-विनाशयन्, कं ?-समुच्छ्रयम्-अन्तः कार्मणशरीरं बहिरौदारिकं, यद्वा-'समुस्सयं'ति सुब्व्यत्ययात्समुच्छ्रयस्याघाताय-विनाशाय काले सम्प्राप्त-भक्तपरिज्ञेङ्गिनी-पादपोपगमानानामन्यतरेण, सूत्रत्वात् सर्वत्र विभक्तिव्यत्ययः, 'मुनिः' तपस्वीति सूत्रार्थः ॥

इतिः परिसमाप्तौ, ब्रवीमिति प्राग्वत् ॥ साम्प्रतं नयास्तेऽपि पूर्ववत्।

अध्ययनं ५ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितासम्पादिता उत्तराध्ययनसूत्रे पञ्चमअध्ययनस्य भद्रबाहुस्वामिविरचिता निर्युक्तिः एवं शान्त्याचार्यविरचिता टीका परिसमाप्ता ॥

अध्ययनं-६ क्षुल्लक निर्ग्रन्थीयम्

वृ. ॥ उक्तं पञ्चममध्ययनं, साम्प्रतं षष्ठमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने मरणविभक्तिरुक्ता, तत्रापि चानन्तरं पण्डितमरणं, तच्च 'विरयाण पंडियं बेंति'त्ति वचना-द्विरतानामेव, न चैते विद्याचरणविकला इति तत्-स्वरूपमनेनोच्यते, इत्यनेन सम्बन्धेनाया-तस्याध्ययनस्य महापुरुषैव चत्वार्यनुयोगद्वाराणि भवन्तीत्यादिचर्चस्तावद्यावन्नामनिष्पन्ननिक्षेपे क्षुल्लकनिर्ग्रन्थीयमिति नाम, ततः क्षुल्लकस्य निर्ग्रन्थस्य च निक्षेपः कार्यः, तत्र क्षुल्लकस्य विपक्षो महान्, तदपेक्षत्वात् क्षुल्लकस्य, इति तन्निक्षेपे निक्षिप्तमेव तद् भवतीत्यभिप्रायेणाह-

नि.[२३६] नामं ठवणा दविए खित्ते पहाण पइ भावो।
एएसि महंताणं पडिवक्खो खुल्लया हुंति ॥

वृ. अत्र नामस्थापने क्षुण्णे, महच्छब्दश्च प्रक्रमात् सर्वत्र गम्यते, तत्रागमतो ज्ञाताऽनुपयुक्तो द्रव्यमहत्, नोआगमतो ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तं द्रव्यमहद् अचित्तमहास्कन्धो दण्डादि-करणेन यश्चतुर्भिः समयैः सकललोकमापूरयति, क्षेत्रमहत् लोकालोकव्याप्याकाशं, कालमहद् अनागताद्धा, प्रधानमहत्त्रिधा-सचित्तमचित्तं मिश्रं च, तत्र सचित्तं द्विपदं चतुष्पदमपदं च,

तत्र द्विपदं तीर्थकृत चतुष्पदं सरभः अपदं पद्मादिहृदोत्पन्नं पद्मम्, अचित्तं चिन्तामणिः, मिश्रं तीर्थकृदेव राज्याभिषेकादिष्वलंकृतः, प्रतिमहत् यदन्यापेक्षया महदुच्यते, यथा सर्षपाच्चनकक्षनकाद्बदरमित्यादि, भावमहत् प्राधान्यः क्षायिको भावः कालतः पारिणामिकोऽनाद्यनन्तजीवाजीवत्वादिरूपत्वात्तस्य आश्रयतः औदयिको बहुतरजीवाश्रयत्वात् तस्य, तथा च वृद्धाः-''आसयओ ओदयितो भावो, तंमि भावे बहुतरा जीवा वट्टंति'' पारिणामिकाविवक्षया चैतत् सम्भाव्यते, अतः पारिणामिक एवाश्रयतो महान्, अशेषजीवाजीवद्रव्याश्रयत्वात्, प्रस्तुतमर्थमाह-'एतेषाम्' अनन्तरमुक्तानां नामादिमहतां 'प्रतिपक्षो' विपक्षः क्षुल्लकानि भवन्ति, तत्रापि नामस्थापने प्रतीते, द्रव्यतः परमाणुः, क्षेत्रतः आकाशप्रदेशः, कालतः समयः, प्राधान्यतः सचित्ताचित्तमिश्रभेदतस्त्रिधा, तत्र सचित्तं द्विपदमाहारकं शरीरं चतुष्पदं सिंहः अपदं लवङ्गपुष्पम्, अचित्तं हीरकः, मिश्रं जन्मसमयानन्तरमलंकृतस्तीर्थकृत्, प्रतिक्षुल्लकमामलकाद्बदरं बदराच्चनक इत्यादि, भावक्षुल्लकं क्षायिको भावः, उक्तं हि वृद्धैः-'सव्वत्थोवा जीवा खाइए भावे वट्टंति'' सांसारिकसत्त्वापेक्षं चैतद्, अन्यथौपशमिक एव सर्वस्तोकतया भावक्षुल्लकं सम्भवतीति गाथार्थः ॥ इत्थं क्षुल्लकनिक्षेपमभिधाय निर्ग्रन्थनिक्षेपमाह-

नि.[२३७] निक्खेवो नियंठेमि चउव्विहो दुविहो व दव्वंमि ।
आगमनोआगमओ नोआगमतो य सो तिविहो ॥

वृ. 'निक्षेपो' न्यासः 'नियंठेमि'त्ति निर्ग्रन्थे निर्ग्रन्थविषयः 'चतुर्विधो' नामस्थापनाद्रव्यभावभेदात्, तत्र नामस्थापने क्षुण्णे, द्विविधो भवति द्रव्ये आगमनोआगमतश्च, तत्रागमतः प्राग्वत्, नोआगमतश्च 'स' इति निर्ग्रन्थः 'त्रिविधः' त्रिभेद इति गाथार्थः ॥ त्रैविध्यमेवाह-

नि.[२३८] जाणगसरीरभविए तव्वतिरित्ते य निण्हगाईसुं ।
भावंमि नियंठो खलु पंचविहो होइ नायव्वो ॥

वृ. 'जाणगसरीरभविए'त्ति ज्ञशरीरनिर्ग्रन्थो भव्यशरीरनिर्ग्रन्थश्च पश्चात्कृतपुरस्कृतनिर्ग्रन्थपर्यायतयाऽयं घृतकुम्भ इत्यादिन्यायतः प्राग्वद्भावनीयः, तद्व्यतिरिक्तश्च निह्नवादिषु, आदिशब्दात् पार्श्वस्थादिपरिग्रहः, भावनिर्ग्रन्थोऽप्यागमतो नोआगमतश्च, तत्रागमतस्तथैव, नोआगमतस्तु स्वत एवाह निर्युक्तिकृत- भावे निर्ग्रन्थः, खलुर्वाक्यालङ्कारे, 'पञ्चविधः' पञ्चभेदो भवति ज्ञातव्य इति गाथार्थः ॥ पञ्चविधनिर्ग्रन्थस्वरूपं च वृद्धसम्प्रदायादवसेयं, स चायम्-

नोआगमतो नियंठत्ते वट्टमाणा पञ्च, तंजहा-पुलाए बकुसे कुसीले नियंठे सिणाए। पुलातो पंचविहो, जो आसेवणं प्रति, नानपुलातो दंसणपुलाओ चरित्तपुलाओ लिंगपुलातो अहासुहुमपुलागोत्ति। पुलागो नाम असारो, जहा धन्नेसु पलंजी, एवं नानदंसणचरित्तणिस्सारतं जो उवेति सो पुलागो, लिंगपुलागो लिंगाउ पुलागी होंतो, अहासुहुमो य एएसु चेव पंचसुवि जो थोव थोवं विराहेति, लद्धिपुलाओ पुन जस्स देविंदरिद्धिसरिसा रिद्धी, सो सिंगणादियकज्जे समुप्पण्णे चक्कवट्टिंपि सबलवाहणं चुण्णेउं समत्थो।

बउसा सरीरोपकरणविभूषाऽनुवर्तिनः ऋद्धिशस्कामाः सातगौरवाश्रिताः अविविक्तपरिवाराः छेदशबलचारित्तजुत्ता निग्गंथा बउसा भण्णंति, ते पंचविहा, तंजहा-आभोगबकुसा अनाभोगबकुसा संवुडबकुसा असंवुडबकुसा अहासुहुमबकुसा। आभोगबकुसा आभोगेत

जो जाणंतो करेइ, अनाभोगेन अयाणंतो, संबुडो मूलगुणाइसु, असंवुडो तेसु चेव, अहासुहुम-बकुसो अच्छासु पूसिया अवण्णेति सरीरं वा धूलिमाइ अवण्णेति।

कुत्सितं शीलं यस्य पञ्चसु प्रत्येकं ज्ञानादिषु, सो कुसीलो दुविहो-पडिसेवणाकुसीलो कसायकुसीलो, सम्माराहणविवरीया पडिगया वा सेवणा पडिसेवणा पंचसु नाणाइसु, कसायकुसीलो जस्स पंचसु नाणाइसु कसाएहिं विराहणा कज्जति सो कसायकुसीलोत्ति।

नियंठो अब्भितरबाहिरगंथनिग्गतो, सो उवसंतकसातो खीणकसातो वा अंतोमुहुत्तकालितो, सो पंचविहो-पढमसमयनियंठो अपढमसमयनियंठो, अहवा चरमसमयनियंठो अचरमसमय-नियंठो अहासुहुमनियंठोत्ति, अंतोमुहुत्तनियंठकालसमयरासीए पढमसमए पडिवज्जमाणो पढमसमयनियंठो, सेसेसु समयएसु वट्टमाणो अपढमसमयनियंठो, अंतिमे समए वट्टमाणो चरमसमयनियंठो, अचरमा-आदिमज्झा, अहासुहुमो एएसु सव्वेसुऽवि।

सिणातो-स्नातको मोहणिज्जाइघातियचउकम्मावगतो सिणातो भण्णति, सो पंचविहो-अच्छवी असबलो अकम्मंसो संसुद्धनाणदंसणधरो अरहा जिनो केवली, अच्छवी-अव्यथकः, सबलो सुद्धसुद्धो एगंतसुद्धो असबलो, अंशा-अवयवाः कर्मणस्ते अवगया जस्स सो अकम्मंसो, संसुद्धाणि नानदंसणाणि धारेति जो सो संसुद्धणाणदंसणधरो, पूजामर्हतीति अरहा, अथवा नास्य रहस्यं विद्यत इति अरहा, जितकषायत्वाज्जिनः एसो पंचविहो सिणायगो।

भा.[३] तत्थ नियंठपुलातो बकुसकुसीलो नियंठ न्हातो य।
तत्थ पुलाओ दुविहो आसेवण लद्धितो चेव॥

भा.[४] पुलागबकुसकुसीला नियंठसिणायगा य नायव्वा।
एएसिं पंचण्हवि होइ विभासा इमा कमसो॥

भा.[५] तत्थ पुलातो दुविहो लद्धिपुलातो तहेव इयरो वा।
लद्धिपुलातो संघाइकज्ज इयरो य पंचविहो॥

भा.[६] नाणे दंसणचरणे लिंगे अहसुहुमए य नायव्वो।
नाणे दंसणचरणे तेसिं तु विराधन असारो॥

भा.[७] लिंगपुलातो अन्नं निक्कारणतो करेति सो लिंगं।
मनसा अकप्पियाईनिसेवओ होयहासुहुमो॥

भा.[८] सरीरे उवकरणे वा बाउसियत्तं दुहा समक्खायं।
सुक्किलवत्थाणि धरे देसे सव्वे सरीरंमि॥

भा.[९] आभोगमनाभोगं संबुडमसंवुडे अहासुहुमे।
सो दुविहोऽवि बउसो पंचविहो होइ नायव्वो॥

भा.[१०] आभोगे जाणंतो करेति दोसं तहा अनाभोगे।
मुलुत्तरेहि संबुडो विवरीय असंबुडो होति॥

भा.[११] अच्छिमुहमज्जमाणो होइ अहासुहुमतो तहा बउसो।
पडिसेवणाकसाए होइ कुसीलो दुहा एसो॥

भा.[१२] नाणे दंसणचरणे तवे य अहसुहुमए य बोद्धव्वे।

पडिसेवणाकुसीले पंचविहो ऊ मुणेयव्वो ॥

भा.[१३] नाणादी उवजीवति अहसुहुमो अहा इमो मुणेयव्वो ।
सातिज्जंतो गणं वच्चति एसो तवच्चरणी ॥

भा.[१४] एमेव कसायंमिवि पंचविहो होइ ऊ कुसीलो उ ।
कोहेणं विज्जाति पउंजए एव मानादि ॥

भा.[१५] एमेव दंसणंमिवि सावं पुण देति ऊ चरित्तंमि ।
मनसा कोहाईणि उ करेइ अह सो अहासुहुमो ॥

भा.[१६] पढमापढमा चरिमे अचरिम सुहुमे य होंति निग्गंथे ।
अच्छवि अस्सवले या अकम्मसंसुद्ध अरहजिनो ॥

वृ. ते च संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपातस्थानविकल्पतः साध्याः, एते पुलाकादयः, पञ्च निर्ग्रन्थविशेषाः एभिः संयमादिभिरनुगमविकल्पैः साध्य् भवन्ति, तत्र संयमे तावत् पुलाकबकुशकुशीलाः एए तिन्निवि दोसु संजमेसु-सामाइते छेओवट्ठावणीए य. कसाय-कुसीला दोसु- परिहारविसुद्धीए सुहुमसंपराए य इति सम्प्रदायः । प्रज्ञप्तिस्त्वाह- कसायकुसीले णं पुच्छा ?, सामाइयसंजमे वा हुज्जा, जाव सुहुमसंपरायसंजमे वा हुज्जा, नो अहक्खायसंजमे हुज्जा, नियंठा सिणागया य एए दोऽवि अहक्खायसंमजे" पुलागबकुसपडिसेवणाकुसीला य उक्कोसेणं अभिन्नदसपुव्वधरा कसायकुसीलनिर्ग्रन्थौ चतुर्दशपूर्वधरौ ।

जघन्येन पुलाकस्य श्रुतमाचारवस्तु नवमपूर्वे, बकुशकशीलानिर्ग्रन्थानां श्रुतमष्टौ प्रवचन-मातरः, श्रुतापगतः केवली स्नातक इति सम्प्रदायाभिप्रायः । प्रज्ञप्त्यभिप्रायस्तु-"पुलाए णं भंते ! केवतियं सुयं अहिज्जेज्जा ?, गोयमा ! जहन्नेणं नवमस्स पुव्वस्स तइयं आयारवत्थुं, उक्कोसेणं नव पुव्वाइं अहिज्जेज्जा" ।

इदानीं प्रतिसेवना-पञ्चानां मूलगुणानां रात्रिभोजनस्य च पराभियोगाद्बलात्कारेण अन्यतमत् प्रतिसेवमानः पुलाको भवति, मैथुनमेवेत्येके, प्रज्ञप्तिस्तु-"पुलाए णं पुच्छा, जाव मूलगुणे पडिसेवेमाणे पंचण्हं आसवाणं अन्नयरं पडिसेवेज्जा, उत्तरगुणे पडिसेवेमाणे दसविहस्स पच्चक्खाणस्स अन्नयरं पडिसेवेज्जा" बकुशो द्विविधः-उपकरणबकुशः शरीरबकुशश्च, तत्रो-पकरणाभिष्वक्तचित्तो विविधविचित्रमहाधनोपकरणपरिग्रहयुक्तः विशेषयुक्तोपकरण-काङ्क्षायुक्तो नित्यं तत्प्रतिकारसेवी भिक्षुरुतकरणबकुशो भवति, शरीराभिष्वक्तचित्तो विभूषार्थं *तत्प्रतिकारसेवी शरीरबकुशः ।*

प्रतिसेवनाकुशीलो मूलगुणानविराधयन्नुत्तरगुणेषु काञ्चिद्विराधनां प्रतिसेवते, प्रज्ञप्तिस्तु "बकुसे णं पुच्छा, जाव नो मूलगुणपडिसेवए होज्जा, उत्तरगुणपडिसेवए हुज्जा, पडिसेवणा-कुसीले जहा पुलाए" कषायकुशीलनिर्ग्रन्थस्नातकानां प्रतिसेवना नास्ति ।

तीर्थमीदानीं, सर्वेषां तीर्थङ्कराणां तीर्थेषु भवन्ति, एके त्वाचार्या मन्यन्ते-पुलाकबकुश-प्रतिसेवनाकुशीलास्तीर्थे नित्यं, शेषास्तु तीर्थेऽतीर्थे वा । 'लिङ्गमिति लिङ्गं द्विविधं-द्रव्यलिङ्गं भावलिङ्गं च, भावलिङ्गं प्रतीत्य सर्वे निर्ग्रन्थलिङ्गे भवन्ति, द्रव्यलिङ्गं प्रतीत्य भाज्याः । लेश्याः पुलाकस्योत्तरास्तिस्रो लेश्या भवन्ति, बकुशप्रतिसेवनाकुशीलयोः सर्वा अपि, कषायकुशीलस्य

परिहारविशुद्धैस्तिस्र उत्तराः, सूक्ष्मसम्परायस्य निर्ग्रन्थस्नातकयोश्च शुक्लैव केवला भवति, अयोगः शैलेशीप्रतिपन्नोऽलेश्यो भवति, प्रज्ञप्तिस्तु-"पुलाए णं भंते, जाव तिसु लेसासु होज्जा, तंजहा-तेउलेसाए पम्हलेसाए सुक्कलेसाए, एवं बउसस्सवि, एवं पडिसेवणाकुसीलस्सवि। कसायकुसीले पुच्छा, जाव छसु लेसासु होज्ज" त्ति।

उपपातः पुलाकस्योत्कृष्टस्थितिषु देवेषु सहस्रारे, बकुशप्रतिसेवनाकुशीलयोर्द्वाविंशति सागरोपमस्थितिष्वच्युते कल्पे, कषायकुशीलनिर्ग्रन्थयोस्त्रयस्त्रिंशत्सागरोपमस्थितिषु सर्वार्थसिद्धे, सर्वेषामपि जघन्यं पल्योपमपृथक्त्वस्थितिषु सौधर्मे, प्रज्ञप्तिस्तु "कसायकुसीले जहा पुलाए, नवरं उक्कोसेणं अनुत्तरविमाणेसु, निग्गंथे णं एवं चेव, जाव देवाणिएसु उववज्जमाणे अजहन्नमनुक्कोसेणं अनुत्तरविमाणेसु उववज्जति," स्नातकस्य निर्वाणमिति।

स्थानम्-असंख्येयानि संयमस्थानानि कषायनिमित्तानि भवन्ति, तत्र सर्वजघन्यानि संयमलब्धिस्थानानि पुलाककषायकुशीलयोः, तौ युगपदसंख्येयानि स्थानानि गच्छतः, ततः पुलाको व्युच्छिद्यते, कषायकुशीलस्ततोऽसंख्येयानि स्थानान्येकाकी गच्छति, ततः कषायकुशीलप्रतिसेवनाकुशीलबकुशा युगपदसङ्ख्येयानि स्थानानि गच्छन्ति, ततो बकुशो व्युच्छिद्यते, ततोऽसंख्येयानि स्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते, ततोऽसङ्ख्येयानि स्थानानि गत्वा कषायकुशीला व्युच्छिद्यते, अत ऊर्ध्वमकषायस्थानानि गत्वा निर्ग्रन्थः प्रतिपद्यते, सोऽप्यसङ्ख्येयानि स्थानानि गत्वा व्युच्छिद्यते, प्रज्ञप्तिस्तु-"नियंठस्स णं भंते! केवइया णं संजमठाणा पन्नत्ता?, गोयमा? एगे अजहन्नमुक्कोसए संजमठाणे पन्नत्ते" अत एव ऊर्ध्वमेकमेव स्थानं गत्वा स्नातको निर्वाणं प्राप्नोति, एषां संयमलब्धिरुत्तरोत्तरस्यानन्तगुणा भवतीति।

भा.[१७] संयम सुय पडिसेवण तित्थे लिंगे य लेस उववाए।
ठाणं च पति विसेसो पुलागमाईण जोएज्जा॥

भा.[१८] पुलाग बकुसकुसीला सामाइयछेयसंजमे होंति।
होंति कसायकुसीलो परिहारे सुहुमरागे य॥

भा.[१९] निग्गंथो य सिणातो अहखाए संजमे मुणेयव्वो।
दसपुव्वधरुक्कोसा पडिसे पुलाय बउसा य॥

भा.[२०] चोद्दसपुव्वधरातो कसायनियंठा य होंति नायव्वा।
ववगयसुतो य केवलि मूलासेवीपुलाओ य॥

भा.[२१] चित्तलवत्थासेवि बलाभिओगेण सो भवति बउसो।
मूलगुण उत्तरगुणे सरीरबउसो मुणेयव्वो॥

भा.[२२] न्हाय कसायकुसीले निग्गंथाणं च नत्थि पडिसेवा।
सव्वेसुं तित्थेसुं होंति पुलागादि य नियंठा॥

भा.[२३] लिंगे उ भावलिंगे सव्वेसिं दव्वलिंग भयणिज्जा।
लेसाउ पुलागस्स य उवरिल्लातो भवे तिन्नि॥

भा.[२४] बकुसपडिसेवगाणं सव्वा लेसाउ होंति नायव्वा।
परिहारविसुद्धीणं तिण्हुवरिल्ला कसाए उ॥

भा.[२५] निग्गंथसुहुमयगे सुक्का लेसा तहा सिणाएसुं ।
सेलेसिं पडिवण्णो लेसातीए मुणेयव्वो ॥

भा.[२६] पुलागस्स सहस्सारे सेचगवउसाण अच्चुए कप्पे ।
सकसायणियंठाणं सव्वट्ठे न्हायगो सिद्धो ॥

भा.[२७] पुलागकुसीलाणं सव्वजहन्नाणं होंति ठाणाइं ।
वोलीणेहिं असंखेहिं होइ पुलागस्स वोच्छित्ती ॥

भा.[२८] कसायकुसीलो उवरिं असंखिज्जाइं तु तत्थ ठाणाइं ।
पडिसेवनबउसे वा कसायकुसीलो तओऽसंखा ॥

भा.[२९] वोच्छिन्ने उ बउसो उवरिं पडिसेवना कसाओ य ।
गंतुमसंखिज्जाइं छिज्जइ पडिसेवनकुसीलो ॥

भा.[३०] उवरिं गंतुं छिज्जति कसायसेवी ततो हु सो नियमा ।
उड्ढं एगट्ठाणं निग्गंथसिणायगाण तु ॥

वृ. अत्र च यत्पुलाकादीनां मूलोत्तरगुणविराधकत्वेऽपि निर्ग्रन्थत्वमुक्तं तज्जघन्यमध्यमोत्कृष्टोत्कृष्टतरादिभेदतः संयमस्थानानामसङ्गतया तदात्मकतया च चारित्रपरिणतेरिति भावनीयं। यदप्येषां संयमित्वेऽपि षड्लेश्याभिधानं तदप्याद्यानां भावपरावृत्तिदेक्ष्य 'आगारभावमायाए वा से सिया पलिभागमायाए वा से सिया' इत्याद्यागमप्रामाण्यादविरुद्धमेव, इत्यलं प्रसङ्गेनेति ॥ सम्प्रति निर्युक्तिरनुसियते, तत्र च 'भावे निर्ग्रन्थः खलु: पञ्चविधो भवति ज्ञातव्यः' इत्यनेन बाह्याभ्यन्तरहेतुका निर्ग्रन्थभेदा उक्ताः, साम्प्रतं त्वान्तरसंयमस्थाननिबन्धनांस्तद्भेदानाह-

नि.[२३९] उक्कोसो उ नियंठो जहन्नओ चेव होइ नायव्वो ।
अजहन्नमनुक्कोसा हुंति नियंठा असंखिज्जा ॥

वृ. 'अजहन्नमनुक्कोस'त्ति अजघन्या अनुत्कृष्टा भवन्ति निर्ग्रन्थाः असङ्ख्येयाः, संयमस्थानापेक्षया च निर्ग्रन्थानां जघन्यत्वमुत्कृष्टत्वमजघन्यानुत्कृष्टत्वं वा ज्ञेयं, तथा च वृद्धाः-जो उक्कोसएसु संजमट्ठाणेसु वट्टति सो उक्कोसगणियंठो भण्णति, एवं जहन्नओ जहन्नएसु, सेसो अजहन्नमणुक्कोस'त्ति गाथार्थः ॥ इह च निर्गतो ग्रन्थान्निर्ग्रन्थ इति ग्रन्थमेव भेदाभिधानद्वारेणाह-

नि.[२४०] दुविहो य होइ गंथो बज्झो अब्भितरो य नायव्वो ।
अंतो य चउदसविहो दसहा पुन बाहिरो गंथो ॥

वृ. 'द्विविधश्च' द्विभेदो भवति ग्रथ्यते-बध्यते कषायवशगेनात्मनेति ग्रन्थः, अथवा ग्रथ्नाति-बध्नात्यात्मानं कर्मणेति ग्रन्थः, तद्द्वैविध्यमेवाह-बहिर्भवो बाह्योऽभ्यन्तरश्च, 'ज्ञातव्यः' अवबोद्धव्यः, तत्र च 'अंतो अ'त्ति अन्तःशब्दोऽधिकरणप्रधानमव्ययं, चः पूरणे, ततश्चान्तरिति मध्ये यो ग्रन्थोऽभ्यन्तर इत्यर्थः, स किमित्याह-'चतुर्दशविधः' चतुर्दशभेदो 'दशधा' दशप्रकारः, पुनः शब्दो विशेषद्योतकः, 'बाहिरो'त्ति बाह्यो ग्रन्थ इति गाथार्थः ॥ तत्राभ्यन्तरस्य चतुर्दश भेदानाह-

नि.[२४१] कोहो माणो माया लोभे पिज्जे तहेव दोसे य ।
मिच्छत्त वेअ अरई रइ हास सोगे य दुगुंछा ॥

वृ. 'क्रोधः' अप्रीतिलक्षणः, 'मानः' अहमितिप्रत्ययहेतुः, 'माया' स्वपरव्यामोहोत्पादकं शाठ्यं, 'लोभो' द्रव्याद्यभिकाङ्क्षा, 'प्रेम' प्रियेषु प्रीतिहेतुः, 'तथैवे'त्यान्तरग्रन्थरूप एव, कोऽसौ ?, 'दोषश्च' उपशमत्यागात्मको विकारो, द्वेष इत्यर्थः। इह च यद्यपि प्रेम मायालोभरूपं द्वेषश्च क्रोधमानात्मकः तथापि तयोः पृथगुपादानु कथञ्चित् सामान्यस्य विशेषेभ्योऽन्यत्वख्यापनार्थं, 'मिथ्यात्वं' तत्त्वार्थाश्रद्धानं, तच्च षड्भिः स्थानैर्भवति, तानि च नास्ति न नित्य इत्यादीनि, तदुक्तम्-

"नत्थि न निच्चो न कुणति कयं न वेएति नत्थि नेव्वाणं।
नत्थि य मोक्खोवाओ छम्मिच्छत्तस्स ठाणाइं॥"

'वेदः' स्त्रीवेदादिस्त्रिधा, 'अरतिः' संयमेऽप्रीतिः, 'रतिः' असंयमे प्रीतिः, आह च-

"इत्थीवेयाईओ तिविहो वेओ य होइ बोद्धव्वो।
अरती य संजमंमी होइ रती संजमे यावि॥"

'हासो' विस्मयादिषु सद्भावविकाशात्मकः, 'शोकः' इष्टवियोगात् मानसं दुःखं, 'भयम्' इहलोकभयादि सप्तधा, तथा चाह-

"इहपरलोयादाने आजीवसिलोय तह अकम्हा य।
मरणभयं सत्तमयं विभासमेएसि वोच्छामि॥१॥
इहलोगभयं च इमं जं मनुयाइओ सरिसजाईओ।
बीहेइ जं तु परजाइयाणं परलोयभयमेवं॥२॥
आयाणत्थी भण्णति मा होरिज्जत्ति तस्स जं बीहे।
आयाणभयं तं तु आजीवोमे न जीवेऽहं॥३॥
असिलोगभयं अयसो होति अकम्हाभयं तु अनिमित्तं।
मरियव्वस्स उ भीए मरणभयं होइ एयं तु॥४॥"

'जुगुप्सा' अस्नानादिमलिनतसाधुहीलना, तथा चाह-अण्हाणमाइएहिं साधुं तु दुगुंछति दुगुंछे'ति गाथार्थः॥ साम्प्रतं बाह्यग्रन्थभेदानाह-

नि.[२४२] खेत्तं वत्थू धणधन्नसंचओ मित्तनाइसंजोगो।
जाणसयनासनानि अ दासीदासं च कुवियं च॥

वृ. 'क्षेत्रं' सेत्वादि, 'वास्तु खातादि, धनं-हिरण्यादि, धान्यं च-शाल्यादि तयोः सञ्चयो-राशिर्धनधान्यसञ्चयः, मित्राणि च-सहवर्द्धितानि ज्ञातयश्च-स्वजनाः तैः संयोगः-सम्बन्धो मित्रज्ञातिसंयोगः, यानानि च-शिबिकादीनी शयनानि च-पल्यङ्कादीनि आसनानि च-सिंहासनादीनि यानशयनासनानि, चः समुच्चये, दास्यः-अङ्कपतिताः दासा अपि तथाविधा एव अनयोः समाहारः, चः प्राग्वत्, 'कुवियं च'त्ति कुप्यं च-विविधं गृहोपस्करात्मक्। अत्र च धनधान्यसञ्चयो मित्रज्ञातिसंयोगश्चेति द्वौ शेषाश्चाष्टेति दशविधो बाह्यग्रन्थ इति गाथार्थः॥

नि.[२४३] सावज्जगंथमुक्का अब्भितरबाहिरेण गंथेण।
एसा खलु निज्जुत्ती खुड्डागनियंठसुत्तस्स॥

वृ. सहावद्येन-दोषेण वर्त्तत इति सावद्यः स चासौ ग्रन्थश्च सावद्यग्रन्थस्तेन मुक्ताः सावद्य-

ग्रन्थमुक्ताः, अनेन च रजोहरणमुखवस्त्रिकावर्षाकल्पादेर्दशविधबाह्यग्रन्थान्तर्गतत्वेऽपि धर्मोपकरणत्वेनानवद्यतयाऽमुक्तावपि निर्ग्रन्थत्वमुक्तम्, एवं च मा भूत्कस्यचिद्बाह्यमोहो-बाह्येनैव सावद्यग्रन्थेन मुक्ता इत्याह -आभ्यन्तरबाह्येन ग्रन्थेन, न तु बाह्येनैव, मुक्ता इति शेषः, 'एया' अनन्तरोक्ता 'खलु' निश्चितं निरिति-निश्चिताऽधिका वा युक्तिरस्यामिति निर्युक्तिः-नामनिष्पन्ननिक्षेपनिर्युक्तिरित्यर्थः, कस्येत्याह- 'खुड्डागणियंठसुत्तस्स'त्ति क्षुल्लकनिर्ग्रन्थनामकं सूत्रं तस्येति गाथार्थः॥ इत्युक्तो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तस्य चायमभिसम्बन्धः-इहानन्तराध्ययनसूत्रे 'मुनिः' सकाममरणं म्रियते' इत्युक्तं, स च मनना-न्मुनिरिति ज्ञान्येव, ये त्वज्ञानिनस्ते किमित्याह-

मू. (१६१) *जावंतऽविज्जा पुरिसा, सव्वे ते दुक्खसंभवा।*
लुप्पंति बहुसो मूढा, संसारंमि अनंतए॥

वृ. 'यावन्तो' यत्परिमाणा वेदनं विद्या-तत्त्वज्ञानात्मिका न विद्या अविद्याः-मिथ्यात्वो-पहतकुत्सितज्ञानात्मिका तत्प्रधानाः पुरुषाः अविद्यापुरुषाः, अविद्यमाना वा विद्या येषां ते अविद्यापुरुषाः, इह च विद्याशब्देन प्रभूतश्रुतमुच्यते, न हि सर्वथा श्रुताभावः जीवस्य, अन्यथा अजीवत्वप्राप्तेः, उक्तं हि-"सव्वजीवाणंपि य णं अक्खरस्सऽनंतभागो निच्चुग्घाडितो, यदि सोऽवि आवरिज्जेज्ज तो णं जीवो अजीवत्तणं पावेज्जा"। 'सर्वे' अखिलाः 'ते' इत्याविद्या-पुरुषा, 'दुक्खसंभव'त्ति दुःखस्य सम्भवो येषु ते दुःखसम्भवाः, यद्वा दुःखं करोति दुःखयति ततो दुःखयतीति दुःखं-पापं कर्म्म ततः सम्भवः-उत्पत्तिर्येषां ते दुःखसम्भवाः, एवंविधाः, सन्तः किमित्याह-'लुप्यन्ते' दारिद्र्यादिभिर्बाध्यन्ते 'बहुशः' अनेकशो 'मूढा' हिताहितविवेचनं प्रत्यसमर्थाः, क्व ?-संसरणं-तिर्यग्नरकादिषु भवेषु भ्रमणं संसारः तस्मिन्, कीदृशि ?-'अनन्तके' अविद्यमानान्ते, अनेन चानन्तसंसारिकतादर्शनेन तादृशां पण्डितमरणाभाव उक्तः, अध्ययनार्थापेक्षया तु निर्ग्रन्थस्वरूपज्ञापनार्थं तद्विपक्ष उक्त इति भावनीयम्।

इह चायमुदाहरण-एगो गोधो दोगच्चेण वाइतो गेहाओ निग्गतो, सव्वं पुहविं हिंडिऊण जाहे न किंचि लहति ताहे पुण रवि घरं जतो नियत्तो, जाव एगंमि पाणवाडगसमीवे गामदेव-कुलियाए एगरत्तिं वासोवगतो जाव पेच्छइ ताव देवउलियाओ एगो पाणो निग्गतो चित्तघड-हत्थगतो, सो एगपासे ठातिऊणं तं वियडघडं भणित-लहु घरं सज्जेहि, एवं जं जं सो भणति तं चिय घडो करेइ, जाव सयणिज्जं, इत्थीहिं सद्धिं भोगे भुंजति, जाव पहाए पडिसा-हरति।

तेन गोहेण सो दिट्ठो, पच्छा चिंतेइ-किं मज्झ बहुएण भमिएण ?, एतं चेव ओलग्गामि, सो तेन ओलग्गिओ, आगहितो भणति-किं करेमि ? त्ति, तेन भण्णति-तुम्ह पसाएण अहंपि एतं चेव भोगे भुंजामि, तेन भण्णति-किं विज्जं गेण्हसि ? उताहु विज्जाए ऽभिमंतियं घडगं गेण्हसि ?, तेन विज्जासाहणपुरच्चरणभीरुणा भोगतिसिएण य भण्णति-विज्जाभिमंतियं घडयं देहि, तेन से विज्जाए अभिमंतिऊण घडो दिण्णो, सो तं गहाय गतो सगामं, तत्थ बंधूहिं सहवासेहिंवि समं जहारुइयं भवणं विगुरुव्वियं, भोगे तेहिं सह भुंजंतो अच्छति, कम्मंता य से सीदिउमारद्धा, गत्तादओ य असंगोविज्जमाणा प्रलयीभूताः, सो य कालंतरेण अतिनोमणेण तं घडं खंधे काऊण एगस्स पभातेण अहं बंधुमज्झे पमोयामि आसवपीतो पणच्चितो, तस्स पमाएण सो घडो

भग्गो, सो य विज्जाकओ उवभोगो नट्ठो, पच्छा ते गामेयगा प्रलयीभूतविभवाः परमसाईहिं दुक्खाणि अनुभवंति, जंति पुण ता विज्जा गहिया होंता ततो भग्गोवि घडे पुणोवि करेंतो ।

एवं अविज्जानरा दुक्खाणि संभूताः क्लिश्यन्ते, नागार्जुनीयास्तु पठन्ति-"ते सव्वं दुक्खमज्जिया" इह च मकारोऽलाक्षणिकः, अर्जितम्-उपार्जितं दुःखं यैस्तेऽर्जितदुःखाः, प्राकृतत्वान्निष्ठान्तस्य परनिपातः, शेषं प्राग्वत्, यद्वा यावन्तो 'विद्यापुरुषा' विद्याप्रधानाः, पुरुषास्ते सर्वे 'अदुःखसम्भवाः' अविद्यमानदुःखोत्पत्तयः, अमुमेवार्थं व्यतिरेकेणाह-'मूढा' अज्ञानाऽऽकुलितमतय एव लुप्यन्ते बहुशः संसारेऽनन्तक इति, काक्वा वा व्याख्येयं, दृश्यन्ते हि यानपात्रिण इहैव मोहाद्दयालुप्यमानाः, तथा च वृद्धाः-जहा समुद्दे वाणिया दुव्वायाजलयजाणवत्ता दिसामूढा खणेण अंतोजलगयपव्वयमासाएऊण भिन्नपोया महावीतिकल्लोलेहिं वुज्झमाणा कुम्मग्गाहगईहिं विलुप्पंति, एवं तेऽवि अविज्जा बहुसो मूढा सारीरमाणसेहिं महादुक्खेहिं विलुप्पन्तीति सूत्रार्थः ॥ यतश्चैवं ततो यत्कृत्यं तदाह-

मू. (१६२) समिक्ख पंडिए तम्हा, पास जाइपहे बहू ।
अप्पणा सच्चमेसेज्जा, मित्तिं भूएहिं कप्पए ॥

वृ. 'समीक्ष्य' आलोच्य 'पण्डितो' हिताहितविवेकभाक् 'त(ज)म्ह'त्ति यस्मादेवमविद्यावन्तो लुप्यन्ते तस्मात्, पाठान्तरतश्च तस्मात्, समीक्ष्य मेधावी-मर्यादावर्ती, किं तत् समीक्ष्येत्याह-पाशा-अत्यन्तपारवश्यहेतवः कलत्रादिसम्बन्धास्त एव तीव्रमोहोदयादिहेतुतया जातीनाम्-एकेन्द्रियादिजातीनां पन्थानः-तत्प्रापकत्वान्मार्गाः पाशजातिपथाः तान् 'बहून्' प्रभूतान् अविद्यावतां विलुम्पिहेतून्, किमित्याह-'आत्मना' स्वयं न तु परोपदेशादिना, सदभयोजीवादिभ्यो हितः-सम्यग् रक्षणप्ररूपणादिभिः, सत्यः-संयमः सदामो वा तमेषयेत-गवेषयेत्, एषयंश्च सत्यं किं कुर्याद् इत्याह-'मैत्री' मित्रभावं 'भूतेषु' पृथिव्यादिषु जन्तुषु 'कल्पयेत्' कुर्यात्, पठ्यते च-'अत्तट्ठा सच्चमेसेज्जा' इह च यस्मादविद्यावन्तः संसारे लुप्यन्ते तस्मात्-

"मय्येव निपतत्वेतज्जगदुश्चरितं हि यत् ।
मत्सुचरितयोगेन, स वै कल्याणभाजनम् ॥" इति,

शाक्यादिपरिकल्पिताविद्यापरिहरणात्मार्थमेव, न तु परार्थं, सत्यमेषयेद्, अपरकृतस्यापरत्रासङ्क्रमणेन परार्थानुष्ठानस्यानर्थकत्वाद्, अन्यत् प्राग्वदिति सूत्रार्थः ॥ अपरं च-

मू. (१६३) माया पिया नुसा भाया, भज्जा पुत्ता य ओरसा ।
नालं ते मम ताणाय, लुप्पंतस्स सकम्मुणा ॥
मू. (१६४) एयमट्ठं सपेहाए, पासे समियदंसणे ।
छिंद गेहिं सिनेहं च, न कंखे पुव्वसंथवं ॥

वृ. तत्राद्यसूत्रपूर्वार्धं स्पष्टं, नवरं स्नुषा-वध्वः, पुत्राश्च उरसि भवा औरसाः स्वयमुत्पादिताः, आस्तां जातपुत्रादयः, किमित्याह-'नालं' न समर्थाः 'ते' मात्रादयो मा 'त्राणाय' रक्षणाय, कथंभूतस्य ? -'लुप्यमानस्य' छिद्यमानस्य, केन ?-'स्वकर्मणा' स्वकृतेन ज्ञानावरणादिना, किमुक्तं भवति ?-स्वकर्मविहितां बाधामनुभवतः एते मात्रादयो न त्राणायेति, एवमात्मकमनन्तरोक्तमर्थ-वस्तु 'सपेहाए'त्ति प्राकृतत्वात् संप्रेक्षया-सम्यगबुद्धया स्वप्रेक्षया वा, 'पासे'त्ति

पश्येदवधारयेत्, शमितं दर्शनं प्रस्तावात् मिथ्यात्वात्मकं येन से तथोक्तः, यदिवा सम्यक् इतं-गतं जीवादिपदार्थेषु दर्शनं-दृष्टिरस्येति समितदर्शनः, कोऽर्थः ?- सम्यग्दृष्टिः सन्, ततश्च 'छिंद'त्ति छिन्द्यात्, सूत्रत्वात्तिव्यत्ययः, एवं सर्वत्रानुच्यमानोऽप्ययं भावनीयः, 'गृद्धिं' विषयाभिकाङ्क्षां 'स्नेहं च' स्वजनादिषु प्रेम 'न' नैव 'काङ्क्षेद्' अभिलषेद्, अपेक्ष्यमाणत्वात् काङ्क्षेदपि न, किं पुनः कुर्यादिति भावः। 'पूर्वसंस्तवं' पूर्वपरिचयमेकग्रामोषितोऽयमित्यादिकं, यतो न कश्चिदिह परत्र वा त्राणाय स्वकर्मणा विलुप्यमानस्य धर्म विनेति भाव इति सूत्रद्वयार्थः॥

मू.(१६५) *गवास्सं मणिकुंडलं, पसवो दासपोरुसं।*
सव्वमेयं चइत्ता णं, कामरूवी भविस्ससि॥

वृ. गावश्चाश्वाश्च गवाश्वं, 'गवाश्वप्रभृतीनि चे'ति समाहारः, तत्र गावो-वाहदोहोपलक्षिताः अश्वाः-तुरगाः, पशुत्वेऽप्यनयोः पृथगुपादानं अत्यन्तोपयोगित्वेन प्राधान्यात्, तथा मणयश्च-मरकतादयः कुण्डलानि च-कर्णाभरणानि मणिकुण्डलम्, उपलक्षणं चैतच्छेषालङ्कारणां स्वर्णादीनां च, पश्यन्ति प्रसूयन्ते वा पशवः-अजैडकादयः, दासाश्च-गृहजातादयः 'पोरुस'न्ति सूत्रत्वात् पुरुषाणां समूह इत्यर्थः, 'पुरुषाद्बलिकरणपूर्वे' इत्यणि कृते पौरुषेयं च पदात्यादिपुरुषसमूहो दासपौरुषेयं, यद्वा 'दासपोरुस'न्ति दासपुरुषाणां समूहो दासपौरुषं, पुरुषाद् ढक् न भवति, ग्रहणवता प्रातिपदिकेन तदन्तविधेरभावात्, 'सर्वं' निरवशेषं 'एतद्' अनन्तरोक्तं 'त्यक्त्वा' हित्वा, संयममनुपाल्येत्यभिप्रायः, किमित्याह-'कामरूपी' अभिलषितरूपविकरणशक्तिमान् भविष्यसि, इहैव वैक्रियकरणाद्यनेकलब्धियोगात् परत्र च देवभावावाप्तेरिति सूत्रार्थः॥ पुनः सत्यस्वरूपमेव विशेषत आह-

मू.(१६६) *थावरं जंगमं चेव, धनं धन्नं उवक्खरं।*
पच्चमाणस्स कम्मेहिं, नालं दुक्खाउ मोयणे॥

मू.(१६७) *अब्भत्थं सव्वओ सव्वं, दिस्स पाणे पियायए।*
न हणे पाणिणो पाणे, भयवेराओ उवरए॥

वृ. 'अब्भत्थं'ति अध्यात्ममात्मनि यद्वर्तते, यदिवा अध्यात्मं-मनः तस्मिंस्तिष्ठत्यध्यात्मस्थं, सूत्रत्वाद्वर्णलोपः, तच्चेह प्रस्तावात् सुखादि 'सर्वतः' इष्टसंयोगानिष्टसंप्रयोगादिहेतुभ्यो, जातमिति गम्यते, 'सर्वं' निरवशेषं 'दृष्ट्वा' प्रियत्वादिस्वरूपेणावधार्य, तथा 'पाणे'त्ति चस्य गम्यमानत्वात् प्राणांश्च-प्राणिनश्च 'पियादए'त्ति आत्मवत् सुखप्रियत्वेन प्रिया दया-रक्षणं येषां तान् प्रियदयान्, प्रिय आत्मा येषां तान् प्रियात्मकान् वा, दृष्ट्वा इत्यत्रापि सम्बन्धनीयं, ततः किमित्याह-'न हन्यात्' नातिपातयेत्, उपलक्षणत्वान्नापि घातयेत् न वा घ्नन्तं समनुजानीयात्, प्राणीन इति जातावेकवचनं, पाठान्तरतश्च-प्राणिनां प्राणान्-इन्द्रियादीन्, कीदृशः सन् ? इत्याह-भयं च उक्तस्वरूपं, वैरं च-प्रद्वेषः भयवैरमिति समाहारस्तस्मादुपरतो निवृत्तः सन् यदिवा-अध्यात्मस्थशब्दस्याभिप्रेतपर्यायात्वेन रूढत्वादध्यात्मस्थं-यद्यस्याभिमतं, तच्च सुखमेव, 'सर्वत'इति सर्वाभ्यो दिग्भ्यः सर्वेभ्यो वा मनोऽभिमतशब्दादिभ्यो जातं सर्वं शारीरं मानसं च यथा तवेष्टं तथाऽन्येषामपि प्राणिनामित्युपस्कारः, 'दृष्ट्वा' अवधार्य, इहापि चस्य गम्यमानत्वात् प्राणान् प्राणप्राण्यभेदोपचारात् प्रियदयांश्च, दृष्ट्वेत्यत्रापि योज्यते, अन्यत् प्राग्वदिति सूत्रार्थः॥

इत्थं प्राणातिपातलक्षणाश्रवनिरोधमभिधाय शेषाश्रवनिरोधमाह-

मू.(१६८) *आयाणं नरयं दिस्स, नायइज्ज तणामवि।*
दोगुंछी अप्पणो पाते, दिन्नं भुंजेज्ज भोयणं॥

वृ. आदीयत इत्यादानं-धनधान्यादि "कृत्यल्युटो ऽन्यत्रापी"ति कर्मणि ल्युट्, आर्षत्वादादानीयं वा, नरककारणत्वान्नरकं दृष्ट्वा, किमित्याह-'नाददीत' न गृह्णीत न स्वीकुर्यादितियावत्, 'तेनामवि'ति तृणमपि, आस्तां रजतरूप्यादि, कथं तर्हि प्राणधारणमित्याह-'दोगुंछी'त्याद्यर्धं, जुगुप्सते आत्मानमाहारं विना धर्मधुराधरणाक्षमामित्येवंशीलो जुगुप्सी, आत्मनः इति आत्मसम्बन्धिनि पात्रे-भाजने प्राप्ते वा भोजनसमय इति शेषः, 'दत्तं' निसृष्टं, गृहस्थैरिति गम्यते, 'भुंजेज्ज'त्ति भुञ्जीत भोजनम्-आहारं, अनेनाहारस्यापि भावतो ऽस्वीकरणमाह, जुगुप्सिशब्देन तदप्रतिबन्धदर्शनात्, ततश्च परिग्रहाश्रवनिरोध उक्तः, तदेवं 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यत' इति न्यायात मृषावादादत्तादानमैथुनात्मकाश्रवत्रयनिरोध उक्तः, यद्वा 'सत्यमिच्छेदि'ति सत्यशब्देन साक्षात्संयममपि वदता मृषावादनिवृत्तिराक्षिप्ता, तद्द्वारेणापि तस्य सत्यत्वात्, आदानमित्यादिना तु साक्षाददत्तादानविरतिरुक्ता, आदानं हि ग्रहणमेव रूढं, तच्चादत्तस्येति गम्यते, तं 'नरकं' नरकहेतुं दृष्ट्वा नाददीत तृणमप्यदत्तमितीहापि गम्यते, 'गवास'मित्यादिना तु परिग्रहाश्रवनिरोधः, तन्निरोधाभिधानाच्च नापरिगृहीता स्त्री भुज्यत इतिकृत्वा मैथुनाश्रवनिरोधो ऽप्युक्त एव।

नन्वेवं स्वयं त्यक्तगवादिपरिग्रहस्य परकीयं चानाददानस्य कथं प्राणवृत्तिः ?, इत्याह-जुगुप्स्यात्मनः पात्रे दत्तं भुञ्जीत भोजनमिति, पात्रग्रहणं तु व्याख्याद्वयेऽपि मा भूत् निष्परिग्रहतया पात्रस्याप्यग्रहणमिति कस्यचिद् व्यामोह इति ख्यापनार्थं, तदपरिग्रहे हि तथाविधलब्ध्याद्यभावेन पाणिभोक्तृत्वाभावाद्गृहिभाजन एव भोजनं भवेत्, तत्र च बहुदोषसम्भवः, तथा च -

"पच्छा कम्मं पुरेकम्मं, सिया तत्थ न कप्पइ।
एयमट्ठं न भुंजंति, निग्गंथा गिहिभायणे॥"

इति। एवं पञ्चाश्रवविरमणात्मके संयम उक्ते यथा परे विप्रतिपद्यन्ते तथा दर्शयितुमाह-

मू.(१६९) *इहमेगे उ मन्नंति, अप्पच्चक्खाय पावगं।*
आयरियं विदित्ता णं, सव्वदुक्खा विमुच्चइ॥

वृ. 'इहे'त्यस्मिन् जगति मुक्तिमार्गविचारे वा 'एके' केचन कपिलादिमतानुसारिणः 'तुः' पुनरर्थे 'मन्यन्ते' अभ्युपगच्छन्ति, उपलक्षणत्वात्प्ररूपयन्ति च, यथा 'अप्रत्याख्याय' अनिराकृत्य 'पापकं' प्राणातिपातादिविरतिमकृत्वैव 'आयरियं'ति सूत्रत्वात् आराद्यातं सर्वकुयुक्तिभ्य इत्यार्यं-तत्त्वं तद् 'विदित्वा' ज्ञात्वा 'सर्वदुःखेभ्य' आध्यात्मिकाधिभौतिकाधिदैविकलक्षणेभ्यः स्वपरिभाषया शारीरमानसेभ्यो वा 'मुच्यते' पृथग् भवति, तथा चाहु-

"पञ्चविंशतितत्त्वज्ञो, यत्र तत्राश्रमे रतः।
शिखी मुण्डी जटी वापि, मुच्यते नात्र संशयः॥"

यद्वाऽऽचरणमाचरितं ततत्क्रियाकलापः, पाठान्तरतश्च-'आचारिकं' निजनिजाचारभवमनुष्ठानमेव, तद्विदित्वा-स्वसंवेदनतो ऽनुभूय सर्वदुःखाद्विमुच्यते, एवं सर्वत्र ज्ञानमेव मुक्त्यङ्गं,

न चैतच्चारु, न हि रोगिण इवौषधादिपरिज्ञानतो भावरोगेभ्यो ज्ञानावरणादिकर्मभ्यो महाव्रतात्मकपञ्चाङ्गोपलक्षितां क्रियामननुष्ठाय मुक्तिः ॥ ते चैवमनालोचयन्तो भवदुःखाकुलिता वाचालतयैवमात्मानं स्वस्थयन्ति, तथा चाह-

मू. (१७०) भणंता अकरिंता य, बंधमोक्खपइण्णिणो।
वायाविरियमेत्तेणं, समासासेंति अप्पगं॥

वृ. 'भणन्तः' प्रतिपादयन्तः, प्रक्रमात् ज्ञानमेव मुक्त्यङ्गमिति, 'अकुर्वन्तश्च' मुक्त्युपायमनुष्ठानं, बन्धमोक्षौ उक्तरूपौ तयोः प्रतिज्ञा-अभ्युपगमः तद्वन्तः, सूत्रत्वाच्चैना निर्देशः, अस्ति बन्धोऽस्ति च मोक्ष इत्येवंवादिन एव केवलं, न तु तथाऽनुष्ठायिनः, वाचि वीर्यम्-आत्मशक्तिर्वाग्वीर्यं वाचालतेति यावत्, तदेवानुष्ठानशून्यं वाग्वीर्यमात्रं तेन 'समाश्वासयन्ति' विज्ञानादेव वयं मुक्तिगामिन इति स्वास्थ्यं प्रापयन्ति, कम् ? - आत्मानमिति सूत्रार्थः ॥ यथा चैतन्न चारु तथा स्वत एवाह-

मू. (१७१) न चित्ता तायए भासा, कओ विज्जाणुसासणं ?
विसन्ना पावकम्मेहिं, बाला पंडियमाणिनो॥

वृ. 'न' नैव 'चित्रा' प्राकृतसंस्कृतादिरूपा आर्यविषया ज्ञानमेव मुक्त्यङ्गमित्यादिका वा 'त्रायते' रक्षति, पापेभ्य इति गम्यते, केत्याह- भाष्यत इति भाषा-वचनात्मिका, स्यादेतत्-अचिन्त्यो हि मणिमन्त्रमहौषधीनां प्रभाव इत्यघोरादिमन्त्रात्मिका वाक् त्राणाय भविष्यतीत्याह, कुतो ? विदन्त्यनया तत्त्वमिति विद्या-विचित्रमन्त्रात्मिका तस्या अनुशासनं-शिक्षणं विद्यानुशासनं त्रायते पापाद्भावद्वा ?, न कुतोऽपि, तन्मात्रादेव मुक्तौ शेषानुष्ठानवैयर्थ्यप्रसङ्गादिति भावः। अत एव ये तदपि त्राणायेति वदन्ति ते यादृशास्तदेवाह-विविधम्-अनेकप्रकारं सन्नाम्नि विषण्णाः, केषु ?-'पावकम्मेहि'ति पापाकर्म्मसु पापहेतुषु हिंसाद्यनुष्ठानेषु, सततं तत्कारितयेति भावः, यद्वा विषण्णा-विषादं गताः पापकर्म्मभिः-पापानुष्ठानैः यथा कथमेवमनुष्ठायिनो वयं भविष्याम इति, पठन्ति च-'विसन्ना पावकिच्चेहि'ति तथैव, कुतस्त एवंविधा इत्याह-'बाला' रागद्वेषाकुलिताः पण्डितमात्मानं मन्यन्ते इत्येवंशीलाः पण्डितमानिनः, ये हि बालाः पण्डितमानिनश्च न स्युस्ते स्वयं सम्यगजानानाः परं पृच्छेयुः तदुपदेशतश्च तानि परिहरेयुः न तु विषण्णा एवासीरन्, ये तु बालाः पण्डितमानिनश्च ते स्वयमजानाना अपि जानानमन्यमात्मन्यभिमानतोऽनुपासमाना एवंविधा एव भवन्तीति सूत्रार्थः ॥ साम्प्रतं सामान्येनैव मुक्तिपथपरिपन्थिनां दोषदर्शनायाह-

मू. (१७२) जे केइ सरीरे सत्ता, वन्ने रूवे य सव्वसो।
मणसा कायवक्केणं, सव्वे ते दुक्खसंभवा॥

वृ. ये केचित् 'शरीरे' शरीरविषये 'सक्ता' बद्धाग्रहाः, क्व ? इत्याह-'वर्णे' सुस्निग्धगौरत्वादिके 'रूपे च' सुसंस्थानतायां, चशब्दात् स्पर्शादिषु, वस्त्राद्यभिष्वङ्गोपलक्षणं चैतत्, 'सव्वसो'त्ति सूत्रत्वात् सर्वथा-सर्वैः स्वयंकरणकारणादिभिः प्रकारैः, मनसा कथं वर्णादिमन्तो वयं भविष्याम ? इत्यभिसन्धिना, वचसा रसायनादिप्रश्नात्मकेन, चशब्दात् कायेन च रसायनाद्युपयोगेन, एवेति पूरणे, पठ्यते च-'कायवक्केणं'ति कायश्च-शरीरं वाक्यं च-वचनं

कायवाक्यं तेन, 'सर्वे' निरवशेषा गुरुपादुकातो मुक्तिः नास्ति वा मुक्तिरित्यादिवादिनोऽपि न केवलमार्यादिविदित्वा, दुःखाहिमुक्तिगतिलाभादिना एवेति भावः, 'ते' इति ये अप्रत्याख्याय पापमित्यादिवादिनो 'दुःखसम्भवाः' इहान्यजन्मनि च दुःखभाजनं इति सूत्रार्थः ॥ यथा चैते दुःखभाजनं तथा दर्शयन्नुपदेशसर्वस्वमाह-

मू. (१७३) *आवन्ना दीहमद्धाणं, संसारंमि अनंतए।*
तम्हा सव्वदिसं पस्सं, अप्पमत्तो परिव्वए ॥

वृ. 'आपन्नाः' प्राप्ताः 'दीर्घम्' अनाद्यनन्तमध्वानमिवाध्वानम्-उत्पत्तिप्रलयरूपं, अन्यान्यभवभ्रमणेनैकत्वावस्थितेरभावात्, क्व ?-'संसारे' नरकादिगतिचतुष्टयात्मके 'अनन्तके' अविद्यमानान्ते, अपर्यवसितानन्तकालिकाद्युपलक्षितत्वेनेति गर्भः, 'तम्ह'त्ति यस्मादेवमेते मुक्तिपरिपन्थिनो दुःखसम्भवाः तस्मात् 'सव्वदिसं'ति सर्वदिशः-प्रस्तावादशेषभावदिशः, ताश्च पृथिव्याद्यष्टादशभेदाः, उक्तं च-

"पुढवि जलजलणवाया मूला खंधग्गपोरबीया य।
बितिचउपणिंदितिरिया य नारया देवसंघाया ॥१॥
संम्मुच्छिमकम्माकम्मभूमिगणय तहंतरद्दीवा।
भावदिसा दिस्सइ जं संसारी नियममेयाहिं ॥२॥"

'पश्यन्' अवलोकयन् 'अप्रमत्तः' प्रमादविरहितः, यथैषामेकेन्द्रियादीनां विराधना न भवति तथा 'परिव्रजेः' संयमाध्वनि यायाः, यद्वा-संसारापन्नानां सर्वदिशः पश्य, दृष्ट्वा चाप्रमत्तो-निद्रादिप्रमादपरिहारतो यथैतासु न पर्यटसि तथा परिव्रजेः सुशिष्येति सूत्रार्थः ॥ यथा चाप्रमत्तेन परिव्रजितव्यं तथा दर्शयितुमाह-

मू. (१७४) *बहिया उड्ढमादाय, नावकंखे कयाइवि।*
पुव्वकम्मक्खयट्ठाए, इमं देहमुदाहरे।

वृ. 'बहिय'त्ति बहिः, कोऽर्थः ?-बहिर्भूतं भवादिति गम्यते, ऊर्ध्वं सर्वोपरिस्थितम् अर्थान्मोक्षमादायगृहीत्वा मयैतदर्थं यतितव्यमिति निश्चित्य बुद्ध्या सम्प्रधार्येतियावत्, अथवा बहिः-आत्मनो बहिर्भूतं धनधान्यादि ऊर्ध्वम् -अपवर्गमादाय-गृहीत्वा, हेयत्वेनोपादेयतया च ज्ञात्वेतियावत्, 'नावकाङ्क्षेत्' विषयादिकं नाभिलषेत्, न क्वचिदभिष्वङ्गं कुर्वीतेति तात्पर्यं, 'कदाचिदपि' उपसर्गपरीषहाकुलिततायामपि, आस्तामन्यदा, एवं सति शरीरधारणमप्ययुक्तमेव, एतद्धारणे सत्याकाङ्क्षासम्भवात्, तस्यापि चात्मनो बहिर्भूतत्वात्, अत आह-पुव्वेत्यादि, पूर्वं-पूर्वकालभावि तच्च तत्कर्म च पूर्वकर्म तस्य क्षयः तदर्थमिमं-प्रत्यक्षं 'देहं' शरीरं 'समुद्धरेद्' उचिताहारादिभोगतः परिपालयेत्, तद्धारणस्य विशुद्धिहेतुत्वात्, तत्पाते हि भवान्तरोत्पत्तावविरतिरपि स्यात्, उक्तं च-

"सव्वत्थ संजमं संजमातो अप्पाणमेव रक्खेज्जा।
मुच्चति अतिवायातो पुनो विसोही न याविरती ॥"

ततः शरीरोद्धरणमपि निरभिष्वङ्गतयैव विधेयमिति सूत्रार्थः ॥ यथा च देहपालनेऽपि नाभिष्वङ्गसम्भवः तथा दर्शयितुमाह-

मू. (१७५) *विविच्च कम्मणो हेउं, कालकंखी परिव्वए।*
मायं पिंडस्स पाणस्स, कडं लद्धूण भक्खए॥

वृ. 'विविच्य' पृथक्कृत्य 'कर्म्मणो' ज्ञानावरणादेः 'हेतुम्' उपादानकारणं मिथ्यात्वाविरत्यादि, कालम् अनुष्ठानप्रस्तावं काङ्क्षत इत्येवंशीलः कालकाङ्क्षी, 'परिव्रजे'दिति पूर्ववत्, पठन्ति च 'विगिंच कम्मुणो हेउ'न्ति अत्र च लेसिगिधि' परिव्रजेत्युपदेशान्तरतया व्याख्येयं, मात्रां यावत्या संयमनिर्वाहस्तावतीं, ज्ञात्वेति गम्यते, कस्य ?-'पिण्डस्य' ओदनादेरन्नस्य 'पानस्य च' आयामादेः, स्वाद्यस्वाद्यानुपादानु च यतेः प्रायस्तत्परिभोगासम्भवात्, कृतम्-आत्मार्थमेव निर्वर्तितं, गृहिभिरिति गम्यते, प्रक्रमाल्लिप्तादिकमेव 'लब्ध्वा' प्राप्य 'भक्षयेद्' अभ्यवहरेदिति सूत्रार्थः॥ कदाचिद्भुक्तशेषं धारयतोऽभिष्वङ्गसम्भवः स्यादित्याह-

मू. (१७६) *सन्निहिं च न कुव्विज्जा, लेवमायाय संजए।*
पक्खी पत्तं समायाय, निरवेक्खो परिव्वए॥

वृ. सम्यग्-एकीभावेन निधीयते-निक्षिप्यतेऽनेनाऽऽत्मा नरकादिष्विति सन्निधिः-प्रातरिदं भविष्यतीत्याद्यभिसन्धितोऽतिरिक्ताशनादिस्थापनं तं च न कुर्वीत, चशब्दः पूर्वापेक्षया समुच्चये, 'लेवमायाय'त्ति लेपः-शकटाक्षादिनिष्पादितः पात्रगतः परिगृह्यते, तस्य मात्रा-मर्यादा, मात्राशब्दस्य मर्यादावाचित्वेनापि रूढत्वात्, यथोक्तम्-

"ईषदर्थक्रियायोगे, मर्यादायां परिच्छदे।
परिमाणे धने चेति, मात्राशब्दः प्रकीर्तितः॥"

लेपमात्रतया, किमुक्तं भवति ?-लेपमेकं मर्यादीकृत्य न स्वल्पमप्यन्यत् सन्निदधीत, यद्वा परिमाणार्थोऽयं मात्राशब्दः, लक्षणे तृतीया, ततोऽयमर्थः-लेपमात्रयेति यावता पात्रमुपलिप्यते तावत्परिमाणमपि सन्निधिं न कुर्वीत, आस्तां बहुमित्यभिप्रायः, 'संयतो' यतिः, किमित्येवं पात्राद्युपकरणसन्निधिरपि न कर्तव्य इत्याह-'पक्खि'त्ति पक्षीव पक्षी, यथा पक्षी पतन्तं त्रायत इति पत्रं-पक्षसञ्चयं 'समादाय' गृहीत्वा व्रजति, एवं भिक्षुरपि 'पत्ते'त्ति पात्रमुपलक्षणत्वाच्छेषोपकरणं चादाय परिव्रजेदिति सम्बन्धः, कीदृग् ?-'निरपेक्षो' निरभिलाषः, तस्य वा विनाशादौ शोकाकरणतो निरपेक्षो-निरभिष्वङ्गः, तथा च प्रतिदिनमसंयमपलिमन्थभीरुतया पात्राद्युपकरणसन्निधिकरणेऽपि न दोष इत्यर्थः, अथवा यदि लेपमात्रयाऽपि सन्निधिं न कुर्वीत कथमागामिनि दिने भोक्तव्यमित्याह-पक्षीव निरपेक्षः, पात्रं पतद्ग्रहादिभाजनमर्थात्तन्नियोगं च समादाय व्रजेद्-भिक्षार्थं पर्यटेद्, इदमुक्तं भवति-मधुकरवृत्त्या हि तस्य निर्वहणं, तत्किं तस्य सन्निधिना ? इति सूत्रार्थः॥ सम्प्रति यदुक्तं 'कृतं लब्धवा भक्षयेदि'ति, तत्र कथं तल्लाभ इति तदुपायमाह- यद्वा-यदुक्तं 'निरपेक्षः परिव्रजेदि'ति तदभिव्यक्तिकर्तुमाह-

मू. (१७७) *एसणासमिओ लज्जू, गामे अनियओ चरे।*
अप्पमत्तो पमत्तेहिं, पिंडवायं गवेसए॥

वृ. एषणायाम् उत्पादनग्रहणग्रासविषयायां सम्यगितः-स्थितः समितः एषणासमितः, प्राधान्याच्च इहैषणाया एवोपादानं, प्रायस्तद्भावे ईर्याभाषादिसमितिसम्भव इति ज्ञापनार्थं वा, अनेन निरपेक्षत्वमुक्तं, 'लज्जू'त्ति लज्जा- संयमस्तदुपयोगानन्यतया यतिरपि तथोक्तः,

आर्षत्वाच्चैवं निर्देशः, ग्रामे उपलक्षत्वान्नगरादौ च 'अनियतः' अनियतवृत्तिः 'चरेद्' विहरेत्, अनेनापि निरपेक्षतैवोक्ता। चरंश्च किं कुर्यादित्याह-'अप्रमत्तः' प्रमादरहितः सन् 'पमत्तेहिं'ति प्रमत्तेभ्यो गृहस्थेभ्यः, ते हि विषयादिप्रमादसेवनात् प्रमत्ता उच्यन्ते, 'पिण्डपातं' भिक्षां 'गवेषयेद्' अन्वेषयदेति सूत्रार्थः ॥ इत्थं प्रसक्तानुप्रसक्त्या संयमस्वरूपमुक्तं, तदुक्तौ च निर्ग्रन्थस्वरूपं, सम्प्रत्यत्रैवादेयोत्पादनार्थमाह-

सू. (१७८) एवं से उदाहु अनुत्तरनाणी अनुत्तरदंसी अनुत्तरनाणदंसणधरे।
अरहा नायपुत्ते भयवं वेसालीए वियाहिए ॥

वृ. 'एवम्' अमुना प्रकारेण 'से' इति भगवान् 'उदाहु'त्ति उदाहृतवान्, 'अनुत्तरज्ञानी' सर्वोत्कृष्टज्ञानवान्। ननु चानुत्तरज्ञानीति मत्वर्थीयेन न भवितव्यं, बहुव्रीहिणैव तदर्थस्योक्तत्वात्, सत्यम्, अनुत्तरज्ञानशब्दोऽयं गौरखरशब्दवत् संज्ञाप्रकार एव, केवलज्ञानवाचकत्वात् अस्य, ततो गौरखरखदरण्यमित्यादिवन्न दोषः, नास्योत्तरमस्तीत्यनुत्तरं तथा पश्यतीत्यनुत्तरदर्शी, सामान्यविशेषग्राहितया च ज्ञानदर्शननयोर्भेदः, यत उक्तम्-"जं सामण्णग्गहणं दंसणमेयं विसेसियं नाणं"ति, अनुत्तरे ज्ञानदर्शने युगपदुपयोगाभावेऽपि लब्धिरूपतया धारयतीत्यनुत्तरज्ञानदर्शनधरः।

ननु प्रागुक्ताभ्यां विशेषणाभ्यामस्यार्थस्योक्तत्वात्, कथं न पौनरुक्त्यम् ?, उच्यते, अस्यान्याभिप्रायत्वात्, अत्र हि अनुत्तरज्ञान्यनुत्तरदर्शीति भेदाभिधानेन ज्ञानदर्शनयोर्भिन्नकालमाह, ततश्च मा भूदुपयोगवल्लब्धिद्वयमपि भिन्नकालभावीति व्यामोह इत्युपदिश्यते ज्ञानदर्शनधरः, अर्हति देवादिभ्यः पूजामित्यर्हन्, स चार्थात्तीर्थकृत्, ज्ञातः-उदारक्षत्रियः स चेह प्रस्तावात् सिद्धार्थः तस्य पुत्रो ज्ञातपुत्रः-वर्तमानतीर्थाधिपतिर्महावीर इतियावत् 'भगवान्' समग्रैश्वर्यादिमान् 'वेसालीय'त्ति विशालाः-शिष्याः तीर्थं यशःप्रभृतयो वा गुणा विद्यन्ते यस्येति विशालिकः "इनि ठना" विति ठन्, यद्वा विशालेभ्यः-उक्तस्वरूपेभ्यो हित इति हितार्थे ठन्-प्रत्ययः, ततश्च विशालीयः 'वियाहिए'त्ति व्याख्याता सदेवमनुजासुरायां पर्षदि विशेषेणान्यसाधारणात्मकेनाख्याता-कथयिता, केचित्त्वधीयते- 'एवं' से उदाहु अरिहा पासे पुरिसादानीए भगवं वेसालीए बुद्धे परिनिव्वुए'त्ति स्पष्टमेव, नवरमर्हन्निति सामान्योक्तावपि प्रक्रमात् महावीरः, पश्यति समस्त भावान् केवलालोकेनावलोकत इति पश्यः, तथा पुरुषश्चासौ पुरुषाकारवर्तितया आदानीयश्च आदेयवाक्यतया पुरुषादानीयः, पुरुषविशेषणं तु पुरुष एव प्रायस्तीर्थकर इति ख्यापनार्थं, पुरुषैर्वाऽऽदानीयो ज्ञानादिगुणतया पुरुषादानीय इति सूत्रार्थः ॥ इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयाः, ते च पूर्ववद्वाच्याः ॥

अध्ययनं-६ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं षष्ठमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्।

अध्ययनं ७- औरभ्रीयं

वृ.॥ व्याख्यातं क्षुल्लकनिर्ग्रन्थीयं षष्ठमध्ययनं, साम्प्रतं सप्तममारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने निर्ग्रन्थत्वमुक्तं, तच्च रसगृद्धिपरिहारादेव जायते, स च विपक्षेऽ-

पायदर्शनात्, तच्च दृष्टान्तोपन्यासद्वारेणैव परिस्फुटं भवतीति रसगृद्धिदोषदर्शकोरभ्रादि-दृष्टान्तप्रतिपादकमिदमध्ययनमारभ्यते, इत्यनेनाभिसम्बन्धेनायातस्याध्ययनस्योपक्रमादिद्वारचतुष्टयमुपवर्ण्यं तावद्यावन्नामनिष्पन्ननिक्षेपे उरभ्रीयमिति नाम, अत उरभ्रनिक्षेपमाह-

नि.[२४४] निक्खेवो उ उरब्भे चउव्विओ दुव्विहो य होइ दव्वंमि ।
आगमनो आगमओ नोआगमओ अ सो तिविहो ॥

वृ. 'निक्षेपः' न्यासः, तु: पूरणे, 'उरभ्रे' उरभ्रविषयः 'चतुर्विधः' चतुष्प्रकारः, नामस्थापना-द्रव्यभावभेदात्, तत्र नामस्थापने क्षुण्णे एव इति द्रव्योरभ्रमाह-द्विविधो भवति 'द्रव्य' इति द्रव्यविषयः, आगमनो आगमतः तत्रागमत उरभ्रशब्दार्थज्ञः तत्र चानुपयुक्तः, नोआगमतः पुनः तस्य पुनरर्थत्वात्, 'स' इति द्रव्योरभ्रः 'त्रिविधः' त्रिभेद इति गाथार्थः ॥ त्रैविध्यमेवाह-

नि.[२४५] जाणगसरीरभविए तव्वइरित्ते अ सो पुनो तिविहो ।
एगभविअ बद्धाऊ अभिमुहओ नामगोए अ ॥

वृ. ज्ञशरीरोऽत्र उरभ्रशब्दार्थज्ञस्य सिद्धशिलातलगतं शरीरमुच्यते, भव्यशरीरो यस्तावदुरभ्रशब्दार्थं न जानाति कालान्तरे च ज्ञास्यति तस्य यच्छरीरं, 'तद्व्यतिरिक्तश्च' ताभ्यां-ज्ञशरीरभव्यशरीरेभ्यां व्यतिरिक्तोभिन्नः तद्व्यतिरिक्तः, च समुच्चये, 'स' तद्व्यतिरिक्तः पुनः 'त्रिविधः' त्रिभेदः, त्रैविध्यमेवाह-'एकस्मिन् भवे तस्मिन्नेवातिक्रान्ते भावी एकभविको-योऽन्तर एव भवे उरभ्रतयोत्पत्स्यते, तथा स एवोरभ्रायुर्बन्धानन्तरं बद्धमायुरनेनेति बद्धायुष्क उच्यते, तृतीयमाह-'अभिमुहतो नामगोए य'त्ति आर्षत्वादभिमुखनामगोत्रश्च, तत्राभिमुखे-नाभ्मुखे अन्तर्मुहूर्तानन्तरभाविताया नामगोत्रे उरभ्रसम्बन्धिनी यस्य स तथोक्तः, अन्तर्मुहूर्तानन्तरमेवोरभ्रभव भावीति गाथार्थः ॥ भावोरभ्रमध्ययननामनिबन्धनं चाह-

नि.[२४६] उरभाउनामगोयं वेयंतो भावओ उ ओरब्भो ।
तत्तो समुट्ठियमिणं उरब्भिज्जन्ति अज्झयणं ॥

वृ. उरभ्र-ऊरणकः तस्यायुश्च नाम च गोत्रं चोरभ्रायुर्नामगोत्रं, यदुदयादुरभ्रो भवति, 'वेदयन्' अनुभवन् 'भावतो' भावमाश्रित्योरभ्रः, तुशब्दः पर्यायस्तिकमतमेतदिति विशेषणार्थः, 'ततो' भावोरभ्राद् दृष्टान्ततयेहाभिधेयात्समुत्थितम्-उत्पन्नमिदमिति प्रस्तुतं, यस्मादिति गम्यते, 'उरब्भिज्जं'ति उरभ्रीयं ग्रहादित्वाच्छैषिकठप्रत्ययः 'इती'ति तस्माद् अध्ययनं प्रागुक्त-निरुक्तमुच्यत इति शेष इति गाथार्थः ॥ उरभ्रस्यैव चेह प्रथममुच्यमानत्वाद्बहुवक्तव्यत्वाच्चेत्थमुक्तम्, अन्यथा हि काकिण्यादयोऽपि दृष्टान्ता इहाभिधीयन्ते एव, तथा चाह निर्युक्तिकृत्-

नि.[२४७] ओरब्भे अ कागिणी अंबए अ ववहार सागरे चेव ।
पंचेए दिट्ठंता उरब्भिज्जंमि अज्झयणं ॥

वृ. 'उरभ्र' उक्तरूपः 'काकिणिः' विंशतिकपर्दकाः 'उरब्भे य'त्ति चशब्दस्य भिन्नक्रमत्वात् काकिणिश्च 'अंबए य'त्ति आम्रकं च-आम्रफलं, व्यवहारश्च-क्रयविक्रयरूपो वणिग्धर्मः, चस्य गम्यमानत्वात्, सागरश्च-समुद्रः, च सर्वत्र समुच्चये, एवोऽवधारणे, भिन्नक्रमश्चैवं योज्यते-पञ्चैवैते न तु न्यूनाधिकाः 'दृष्टान्ता' उदाहरणानि 'उरभ्रीये' उरभ्रीयनाम्न्यध्ययन इति गाथार्थः ॥ सम्प्रति यदर्थसाधर्म्यादुरभ्रस्य दृष्टान्तता तदुपदर्शनायाह-

नि.[२४८] आरंभे रसगिद्धी दुग्गतिगमणं च पच्चवाओ य।
उवमा कया उरब्भे उरब्भिज्जस्स निज्जुत्ती ॥

वृ. आरम्भणं आरम्भः - पृथिव्याद्युपमर्दः, रसेषु - मधुरादिषु गृद्धिः अभिकाङ्क्षा रसगृद्धिः, दुर्गतिगमनं च - नरकतिर्यगादिषु च पर्यटनं, प्रत्यपायश्चैहैव शिरश्छेदादिः, वक्ष्यति हि "सिरं छेत्तूण गुज्जति" त्ति शिरश्छेदादार्तरौद्रोपगतस्य दुर्गतिपाते दुःखानुभवनादिरुपमा-सादृश्योपदर्शनरूपा, प्रक्रमादेभिरेवारम्भादिभिरर्थैः 'कृता' विहिता 'उरभ्रे' उरभ्रविषया, इदमुक्तं भवति साम्पतेक्षिणो हि विषयामिषगृध्नवस्तांस्तानारम्भानारभन्ते, आरभ्य चोपचितकर्म्मभिः कालशौकरिकादिवदिहैव दुःखमुपलभ्य नरकादिकां कुगतिमाप्नुवन्तीत्युरभ्रोदाहरणता इहोपदर्श्यते, कार्किण्यादिसाध्यदृष्टान्तोपलक्षणं चैतद्, 'उरभ्रीयस्य निर्युक्ति'रिति निगमनमेतदिति गाथार्थः 'इत्यवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिपेक्षावसरः, स च सूत्रे सति भवतीत्यतः सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

सू.(१७९) *जहाऽऽएसं समुद्दिस्स, कोइ पोसेज्ज एलयं।*
ओयणं जवसं देज्जा, पोसेज्जावि संयगणे ॥

वृ. 'यथे'त्युदाहरणोपन्यासे, आदिश्यते-आज्ञाप्यते विविधव्यापारेषु पर्ज्जनोऽस्मिन्नायात इत्यादेशः अभ्यर्हितः प्राहुणकस्तं 'समुद्दिश्य' आश्रित्य यथाऽसौ समेष्यति समागतश्चैनं भोक्ष्यत इति 'कश्चित्' परलोकापायनिरपेक्षः 'पोषयेत्' पुष्टं कुर्यात् 'एलकम्' ऊरणकं, कथमित्याह 'ओदनं' भक्तं, तद्योग्यशेषान्नोपलक्षणमेतत्, 'यवसं' मुद्गमाषादि 'दद्यात्' तदप्रतो ढौकयेत्, तत एव पोषयेत्, पुनर्वचनमादरख्यापनाय, अपिः सम्भावने, सम्भाव्यत एवैवंविधः कोऽपि गुरुकर्मेति, 'स्वकाङ्गणे' स्वकीयगृहाङ्गणे, अन्यत्र नियुक्तकाः कदाचिन्नौदनादि दास्यन्तीति स्वकाङ्गण इत्युक्तं, यदि वा 'पोसेज्जा विसयंगणे' त्ति विशन्त्यस्मिन् विषयो-गृहं तस्याङ्गणं विषयाङ्गणं तस्मिन्, अथवा विषयं रसलक्षणं वचनव्यत्ययाद् विषयान्वा गणयन्-संप्रधारयन् धर्मनिरपेक्ष इति भावः, इहोदाहरणं सम्प्रदायादवसेयं, जहेगो ऊरणगो पाहुणयणिमित्तं पोसिज्जति, सो पीणियसरीरो सुण्हातो हलिद्दादिकयंगरागो कयकण्णचूलतो कुमारगा य तं नाणाविहेहिं कीलाविसेसेहिं कीलावेंति, तं च वच्छगो एवं लालिज्जमाणं दट्ठूण माऊए नेहेण य गोवियं दोहणे य तयणुकंपाए मुक्कमवि खीरं न पिबति रोसेणं, ताए पुच्छिओ भणति-अम्मो! एस नंदियगो सव्वेहिं एएहिं अम्हसामिसालेहिं अट्ठेहिं जवसओगासणेहिं तदुवओगेहि य अलंकारविसेसेहिं अलंकारितो पुत्त इव परिपालिज्जति, अहं तु मंदभग्गो सुक्काणि तणाणि काहेवि लभामि, ताणिवि न पज्जत्तगाणि, एवं पाणियंपि, न य मं कोऽवि लालेति। ताए भण्णति-पुत्त!

नि.[२४९] आउरचित्ताइं एयाइं, जाइं चरइ नंदिओ।
सुक्कतणेहिं लाढाहि, एयं दीहाउलक्खणं ॥

वृ. जहा आउरो मरिउकामो जं मग्गति पत्थं वा अपत्थं वा तं दिज्जति से, एवं सो नंदितो मारिज्जिहिति जदा तदा पेच्छिहिसि, इति सूत्रार्थः ॥ ततोऽसौ कीदृशो जातः? किं च कुरुते?

मू.(१८०) *तओ स पुट्ठे परिवूढे, जायमेदे महोयरे।*
पीणिए विपुले देहे, आदेसं पडिकंखए॥

वृ. 'तत' इत्योदनादिदानाद्धेतौ पञ्चमी, 'स' इत्युरभ्रः 'पुष्ट' उपचितमांसतया पुष्टिमाक् 'परिवृढः' प्रभुः समर्थ इतियावत् 'जातमेदा' उपचितचतुर्थधातुः अत एव 'महोदरः' बृहज्जठरः 'प्रीणितः' तर्पितः, यथासमयमुपढौकिताहारत्वात्, एभिरेव च हेतुभिः 'विपुले' विशाले 'देहे' शरीरे सति "यस्य च भावेन भावलक्षण"मिति सप्तमी, किमित्याह-आदेशं 'प्रतिकाङ्क्षति' प्रतिपालयति, पाठान्तरतः 'परिकाङ्क्षति' इच्छति, न चास्य तत्त्वतः प्रतिपालनमिच्छा वा सम्भवति, अतः प्रतिकाङ्क्षतीव प्रतिकाङ्क्षतीत्युपमार्थोऽवगन्तव्यः, एवं परिकाङ्क्षतीत्यत्रापि, इति सूत्रार्थः॥ स किमेवं चिरस्थायी स्यादित्याह-

मू.(१८१) *जाव न एज्जति आएसो, ताव जीवति सेऽदुही।*
अह पत्तंमि आएसे, सीसं छेत्तूण भुज्जति॥

वृ. 'यावदि'ति कालावधारणे 'नेति' नायाति, कोऽसौ ?-आदेशः, तावत् नोत्तरकालं 'जीवति' प्राणान् धारयति, 'से ऽदुहि'त्ति अकारप्रश्लेषात् स इत्युरभ्रोऽदुःखी सुखी सन्, अथवा वध्यमण्डनमिवास्यौदनदानादिनीति तत्त्वतो दुःखितैवास्येति दुःखी, 'अह पत्तंमि आएसे' अथानन्तरं 'प्राप्ते' आगते आदेशे श्रिता अस्मिन् प्राणा इति शिरः तच्छित्त्वा-द्विधा विधाय भुज्यते, तेनैव स्वामिना प्राहुणकसहितेनेति शेषः।

सम्प्रति सम्प्रदायशेषमनुस्रियते-ततो सो वच्छगो नं नंदियगं पाहुणगेसु आगएसु वधिज्जमाणं दट्ठुं तिसितोऽवि मएणं माऊण धणं नाभिलसति, ताए भण्णति-किं पुत्त ! भयभीतोऽसि ?, नेहेन पण्हुयंपि मं न पियसि, तेन भण्णइ-अम्म ! कतो मे धणाभिलासो ?, ननु सो वराको नंदितो अज्ज केहिंवि पाहुणएहिं आगएहिं ममं अग्गतो विनिग्गयजीवो विलोलनयणो विस्सरं रसंतो अत्ताणो असरणो मारितो, तब्भयातो कतो मे पाउमिच्छा ?, ततो ताए भण्णति-पुत्त ! ननु तदा चेव ते कहियं, जहा-आउरचित्ताइं एयाइं०, एस तेसिं विवागो अनुपत्तो। एस दिट्ठंतो इति सूत्रार्थः॥ इत्थं दृष्टान्तमभिधाय तमेवानुवदन् दार्ष्टान्तिकमाह-

मू.(१८२) *जहा खलु से ओरब्भे, आएसाए समीहिए।*
एवं बाले अहम्मिट्ठे, ईहति निरयाउयं॥

वृ. 'यथा' येन प्रकारेण 'खलु' निश्चयेन 'स' इति प्रागुक्तस्वरूप उरभ्रः 'आदेशाय' आदेशार्थं 'समीहितः' कल्पितः सन् यथाऽयमस्मै भवितेत्यादेशं प्रतिकाङ्क्षति इत्यनुवर्तते, 'एवम्' अमुनैव न्यायेन 'बालः' अज्ञोऽधर्मो-धर्मविपक्षः पापमितियावत् स इष्टः-अभिलषितोऽस्येत्यधर्मिष्ठः, आहिताग्न्यादेराकृतिगणत्वादिष्टशब्दस्य परनिपातः, यद्वाऽधर्मगुणयोगादधर्मोऽतिशयेनाधर्मोऽधर्मिष्ठः ईहत इवेहते वाञ्छतीव तदनुकूलचारितया, किं तत् ?-'नरकायुष्कं' नरकजीवितमिति सूत्रार्थः॥ उक्तमेवार्थं प्रपञ्चयितुमाह-

मू.(१८३) *हिंसे बाले मुसावाई, अद्धाणंमि विलोवए।*
अन्नदत्तहरे तेने, माई कन्नहरे सढे॥

वृ. हिनस्तीत्येवंशीलो हिंस्रः-स्वभावत एव प्राणव्यपरोपणकृत् 'बालः' अज्ञः, पाठान्तरेण

क्रुध्यति-हेतुमन्तरेणापि कुप्यतीत्येवंधर्मा क्रोधी, मृषा-अलीकं वदति-प्रतिपादयतीत्येवंशीलो मृषावादी, 'अध्वनि' मार्गे 'विलुम्पति' मुष्णातीति विलोपकः, यः पथि गच्छतो जनान् सर्वस्वहरणतो लुण्टति, 'अन्नादत्तहरि'त्ति अन्येभ्यो दत्तं- राजादिना वितीर्णं हरति अपान्तराल एवाच्छिनत्त्यदत्तहरः, अन्यैर्वाऽदत्तम्- अनिसृष्टं हरति-आदत्ते अन्यादत्तहरः- ग्रामनगरादिषु चौर्यकृत्, अत एव 'बालः' अज्ञः, विस्मरणशीलस्मरणार्थमेतदिति न पौनरुक्त्यं, सर्वावस्थासु वा बालत्वख्यापनार्थं, पाठान्तरञ्च 'स्तेनः' स्तैन्येनैवोपकल्पितात्मवृत्तिः, यद्वा अन्यादत्तहरः अन्यादत्तं ग्रन्थिच्छेदादिनोपायेनापहरति स्तेनः क्षत्रादिखननेनेति विशेषो, 'मायी' वञ्चनैकचित्तः, 'कण्हुहरः' कण्हु कस्यार्थं हरिष्यामि त्येवमध्यवसायी 'शठः' वक्राचारः।

मू. (१८४) इत्थीविसयगिद्धे य, महारंभपरिग्गहे।
भुंजमाणे सुरं मंसं, परिवूढे परंदमे॥

वृ. तथा स्त्रियश्च विषयाश्च स्त्रीविषयाः तेषु गृद्धः- अभिकाङ्क्षावान् स्त्रीविषयगृद्धः, चः प्राग्वत्, महान्- अपरिमितः आरम्भः- अनेकजन्तूपघातकृद्व्यापारः परिग्रहश्च- धान्यादिसञ्चयो यस्य स तथोक्तः, 'भुञ्जानः' अभ्यवहरन्, 'सुरां' मदिरां, 'मांसं' पिशितं, 'परिवृढे'ति परिवृढः प्रभुरुपचितमांसशोणिततया तत्क्रियासमर्थ इतियावत्, अत एव परान्- अन्यान् दमयति- यत्कृत्याभिमतकृत्येषु प्रवर्तयतीति परन्दमः,

मू. (१८५) अयकक्कर भोई य, तुंदिले चियलोहिए।
आउयं नरए कंखे, जहाऽऽएसं व एलए॥

वृ. किंच- अजः- छागस्तस्य कर्करं- यच्चनकवदक्ष्यमाणं कर्करायते तच्चेह प्रस्तावान्मेदोदन्तुरमतिपक्वेना मांसं तद्भोजी वा, अत एव 'तुन्दिलः' जातबृहज्जठरः, चितम्- उपचयप्राप्तं लोहितं- शोणितमस्येति चितलोहितः, शेषधातूपलक्षणमेतत्, 'आयुः' जीवितं, 'नरके' सीमन्तकादौ काङ्क्षति तद्योग्यकर्म्मारम्भतया, कमिव क इव ? इत्याह- 'जहाएसं व एडए'त्ति आदेशमिव यथैडकः- उक्तरूपः। इह च 'हिंसे' इत्यादिना सार्धश्लोकेनारम्भ उक्तः, 'भुंजमाणे सुर'मित्यादिना चार्धद्वयेन रसगृद्धिः, 'आयुष्क'मित्यादिना चार्धेन दुर्गतिगमनं, तत्प्रतिपादनाच्चार्थतः प्रत्यपायाभिधानमिति सूत्रत्रयार्थः। इदानीं यदुक्तम् 'आयुर्नरके काङ्क्षती'ति, तदनन्तरमसौ किं करुत इत्याह- यद्वा साक्षादैहिकापायदर्शनायाह-

मू. (१८६) आसनं सयनं जाणं, वित्ते कामाणि भुंजिया।
दुस्साहडं धनं हिच्चा, बहुं संचिणिया रयं॥

वृ. आसनं शयनं यानमिति प्राग्वत्, नवरं भुक्त्वेति सम्बन्धनीयं, 'वित्ते'त्ति वित्तं द्रव्यं, 'कामान्' मनोज्ञशब्दादीन् 'भुक्त्वा' उपभुज्य, दुःखेनात्मनः परेषां च दुःखकरणेन सुष्ठु आदरातिशयेनाहृतम्- उपार्जितं दुःखाहृतं, यद्वा प्राकृतत्वात् दुःखेन संहियते- मील्यते स्मेति दुःसंहृतं 'धनं' द्रव्यं 'हित्वा' आसनाद्युपभोगेन द्यूताद्यसद्व्ययेन च त्यक्त्वा, तथा च मिथ्यात्वादिकर्मबन्धुहेतुसम्भवाद् 'बहु' प्रभूतं 'सञ्चित्य' उपार्ज्य 'रजः' अष्टप्रकारं कर्म।

मू. (१८७) ततो कम्मगुरू जंतू, पच्चुप्पन्नपरायणे।
अएहं आगयं कंखे, मरणंतंमि सोयति॥

वृ. 'तत्तो' त्ति ततो रज:सञ्चयात् तको वा सञ्जितरजा:, कर्म्मणा गुरुरिव गुरु: अधोनरकगामितया कर्म्मगुरु:, 'जन्तु:' प्राणी 'प्रत्युत्पन्ने' वर्त्तमानतस्मिन्परायण:- तन्निष्ठ: प्रत्युत्पन्नपरायण:, 'एतावानेव लोकोऽयं, यावानिन्द्रियगोचर:' इति नास्तिकमतानुसारितया परलोकनिरपेक्ष इतियावत्, 'अएव्व' त्ति अज:-पशु:, स चेह प्रक्रामादुरभ्रस्तद्वत् 'आगयाएसे' त्ति प्राकृतत्वादागते-प्राप्ते आदेशे-प्राघुणके, एतेन प्रपञ्चितज्ञविनेयानुग्रहयोक्तमेवोरभ्रदृष्टान्तं स्मारयति, किमित्याह-'मरणान्ते' प्राणपरित्यागात्मनि, अवसाने शोचति, किमुक्तं भवति ?-यथाऽऽदेशे आगते उरभ्र उक्तनीत्या शोचति, तथाऽयमपि धिङ्मां विषयव्यामोहत उपार्जितगुरुकर्माणं, हा! कष्टमिदानीं मया गन्तव्यमित्यादिप्रलापत: खिद्यते, अत्यन्तनास्तिकस्यापि प्रायस्तदा शोकसम्भवादिति सूत्रद्वयार्थ:॥ अनेनैहिकायाय उक्त:, सम्प्रति पारभविकमाह-

मू. (१८८) *तओ आउ परिक्खीणे, चुयदेहा विहिंसगा।*
आसुरियं दिसं बाला, गच्छंति अवसा तमं॥

वृ. 'तत:' शोभनानन्तरं 'तको वा' उपार्जितगुरुकर्म्मा 'आउ' त्ति आयुषि तद्भवसम्बन्धिनि जीविते 'परिक्षीणे' सर्वथा क्षयं गते, कदाचिदायु:क्षयस्याऽऽवीचिमरणेन प्रागपि सम्भवादेवमुच्यते, 'च्युत:' भ्रष्टो 'देहात्' शरीरात्, पाठान्तरतस्तु 'च्युतदेहो' अपगतेहत्यादारीर:, 'विहिंसक:' विविधप्रकारै: प्राणिघातक:, 'आसुरियं' ति अविद्यमानसूर्यां, उपलक्षणत्वाद्ग्रहनक्षत्ररहितां च, दिश्यते नारकादित्वेनास्यां संसारीति दिक् ताम्, अर्थात् भावदिशम्, अथवा रौद्रकर्मकारी सर्वोऽप्यसुर उच्यते, ततश्चासुराणामियमासुरी या तामासुरीयां दिशं, नरकगतिमित्यर्थ:, 'बाल:' अज्ञो गच्छति-याति 'अवश:' कर्म्मपरवशो, वचनव्यत्ययाच्च सर्वत्र बहुवचननिर्देशो व्याप्तिख्यापनार्थो वा, यथा नैक एवंविध: किन्तु बहव इति, 'तमं' ति तमोयुक्तत्वात् तम:, देवगतेरप्यसूर्यत्वसम्भवात् तद्व्यवच्छेदाय दिशो विशेषणं, ततोऽर्थान्नरकगतिम्, उक्तं हि- "निच्चंधयारतमसा ववगयगहचंदसूरणक्खत्ता" इत्यादिस्वरूपख्यापकं वा द्वितीयं व्याख्यानमिति।

मू. (१८९) *जहा कागिणीए हेउं, सहस्सं हारए नरो।*
अपत्थं अंबगं भोच्चा, राया रज्जं तु हारए॥

वृ. 'यथा' इत्युदाहरणोपन्यासार्थ:, 'काकिण्या:' उक्तरूपाया: 'हेउ' त्ति हेतो: कारणात् 'सहस्रं' दशशतात्मकं, कार्षापणानामिति गम्यते, 'हारयेत्' नाशयेत् 'नर:' पुरुष:। अत्रोदाहरणएगो दमगो, तेन चिंतियं करेंतेन सहस्सं काहावणाण अज्जियं, सो य तं गहाय मत्थेण समं सगिहं पत्थितो, तेन भत्तणिमित्तं रूवगो भिदियव्वो होहित्ति नउलगं एगत्थ गोवेउं कागिणीनिमित्तं नियत्तो, सावि कागिणी अन्नेण हडा, सोऽपि नउलतो अन्नेण दिट्ठो ठविज्जंतो, सोवि तं घेत्तूण नट्ठो, पच्छा सो घरं गतो सोयति। एस दिट्ठंतो,

तथा 'अपथ्यं' अहितम् 'आम्रकम्' आम्रफलं 'भुक्त्वा' अभ्यवहृत्य 'राजा' इति नृपति: 'राज्यं' पृथिवीपतित्वं, 'तु:' अवधारणे भिन्नक्रमश्च, तेन हारयेदेव, सम्भवत्येव अस्यापथ्यभोजिनो राज्यहरणमित्यक्षरार्थ:। भावार्थस्तु वृद्धसम्प्रदायादवसेय:, स चायम्-

जहा कस्सइ रन्नो अंबाजिण्णेण विसूइया जाया, सा तस्स वेज्जेहिं महता जत्तेण तिगिच्छिया, भणितो य-जदि पुणो अंबाणि खासि तो विनस्ससि, तस्स य अतीव पीयाणि अंबाणि, तेन

सदेसे सव्वे अंबा उच्छादिया । अन्नया अस्सवाहणियाए निग्गतो सह अमच्चेण, अस्सेण अवहरिओ, अस्सो दूरं गंतूण परिस्संतो ठितो, एगंमि वणसंडे चूयच्छायाते अमच्चेण वाविज्जमानो ऽवि निविट्ठो, तस्स य हेट्ठे अंबाणि पडियाणि, सो ताणि परामुसति, पच्छा अग्घाति, पच्छा चक्खिउं निट्ठुहति, अमच्चो वारेइ, पच्छा भक्खेउं मतो । इति सूत्रार्थः ॥

मू. (१९०) एवं मानुस्सगा कामा, देवकामाण अंतिए ।
सहस्सगुणिया भुज्जो, आउं कामा य दिविव्या ॥

वृ. 'एवं' काकिण्यामर्कसदृशा मनुष्याणाममी मानुष्यकाः, गोत्रप्रत्ययान्तत्वात् "गोत्रचरणाद्वुञि"ति वुञ 'कामाः' विषयाः, 'देवकामाना' देवसम्बन्धिनां विषयाणाम् 'अन्तिके' समीपे, अन्तिकोपादानं च दूरेऽनवधारणमपि स्यादिति, किमित्येवम् ?, अत आह-'सहस्रगुणिताः' सहस्रैस्ताडिता 'भूयः' अतिशयेन बहु, बहून् वारानित्यर्थः, मनुष्यायुःकामापेक्षयेति प्रक्रमः, अनेनैषामतिभूयस्त्वं सूचयन् कार्षापणसहस्रराज्यतुल्यतामाह, 'आयुः' जीवितं, कामाश्च-शब्दादयः, 'दिव्विय'त्ति दिवि भवा दिव्याः "द्युप्रागपागुदक्प्रतीचो यदि"ति यत्, त एव दिव्यकाः, इह चादौ 'देवकामाण अंतिए'त्ति काममात्रोपादानेऽपि 'आउं कामा य दिव्विय'त्ति आयुषोऽप्युपादानं तत्रत्यप्रभावादीनामपि तदपेक्षयैवंविधत्वख्यापनार्थं, यद्वा 'सूचनात् सूत्र'मिति पूर्वत्राप्यायुषः सूचितत्वाददोष इति सूत्रार्थः ॥

मू. (१९१) अनेगवासानउया, जा सा पन्नवओ ठिई ।
जाइं जीयंति दुम्मेहा, जाण वाससयाउए ॥

वृ. अनेकानि-बहूनि तानि चेहासङ्ख्येयानि वर्षाणां चत्वारिंशत्प्रमाणि तेषां नयुतानि-सङ्ख्याविशेषाणि वर्षनयुतान्यनेकानि च तानि वर्षनयुतानि च अनेकवर्षनयुतानि "स्वरोऽन्योऽन्यस्य" इति प्राकृतलक्षणात् सकाराकादीर्घत्वम्, एवमन्यत्रापि स्वरान्यत्वं भावनीयं, यदिवाऽनेकानि वर्षनयुतानि येषु तान्यनेकवर्षनयुतानि, उभयत्राप्यतः पल्योपमसागरोपमाणांतियावत्, नयुतानयनोपायस्त्वयम्-चतुरशीतिवर्षलक्षाः पूर्वाङ्गं, तच्च पूर्वाङ्गेन गुणितं पूर्वं, पूर्वं चतुरशीतिलक्षाहतं नयुताङ्गं, नयुताङ्गमपि चतुरशीतिलक्षाभिताडितं नयुतं, कैवमुच्यत इत्याह-

'या सा'ति प्रज्ञापकः शिष्यान् प्रत्येवमाह-या सा भवतामस्माकं च प्रतीता, प्रकर्षेण ज्ञायते वस्तु सतत्त्वमनयेति प्रज्ञा-हेयोपादेयविवेचिका बुद्धिः सा विद्यतेऽस्यासौ प्रज्ञावान्, 'अतिशायने मतुप्' अतिशयश्चास्या हेयोपादेययोः हानोपादाननिबन्धनत्वमिहाभिमतं ततश्च क्रियाया अप्याक्षिप्तत्वात्, यदिवा निश्चयनयमतेन क्रियारहिता प्रज्ञाऽप्यप्रज्ञैवेति प्रज्ञयैव क्रियाऽऽक्षिप्यते ततः प्रज्ञावान् ज्ञानक्रियावानित्युक्तं भवति, तस्य प्रज्ञावतः स्थीयतेऽनयाऽर्थात् देव भव इति स्थितिः-देवायुः, अधिकृतत्वात् दिव्यकामाश्च, तानि च कीदृशीत्याह-यान्यनेकवर्षनयुतानि दिव्यस्थितेर्दिव्यकामानां च विषयभूतानि 'जीयन्ते' हार्यन्ते, तद्धेतुभूतानुष्ठानानासेवनेनेति भावः, पाठान्तरतो 'हारयन्ति वा,' के ते ?-दुष्टा विपर्ययादिदोषदुष्टत्वेन मेधा-वस्तुस्वरूपावधारणशक्तिरेषां ते दुर्मेधसः, विषयैर्जिता जन्तव इति गम्यते, कदा पुनस्तानि दुर्मेधसो विषयैर्जीयन्त इत्याह-ऊने वर्षशतायुषि, अनेनायुषोऽल्पत्वात् मनुष्यकामानामप्यल्पतामाह, यदिवा प्रभूते ह्यायुषि प्रमादेनैकदा हारितान्यपि पुनर्जीयेरन्, अस्मिंस्तु संक्षिप्तायुष्येकदा हारितानि हारितान्येव,

भगवतश्च वीरस्य तीर्थे प्रायो न्यूनवर्षशतायुष एव जन्तव इतीत्थमुपन्यासः,

अयं चात्र भावार्थः-अल्पं मनुष्याणामायुर्विषयाश्चेति काकण्याम्रफलोपमाः, देवायुर्देव-कामाश्चातिप्रभूततया कार्षापणसहस्रराज्यतुल्याः, ततो यथा द्रमको [illegible] काकण्याम्रफलमूल्ये कार्षापणसहस्रं राज्यं च हारितवान्, एवमेतेऽपि दुर्मेधसोऽल्पतरमनुष्यायुः कामार्थे प्रभूतान् देवायुःकामान् हारयन्तीति सूत्रार्थः ॥ सम्प्रति व्यवहारोदाहरणमाह-

मू. (१९२) *जहा य तिन्नि वणिया, मूलं घेत्तूण निग्गया।*
एगोऽत्थ लभते लाभं, एगो मूलेण आगओ॥

वृ. 'यथा' इति प्राग्वत्, 'चः' प्रतिपादितदृष्टान्तापेक्षया समुच्चये, त्रयो 'वणिजः' प्रतीताः 'मूलं' राशिं नीविमितियावत् गृहीत्वा 'निर्गताः' स्वस्थानात्स्थानान्तरं प्रति प्रस्थिताः, प्राप्ताश्च समीहितं स्थानं, तत्र च गतानाम्, 'एको' वणिक्कलाकुशलः 'अत्र' एतेषु मध्ये 'लभते' प्राप्नोति 'लाभं' विशिष्टद्रव्योपचयलक्षणम्, 'एकः' तेष्वेवान्यतरो यस्तथा नालिनिपुणो नाप्यत्यन्तानिपुणः स 'मूलेणे'ति मूलधनेन यावत् गृहान्नीतं तावतैवोपलक्षितः 'आगतः' स्वस्थानं प्राप्त इति सूत्रार्थः ॥ तथा-

मू. (१९३) *एगो मूलंपि हारित्ता, आगओ तत्थ वाणिओ।*
ववहारे उवमा एसा, एवं धम्मे विजाणह॥

वृ. 'एकः' अन्यतरः प्रमादपरो द्यूतमद्यादिष्वत्यन्तमासक्तचेताः 'मूलमपि' उक्तरूपं 'हारयित्वा' नाशयित्वा 'आगतः' प्राप्तः स्वस्थानमित्युपस्कारः, एवं सर्वत्रोदाहरणसूचायां सोपस्कारता द्रष्टव्या, 'तत्र' तेषु मध्ये वणिक् एव वाणिजः। अत्र च सम्प्रदायः-

जहा एगस्स वाणियगस्स तिन्नि पुत्ता, तेन तेसिं सहस्सं सहस्सं दिन्नं काहावणाणं, भणिया य-एएण ववहरिऊण एत्तिएण कालेन एज्जाह, तेहिं तं मूलं घेत्तूण निग्गया सणगगतो, पिथप्पिथेसु पट्टणेसु ठिया, तत्थेगो भोयणच्छायणवज्जं जूयमज्जमंसवेसावसणविरहितो विहीए ववहरमाणो विपुललाभसमन्वितो जातो, वितितो पुण मूलमवि दव्वंतो लाभगं भोयणच्छायणमल्लालंकारादिसु उवभुंजति, न य अच्चादरेण ववहरति, ततितो न किंचि संववहरति, केवलं जूयमज्जमंसवेसगंधमल्लतंबोलसरीरकियासु अप्पेणेव कालेन तं दव्वं निट्ठवियंति, जहावहिकालस्स सपुरमागया। तत्थ जो छिन्नमूलो सो सव्वस्स असामी जातो, पेसए उवचरिज्जति, वितितो घरवावारे निउत्तो भत्तपानसंतुट्ठो न दायव्वभोत्तव्वेसु ववसायति, ततितो घरवित्थरस्स सामी जातो। केति पुन कहंति-तिन्नि वाणियगा पत्तेयं २ ववहरंति, तत्थेगो छिन्नमूलो पेसत्तमुवगतो, केण वा संववहारं करेउ?, अच्छिन्नमूलो पुणरवि वाणिज्जाए धवति, इयरो बंधुसहितो मोदए, एस दिट्ठंतो।

सम्प्रति सूत्रमनुस्रियते-'व्यवहारे' व्यवहारविषया 'उपमा' सादृश्यं 'एषा' अनन्तरोक्ता 'एवं' वक्ष्यमाणन्यायेन 'धर्मे' धर्मविषयामेवोपमां 'विजानीत' अवबुध्यध्वमिति सूत्रार्थः ॥

मू. (१९४) *माणुसत्तं भवे मूलं, लाभो देवगई भवे।*
मूलच्छेएण जीवाणं, नरगतिरिक्खत्तणं धुवं॥

वृ. 'मानुषत्वं' मनुजत्वं 'भवेत्' स्यात् मूलमिव मूलं, स्वर्गापवर्गात्मकतदुत्तरोत्तरला-

भहेतुतया, तथा लाभ इव लाभः मनुजगत्यपेक्षया विषयसुखादिभिर्विशिष्टत्वात्, 'देवगतिः' देवत्वावाप्तिर्भवेत्, एवं च स्थिते किमित्याह-'मूलच्छेदेन' मानुषत्वगतिहान्यात्मकेन 'जीवानां' प्राणीनां 'नरकतिर्यक्त्वं' नरकत्वं तिर्यक्त्वं च तद्गत्यात्मकं 'ध्रुवं' निश्चितम्, इहापि सम्प्रदायः-तिन्नि संसारिणो मत्ता माणुस्सेसु आयाता, तत्थेगो महव्वज्जवादिगुणसंपन्नो मज्झिमारंभपरिग्गहजुत्तो कालं काऊण कोहावणसहस्समूलत्थाणीयं तमेव माणुस्सत्तं पडिलहति, वितितो पुन सम्मद्दंसणचरित्तगुणसुपरिट्ठितो सरागसंजमेण लद्धलाभवाणिय इव देवेसु उववन्नो, ततितो पुन हिंसे बाले मुसावाती इच्चेतेहिं पुव्वभणितेहिं मायज्जजोगेहिं वड्ढितं छिन्नमूलवणिय इव नारगेसु तिरिएसु वा उववज्जतित्ति सूत्रार्थः ॥ यथा मूलच्छेदेन नरकतिर्यक्त्वप्राप्तिः तथा आह-

मू. (१९५) *दुहओ गति बालस्स, आवती वहमूलिया।*
देवत्तं माणुसत्तं च, जं जिए लोलुआसढे॥

वृ. 'दुहतो'त्ति द्विधा द्विप्रकारा, गम्यत इति गतिः सा चेह प्रक्रमान्नरकगतिस्तिर्यग्गतिश्च, कस्येत्याह-'बालस्य' द्वाभ्यां रागद्वेषाभ्यामाकुलितस्य, 'आवइ'त्ति आगच्छत्यापतति वधः-प्राणिघातः, उपलक्षणत्वान्महारम्भमहापरिग्रहानृतभाषणमायादयश्च मूलं-कारणं यस्याः सा वधमूलिका, यदिवा-द्विधा गतिर्बालस्य, भवतीति गम्यते, तत्र च गतस्य 'आवइ'त्ति आपत्, सा च कीदृशीत्याह-वधो-विनाशस्ताडनं वा मूलम्-आदिर्यस्याः सा वधमूलिका, वधग्रहणाच्छेदभेदादितिभारारोपणादिपरिग्रहः, लभन्ते हि प्राणिनो नरकतिर्यक्षु विविधा वधाद्यापदः, किमित्येवम् ?, अत आह-

'देवत्वं' देवभवं 'मानुषत्वं' मनुजभवं 'यद्' यस्मात् 'जितो' हारितो 'लोलयासढे'त्ति लोलतापिशितादिलाम्पट्यं तद्योगाज्जन्तुरपि तन्मयत्वख्यापनार्थं लोलतेत्युक्तः, शाठ्ययोगाच्छठः-विश्वस्तजनवञ्चकः, ततो लोलता चासौ शठश्च लोलताशठः, इह च लोलता पञ्चेन्द्रियवधाद्युपलक्षणं, तथा च नरकहेतुत्वाभिधानमेतत्, यदुक्तम्-"महारंभयाए महापरिग्गहयाए कुणिमाहारेणं पंचेंदियवहेणं जीवा नेरयाउयं नियच्छंति" शठ इत्यनेन तु शाठ्यमुक्तं, तच्च तिर्यग्गतिहेतुः, उक्तं च-"माया तैर्यग्योनस्ये"ति, अतश्चायमाशयः-यतोऽयं बालो लोलताशठः ततो नरकगतितिर्यग्गतिनिबन्धनाभ्यां लोलताशठत्वाभ्यां देवत्वमनुजत्वे हारितस्यास्योक्तरूपा द्विविधैव गतिः सम्भवति, एवं च मूलच्छेदेन जीवानां नरकतिर्यक्त्वमुच्यते, मूलं हि मनुष्यत्वं लाभश्च देवत्वम्, उभयोरपि तयोर्हारणादिति सूत्रार्थः ॥ पुनर्मूलच्छेदमेव समर्थयितुमाह-

मू. (१९६) *ततो जिए सई होइ, दुविहं दुग्गतिं गते।*
दुल्लहा तस्स उम्मज्जा, अद्धाए सुचिरादवि॥

वृ. 'ततः' देवत्वमानुषत्वजयनात् ततो वा बालः 'जिय'त्ति व्यच्छेदफलत्वाद्वाक्यस्य जित एव 'सति'त्ति सदा भवति 'द्विविधां' नारकतिर्यग्भेदां, दुर्निन्दायां, दुष्टा-निन्दिता गतिदुर्गतिस्तां 'गतः' प्राप्तः, सदाजितत्वमेवाभिव्यनक्ति-'दुर्लभाः' दुष्प्रापाः 'तस्ये'ति देवमनुजत्वे हारितवतो बालस्य 'उम्मज्ज'त्ति सूत्रत्वादुन्मज्जनमुन्मज्जा-नरकतिर्यग्गतिनिर्गमनात्मिका, स्यादेतत्-चिरतरकालेनोन्मज्जाऽस्य भविष्यति, अत आह-'अद्धाया' काले अर्थादागामिन्यां, किं स्वल्पायामेव ?, इत्याह-सुचिरादपीत्यद्धाशब्देनैव कालाभिधानात्,

सुचिराच्छब्दः प्रभूतत्वमेवाह, ततोऽयमर्थः- अनागताद्धायां प्रभूतायामपि, बाहुल्याच्चेत्थमुक्तम्, अन्यथा हि कश्चिदेकभवेनैव तत उद्धृत्य मुक्तिमप्यास्कन्देदेवेति सूत्रार्थः ॥ इत्थं पश्चानुपूर्व्यापि व्याख्याङ्गमिति पश्चादुक्तोऽपि मूलहारिण्युपनयमुपदर्श्य मूलप्रवेशिन्यभिधातुकाम आह 'अहवा तिण्हमाउयपरिज्ञानतयेत्यादि' पश्चादुक्तमपि मूलहारिणमादावुपदर्श्यैतदाह-

मू.(१९७) *एवं जियं सपेहाए, तुलिया बालं च पंडियं ।*
मूलियं ते पवित्संति, माणुसं जोणिमिति ॥

वृ. 'एवम्' उक्तनीत्या 'जिए' त्ति सुब्व्यत्ययाज्जितं लोलतया शाठ्येन च देवमनुजत्वे हारितं बालमिति प्रक्रमः, 'सपेहाए' त्ति सम्प्रेक्ष्य सम्यगालोच्य, तथा तोलयित्वेव तोलयित्वा गुणदोषनया परिभाव्य, यदेवंवं जितं सम्यग्-अविपरीता प्रेक्षा-बुद्धिः सम्प्रेक्षा तया तोलयित्वा, कम्?-'बालं' चरस्य भिन्नक्रमत्वात् 'पण्डितं च' तद्विपरीतम्, अथवा मनुष्यदेवगतिगामिनम्, इह च द्वितीयव्याख्यायामेवं जितमिति बालस्य विशेषणं, न पण्डितस्य, असम्भवात्, तथा च सति मूले भवं मौलिकं-मौलधनं ते प्रवेशयन्तीव प्रवेशयन्ति, मूलप्रवेशवणिक्सदृशास्त इत्यभिप्रायः, ये किमित्याह 'माणुस्सं' ति मनुष्याणामिदं मानुषी तां 'योनिम्' उत्पत्तिस्थानम् 'आयान्ति' आगच्छन्ति, बालत्वपरिहारेण पण्डितत्वमासेवमाना ये त इति सूत्रार्थः ॥

मू.(१९८) *वेमायाहिं सिक्खाहिं, जे नरा गिहि सुव्वया ।*
उविंति माणुसं जोणिं, कम्मसच्चा हु पाणिणो ॥

वृ. विविधा मात्रा-परिमाणमासां विमात्राः-विचित्रपरिमाणाः ताभिः परिमाणविशेषमाश्रित्य विसदृशीभिः, 'शिक्षाभिः' प्रकृतिभद्रकत्वाद्यसरूपाभिः, उक्तं हि-"चउहिं ठाणेहिं जीवा मनुयाउं बंधंति, तंजहा-पगतिभद्दयाए पगतिविनीययाए सानुक्कोसयाए अमच्छरिया" त्ति 'ये' इत्यविवक्षितविशेषाः 'नराः' पुरुषाः 'गृहिणश्च' ते गृहस्थाः 'सुव्रताश्च' धृतसत्पुरुषव्रताः, ते हि प्रकृतिभद्रकत्वाद्यभ्यासानुभावत एव न विपद्यपि विपादन्ति सदाचारं वा नावधीरयन्तीत्यादिगुणान्विताः, इदमेव च सतां व्रतं, लौकिका अप्याहुः-

"विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां, प्रियां न्याय्यां वृत्तिं मलिनमसुभङ्गेऽप्यसुकरम् ।
असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यस्तनुधनः, सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ? ॥"

आगमविहितव्रतधारणं त्वमीषामसम्भवि, देवगतिहेतुतयैव तदभिधानात्, त ईदृशाः किमित्याह-उपयान्ति 'माणुसं' ति मानुषीं-मानुषसम्बन्धिनीं 'योनिम्' उक्तरूपां कर्म्मणा-मनोवाक्कायक्रियालक्षणेन सत्या-अविसंवादिनाः कर्म्मसत्याः, 'हु' अवधारणे, ततः कर्म्मसत्याः एव सन्तः, तदसत्यतायास्तिर्यग्योनिहेतुत्वेनोक्तत्वात्, तथा च वाचकः-

"धूर्ता नैकृतिकाः स्तब्धा, लुब्धाः कार्पटिकाः शठाः ।
विविधां ते प्रपद्यन्ते, तिर्यग्योनिं दुरुत्तराम् ॥"

इत्यादि, पाठान्तरतश्च 'कर्मसु' अर्थान्मनुष्यगतियोग्यक्रियारूपेषु सक्ता-अभिष्वङ्गवन्तः कर्मसक्ताः प्राणिनः-जीवाः, इह च नरग्रहणेऽपि प्राणिग्रहणं देवादिपरिग्रहार्थमिति न पुनरुक्तम्। यदिवा-विमात्रादिभिः शिक्षाभिर्ये नरा गृहिसुव्रताः यत्तदोर्नित्याभिसम्बन्धात् ते मानुषीं

योनिमुपयान्ति, किमित्येवम् ?, अत आह-'कम्मसच्चा हु पाणिणो' त्ति हुशब्दो यस्मादर्थे, यस्मात् सत्यानि-अवश्यफलानि कर्म्माणि ज्ञानावरणादीनि येषां ते सत्यकर्म्माणः प्राणिनः, निरुपक्रमकर्म्मापेक्षं चैतदिति सूत्रार्थः ॥ सम्प्रति लब्धलाभोपनयमाह

मू. (१९९) जेसिं तु विउला सिक्खा, मूलिगंते अतिच्छिया ।
सीलवंता सविसेसा, अदीना जंति देवयं ॥

वृ. 'येषां तु' येषां पुनः 'विपुला' निःशङ्कितत्वादिसम्यक्त्वाचाराणुव्रतमहाव्रतादिविषयत्वेन विस्तीर्णा 'शिक्षा' ग्रहणासेवनात्मिका, अस्तीति गम्यते, मूले भवं मौलिकं-मूलधनमिव मानुषत्वं, त एवंविधाः, विउट्टियंति अनिट्टयंति अतिच्छियंति पाठत्रयेऽपि अतिक्रान्ताः उल्लङ्घितवन्त इत्यर्थः, यद्वाऽतिक्रम्य-उल्लङ्घ्य, कीदृशाः सन्तः ? शीलं-सदाचारः अविरतसम्यग्दृशां विरतिमतां तु देशसर्वविरमणात्मकं चारित्रं तद्विद्यते येषां ते शीलवन्तः, तथा सह विशेषेण-उत्तरोत्तरगुणप्रतिपत्तिलक्षणेन वर्त्तन्त इति सविशेषाः, अत एव 'अदीनाः' कथं वयमत्र भविष्याम इति वैक्लव्यरहिताः परिषहोपसर्गादिसम्भवे वा न दैन्यभाज इत्यदीनाः 'यान्ति' प्राप्नुवन्ति, देवभावो देवता तामेव दैवतं । ननु तत्त्वतो मुक्तिश्चदानीं विशिष्टसंहननाभावतोऽभावाद्देवगतेश्च "छेवट्टेण ठ गम्मइ चत्तारि उ जाव आदिमा कप्पा" इति वचनाच्छेदपरिवर्तिसंहननिनामिदानींतनानामपि सम्भवादेवमुक्तमिति सूत्रार्थः ॥ प्रस्तुतमेवार्थं निगमयन्नुपदेशमाह

मू. (२००) एवं अदीनवं भिक्खुं, अगारिं च विजाणिया ।
कहन्नु जिच्चमेलिक्खं, जिच्चमाणो न संविदे ॥

वृ. 'एवम्' अमुना न्यायेन लाभान्वितं 'अदीणव'न्ति दीक्तवती दीनवन्तं न तथाऽदीनवन्तम्-अदीनं, दैन्यरहितमित्यर्थः 'भिक्षुं' यतिम् 'अगारिणं' च गृहस्थं 'विज्ञाय' विशेषेण तथाविधशिक्षावशादेवमनुजगामित्वलक्षणेन 'ज्ञात्वा' अवगम्य, यतमान इति शेषः, 'कथम्' ? केन प्रकारेण ?, न कथञ्चिदित्यर्थः, 'नु:' वितर्के, 'जिच्चं'ति सूत्रत्वात् जीयेत-हार्येत विवेकी, तत्प्रतिकूलैः, कषायोदयादिभिरिति गम्यते, 'इहक्षम्' अन्तरोक्तं देवगत्यात्मकं लाभं 'जिच्चमाणो'त्ति वाशब्दस्य गम्यमानत्वाज्जीयमानो वा-हार्यमाणः, तैरेव कषायादिभिः 'न संविदे' त्ति सूत्रत्वान्न संवित्ते-न जानीते यथाऽहमेभिर्जीये इति, कथं न्वितीहापि योज्यते, ततोऽयमर्थः कथं नु न संवित्ते ?, संवित्त एव, जानीत एव ज्ञपरिज्ञया, प्रत्याख्यानपरिज्ञया च तन्निरोधं प्रति प्रवर्तत एव, इत्येवं च वदन् काक्वोपदिशति-यत एवं ततो यूयमप्येवं जानाना यथा न देवगतिलक्षणं लाभं जीयेध्वं कषायादिभिस्तथा यतध्वं, कथञ्चिज्जीयमानाश्च सम्यग् विज्ञाय तत्प्रतीकारायैव प्रवर्तध्वमिति, यद्वा एवमदीनवन्तं भिक्षुमगारिणं च विज्ञाय यतमानो 'जिच्चं'ति जीयतेहार्यते अतिरौद्रैरिन्द्रियादिभिः आत्मा तदिति ज्ञेयं, तच्चेह प्रक्रमान्मनुष्यदेवगतिलक्षणम्, 'एलिक्खं' ति सुव्यत्यया दीहक्षोऽभिहितार्थाभिज्ञः कथं न जीयमानो न संवित्ते ?, अपि तु संवित्त एव, संविदानश्च यथा न जीयेत तथा यतेतेत्यभिप्रायः । अथवा-एवमदीनवन्तं भिक्षुमगारिणं च लब्धलाभं विज्ञाय यतमानः कथं नु 'जिच्चं'ति आर्षत्वाज्जीयते-हार्यते, विषयादिभिरिति गम्यते, ईदृशं देवगतिलक्षणं लाभमिति शेषः, अयमाशयो-यदि लभमाना न विज्ञातास्युर्लाभो वा न तथाविधस्तदा जयनमपि स्यात्, यदा तु लभमानौ भिक्षुकागारिणौ दृश्येते लाभश्च

देवत्वलक्षणः तदा कथमयं जानानोऽपि जन्तुर्जीयते ?, अत आह-जीयमानो न संवित्ते, किमुक्तं भवति ?-यद्यसौ जीयमानो जानीयात्तदा तदुपायपरतया न जीयेत, यदा त्वसौ विषयव्यामोहतो न जानीते तदा जीयत एवेति किमत्र चित्रम् ? इति सूत्रार्थः ॥ समुद्रदृष्टान्तमाह-

मू.(२०१) *जहा कुसग्गे उदयं, समुद्देण समं मिणे।*
एवं मानुस्सगा कामा, देवकामान अंतिए ॥

वृ. 'यथा' इति दृष्टान्तोपन्यासे, कुशो-दर्भविशेषस्तस्याग्रं-कोटिः कुशाग्रं तस्मिन् 'उदकं' जलं, तत्किमित्याह- 'समुद्रेण' इति 'तात्स्थ्यात्तद्व्यपदेश' इतिन्यायात् समुद्रजलेन 'समं' तुल्यं 'मिनुयात्' परिच्छिन्द्यात्, तथा किमित्याह-'एवम्' उक्तनीत्या 'मानुष्यकाः कामाः' मनुष्यसम्बन्धिनः कामा विषयाः, मानुष्यविशेषणं तु तेषामेवोपदेशार्हत्वाद्विशिष्टभोगसम्भवात्, 'देवकामानां' दिव्यभोगानाम् 'अन्तिके' समीपे, कृता इति शेषः, दूरस्थितानां हि न सम्यगवधारणमित्येवमाह, किमुक्तं भवति ?-यथाऽज्ञः कश्चित् कुशाग्रस्थितं जलबिन्दुमालोक्य समुद्रवन्मन्यते, एवं मूढाश्चक्रवर्त्यादिमनुष्यकामान् दिव्यभोगोपमान् अध्यवस्यन्ति, तत्त्वतस्तु कुशाग्रजलबिन्दोरिव समुद्रान्मनुष्यकामानां दिव्यभोगेभ्यो महदेवान्तरमिति सूत्रार्थः ॥

मू.(२०२) *कुसग्गमित्ता इमे कामा, सन्निरुद्धंमि आउए।*
कस्स हेउं पुरा काउं, जोगक्खेमं न संविदे ? ॥

वृ. कुशाग्रशब्देन कुशाग्रस्थितो जलबिन्दुरुपलक्ष्यते, तन्मात्राः-तत्परिमाणाः 'इमे' इति प्रत्यक्षाः 'कामाः' प्रकृतत्वान्मनुष्यविषयाः, कदा य इत्याह-'सन्निरुद्धे' अत्यन्तासंक्षिप्ते, यद्वा सम्-एकीभावेन निरुद्धे-अध्यवसानादिभिरुपक्रमणकारणैरवष्टब्धे 'आयुषि' जीविते, अनेन मनुष्यायुषोऽल्पतया सोपक्रमतया वा कामानामल्पत्वमुक्तं, समृद्धयाद्यल्पतोपलक्षणं चैतद्, अस्मिंस्त्वर्थे उक्ते दिव्यकामास्तु जलधितुल्या इत्यर्थादुक्तं भवति, 'कस्स हेउं'ति सूत्रत्वात् कं हेतुं-कारणं 'पुरा काउं'ति तत एव पुरस्कृत्य-आश्रित्य, अलब्धस्य लाभो-योगो लब्धस्य च परिपालनं-क्षेमोऽनयोः समाहारो योगक्षेमं, कोऽर्थः ?-अप्राप्तविशिष्टधर्मप्राप्तिं प्राप्तस्य च परिपालनं 'न संवित्ते' न जानीते, जन इति शेषः, तदसंवित्ती हि मनुष्यविषयाभिष्वङ्ग एव हेतुः, ते च धर्मप्राप्यदिव्यभोगापेक्षयैवंप्रायाः, ततस्तत्त्यागतो विषयाभिलाषिणापि धर्म्म एव यतितव्यमित्यभिप्रायः, यद्वा-यतः कुशाग्रमात्रा-दर्भप्रान्तवदल्पाः इमे कामाः, तेऽपि न पल्योपमादिपरिमितौ दीर्घीयस्यायुषि, किन्तु 'सन्निरुद्धे' संक्षिप्ते आयुषि, ततः 'कस्स हेउं'ति कस्माद्धेतोः पुरस्कृत्येव पुरस्कृत्य मुख्यतयाऽङ्गीकृत्य, असंयममिति शेषः, 'योगक्षेमम्' उक्तरूपं न संवित्ते, भावार्थस्त्वभिहित एवेति सूत्रार्थः ।

इत्थं दृष्टान्तपञ्चकमुक्तं, तत्र च प्रथममुरभ्रदृष्टान्तेन भोगानामायतावपायबहुलत्वमभिहितम्, आयतौ चापायबहुलमपि यत्र तुच्छं न तत्परिहर्तुं शक्यत इति काकिण्याम्रफलदृष्टान्ततस्तुच्छत्वं, तुच्छमपि च लाभच्छेदात्मकव्यवहारविज्ञतयाऽऽयव्ययतोलनाकुशल एव हातुं शक्त इति वणिग्व्यवहारोदाहरणम्, आयव्ययतोलनाऽपि च कथं कर्तव्येति समुद्रदृष्टान्तः, तत्र हि दिव्यकामानां समुद्रजलोपमत्वमुक्तं, तथा च तदुपार्जनं महानायोऽनुपार्जन तु महान् व्यय इति तत्त्वतो दर्शितमेव भवति ॥ इह च योगक्षेमासंवेदने कामानिवृत्त एव भवतीति तस्य दोषमाह-

मू.(२०३) *इह कामानिवट्टस्स, अत्तट्ठे अवरज्झति।*
सुच्चा नेयाउअं मग्गं, जं भुज्जो परिभस्सति॥

वृ. 'इह'इति मनुष्यत्वे जिनशासने वा, प्राप्त इति शेषः, कामेभ्योऽनिवृतः-अनुपरतः कामानिवृत्तः तस्यात्मनोऽर्थ आत्मार्थः-अर्थ्यमानतया स्वर्गादिः 'अपराध्यति' अनेकार्थत्वाद्धातूनां नश्यति, यद्वा-आत्ममैवार्थं आत्मार्थः स एवापराध्यति, नान्यः कश्चिदात्मव्यतिरिक्तोऽर्थः सापराधो भवति, उभयत्र दुर्गतिगमनेनेति भावः। आह-विषयवाञ्छाविरोधिनि जिनागमे सति कथं कामानिवृत्तिसम्भवः?, उच्यते, 'श्रुत्वा' आकर्ण्य 'नैयायिकं' न्यायोपपन्नं 'मार्गं' सम्यग्दर्शनादिकं मुक्तिपथं यद् 'भूयः' पुनरपि परिभ्रश्यति, कामानिवृत्तित इति शेषः, कोऽभिप्रायः?-जिनागमश्रवणात् कामानिवृत्तिं प्रतिपन्नोऽपि गुरुकर्मत्वात् प्रतिपतति, ये तु श्रुत्वापि तदप्रतिपन्नाः श्रवणं च येषां नास्ति ते कामानिवृत्ति एवेतिभावः।

यद्वा-यदसौ कामानिवृत्तः सन् श्रुत्वा नैयायिकं मार्गं भूयः परिभ्रश्यति-मिथ्यात्वं गच्छति तदस्यात्मार्थ एव गुरुकर्मापराध्यति, अनेन मा भूत्कस्यचिन्मूढस्य सिद्धान्तमधीत्याप्युत्पथप्रस्थितान् विलोक्य सिद्धान्त एव दोषः इति तदनपराधित्वमुक्तं, पठ्यते च 'पत्तो नेयाउयं'ति स्पष्टमिति सूत्रार्थः॥ यस्तु कामेभ्यो निवृत्तस्तस्य गुणमाह-

मू.(२०४) *इह कामा नियट्टस्स, अत्तट्ठे नावरज्झति।*
पूतिदेहनिरोहेणं, भवे देवेति मे सुयं॥

वृ. इह कामेभ्यो निवृत्तः कामनिवृत्तिः तस्यात्मार्थः-स्वर्गादिः 'नापराध्यति' न भ्रश्यति, आत्मलक्षणो वाऽर्थो न सापराधो भवति, किं पुनरेवं?, यतः-पूतिः कुथितो देहः-अर्थादौदारिकं शरीरं तस्य निरोधः-अभावः पूतिदेहनिरोधः तेन 'भवेत्' स्यात्, प्रकृतत्वात् कामनिवृत्तो 'देवः' सौधर्मादिनिवासी सुरः, उपलक्षणत्वात् सिद्धो वा, 'इती'त्येतत् मया 'श्रुतम्' आकर्णितं, परमगुरुभ्य इति गम्यते, अनेन स्वगार्द्यवाप्तिः आत्मार्थानपराधे निमित्तमुक्तमिति सूत्रार्थः॥

मू.(२०५) *इड्ढी जुती जसो वन्नो, आउं सुहमनुत्तरं।*
भुज्जो जत्थ मनुस्सेसु, तत्थ से उववज्जति॥

वृ. 'ऋद्धिः' कनकादिसमुदायः 'द्युतिः' शरीरकान्तिः 'यशः' पराक्रमकृता प्रसिद्धिः 'वर्णः' गाम्भीर्यादिगुणैः श्लाघा गौरवं वा 'आयुः' जीवितं 'सुखं' यथेप्सितं विषया बाह्यावाल्हादः, न विद्यते उत्तरं-प्रधानमस्यादित्यनुत्तरम्, इदं च सर्वत्र योज्यते, 'भूयः' पुनः, देवभवापेक्षमेतत्, तत्रापि ह्यनुत्तराण्येवैतान्यस्य सम्भवन्ति 'यत्र' येषु 'मनुष्येषु' मनुजेषु 'तत्र' तेषु 'से' त्ति सोऽथशब्दार्थो वा, ततोऽनन्तरम् 'उत्पद्यते' जायत इति सूत्रार्थः एवं कामानिवृत्त्या यस्यात्मार्थोऽपराध्यति स बालः इतरस्तु पण्डित इत्यर्थादुक्तम्॥

मू.(२०६) *बालस्स पस्स बालत्तं, अहम्मं पडिवज्जिआ।*
चिच्चा धम्मं अहम्मिट्ठे, नरएसूववज्जइ॥

वृ. 'बालस्य' अज्ञस्य 'पश्य' अवधारय 'बालत्वम्' अज्ञत्वं, किं तदित्याह-'अधर्मं' धर्मविपक्षं विषयासक्तिरूपं 'प्रतिपद्य' अभ्युपगम्य, पठ्यते च-'पडिवज्जिणो'त्ति प्रतिपादिनोऽवश्यंप्रतिपद्यमानस्य 'त्यक्त्वा' अपहाय 'धर्मं' विषयनिवृत्तिरूपं सदाचारं 'अहमिट्ठे'त्ति

प्राग्वत् 'नरके' सीमन्तकादावुपलक्षणत्वात् अन्यत्र वा दुर्गतावुत्पद्यते ॥

मू.(२०७) *धीरस्स पस्स धीरत्तं, सव्वधम्मानुवत्तिणो ।*
चिच्चा अधम्मं धम्मिट्ठं, देवेसु उववज्जइ ॥

वृ. तथा धीः बुद्धिस्तया राजत इति धीरः -धीमान् परीषहाद्यक्षोभ्यो वा धीरः तस्य 'पश्य' प्रेक्षस्व 'धीरत्वं' धीरभावं, सर्वं धर्मं क्षान्त्यादिरूपमनुवर्तते तदनुकूलाचारतया स्वीकुरुत इत्येवंशीलो यस्तस्य सर्वधर्मानुवर्तिनः, धीरत्वमेवाह-'त्यक्त्वा' हित्वा अधर्म-विषयाभिरतिरूपमसदाचारु 'धम्मिट्ठं'त्ति इष्ट धर्म्मा, यदिवा- अतिशयेन धर्मवानिति, इष्ठनि "विन्मतोर्लुगि" ति मतुब्लोपे धर्मिष्ठ इति, देवेषूपपद्यत इत्याह ॥ यतश्चैवमतो यद्विधेयं तदाह-

मू.(२०८) *तुलिआण बालभावं, अबालं चेव पंडिए ।*
चइऊण बालभावं, अबालं सेवए मुनी ॥

वृ. 'तोलयित्वा' इह प्राग्वत् 'बालभावं' बालत्वम् 'अबालं'ति भावप्रधानत्वान्निर्देश-स्यबालत्वं धीरत्वं, 'च:' समुच्चये, एवेति प्राकृतत्वादनुस्वारलोपः 'एवम्' अनन्तरोक्त-प्रकारेण 'पण्डितः' बुद्धिमान त्यक्त्वा 'बालभावं' बालत्वम् 'अबालं'ति अबालत्वं 'सेवते अनुतिष्ठति 'मुनिः' यतिरिति सूत्रत्रयार्थः ॥ 'इतिः' परिसमाप्तौ, ब्रवीमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वदेवेति सूत्रार्थः ॥

अध्ययनं ७-समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे सप्तमाध्ययनस्य भद्रबाहुस्वामिरचिता निर्युक्तिः एवं शान्त्याचार्यरचिता टीका परिसमाप्ता ।

अध्ययनं - ८ कापिलीयं

वृ. व्याख्यातं उरभ्रीयाख्यं सप्तममध्ययनं, सम्प्रत्यष्टममारभ्यते, अस्य चायमभिसम्बन्धः- अनन्तराध्ययने रसगृद्धेरपायबहुलत्वमभिधाय तत्त्याग उक्तः, स च निर्लोभस्यैव भवतीति इह निर्लोभत्वमुच्यते, इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचर्चा प्राग्वद यावन्नामनिष्पन्ननिक्षेपे कापिलीयमिति नाम, अतः कपिलनिक्षेपमाह-

नि.[२५०] निक्खेवो कविलंमी चउव्विहो दुव्विहो य दव्वंमि ।
आगमनोआगमओ नोआगमओ य सो तिविहो ॥

वृ. 'निक्षेपः' न्यासः 'कपिले' कपिलविषयः 'चतुर्विधः' चतुष्प्रकारो नामस्थापनाद्रव्य-भावभेदात्, तत्राद्यौ प्रतीतौ, 'द्विविधः' द्विभेदो भवति 'द्रव्ये' इति द्रव्यविषयः द्वैविध्यमेवाह-आगतमो नोआगमतः, तत्रागमतो ज्ञाताऽनुपयुक्तो नोआगमतश्च स 'त्रिविधः' त्रिभेद इति

नि.[२५१] जाणगसरीरभविए तव्वतिरित्ते य सो पुनो तिविहो ।
एगभविअबद्धाउअ अभिमुहुओ नामगोए अ ॥

वृ.कपिलशब्दार्थज्ञशरीरं पश्चात्कृतपर्यायं ज्ञशरीरमित्युच्यते, तदेव द्रव्यकपिलो, 'भविय'त्ति भव्यशरीरं पुरस्कृतकपिलशब्दार्थज्ञतात्मकपर्यायं द्रव्यकपिलः, तद्व्यतिरिक्तश्च, स तद्व्यति-रिक्तद्रव्यकपिलः पुनः 'त्रिविधः' त्रिभेदः, त्रैविध्यमेवाह- एकभविको बद्धायुष्कोऽभिमुख-

नामगोत्रशेति गाथार्थः ॥ भावकपिलमाह-

नि.[२५२] कविलाउनामगोयं वेयंतो भावओ भवे कविलो ।
तत्तो समुट्ठियमिणं अज्झयणं काविलिज्जंति ॥

वृ. कपिलायुनामगोत्रं 'वेदयन्' अनुभवन् 'भावतः' परमार्थतस्य [illegible] 'ततः' तस्मात समुत्थितमत् 'इदं' प्रस्तुतम् अध्ययनं 'काविलिज्ज'त्ति कापिलीयमिति, उच्यत इति शेष इति गाथार्थः ॥ कथं पुनरिदं कपिलात्समुत्थितमित्याह-

नि.[२५३] कोसंबी कासवजसा कविलो सावत्थि इंददत्तो य ।
इक्के य सालिभद्दे धणसिट्ठि पसेणइ राया ॥

नि.[२५४] कविलो निच्चियपरिवेसिआइ आहारमित्तसंतुट्ठे ।
वावारिओ (य) दुहि मासेहिं सो निग्गओ गंपि ॥

नि.[२५५] दक्खिण्णे पत्थंतो वड्ढो अ तओ अ अप्पिओ गंतो ।
राया से देइ वरं किं देमी कंन ते अत्थो ? ॥

नि.[२५६] जहा लाहो तहा लोहो, लाहा लोहो पवड्ढति ।
दोमासकयं कज्जं, कोडिएवि न निट्ठियं ॥

नि.[२५७] कोडिंपि देमि अज्जेत्ति भणइ राया पहिट्ठमुहवन्नो ।
सोऽवि चउऊण कोडिं समणो जाओ समिअपावो ॥

नि.[२५८] छम्मासे छउमत्थो अट्ठारस जोयणाइ गयगिहं ।
बलभद्दमुहाणं इक्कडदासाण पंचयसे ॥

नि.[२५९] अइसेसे उप्पन्ने होही अट्ठो इमोत्ति नाऊणं ।
अद्धाणगमनचित्तं करेइ धम्मट्ठया गीयं ॥

वृ. आसामक्षरार्थः सुगम एव, नवरं 'निच्चियपरिवेसियाए'त्ति नैत्यिकपरिवेषिकया-प्रतिदिननियुक्तभक्तदान्या वावारितो'त्ति व्यापारितो-नियुक्तः 'दुहिं मासेहिं'ति द्वाभ्यां मापकाभ्यां, "तादर्थ्ये चतुर्थी" 'दक्खिण्णंत'ति प्राकृतत्वादक्षिणां 'पहट्ठमुहवन्न'त्ति प्रहृष्टः-प्रहर्षवान्, मुखवर्णो-मुखच्छाया यस्य स तथा, मुखस्य प्रहृष्टत्वादुपचारात्तद्वर्णोऽपि प्रहृष्ट उक्तः, यद्वा प्रहृष्टमुखस्येव मुखवर्णो यस्य स तथा, मयूरव्यंसकादित्वात्, समासः, मानसत्वाच्च हर्षादीनां मुखस्यापि प्रहृष्टत्वं रूढित इति भावनीयम् ।

'इक्कडदासाणं'ति इक्कडदासजातीनाम् 'अतिशेषे' अतिशायि 'होही अट्ठो इमो'त्ति भविष्यति अर्थः-प्रयोजनम् 'अयं' पूर्वसङ्गतिकधौरशतपञ्चकप्रतिबोधलक्षण इति ज्ञात्वा च 'अद्धाणगमनचित्तं'ति अध्वा-मार्गस्तद्गमने चित्तम्-अभिप्रायोऽध्वगमनचित्तं तत्करोतीव करोति, तत्त्वतो हि केवलित्वेनामनस्कत्वान्न तस्याभिप्रायकरणसम्भवः, 'धम्मट्ठय'त्ति आर्षत्वाद्धर्मार्थं-तत्त्वावबोधतस्तेषां धर्मः स्यादित्येवमर्थं 'गीयं'ति चास्य गम्यमानत्वाद्गीतं च-स्वरग्रामानुगतगीतिकानिबद्धमिदमेवाध्ययनं करोतीति योगः, वर्तमाननिर्देशस्तु सूत्रस्य त्रिकालगोचरतामाह, यदिवा-'गीत'मिति स्वराद्यनुगमनेन शब्दितमिदमिति गम्यते । भावार्थः कथानकादवसेयः,

'तेणं' कालेणं तेणं समएणं कोसंबीए नयरीए जितसत्तू राया, कासवो बंभणो चोद्दसविज्जा

ठाणपारगो, रायणो बहुमतो, वित्ती से उवकप्पिया, तस्स जसा नाम भारिया, तीसे पुत्तो कविलो नाम, कामवो तंमि कविले खुड्डुलए चेव कालगतो, ताधे तंमि मए तं पयं रायणा अण्णस्स मरुयगस्स दिन्नं, सो य आसेण छत्तेण य धरिज्जमानेण वच्चइ, तं दट्ठूण जसा परुण्णा, कविलेण पुच्छिया, ताए सिट्ठं-जहा पिया ते एवंविहाए इड्ढीए निग्गच्छियाइओ, तेन भण्णति-कथं ?, सा भणति-जेन सो विज्जासंपन्नो, सो भणइ-अहंपि अहिज्जामि, सा भणइ-इहं तुमं मच्छरेण न कोइ सिक्खावेहिति, वच्च सावत्तीए, तत्थ गिहंमि इंददत्तो नाम माहणो सो ते सिक्खावेहिति। सो तो तस्स सगासं, तेन पुच्छितो-कओऽसि तुमं ?, तेन जहावत्तं कहियं, सो तस्स सगासे अहिज्जिउं पयत्तो। तत्थ सालिभद्दो नाम इब्भो, सो से तेन उवज्झाएण नच्चंतियं दवावितो, सो तत्थ जिमितो २ अजिज्जइ, दासचेडो य तं परिवेसेइ। सो य हसणसीलो तीए सद्धिं संपलग्गो, तीए भण्णइ-तुमं मे पोतो, न य ते किंचिवि, नवरिं मा रुसिज्जासि, पोत्तमुल्लणिमित्तं अहमत्तेहिं २ समं अच्छामि, इयरहाहं तुज्झ आणाभोज्जा। अण्णया दासीण महो दुक्कइ, सा तेन समं निव्विण्णया, निद्दं सा न लहइ, तेन पुच्छिया-कतो ते अरती ?, तीए भण्णति-दासीमहो उवट्ठितो, ममं पत्त-पुप्फाइमोल्लं नत्थि, सहीजणमज्झे विगुप्पिस्सं, ताहे सो अधितिं पगतो, ताए भण्णति-मा अद्धितिं करेहि, एत्थ धनोनाम सिट्ठी, अप्पभाए चेव जे नं पढमं वद्धावेइ से दो सुवण्णए भासए देइ, तत्थिमं गंतूण तं वद्धावेहि, आमंति तेन भणियं। तीए लोभेण मा अन्नो गच्छिहिंत्ति अतिपभाए पेसितो, वच्चंतो य आरक्खियपुरिसेहिं गहितो बद्धो य।

ततो पभाए पसेणइस्स रन्नो उवनीतो, राइणा पुच्छितो, तेन सब्भावो कहितो, रायणा भणितो-जं मग्गसि तं देमि, सो भणति-विचिंतिउं मग्गामि, रायणा तहत्ति भणिए असगवणियाए चिंतेउमारद्धो-किं दोहिं मासेहिं साडिगाभरणे पडिवासिगा जाणवाहणाउज्जाणोवभोगा मम वयस्साणं पव्वागयाण धरं भज्जा वउद्धयं जंचण्णं उवउज्जं ?, एवं जाव कोडीएवि न ठाएति। चिंतंतो सुहज्झवसाणो संवेगमावण्णो जाइं सरिऊण सयंबुद्धो सयमेव लोयं काऊण देवयादिन्नगहियायारभंडगो आगतो रायसगासं, रायणा भन्नति-किं चिंतियं ?, सो भणति-'जहा लाभो तहा लोभो' कण्ठ्यः, राया भणति-

"कोडिंपि देमि अज्जोत्ति भणति राया पहट्ठमुहवण्णो।
सोऽवि चइऊण कोडिं जातो समणो समियपावो॥"

छम्मासा छउमत्थो आसि। इतो य रायगिहस्स नयरस्स अंतरा अद्धारसजोयणाए अडवीए बलभद्दपामोक्खा इक्कडदासा नाम पंच चोरसया अच्छंति, नारदेण जाणियं-जहा ते संबुज्झिस्संति, ततो पट्ठितो संपत्तो य तं पएसं, सोहिएण य दिट्ठो कोवि एतित्ति आसण्णीभूतो, नाओ जहा समणगोत्ति, अम्हं परिभविउं आगच्छति, रोसेण व गहितो सेणावइसमीवं नीतो, तेन भण्णति-मुयह एयंति, ते भणंति-खेल्लामो एतेणंति, तेहिं भण्णति-नच्चसु समणगोत्ति, सो भणइ-वायंतगो नत्थि, ताहे ताणवि पंचवि चोरसयाणि तालं कुट्टेंति, सोऽवि गायति ध्रुवगं,

"अधुवे असासयंमी, संसारंमि दुक्खपउराए।
किं नाम तं होज्ज कम्मयं ? जेणाहं दुग्गइं न गच्छेज्जा॥"

एवं सव्वत्थ सिलोगन्तरे ध्रुवगं गायति 'अधुवे'त्यादि, तत्थ केइ पढमसिलोगे संबुद्धा,

केइ बीए, एवं जाव पंचमि सया संबुद्धा पव्वातियंति । इत्यभिहितः सम्प्रदायोऽवसितश्च नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रानुगमे ऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं,

मू. (२०९) *अधुवे असासयंमि संसारंमि दुक्खपउराए ।*
किं नाम होज्ज तं कम्मयं ?, जेणाहं दुग्गइं न गच्छेज्जा ॥

वृ. स हि भगवान् कपिलनामा स्वयंबुद्धश्चारसङ्घातसम्बोधनायेमं ध्रुवकं सङ्गीतवान्, ध्रुवक लक्षणं चेदम्

'जं गिज्जइ पुव्वं चिय पुनो पुनो सव्वकव्वबंधेसु ।
ध्रुवयंति तमिह तिण्हिं छप्पायं चउपयं दुपयं ॥''

तत्र ध्रुवो य एकास्पदप्रतिबद्धो न तथाऽध्रुवः तस्मिन्, संसार इति सम्बन्धः, भ्रमन्ति ह्यस्मिन् अनेकेषु उच्चावचस्थानेषु जन्तवः, तेषां क्वाचिदनुत्पन्नपूर्वत्वाभावाद्, उक्तं च -

''रङ्गभूमिर्न सा काचिच्छुद्धा जगति वर्तते ।
विचित्रैः कर्मनेपथ्यैर्यत्र सत्त्वैर्न नाटितम् ॥''

इति, शाश्वतं-नित्यम् अविद्यमानं शाश्वतमस्मिन्निति अशाश्वतस्तस्मिन्, संसार एव, अशाश्वतं हि सकलमिह राज्यादि, तथा च हारिलवाचकः -

''च लंराज्यैश्वर्यं धनकनकसारः परिजनो, नृपाद्वाल्लभ्यं च चलममरसौख्यं च विपुलम् ।
चलं रूपाऽऽरोग्यं चलमिह च जीवितमिदं, जनो दृष्टो यो वै जनयति सुखं सोऽपि हि चलः ॥''

यद्वा- ध्रुवो नित्यो न तथाऽध्रुवस्तस्मिन्, एवं च कियत्कालावस्थायित्वमप्याशङ्क्येत अत आह-शश्वद्भवनाच्छाश्वतः न तथाऽशाश्वतस्तस्मिन्, शश्वद्भवने हि द्रव्यादिक्षणावस्थितिरपि सम्भवेत्, तन्निषेधे तु तस्या अपि निषेधात्पर्यायार्थतया तडित्सम्पातवत् क्षणमात्रावस्थायिनीत्युक्तं भवति, एकार्थं वा पदद्वयम्, उपदेशात्वादतिशयख्यापकत्वाच्च न पौनरुक्त्यं, क्व पुनः ईदृशि ? संसरन्त्यस्मिन् कर्मवशवर्तिनो जन्तव इति संसारस्तस्मिन्, 'दुक्खपउराए'त्ति प्रचुराण्येव प्रचुरकाणि-प्रभूतानि दुःखानि शारीरमानसानि यस्मिन् स तथा तस्मिन्, प्राकृतत्वाच्च सूत्रे एवं निर्देशः यद्वा दुःखानां प्रचुरः आयो-लाभो यस्मिन् स तथा तस्मिन्, 'कि' मिति प्रश्ने ? 'नामे'ति संभावनायां वाक्यालङ्कारे वा 'भवेत्' स्यात् तत् क्रियत इति कर्म तदेव कर्मकम्-अनुष्ठानं, यत् कीदृगित्याह-येन कर्मणा 'हेतौ तृतीया' अहमित्यात्मानं निर्दिशति, 'दुर्गति' नरकादिकां 'न गच्छेज्ज'त्ति न गच्छेयं-न यायां, पठन्ति च-

'जेणाहं दुग्गईतो मुच्चेज्ज'त्ति सुगमम्, अत्र भगवतश्चरमसंशयत्वेऽपि मुक्तिगामितया दुर्गत्यसत्त्वेऽपि च प्रतिबोध्यपूर्वमङ्गतिकापेक्षमित्थमभिधानं, नागार्जुनीयास्तु प्रथमपदमेवं पठन्ति 'अधुवंमि मोहगहणए' तत्र मुह्यतेऽनेन जानन्नपि जन्तुरिति मोहो-दर्शनमोहनीयादिः तेन गहनो-गुपिलो मोहगहनः स एव मोहगहनकस्तस्मिन्निति सूत्रार्थः ॥ एवं च भगवतोद्गीते तेऽप्येनमेव ध्रुवकं प्रत्युद्गायन्ति तालं च कुट्टयन्ति, तैश्च प्रत्युद्गीते भगवानाह-

मू. (२१०) *विजहित्तु पुव्वसंजोगं न सिनेहं काहिंचि कुव्विज्जा ।*
असिनेह सिनेहकरेहिं दोसपउसेहि मुच्चई भिक्खू ॥

वृ. 'विहाय' विशेषेण-तदननुस्मरणाद्यात्मकेन हित्वा-त्यक्त्वा, कमित्याह-पुरा परिचिता

मातृपित्रादयः पूर्वशब्देनोच्यन्ते ततस्तैः, उपलक्षणत्वादन्यैश्च स्वजनधनादिभिः संयोगः-सम्बन्धः पूर्वसंयोगस्तं, ततः किमित्याह-न 'स्नेहम्' अभिष्वङ्गं क्वचिद्बाह्येऽभ्यन्तरे वा वस्तुनि 'कुर्व्वज्ज'त्ति कुर्वीत, तथा च को गुण इत्याह-'असिणेह'त्ति प्राकृतत्वाद्विसर्जनीयलोपेऽस्नेहः-अविद्यमानप्रतिबन्धः, 'सिनेहकारेहिं'ति सुब्व्यत्ययादपेक्ष्यमाणत्वाच्च स्नेहकारेष्वपि-स्नेहकारणशीलेष्वपि पुत्रकलत्रादिषु, आस्तामन्येष्वित्यपिशब्दार्थः, 'दोषपदैः' अपराधस्थानैः 'मुच्यते' त्यज्यते, किमुक्तं भवति ?-निरतिचारचारित्री भवति, अमुक्तस्नेहो हि कलत्राद्यभिष्वङ्गात् दोषपदमतिचाररूपमाप्नुयाद्, 'भिक्षु'रिति साधुः, पाठान्तरतश्च 'दोषप्रदोषैः' तत्र दोषैः इहैव मनस्तापादिभिः प्रदोषैश्च-परत्र नरकगत्यादिभिरिति सूत्रार्थः ॥ पुनर्यदसौ कृतवांस्तदाह-

मू. (२११) *नो नाणदंसणसमग्गो हियनिस्सेसाए य सव्वजीवाणं।*
तेसिं विमोक्खणट्ठाए भासए मुनिवरो विगयमोहो ॥

वृ. 'तो'त्ति ततोऽनन्तरं, भाषते मुनिवर इति सम्बन्धः, स च कीदृग् ? ज्ञायतेऽनेन विशेषात्मना वस्त्विति ज्ञानं, दृश्यतेऽनेन सामान्यरूपेण वस्त्विति दर्शनं, ताभ्यां प्रस्तावात् केवलाभ्यां समग्रः-समन्वितः, यदिवा प्राकृतत्वात्समग्रे-परिपूर्णे ज्ञानदर्शने यस्यासौ समग्रज्ञानदर्शनः, किमर्थमसौ भाषत इत्याह-'हियणिस्सेसाए' इति सूत्रत्वात् हितः-पथ्यो भावोऽरोग्यहेतुत्वात् निः-श्रेयसं-मोक्षः, हितश्चासौ निः श्रेयसश्च हितनिः श्रेयसस्तस्मै, यद्वा प्राकृतत्वादेव निश्शेषं-समस्तं हितं-सम्यग्ज्ञानादि, तस्यैव तत्त्वतो हितत्वात्, ततो निश्शेषं च तद्धितं च निश्शेषहितं तस्मै, कथं नाम निश्शेषहितावाप्तिः स्यादिति, चशब्दो भिन्नक्रमः, तेषामित्यत्र योज्यते, केषाम् ? 'सर्वजीवानाम्' अशेषप्राणिनां 'तेषां' च पञ्चशतसङ्ख्यचौराणां विमोक्षणम्-अष्टविधकर्मणः पृथक्करणं तदेवार्थः-प्रयोजनं विमोक्षणार्थस्तस्मै-तन्निमित्तं, भाषते इति वर्तमाननिर्देशः प्राग्वत्, यद्वा-'भवति स नामातीतः प्राप्तौ यो नाम वर्तमानत्व' मितिवचनात् तस्यापि तदा वर्तमानतैवेति तात्कालत्वस्य विवक्षितत्वान्न दोषः, 'मुनिवरः' मुनिप्रधानः, विगतो-विनष्टो मोहो यस्य यस्माद्वा स तादृक् ।

इह च विगतमोहवचनेन चारित्रमोहनीयाभावतो यथाख्यातचारित्रमुक्तं । ननु 'हियनिस्सेसाए य सव्वजीवाणं' तीत्युक्तौ 'तेसिं विमोक्खणट्ठाए' इत्यतीरिच्यते, न, तानेवोद्दिश्यास्य भगवतः प्रवृत्तिरिति प्रधानत्वात् पुनस्तद्विमोक्षणार्थतोऽभिधानं, दृश्यते हि-'ब्राह्मणा आयता वशिष्ठोऽप्यायात' इति सामान्योक्तावपि पुनः प्रधानस्याभिधानमिति सूत्रार्थः ॥ यदसौ भाषते तदाह-

मू. (२१२) *सव्वं गंथं कलहं च विप्पजहे तहाविहं भिक्खू।*
सव्वेसु कामजाएसु पासमाणो न लिप्पई ताई ॥

वृ. 'सर्वम्' अशेषं 'ग्रन्थं' बाह्याभ्यन्तरं च, तत्र बाह्यं धनादि, आभ्यन्तरं मिथ्यात्वादि कलहहेतुत्वात्कलहः-क्रोधस्तं, चशब्दान्मानादींश्च, अभ्यन्तरग्रन्थरूपत्वेऽपि चैषां पृथगुपादानं बहुदोषख्यापनार्थं, 'विप्पजहे'त्ति विप्रजह्यात्-परित्यजेत् 'तथाविध'मिति कर्म्मबन्धहेतुं, न तु धर्मोपकरणमपीत्यभिप्रायः, पाठान्तरतश्च-तथाविधो, 'भिक्षुः' यतिस्तस्यैवंविधधर्म्मार्हत्वादेवमभिधानम्, अन्योक्त्या वा त एवैवमुच्यन्ते, ततश्च किं स्यादित्याह 'सर्वेषु' अशेषेषु 'कामजातेषु' मनोज्ञशब्दादीनां प्रकारेषु समूहेषु वा 'पासमाणो'त्ति पश्यन् प्रेक्षमाणो,

विपाककटुकात्मकं तद्विषयं दोषमिति गम्यते, न 'लिप्यते' कर्म्मणा नोपदिह्यते, कामदोषज्ञस्य तेषु प्रायः प्रवृत्तेरभावादिति भावः, तायते त्रायते वा रक्षति दुर्गतिगमनात् एकेन्द्रियादिप्राणिनो वाऽवश्यमिति तायी त्रायी वेति सूत्रार्थः ॥ इत्थं ग्रन्थत्यागिनो गुणमभिधाय व्यतिरेके दोषमाह-

मू. (२१३) *भोगामिसदोसविसन्ने हियनिस्सेयसबुद्धिवोच्चत्थे।*
बाले य मंदिए मूढे बज्झइ मच्छिया व खेलंमि ॥

वृ. भुज्यन्त इति भोगाः - मनोज्ञाः शब्दादयः ते च ते आमिषं चात्यन्तगृद्धिहेतुतया भोगामिषं तदेव दूषयत्यात्मानं दुःखलक्षणविकारकरणेन भोगामिषदोषस्तस्मिन् विशेषेण सन्नो - निमग्नो भोगामिषदोषविषण्णः, यद्वा - भोगामिषस्य दोषा भोगामिषदोषाः ते च तदासक्तस्य विचित्र-श्लेशा अपत्योत्पत्तौ च तत्पालनोपायपरतया व्याकुलत्वादयस्तैर्विषण्णो - विषादं गतो भोगामिषदोषविषण्णः, आह च-

"जया य कुक्कुडुंबस्सा, कुतत्तीहिं विहम्मइ ।
हत्थीव बंधणे बद्धो, स पच्छा परितप्पइ ॥१॥
पुत्तदारपरिकिण्णो, मोहसंताणसंततो ।
पंकोसन्नो जहा नागो, स पच्छा परितप्पति ॥२॥" त्ति ।

'हियनिस्सेसबुद्धिवोच्चत्थे'त्ति हितः - एकान्तपथ्यो निः श्रेयसो - मोक्षः अनयोः कर्मधारये हितनिः श्रेयसः, - सद्धितैकपथ्ययोर्मोक्षस्य [illegible] निःश्रेयस. स एव तयोर्द्वन्द्वः, ततश्च तत्र तयोर्वा 'बुद्धिः' तत्प्राप्त्युपायविषया मतिः तस्यां विपर्ययवान् सा वा विपर्यस्ता यस्य स हितनिः श्रेयसबुद्धिविपर्यस्तः विपर्यस्तहितनिः श्रेयसबुद्धिर्वा, विपर्यस्तशब्दस्य तु परनिपातः प्राग्वत्, यद्वा विपर्यस्ता हिते निःशेषा बुद्धिर्यस्य स तथा, बालश्च-अज्ञः 'मंदिए'त्ति सूत्रत्वान्मन्दो - धर्मकार्यकरणं प्रत्यनुद्यतः 'मूढो' मोहाकुलितमानसः, स एवंविधः किमित्याह- 'बध्यते' श्लिष्यतेऽष्टप्रकारज्ञानावरणादिकर्म्मणा मक्षिकेव 'खेले' श्लेष्मणि, रज्जसेति गम्यते, इदमुक्तं भवति-यथाऽसौ तत्स्निग्धतागन्धादिभिराकृष्यमाणा तत्र मज्जति, मग्ना च रेणुकादिना बध्यते, एवं जन्तुरपि भोगामिषे मग्नः कर्म्मणेति सूत्रार्थः ॥ ननु यद्येवममी भोगाः कर्म्मबन्ध-कारणं किं नैतान् सर्वेऽपि जन्तस्त्यजन्तीत्याह-

मू. (२१४) *दुप्परिच्चया इमे कामा नो सुजहा अधीरपुरिसेहिं।*
अह संति सुव्वया साहू जे तरंति अतरं वणिया व ॥

वृ. दुःखेन - कृच्छ्रेण परित्यज्यन्ते - परिहियन्त इति दुष्परित्यजाः 'इमे' प्रत्यक्षत उपलभ्य-माना; 'कामाः' भोगाः 'नो' नैव 'सुजह'त्ति सूत्रत्वात् सुखेन - अनायासेन हीयन्त इति सुहानाः - सुत्यजाः, विषसम्पृक्तस्निग्धमधुरान्नवद्, कैः ? - 'अधीरपुरुषैः' अबुद्धिमद्भिरसत्त्वैर्या नरैः, पुरुषग्रहणं तु ये तावदल्पवेदोदयतया सुखेनैव त्यक्तारः सम्भवन्ति तैरप्यमी न सुखेन त्यज्यन्ते, आस्तामतिदारुणस्त्रीपण्डकवेदोदयाऽऽकुलितैः, स्त्रीनपुंसकैरिति। यच्चेह दुष्परित्यजा इत्यु-क्त्वा पुनर्न सुहानाः इत्युक्तं तदत्यन्तदुस्त्यजताख्यापकं प्रपञ्चितज्ञविनेयानुग्राहकं वेति अपुनरुक्तमेव, अधीरग्रहणेन तु धीरैः सुत्यजा एवेत्युच्यते, अत एवाह- 'अथ' इत्युपन्यासे

'सन्ति' विद्यन्ते शोभनानि सम्यग्ज्ञानाधिष्ठितत्वेन व्रतानि-हिंसाविरमणादीनि येषां ते सुव्रताः, शान्त्या वोपलक्षिताः सुव्रताः शान्तिसुव्रताः, इह च सन्तीति शेषः, साधयन्ति पौरुषेयीभिः क्रियाभिर्मुक्तिमिति साधवः, ये किमित्याह-ये 'तरन्ति' परपाराप्राप्त्याऽतिक्रमन्ति, कम् ?-'अतरं' तरीतुमशक्यं विषयगणं भवं वा, क इव ?-वणिज इव, वाशब्दस्येहेवार्थत्वात्, यथा हि वणिजोऽतरं नीरधिं यानपात्रादिनोपायेन तरन्ति एवमेतेऽपि धीरा व्रतादिनोक्तरूपमतरम्, अधीरैरेवोक्तनीतितोऽस्य दुस्तरत्वात्, पठन्ति च-'जे तरंति वणिया व समुद्द'मिति, स्पष्टम्,

"विषयगणः कापुरुषं करोति वशवर्त्तिनं न सत्पुरुषम्।
बध्नाति मशकमेव हि लूतातन्तुर्न मत्तेभम्।"

इति सूत्रार्थः ॥ किं सर्वेऽपि साधवोऽतरं तरन्ति उत नेत्याह-

मू. (२१५) *समणा मु एगे वदमाणा पाणवहं मिया अजाणंता।*
मंदा निरयं गच्छंति बाला पावियाहिं दिट्ठीहिं ॥

वृ. श्राम्यन्ति-मुक्त्यर्थं खिद्यन्त इति श्रमणाः-साधवः 'मु' इत्यात्मनिर्देशार्थत्वाद्वयमिति 'एके' केचन तीर्थान्तरीयाः 'वदमानाः' स्वाभिप्रायमुद्दीपयन्तो 'भासनोपसम्भाषाज्ञानयत्नविमत्युपनिमन्त्रणेषु वदः' इत्यनेन भासने आत्मनेपदं, प्राणा-उक्तरूपास्तेषां वधो-व्यापत्तस्तमजानन्त इति सम्बन्धः, मृगा इव मृगाः प्राग्वत् अजानन्त इति ज्ञपरिज्ञया के प्राणिनः ? के च तेषां प्राणाः ? कथं वा वधः ? इत्यनवबुध्यमानाः प्रत्याख्यानपरिज्ञया च तद्वधमप्रत्याचक्षाणाः, अनेन च प्रथमव्रतमपि न विदन्ति आस्तां शेषाणीत्युक्तं भवति, अत एव मन्दा इव मन्दा मिथ्यात्वमहारोगग्रस्ततया 'निरयं' पाठान्तरतो 'नरकं वा' प्रतीतं गच्छन्ति-यान्ति, बाला इव बाला-हेयोपादेयविवेकविकलत्वात् 'पावियाहिं'ति प्रापयन्ति नरकमिति प्रापिकास्ताभिः, यद्वा-पापा एव पापिकास्ताभिः, परस्परविरोधादिदोषात् स्वरूपेणैव कुत्सितताभिः, 'न हिंस्यात् सर्वभूतानी'त्याद्यभिधाय 'श्वेतं छागमालभेत वायव्यां दिशि भूतिकाम' इत्यादिपरस्परविरुद्धार्थाभिधायिनीभिः, पापहेतुत्वाद्वा पापिकाभिर्दृष्टिभिः-दर्शनाभिप्रायरूपाभिः 'ब्रह्मणे ब्राह्मणमालभेत, इन्द्राय क्षत्रियं, मरुद्भ्यो वैश्यं, तपसे शूद्रं, तथा च-

'यस्य बुद्धिर्न लिप्येत, हत्वा सर्वमिदं जगत्।
आकाशमिव पङ्केन, न स पापेन लिप्यते ॥'

इत्यादिकाभिर्दयादमबहिष्कृताभिः, तद्बहिष्कृतानां हि विविधवल्कलचीवरादिधारिणामपि न केनचित्पापात् परित्राणं, तथा च वाचकः-

"चर्म्मवल्कलचीराणि, कूर्चमुण्डजटाशिखाः।
न व्यपोहन्ति पापानि, शोधकौ तु दयादमौ ॥'

इति सूत्रार्थः ॥ अत एवाह सूत्रकृत्-

मू. (२१६) *न हु पाणवहं अनुजाणे मुच्चेज्ज कयाइ सव्वदुक्खाणं।*
एवमारिएहिमक्खायं जेहिं इमो साहुधम्मो पन्नत्तो ॥

वृ. 'न हु' नैव 'प्राणवधं' प्राणघातं, मृषाद्युपलक्षणं चैतत्, 'अनुजाणे'त्ति अपिशब्दस्य लुप्तनिर्दिष्टत्वात् अनुजानन्नपि, आस्तां कुर्वन् कारयन् वा, 'मुच्येत'त्यज्येत, सम्भावने लिङ्

(इ), ततो मुक्तिसम्भावनाऽपि नास्तीत्युक्तं भवति, 'कदाचित्' कस्मिंश्चिदपि काले, कैर्मुच्यते ? इत्याह-'सव्वदुक्खाणं'ति दुःखयन्तीति दुःखानि-कर्म्माणि सर्वाणि च तानि दुःखानि च सर्वदुःखानि तैः, सुब्व्यत्ययाच्च तृतीयार्थे षष्ठी, यद्वा सर्वदुःखैः-नरकादिगतिभाविभिः शारीरमानसैः क्लेशैः, ततः प्राणातिपातनिवृत्ता एव श्रमणास्त एव चातरं तरन्ति न त्वितर इत्युक्तं भवति, किमेतत् त्वयैवोच्यते ? इत्याह-'एवारिएहि'ति 'एवम्' उक्तप्रकारेणाऽऽर्यैः-सकलहेयधर्मेभ्यो दूरं यातैस्तीर्थंकरादिभिराचार्यैर्वा आख्यातं-कथितं, ये कीदृश इत्याह 'यैः' आर्यैराचार्यैर्वाऽयं 'साधुधर्म्मो' हिंसानिवृत्त्यादिः 'प्रज्ञप्तः' प्ररूपितः, अयमित्यनेन चात्मनि वर्तमानं तेषां प्रज्ञाप्यचीराणां प्रत्यक्षं साधुधर्मं निर्दिशतीति सूत्रार्थः ॥ यद्येवं ततः किं कृत्यम् ? इत्याह-

मू. (२१७) पाणे य नाइवाएज्जा से समिए त्ति वुच्चइ ताई।
तओ से पावयं कम्मं निज्जाइ उदगं व थलाओ ॥

वृ. 'पाणे य नातिवाएज्ज'त्ति चशब्दो व्यवहितसम्बन्धः, ततश्च प्राणान्-इन्द्रियपञ्चकादीन् नातिपातयेत्, यस्त्विति गम्यते, चशब्दात् कारणानुमत्योरपि निषेधः, मृषावादादिनिवृत्त्युपलक्षणं चैतत्, किमिति प्राणान्नातिपातयेदित्याह 'से'त्ति यः प्राणान्नातिपातयिता स 'समितः' समितिमान् इति 'उच्यते' अभिधीयते, कीदृशः सन् ? इत्याह-'त्रायी' इत्यवश्यं प्राणित्राता, समितत्वेऽपि को गुणः ?, उच्यते-'ततः' इति तस्मात् समितात् 'से' इत्यथ 'पापकम्' अशुभं 'कर्म्म' ज्ञानावरणादि 'निर्याति' निर्गच्छन्ति, पतन्ति च-'निज्जाइ'त्ति अत्र देशीपदत्वधोगच्छति, किमिव ?-उदकमिव, कुतः ?-'स्थूलाद्' अत्युन्नप्रदेशात्, अनेन च पूर्वबद्धस्य कर्म्मणोऽभाव उक्तः, न लिप्यते त्रायीति च बद्धमानस्येति न पौनरुक्त्यं, पापग्रहणं चास्यावश्यंतयाऽभावख्यापकं, पुण्यस्य हि संहननादिदोषान्मुक्त्यनवाप्तेर्देवाद्युत्पत्तौ सम्भवोऽपि स्यात्, अन्यथा हि पुण्यस्यापि स्वर्गनिगडप्रायतया विनिर्गम एव विनिर्मुक्तिरिति सूत्रार्थः ॥ यदुक्तं-'प्राणान्नातिपातयेदि'ति तदेव स्पष्टयितुमाह-

मू. (२१८) जगनिस्सएहिं भूएहिं तसनामेहिं थावरेहिं च।
नो तेसिमारभे दंडं मणसावयसाकायसा चेव ॥

वृ. त्रसनामकर्म्मोदयवत्सु द्वीन्द्रियादिषु 'स्थावरेषु' तन्नामकर्म्मोदयवर्त्तिषु पृथिव्यादिषु, चः समुच्चये, 'नो' नैव 'तेसिं' ति तेषु रक्षणीयत्वेन प्रतीतेषु 'आरभेत' कुर्यात् दण्डनं दण्डः स चेहातिपातात्मकस्तं, 'मनसावयसाकायसा चेव'त्ति आर्षत्वात् मनसा वचसा कायेन, चशब्दः शेषभङ्गोपलक्षकः, ततश्च-यथा मनसा वचसा कायेन च दण्डं नारभते तथा नाऽऽरम्भयेत् न चारभमाणानप्यन्याननुमन्येत, 'एवः' अवधारणे भिन्नक्रमश्च, अत एव नो इत्यस्यानन्तरं योजितः, पठ्यते च-'जगनिस्सियाण भूयाणं, तसाणं थावराण य। नो तेसिमारभे दंडं'ति गतार्थमेव, अपरे तु 'जगनिस्सिएही'त्यादि तृतीयान्ततयैवाधीयते, तत्र च जगन्निश्रितैर्भूतैस्त्रसैः स्थावरैश्च हन्यमानोऽपीति शेषः, नैव तेष्वारभेत दण्डम्, उज्जयनीश्रावकपुत्रवत्, अत्र च सम्प्रदायः-उज्जेनीए सावगसुतो चोरेहिं हरिउं मालवके सूयगारस्स हत्थे विक्कीतो, लावगं मारयसु, न मारयामीति हत्थीपादत्तासणसीसारक्खणं करणं चेति। स एवं प्राणत्यागेऽपि सत्त्वानपरोधी, एवमन्यैरपि यतितव्यमिति सूत्रार्थः ॥ उक्ता मूलगुणाः, सम्प्रत्युत्तरगुणा वाच्याः, तेष्वप्येषणा-

समितिः प्रधानेति तामाह-

मू.(२१९) *सुद्धेसणा उ नच्चा नं तत्थ ठवेज्ज भिक्खू अप्पाणं।*
जायाए घासमेसिज्जा रसगिद्धे न सिया भिक्खाए॥

वृ. शुद्धाः - शुद्धिमत्यो दोषरहिता इत्यर्थः। ताश्च ता एषणाश्च - उद्गमैषणाद्याः शुद्धैषणाः, एषणाः सप्त संसृष्टाद्याः, तद्यथा-

"संसट्ठमसंसट्ठा उद्धड तह अप्पलेवडा चेव।
उग्गहिया पग्गहिया उज्झियधम्मा य सत्तमिया॥"त्ति

एतासु च शुद्धैषणाः पञ्च, जिनकल्पिकापेक्षमेतत्, उक्तं हि तदधिकारे- पंचसु गहो दोसु अभिग्गहो"त्ति एताश्च 'ज्ञात्वा' अवबुध्य, किमित्याह-'ज्ञानस्य फलं विरति'रिति 'तत्रे'त्येषणासु 'स्थापयेत्' निवेशयेत्, भिक्षत इत्येवंधर्म्मा तत्साधुकरी चेति भिक्षुः सन् 'आत्मानं' स्वं, किमुक्तं भवति ? - अनेषणापरिहारेणैषणाशुद्धमेव गृह्णीयात्, तदपि किमर्थमित्याह-'जायाए'त्ति यात्रार्थं संयमनिर्वहणनिमित्तं 'घासं'ति ग्रासमेषयेद्-गवेषयेत्, उक्तं हि-

"जह सगडक्खोवंगो कीरति भरवहणकारणा नवरं।
तह गुणभरवहणत्थं आहारो बंभयारीणं॥"ति,

एषणाशुद्धमप्यादाय कथं भोक्तव्यमिति ग्रासैषणामाह-रसेषु-स्निग्धमधुरादिषु गृद्धो-गृद्धिमान् रसगृद्धो 'न स्यात्' न भवेत्, 'भिक्खाए'त्ति भिक्षादो भिक्षाको वा, अनेन रागपरिहार उक्तः, द्वेषपरिहारोपलक्षणं चैतत्, ततश्च रागद्वेषरहितो भुञ्जीतेत्युक्तं भवति, यदुक्तम्-"रागद्दोसविमुत्तो भुंजेज्जा निज्जरापेही"ति, सूत्रगर्भार्थः॥ अगृद्धश्च रसेषु यत्कुर्यात्तदाह-

मू.(२२०) *पंताणि चेव सेविज्जा सीयपिंडं पुराणकुम्मासं।*
अदु बुक्कसं पुलागं वा जवणट्ठा निसेवए मंथुं॥

वृ. 'प्रान्तानि' नीरसानि, अन्नपानानीति गम्यते, चशब्दादन्तानि च, एवोऽवधारणे, स च भिन्नक्रमः सेविज्जा इत्यस्यानन्तरं द्रष्टव्यः, ततश्च प्रान्तान्यन्तानि च सेवेतैव न त्वसाराणीति परिष्ठापयेद्, गच्छनिर्गतापेक्षया वा प्रान्तानि चैव सेवेत, तस्य तथाविधानामेव ग्रहणानुज्ञानात्, कानि पुनस्तानीत्याह-'सीयपिंडं'ति शीतलः पिण्डः-आहारः, शीतश्चासौ पिण्डश्च शीतपिण्डस्तं, शीतोऽपि शाल्यादिपिण्डः सरस एव स्यात् अत आह- 'पुराणः' प्रभूतवर्षधृताः 'कुल्माषाः' राजमाषाः, एते हि पुराणा अत्यन्तपूतयो नीरसाश्च भवन्तीत्येतद्ग्रहणम् उपलक्षणं चैतत् पुराणमुद्गादीनां, 'अदु'इति अथवा 'बुक्कसं' मुद्गमाषादिनास्विकानिष्पन्नमन्नमतिनिपीडितरसं वा 'पुलाकम्' असारं वल्लचनकादि, वा समुच्चये, 'जवणट्ठ'त्ति यापनार्थं शरीरनिर्वाहणार्थं, वा समुच्चये, उत्तरत्र योक्ष्यते, 'सेवए'त्ति सेवेतोपभुञ्जीत, यापनार्थमित्यनेनैतत् सूचितं-यदि शरीरयापना भवति तदैव निषेवेत, यदि त्वतिवातो द्रेकादिना तद्यापनैव न स्यात्ततो न निषेवेतापि, गच्छगतापेक्षमेतत्, तन्निर्गतश्चैतान्येव यापनार्थमपि निषेवेत, मन्थुं वा-बदरादिचूर्णम्, अतिरूक्षता चास्य प्रान्तत्वं, सेवेतेति सम्बन्धः, पठ्यते च-'जवणट्ठाए निसेवए मंथुं'ति, तथैव नवरं मन्थुमित्यत्र चशब्दो सूत्रनिर्दिष्टो द्रष्टव्यः, असारवस्तूपलक्षणं चोभयत्र मन्थुग्रहणं, पुनः क्रियाऽभिधानं च न सकृदेवावासान्यमूनि सेवेत किन्त्वनेकधाऽपीतिख्यापनार्थमिति सूत्रार्थः॥

यदुक्तं-'शुद्धैषणास्वात्मानं स्थापयेदि'ति, तद्विपर्यये बाधकमाह

मू.(२२१) जे लक्खणं च सुविणं च अंगविज्जं च जे पउंजंति ।
न हु ते समणा वुच्चंति एवं आयरिएहिं अक्खायं ॥

वृ. 'ये' इति प्राग्वत्, 'लक्षणं च' शुभाशुभसूचकं पुरुषलक्षणादि, रूढितः, तत्प्रतिपादकं शास्त्रमपि लक्षणं, तद्यथा-

"अस्थिष्वर्थाः सुखं मांसे, त्वचि भोगाः स्त्रियोऽक्षिषु ।
गतौ यानं स्वरे चाज्ञा, सर्वं सत्त्वे प्रतिष्ठितम् ॥"

'स्वप्नं चे'त्यत्रापि रूढितः स्वप्नस्य शुभाशुभफलसूचकं शास्त्रमेव, तद्यथा-

"अलंकृतानां द्रव्याणां, वाजिवारणयोस्तथा ।
वृषभस्य च शुक्लस्य, दर्शनं प्राप्नुयाद्यशः ॥१॥
मूत्रं वा कुरुते स्वप्ने, पुरीषं चापि लोहितम् ।
प्रबुध्येत तदा कश्चिल्लभते सोऽर्थनाशनम् ॥२॥"

'अंगविज्जं च'ति अङ्गविद्यां च शिरःप्रभृत्यङ्गस्फुरणतः शुभाशुभसूचिकां 'सिरफुरणे किर रज्जं' इत्यादिकां विद्यां, प्रणवमायाबीजादिवर्णनिन्यासात्मिकां वा, यद्वा-अङ्गानि-अङ्गविद्याव्यावर्ण्यितानि भौमान्तरिक्षादीनि विद्या 'हलि। २ मातङ्गिनी स्वाहा' इत्यादयो विद्यानुवादप्रसिद्धाः, ततश्चाङ्गानि च विद्याश्चाङ्गविद्याः, प्राग्वद् वचनव्यत्ययः, 'चः' सर्वत्र वाशब्दार्थः, ये प्रयुञ्जते, न तु समस्तान्येव, ते किमित्याह-'न हु' नैव 'ते' एवंविधाः 'श्रमणाः' साधवः 'उच्यन्ते' प्रतिपाद्यन्ते, इह च पुष्टालम्बनं विनैतद्व्यापारणत एवमुच्यते, अन्यथा कश्चिद् रलताभ्रामकतपस्विनोऽप्येवंविधत्वापत्तेः, एवमार्यैः आचार्यैर्वा 'आख्यातं' कथितम्, अनेन यथावस्थितवस्तुवादितयाऽऽत्मनि परापवाददोषं व्यपोहत इति । ते चैवंविधा यदवाप्नुवन्ति तदाह-

मू.(२२२) इह जीवियं अनियमित्ता पब्भट्ठा समाहिजोगेहिं ।
ते कामभोगरसगिद्धा उववज्जंति आसुरे काए ॥

वृ. 'इह' अस्मिन् जन्मनि 'जीवितं' असंयमजीवितम् 'अनियम्य' द्वादशविधतपोविधानादिनाऽनियन्त्र्य 'प्रभ्रष्टाः' च्युताः, केभ्यः ?-'समाहियोगेहि'ति समाधिः-चित्तस्वास्थ्यं तत्प्रधाना योगाः-शुभमनोवाक्कायव्यापाराः समाधियोगाः, यद्वा समाधिश्च-शुभचित्तैकाग्रता योगाश्च-पृथगेव प्रत्युपेक्षणादयो व्यापाराः समाधियोगाः तेभ्यः, अनियन्त्रितात्मनां हि पदे पदे तद्भ्रंशसम्भव इति, 'ते' अनन्तरमुक्ताः कामभोगेषु अभिहितस्वरूपेषु रसः-अत्यन्तासक्तिरूपस्तेन गृद्धाः-तेष्वभिकाङ्क्षावन्तः कामभोगारसगृद्धाः, यद्वा रसाः-पृथगेव शृङ्गारादयो वा, भोगान्तर्गतत्वेऽपि चेषां पृथगुपादानमतिगृद्धिविषयताख्यापनार्थम् 'उपपद्यन्ते' जायन्ते 'आसुरे' असुरसम्बन्धिनि काये, असुरनिकाये इत्यर्थः, इदमुक्तं भवति-एवंविधाः किञ्चित् कादाचित्कमनुष्ठानमनुतिष्ठन्तोऽप्यसुरेष्वेवोत्पद्यन्ते इति सूत्रार्थः ॥ ततोऽपि च्युतास्ते किमाप्नुन्तीत्याह-

मू.(२२३) ततोऽवि य उवट्टित्ता संसारं बहुं परिवडंति ।
बहुकम्मलेवलित्ताणं बोही होइ सुदुल्लहा तेसिं ॥

वृ. 'ततोऽपि च' असुरनिकायाद् 'उद्वृत्य' तत्परित्यागेनान्यत्र गत्वा 'संसारं' चतुर्गतिरूपं

बहुशब्दस्य 'बहुपूपे घृतं श्रेय' इत्यादिषु विपुलवाचिनोऽपि दर्शनाद्बहु-विपुलं विस्तीर्णं मितियावत्, बहुप्रकारं वा चतुरशीतियोनिलक्षतया 'अनुपरियंति'त्ति अनुपरियन्ति, भातत्येन पर्यटन्तीत्यर्थः, पठन्ति च-'अनुचरंति'त्ति स्पष्टं, किंच-बहूनि च तान्यनन्तया कर्म्माणि च-क्रियामाणतया ज्ञानावरणादीनि बहुकर्म्माणि तानि लेप इव लेपो बहुकर्म्मणां वा लेप-उपचयो बहुकर्म्मलेपस्तेन लिप्ता-उपचिता बहुकर्म्मलेपलिप्तास्तेषां 'बोधिः' प्रेत्य जिनधर्म्मावाप्तिः 'भवति' जायते 'सुदुर्लभा' अतिशयदुरापा, 'तेषाम्' इति ये लक्षणादि प्रयुञ्जते, पठन्ति च-'बोही जत्थ सुदुल्लहा तेसिं'ति बोधिर्यत्र-संसारे सुदुर्लभा तेषाम्-अनुपरियतामिति योजनीयं, यतश्चैवमुत्तरगुणविराधनायां दोषस्ततस्तदाराधनायामेव यतितव्यमितिभावः इति सूत्रार्थः ॥ आह-किममी द्रव्यश्रमणा जानन्तोऽप्येवं लक्षणादि प्रयुञ्जते ?, उच्यते, लोभात्, अत एव तदाकुलितस्यात्मनो दुष्पूरतामाह-

मू. (२२४) *कसिणंपि जो इमं लोयं पडिपुन्नं दलेज्ज एगस्स ।*
तेणावि से न संतुस्से इह दुप्पूरए इमे आया ॥

वृ. 'कृत्स्नमपि' परिपूर्णमपि 'यः' सुरेन्द्रादिः 'इमं' प्रत्यक्षं 'लोकं' जगत् 'परिपूर्णं' धनधान्यहिरण्यादिभृतं 'दलेज्ज'त्ति दद्यात्, किं बहुभ्यः ? इत्याह-'एकस्स'त्ति एकस्मै कस्मै-चित् कथञ्चिदाराधितवते, 'तेनापि' धनधान्यादिभृतसमस्तलोकदायकेन, हेतौ तृतीया, 'से' इति स 'न सन्तुष्येत्' न हृष्येत्, किमुक्तं भवति ?-ममैतावद्ददताऽनेन परिपूर्णता कृतेति न तृप्तिमाप्नुयात्, उक्तं हि-

"न वह्निस्तृणकाष्ठेषु, नदीभर्त्ता महोदधिः ।
न चैवात्माऽर्थसारेण, शक्यस्तर्प्पयितुं क्वचित् ॥१॥
यदि स्याद्बलपूर्णोऽपि, जम्बूद्वीपः कथञ्चन ।
अपर्याप्तः प्रहर्षाय, लोभार्तस्य जिनैः स्मृतः ॥२॥"

'इतिः' एवमर्थे, एवम्-अमुनोक्तन्यायेन दुःखेन-कृच्छ्रेण-पूरयितुं शक्यः दुष्पूरः दुष्पूर एव दुष्पूरकः 'इमे'त्ति अयं प्रत्यक्षः 'आत्मा' जीवः, एतदिच्छायाः परिपूरयितुमशक्यत्वादिति सूत्रार्थः ॥ किमिति न सन्तुष्यतीति स्वसंविदितं हेतुमाह-

मू. (२२५) *जहा लाभो तहा लोभो लाभा लोभो पवड्ढति ।*
दोमासकयं कज्जं कोडीएवि न निट्ठियं ॥

वृ. 'यथा' येन प्रकारेण 'लाभः' अर्थावाप्तिः 'तथा' तेन प्रकारेण 'लोभः' गार्द्ध्यमभि-काङ्क्षेतियावत्, भवतीति शेषः, किमेवमित्याह-लाभाल्लोभः 'प्रवर्धते' प्रकर्षेण वृद्धिं भजते, इह च लाभाल्लोभः प्रवर्द्धत इति वचनाद्यथा तथेत्यत्र वीप्सा गम्यते, ततश्च-यथा यथा लाभस्तथा तथा लोभो भवतीत्युक्तं भवति, लाभाल्लोभः प्रवर्द्धत इत्यपि कुत इत्याह-द्वाभ्यां-द्विसङ्ख्याभ्यां माषाभ्यां-पञ्चरक्तिकामानाभ्यां क्रियते-निष्पाद्यत इति द्विमाषकृतम्, आर्षत्वाद्वर्त्तमानकाले क्तः, 'कार्यं' प्रयोजनं, तच्चेह दास्याः पुष्पताम्बूलमूलायरूपं 'कोट्यऽपि' सुवर्णशतलक्षा-त्मिकया 'न निष्ठित'मिति, तत्र तदनिष्ठितेः स्त्रीमूलेति तत्परिहार्यतोपदर्शनायाह-

मू. (२२६) *नो रक्खसीसु गिज्झेज्जा गंडवच्छासु नेगचित्तासु ।*

जाओ पुरिसं पलोभित्ता खेल्लंति जहा व दासेहिं ॥

वृ. 'नो' नैव राक्षस्य इव राक्षस्यः -इव शब्दस्यः स्त्रियः तासु, यथा हि राक्षस्यो रक्तसर्वस्वमपकर्षन्ति जीवितं च प्राणिनामपहरन्ति एवमेता अपि, तत्त्वतो हि ज्ञानादीन्येव जीवितं च अर्थश्च (सर्वस्वं) तानि च ताभिरपहियन्त एव, तथा च हारिलः-

"यावेतौ कुरुते दहति पुरुषस्यैहलौकिकं परत्रापि नाग, बुभुक्षितभुजगश्चर्वितदेहं तथैव ।
ज्ञानं शीलं विनयविभवौदार्यविज्ञानदेहान्, सर्वानर्थान् दहति वनिताऽऽमुष्मिकानैहिकांश्च ॥"

'गिज्झेज्ज'त्ति गृह्णीयाद्- अभिकाङ्क्षावान् भवेत्, कीदृशीषु ?-'गंडवच्छासु'त्ति गण्डगण्डु, इह चोपचितपिशितपिण्डरूपतया गलत्पूतिरुधिरार्द्रतासम्भवाच्च तदुपमत्वाद्गण्डे कुत्रा वुक्तौ वे वक्षसि यासां तास्तथाभूतास्तासु, वैराग्योत्पादनार्थं चेत्थमुक्तं, तथाऽनेकानि अनेकसङ्ख्यानि चञ्चलतया चित्तानि- मनांसि यासां ता अनेकचित्तास्तासु, आह च-

"अन्यस्याङ्के लुलति विशदं चान्यमालिङ्ग्य शेते,
अन्यं वाचा चपयति हसत्यन्यमन्यं च रौति ।
अन्यं द्रष्टि स्पृशति कशति प्रार्थयते वाऽन्यमिष्टं,
नार्यो नृत्यत्तडित इव भिन्न चञ्चलाश्चालिकाश्च ॥"

तथा 'जाओ'त्ति याः 'पुरुषं' मनुष्यं, कुलीनमपीति गम्यते, 'प्रलोभ्य' त्वमेव मे शरणं त्वमेव च प्रीतिकृदित्यादिकाभिर्वाग्भिर्विप्रतार्य क्रीडन्ति, 'जहा व'त्ति वाशब्दस्यैवकारार्थत्वाद् यथैव दासैः, एह्यागच्छ मा यासीरित्यादिवितथोक्तिप्रभृतिभिः क्रिडाभिर्विलसन्तीति सूत्रार्थः ॥ पुनस्तासामेवातिहेयतां दर्शयन्नाह-

मू. (२२७) नारीसु नो पगिज्झेज्जा इत्थीविप्पजहे अनगारे ।
धम्मं च पेसलं नच्चा तत्थ ठवेज्ज भिक्खू अप्पाणं ॥

वृ. 'नारीषु' स्त्रीषु 'नो' नैव 'प्रगृध्येत्' प्रशब्द आदिकर्म्मणि ततो गृद्धिमारभेतापि न, किं पुनः कुर्यादिति भावः, 'इत्थी विप्पजहे'त्ति स्त्रियो विविधैः प्रकर्षेण च जहाति-त्यजतीति स्त्रीविप्रजहः, उणादयो बहुलमिति बहुलवचनाच्छः, यद्वा-'इत्थि'त्ति स्त्रियो 'विप्पजहे'त्ति विप्रजह्यात्, पूर्वत्र च नारीग्रहणान्मनुष्यस्त्रिय एवोक्ता, इह च देवतिर्यक्सम्बन्धिन्योऽपि त्याज्यतयोच्यन्ते इति न पौनरुक्त्यमुपदेशत्वाद्वा, 'अनगारः' प्राग्वत्, किं पुनः कुर्यादित्याह-'धर्म्ममेव' ब्रह्मचर्यादिरूपं, चस्यावधारणार्थत्वात्, 'पेशलम्' इह परत्र चैकान्तहितत्वेनातिमनोज्ञं 'ज्ञात्वा' अवबुध्य, 'तत्र' इति धर्म्मे 'स्थापयेत्' निवेशयेद् 'भिक्षुः' यतिः आत्मानं विषयाभिलाषनिषेधत इति सूत्रार्थः ॥ अध्ययनार्थोपसंहारमाह-

मू. (२२८) इइ एस धम्मे अक्खाए कविलेणं च विसुद्धपन्नेणं ।
तरिहिंति जे उ काहिंति तेहिं आराहिया दुवे लोगु ॥ त्तिबेमि

वृ. 'इति' अनेन प्रकारेण 'एषः' अनन्तरमुक्तरूपः 'धर्मः' यतिधर्मः आर्हतिः सकलतत्त्वरूपाभिव्याप्त्या ख्यातः -कथितः आख्यातः, केनेत्याह-'कपिलेन' इत्यात्मानमेव निर्दिशति, पूर्वसङ्गतिकत्वादमी मद्वचनतः प्रतिपद्यन्तामिति, 'चः' पूरणे, 'विशुद्धप्रज्ञेन' निर्मलावबोधेन, अतोऽर्थसिद्धिमाह-'तरिहिंति'त्ति तरिष्यन्ति, भवार्णवमिति शेषः, 'ये' इत्यविशेषा-

भिधानं, 'तुः' पूरणे, ततो विशेषत एव तरिष्यन्ति, ये 'करिष्यन्ति' अनुष्ठास्यन्ति, प्रक्रमादमुं धर्म्मम्, अन्यच्च 'तैः' आराधितौ' सफलीकृतौ 'द्वौ' द्विसङ्ख्यौ लोकौ, इहलोकपरलोका-वित्यर्थः, इह महाजनपूज्यतया परत्र च निःश्रेयसाभ्युदयप्राप्त्येति सूत्रार्थः ॥

'इति:' परिसमाप्तौ ब्रवीमि इति तथैव प्राग्वदिति ॥

अध्ययन-८ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययन सूत्रे
अष्टमम् अध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं-९ नमिप्रव्रज्या

वृ. उक्तमष्टममध्ययनं, साम्प्रतं नवममारभ्यते -अस्य चायमभिसम्बन्धः -अनन्तराध्ययने निर्लोभत्वमुक्तम्, इह तु तदनुष्ठितेः इहैव देवेन्द्रादिपूजोपजायत इति दर्श्यते, इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयवर्णनं पूर्ववद्यावन्नामनिष्पन्ननिक्षेपेऽन्यर्थान्वगतं नमिप्रव्रज्येतिनाम, अतो नमेः प्रव्रज्यायाश्च निक्षेपो वाच्य इत्युभयनिक्षेपाभिधानायाह

नि. [२६०] निक्खेवो उ नमिमि चउव्विहो दु० ॥

नि. [२६१] जाणग शरीरे भविए० ॥

नि. [२६२] नमिआउनामगोय वेयंतो भावतो नमी होइ ।
तस्स य खलु पव्वज्जा नमिपव्वज्जंति अज्झयणं ॥

नि. [२६३] पव्वज्जानिक्खेवो चउव्विहो अत्थतित्थिगा दव्वे ।
भावंमि उ पव्वज्जा आरंभपरिग्गहच्चाओ ॥

वृ. 'निक्षेपः' न्यासः, 'तुः' पूरणे, 'नमौ' नमिविषयः 'चतुर्विधः' चतुर्भेदो नामादिः, तत्र च नामस्थापने सुगमे, 'द्विविधः' द्विभेदो भवति 'द्रव्ये' द्रव्यविषयः, तमेवाह-आगमनो-आगमतः, तत्रागमतो ज्ञाताऽनुपयुक्तः, नोआगमतश्च स 'त्रिविधः' त्रिभेदः, 'जाणगसरीरभविए तव्वइरित्ते य'त्ति नमिशब्दस्य प्रत्येकमभिसम्बन्धात् ज्ञशरीरनमिर्भव्यशरीरनमिस्तद्व्यतिरिक्तनमिश्च, 'स' तद्व्यतिरिक्तनमिर्भवेत् त्रिविधः -एकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्च, एतत्स्वरूपं च प्राग्वत्, तथा नम्यायुर्नामगोत्रं वेदयन् भावतो नमिर्भवति, 'तस्य' मेः 'खलु' इति वाक्यालङ्कारे, 'प्रव्रज्या' वक्ष्यमाणस्वरूपा, इहाभिधीयत इत्युपस्कारः, अतश्च 'नमिप्रव्रज्ये'ति नमिप्रव्रज्याख्यमिदमध्ययनमेव प्रस्तुतमुच्यत इति शेषः,

प्रव्रज्यानिक्षेपश्चतुर्विधो नामादिः, नामस्थापने प्राग्वत्, अन्यानि च तान्यनर्हत्प्रणीततीर्थादन्यत्वेन तीर्थानि च-निजनिजाभिप्रायेणभवजलधेः तरणं प्रति करणतया विकल्पितत्वेनान्यतीर्थानि तेषु भवा अन्यतीर्थिकाः, अध्यात्मादेराकृतिगणत्वाद्ठक्, ते च शाक्यसरजस्कादयः, 'द्रव्ये' विचार्ये, प्रव्रज्येति सम्बन्धः, प्रव्रज्यायोगाच्च त एव प्रव्रज्येत्युच्यते, यथा दण्डयोगात् पुरुषोऽपि दण्ड इति, इह चान्यतीर्थिकशब्देन विवक्षितभावविकलतैव सूचिता, ततोऽन्यतीर्थ्याः स्वतीर्थ्या वा प्रव्रज्यापर्यायशून्या द्रव्यप्रव्रज्येति भण्यन्ते,

अत एवाह-भावे तु विचार्यमाणे प्रव्रज्या आरम्भश्च-पृथिव्याद्युपमर्दः परिग्रहश्च-मूर्च्छा

आरम्भपरिग्रहौ तयोस्त्यागः परिहारः आरम्भपरिग्रहत्यागः, न तु बहिर्वेषधारणाद्यवेति गाथा-चतुष्टयार्थः ॥ इह च यद्यपि नमिप्रव्रज्यैव प्रक्रान्ता, तथापि यथाऽयं प्रत्येकबुद्धस्तथाऽन्येऽपि करकण्डूत्वदयस्तत्समकालसुरलोकच्यवनप्रव्रज्याग्रहणकेवलज्ञानोत्पत्तिसिद्धगतिभाजः इति प्रसङ्गतो विनेयवैराग्योत्पादनार्थं तदुक्तव्यतामपि विवक्षुरिदमाह नियुक्तिकृत्-

नि.[२६४] करकंडू कलिंगेसु, पंचालेसु य दुम्मुहो ।
नमीराया विदेहेसु, गंधारेसु य नग्गई ॥

नि.[२६५] वसभे अ इंदकेऊ वलए अंबे अ पुप्फए बोही ।
करकंडु दुम्मुहस्सा नमिस्स गंधाररन्नो अ ।

नि.[२६६] मिहिलावइस्स नमिनो छम्मासायंक विज्जपडिसेहो ।
कंखिअ सुमिणगदंसणअहिमंदरनंदिघोसे अ ॥

नि.[२६७] दुन्निवि नमी विदेहा रज्जाइं पयहिऊण पव्वइआ ।
एगो नमितित्थयरो एगो पत्तेयबुद्धो अ ॥

नि.[२६८] जो सो नमितित्थयरो सो साहस्सिय परिव्वुडा भयवं ।
गंथमवहाय पव्वइ पुत्तं रज्जे ठवेऊणं ॥

नि.[२६९] बीओवि नमीराया रज्जं चइऊण गुणसयसमग्गं ।
गंथमवहाय पव्वइ अहिगारो एत्थ बिइएणं ॥

नि.[२७०] पुप्फुत्तराउ चवणं पव्वज्जा होइ एगसमएणं ।
पत्तेयबुद्धकेवलि सिद्धि गया एगसमएणं ॥

नि.[२७१] सेअं सुजायं सुविभत्तसिंगं, जो पासिआ वसहं गुट्ठमज्झे ।
रिद्धिं अरिद्धिं समुपेहिआ णं, कलिंगरायावि समिक्ख धम्मं ॥

नि.[२७२] जो इंदकेउं समलंकियं तु, दट्ठुं पडंतं पविलुप्पमाणं ।
रिद्धिं अरिद्धिं समुपेहिआ णं, पंचालरायावि समिक्ख धम्मं ॥

नि.[२७३] वुड्ढिं च हानिं च समोव दट्ठुं, पूरावरेगं च महानईणं ।
अहो अनिच्चं अधुवं च नच्चा, पंचालरायावि समिक्ख धम्मं ॥

नि.[२७४] बहुआणं सद्दयं सुच्चा, एगस्स य असद्दयं ।
वलयाण नमीराया, निक्खंतो मिहिलाहिवो ॥

नि.[२७५] जो चूअरुक्खं तु मणाभिरामं, समंजरीपल्लवपुप्फचित्तं ।
रिद्धिं अरिद्धिं समुपेहिआ णं, गंधाररायावि समिक्ख धम्मं ॥

नि.[२७६] जया रज्जं च रट्ठं च, पुरं अंतेउरं तहा ।
सव्वमेअं परिच्चज्ज, संचयं किं करेसिमं ? ॥

नि.[२७७] जया ते पेइए रज्जे, कया किच्चकरा बहू ।
तेसिं किच्चं परिच्चज्ज, अज्ज किच्चकरो भव ॥

नि.[२७८] जया सव्वं परिच्चज्ज, मुक्खाय घडसी भवं ।
परं गरहसी कीस ?, अत्तनीसेसकारए ॥

नि.[२७९] मुक्खमग्गं पवन्नेसु, साहूसु संभयारिसु ।
अहिअत्थं निवारिंतो, न दोसं वत्तुमरिहसि ॥

वृ. एतदर्थस्तु प्रायः सम्प्रदायादवसेय इति तावत स एवोच्यते - चंपानयरीए दहिवाहणो राया, चेडगधूया पउमावती देवी, तीसे दोहलो - किहाहं रायवेसत्थेण नेवत्थिया उज्जाणकाणणाणि विहरेज्जा ?, सा उज्झगसरीरा जाया, राया पुच्छति, ताधे राया य सा य जयहत्थिमि आरूढा, राया छत्तं धरेइ, राया उज्जाणं, पढमपाउसं च, सीयलएणं मद्दियगंधेणं हत्थी अब्भाहतो वनं संभरति, निवट्टो वनाभिमुहो पयातो, जनो न तरति ओसरिउं, दोवि अडविं पवेसियाइं. राया वडरुक्खं पेच्छइ, देविं भणइ एयस्स वडस्स हेट्ठेण जाहिंतिति ता तुमं साखं गेण्हेज्जासि, ताए पडिसुयं. न तरति, राया दक्खो तेन साहा गहिया. सो उत्तिन्नो, निगतंदो गतो चंपं।

सावि य इत्थिया नीया निम्मानुसं अडविं, जाव तिसोथिता पेच्छति दह महंतमहालयं. तत्थ ओइन्नो अभिरमति हत्थी, इमावि सणियं २ उइन्ना तलागातो, न दिसातो जाणइ एक्काए दिसाए सागरं भत्तं पच्चक्खाइत्ता पहाविया, जाव दूरं गया ताव तावसो दिट्ठो, तस्स मूलं गया, अभिवादितो, पुच्छति-कतो ऽसि अम्मो इहं आगता ?, ताहे कहेइ-अहं चेडगस्स धूया, जाव इहं हत्थिणा आणीया. सो य तावसो चेडगनियल्लतो, तेन आसासिया-मा बीहेहित्ति, ताहे से वनफलानि दाऊणं एक्काए दिसाए अडवीओ नीणिया, एत्तोहितो हलच्छिन्ना भूमी तं न अक्कमामो. एसो दंतपुरस्स विसतो दंतचक्को राया, तातो अडवीतो निग्गया, दन्तपुरे अज्जाणं मूले पव्वइया, पुच्छच्छियाए गब्भो न अक्खातो, पच्छा ममाणपानो, तेन गहितो, अज्जाए अप्पितो. अवकिन्नतोत्ति नामं कयं, सा अज्जा तीए पाणीए समं गेलिं करेइ, सा अज्जा ताहि संजईहिं पुच्छिया कहिं गब्भो ?, भणइ-मयगो जातो, ता मे उज्झितो, सो तत्थ संवड्ढति। ताहे दारगरूवेहिं समं रमइ, सो ताणि डिंभरूवाणि भणइ-अहं तुब्भं राया ममं करं देह, सो लुक्खकच्छूए गहितो. तानि भनइ-ममं कंडूयह, ताहे से करकंडुत्ति नामं कयं, सो ताए संजईए अनुरत्तो, सा य से मोयए देइ, जं च भिक्खं लद्धं लहेइ।

संवड्ढिओ सो सुसाणं रक्खति, तत्थो दो संजया तं ममाणं केणति कारणेन अतिगता, जाव एगत्थ वंसकुडंगे दंडगं पेच्छंति, तत्थ एगो दंडलक्खणं जाणति, सो भणति-जो एयं दंडगं गिण्हति सो राया होतित्ति, किंतु पडिच्छियव्वोत्ति जाव अन्नाणि चत्तारि अंगुलाणि वड्ढति ताहे जोग्गोत्ति। तं तेणं मायंगचेडएणं सुयं, एक्केण धिज्जाइएण य, ताधे सो धिज्जाइयगो अप्पमागारियं तस्स चउरंगुलं खणिऊण छिंदेइ, तेन य चेडएण दिट्ठो. सो उद्दालिओ, सो तेन धिज्जाइएण करणं नीतो भणइ- देहि दंडगं, सो भणइ-मम ममाणे. न देमि, धिज्जाइओ भणओ-अन्नं गिण्ह, सो निच्छइ, भणति य-एएण मम कज्जंति, सो दारगो न देइ, ताहे सो दारगो पुच्छिओ-किं न देहि ?, भणई य- अहं एयस्स दंडगस्स पहावेण राया होहामित्ति, ताहे कारणिया हसिउणं भणंति-जया तुमं राया होज्जासि तया एयस्स तुमं गामं देज्जासि, पडिवण्णो सो, तेन धिज्जाइएण अन्ने धिज्जाइया गहिया-जहा एयं मारिता हरामो, तं तस्स पियाए सुयं, तानि तिन्निवि नट्ठाणि जाव कंचनपुरं गयाणि। तत्थ राया मरइ अपुत्तो, आसो अहियासितो, तस्स बाहिं सुयंतस्स मूलं आगओ. पयाहिणीकाऊण ठितो, जाव नायगं पिच्छंति लक्खणजुत्तं,

जयजयसद्दो कतो, नंदीतूरं आहयं, इमोवि जंभंतो उट्ठिओ, बीयत्थो आसं विलग्गो, पव्वमिज्जइय मायंगो त्ति धिज्जाइगा न देंति पवेसं, ताहे तेन दंडरयणं गहियं, तं जलिउमारद्धं, ते भीया ठिया, ताहे तेन वाडहाणगा हरिएसा धिज्जाइया कया, उक्तं च-

"दधिवाहनपुत्रेण, राज्ञा तु करकण्डुना।
वाटधानकवास्तव्याश्चण्डाला ब्राह्मणीकृताः ॥"

तस्स य घरनामं अवकिन्नगोत्ति, पच्छा से तं चेव चेडगकरणामं पतिट्ठियं करकंडुत्ति। ताहे सो धिज्जातितो आगतो, देहि मम गामं, भणति-जो ते रुच्चति, सो भणइ-मम चंपाए घरं, तो तहिं देहि, ताहे दधिवाहणस्स लेहं देइ-देहि मम एगं गामं, अहं तुज्झं जं रुच्चइ गामं वा नगरं वा तं देमि, सो रुट्ठो दुट्ठमायंगो अप्पाणं न जाणयत्ति, जो मम लेहं देइत्ति ॥ दूएण पडिआगवएण कहियं, करकंडू कुवितो, चंपा रोहिया, जुद्धं वट्टति, ताए संजईए सुयं, मा जणक्खओ होहितित्ति करकंडुं ओसारित्ता रहस्सं भिंदियत्ति, एस तव पियत्ति, तेन तानि अम्मापियरो पुच्छियाणि, तेहिं सब्भावो कहितो, मानेणं न न ओसरइ, ताहे सा चंपं अवद्दगया, रन्नो घरं अतीति, नाया पायपडिया ओ दामीओ परुन्नातो, रायनावि सुयं, सोऽवि आगतो, वंदित्ता आयनं दाऊण तं गब्भं पुच्छति, सा भणइ-एसो जो एसणयरं रोहिता अच्छइ, तुट्ठो निग्गतो, मिलितो, दोन्नि रज्जाणि तस्स दाऊण दहिवाहणो पव्वतितो।

करकंडू य महासासनो जातो, सो य किर गोउलग्गितो, अनेगा तस्स गोउलगाणि जायाणि जाव सरयकालेन एगं गोवच्छयं घोरगत्तं सेयं तं पेच्छइ, भणति य-एयस्स मायरं मा दुहेज्जाहि, जया वड्ढितो हुज्जा तया अन्नाणं गावीणं दुद्धं पाएज्जाह, ते गोवा पडिसुनंति, सो उच्चत्तविसाणो खद्धवसभो जातो, राया पेच्छति, सो जुद्धिक्कओ जातो, पुनो कालेन राया आगतो पेच्छति-महाकायं जुन्नं वसभं, पडुएहिं परिघट्टयंतं, गोवे पुच्छइ-कहिं सो वसहोत्ति ?, तेहिं सो दाइतो, पेच्छंतओ विसायं गतो, अनिच्चयं चिंतितो संबुद्धो 'सेयं सुजायं०' सुत्तं, 'गोट्ठंगणस्स०' 'पोराण०' इत्तो पंचालेसु जनवएसु कंपिल्लपुरं नयरं, तत्थ दुम्मुहो राया, सो इंदकेउं पासति लोगेण महिज्जंतं अनेगकुडभीसहस्सपडिमंडियाभिरामं, पुनो अविलुत्तं पडियं च मुत्तपुरीसाण मज्झो, सोऽवि संबुद्धो पव्वतितो 'जो इंदकेउं सुयलंकियं तु' सोऽवि विहरति २॥

इआ य विदेहे जनवए महिलाए य नयरीए नमी राया, तस्स दोन्नि जातो, देवी चंदनं घसति, बलियाणि खलखलिंति, सो भणति-कन्नाघातो होइ, देवीए एक्केक्कं अवनेंतीए सव्वाणि अवनीयाणि, एक्किक्कं ठियं, तं राया पुच्छइ-ताणि वलयाणि न खलखलिंति ?, सा भणति-अवनीयाणि, सो तेन दुक्खेण अब्भाहतो परलोगाभिमुहो चिंतेति-बहुयाणं दोसो न एगस्स, जइ य एयातो रोगाओ मुच्चामि तो पव्वयामि, तया य कत्तियपुन्निमा वट्टति, एवं सो चिंतितो पासुत्तो, पभायाए रयनीए सुमिनए पासति-सेयं नागरायं मंदरोवरि च अत्ताणमारूढं, नंदिघोसतूरेण य विबोहितो हट्ठतुट्ठो चिंतेइ-अहो पहाणो सुविनो दिट्ठोत्ति, पुनो चिंतइ कहिं मया एवंगुणजातितो पव्वतो दिट्ठपुव्वोत्ति चिंतयंतेन जाती संभरिया, पुव्वं मानुसभवे सामन्नं काऊण पुप्फुत्तरे विमाणे उववन्नो आसि, तत्थ देवत्ते मंदरो जिनमहिमाइसु आगएण दिट्ठपुव्वोत्ति संबुद्धो पव्वतितो 'बहुयाण० -'सिलोगो ३॥

इओ य गंधारजनविसएसु पुरिसपुरं नाम नयरं, तत्थ नग्गती राया, सो य अन्नया अनुजत्तं निग्गतो पेच्छइ चूयं कुसुमियं, तेनेगा मंजरी गहिया, एवं खंधाल्लारेणं लयंतेणं कट्ठावसेसो कतो, पडिनियत्तो पुच्छति-कहिं सो चूयरुक्खो ?, अमच्चेण अक्खातो एसोत्ति, तो किह कट्ठाणि कतो ?, भणति-तुब्भेहिं एक्को मंजरी गहिया, पच्छा सव्वेणावि जनेण गहिया, सो चिंतेइ-एवं रज्जसिरिं त्ति, जाव रिद्धी ताव सोहति, अलाहि 'जो चूय०' गाहा, सोऽवि विहरति ४॥

चत्तारिवि विहरमाणा खिइपतिट्ठिए नयरे चाउद्दारं देउलं, पुव्वेण करकंडू पविट्ठो, दुम्मुहो दक्खिणेण, किह साहुस्स अत्तामुहो अच्छसीमित्ति तेन वाणमंतरेण दक्खिणपासेवि मुहं कयं, नमी अवरेण, तओऽवि मुहं कयं, गंधारो उत्तरेण, तओऽवि मुहं कयं।

तस्स किर करकंडुस्स आबालत्तणा सा कंडू अत्थि चेव, तेन कंडूयगं गहाय मसिणं कण्णो कंडूइतो, तं तेन एगत्थ संगोवियं, तं दुम्मुहो पेच्छइ, सो भणइ-'जया रज्जं०' सिलोगो, जाव करकंडू पडिवयणं न देति ताव नमी वयणसमकं इमं भणइ-'जया ते पेतिते रज्जे०' सिलोगो, किं तुमं एयस्स आउत्तगोत्ति भणति, ताहे गंधारो भणति-'जया सव्वं परिच्चज्ज०' सिलोगो, ताहे करकंडू भणति-'मोक्खमग्गपवन्नाणं०' सिलोगो "रूसऊ वा परो मा वा विसं वा परियत्तउ। भासियव्वा हिया भासा, सपक्खगुणकारिया ॥" इत्येष सम्प्रदायः।

एष एव च गाथाकदम्बकभावार्थः, अक्षरार्थस्तु स्पष्ट एव, नवरं मिथिला नाम नगरी, तस्याः पतिः-स्वामी मिथिलापतिस्तस्य, अनेनान्येषामपि तत्पतीनां सम्भवात् तद्व्यवच्छेदमाह. 'नमेः' नमिनाम्नः, 'छम्मासायंकविज्जपडिसेहो'त्ति षण्मासानातङ्को-दाहज्वरात्मको रोगः षण्मासातङ्कः तत्र वैद्यैः-भिषग्भिः, प्रतिषेधो-निराकरणम्, अचिकित्स्योऽयमित्यभिधानरूपः षण्मासातङ्कवैद्यप्रतिषेधः, 'कतिय'त्ति कार्तिकमासे 'सुविनगदंसणंति' स्वप्न एव स्वप्नकस्तस्मिन् दर्शनं स्वप्नदर्शनम्, अभूदिति शेषः, कः ?, यः 'अहिमंदर'त्ति अहिमन्दरयोः नागराजबलराजयोः 'नंदिघोसे येत्ति' द्वादशतूर्यसङ्घातो नन्दी तस्या घोषः, स च स्वप्नमवलोकयतो जातः, तेन चासौ प्रतिबोधितः इत्युपस्कारः।

इह च मिथिलापतिर्नमिरित्युक्तौ मा भूत्तथाविधस्य तीर्थकरस्यापि नमेः सम्भवाद्यामोह इति 'द्वौ नमी वैदेहौ' इत्याद्युक्तं। तथा 'पुप्फुत्तराओ'त्ति पुष्पोत्तरविमानाच्च्यवनं-भ्रंशनम्, एकसमयेनेति योज्यते, प्रव्रज्या च-निष्क्रमणं भवत्येकसमयेनैव, तथा प्रत्येकम्-एकैकं हेतुमाश्रित्य 'बुद्धाः' अवगततत्त्वाः प्रत्येकबुद्धाः, 'केवलिनः' उत्पन्नकेवलज्ञानाः, 'सिद्धिगताः' मुक्तिपदप्राप्ताः, त्रयाणामपि कर्मधारयः, एकसमयेनैवेति चतुर्णामपि समसमयसम्भवात्,।

तथा 'सेयं सुजायं'त्ति श्वेतं वर्णतः सुजातं प्रथमत एवाहीनसमस्ताङ्गोपाङ्गतया, सुष्ठु-शोभने विभक्ते-विभागेनावस्थिते शृङ्गे विषाणे यस्य स तथा तम्, ऋद्धि-बलोपचयात्मिकाम् अनृद्धिः-तस्यैव बलापचयतस्तर्णकादिपरिभवरूपां 'समुपेहिया णं'ति सम्यगुत्प्रेक्षेति-पर्यालोच्य पाठान्तरतः 'समुत्प्रेक्षमाणो' वा कलिङ्गराजोऽपीत्यत्रापिशब्द उत्तरापेक्षया समुच्चये। तथा 'इन्द्रकेतुम्' इन्द्रध्वजं 'प्रविलुप्यमान' मिति जनैः स्वस्ववस्त्रालङ्कारादिग्रहणतः इतश्चेतश्च विक्षिप्यमाणं। तथा 'पूरावरेयं'त्ति पूरः-पूर्णता अवरेको-रिक्तताऽनयोः समाहारे पूरावरेकं। तथा 'समञ्जरीपल्लवपुप्फचित्तं' सह मञ्जरीभिः-प्रतीताभिः पल्लवैश्च-किशलयैर्यानि

पुष्पाणि-कुसुमानि तैश्चित्र:-कुर्वुर: मञ्जरीपल्लवपुष्पैर्वर्तते य: स तथा चित्र आश्चर्यो ऽनयोर्विशेषणसमास:, 'समिक्ख'त्ति आर्षत्वात् समीक्षते पर्यालोचयति, अनेकार्थत्वाद्वाऽङ्गीकुरुते वा, वर्तमाननिर्देश: प्राग्वत्, यद्वा 'समिक्ख'त्ति समैक्षिष्ट समीक्षितवान् 'धर्मं' यतिधर्मं। यदा 'ते' त्वया 'पैतृके' पितृगते राज्ये कृता-विहिता: कृत्यानि कुर्वन्ति-अनुतिष्ठन्ति कृत्यकरा-नियोगिनो बहव:-प्रभृता:, तदैव कृत्यकरत्वं स्वयं तव कर्तुमुचितमासीदित्युपस्कार:, 'तेषामि'ति कृत्यकराणां कृत्यं-परापरार्थपरिभावनादि कर्तव्यं 'परित्यज्य' व्रताङ्गीकारादपहाय अद्य 'कृत्यकरो' नियुक्तक:-अन्यदोषचिन्तको 'भवान्' ज्ञं लिप्सिति जात इति शेष:। तथा 'सोऽसक्कय मइसो'त्ति प्राकृतत्वान्मोक्षाय-मोक्षार्थं 'घटते' चेष्टते, तथा 'अत्तणिस्सेसकारए'त्ति आत्मनो नि:शेषमिति-शेषाभावं प्रक्रमात् कर्मण: करोति विधत्त इत्यात्मनि:शेषकारक:, यद्वा 'निस्सेय'त्ति नि:श्रेयसो मोक्षस्तत्कारको।

'मोक्षमार्गं मुक्त्यध्वानं 'प्रतिपन्नेषु' अङ्गीकृतवत्सु साधुषु ब्रह्मचारिषु 'अहियत्थं'ति अहितार्थं 'निवारयन्' निषेधयन् 'न दोषं' परापवादलक्षणमस्येति शेष:, 'वक्तुम्' अभिधातुमर्हसि, यथा हि भवान् अहितान्निवारयन्, कथं गर्हसीत्यादि, एवं नमिरपि अद्य कृत्यकरो भवानिति कृत्यकरत्वलक्षणादहितान्निवारयति, तथा दुर्मुखोऽपि सञ्जयं किं करोषि ? इति सञ्जयत एवाहितान्निषेधयतीति नायं परापवाद इति वक्तुमुचितं, यद्वा 'अहियत्थं निवारितो'त्ति सुब्व्यत्ययादहितार्थान्निवारयन्तं न 'दोष'मिति मतुब्लोपान्न दोषवन्तं वक्तुमर्हसि, तथा चार्षम्-

"रूसऊ वा परो मा वा, विसं वा परियत्तउ। भासियव्वा हिया भासा, सुपक्खगुणकारिया॥"

इत्यवसितो नामनिष्पन्नो निक्षेप:, सम्प्रति सूत्रालापकनिष्पन्नस्यावसर:, स च सूत्रे सति भवतीति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (२२९) चइऊण देवलोगाओ उववन्नो माणुसंमि लोगंमि।
उवसंतमोहनिज्जो सरती पोराणियं जाइं॥

वृ. च्युत्वा 'देवलोकात्' प्रतीतात्, 'उत्पन्न:' जात: 'मानुषे' मानुषसम्बन्धिनि 'लोके' प्राणिगणे उपशान्तम्-अनुदयं प्राप्तं मोहनीयं-दर्शनमोहनीयं यस्यासावुपशान्तमोहनीय: 'स्मरति' चिन्तयति, स्मेति शेष:, वर्तमाननिर्देशो वा प्राग्वत्, कामित्याह-'पोराणियं'ति पुराणमेव पौराणिकी, विनयादित्वात् ठक्, चिरन्तनीमित्यर्थ:, 'जातिम्' उत्पत्तिं, देवलोकादागतिरिति प्रक्रम:, तद्गतसकलचेष्टोपलक्षणं चेह जातिरिति सूत्रार्थ:॥ ततः किमित्याह-

मू. (२३०) जाइं सरित्तु भयवं सहसंबुद्धो अणुत्तरे धम्मे।
पुत्तं ठवित्तु रज्जे अभिनिक्खमति नमी राया॥

वृ. 'जातिम्' उक्तरूपां स्मृत्वा, भगशब्दो यद्यपि धैर्यादिष्वनेकेषु अर्थेषु वर्तते, यदुक्तं-

"धैर्यसौभाग्यमाहात्म्ययशोऽर्कश्रुतधीश्रिय:।
तपोऽर्थोपस्थपुण्येशप्रयत्नवनवो भगा:॥"इति,

तथापीह प्रस्तावाद्बुद्धिवचन एव गृह्यते, ततो भगो-बुद्धिर्यस्यास्तीति भगवान्, सहसि-स्वयमात्मनैव सम्बुद्ध:-सम्यगवगततत्त्व: सहसम्बुद्धो, नान्येन प्रतिबोधित इत्यर्थ:, अथवा 'सहस'त्ति आर्षत्वात् सहसा-जातिस्मृत्यनन्तरं झगित्येव बुद्ध:, क्वेत्याह-'अनुत्तरे' प्रधाने

'धर्म्मे' चारित्रधर्मे 'पुत्रं' सुतं 'स्थापयित्वा' निवेश्य, क्व ? - राज्ये 'अभिनिष्क्रामति' धर्माभिमुख्येन गृहस्थपर्यायान्निर्गच्छति, स्मेतीहापि शेषः, ततश्च प्रव्रजित्वानित्यर्थः, प्राग्वत् तिङ्व्यत्ययेन वा व्याख्येयं, 'नमिः' नमिनामा राजा पृथिवीपतिरिति सूत्रार्थः ॥ स्यादेतत्, कुत्रावस्थितः ? कीदृशान वा भोगान् भुक्त्वा सम्बुद्धः ? किं वाऽभिनिष्क्रामन् करोतीत्याह

मू. (२२१) सो देवलोगसरिसे अंतेउरवरगतो वरे भोए ।
भुंजित्तु नमी राया बुद्धो भोगे परिच्चयइ ॥

वृ. 'सः' इत्यनन्तरमुद्दिष्टः 'देवलोगसरिसे'त्ति देवलोकभोगैः सदृशा देवलोकसदृशाः, मयूरव्यंसकादित्वान्मध्यपदलोपी समासः, 'अंतेउपवरगतो'त्ति वरं-प्रधानं तच्च तदन्तःपुरं च वरान्तःपुरं तत्र गतः - स्थितो वरान्तःपुरगतः, प्राकृतत्वाच्च वरशब्दस्य परनिपातः, वरान्तःपुरं हि रागहेतुरिति तद्गतस्य तस्य भोगपरित्यागाभिधानेन जीववधोल्लासातिरेक उक्तः, तत्रापि कदाचिद्वराः शब्दादयो न स्युः तत्सम्भवे वा सुबन्धुरिव कुतश्चिन्निमित्तान्न भुञ्जीतापीत्याह - 'वरान्' प्रधानान् 'भोगान्' मनोज्ञशब्दादीन् 'भुक्त्वा' आसेव्य 'नमिः' नमिनामराजा 'बुद्धः' विज्ञाततत्त्वः 'भोगान' उक्तरूपान् परित्यजति, स्मेति शेषः । इह पुनर्भोगग्रहणमतिविस्मरणशीला अप्यनुग्राह्या एवेति ज्ञापनार्थमिति सूत्रार्थः ॥ किं भोगानेव त्यक्त्वाऽभिनिक्रान्तवान् ?

मू. (२२२) मिहिलं सपुरजनवयं बलमोरोहं च परियणं सव्वं ।
चेच्चा अभिनिक्खंतो एगंतमहिट्ठिओ भयवं ॥

वृ. 'मिथिलां' मिथिलानाम्नीं नगरीं, सह पूरैः - अन्यनगरैर्जनपदेन च वर्तते या सा तथोक्ता तां न त्वेकामेव, 'बलं' हस्त्यश्वादि चतुरङ्गम् 'अवरोधं' च अन्तःपुरं 'परिजनं' परिवर्गं 'सर्वं' निरवशेषं, न तु तथाविधप्रतिबन्धानास्पदं किञ्चिदेव 'त्यक्त्वा' अपहाय 'अभिनिष्क्रान्तः' प्रव्रजितः, 'एगंत'त्ति एकः - अद्वितीयः कर्म्मणामन्तो यस्मिन्निति, मयूरव्यंसकादित्वात् समासः, तत एकान्तो-मोक्षस्तम् 'अधिष्ठितः' इव आश्रितवानिवाधिष्ठितः, तदुपायसम्यग्दर्शनाद्यासेवनादधिष्ठित एव वा, इहैव जीवन्मुक्त्यवाप्तेः, यद्वैकान्तं-द्रव्यतो विजनमुद्यानादि भावतश्च सदा

"एकोऽहं न च मे कश्चिन्नाहमन्यस्य कस्यचित् ।
न तं पश्यामि यस्याहं, नासौ दृश्योऽस्ति यो मम ॥"

इति भावनात एक एवाहमित्यन्तो - निश्चय एकान्तः, प्राग्वत् समासः, तमधिष्ठितः, 'भगवान्' इति धैर्यवान् श्रुतवान् वेति सूत्रार्थः ॥ तत्रैवमभिनिष्क्रामति यदभूत्तदाह-यदिवा यदुक्तं 'सर्वं परित्यज्याभिनिष्क्रान्त' इति, तत्र कोदृक् तत् त्यज्यमानमासीदित्याह-

मू. (२२३) कोलाहलगब्भूतं आसी मिहिलाए पव्वयंतंमि ।
तइया रायरिसिम्मि नमिम्मि अभिनिक्खमंतंमि ॥

वृ. कोलाहलः - विलपिताऽऽक्रन्दितादिकलकलः कोलाहल एव कोलाहलकः स भूत इति-जातो यस्मिंस्तत् कोलाहलकभूतम् आहितादेराकृतिगणत्वान्निष्ठान्तस्य परनिपातः, यदिवा भूतशब्द उपमार्थः, ततः - कोलाहलकभूतमिति कोलाहलकरूपतामिवापन्नं हा तात ! मातरित्यादिकलकलाकुलिततया 'आसीत्' अभूत् मिथिलायां, सर्वं गृहविहारारामादीति प्रक्रमः, क्व सति ? 'प्रव्रजति' प्रव्रज्यामादत्ते 'तदा' तस्मिन् काले, राजा चासौ राज्याव -

स्थामाश्रित्य ऋषिश्च तत्कालापेक्षया राजर्षिः, यदिवा राज्यावस्थायामपि ऋषिरिव ऋषिः क्रोधादिषड्वर्गजयात्, तथा च राजनीतिः -

"कामः क्रोधस्तथा लोभो, हर्षो मानो मदस्तथा।
षड्वर्गमुत्सृजेदेनं, तस्मिंस्त्यक्ते सुखी नृपः ॥"

तस्मिन् 'नमौ' नमिनाम्नि, 'अभिनिष्क्रामति' गृहात् कषायादिभ्यो वा निर्गच्छतीति

मू. (२३४) अब्भुट्ठियं रायरिसिं, पव्वज्जाठाणमुत्तमं।
सक्को माहणरूवेणं, इमं वयणमब्बवी ॥

वृ. 'अभ्युत्थितम्' अभ्युद्यतं 'राजर्षिं' प्राग्वत् प्रव्रज्यैव स्थानं तिष्ठन्ति सम्यग्दर्शनादयो गुणा अस्मिन्निति कृत्वा प्रव्रज्यास्थानं, प्रतीति शेषः, 'उत्तमं' प्रधानं, सुब्व्यत्ययेन सप्तम्यर्थे वा द्वितीया, ततः प्रव्रज्यास्थाने उत्तमे 'अभ्युपगतं' तद्विपर्यायमवन्तं 'शक्रः' इन्द्रो 'माहनरूपेण' ब्राह्मणवेषेण, आगत्येति शेषः, तदा हि तस्मिन् मनाक्परि राज्ञां गृहीतुमनसि तदाशयं परीक्षितुकामः स्वयमिन्द्र आजगाम, ततः स 'इदं' वक्ष्यमाणम्, उच्यत इति वचनं - वाक्यम् 'अब्रवीत्' उक्तवानिति सूत्रार्थः ॥ यदुक्तवांस्तदाह -

मू. (२३५) किं नु भो अज्ज मिहिलाए, कोलाहलगसंकुला।
सुच्चंति दारुणा सद्दा, पासाएसु गिहेसु अ ? ॥

वृ. 'किम्' इति परिप्रश्ने 'नु' इति वितर्के 'भो' इत्यामन्त्रणे 'अद्य' एतस्मिन् दिने 'मिथिलायां' नगर्यां कोलाहलकेन-बहलकलकलात्मकेन सङ्कुलाः-व्याकुलाः कोलाहलकलसंकुलाः 'श्रूयन्ते' इत्याकर्ण्यन्ते 'शब्दा' ध्वनय इति सम्बन्धः, ते च कदाचिद्वन्दिवृन्दोदीरिता अपि स्युः तन्निराकरणायाह-दारयन्ति जनमनांसीति दारुणाः-विलपिताऽऽक्रन्दितादयः, क्व पुनस्ते ? 'प्रासादेषु' सप्तभूमादिषु 'गृहेषु' सामान्यवेश्मसु, यद्वा 'प्रासादो देवतानरेन्द्राणा'मितिवचनात् प्रासादेषु देवतानरेन्द्रसम्बन्धिष्वास्पदेषु 'गृहेषु' तदितरेषु चशब्दात्त्रिकचतुष्कचत्वरादिषु चेति सूत्रार्थः ॥ ततश्च -

मू. (२३६) एयमट्ठं निसामित्ता, हेउकारणचोइओ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥

वृ. 'एनम्' अनन्तरोक्तम् 'अर्थं' इत्युपचारादर्थाभिधायिनं ध्वनिं 'निशम्य' आकर्ण्य हिनोति-गमयति विवक्षितमर्थमिति हेतुः, स च पञ्चावयववाक्यरूपः, कारणं च-अन्यथाऽनुपपत्तिमात्रं ताभ्यां चोदितः-प्रेरितः हेतुकारणचोदितः, कोलाहलकसङ्कुलाः दारुणाः शब्दा श्रूयन्त इत्यनेन हि उभयमेतत् सूचितं, तथाहि- अनुचितमिदं भवतोऽभिनिष्क्रमणमिति प्रतिज्ञा, आक्रन्दादिदारुणशब्दहेतुत्वादिति हेतुः, प्राणव्यपरोपणादिवदिति दृष्टान्तः, यद्यदाक्रन्दादिदारुणशब्दहेतुस्तत्तद्धर्माधिनोऽनुचितं, यथा प्राणव्यपरोपणादि, तथा चेदं भवतोऽभिनिष्क्रमणमित्युपनयः, तस्मादाक्रन्दादिदारुणशब्दादिहेतुत्वादनुचितं भवतोऽभिनिष्क्रमणमिति निगमनमिति पञ्चावयवं वाक्यमिह हेतुः, शेषावयवविवक्षाविरहितं त्वाक्रन्दादिदारुणशब्दहेतुत्वं भवदभिनिष्क्रमणानुचितत्वं विनाऽनुपपन्नमिति एतावन्मात्रं कारणम्, अनयोस्तु, पृथगुपादानं प्रतिपाद्यभेदतः साधनवाक्यवैचित्र्यसूचनार्थं, तथा चाह श्रुतकेवली -

"कत्थवि पंचावयवं दसहा वा सव्वहा न पडिसिद्धं ।
न य पुण सव्वं भन्नइ हंदी सवियारमक्खायं ॥"
(तथा) "जिनवयणं सिद्धं चेव भन्नती कत्थती उदाहरणं ।
आसज्ज उ सोयारं हेऊवि कहिंचि वोत्तव्वो ॥"

अथवाऽन्वयव्यतिरेकलक्षणो हेतुः, उपपत्तिमात्रं तु दृष्टान्तादिरहितं कारणं, यथा निरुपमसुखः सिद्धो ज्ञानाबाधप्रकर्षात्, अन्यत्र हि निरुपमसुखाऽसम्भवात् नोदाहरणभोसी, दृष्टान्तश्च प्रकृष्टगत्यादिज्ञानाबाधाः परमसुखिनो मुनय इति ज्ञानाबाधप्रकर्षः निरुपमसुखत्वे हेतुरुच्यते,

"हेतू अनुगमवइरेगलक्खणो सज्झवत्थुपज्जातो ।
आहरणं दिट्ठंतो कारणमुवपत्तिमेत्तं तु ॥"

इह हि आक्रमन्दादिदारुणशब्दहेतुत्वमेव हेतुः, तस्योक्तन्यायेनान्वयान्वितत्वात्, सति चान्वये व्यतिरेकस्यापि सम्भवात्, इदमेव चान्वयव्यतिरेकविकलतया विवक्षितमुपपत्तिमात्रं कारणम्, एवं सर्वत्र कारणभावना कार्येत्यलं प्रसङ्गेन, प्रकृतमेव सूत्रमनुस्रियते, 'ततः' प्रेरणाऽनन्तरं 'नमिः' नमिनामा राजर्षिः 'देवेन्द्रं' शक्रम् 'इदं' वक्ष्यमाणम् 'अब्रवीत्' उक्तवानिति सूत्रार्थः ॥

मू. (२३७) *मिहिलाए चेइए वच्छे, सीयच्छाए मनोरमे ।*
पत्तपुप्फफलोवेते, बहूणं बहुगुणे सदा ॥

वृ. 'मिथिलायां' पुरि चयनं चितिः - इह प्रस्तावात् पत्रपुष्पाद्युपचयः, तत्र साधुरित्यन्ततः प्रज्ञादेराकृतिगणत्वात् स्वार्थिकेऽपि चैत्यम् - उद्यानं तस्मिन्, 'वच्छे' नि सूत्रत्वाद्धिशब्दलोपे वृक्षैः शोभा - शीतला छाया यस्य तच्छीतच्छायं तस्मिन्, मनः - चित्तं रमते धृतिमाप्नोति यस्मिन् तन्मनोरमं - मनोरमाभिधानं तस्मिन्, पत्रपुष्पफलानि प्रतीतानि तैरुपेतं - युक्तं पत्रपुष्पफलोपेतं तस्मिन्, 'बहूनां' प्रक्रमात् खगादीनां, बहवो गुणा यस्मात्तत् तथा तस्मिन्, कोऽर्थः ? - फलादिभिः प्रचुरोपकारकारिणि 'सदा' सर्वकालमिति सूत्रार्थः ॥ तत्र किमित्याह -

मू. (२३८) *वाएण हीरमाणंमि, चेइयंमि मनोरमे ।*
दुहिया असरणा अत्ता, एए कंदंति भो ! खगा ॥

वृ. 'वातेन' वायुना 'ह्रियमाणे' इतस्ततः क्षिप्यमाणे, वातश्च तदा शक्रेणैव कृत इति सम्प्रदायः, चितिरिहेष्टकादिचयः, तत्र साधुः - योग्यश्चित्यः प्राग्वत् स एव चैत्यस्तस्मिन्, किमुक्तं भवति ? - अधोबद्धपीठिके उपरि चोच्छ्रितपताके 'मनोरमे' मनोऽभिरतिहेतौ, वृक्ष इति शेषः, दुःखं सञ्जातं येषां ते दुःखिताः 'अशरणाः' त्राणरहिता अत एव 'आर्ताः' पीडिताः 'एते' प्रत्यक्षाः 'क्रन्दन्ति' आक्रन्दशब्दं कुर्वन्ति 'भो' इत्यामन्त्रणे 'खगाः' पक्षिणः ।

इह च किमद्य मिथिलायां दारुणाः शब्दाः श्रूयन्ते ? इति यत्स्वजनजनाक्रन्दनमुक्तं तत् खगक्रन्दनप्रायम्, आत्मा च वृक्षकल्पः, तत्त्वतो हि नियतकालमेव सहावस्थितत्वेन उत्तरकालं च स्वस्वगतिगामितया द्रुमाश्रितस्वगोपया एवामि स्वजनादयः, उक्तं हि-

"यद्वद् द्रुमे महति पक्षिगणा विचित्राः, कृत्वाऽऽश्रयं हि निशि यान्ति पुनः प्रभाते ।
तद्वज्जगत्यसकृदेव कुटुम्बजीवाः, सर्वे समेत्य पुनरेव दिशो भजन्ते ॥" इति,

ततश्चाऽऽक्रन्दादिदारुणशब्दहेतुत्वं हेतुत्वेनाभिधीयमानमसिद्धम्, एते हि स्वजनादयो

वातेर्यमाणद्रुमविश्लिष्यत्स्वगा इव स्वस्वप्रयोजनहानिमेवाऽऽशङ्कमानाः क्रन्दन्ति, आह च-

"आत्मार्थं सीदमानं स्वजनपरिजनो रौति हाहारवार्तो -
भार्या चात्मोपभोगं गृहनिभवसुखं स्वं च यस्याश्च कार्यम् ।
क्रन्दत्यन्योऽन्यमन्यस्मिन्निह हि बहुजनो लोकयात्रानिमित्तं,
को वाऽन्यस्तत्र किञ्चिन्मृगयति हि गुणं रोदितीमुः स तस्मै ॥"

एवं चाऽऽक्रन्दादिदारुणशब्दानामभिनिष्क्रमणहेतुकत्वमसिद्धं, स्वप्रयोजनहेतुकत्वात् तेषां, तथा च भवदुक्तं हेतुकारणं असिद्धे एवेत्युक्तं भवतीति सूत्रार्थः ॥ ततश्च-

मू. (२३९) एयमट्ठं निसामित्ता, हेउकारणचोइओ ।
तओ नमी रायरिसी, देविंदो इणमब्बवी ॥

वृ. एनमर्थं हेतुकारणयोः - अनन्तरसूत्रसूचितयोश्चोदितः - असिद्धोऽयं भवदभिहितो हेतुः कारणं चेत्यनुपपन्त्या प्रेरितः हेतुकारणचोदितः, ततो नमिं राजर्षिं देवेन्द्रः 'इदं' वक्ष्यमाणम् अब्रवीत् इति सूत्रार्थः ॥ किं तदित्याह-

मू. (२४०) एस अग्गी अ वाओ अ, एयं डज्झति मंदिरं ।
भगवं ! अंतेउरंतेणं, कीस णं नावपिक्खह ॥

वृ. 'एष' इति प्रत्यक्षोपलभ्यमानः 'अग्निश्च' वैश्वानरः 'वातश्च' पवनस्तथा 'एतदि'ति प्रत्यक्षं 'दह्यते' भस्मसात् क्रियते, प्रक्रमाद्धातेरितेनाग्निनैव, 'मन्दिरं' वेश्म, भवत्सम्बन्धीति शेषः, भगवन्निति पूर्ववद्, 'अन्तेउरंतेन'ति अन्तःपुराभिमुखं 'कीस'न्ति किमात् ? 'णम्' इति वाक्यालङ्कारे 'नावप्रेक्षसे' नावलोकसे । इह च यद्यदात्मनः स्वं तत्तद्रक्षणीयं, यथा ज्ञानादि, स्वं चेदं भवतोऽन्तःपुरमित्यादिहेतुकारणभावना प्राग्वदिति सूत्रार्थः ॥

मू. (२४१) एयमट्ठं निसामित्ता० ॥

वृ. ततश्च 'एयं' सूत्रं प्राग्वत् ॥ किमब्रवीत् ? इत्याह-

मू. (२४२) सुहं वसामो जीवामो, जेसिं मो नत्थि किंचणं ।
मिहिलाए डज्झमाणीए, न मे डज्झए किंचणं ॥

वृ. 'सुखं' यथा भवत्येवं 'वसामः' तिष्ठामः 'जीवामः' प्राणान् धारयामः, येषां 'मो' इत्यस्माकं 'नास्ति' न विद्यते 'किञ्चन' वस्तुजातं, यतः -

'एकोऽहं न च मे कश्चित्, स्वपरो वाऽपि विद्यते ।
यदेको जायते जन्तुर्म्रियतेऽप्येक एव हि ॥"

इति न किञ्चिदन्तःपुरादि मत्सत्कं, यतश्चैवमतो 'मिथिलायाम्' अस्यां पुरि दह्यमानायां न मे दह्यते 'किञ्चन' स्वल्पमपि, मिथिलाग्रहणं तु न केवलमन्तःपुरादेव न मत्सम्बन्धि किन्त्वन्यदपि स्वजनजनादि स्वस्वकर्मफलभुजो हि जन्तवः तथा तथाऽस्मिन् भ्राम्यन्तीति किमत्र कस्य स्वं परं चेति ख्यापनार्थं । ततश्चानेन प्रागुक्तहेतोरसिद्धत्वमुक्तम्, तत्त्वतो ज्ञानादिव्यतिरिक्तस्य सर्वस्यास्वकीयत्वादित्यादिचर्चः प्राग्वदिति सूत्रार्थः ॥ एतदेव च भावयितुमाह-

मू. (२४३) चत्तपुत्तकलत्तस्स, निव्वावारस्स भिक्खुणो ।

पियं न विज्जइ किंचि, अप्पियंपि न विज्जइ ॥

वृ. त्यक्ताः-परिहृताः पुत्राश्च-सुताः कलत्राणि च-दाराः येन स तथा तस्य, अत एव 'निव्वाणपारस्स' परिहृतकृषिपाशुपाल्यादिक्रियस्य 'भिक्षोः' उक्तस्वरूपस्य 'प्रियम्' इष्टं 'न विद्यते' नास्ति 'किञ्चिद्' अल्पमपि, 'अप्रियमपि' अनिष्टमपि 'न विद्यते' नास्ति, प्रियाप्रियविभागास्तित्वे हि सति पुत्रकलत्रत्यागं न कुर्यादेव, तयोरेवातिप्रतिबन्धविषयत्वादिति भावः, एतेन यदुक्तं नास्ति किञ्चनेति तत्समर्थितं, तत् स्वकीयत्वं हि पुत्राद्यत्यागतोऽभिष्वङ्गतः स्यात् स च निषिद्ध इति, एवमपि कथं सुखेन वसनं जीवनं वेत्याह

मू. (२४४) बहुं खु मुनिनो भद्दं अणगारस्स भिक्खुणो।
सव्वतो विप्पमुक्कस्स, एगंतमनुपस्सओ ॥

वृ. 'बहु' विपुलं 'खु' अवधारणे, बह्वेव 'मुनेः' तपस्विनः 'भद्रं' कल्याणं सुखं वा 'अनगारस्य' 'भिक्षोः' इति च प्राग्वत्, 'सर्वतः' बाह्याद्यभ्यन्तराच्च, यद्वास्वजनात् परिजनाच्च 'विप्रमुक्तस्य' इति पूर्ववत्, 'एकान्तम्' 'एकोऽहं' इत्याद्युक्तरूपैकत्वभावनात्मकम्, 'अनुपश्यतः' पर्यालोचयत इति सूत्रद्वयार्थः ॥

मू. (२४५) एयमट्ठं निसामित्ता०॥

वृ. पुनरपि 'एय' सूत्रं प्राग्वत्-

मू. (२४६) पागारं कारइत्ता णं, गोपुरट्टालगाणि य।
उस्सूलए सयग्घी य, ततो गच्छसि खत्तिया ॥

वृ. प्रकर्षेण मर्यादया च कुर्वन्ति तमिति प्राकारस्तं-धूलीष्टकादिविरचितं 'कारयित्वा' विधाप्य 'गोपुराट्टालकानि च' तत्र गोभिः पूर्यन्त इति गोपुराणी-प्रतोलीद्वाराणि, गोपुरग्रहणमर्गलाकपाट्योपलक्षणम्, अट्टालकानिप्राकारकोष्ठकोपरिवर्तीनी आयोधनस्थानानि 'उस्सूलय'-त्ति स्वातिका परबलपरावर्तार्थमुपरिच्छादितगर्ता वा 'सयग्घीय'त्ति शतं घ्नन्तीति शतघ्न्यः, ताश्च यन्त्रविशेषरूपाः 'ततः' एवं सकलं निरर्गलीकृत्य 'गच्छसी'ति तिव्यत्ययाद्गच्छ, क्षतात्त्रायत इति क्षत्रियस्तत्सम्बोधनं हे क्षत्रिय !, हेतूपलक्षणं चैतद्, स चायं-यः क्षत्रियः स पुररक्षां प्रत्यवहितः, यथोदितोदयादिः, क्षत्रियश्च भवान्, शेषं प्राग्वदिति सूत्रार्थः ॥

मू. (२४७) एयमट्ठं निसामित्ता०

वृ. ततः 'एयं' सूत्रं प्राग्वत्

मू. (२४८) सद्धं नगरं किच्चा, तवसंवरमग्गलं।
खंतिं निउणपागारं, तिगुत्तं दुप्पधंसयं ॥

वृ. 'श्रद्धां' तत्त्वरुचिरूपाशेषगुणाधारतया 'नगरीं' पुरीं 'कृत्वा' इति विधाय, अनेन च प्रशमसंवेगादीनि गोपुराणि कृत्वेत्युपलक्ष्यते, अर्गलाकपाटं तर्हि किमित्याह-परिघस्तत्प्रधानं कपाटमप्यर्गलेत्युक्तं, ततोऽर्गलाम्-अर्गलाकपाटं कृत्वेति सम्बन्धः, प्राकारः क इत्याह-'क्षांतिं' क्षमां निपुणमिव निपुणं-शत्रुरक्षणं प्रति अद्भाविरोध्यनन्तानुबन्धिकोपोपरोधितया 'प्राकारं' शालं, कृत्वेति सम्बन्धः, उपलक्षणं चैषां मानादिनिरोधिनां मार्दवादीनां, तिसृभिः-अट्टालकोच्चूलकशतघ्नीसंस्थानीयाभिर्मनोगुप्त्यादिभिर्गुप्तिभिः गुप्तं त्रिगुप्तं, मयूरव्यं-

सकादित्वात् समासः, प्राकारस्य विशेषणं, अत एव दुःखेन प्रधृष्यते - परैरभिभूयत इति दुष्प्रधर्षः स एव दुष्प्रधर्षकस्तं, पठन्ति च-'खंति' निउणं पागारं तिगुत्तिदुप्पधंसयं'ति, स्पष्टं ।

मू. (२४९) *धनुं पराक्कमं किच्चा, जीवं च ईरियं सदा ।*
धिइं च केयणं किच्चा, सच्चेणं पलिमंथए ॥

वृ. इत्थं यदुक्तं 'प्राकारादीन् कारयित्वे'ति तत्प्रतिवचनमुक्तं, सम्प्रति तु प्राकाराट्टालकेष्ववश्यं योद्धव्यं, तच्च सत्सु प्रहरणादिषु प्रतिविधेये च धैरिणि सम्भवत्यत आह-'धनुः' कोदण्डं 'पराक्रमं' जीववीर्योल्लासरूपमुत्साहं कृत्वा 'जीवां च' प्रत्यञ्चां च 'ईर्याम्' ईर्यासमितिमुपलक्षणत्वाच्छेषसमितीश्च 'सदा' सर्वकालं, तद्विरहितस्य जीववीर्यस्याप्यकिञ्चित्करत्वात्, 'धृतिं च' धर्माभिरतिरूपां 'केतनं' भृङ्गमयधनुर्मध्ये काष्ठमयमुष्टिकात्मकं, ननु तदुपरि स्नायुना निबध्यते इदं तु केन बन्धनीयमित्याह-'सत्येन' मनःसत्यादिना 'पलिमंथए'त्ति बध्नीयात्, ततः किमित्याह-

मू. (२५०) *तवनारायजुत्तेणं, भेत्तूणं कम्मकंचुअं ।*
मुनी विगसंगामो, भवाओ परिमुच्चति ॥

वृ. 'तपः' षड्विधमान्तरं परिगृह्यते, तदेव कर्म प्रत्यभिधेदितया 'नाराचः' अयोमयो बाणस्तुद्युक्तेन प्रक्रमात् धनुषा, 'भित्त्वा' विदार्य कर्म-ज्ञानावरणादि कञ्चुक इव कर्मकञ्चुकस्तं, इह कर्मकञ्चुकग्रहणेनैवात्मैवोद्धतो वैरीत्युक्तं भवति, वक्ष्यति च-"अप्पा मित्तममित्तं च, दुप्पट्ठियसुपट्ठिय"न्ति, कर्मणस्तु कञ्चुकत्वं तद्गतिमिथ्यात्वादिप्रकृत्युदयवर्तिनः श्रद्धानगरमुपरुन्धत आत्मनो दुर्निवारत्वात्, 'मुनिः' प्राग्वत्, कर्मभेदे जेयस्य जितत्वात् विगतः संग्रामो यस्य यस्माद्वेति विगतसंग्रामः-उपरतायोधनः सन्, भवन्त्यस्मिन् शारीरमानसानि दुःखानीति भवः-संसारस्तस्मात् परिमुच्यते, एतेन च यदुक्तं-'प्राकारं कारयित्वे'त्यादि, तत्सिद्धसाधनम्, इत्थं श्रद्धानगररक्षणाभिधानात् भवतश्च तत्त्वतस्तदविज्ञतेति चोक्तं भवति, न च भवदभिमत-प्राकारादिकरणे सकलशारीरमानसक्लेशवियुक्तिलक्षणा मुक्तिरवाप्यते, इतस्तु तदवासिरपीति सूत्रत्रयार्थः ॥

मू. (२५१) *एयमट्ठं निसामित्ता० ॥*

वृ. एवं च तेनोक्ते 'एय' सूत्रं प्राग्वत् ।-

मू. (२५२) *पासाए कारइत्ता णं, वद्धमाणगिहाणि य ।*
वालग्गपोइयाओ य, तओ गच्छसि खत्तिया ॥

वृ. प्रसीदन्ति नृणां नयनमनांसि येषु ते प्रासादास्तान् उक्तरूपान् 'वर्द्धमानगृहाणि च' अनेकधा वास्तुविद्याऽभिहितानि 'वालग्गपोइयातो य'त्ति देशीपदं वलभीवाचकं, ततो वलभीश्च कारयित्वा, अन्ये त्वाकाशतलागमध्यस्थितं क्षुल्लकप्रासादमेव 'वालग्गपोइया य'त्ति देशीपदाभिधेयमाहुः, ततस्ताश्च क्रिडास्थानभूताः कारयित्वा, ततोऽनन्तरं गच्छ क्षत्रिय ! । एतेन च यः प्रेक्षावान् स सति सामर्थ्ये प्रासादादि कारयिता यथा ब्रह्मदत्तादिः, प्रेक्षावांश्च सति सामर्थ्ये भवान्, इत्यादिहेतुकारणयोः सूचनमकारीति सूत्रार्थः ॥

मू. (२५३) *एयमट्ठं निसामित्ता० ॥*

वृ. एवं च शक्रेणोक्ते 'एय' सूत्रं प्राग्वत्।

मू. (२४४) *संसयं खलु सो कुणइ, जो मग्गे कुणई घरं।*
जत्थेव गंतुमिच्छेज्जा, तत्थ कुव्विज्ज सासयं॥

वृ. संशीतिः संशयः - इदमित्थं भविष्यति नवेत्युभयांशावलम्बनः प्रत्ययस्तं, 'खलुः' एवकारार्थः, ततः संशयमेव स कुरुते - यथा मम कदाचिद्गमनं भविष्यतीति, यो मार्गे कुरुते गृहं, गमननिश्चये तत्कारणायोगाद्, अहं तु न संशयित इत्याशयः, सम्यग्दर्शनादीनां मुक्तिं प्रत्यवन्ध्यहेतुत्वेन मया निश्चितत्वादवासत्वाच्च, यदि नाम न संशयितस्तथापि किमिहैव गृहं न कुरुषे ? अत आह-'यत्रैव' विवक्षितप्रदेशे 'गन्तुं' यातुम् 'इच्छेत्' अभिलषेत 'तत्थ' नित्यव्यवच्छेदफलत्वाद्वाक्यस्य तत्रैव-जिगमिषितप्रदेशे 'कुर्वीत' विदधीत स्वस्य- आत्मन आश्रयो-वेश्म स्वाश्रयस्तं, यद्वा शाश्वतं-नित्यं, प्रक्रमाद्गृहमेव, ततोऽयमर्थः - इदं तावदिहावस्थानं मार्गावस्थानप्रायमेव, यत्र तु जिगमिषितमस्माभिस्तत् मुक्तिपदं, तदाश्रयविधाने च प्रवृत्ता एव वयं, ततस्तत्करणे प्रवृत्तत्वात्कथं प्रेक्षावत्त्वक्षतिः ?, तथा च यः प्रेक्षावानित्याद्यपि तत्त्वतः सिद्धसाधनतयैवावस्थितमिति सूत्रार्थः॥

मू. (२४५) *एयमट्ठं निसामित्ता०॥*

वृ. ततः पुनरपि 'एय' सूत्रं प्राग्वत्।-

मू. (२४६) *आमोसे लोमहारे य, गंठिभेए य तक्करे।*
नगरस्स खेमं काऊणं, ततो गच्छसि खत्तिया!॥

वृ. आ-समन्तात् मुष्णन्ति-स्तैन्यं कुर्वन्तीत्यामोषास्तान्, लोमानि-रोमाणि हरन्ति-अपनयन्ति प्राणिनां ये ते लोमहाराः, किमुक्तं भवति ? - अतिनिर्लिशतया आत्मविघाताशङ्कया च प्राणान् विहत्यैव ततः सर्वस्वमपहरन्ति, तथा ते वृद्धाः -लोमहाराः प्राणहारा इति, तांश्च, ग्रन्थि-द्रव्यसम्बन्धिनं भिन्दन्ति- सुधुरकद्विकर्तिकादिना विदारयन्तीति ग्रन्थिभेदास्तान्, चशब्दो भिन्नक्रमः, ततस्तदेव कुर्वन्तीति तस्कराः - सर्वकालं चौर्यकारिणस्तांश्च, यत आहुर्वैयाकरणाः - 'तद्धलोः करपत्योश्चौरदेवतयोः सुट्तलोपश्च' इह चोत्पाद्येति गम्यते 'प्रविश्य पिण्डी' मित्युक्तौ भक्षयेतिवत्, यद्वा सप्तम्येवेयं बह्वर्थे चैकवचनं, ततश्चामोषादिभूपतापकारिषु सत्सु 'नगरस्स' पुरस्य 'क्षेमं' सुस्थं 'कृत्वा' विधाय 'ततः' तदनन्तरं गच्छ क्षत्रिय!, एतेनापि यः सधर्मा नृपतिः स इहाधर्म्मकारिनिग्रहकृत्, यथा भरतादिः, सधर्म्मनृपतिश्च भवानित्यादिहेतुकारणसूचना कृतैवेति सूत्रार्थः।

मू. (२४७) *एयमट्ठं निसामित्ता०॥*

वृ. इत्थं शक्रोक्तौ 'एय' सूत्रं प्राग्वत्!-

मू. (२४८) *असइं तु मनुस्सेहिं, मिच्छादंडो पउंजइ।*
अकारिणोऽत्थ बज्झंति, मुच्चई कारओ जनो॥

वृ. 'असकृद्' अनेकधा, 'तुः' एवकारार्थः, ततश्चासकृदेव 'मनुष्यैः' मनुजैः 'मिथ्या' व्यलीकः, किमुक्तं भवति ? - अनपराधिष्वज्ञानाहङ्काकादिहेतुभिरपराधिष्विव दण्डनं दण्डः - देशत्यागशरीरनिग्रहादिः 'प्रयुज्यते' व्यापार्यते, कथमिदमित्याह 'अकारिणः' आमोषाद्य-

विधायिनः 'अत्र' इत्यस्मिन् प्रत्यक्षतः उपलभ्यमाने मनुष्यलोके 'बध्यन्ते' निगडादिभिर्नियन्त्र्यन्ते 'मुच्यते' त्यज्यते 'कारकः' विधायकः, प्रकृतत्वादामोषणादीनां, 'जनः' लोकः, तदनेन यदुक्तं प्राग्- 'आमोषकाद्युत्सादनेन नगरस्य क्षेमं कृत्वा गच्छेति, तत्र तेषां ज्ञातुमशक्यतया क्षेमकरणस्याप्यशक्यत्वमुक्तंयत्तु 'यः सधर्मेत्यादि' सूचितं, तत्रापरिज्ञानतोऽनपराधिनामपि दण्डमादधतां सधर्मनृपतित्वमपि तावच्चिन्त्यमित्यसिद्धता हेतोरिति सूत्रार्थः ॥

मू. (२५९) एयमट्ठं निसामित्ता० ॥

वृ. 'एय' सूत्रं प्राग्वत्, नवरमियता स्वजनान्तःपुरपुरादिप्रासादनृपतिधर्मविषयः किमस्याभिष्वङ्गोऽस्ति ? नेती वेति विमृश्य सम्प्रति द्वेषाभावं विवेक्तुमिच्छुर्विजिगीषुतामूलत्वात् द्वेषस्य तामेव परीक्षितुकामः शक्र इदमुक्तवान्-

मू. (२६०) जे केइ पत्थिवा तुब्भं, नानमंति नराहिवा ।
वसे ते ठावइत्ता णं, तओ गच्छसि खत्तिया ! ॥

वृ. ये केचित् इति सामस्त्योपदर्शकं 'पार्थिवाः' भूपालाः, 'तुब्भं'ति तुभ्यं 'नानमन्ति' न मर्यादया प्रह्वीभवन्ति, तुभ्यमिति च नमतियोगेऽपि चतुर्थीदर्शनात्, 'मात्रे पित्रे च सवित्रे च नमामो' त्यादिवददुष्टमेव, पठ्यते च- 'तुब्भं'ति, तत्र च तवेति शेषविवक्षया षष्ठी, 'नराहिवा' इत्यत्र अकारो 'ह्रस्वदीर्घौ मिथ' इतिलक्षणात्, ततश्च हे 'नराधिप !' नृपते ! 'वशे' इत्यात्मायत्तौ 'तानि'ति अनानमत्पार्थिवान् 'स्थापयित्वा' निवेश्य कृत्वेतियावत्, ततो गच्छ क्षत्रिय ! इहापि यो नृपतिः सोऽनमत्पार्थिवनमयिता, यथा भरतादिः, इत्यादिहेतुकारणे अर्थतः आक्षिप्ते इति ।

मू. (२६१) एयमट्ठं निसामित्ता० ॥

वृ. एवं तु सुरपतिनोक्ते 'एय' सूत्रं प्राग्वत्-

मू. (२६२) जो सहस्सं सहस्साणं, संगामे दुज्जए जिने ।
एगं जिणेज्ज अप्पाणं, एस से परमो जओ ॥

वृ. 'य' इत्यनुद्दिष्टनिर्देशे 'सहस्रं' दशशतात्मकं सहस्राणां प्रक्रमात् सुभटसम्बन्धिनां 'संग्रामे' युद्धे 'दुर्जये' दुरापपराभवे 'जयेद्' 'अभिभवेत्, सम्भावने लिङ्, 'एकम्' अद्वितीयं 'जयेद्' यदि कथञ्चिज्जीववीर्योल्लासतोऽभिभवेत्, कम् ?- 'आत्मानं' स्वं, दुराचारप्रवृत्तमिति गम्यते, 'एषः' अनन्तरोक्तः, 'से' इति तस्य जेतुः सुभटदशशतसहस्रजयात् 'परमः' प्रकृष्टः 'जयः' परेषामभिभवः, तदनेनाऽऽत्मन एवातिदुर्जयत्वमुक्तं,

मू. (२६३) अप्पाणमेव जुज्झाहि, किं ते जुज्झेण बज्झओ ? ।
अप्पाणमेव अप्पाणं, जिणित्ता सुहमेहति ॥

वृ. तथा च- 'अप्पाणमेव'- त्ति तृतीयार्थे द्वितीया, ततश्चाऽऽत्मनैव सह 'युध्यस्व' संग्रामं कुरु, यद्वा युद्धेरन्तर्भावितण्यर्थत्वात् युध्यस्वेति योधयस्व, कम् ?- आत्मानं, इहाप्यात्मनैव सहेति शेषः, किं ?, न किञ्चिदित्यर्थः, 'ते' तव 'युद्धेन' संग्रामेण, 'बाह्यतः' इति बाह्यं पार्थिवादिकमाश्रित्य, यदिवा बाह्यत इति तृतीयार्थे तसिः, ततो बाह्येन युद्धेनेति सम्बध्यते, एवं च 'अप्पाणमेव'त्ति आत्मनैवान्यव्यतिरिक्तेनाऽऽत्मानं स्वं 'जइत्ते'ति जित्वा 'सुखम्' ऐकान्तिकात्यन्तिकमुक्तिसुखात्मकं 'एधते' इत्यनेकार्थत्वाद्धातूनां प्राप्नोति, अथवा 'सुहमेहए'त्ति

शुभं-पुण्यमेधते - अन्तर्भावितण्यर्थत्वात् वृद्धिं नयति।

मू. (२६४) *पंचिंदियाणि कोहं, मानं मायं तहेव लोहं च।*
दुज्जयं चेव अप्पाणं, सव्वमप्पे जिए जितं॥

वृ. कथमात्मन्येव जिते सुखावाप्तिरित्याह-'पञ्चेन्द्रियाणि' श्रोत्रादीनि 'क्रोधः' कोपः 'मानः' अहङ्कारः 'माया' निकृतिः तथैव 'लोभश्च' गार्द्धलक्षणः 'दुर्जयः' दुरभिभवः, 'चः' समुच्चये, 'एव' इति पूरणे, अतति-सततं गच्छति तानि तान्यध्यवसायस्थानान्तराणीति व्युत्पत्तेः आत्मा मनः, सर्वत्र च सूत्रत्वात् नपा निर्देशः, 'सर्वम्' अशेषमिन्द्रियादि, उपलक्षणत्वान्मिथ्यात्वादि च, 'आत्मनि' जीवे 'जिते' अभिभूते 'जित'मिति अभिभूतमेव। ननु मनसि जिते जितान्येवेन्द्रियादीनीति किं पृथक्करणेनेत्यारेकायामाह, सत्यं, तथापि क्लेशैकदुर्जयत्वख्यापनाय पृथगुपन्यास इत्यदोषः, यद्वा 'दुज्जयं चेव अप्पाणं'ति चकारो हेत्वर्थः, 'एवः' अवधारणे भिन्नक्रमश्च आत्मशब्दादनन्तरं द्रष्टव्यः, ततश्च-यस्माद् 'आत्मैव' जीव एव दुर्जयः ततः सर्वमिन्द्रियाद्यात्मनि जिते जितम्, अनेन चेन्द्रियादीनामेव दुःखहेतुत्वात्तज्जयतः सुखप्राप्तिः ममार्थिता भवति। एवं च फलोपदर्शनद्वारेणैवंविधमेव विजिगीषुता श्रेयसीत्याचष्टे, ततश्च यो नृपतिरित्याद्यपि तत्त्वतो विजिगीषुत्वदर्शनात् सिद्धसाधनतया प्रत्युक्तमिति सूत्रार्थः॥

मू. (२६५) *एयमट्ठं निसामित्ता०॥*

वृ. भूयोऽपि-'एय' सूत्रं प्राग्वत्। नवरमनन्तरपरीक्षातो हेयोऽप्यनेन परिहृत इति निश्चित्य जिनप्रणीतधर्मं प्रति स्थैर्यं परीक्षितुकामः शक्र इदमवोचत्-

मू. (२६६) *जइत्ता विउले जन्ने, भोइत्ता समणमाहणे।*
दत्ता भोच्चा य जट्ठा य, ततो गच्छसि खत्तिया॥

वृ. 'जइत्त'त्ति याजयित्वा 'विपुलान्' विस्तीर्णान् 'यज्ञान्' यागान् 'भोजयित्वा' अभ्यवहार्य श्रमणाश्च-निर्ग्रन्थादयो ब्राह्मणाश्च-द्विजाः श्रमणब्राह्मणास्तान्, 'दत्त्वा' द्विजादिभ्यो गोभूमिसुवर्णादीन्, भुक्त्वा च मनोज्ञशब्दादीन् इष्ट्वा च राजर्षित्वावासौ स्वयं यागान् ततो गच्छ क्षत्रिय!, अनेन यद्यत्प्राणिप्रीतिकरं तत्तद्धर्माय, यथा हिंसोपरमादि, प्राणिप्रीतिकरणि चामूनि यादादीनीत्यादिहेतुकारणे सूचिते एवेति सूत्रार्थः॥

मू. (२६७) *एयमट्ठं निसामित्ता०॥*

वृ. शक्रवचनानन्तरम् 'एय' सूत्रं प्राग्वत्।

मू. (२६८) *जो सहस्सं सहस्साणं मासे मासे गवं दए।*
तस्सावि संजमो सेओ, अदितस्सवि किंचनं॥

वृ. यः 'सहस्रं सहस्राणां' दशलक्षात्मकं मासे मासे 'गवां' प्रतीतानां 'दए'त्ति दद्यात्, 'तस्यापि' एवं विधस्य दातुर्यादि कथञ्चिच्चारित्रमोहनीयक्षयोपशमेन 'संयमः' आश्रवादिविरमणात्मकः स्यात् तदा स एव 'श्रेयान्' अतिशयप्रशस्यः, कथंभूतस्यापि?-'अददतोऽपि' अयच्छतोऽपि 'किञ्चन' स्वल्पमपि वस्तु, यद्वा 'तस्सावि'त्ति तस्मादप्युक्तरूपाद्दातुरवधित्वेन विवक्षितात्, संयच्छति-प्राणिहिंसादिभ्यः सम्यगुपरमतीति सर्वधातूनां पचादिषु दर्शनादिति संयमः-संयमवान्, साधुरित्यर्थः, 'श्रेयान्' प्रशस्यतरः, अथवा तस्यापि दातुः प्रक्रमात् गोदान-

धर्मात् 'संयमः' उक्तरूपः श्रेयान्, शेषं पूर्ववत्, गोदानं चेह यागाद्युपलक्षणम्, अतिप्रभूतजनाचरितमित्युपलक्षणम्, एवं च संयमस्य प्रशस्यतरत्वमभिदधता यागादीनां सावद्यत्वमर्थादापेदितं, तथा च यज्ञप्रणेतृभिरुक्तम्-

"षट् शतानि नियुज्यन्ते, पशूनां मध्यमेऽहनि ।
अश्वमेधस्य वचनान्यूनानि पशुभिस्त्रिभिः ॥"

इयत्पशुवधे च कथमसावद्यता नाम ?, तथा दानान्यप्यशनादिविषयाणि धर्मोपकरणगोचराणि च धर्माय वर्ण्यन्ते, यत आह-

"अशनादीनि दानानि, धर्मोपकरणानि च ।
साधुभ्यः साधुयोग्यानि, देयानि विधिना बुधैः ॥"

शेषाणि तु सुवर्णगोभूम्यादीनि प्राण्युपमर्दहेतुतया सावद्यान्येव, भोगानां तु सावद्यत्वं सुप्रसिद्धं । तथा च प्राणिप्रीतिकरत्वादित्यसिद्धो हेतुः, प्रयोगश्च-यत्सावद्यं न तत् प्राणिप्रीतिकरं, यथा हिंसादि, सावद्यानि च यागादीनि इति सूत्रार्थः ॥

मू. (२६९) *एयमट्ठं निसामित्ता०*

वृ. 'एयमट्ठं' सूत्रं प्राग्वत् । नवरमित्थं जिनधर्मस्थैर्यमवधार्य प्रव्रज्यां प्रति दृढोऽयमुत नेति परीक्षणार्थं शक्र इदमवादीत्-

मू. (२७०) *घोरासमं चइत्ता णं, अन्नं पत्थेसि आसमं ।*
इहेव पोसहरओ, भवाहि मणुयाहिवा ! ॥

वृ. 'घोरः' अत्यन्तदुरनुचरः, स चासावाश्रमश्च आङिति-स्वपरप्रयोजनाभिव्याप्त्या श्राम्यन्ति-खेदमनुभवन्त्यस्मिन्नितिकृत्वा घोराश्रमो-गार्हस्थ्यं, तस्यैवाल्पसत्त्वैर्दुष्करत्वात्,

"गृहाश्रमसमो धर्मो, न भूतो न भविष्यति ।
पालयन्ति नराः शूरा क्लीबाः पाखण्डमाश्रिताः ॥"

तं 'त्यक्त्वा' अपहाय 'जहित्ता णं'ति क्वचित् पाठः, तत्र च हित्वा-'अन्यत्' एतद्व्यतिरिक्तं कृषिपाशुपाल्यादि अशक्तकातरजनालिनिन्दितं 'प्रार्थयसे' अभिलषसि, 'आश्रमं' प्रव्रज्यालक्षणं, नेदं क्लीबसत्त्वानुचरितं भवादृशानामुचितमित्यभिप्रायः । तर्हि किमुचितमित्याह-'इह' अस्मिन्नेव गृहाश्रमे, स्थित इति गम्यते, पोषं-धर्मपुष्टिं धत्त इति पोषधः-अष्टम्यादितिथिषु व्रतविशेषः, तत्र रतः-आसक्तः पोषधरतः 'भवाहि'त्ति भव, अणुव्रताद्युपलक्षणमेतद्, अस्यैव चोपादानं पोषधदिनेष्ववश्यंभावतस्तपोऽनुष्ठानव्यापकं, यत आह आससेनः-

"सर्वेष्वपि तपोयोगः, प्रशस्तः कालपर्वसु ।
अष्टम्यां पञ्चदश्यां च, नियतं पोषधं वसेद् ॥"

इति 'मनुजाधिप !' नृपते ! । अत्र च घोरपदेन हेतुराक्षिप्तः, तथाहि-यद्यद् घोरं तत्तद् धर्मार्थिनाऽनुष्ठेयं, यथाऽनशनादि, तथा चायं गृहाश्रमः, शेषमेतदनुसारतोऽभ्यूह्यमिति सूत्रार्थः ॥

मू. (२७१) *एयमट्ठं निसामित्ता० ॥*

वृ. 'एय' सूत्रं । प्राग्वत्

मू. (२७२) *मासे मासे उ जो बालो, कुसग्गेणं तु भुंजइ ।*

न सो सुक्खायधम्मस्स, कलं अग्घइ सोलसिं ॥

वृ. 'मासे मासे' इति वीप्सायां द्विर्वचनं, 'तु:' इहोत्तरम् चैवकारार्थ:, ततश्च मासे मास एव, न त्वेकस्मिन्नेव मासेऽर्धमासादौ वेति, 'य:' कश्चिद् 'बाल:' अविवेक: 'कुशाग्रेणैव' तृणविशेषप्रान्तेन भुंक्ते, एतदुक्तं भवति-यावत् कुशाग्रेऽवतिष्ठते तावदेवाभ्यवहरति नातोऽधिकम्, अथवा कुशाग्रेणेति जातावेकवचनं, तृतीया तु ओदनेनासौ भुंक्त इत्यादिवत् साधकतामात्रेणाभ्यवहियमाणत्वेऽपि विवक्षितत्वात्, 'न' इति निषेधे 'स' इति य: कुशाग्रैर्भुंक्ते स एवंविधकष्टानुष्ठाय्यपि सुष्ठु-शोभन: सर्वसावद्यविरतिरूपत्वादाख्यातीति-अभिव्याप्त्या ख्यात:-तीर्थंकरादिभि: कथित: स्वाख्यात: तथाविधो धर्मो यस्य सोऽयं स्वाख्यातधर्मा तस्य, चारित्रिण इत्यर्थ:, 'कलां' भागम् 'अर्घति' अर्हति, 'षोडशीं' षोडशपूरणामित्युक्तं भवति, किं पुनस्तुल्योऽधिको वा ?, षोडशांशसमोऽपि न भवति, ततो यदुक्तम्-'यद्यद् घोरं तत्तद्धर्मार्थिनाऽनुष्ठेयमनशनादिवदि'ति, अत्र घोरत्वादित्यनैकान्तिको हेतु:, घोरस्यापि स्वाख्यातधर्मस्यैव धर्मार्थिनाऽनुष्ठेयत्वाद्, अन्यस्य त्वात्मविघातादिवत्, अन्यथात्वात्, प्रयोगश्चात्र-यत् स्वाख्यातधर्मरूपं न भवति घोरमपि न तद्धर्मार्थिनाऽनुष्ठेयं, यथाऽऽत्मवधादि:, तथा च गृहाश्रम:, तद्रूपत्वं चास्य सावद्यत्वाद्धिंसावदित्यलं प्रसङ्गेन। शेषं प्राग्वदिति सूत्रार्थ: ॥

मू. (२७३) एयमट्ठं निसामित्ता०

वृ. 'एय' सूत्रं प्राग्वत् । नवरं यतिधर्मे दक्षोऽयमिति निश्चित्य दुरन्तोऽयमभिष्वङ्ग इति तदभावं परीक्षितमपि पुन: परीक्षितुमिदमिन्द्र उवाच-

मू. (२७४) हिरण्णं सुवण्णं मणिमोत्तं, कंसं दूसं च वाहणं।
कोसं च वड्ढइत्ता णं, तओ गच्छसि खत्तिया ! ॥

वृ. 'हिरण्णं' स्वर्णं 'सुवण्णं' शोभनवर्णं' विशिष्टवर्णिकमित्यर्थ:, यद्वा हिरण्यं-घटितस्वर्णमितरत्तु सुवर्णं, मणयश्च-इन्द्रनीलादयो मुक्ताश्च-मौक्तिकानि मणिमुक्तं, तथा 'कांस्यभाजनादि' दृष्यं' वस्त्राणि, 'च:' स्वगतानेकभेदसंसूचक:, 'वाहनं' रथाश्वादि, पठन्ति च-'सवाहणं'ति सह वाहनैर्वर्तत इति सवाहनं हिरण्यादीति सम्बन्ध:, 'कोषं' भाण्डागारं चर्मलताद्यनेकवस्तुरूपं 'वड्ढावइत्ता णं'ति वृद्धिं प्रापय्य तत: समस्तवस्तुविषयेच्छापरिपूर्त्तौ गच्छ क्षत्रिय !, अयमाशय:-य: साकाङ्क्षो नासौ धर्मानुष्ठानयोगो भवति, यथा मम्मणवणिक्, साकाङ्क्षश्च भगवान्, आकाङ्क्षणीयहिरण्यादिवस्त्वपरिपूर्ते:, तथाविधदमकवदिति।

मू. (२७५) एयमट्ठं निसामित्ता०

वृ. तत: 'एयं' सूत्रं प्राग्वत्-

मू. (२७६) सुवण्ण रूप्पस्स य पव्वया भवे, सिया हु केलाससमा असंखया।
नरस्स लुद्धस्स न तेहि किंचि, इच्छा हु आगाससमा अणंतया ॥

वृ. सुवर्णं च रूप्यं च सुवर्णरूप्यमिति समाहारस्तस्य, 'तु:' पूरणे, यद्वाऽऽर्षत्वाद्विभक्तिलोप:, तुशब्द: समुच्चये, ततः स्वर्णस्य रूप्यस्य च पर्वता इव पर्वता:-पर्वताप्रमाणा: राशयो 'भवन्ति' भवेयु:, पर्वतप्रमाणत्वेऽपि च लघुपर्वतप्रमाणा एव स्युरत आह-'सिया हु'त्ति स्यात्, कदाचित्, हुरवधारणे भिन्नक्रमश्च, तत: 'कैलाससमा' एव कैलासपर्वततुल्या एव, न त्वन्यलघुपर्वत-

प्रमाणाः, तेऽपि 'असङ्ख्यकाः' सङ्ख्याविरहिताः, न तु द्वित्रा एव,

मू. (२७७) *पुढवी साली जवा चेव, हिरन्नं पसुभिस्सह।*
पडिपुन्नं नालमेगस्स, इइ विज्जा तवं चरे॥

वृ. नरस्य लक्षणमस्य, तत्प्रधानलक्षणत्वात्, स्त्रियाः पण्डकस्य वा, न तैः कैलाशमपीत्यादिभिरपि सुवर्णरूप्यपर्वतैः 'किञ्चिदपि' अल्पमपि परितोषोत्पादनं प्रति क्रियत इति शेषः, पठ्यते च 'न तेणं' ति अत्र च सूत्रत्वाद्वचनव्यत्ययः, कुतः पुनरिदमित्याह-'इच्छा' अभिलाषः 'हु'रिति यस्मादाकाशेन समा तुल्या आकाशसमा 'अनन्तिका' अन्तरहिता, तथा चैतदनुवादी वाचकः-

"न तृप्तिरिह शताज्जन्तोर्न सहस्रान्न कोटितः।
न राज्यान्नैव देवत्वान्नेन्द्रत्वादपि विद्यते॥"

किं सुवर्णरूप्ये केवले एव नेच्छापरिपूर्तये इत्याशङ्क्याह-'पृथ्वी' मही 'शालयः' लोहितशाल्यादयः, 'यवाः' प्रतीताः, 'च' शेषधान्यसमुच्चयार्थः, 'एवः' अवधारणे स च भिन्नक्रमो नेत्यस्यानन्तरं योक्ष्यते, 'हिरण्यं' सुवर्णं ताम्राद्युपलक्षणमेतत्, 'पशुभिः' गवाश्वादिभिः 'सह' साधं 'प्रतिपूर्णं' समस्तं, पठन्ति च-'सव्वं तं'ति सर्वम्- अशेषं, न तु कियदेव तत्-पृथिव्यादि 'न' इत् नैव 'जलं' समर्थं, प्रक्रमादिच्छापरिपूर्तये 'एकस्य' अद्वितीयस्य, जन्तोरिति गम्यते, 'इति' एतत् श्लोकार्धोक्तं 'विज्ज'त्ति सूत्रत्वाद् विदित्वा, यद्वा 'इती'त्यस्माद्धेतोः 'विद्वान्' पण्डितः 'तपः' द्वादशविधं 'चरेत्' आसेवेत, तत एव निःस्पृहतयेच्छापरिपूर्तिसम्भवादिति-भावः। अनेन च सन्तोष एव निराकाङ्क्षतायां हेतुः, न तु हिरण्यादिवर्धनमित्युक्तं, तथा च हिरण्यादि वर्धयित्वेत्यत्र यदनुमानमुक्तं, तत्र साकाङ्क्षत्वलक्षणो हेतुरसिद्धः, न चाकाङ्क्षणीयवस्त्वपरिपूर्तेस्तस्य सिद्धत्वं, सन्तुष्टतया ममाऽऽकाङ्क्षणीयवस्तुन एवाभावादिति सूत्रार्थः॥

मू. (२७८) *एयमट्ठं निसामित्ता०*

वृ. भूयोऽपि 'एयं' सूत्रं प्राग्वत्। नवरमविद्यमानविषयेषु विषयवाञ्छानिवृत्तोऽयमिति निश्चित्य सत्सु तेष्वभिष्वङ्गोऽस्ति उत न वेति विवेचयितुमिन्द्र उवाच-

मू. (२७९) *अच्छेरगमब्भुदए, भोए जहिसु पत्थिवा!।*
असंते कामे पत्थेसि, संकप्पेण विहन्नसि॥

वृ. 'अच्छेरग'ंति आश्चर्यं वर्तते, यत् त्वमेवंविधोऽपि 'अब्भुदए'त्ति अद्भुतकान् आश्चर्यरूपान् 'भोगान्' कामान् 'जहासि' त्यजसि, पठ्यते च-'चयसि'त्ति, 'पार्थिव!' पृथिवीपते!, पाठान्तरतश्च क्षत्रिय!, अथवा 'अब्भुयए'त्ति अभ्युदये, ततश्च यदभ्युदयेऽपि भोगांस्त्वं जहासि तदाश्चर्यं वर्तते, तथा तस्यागतश्च 'असतः' अविद्यमानान् कामान् 'प्रार्थयसे' अभिलषसि यत्तदप्याश्चर्यमिति सम्बन्धः, अथवाऽधिकस्तवात्र दोषः, 'सङ्कल्पेन' उत्तरोत्तरप्राप्तभोगाभिलाषरूपेण विकल्पेन 'विहन्यसे' विविधं बाध्यसे, एवंविधसङ्कल्पस्यापर्यवसितत्वाद्, उक्तं हि-

"अमीषां स्थूलसूक्ष्माणामिन्द्रियार्थविधायिनाम्।
शक्रादयोऽपि नो तृप्ति, विशेषाणामुपागताः॥"

यद्वा 'अच्छेरगमब्भुदए'त्ति मकारोऽलाक्षणिकः, ततश्च-आश्चर्याद्भुतयोरेकार्थत्वेऽप्युपादानमतिशयख्यापनार्थम्-अतिशयाद्भुतान् भोगान् जहासि पार्थिव! असतश्च कामान्

प्रार्थयसि यत्तत्सङ्कल्पेनैव उक्तरूपेण विहन्यसे-बाध्यसे, कथं ह्यन्यथा विवेकिनस्तवैतत् सम्भवेत् ? । अनेन च यः सद्विवेको नासौ प्रासान् विषयानप्राप्तकाङ्क्षया परिहरति, यथा ब्रह्मदत्तचक्रवर्त्यादिः, सद्विवेकश्च भवानित्यादिनोक्त्या हेतुकारणे सूचिते इति सूत्रार्थः ॥

मू. (२८०) *एयमट्ठं निसामित्ता०*

वृ. तदनु 'एय' सूत्रं प्राग्वत् ।-

मू. (२८१) *सल्लं कामा विसं कामा, कामा आसीविसोपमा ।*
कामे पत्थेमाणा, अकामा जंति दोग्गइं ॥

वृ. शलति देशान्तश्चलतीति शल्यं-शरीरान्तः प्रविष्टं लोकप्रसिद्धं शल्यमिव शल्यं, के ते ?-काम्यमानत्वात्कामाः मनोज्ञशब्दादयः, यथा हि शल्यमन्तश्चलद्विविधबाधाविधायि तथैतेऽपि, तत्त्वत एतेषामपि सदा बाधाविधायित्वात्, तथा वेवेष्टि व्याप्नोतीति विषं-तालपुटादि, विषमिव विषं कामाः, यथैव हि तदुपभुज्यमानं मधुरमित्यापातसुन्दरमिवाऽऽभाति, अथ च परिणतावतिदारुणमेवमेतेऽपि कामाः, तथा कामाः आस्यो-दंष्ट्रासासु विषयस्येत्याशीविषस्तदुपमाः, यथा ह्यमङ्गैरवलोक्यमानः स्फुरन्मणिफणाभृगित इति शोभन इव विभाव्यते, स्पर्शनादिभिरनुभूयमानश्च विनाशायैव भवति तथैतेऽपि कामाः, किं च-कामान् 'प्रार्थयमाना' अभिलषन्तोऽपिशब्दस्य लुप्तनिर्दिष्टत्वात् प्रार्थयमाना अपि 'अकामा' इष्यमाणकामाभावात् 'यान्ति' गच्छन्ति 'दुर्गतिं' दुष्टां नरकादिगतिं, तदनेन न केवलं शल्यादिवदनुभूयमाना एवामी दोषकारिणः, किन्तु प्रार्थ्यमाना अपीत्युक्तं भवति ।

तथा च-'यः सद्विवेको नासौ प्राप्तमप्राप्तकाङ्क्षया' इत्यादौ सद्विवेकत्वमनैकान्तिको हेतुः, न ह्ययमेकान्तः यथा प्राप्तमप्राप्तार्थं न परिहियते, प्राप्तस्याप्यपायहेतोः तदुच्छेदकप्राप्त्यर्थं विवेकिभिः परिहियमाणत्वाद्, अनभ्युपगतोपालम्भश्चायं, मुमुक्षूणां क्वचिदाकाङ्क्षया एवासम्भवात्, उक्तं हि-'मोक्षे भवे च सर्वत्र, निःस्पृहो मुनिसत्तमः' इति सूत्रार्थः ॥ कथं पुनः कामान् प्रार्थयमाना दुर्गतिं यान्ति ?, अत आह-

मू. (२८२) *अहे वयइ कोहेणं, माणेणं अहमा गई ।*
माया गइपडिग्घाओ, लोहाओ दुहओ भयं ॥

वृ. 'अधो' नरकगतौ 'व्रजति' गच्छति 'क्रोधेन' कोपेन, 'मानेन' अहङ्कारेण 'अधमा' नीचा गतिः, भवतीति गम्यते, 'माय'त्ति सुब्व्यत्ययात्, 'मायया' परवञ्चनात्मिकया गतेः-प्रस्तावात् सुगतेः प्रतिघातो-विनाशो गतिप्रतिघातो भवति, 'लोभाद्' गार्द्ध्यलक्षणात्, 'दुहतो'-त्ति द्विधा द्विप्रकारम्-ऐहिकं पारत्रिकं च भविष्यति अस्मादिति भयं-दुःखं, तदाशङ्कातः साध्वसं वा, कामेषु हि प्रार्थ्यमानेष्ववश्यंभावी क्रोधादिसम्भवः, स चेदृग् इति कथं न तत्प्रार्थनातो दुर्गतिगमनमित्यभिप्रायः । यद्वा-सर्वमपि यदिन्द्रियोक्तं तत् कषायानुपातीति तद्विपाकानुवर्णनमिदमिति सूत्रार्थः ॥ एवं बहुभिरप्युपायैस्तस्मिन्नृषौ क्षोभयितुमशक्तः किमकरोदित्याह-

मू. (२८३) *अवउज्झिऊण माहणरुवं विउरुव्विऊण इंदत्तं ।*
वंदति अभित्थुणंतो इमाहि महुराहि वग्गूहिं ॥

वृ. 'अवउज्झिय'त्ति अपोह्य त्यक्त्वा 'ब्राह्मणरूपं' श्रिग्वर्णवेषं 'विउरुव्विऊणं'ति विकृत्य

'इन्द्रत्वम्' उत्तरवैक्रियरूपमिन्द्रस्वभावं 'वन्दते' अनेकार्थत्वात् प्रणमति 'अभिष्टुवन्' अभिमुख्येन स्तुतिं कुर्वन्, 'आभिः' अनन्तरं वक्ष्यमाणाभिः 'मधुराभिः' श्रुतिसुखाभिः 'वग्गूहि'ति आर्षत्वाद्वाग्भिः-वाणीभिः, तद्यथा-

मू. (२८४) *अहो ते निज्जिओ कोहो, अहो माणो पराइओ।*
अहो ते निरक्किया माया, अहो लोभो वसीकओ॥

वृ. 'अहो' इति विस्मये 'ते' इति त्वया नितराम्-अतिशयेन जितः अभिभूतः निर्जितः 'क्रोधः' कोपः, यतस्त्वमनमत्यार्थिववशीकरणप्रेरणायामपि न क्षुभित इत्यभिप्रायः, तथा 'अहो' 'ते' त्वया 'मानः' अहमिति प्रत्यहेतुः 'पराजितः' अभिभूतः, यस्त्वं मन्दिरं दहति इत्याद्युक्तेऽपि कथं मयि जीवतोदमिति नाहङ्कृतिं कृतवानीति, तथा 'अहो ते नरक्किय'मिति प्राकृतत्वान्निराकृता-अपास्ता माया, यस्त्वं पुररक्षाहेतुषु प्राकाराट्टालकोच्छूलकादिषु निकृतिहेतुकेष्वामोषकोच्छेदनादिषु च न मनो निहितवान्, तथा च अहो ते लोभो 'वशीकृत' इति नियन्त्रितः, यस्त्वं हिरण्यादि वर्द्धयित्वा गच्छेति सहेतुकमभिहितोऽपीच्छाया आकाश-समत्वमेवोदाहृतवान्, अत एव,

मू. (२८५) *अहो ते अज्जवं साहु, अहो ते साहु! मद्दवं।*
अहो ते उत्तमा खंती, अहो ते मुत्ति उत्तमा॥

वृ. अहो 'ते' तव 'आजवम्' ऋजुत्वं 'साधु' शोभनम्, अहो ते साधु 'मार्दवं' मृदुत्वम्, अहो ते 'उत्तमा' प्रधाना 'क्षान्तिः' कोपोपशमलक्षणा, अहो ते 'मुक्तिः' निर्लोभता उत्तमा, व्यत्ययनिर्देशस्त्वनानुपूर्व्यापि प्ररूपणाऽङ्गमितिकृत्वेति सूत्रत्रयार्थः॥ इत्थं गुणोपवर्णद्वारेणाभिष्टुत्य सम्प्रति फलोपदर्शनद्वारेण स्तुवन्नाह-

मू. (२८६) *इहंऽसि उत्तमो भंते!, पेच्चा होहिसि उत्तमो।*
लोगुत्तमुत्तमं ठाणं, सिद्धिं गच्छसि नीरओ॥

वृ. 'इह' अस्मिन् जन्मनि 'असि' भवसि 'उत्तमः' प्रधानः, उत्तमगुणान्वितत्वात्, 'भंते'ति पूज्याभिधानं 'प्रेत्य' परलोके भविष्यसि उत्तमः, कथमित्याह-लोकस्य-चतुर्दशरज्ज्वात्मकस्य 'उत्तमम्' उपरिवर्ति लोकोत्तमम् 'उत्तमं' देवलोकाद्यपेक्षया प्रधानम्, अथवा 'लोगोत्तम-मुत्तमं'ति मकारोऽलाक्षणिकः, ततो लोकस्य लोके वा उत्तमोत्तमम्-अतिशयप्रधानं लोकोत्त-मोत्तमं, तिष्ठत्यस्मिन् नातः परं गच्छतीति स्थानं, किं तदित्याह-'सिद्धिं' मुक्तिं 'गच्छति'ति सूत्रत्वाद्गमिष्यसि, निर्गतो रजसः-कर्मण इति नीरजा इति सूत्रार्थः॥ उपसंहारमाह-

मू. (२८७) *एवं अभित्थुणंतो रायरिसिं उत्तमाए सद्धाए।*
पायाहिणं करेंतो पुनो पुनो वंदती सक्को॥

वृ. 'एवम्' अमुनोक्तन्यायेन अभिष्टुवन् 'राजर्षिम्' उक्तरूपं, प्रक्रमान्नमिम्, 'उत्तमया' प्रधानया 'श्रद्धया' भक्त्या 'पायाहिण'न्ति प्रदक्षिणां 'कुर्वन्' विदधत् पुनः पुनः 'वन्दते' प्रणमति 'शक्रः' पुरन्दर इति सूत्रार्थः॥ अनन्तरं च यत् कृतवांस्तदाह-

मू. (२८८) *तो वंदिऊण पाए चक्कंकुसलक्खिए मुनिवरस्स।*
आगासेणुप्पतिओ ललियचवलकुंडलतिरीडी॥

वृ. 'ततः' तदनन्तरं, पाठान्तरतश्च 'स' इति शक्रो वन्दित्वा 'पादौ' चरणौ, चक्रं चाङ्कुशश्च प्रतीतावेव, तत्प्रधानानि लक्षणानि ययोस्तौ तथा, मुनिवरस्य नमिनाम्न इति प्रक्रमः, ततः 'आकाशेन' नभसा उदिति-ऊर्ध्वं देवलोकाभिमुखं पतितो गत उत्पतितः, ललिते च ते सविलासतया चपले च चञ्चलतया ललितचपले तथाविधे कुण्डले कर्णाभरणे यस्यासौ ललितचपलकुण्डलः, स चासौ किरीटी च-मुकुटवान् ललितचपलकुण्डलकिरीटी इति सूत्रार्थः ॥ स एवंविधः स्वयमिन्द्रेणाभिष्टूयमानः किमुत्कर्षं मनस्यासवान् उत नेत्याह-

मू. (२८९) *नमी नमेइ अप्पाणं, सक्खं सक्केण चोइओ।*
वाइऊण गेहं वइदेही, सामन्ने पज्जुवट्ठिओ॥

वृ. नमिर्नमयति-भावतः प्रह्वीभवन्तमात्मानं स्वतत्त्वभावनया विशेषतः प्रणमयति, न तृप्तिमक्तां नयति, तत्कालापेक्षया लट्, कथंभूतः सन्?-'साक्षात्' प्रत्यक्षतामुपगम्य 'शक्रेण' इन्द्रेण 'चोइतो'त्ति प्रेरितः 'त्यक्त्वा' अपहाय 'गेहं' गृहं 'वइदेही'त्ति सूत्रत्वाद्विदेहा नाम जनपदः सोऽस्यास्तीति विदेही विदेहजनपदाधिपो, न त्वन्य एव कश्चिदिति भावः, यद्वा-विदेहेषु भवा वैदेही-मिथिला पुरी, सुब्व्यत्ययात्तां च त्यक्त्वेति सम्बन्धनीयं, 'श्रामण्ये' श्रमणभावे 'पर्युपस्थितः' उद्यतः, अभूदिति शेषः, यद्वा-नमिर्नमयति संयमं प्रति प्रवणीकरोत्यात्मानं, कीदृशः?-शक्रेण प्रेरितः कथं?-साक्षात् स्वयं, न त्वन्यपार्श्वप्रहितसन्देशकादिना, श्रामण्ये पर्युपस्थितः, न तु तत्प्रेरणातोऽपि धर्मं प्रति विप्लुतोऽभूदितिभाव इति सूत्रार्थः ॥ किमेष एवैवंविधः?, उतान्येऽपीत्याह-

मू. (२९०) *एवं करिंति संबुद्धा, पंडिया पवियक्खणा।*
विणियट्टंति भोगेसु, जहा से नमिरायरिसि॥ त्तिबेमि

वृ. 'एवम्' इति यथैतेन नमिना निश्चलत्वं कृतं तथाऽन्येऽपि कुर्वन्ति, उपलक्षणत्वादकार्षुः करिष्यन्ति च, न त्वयमेव, निदर्शनतयैवास्योपात्तत्वात्, कीदृशाः पुनरन्येऽप्येवं कुर्वन्ति?-'सम्बुद्धाः' मिथ्यात्वापगमतोऽवगतजीवाजीवादितत्त्वाः 'पण्डिताः' सुनिश्चितशास्त्रार्थाः 'प्रविचक्षणाः' अभ्यासातिशयतः क्रियां प्रति प्रावीण्यवन्तः तथाविधाश्च सन्तः किं विदधति?-'विनिवर्तन्ते' विशेषेण तदासेवनादुपरमन्ति, केभ्यः?-'भोगेसु'त्ति भोगेभ्यः, किंवत्?-यथा स 'नमिः' नमिराजर्षिः निश्चलो भूत्वा तेभ्यो निवृत्त इति, यद्वोपदेशपरमेतत्, यत एवं कुर्वन्ति सम्बुद्धाः पण्डिताः प्रविचक्षणाः एवमिति कथमित्याह-भोगेभ्यो विनिवर्तन्ते, विशेषेण-अत्यन्तनिश्चलतालक्षणेन निवर्तन्ते भोगेभ्यो, यथा स 'नमिः' नमिनामा राजर्षिः, ततो भवद्भिरप्येवंविधैरित्थमेव विधेयमिति सूत्रार्थः ॥

'इतिः' परिसमाप्तौ 'ब्रवीमि' इति पूर्ववत्। नयाश्च प्राग्वदिति ॥

अध्ययनं ९ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
नवममध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययन १० द्रुमपत्रके

वृ. व्याख्यातं नमिप्रव्रज्याख्यं नवममध्ययनम्, अधुना दशममध्ययनमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने धर्मचरणं प्रति निष्कम्पत्वमुक्तं, तच्चानुशासनादेव प्रायो भवति, न च तदुपमां विना स्पष्टमिति प्रथमतः उपमाद्वारेणानुशासनाभिधायकमिदमध्ययनम्, अनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वार चतुष्टयमुपदर्श्यते, यावन्नामनिष्पन्ननिक्षेपो द्रुमपत्रकमिति द्विपदं ना, अतो द्रुमस्य पत्रस्य च निक्षेपमाह-

नि.[२८०] निक्खेवो उ दुमंमि चउव्विहो० ॥

नि.[२८१] जाणग सरीरमविए०

नि.[२८२] दुमयाउनामगोयं वेयंतो भावओ दुमो होइ।
एमेव य पत्तस्सवि निक्खेवो चउव्विहो होइ ॥

वृ. 'निक्षेपः' न्यासः 'तुः' पूरणे 'द्रुमे' द्रुमविषयः 'चतुर्विधः' नामादिः, द्विविधो भवति द्रव्ये आगमतश्च नोआगमतश्च, स त्रिविधः-ज्ञशरीरभव्यशरीरद्रुमस्तद्व्यतिरिक्तश्च, स पुनस्त्रिविधः-एकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्च, द्रुमायुर्नामगोत्रं वेदयन् भावतो द्रुमो भवति, एवमेव च पत्रस्यापि चतुर्विधो भवति निक्षेप इति गाथात्रयाक्षरार्थः ॥ भावार्थस्तु पूर्ववत्, अन्वर्थनामतामस्यादर्शयन्नाह-

नि.[२८३] दुमपत्तेणोवम्मं अहाठिईए उवक्कमेणं च।
इत्थ कयं आइंमी तो तं दुमपत्तमज्झयणं ॥

वृ. द्रुमो-वृक्षः तस्य पर्णं-पत्रं तेनौपम्यम्-उपमा, प्रक्रमादायुषः, केन पुनर्गुणेनौपम्यमित्याह-'यथास्थित्या' स्वकालपरिपाकतः पातरूपया, तथा उपक्रमणं-दीर्घकालभावन्याः स्थितेः स्वल्पकालतोऽऽपादनमुपक्रमः, कोऽर्थः ?-पाकादारत एव वातादिनाऽवस्थिति-विनाशनं, तेन चात्राध्ययने 'कृतं' विहितम् 'आदौ' प्रथमं यस्मात् ततः द्रुमपत्रमित्यध्ययनमिदम्, उच्यते इति शेषः। यथा चास्य समुत्थानं तथा दर्शयंस्त्रयोविंशतिमङ्कयं गाथाकदम्बकमाह-

नि.[२८४] मगहापुरनयराओ वीरेण विसज्जणं तु सीसाणं।
सालमहासालाणं पिट्ठीचंपं च आगमनं ॥

नि.[२८५] पवज्जा गागिलिस्स य नाणस्स य उप्पया उ तिण्हंपि।
आगमनं चंपपुरिं वीरस्स अवंदनं तेसिं ॥

नि.[२८६] चंपाइ पुन्नभद्दंमि चेइए नायओ पहिअकित्ती।
आमंतेउं समणे कहेइ भयवं महावीरो ॥

नि.[२८७] अट्ठविहकम्ममहणस्स तस्स पगईविसुद्धलेसस्स।
अट्ठावए नगवरे निसोहिए निट्ठिअट्ठस्स ॥

नि.[२८८] उसभस्स भरहपिउणो तेलुक्कपयासनिग्गयजसस्स।
जो आरोढुं वंदइ चरिमसरीरो अ सो बाहू ॥

नि.[२८९] साहुं संवासेइ अ असाहुं न किर संवसावेइ।

अह सिद्धपव्वओ सो मासे वेअड्ढसिहरम्मि ॥

नि.[२९०] चरिमसरीरो साहू आरुहइ नगवरं न अन्नोनि ।
एयं तु उदाहरणं कामी अ तहिं जिनवरिंदो ॥

नि.[२९१] सोऊण तं भगवओ गच्छइ तहिं गोअमो पहिअकित्ती ।
आरुहइ तं नगवरं पडिमाओ वंदइ जिनाणं ॥

नि.[२९२] अह आगओ सपरिसो सव्विड्ढीए तहिं तु वेसमनो ।
वंदित्तु चेइयाइं अह वंदइ गोअमं भयवं ॥

नि.[२९३] अह पुंडरीअनायं कहेइ तहि गोयमो पहियकित्ती ।
दसमस्स य पारणए पव्वावेसीअ कोडिन्नं ॥

नि.[२९४] तस्स य वेसमणस्सा परिसाए सुरवरो पयणुकम्मो ।
तं पुंडरीयनायं गोयमकहिअं निसामेइ ॥

नि.[२९५] चित्तूण पुंडरीअं वग्गुविमाणओ सो चुओ संतो ।
तंबुवने धनगिरिस्स अज्जसुनंदासुओ जाओ ॥

नि.[२९६] दिन्ने कोडिन्ने या सेवाले चेव होइ तइए य ।
इक्किक्कस्स य तेसिं परिवारो पंच पंच सया ॥

नि.[२९७] हेट्ठिल्लाण चउत्थं मज्झिल्लाणं तु होइ छट्ठं तु ।
अट्ठममुवरिल्लाणं आहारो तेसिमो होइ ॥

नि.[२९८] कंदाई सच्चित्तो हिट्ठिल्लाणं तु होइ आहारो ।
बीआणं अच्चित्तो तइआणं सुक्कसेवालो ॥

नि.[२९९] तं पासिऊण इड्ढिं गोयमरिसिणो तओ तिवग्गावि ।
अनगारा पव्वइआ सप्परिवारा विगयमोहा ॥

नि.[३००] एगस्स खीरमो अणहेऊ नाणुप्पया मुणेयव्वा ।
एगस्स परिसादंसणेण एगस्सय य जिनंमि ॥

नि.[३०१] केवलिपरिसं तत्तो वच्चंता गोयमेण भणिआ य ।
इउ एव वंदह जिनं कयकिच्च जिनेन सो भणिओ ॥

नि.[३०२] सोऊण तं अरहओ हियएणं गोयमो ऽवि चिंतेइ ।
नाणं मे न उपज्जइ भणिओ य जिनेन सो ताहे ॥

नि.[३०३] चिरसंसट्ठं चिरपरिचिअं चिरमणुगयं च मे जाण ।
देहस्स य भेयंमि य दुन्निवि तुल्ला भविस्सामो ॥

नि.[३०४] जह मन्ने एअमट्ठं अम्हे जाणामु खीणसंसारा ।
तह मन्ने एअमट्ठं विमानवासीवि जाणंति ॥

नि.[३०५] सोऊण तं भगवओ मिच्छायारस्स सो उवट्ठाइ ।
तत्तीसाए भयवं सीसाणं देइ अनुसिट्ठिं ॥

वृ. एतच्चाक्षरार्थं प्रति स्पष्टमेव, नवरं मगधापुरनगरं-राजगृहं, तस्यैव तत्कालापेक्षया

मगधासु प्रधानपुरत्वादविद्यमानकरत्वाच्च, तथा 'नायओ पहियकित्ति'त्ति नायकः-सकलजगत्स्वामी ज्ञात एव वा ज्ञातकः-उदारक्षत्रियः, न्याय्यतो वा प्रथिमा सकलजगत्प्रत्याख्याता कीर्तिर्यस्य स तथा, प्रकृत्या-स्वभावेन विशुद्धा-अत्यन्तनिर्मला लेश्या शुक्ललेश्या यस्य स तथा, 'निसीहिय'त्ति निषिध्यन्ते-निराक्रियन्ते अस्यां कर्माणीति नैषेधिकी निर्वाणभूमिः, 'कृत्यल्युटोऽन्यत्रापि' इत्यपरिग्रहणबलात् ल्युट्, निष्ठितार्थस्य समाप्तसकलकृतस्य यद्वा निषेधे-सकलकर्मनिराकरणलक्षणे भवा नैषेधिकी-मुक्तिगतिस्तया निष्ठितार्थो यस्तस्य ऋषभस्य ऋषभनाम्नः, स चान्योऽपि सम्भवति अत आह-भरतपितुरिति, 'वन्दते' स्तौति प्रक्रमान्नैषेधिकीं प्रतिमां वा, तथा साधुं 'स'मिति भृशं वासयति संलग्नयति, कोऽर्थः ?-गर्त्ते दिवं चावस्थापयति, नोऽस्माकं संहरणादिनाऽऽनीतमपि 'किल' इति परोक्षप्रवादसूचकः, 'अथ' इत्युपन्यासे सिद्धोपलक्षितः पर्वतः सिद्धपर्वतः 'तास्थ्यात्तद्व्यपदेश' इति तदधिष्ठायकदेवताविशेष एवोक्तः, यद्वा तत्तीर्थानुभाव एवायं यदसाधोस्तत्रावस्थानमेव न सम्पद्यते,

तथा च 'चरमशरीरः साधुः आरोहती'त्यत्र पदप्रचारणेति गम्यते, 'उदाहरणं' कथनं 'कासीअ'त्ति अकार्षीद्, अनेन चैवंविधदेवप्रवादोत्थानकारणमुक्तं 'घेत्तूण पुंडरीयम्' इत्यादिना च प्रसङ्गागतं वैरस्वामिजन्मोक्तं, तथा 'तं पासिऊण इड्ढि'न्ति तामिति-प्रतीतामेव भगवति जङ्घाचारणरूपलब्धिरूपां, तथा 'तिवग्गावि'त्ति त्रयो वर्गा येषां ते त्रिवर्गाः, तेऽपि प्रक्रमादिन्नकोण्डिन्यशैवलिनस्त्रयोऽपि, नैको द्वौ वेत्यपिशब्दार्थः, 'अणगार'त्ति अविद्यमानगृहाः, ते च तापसादयोऽपि स्युरत आह-प्रकर्षेण व्रजिता-मिथ्यात्वादिभ्यो विनिर्गताः प्रव्रजिताः, तथा 'एगस्स खीरभोयणहेउ'त्ति क्षीरान्नभोजनमेव विशुद्धाध्यवसायविशेषोत्पत्तिनिबन्धनतया हेतुः-कारणं क्षीरभोजनहेतुः, मयूरव्यंसकादित्वात् समासः, तमाश्रित्येति शेषः, 'नाणुप्पय'त्ति ज्ञानस्योत्पादनमुत्पत् 'सम्पदादित्वात् क्विप्' ज्ञानोत्पात्,

तथा 'चिरसंसट्ठ'त्ति चिरंप्रभूतकालं संसृष्टः-स्वस्वाम्यादिसम्बन्धेन सम्बन्धो यस्तं, 'चिरपरिचितः' सहवासनादिना स पूर्वो यस्तम्, उभयत्र विस्पष्टं पटुर्विस्पष्टपटुरितिवत् सह सुपेत्यत्र सुपेति योगविभागात् समासः, चिरमनुगतमभिप्रायानुवर्तिनमात्मानमिति शेषः, 'मम'त्यात्मनिर्देशः, ततः प्रभूतमोहनीयाच्छादिततया न ते ज्ञानोत्पत्तिरित्यभिप्रायः 'देहस्य तु' शरीरस्य 'भेदे' विनाशे द्वावप्यावां 'तुल्यौ' मुक्तिपदप्राप्त्या समौ 'भविष्यावः' इति मा त्वमधृतिं कृथा इति भावः, 'यथा' येन प्रकारेण यथा 'मन्ने'त्ति आर्षत्वात् पुरुषव्यत्ययः, ततो मन्यसे त्वम् एनं ज्ञानावासिलक्षणम् 'अर्थं' वस्तु 'वयं' जानीमः अवबुध्यामहे, किंविशिष्टाः सन्तः ?, इत्याह क्षीणः पुनर्भवावासावतः संसारो येषां ते क्षीणसंसाराः, तेन प्रकारेण तथा, व्यवच्छेदफलत्वात् तथैव, किमित्याह-'मन्ने'त्ति प्राग्वत्, मन्यसे 'एनमर्थम्' अनन्तरोक्तं 'विमानवासिनोऽपि' देवा 'जानन्ति' अवबुध्यन्ते, एवं च यथा क्षीणसंसारा जानन्ति तथा विमानवासिनोऽपि जानन्तीत्याशयवतः क्षीणसंसारिणां च परिज्ञानं प्रति साम्यमभिमतमित्यहो तव विवेकितेत्युपालब्धः।

तथा 'जाणगपुच्छं'ति ज्ञायकपृच्छया पृच्छति, न हि तस्य भगवतः समस्तज्ञेयविषयविज्ञानचक्षुषः क्वचिदविज्ञानमस्ति, किन्तु गौतमं प्रतिबोधयन्नित्थमुपालभते, तथा यथा किम् ?-दीव्यन्ति-क्रीडन्ति देवाः तेषां वचनं वचो 'गिज्झं'ति ग्राह्यमुपादेयम्, 'आतो' त्ति आर्षत्वादाहो-

स्वित्, जिनानां वरः-प्रधानः जिनवरः य उत्पन्नकेवलास्तीर्थकृतस्तेषां ?, तदनेनैकमस्मत्परिज्ञानस्य देवपरिज्ञानस्य च साम्यमुपादनम्, अपरं तु साम्ये सत्यपि 'देहस्स य भेयंमी दोण्णिवि तुल्ला भविस्सामो'त्ति अस्मद्वचनतः शतशोऽपि श्रुतान्न विनिश्चयमपि विहितवान्, देव वचनात्तु सकृदप्याकर्णितात् तथेति प्रतिपद्याष्टापदं प्रति प्रयात इत्यहो ते मोहविजृम्भितमित्युक्तं भवति।

श्रुत्वा तदुपालम्भवचो भगवतः सम्बन्धि 'मिच्छाचारस्स'त्ति आर्षत्वान्मिथ्याचारात्-उक्तरूपाद्गम्यमानत्वात् प्रतिक्रमितुम् 'उपतिष्ठति' उद्यच्छति। 'तन्निश्रये'ति गौतमनिश्रया 'अनुशिष्टिं' शिक्षाम् एवद्भावार्थस्तु सम्प्रदायादवसेयः, स चायम्-

तेणं कालेणं तेणं समएणं पिट्ठीचंपा नाम नयरी, तत्थ सालो राया, महासालो जुवराया. तेसिं, सालमहासालाणं भगिनी जसवती, तीसे पिढरो भत्तारो, जसवतीए अत्तजा पिढरपुत्तो गागलीनाम कुमारो। तत्थ वद्धमाणसामी समोसढो सुभूमिभागे उज्जाने, सालो निग्गतो, धम्मं सुच्चा भणति-जं नवरं महासालं रज्जे ठावेमि, सो अतिगतो, तेन आपुच्छितो महासालो भणति-अहंपि संसारभउव्विग्गो जहा तुब्भे इहं मेहीपमाणं तहा पव्वइयस्सवि, ताहे गागलिं कंपिल्लातो सद्दावेऊण पट्टो बद्धो अभिसित्तो य गया जातो। तस्स माया कंपिल्लपुरे नयरे दिन्निल्लिया पिढरस्स, तेन ततो सद्दावितो, सो पुण तेसिं दो मिब्बियातो कारेति, जाव ते पव्वतिया, सा भगिनी समणोवासिया जाता, तए णं ते समणा होंतगा, एक्कारस अंगाइं अहिज्जिया। तते णं समणे भगवं महावीरे बहिया जनवयविहारं विहरति।

तेणं कालेणं तेणं समएणं रायगिहं नाम नयरं, तत्थ सामी समोसढो, ताहे सामी पुनोऽवि निग्गतो चंपं पहावितो, ताहे सालमहासाला सामिं आपुच्छंतिअम्हे पिट्ठीचंपं वच्चामो जदि नाम ताण कोवि बुज्झेज्जा, सम्मत्तं लभेज्जा, सामीवि जाणति-जहा ताणि संबुज्झिहिंति, ताहे सामिणा गोयमसामी से विइज्जओ दिन्नो, गोयमसामी पिट्ठीचंपं गतो, तत्थ समोसरणं, गागली पिढरो जसवती य निग्गयाणि, भगवं धम्मं कहेइ, ताणि धम्मं सोऊण संविग्गाणि, ताधे गागली भणति-जं नवरं अम्मापियरो आपुच्छामि, जेट्ठपुत्तं च रज्जे ठवेमि, ताणि आपुच्छियाणि भणंति-जइ तुमं संसारभउव्विग्गो अम्हेवि, ताधे सो पुत्तं रज्जे ठावित्ता अम्मापितीहिं समं पव्वइतो, गोयमसामी ताणि घेत्तूण चंपं वच्चइ। तेसिं सालमहासालाणं पंथं वच्चंताणं हरिसो जाओ-जहा संसारं उत्तारियाणि, एवं च तेसिं सुहेणं अज्झवसानेनं केवलनाणं उप्पन्नं, इयरेसिंपि चिंता जाया-जहा एएहिं अम्हे रज्जे ठावियाणि संसारातो य मोइयाणि, एवं चिंतंताणं सुभेणं अज्झवसानेणं तिण्हंपि केवलनाणं उप्पन्नं।

एवं तानि उप्पन्ननाणाणि चंपं गयाणि, सामिं पायाहिणं करेमाणाणि तित्थं पणमिऊण केवलिपरिसं पहावियाणि, गोयमसामीवि भगवं वंदिऊण तिक्खुत्तो पयाहिणीकाऊण पाएसु पडितो, उट्ठिओ भणति-कहिं वच्चह ?, एह तित्थयरं वंदह, ताधे सामी भणइ-मा गोयमा! केवली आसाएहि, ताहे आउट्टो खामेति, संवेगं च गतो। तत्थ गोयमसामिस्स संका जाया-नाहं न सिज्झिस्सामित्ति, एवं गोयमसामीवि चिंतेति। इओ य देवाण संलावो वट्टइ-जो अट्ठावयं विलग्गति चेइयाणि य वंदति धरणिगोयरो सो तेन भवग्गहनेणं सिज्झइ, ताधे सामी तस्स चित्तं जाणति तावमाण य संबोहणयं, एयस्सवि थिरता भविस्सतित्ति दोवि कयाणि भविस्संति,

एयम्सवि पव्वतो तेवि संवुज्झिस्संति नि, सो वि सामि आपुच्छइ, अट्ठावयं जामिनि, तत्थ भगवया मणियं -वच्च अट्ठापयं चेइयाणं वंदतो, तए णं भगवं बहुतुट्ठो वंदित्ता स गतो, तत्थ य अट्ठावए जनवायं सोऊणं तिन्नि तावसा पंचपंचसयपरिवारा पत्तेयं अट्ठावयं विलग्गामोत्ति तत्थ किलिस्संति, कोडिन्नो दिन्नो सेवाली, जो कोडिन्नो सो चउत्थं २ काऊण पच्छा मूलकंदाणि आहारेति सचित्ताणि, सो पढमं मेहलं विलग्गो, दिन्नो छट्ठं छट्ठेणं काऊणं परिसडियं पंडुपत्ताणि आहारेइ, सो बीयं मेहलं विलग्गो, सेवाली अट्ठमं २ काऊण जो सेवालो सयं मइल्लतो तं आहारेइ, सो तइयं मेहलं विलग्गो, एवं तेवि ताव किलिस्संति।

भगवं च गोयमे ओरालसरीरे हुयवहतडियतरुणरविकिरणसरिसए तेएणं, तं तं इंतं पेच्छेत्ता ते एवं भणंति-एस किर एत्थ थुल्लतो समनो विलग्गिहिति?, जं अम्हे महातवस्सी सुक्का भुक्खा न तरामोत्ति विलग्गिउं, भगवं च गोयमे अंधाचारणलद्धीए लूयातंतुपुडगंपि नीसाए उप्पयति, जाव ते पलोयंति-एस आगओत्ति, एसो अदमण गतोत्ति, ताहे ते विम्हया जाया पसंसंति, अच्छंति य पलोयंता, जति ओयरति तो एयस्स खयं सीसा, एवं ते पडिच्छंता अच्छंति।

सामीवि चेइयाणि वंदित्ता उत्तरपुरच्छिमं दिसिभागे पुढविसिलापट्टए तुयट्टो असोगवरपायवस्स अहे तं रयणि वासाए उवागतो। इओ य सक्कस्स लोगपालो वेसमनो, सोवि अट्ठावयचेइयवंदतो एति, सो चेइयाणि वंदित्ता गोयमसामिं वंदित, ताहे सो धम्मं कहेति, भगवं अणगारगुणे परिकहिउं पवत्तो, अंताहारा पंताहारा एवं वन्नेति, वेसमनो चिंतेति एस भगवं एरिसे साहुगुणे वन्नेइ, अप्पणो य से इमा सरीरसुकुमारायाजारिसा देवाणवि नत्थि, भगवं तस्स आकूतं नाउं पुंडरीयं नाम अज्झयणं पन्नवेइ, जहा-पुक्खलावतीविजए पुंडरिगिणीए नगरीए नलिणिगुम्मं उज्जाणं,

तत्थ णं महापउमे नाम राया होत्था, पउमावती देवी, तस्सं दो पुत्ता-पुंडरीए कंडरीए य, सुकुमाल जाव पडिरूवा, पुंडरीए जुवराया होत्था। तेणं कालेणं तेणं समएणं थेरा भगवंतो जाव नलिनिगुम्मे उज्जाने समोसढा, महापउमे निग्गए, धम्मं सोच्चा भणति-जं नवरं देवानुप्पिया। पुंडरीयं कुमारं रज्जे ठवेमि, अहासुहं मा पडिबंधं करेहि, एवं जाव पुंडरीए राया जाए जाव विहरइ। तते णं से कंडरीए कुमारे जाए। तए णं से महापउमे राया पुंडरीयं रायं आपुच्छति-तए णं से पुंडरीए सिबियं नीनेइ, जाव पव्वतिते, नवरं चोद्दसपुव्वाइं अहिज्जति, बहूहिं छट्ठट्ठममहातवोवहाणेहिं बहूणि वासाणि सामन्नं पालिऊणं मासियाए संलेहणाए सट्ठिं भत्ताइं झोसित्ता जाव सिद्धे।

अन्नया य ते थेरा पुव्वाणुपुव्विं जाव पुंडरिगिणीए समोसढा, परिसा निग्गया, तए णं से पुंडरीए राया कण्डरीएणं जुवरन्ना सद्धिं इमीसे कहाए लद्धट्ठे समाणे हट्ठे जाव गए, धम्मकहा, जाव से पुंडरीए सावगधम्मं पडिवन्ने, जाव पडिगए सावए जाए। तए णं से कंडरीए जुवराया थेराणं धम्मं सोच्चा हट्ठे जाव जहेयं तुब्भे वदह,जं नवरं देवाणुप्पिया! पुंडरीयं रायं आपुच्छामि, तए णं जाव पव्वयामि, अहासुहं पव्वयह। तते णं से कंडरीए जाव थेरे नमंसति २ थेराणं अंतितातो पडिनिक्खमति २ त्ता तमेव चाउघंटं आसरहं दुरूहति, जाव पच्चोरुहति, जेणेव पुंडरीए राया तेनेव उवागच्छति, करयल जावपुंडरीयं रायं एवं वयासी -एवं खलु मए देवानु

प्पिया। थेराणं अंतिए जाव धम्मे निसंते, से य धम्मे इच्छिए पडिच्छिए अभिरुइए, तए णं अहं देवानुप्पिया ! संसारभउव्विग्गे भीए जम्मणमरणाणं इच्छामि णं तुज्झेहिं अणुन्नाए समाणे थेराणं अंतिए जाव पव्वतित्तएत्ति।

तए णं से पुंडरीए राया एवं वयासी-मा णं तुमं देवानुप्पिया। इदानिं थेराणं अंतिए जाव पव्वयाहि, अहन्नं तुमं महया २ रायाभिसेएणं अभिसिंचिस्सामि, तए णं से कंडरीए पुंडरियस्स रन्नो एयमट्ठं नो आढाति नो परिजाणाति तुसिणीए संचिट्ठइ, तए णं से कंडरीए पुंडरीए दोच्चंपि तच्चंपि एवं वयासी -इच्छामि णं देवानुप्पिया। जाव पव्वइत्तएत्ति।

तए णं से पुंडरीए राया कंडरीयं कुमारं जाहे नो संचाएइ विसयानुलोमाहिं बहूहिं आघवणाहि य पन्नवणाहि य सन्नवणाहि य विन्नवणाहि य आघवित्तए वा ४ ताहे विसयपडिकूलाहिं संजमभउव्वेगकरीहिं पन्नवणाहि य पन्नवेमाणे २ एवं वयासी -एवं खलु जाया! निग्गंथे पावयणे सच्चे अनुत्तरे केवलिए एवं जहा पडिक्कमणे जाव सव्वदुक्खाण अंतं करेंति, किंतु अहीव एगंतदिट्ठीए खुरो इव एगंतधाराए लोहमया वा जवा चावेयव्वा वालुयाकवले इव निस्साए गंगा वा महानई पडिसोयगमणाए महासमुद्दे इव भुयाहिं दुरुत्तरेहिं तिक्खं चंकमियव्वं गरुयं लंबियव्वं असिधारं च तवं चरियव्वं, नो य खलं कप्पइ जाता! समणाणं निग्गंथाणं पाणाइवाए वा जाव मिच्छादंसणसल्लेति वा १८ आहाकम्मेति वा उद्देसेति वा मिस्सजाए वा अज्झोयरए पूइए कीए पामिच्चे अच्छेज्जे अनिसिट्ठे अभिहडे वा ठइए वा कंतारभत्तए इ वा दुब्भिक्खभत्तेइ वा गिलाणभत्ते इ वा पाहुणगभत्तेत्ति वा सिज्जातरपिंडे इ वा रायपिंडे इ वा मूलभोयणे इ वा कन्दभोयणे इ वा फलभोयणे इ वा बीयभोयणे इ वा हरियभोयणे इ वा भोत्तए वा पायए वा, तुमं च णं जाया! सुहसमुचिते नालं सीतं नालं उण्हं नालं खुहा नालं पिवासा नालं चोरा नालं बाला नालं दंसा नालं मसगा नालं वातियपित्तियसिंभियसन्निवाइयविविहे रोगायंके उच्चावए वा गामकंटते, वा बावीसं परीसहोवसग्गे उदिन्ने सम्मं अहियासित्तएत्ति, तं नो खलु जाता! अम्हे इच्छामो तुज्झं खणमवि विप्पओगं, तं अच्छाहि ताव जाया! अणुभवाहि रज्जसिरिं, पच्छा पव्वहिसि। तए णं से कंडरीए एवं वयासी-

तहेव णं देवानुप्पिया! जन्नं तुज्झे वयह, किं पुन देवानुप्पिया! निग्गंथे पावयणे कीवाणं कायराणं कापुरिसाणं इहलोयपडिबद्धाणं परलोगपरंमुहाणं विसयतिसियाणं दुरनुचरे पागयजणस्स, धीरस्स निच्छियस्स ववसियस्स नो खलु इत्थं किंचि दुक्करकरणाए, तं इच्छामि णं देवानुप्पिया! जाव पव्वतित्तएत्ति। तए णं तं कंडरीयं पुंडरीए राया जाहे नो संचाएति बहूहिं आघवणाहि य ४ आघवित्तए वा ४ ताधे अकामए चेव निक्खमणं अणुमन्नित्था।

तए णं से पुंडरीए कोडुंबियपुरिसे सद्दावेइ २ एवं वयासी-जहा महामइग्घं महारिहं निक्खमणमहिमं करेह, जाव पव्वतितो। तओ सामाइयमाइयाइं एक्कारस अंगाइं अहिज्जयाइं, बहूहिं चउत्थच्छट्ठट्ठमाईहिं तवोवहाणेहिं जाव विहरइ। अन्नया तस्स कंडरीयस्स अंतेहि य पंतेहि य जाव रोगायंके पाउब्भूए जाव दाहवक्कंतीए यावि विहरति। तते णं ते थेरा भगवंतो अन्नया कयाइं पुव्वानुपुव्विं चरमाणा गामानुगामं विहरमाणा पुंडरिगिणीए नलिनिवने समोसढा, तए णं से पुंडरीए राया इमीसे कहाए लद्धट्ठे समाणे जाव पज्जुवासइ, पत्थुया धम्मकहा भगवया,

तते णं से पुंडरीए राया धम्मं सोच्चा जेणेव कंडरीए अनगारे तेनेव उवागच्छइ २ ता कंडरीयं वंदइ नमंसइ २ कंडरीयस्स सरीरं सव्वाबाहं सरुयं पासति २ जेणेव थेरा तेनेव उवागच्छइ, थेरे वंदति २ एवं वयासी अहं णं भंते! कंडरीयस्स अनगारस्स अहापवत्तेहिं तेगिच्छएहिं फासुय-एसणिज्जेहिं अहापवत्तेहिं ओसहभेसज्जपत्तपाणेहिं तिगिच्छं आउंटामि, तुब्भे णं भंते! मम जाणसालासु समोसरह, तते णं थेरागं पुंडरीयस्स रन्नो एयमट्ठं पडिसुणेंति २ जाव जाणसालासु विहरंति।

तए णं से पुंडरीए कंडरीयस्स तिगिच्छं आउंटेइ, तए णं तं मणुन्नं असनं ४ आहारेंतस्स समाणस्स से रोगायंके खिप्पामेव उवसंते हट्ठे जाए आरोग्ग बलियसरीरे, तओ रोगायंकाओ मुच्छिए समाणे तंसि मणुन्नंसि असने ४ मुच्छिए जाव अज्झोववन्ने विविहं य पाणगंमि, नो संचाएति बहिया अब्भुज्जएणं विहारेणं विहरित्तएणं। तते णं से पुंडरीए इमीसे कहाए लद्धट्ठे समाणे जेणेव कंडरीए तेनेव उवागच्छति २ कंडरीयं तिक्खुत्तो आयाहिणं पयाहिणं करेति २ वंदति २ एवं वयासी-धन्ने ऽसि णं तुमं देवानुप्पिया! एवं सुपन्नो ऽसि णं कयत्थे कयलक्खणे सुलद्धे णं तव देवानुप्पिया! माणुस्सए जम्मे जीवियफले, जत्तं तुमं रज्जं च जाव अंतेउरं च विच्छड्डइत्ता जाव पव्वइए, अहन्नं अहन्ने अकयपुन्ने जाव मानुस्सए भवे अनेगजाइजरामरणरोगसोगसारीरमाणसपकामदुक्खवेयणावसणसयउवद्दवाभिभूए अधुवे अनीइए असासए संज्झब्भरागसरिसे जलबुब्बुयसमाणे कुसग्गजलबिंदुसन्निहे सुमिणगदंसणोवमे विज्जु-लयाचंचले अनिच्चे सडणपडणविद्धंसणधम्मके पुव्विं वा पच्छा वा अवस्सं विप्पजहियव्वइत्ति, तहा मानुस्सयं सरीरगंपि दुक्खाययणं विविहवाहिसयसन्निकेयं अट्ठियकट्ठट्ठियं सिराण्हारु-जालओणद्धसंविनद्धं मट्टियभंडं व दुब्बलं असुइसंकिलिट्ठं अणिट्ठंपि य सव्वकालं संठप्पयं जराघुणियं जज्जरघरं व सडणपडणविद्धंसणधम्मयं पुव्विं वा पच्छा वा अवस्सविप्पजहियव्वं, कामभोगावि य णं मानुस्सगा असुई असासया वंतासवा एवं पित्ता० खेला० सुक्का० सोणियासवा उच्चारपासवणखेलसिंघाणवंतपित्तसुक्कसोणियसमुब्भवा अमणुन्नपु (दु) रूयमुत्तपूतिपुरीसपुन्ना मयगंधुस्सास असुभनिस्सासउव्वीयणगा बीभच्छा अप्पकालिया लहुस्सगा कलमलाहिया सुदुक्खा बहुजनसाहरणा परिकिलेसकिच्छदुक्खसज्झा बहुजननिसेविया सदा साधुगरहिनिज्जा अनंतसंसारवड्ढणा कडुगफलविवागा चुडुलिव्व अमुंचमाणा दुक्खाणुबंधिणो सिद्धिगमनविग्घा पुव्विं वा पच्छा वा अवस्स विप्पजहियव्वा भवंति, जे ऽवि य णं रज्जे हिरन्ने सुवन्ने य जाव सावइज्जे से ऽवि य णं अग्गिसाहिए चोरसाहिए रायसाहिए दाइयसाहिए अधुवे अनितीए असासए पुव्विं वा पच्छा वा अवस्सविप्पजहियव्वे भविस्सतित्ति, एवंविहम्मि रज्जे जाव अंतेउरे य मानुस्सएसु य कामभोगेसु मुच्छिए ४ नो संचाएमि जाव पव्वयित्तए, तं धन्ने ऽसि णं तुमं जाव सुलद्धे णं मणुयजम्मे, जं णं पव्वइए।

तते णं से कंडरीए पुंडरीएणं एवं वुत्ते तुसिणीए संचिट्ठति, ततेणं से पुंडरीए दोच्चंपि तच्चंपि एवं वयासि-धन्ने ऽसि तुमं अहं अहन्ने। तएणं से दोच्चंपि तच्चंपि एवं वुत्ते समाणे अकामए अवसंवसे लज्जाए य गारवेण य पुंडरीयरायं आपुच्छइ, थेरेहिं सद्धिं बहिया जनवयविहारं विहरई। तए णं से कंडरीए थेरेहिं सद्धिं किंचि कालं उग्गं उग्गेणं विहरित्ता तओ

पच्छा समणत्तणनिव्विन्ने समणत्तणगिलभंतस्स समणगुणागुइ जोगे थेराणं अंतियाओ सणियं २ पच्चोसक्कई, जेणेव पुंडरगिणी नयरी जेणेव पुंडरीयस्स रण्णो भवनं जेणेव असोगवनिया जेणेव असोगवरपायवे जेणेव पुढविसिलापट्टए तेणेव उवागच्छति २ जाव सिलापट्टयं दुरुहइ २ ओहयमनसंकप्पे जाव झियायति। तए णं पुंडरीयस्स अम्मधाई तत्थागच्छति, जाव तं तहा पासति २ पुंडरीयस्स साहति, से ऽवि य णं अंतेउरपरिवालसंपरिवुडे तत्थागच्छति २ तिक्खुत्तो आयाहिणपयाहिणं जाव पत्तेऽसि णं सव्व जाव तुसिणीए, तए णं पुंडरीए एवं वयासी-अट्ठो भंते ! भोगेहिं ?, हंत अट्ठो, तए णं कोडुंबियपुरिसे सद्दावेइ २ कालिकुलसेणवाधिसित्तो रायाभिसेएणं जावरज्जं पसासेमाणं विहरति।

तए णं पुंडरीए समणोवं पंचमुट्ठियं लोयं करेइ २ चाउज्जामं धम्मं पडिवज्जइ २ कंडरीयस्स आयारभंडगं सव्वसुहसमुदयंपिव गिण्हति २ इमं अभिग्गहं गिण्हति-कप्पति मे थेराणं अंतिते धम्मं पडिवज्जित्ता पच्छा आहारं आहारित्तएत्तिकट्टु थेराभिमुहे निग्गए। कंडरीयस्स उत्तं पणीयं पानाभोयणं आहारियस्स नो सम्मं परिणायं, वेयणा पाउब्भूया उज्जला विउला जाव दुरहियासा, तए णं से रज्जे य जाव अंतेउरे य मुच्छिए जाव अज्झोववन्ने अट्टदुहवसट्टे अकामए कालं किच्चा सत्तमीपुढवीए तेत्तीससागरोवमट्ठितिएसु जाए। पुंडरीएऽवि य णं थेरे पप्प तंसि अंतिते दोच्चंपि चाउज्जामे धम्मे पडिवज्जति, अट्ठमखमणपारणगंसि नं जाव आहारेई, तेन य कालाईक्कंतसीयलुक्खअरसविरसेणं अपरिणतेन वेयणा दुरहियासा जाया, तए णं से अधारनिज्जमितिकट्टु करयलपरिग्गहियं जाव अंजलिं कट्टु नमोऽत्थु णं अरहंताणं भगवंताणं जाव संपत्ताणं नमोऽत्थु णं थेराणं भगवंताणं मम धम्मायरियाणं धम्मोवएसयाणं पुव्विंपि य णं मए थेराणं अंतिते सव्वे पाणाइवाए पच्चक्खाए जावज्जीवाए जाव सव्वे अकरणिज्जे जोगे पच्चक्खाए, इदानिंपि तेसिं चेव णं भगवंताणं अंतिते जाव सव्वं पाणातिवायं जाव सव्वं अकरणिज्जं जोगं पच्चक्खामि, जंपि य मे इमं सरीरगं जाव एयंपि चरिमेहिं ऊसासनीसासेहिं वोसिरामित्ति, एवं आलोइयपडिक्कंते समाहिपत्ते कालमासे कालं किच्चा सव्वट्ठसिद्धे तेत्तीससागरोवमाऊ देवे जाए, तओ चइत्ता महाविदेहे सिज्झिहिति।

ता मा तुमं दुब्बलत्तं बलियत्तं वा गिण्हाहि, जधा सो कंडरीओ तेणं दोब्बल्लेणं अट्टदुहट्टवसट्टो सत्तमीए उववन्नो, पुंडरीतो, पंडिपुन्नगलकवोलो सव्वट्ठसिद्धे उववन्नो, एवं देवानुप्पिया ! बलितो दुब्बलो वा अकारणं, इत्थ झाणनिग्गहो कायव्वो, झाणनिग्गहो परमं पमाणं। तत्थ वेसमणो अहो भगवया आकूयं भायंति एत्थ अतीव संवेगमागोत्ति वंदित्ता पडिगतो। तत्थ वेसमणस्स एगो सामानितो देवो, तेन तं पुंडरीयज्झयणं ओगाहियं पंचसयाणि संमनं च पडिवन्नोत्ति, केई भणंति-जंभगो सो। ताहे भगवं काले चेइयाणि वंदित्ता पच्चोरुहति, ते तावसा भणंति-तुज्झे अम्हाणं आयरिया अम्हे तुब्भं सीसा, सामी भणति-तुज्झं अम्हं च तिलय-गुरू आयरिया, ते भणंति-तुब्भंवि अन्नो आयरिओ ?, ताहे सामी भगवओ गुणथवणं करेइ, ते पव्वइया, देवयाए लिंगानी ठवियाणि, ताहे ते भगवया सद्धिं वच्चंति भिक्खावेला य जाया, भगवं भणति-किं आनिज्जउ ?, ते भणंति-पायसो, भगवं च सव्वलद्धिसंपुन्नो पडिग्गहगं महुसंजुत्तस्स पायसस्स भरित्ता आगतो, ताहे भणति-परिवाडीए ठाह, ते ठिया, भगवं च

अक्खीणमहानसितो, ते भाया, ते सुट्ठुयरं आउट्टा, ताहे सयमाहारेंति, ताधे पुनरवि पट्ठविया।

तंमि च मेचालभक्खगाणं जेमंताणं चेव केवलनाणं उप्पन्नं, दिन्नम्मि वग्गे छन्नाइच्छन्नं पेच्छंताणं, कोडिन्नस्स वग्गे सामिं दट्ठूण उववन्नं। गोयमसामी पुरओ पकड्ढमानो सामिं पयाहिणीकरेंति, तेवि केवलिपरिसं पहाविया, गोयमसामी भणइ-एष सामिं वंदह, सामी भणइ-गोयमा! मा केवली आसाएहि, गोयमसामी आउट्टो मिच्छादुक्कडं करेंति। तओ गोयमसामिस्स सुट्ठुयरं अभिती जाया, ताधे सामी गोयमं भणति-किं देवाणं वयणं गिज्झं ? आतो जिनाणं ?, गोयमो भणति-जिनवयणं, तो कीस अधिति करेसि ?, ताधे सामी चत्तारि कंडे पन्नवेइ, तंजहा सुंबकंडे विदलकंडे चम्मकंडे कंबलकंडे, एवं सामीवि गोयमसामीतो केवलनाणमगतो, किं च-चिरसंसट्ठोऽसि मे गोयमा! जाव अविसेसमणाणत्ता भविस्सामो, ताधे सामी दुमपत्तयं नाम अज्झयणं पन्नवेइ।

देवो वेसमणसामानितो ततो चइत्ता णं तुंबवनसन्निवेसे धनगिरीनाम गाधावइ, सो य पव्वतिउकामो, तस्स य मायापियरो वारेंति, पच्छा सो जत्थ २ वरेंति तत्थ २ विप्परिणामेंति जहा अहं पव्वइउकामो, तस्स य तयणुरूवस्स गाहावतिस्स धूया सुनंदा नाम, सा भणइ-ममं देह, ताधे सा दिन्ना, तीसे य माया अज्जसमिता नाम पुव्वपव्वतिता, तीसे य सुनंदाए कुच्छिसिसो देवो उववन्नो, ताधे भणति धनगिरी-एस ते गब्भो विइज्जिओ होहिइ, सो सीहगिरिस्स पासे पव्वतितो, इमोवि नवण्हं मासाणं दारतो जातो ।। इत्यादि [illegible] चूर्णितोऽवसेया इत्युक्तो नामनिष्पन्ननिक्षेपकः, सम्प्रति सूत्रालापकनिष्पन्ननिक्षेपावसरः, स च सूत्रे सतीत्यतः सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

सू.(२११) दुमपत्तए पंडुयए जहा, निवडइ राइगणाण अच्चए।
एवं मनुयाण जीवियं, समयं गोयम! मा पमायए॥

सू. दुमो-वृक्षस्तस्य पत्रं-पलाशं तदेव तथाविधावस्थां प्राप्यानुकम्पितं दुमपत्रकं 'पंडुरए'त्ति आर्षत्वात् पाण्डुरकं कालपरिणामतस्तथाविधरोगादेर्वा प्राप्तवलक्षभावं, येन प्रकारेण यथा, 'निपतति' शिथिलवृन्तबन्धनत्वाद्, भ्रश्यति, प्रक्रमात् द्रुमत एव, रात्रिगणानां दिनगणाविनाभावित्वाद्दुपलक्षणत्वाद्वा रात्रिन्दिवसमूहानाम् 'अत्यये' अतिक्रमे, 'एवम्' इत्येवंप्रकारं 'मनुष्याणां' मनुजानां, शेषजीवोपलक्षणं चैतत्, 'जीवितं' आयुः, तदपि हि रात्रिन्दिवगणानामतिक्रमे यथास्थित्या स्थितिखण्डकापहारात्मके नाध्यवसायादिना जनितेनोपक्रमणेन वा जीवप्रदेशेभ्यो भ्रश्यतीत्येवमुच्यते, यतश्चैवमतोऽत्यन्तनिरुद्धः कालः समयस्तम्, अपिशब्दस्य गम्यमानत्वात्समयमप्यास्तामावलिकादि, 'गौतम' इति गौतमसगोत्रस्येन्द्रभूतेरामन्त्रणं 'मा प्रमादीः' मा प्रमादं कृथाः, शेषशिष्योपलक्षणं च गौतमग्रहणम्, उक्तं हि निर्युक्तिकृता 'तन्निग्घाए भगवं सीसाणं देइ अनुसट्ठिं', अत्र च पाण्डुरकपदाक्षिप्तं यौवनस्याप्यनित्यत्वमाविश्चिकीर्षुराह निर्युक्तिकृत्-

नि.[३०७] परियट्टिलावन्नं चलंतसंधिं पुराणतंबिच्छं।
पत्तं च वसनपत्तं कालप्पत्तं भणइ गाहं॥

नि.[३०८] जह तुब्भे तह अम्हे तुब्भे वि अ होहिहा जहा अम्हे।

अप्पाहेइ पडंतं पंडुरपत्तं किसलयाणं ॥

नि.[३०९] नवि अत्थि नवि अ होही उल्लावो किसलपंडुपत्ताणं ।
उवमा खलु एस कया भवियजनविबोहणट्ठाए ॥

वृ. परिवर्तितं-कालपरिणत्याऽन्यथाकृतं लावण्यम्-अभिनवगुणात्मन्येति परिवर्तिततलावण्यं, यतो न तस्य प्रागिव सौकुमार्यादि विद्यते, तथा चलन्तः-शिथिलीभवन्तः सन्धयो यस्मिंस्तत्तथा, अत एव 'मुयंत-वेंटागं'ति मुञ्चत्-त्यजत् सामर्थ्याद् वृक्षं वृन्तकं-पत्रबन्धनं यस्य तत् मुञ्चद्वृन्तकं, वृन्तस्य वृक्षमोचने पत्रस्य पतनमेव भवतीति पतदित्युक्तं भवति, 'पत्रं' (च) पर्ण, व्यसनम्-आपदं प्राप्तं व्यसनप्राप्तं तथा कालः-प्रक्रमात् पतनप्रस्तावस्तं प्राप्तं-गतं कालप्राप्तं 'भणति' अभिधत्ते, गीयत इति गाथा तां-छन्दोविशेषरूपां ॥ तामेवाह-

'यथा' इति सादृश्यते, ततो यथा यूयं सम्प्रति किशलयभावमनुभवथ स्निग्धादिगुणैर्गर्वमुद्वहथ अस्मानुपहसथ, तथा वयमप्यतीतदशायां, तथा यूयमपि च भविष्यथ यथा वयमिति, जीर्णभावे हि यथा वयमिदानीं विवर्णविच्छायतयोपहास्यानि, एवं यूयमपि भावीनीति, 'अप्पाहेइ'त्ति उक्तन्यायेनोपदिशति पितेव पुत्रस्य 'पतत्' भ्रश्यत् 'पाण्डुरपत्रं' जीर्णपत्रं 'किसलयानाम्' अभिनवपत्राणां । ननु किमेवं पत्रकिसलयानामुल्लापः सम्भवति ? येनेदमुच्यते,

'नेवास्ति' नैव विद्यते, नैव भविष्यति उपलक्षणत्वात् नैव भूतः, कोऽसौ ?-'उल्लापः' वचनं केषां ?-'किशलयपाण्डुपत्राणाम्' उक्तरूपाणां, आर्षत्वाच्च यलोपः, तदिह किमेवमुक्तमित्याह-'उपमा' उपमितिः, खलु एवकारोऽर्थत्वात्, ततः उपमैव, 'एषा' अनन्तरकोक्ता 'कृता' विहिता 'भवियजनविबोहणट्ठाए'त्ति प्रतीतमेव । यथेह किशलयानि पाण्डुपत्रेणानुशिष्यन्ते तथाऽन्योऽपि यौवनगर्वितोऽनुशासनीयः, तथा चैतदनुवादिना वाचकेनाभ्यधायि-

"परिभवसि किमिति लोकं जरसा परिजर्जरीकृतशरीरम् ।
अचिरात् त्वमपि भविष्यसि यौवनगर्वं किमुद्वहसि ? ॥"

तदेवं जीवितयौवनयोरनित्यत्वमवगम्य न प्रमादो विधेय इति गाथात्रयार्थयुक्तसूत्रगमार्थः ॥ पुनरायुषोऽनित्यत्वं ख्यापयितुमाह-

मू.(२१२) *कुसग्गे जह ओसबिंदुए, थोवं चिट्ठति लंबमाणए ।*
एवं मनुयाण जीवियं, समयं० ॥

वृ. कुशो-दर्भसदृशस्तृणविशेषः, तनुतरत्वाच्च तस्योपादानं, तस्याग्रं-प्रान्तस्तस्मिन्, 'यथा' इत्युपमाप्रदर्शकः, अवश्यायः-शरत्कालभावी श्लक्ष्णवर्षस्तस्य बिन्दुरेव बिन्दुकः अवश्यायबिन्दुकः, 'स्तोकम्' अल्पालामिति गम्यते, 'तिष्ठति', आस्ते, 'लम्बमानकः' मनाग् निपतद्, बद्धास्पदो हि कदाचित् कालान्तरमपि क्षमेतेत्येवं विशेष्यते, 'एवम्' इत्युक्तसदृशं 'मनुजानां' मनुष्याणां, मनुजग्रहणं च प्राग्वत्, 'जीवियं'ति जीवितं, यत एवं ततः समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थः ॥ अमुमेवार्थमुपसंहरन्नुपदेशमाह-

मू.(२१३) *इइ इत्तरियंमि आउए, जीवितए बहुपच्चवायए ।*
विहुणाहि रयं पुरेकडं, समयं० ॥

वृ. 'इति' इत्युक्तन्यायेन 'इत्वरे' अयनशीले, कोऽर्थः ?-स्वल्पकालभाविनि, एति-

उपक्रमहेतुभिः अनपवर्त्यतया यथास्थित्यैवानुभवनीयतां गच्छतीति भावः, तच्चैवं निरुपक्रमेव तस्मिन्, तथाऽनुत्क्रान्तं जीवितं जीवलक्षं यशब्दस्य गम्यमानत्वात् तस्मिंश्च, अथात सोपक्रमायुषि, बहवः-प्रभूताः प्रत्यपायाः उपघातहेतवोऽस्यवसाननिमित्तादयो यस्मिंस्तथा, अनेन चानुत्क्रम्यताहेतुरविष्कृतः, एवं चोक्तरूपद्रुमपत्रोदाहरणतः कुशाग्रजलबिन्दूदाहरणतश्च मनुजायुर्निरुपक्रमं सोपक्रमं चेत्थम्, अतोऽस्यानित्यतां मत्वा 'विधुनीहि' जीवात् पृथक् कुरु 'रजः' कर्म 'पुरेकडंति' पुरा-पूर्वं तत्कालापेक्षया कृतं-विहितं, तद्विधूननोपायमाह-समयमपि गौतम! मा प्रमादीः, पठन्ति च-एवं मणुयाण जीविए एत्तिरिए बहुपच्चवायए'त्ति सुगममेवेति सूत्रार्थः ॥ स्यात्-पुनर्मनुष्यभवावाप्ता-वुद्यंस्याम इत्याह

मू. (२१४) दुल्लहे खलु माणुसे भवे, चिरकालेनावि सव्वपाणिणं।
गाढा य विवाग कम्मुणो, समयं० ॥

वृ. 'दुर्लभो' दुरवापः, 'खलुः' विशेषणे, अकृतसुकृतानामिति विशेषं द्योतयति, 'मानुषो' मनुष्यसम्बन्धी 'भवो' जन्म 'चिरकालेनापि' प्रभूतकालेनापि, आस्तामल्पकालेनेत्यपि-शब्दार्थः, 'सर्वप्राणिनां' सर्वेषामपि जीवानां, न तु मुक्तिगमनं प्रति भव्यानामिव केषाञ्चित मनुजभवावाप्तिं प्रति सुलभत्वविशेषोऽस्ति, किमेवमत आह-'गाढा' विनाशयितुमशक्यतया दृढाः 'च' इति यस्मात्, 'विपाककर्मणो'त्ति विपाकाः-उदयाः कर्मणां-मनुष्यगतिविघाति-प्रकृतिरूपाणां, यत एवमतः समयमपि गौतम! मा प्रमादीरिति सूत्रार्थः ॥ कथं पुनर्मनुजत्वं दुर्लभं, यद्वा यदुक्तं 'सर्वप्राणिनां दुर्लभं मनुजत्व'मिति, तत्र एकेन्द्रियादिप्राणिनां तद्दुर्लभत्वं दर्शयितुकामः कायस्थितिमाह-

मू. (२१५) पुढवीकायमइगओ उक्कोसं जीवो य संवसे।
कालं संखातीयं समयं गोयम! मा पमायए ॥

वृ. पृथ्वी-कठिनरूपा सैव कायः-शरीरं पृथ्वीकायस्तमतिशयेन मृत्वा २ तदुत्पत्तिलक्षणेन गतः-प्राप्तः अतिगतः, 'उक्कोसं'ति उत्कर्षतो 'जीवः' प्राणी 'तुः' पूरणे 'संवसेत्' तद्गतयैवावस्थितिं 'कालं' सङ्ख्यातीतं, असङ्ख्यमित्यर्थः, यत एवमतः समयमपि गौतम! मा प्रमादीरिति।

मू. (२१६) आउक्कायमइ० ॥
मू. (२१७) तेउक्काय० ॥
मू. (२१८) वाउक्काय० ॥

वृ. एवमप्कायतेजस्कायवायुकायसूत्रत्रयमपि व्याख्येयं।

मू. (२१९) वणस्सइकाय० उक्कोसं०।
कालमणंतदुरंतं समयं० ॥

वृ. तथा वनस्पतिसूत्रं च, नवरं कालमनन्तमिति, अनन्तकायिकापेक्षमेतत्, प्रत्येकवनस्पतीनां कायस्थितेरसङ्ख्यातत्वात्, तथा दुष्टोऽन्तोऽस्येति दुरन्तस्तम्, इदमपि साधारणापेक्षयैव, ते ह्यत्यन्ताल्पबोधतया तत उद्धृता अपि न प्रायो विशिष्टं मानुषादिभवमाप्नुवन्ति ॥ इह च 'कालं सङ्ख्यातीत'मिति विशेषानभिधानेऽप्यसङ्ख्येयोत्सर्पिण्यवसर्पिणीमानम्, 'अनन्तमिति चानन्तोत्सर्पिण्यवसर्पिणीप्रमानमित्यवगन्तव्यं, यत आगमः

"असंखोसप्पिणिउस्सप्पिणीओ एगिंदियाण उ चउण्हं।
ता चेव उ अनंता वणस्सतीए उ बोद्धव्वा ॥"

मू.(३००) *बेइंदियकाय० उक्को०।*
कालं संखिज्जसन्नियं समयं० ॥

वृ.तथा द्वे-द्विसङ्ख्ये इन्द्रिये स्पर्शनरसनाख्ये येषां ते द्वीन्द्रियाः-कृम्यादयः, तत्कायमतिगत उत्कर्षतो जीवस्तु संवसेत् कालं सङ्ख्येयसञ्ज्ञितं-सङ्ख्यातवर्षमहस्रात्मकम्, अतः समयमपि गौतम! मा प्रमादीः ॥

मू.(३०१) *तेइंदिय० ॥*
मू.(३०२) *चउरिंदिय० ॥*

वृ. एवं त्रीन्द्रियचतुरिन्द्रियसूत्रे अपि भावनीये ॥

मू.(३०३) *पंचिंदियकायमइगओ उक्कोसं०।*
सत्तट्ठभवग्गहणे समयं० ॥

वृ. तथा पञ्च इन्द्रियाणि स्पर्शनादीनि येषां ते तथा, ते चोत्तरत्र देवनारकयोरभिधानात् मनुष्यत्वस्य दुर्लभत्वेन प्रक्रान्तत्वात्तिर्यञ्च एव गृह्यन्ते, तत्कायमतिगतः, तत्कायोत्पन्न इत्यर्थः, उत्कर्षतो जीवस्तु संवसेत् सप्त वा अष्ट वा सप्ताष्टानि तानि च तानि भवग्रहणानि च-जन्मोपादानानि सप्ताष्टभवग्रहणानि यतः अतः समयमपि गौतम! मा प्रमादीः।

मू.(३०४) *देवे नरए य गओ, उक्कोसं०।*
एक्केक्कभवग्गहणे, समयं० ॥

वृ. तथा देवान्नैरयिकांश्च अतिगत उत्कर्षतो जीवस्तु संवसेत् एकैकभवग्रहणं, ततः परमवश्यं नरेषु निर्मनुष्येषु वोत्पादात्। यद्वा 'उक्कोसंति' उत्कृष्यते तदन्येभ्य इत्युत्कर्षस्तमुत्कृष्टं कालं-त्रयस्त्रिंशत्सागरोपममानम्, 'एगेगभवग्गहणं'ति अपेक्ष्यमाणत्वादेकैकभवग्रहणमपि संवसति, अतो जीवः संवसेत् अतः समयमपि गौतम! मा प्रमादीरिति सूत्रदशकार्थः ॥ उक्तमेवार्थमुपसंहर्तुमाह-

मू.(३०५) *एवं भवसंसारे संसरति सुभासुभेहिं कम्मेहिं।*
जीवो पमायबहुलो, समयं० ॥

वृ.'एवम्' उक्तप्रकारेण पृथिव्यादिकायस्थितिलक्षणेन भवा एव-तिर्यगादिजन्मात्मकाः संस्त्रियमाणत्वात् संसारो भवसंसारस्तस्मिन्, 'संसरन्ति' पर्यटन्ति शुभानि च शुभप्रकृत्यात्मकानि अशुभानि च-अशुभप्रकृतिरूपाणि शुभाशुभानि तैः 'कर्मभिः' पृथ्वीकायादिभवनिबन्धनैः 'जीवः' प्राणी प्रमादैर्बहुलो-व्याप्तः प्रमादबहुलः, यद्वा बहून् भेदान् लातीति बहुलो मद्याद्यनेकभेदतः प्रमादो-धर्मं प्रत्यनुद्यमात्मकोयस्य स बहुलप्रमादः, सूत्रे च व्यत्ययनिर्देशः प्राग्वत्, इह चायमाशयः-यतोऽयं जीवः प्रमादबहुलः सन् शुभाशुभानि कर्माण्युपचिनोति, उपचित्य च तदनुरूपासु गतिष्वाजवंजवीभावमुपगम्य भ्राम्यति, ततो दुर्लभत्वात् पुनर्मानुषत्वस्य प्रमादमूलत्वाच्च सकलानर्थपरम्परायाः समयमपि गौतम! मा प्रमादीरिति सूत्रार्थः ॥ एवं मनुजभवदुर्लभत्वमुक्तम्, इदानीं तदवाप्तावप्युत्तरोत्तरगुणावाप्तिरतिदुरापैवेत्याह-

मू. (३०६) लद्धूणऽवि माणुसत्तणं, आयरिअत्तणं पुणरावि दुल्लहं।
बहवे दसुया मिलेक्खुया, समयं० ॥

वृ. 'लब्ध्वाऽपि' प्राप्यापि 'मानुषत्वं' इदं तावदतिदुर्लभमेव कथञ्चिन्तु लब्ध्वाऽपीत्यपिशब्दार्थः, 'आर्यत्वं' मगधोद्यद्देशोत्पत्तिलक्षणं 'पुनरपि' भूयोऽपि आकारस्त्वलाक्षणिकः, 'दुर्लभः' दुरवापं, किमित्याह-बहवः-प्रभूता दस्यवो-देशप्रत्यन्तवासिनश्चोराः 'मिलेक्खु य'त्ति म्लेच्छा-अव्यक्तवाचो, न यदुक्तमार्यैरवधार्यते, ते च शकयवनशबरादिदेशोद्भवाः, येष्ववाप्यापि मनुजत्वं जन्तुरुत्पद्यते, एते च सर्वेऽपि धर्माधर्मगम्यागम्यभक्ष्याभक्ष्यादिसकलार्यव्यवहारबहिष्कृतास्तिर्यक्प्राया एवेति समयमपि गौतम! मा प्रमादीः।

मू. (३०७) लद्धूऽवि आरियत्तणं, अहीनपंचिंदियया हु दुल्लहा।
विगलिंदियता हु दीसइ, समयं० ॥

वृ. इत्थमार्यदेशोत्पत्तिरूपमार्यत्वमतिदुर्लभं, तथाविधमपि लब्ध्वाऽपि 'आर्यत्वम्' उक्तरूपम्, अहीनानि-अविकलानि पञ्चेन्द्रियाणि-स्पर्शनादीनि यस्य स तथा तद्भावोऽहीनपञ्चेन्द्रियता 'हुः' अवधारणे भिन्नक्रमश्च, दुर्लभा एव, यद्वा हुः पुनरर्थे, अहीनपञ्चेन्द्रियता पुनर्दुर्लभा, इहैव हेतुमाह-विकलानि-रोगादिभिरुपहतानीन्द्रियाणि येषां तद्भावो विकलेन्द्रियता, हुरिति निपातोऽनेकार्थतया च बाहुल्यसूचकः, ततश्च यतो बाहुल्येन विकलेन्द्रियता दृश्यते ततो दुर्लभैवाहीनपञ्चेन्द्रियता, तथा च समयमपि गौतम! मा प्रमादीः।

मू. (३०८) अहीनपंचिंदियत्तंपि से लहे, उत्तमधम्मसुती हु दुल्लहा।
मिच्छत्तनिसेवए जने, समयं० ॥

वृ. तथा कथञ्चिदहीनपञ्चेन्द्रियतामप्युक्तन्यायतोऽतिदुर्लामपि 'स' इति जन्तुः 'लभेत' प्राप्नुयात्, तथाऽप्युत्तमः-प्रधानो यो धर्मस्तस्य 'श्रुतिः' आकर्णनात्मिका या सा तथा, 'हुः' अवधारणे भिन्नक्रमश्च, ततो दुर्लभैव, किमिति?, यतः-कुत्सितानि च तानि तीर्थानि कुतीर्थानि च-शाक्यौलूक्यादिप्ररूपितानि तानि विद्यन्ते येषामनुज्ञेयतया स्वीकृतत्वात्ते कुतीर्थनस्तान्नितरां सेवते यः स कुतीर्थिनिषेवको जनो-लोकः, कुतीर्थिनो हि यशःसत्कारश्लाघिषो यदेव प्राणिप्रियं विषयादि तदेवोपदिशन्ति, तत्तीर्थकृतामप्येवंविधत्वात्, उक्तं हि-

"सत्कारयशोलाभार्थिभिश्च मूढैरहान्यतीर्थकरैः।
अवसादितं जगदिदं प्रियाण्यपथ्यान्युपदिशद्भिः॥"

इति सुकरैव तेषां सेवा, ततस्तेषां च कुत उत्तमधर्मश्रुतिः।

मू. (३०९) लद्धूणवि उत्तमं सुइं, सद्दहणा पुणरावि दुल्लहा।
मिच्छत्त० समयं० ॥

वृ. किंच-लब्ध्वाऽपि उत्तमधर्मविषयत्वादुत्तमा तां 'श्रुतिम्' उक्तिरूपां 'श्रद्धानं' तत्त्वरुचिरूपं 'पुनरावि'त्ति पुनरपि 'दुर्लभं' दुरापम्, इहैव हेतुमाह-मिथ्याभावो मिथ्यात्वम्-अतत्त्वेऽपि तत्त्वप्रत्ययरूपं यं निषेवते यः स मिथ्यात्वनिषेवको जनो-लोकः, अनादिभवाभ्यस्ततया गुरुकर्मतया च तत्रैव प्रायः प्रवृत्तेः, यत एवमतः समयमपि गौतम? मा प्रमादीः।

मू. (३१०) धम्मंपि हु सद्दहंतया, दुल्लभया काएण फासया।

इह कामगुणेहिं मुच्छिया, समयं० ॥

वृ. अन्यच्च - 'धर्मं' प्रक्रमात् सर्वज्ञप्रणीतम् 'अपि:' भिन्नक्रमः 'हु:' वाक्यालङ्कारे, ततः 'श्रद्दधतोऽपि' कर्तुमभिधानपन्तोऽपि दुर्लभकाः कर्मणः शरीरिणः, उपलक्षणत्वान्मनसा वाचा च, 'स्पर्शका' अनुभ्रातारः, कारणमाह- 'इह' अस्मिन् जगति 'कामगुणेषु' शब्दादिषु 'मूर्च्छिता' मूढाः, गृद्धिमन्त इत्यर्थः, जन्तव इति शेषः, प्रायेण ह्यपथ्येष्वेव विषयेष्वभिष्वङ्गः प्राणिनां, यत उक्तम्

"प्रायेण हि यदपथ्यं तदेव चातुरजनप्रियं भवति ।
विषयातुरस्य जगतस्तथाऽनुकूलाः प्रिया विषयाः ॥"

पाठान्तरतः कामगुणैर्मूर्च्छिता इव मूर्च्छिताः, विलुप्तधर्मविषयचैतन्यत्वात्, यतश्चैवमतो दुरापामिमामविकलां धर्मसामग्रीमवाप्य समयमपि गौतम ! मा प्रमादीरिति सूत्रपञ्चकार्थः ॥ अन्यच्च सति शरीरे तत्सामर्थ्ये च सति धर्मस्पर्शनेति तदनित्यताऽभिधानद्वारेणाप्रमादोदोष-देशमाह-

मू. (३११)	*परिजूरइ ते सरीरयं, केसा पंडुरया (य) भवंति ते ।*
	से सोयबलं य हायइ, समयं० ॥
मू. (३१२)	*परि चक्खुबले० ॥*
मू. (३१३)	*घाणबले० ॥*
मू. (३१४)	*रसनबले० ॥*
मू. (३१५)	*फासबले० ॥*
मू. (३१६)	*सव्वबले० ॥*

वृ. 'परिजीर्यति' सर्वप्रकारं वयोहानिमनुभवति 'ते' तव शरीरमेव जरादिभिर्भिभूयमा-नतयाऽनुकम्पनीयमिति शरीरकं, यद्वा 'परिजूरइ'त्ति 'निन्दे जूर' इति प्राकृतलक्षणतात् परिनिन्दतीवाऽऽत्मानमिति गम्यते, यथा- अहमद्य कीदृशं जातमिति, किमिति ? -यतः 'केशाः' शिरसिजाः, उपलक्षणत्वात् लोमानि च पाण्डुरा एव पाण्डुरका भवन्ति, पूर्वं जननयनहारिणोऽ-न्यत्कृष्णाः सम्प्रति शुक्लतां भजन्ते 'ते' तव, पुनस्तेशब्दोपादानं भिन्नवाक्यत्वात् उपदेशाधि-कारत्वाच्चादुष्टम्, एवमुत्तरत्रापि, तथा 'से' इति तत् यत् पूर्वमासित् श्रोत्रयोः कर्णयोर्बलं-दूरादिशब्दश्रवणसामर्थ्यं श्रोत्रबलं, 'च:' समुच्चये, 'हीयते' जरातः क्षयमुपैति, यद्वा-शरीर-जीर्णताऽवस्थाभाव्येतद्वयमपि योज्यं, यथा-परिजीर्यते शरीरकं तथा च सति केशाः पाण्डुरका भवन्ति 'से' इत्यथ श्रोत्रबलं हीयते यतः ततः शरीरस्य तत्सामर्थ्यस्य चास्थिरत्वात् समयमपि गौतम ! मा प्रमादीः । एवं सूत्रपञ्चकमपि नेयं ।

नवरमिह प्रथमतः श्रोत्रोपादानं प्रधानत्वात्, प्रधानत्वं च तस्मिन् सति शेषेन्द्रियाणामवश्यं भावात् पटुतरक्षयोपशमजत्वाच्च, तथोपदेशाधिकारादुपदेशस्य च श्रोत्रग्राह्यत्वात् । तथा च 'सर्वबलं'मिति सर्वेषा - करचरणाद्यवयवानां स्वस्वव्यापारसामर्थ्यं, यद्वा सर्वेषां-मनोवाक्कायानां ध्यानाध्ययनचक्रमणादिचेष्टाविषया शक्तिरिति सूत्रपट्कार्थः ॥ जरातः शरीरशक्तिरुक्ता, सम्प्रति रोगतस्तामाह-

मू.(३१७) *अरई गंडं विसूइया, आयंका विविहा फुसंति ते।*
विहडइ विद्धंसइ ते सरीरयं, समयं० ॥

वृ. 'अरतिः' वातादिजनिताश्चित्तोद्वेगः 'गण्डं' गडु, विध्यतीव शरीरं सूचिभिरिति निमूचिका-अजीर्णविशेषः, आर्डयति सर्वात्मप्रदेशाभिव्याप्त्या तङ्कयन्ति-कृच्छ्रजीवितमात्मानं कुर्वन्तीत्यातङ्काः-सद्योघातिनो रोगविशेषाः 'विविधाः' अनेकप्रकाराः 'स्पृशन्ति' परामृशन्ति 'ते' तव, **शरीरकमिति** गम्यते, ततश्च 'विपतति' विशेषेण बलापचयादपैति 'विध्वस्यते' जीव-विप्रमुक्त च विशेषणाधःपतित ते शरीरकम्, अतः समयमपि गौतम ! मा प्रमादीः, सर्वत्र च वर्तमानानिर्देशः प्राग्वत् । केशपाण्डुरत्वादिकं यद्यपि गौतमे न सम्भवति तथापि तन्निश्रया शैषशिष्यप्रतिबोधनार्थत्वाददुष्टमिति सूत्रार्थः ॥ यथा चाप्रमादो विधेयस्तथा चाह-

मू.(३१८) *वुच्छिंद सिनेहमप्पणो, कुमुयं सारइयं व पाणियं।*
से सव्वसिणेहवज्जिए, समयं० ॥

वृ. 'वोच्छिंद'न्ति विविधैः प्रकारैरुत्-प्राबल्येन छिन्धि अपनय व्युच्छिन्धि, कम् ? 'स्नेहम्' अभिष्वङ्गं, कस्य सम्बन्धम् ? आत्मनः, किमिव ?-'कुमुदमिव' चन्द्रोद्योतवि-काश्युत्पलमिव 'सारइयं व'न्ति सूत्रत्वाच्छरदि भवं शारदं, वेत्युपमार्थौ भिन्नक्रमश्च प्राग् योजितः 'पानीयं' जलं, यथा तत् प्रथमं जलमग्नमपि जलमपहाय वर्तते तथा त्वमपि चिरसंसृष्टाचिर परिचितत्वादिभिर्मद्विषयस्नेहवशगोऽपि तमपनय, अपनीय च 'से' इत्यर्थानन्तरं सर्वस्नेहवर्जितः सन् समयमपि गौतम ! मा प्रमादीः । इह च जलमपहायैतावति सिद्धे यच्छारदशब्दोपादानं तच्छारदजलस्येव स्नेहस्याप्यतिमनोरमत्वख्यापनार्थमिति सूत्रार्थः ॥ किञ्च-

मू.(३१९) *चिच्चा न धनं न भारियं, पव्वइओ हि सि अनगारियं।*
मा वंतं पुणोवि आविए, समयं० ॥

वृ. 'त्यक्त्वा' परिहृत्य 'न' इति वाक्यालङ्कारे 'धनं' चतुष्पदादि चशब्दो भिन्नक्रमः, ततो 'भार्यां च' कलत्रं च 'प्रव्रजितः' गृहान्निष्क्रान्तः, 'हि' इति यस्मात् 'सी'ति सूत्रत्वेनाकारलोपात् 'असि' भवसि 'अनगारियं' ति अनगारेषे- भावभिक्षुषु भवमानगारिकमनुष्ठानं चस्य गम्यमान-त्वात् तच्च प्रतिपन्नवानसीति शेषः, यद्वा प्रव्रजितः-प्रतिपन्नः 'अनगारियं'ति अनगारितम्, अतो 'मा' इति निषेधे, 'वान्तम्' उद्गीर्णं 'पुणोवि'त्ति पुनरपि 'आविए'त्ति आपिब, किन्तु समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थः ॥ कथं च वान्ताऽऽपानं न भवतीत्याह-

मू.(३२०) *अवउज्झिय मित्तबंधवं, विउलं चेव धणोहसंचयं।*
मा ते बिइयं गवेसए समयं० ॥

वृ. 'अपोह्य' त्यक्त्वा, मित्राणि च-सुहृदो बान्धवाश्च-स्वजना इति समाहारे मित्रबान्धवं, 'विपुलं' विस्तीर्णं 'च:' समुच्चये भिन्नक्रमश्च 'एव' इति पूरणे, ततो धनं-कनकादिद्रव्यं, तस्यौघः-समूहस्तस्य सञ्चयो-राशीकरणं धनौघसञ्चयस्तं च, मा 'तदिति' मित्रादिकं, द्वितीयं, पुनर्ग्रहणार्थमिति गम्यते, 'गवेषय' अन्वेषय, तत्परित्यागात् श्रामण्यमङ्गीकृत्य पुनस्तदभिष्वङ्ग-वान् मा भूः, त्यक्तं हि तद्वान्तोपमं तदभिष्वङ्गश्च वान्ताऽऽपानप्राय इत्यभिप्रायः, किन्तु समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थः ॥ इत्थं प्रतिबन्धनिराकरणार्थमभिधाय दर्शनविशुद्ध्यर्थमिदमाह-

मू. (३२१) *न हु जिने अज्ज दीसइ, बहुमए दीसइ मग्गदेसिए।*
संपइ नेआउए पहे, समयं० ॥

वृ. 'न हु' नैव 'जिनः' तीर्थंकृद् 'अद्य' अस्मिन काले 'दृश्यते' अवलोक्यते, यद्यपीति गम्यते, तथापि 'बहुमए' त्ति बहुमतः, स च द्रव्यतो मार्गादनपेतः, भावतस्तु सम्यग्दर्शनज्ञानचारित्रात्मको मुक्तिमार्गः, तत्रेह भावमार्गः परिगृह्यते, 'दृश्यते' उपलभ्यते 'मग्गदेसिय'त्ति भावप्रधानत्वान्निर्देशस्य मार्गत्वेन अर्थान्मुक्तेर्दर्शितः-जिनैः कथितो मार्गदर्शितः, अयमाशयः-यद्यपि सम्प्रति जिनो न दृश्यते तदुपदिष्टस्तु मार्गो दृश्यते, न चैवंविधोऽयमतीन्द्रियार्थदर्शिनं जिनं विना सम्भवतीति इत्यसन्दिग्धचेतसो भाविनोऽपि भव्या न प्रमादं विधास्यन्तीति,

अतः 'सम्प्रति' इदानीं सत्यपि मयीति भावः, 'नैयायिके' निश्चितमुक्त्याख्यलाभप्रयोजने 'पथि' मार्गे समयमपि गौतम! केवलानुत्पत्तितः संशयविधानेन मा प्रमादीः, यद्वा त्रिकालविषयत्वात् सूत्रस्य भाविभव्योपदेशकमप्येतत्, ततोऽयमर्थः-यथाऽऽद्यमार्गोपदेशकं नगरं वाऽपश्यन्तोऽपि पन्थानमवलोकयन्तस्तस्याविच्छिन्नोपदेशतस्तत्प्रापकत्वं निश्चिन्वन्ति तथा यद्यप्यद्य जिन उपलक्षणत्वान्मोक्षश्च नैव दृश्यते तथाऽपि तदुपदिष्टः पन्थाः-मार्ग्यमानत्वात् मार्गो-मोक्षस्तस्य 'देसिय'त्ति सूत्रत्वादेशको मार्गदेशको दृश्यते, ततस्तस्यापि तत्प्रापकत्वं मामपश्यदिभरपि भाविभव्यैर्निश्चेतव्यं, यतश्चैवं भाविभव्यानामुपदिश्यते अतः सम्प्रतीत्यादि प्राग्वत्, द्विविधाऽपि तावदित्थं व्याख्या सूचकत्वात्, सूत्रस्येति गाथार्थः ॥ अत्रैवार्थे पुनरुपदिशन्नाह-

मू. (३२२) *अवसोहियं कंटगापहं, ओइण्णोऽसि पहं महालयं।*
गच्छसि मग्गं विसोहिया, समयं० ॥

वृ. 'अवसोहिय'त्ति अवशोध्य-अपसार्य पृथक्कृत्य परिहृत्येतियावत्, कम्?-'कंटयापहं'ति आकारोऽलाक्षणिकः, कण्टकाश्च द्रव्यतो बब्बूलकण्टकादयः भावतस्तु चरकादिकुश्रुतयस्तैराकुलः पन्थाः कण्टकपथस्तं, ततश्च 'अवतीर्णोऽसि' अनुप्रविष्टो भवसि 'पहं'ति पन्थानं 'महालयं'ति महान्तं महतां वाऽऽलयः आश्रयो महालयः, स च द्रव्यतो राजमार्गः भावतस्तु महद्भिस्तीर्थङ्करादिभिरप्याश्रितः सम्यग्दर्शनादिमुक्तिमार्गस्तं, कश्चिदवतीर्णोऽपि मार्गं न गच्छेत् अत आह-'गच्छसि'-यासि मार्गं, न पुनरवस्थित एवासि, सम्यग्दर्शनाद्यनुपालनेन मुक्तिमार्गमनपवृत्तत्वाद भवतः, तत्राप्यनिश्चये ऽपायप्राप्तिरेव स्यात् इत्याह-'विशोध्य' इति विनिश्चित्य, तदेवं प्रवृत्तः सन् समयमपि गौतम! मा प्रमादीरिति सूत्रार्थः ॥ एवं च पूर्वेण दर्शनविशुद्धिमनेन च मार्गप्रतिपत्तिमभिधाय तत्प्रतिपत्तावपि कस्यचिदनुतापसम्भव इति तन्निराचिकीर्षयाऽऽह-

मू. (३२३) *अबले जह भारवाइए, मा मग्गे विसमेऽवगाहिया।*
पच्छा पच्छानुतावए, समयं० ॥

वृ. 'अबलः' अविद्यमानशरीरसामर्थ्यः 'यथा' इत्यौपम्ये भारं वहतीति भारवाहकः 'मा' निषेधे 'मग्गे' त्ति मार्गं 'विसमे'त्ति विषमं मन्दसत्त्वैरतिदुस्तरम् 'अवगाहिय'त्ति अवगाह्य प्रविश्य, त्यक्ताङ्गीकृतभारः सन्निति गम्यते, 'पश्चात्' तत्कालानन्तरं 'पश्चादनुतापकः' पश्चात्तापकृत्, भूरिति शेषः, इदमुक्तं भवति यथा कश्चिद्देशान्तरगतो बहुभिर्भाण्डैः स्वर्णादिक-

सुपाल्यं स्वगृहाभिमुखमागच्छन्निति भीरुतयाऽन्यवस्त्वन्तर्हितं स्वर्गादिकं स्वशिरस्यारोप्य कंतिचिद्दिनानि सम्यगुद्वहति, अनन्तरं च क्वचिदुपलादिसंकुले पथि अहो। अहमनेन भारेणाऽऽक्रान्त इति तमुत्सृज्य स्वगृहमागतः अत्यन्तनिर्धनतयाऽनुतप्यते किं मया मन्दभाग्येन तत्परित्यक्तमिति ?, एवं त्वमपि प्रमादपरतया त्यक्तसंयमभारः सन्नेवंविधो मा भूः, किन्तु समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थः ॥ यद्यदमद्यापि निस्तरणीयमल्पं च निर्सीर्णमित्यभिमन्यिनोत्साहभङ्गोऽपि स्यादिति तदपनोदायाह-

मू. (३२४) तिन्नो हु सि अण्णवं महं किं पुण चिट्ठसि तीरमागओ ?।
अभितुर पारं गमित्तए, समयं० ॥

वृ. 'तिन्नो हु सि'त्ति तीर्ण एवासि, अनेवांभवार्णवं 'महं'ति महान्तं गुरुं, किमिति प्रश्ने पुनरिति वाक्योपन्यासे, ततः किं पुनस्तिष्ठसि ?, 'तीरं' पारम् 'आगतः' प्राप्तः, किमुक्तं भवति ?- भव उत्कृष्टस्थितीनि वा कर्माणि भावतोऽर्णव इत्युच्यते, स च द्विविधोऽपि त्वयोत्तीर्णप्राय एव इति केन हेतुना तीरप्राप्तोऽप्यौदासीन्यं भजसे ?, नैवेदं तवोचितमित्याशयः। किन्तु 'अभितुर'त्ति अभि-आभिमुख्येन त्वरस्व-शीघ्रो भव, 'पारं' परतीरं भावतो मुक्तिपदं 'गमित्तए'त्ति गन्तुम्, अतश्च समयमपि गौतम ! मा प्रमादीरिति सूत्रार्थः ॥ अथापि स्यात्- मम पारप्राप्तियोग्यतैव न समस्ति, अत आह- अथवा शेषशिष्यापेक्षया किमस्याप्रमादस्य फलम् ? यत्पुनः पुनरयमुपदिश्यते इत्याह-

मू. (३२५) अकलेवरसेणिमूसिया, सिद्धिं गोयम ! लोयं(य) गच्छसि।
खेमं च सिवं अणुत्तरं, समयं० ॥

वृ. कलेवरं-शरीरम् अविद्यमानं कलेवरमेषामकलेवराः-सिद्धास्तेषां श्रेणिरिव श्रेणिर्यथोत्तरोत्तरशुभपरिणामप्राप्तिरूपया ते सिद्धिपदमारोहन्ति(तां), क्षपकश्रेणिमित्यर्थः। यद्वा कलेवराणि-एकेन्द्रियशरीराणि तन्मयत्वेन तेषां श्रेणिः कलेवरश्रेणिः-वंशादिविरचिता प्रासादादिष्वारोहणहेतुः, तथा च या न सा अकलेवरश्रेणिः-अनन्तरोक्तरूपैव ताम् 'उस्सिय'त्ति उत्सृतां, गमिष्यसीति सम्बन्धः, यद्वा 'उस्सिय'त्ति उच्छ्रित्येवोच्छ्रित्य-उत्तरोत्तरसंयमस्थानावाप्त्या तामुच्छ्रितामिव कृत्वा 'सिद्धिम्' इति सिद्धिनामानं 'गोयम! लोयं गच्छसि'त्ति प्राग्वल्लोकं गमिष्यसि, संशयव्यवच्छेदफलत्वाच्चास्य गमिष्यस्येव, 'क्षेमं' परचक्राद्युपद्रवरहितं, 'च:' समुच्चये भिन्नक्रमश्च, 'शिवमनुत्तरं' च तत्र शिवमशेषदुरितोपशमेन अनुत्तरं नास्योत्तरमन्यत् प्रधानमस्तीत्यनुत्तरं, सर्वोत्कृष्टमित्यर्थः, यतश्चैवं ततः समयमपि गौतम! मा प्रमादीरिति सूत्रार्थः

सम्प्रति निगमयन्नुपदेशसर्वस्वमाह-

मू. (३२६) बुद्धे परिनिव्वुए चरे, गाम गए नगरे व संजए।
संतिमग्गं च बूहए, समयं० ॥

वृ. 'बुद्धः' अवगतहेयादिविभागः 'परिनिर्वृतः' कषायाग्न्युपशमतः समन्तात् शीतीभूतः 'चरेः' आसेवस्व, संयममिति शेषः, 'गाम'त्ति सुपो लोपात् ग्रामे 'गतः' स्थितो नगरे वा, उपलक्षणत्वादरण्यादिषु वा, किमुक्तं भवति ?-सर्वस्मिन्नप्यभिष्वङ्गवान्, सम्यग् यतः-पापस्थानेभ्य उपरतः संयतः, शाम्यन्त्यस्यां सर्वदुरितानीति शान्तिः-निर्वाणं तस्या मार्गः-

पन्थाः यद्वा शान्तिः-उपशमः सैव मुक्तिहेतुतया मार्गः शान्तिमार्गो, दशविधधर्मोपलक्षणं शान्तिग्रहणं, चशब्दो भिन्नक्रमः, ततो बृंहयेश्च-भव्यजनप्ररूपणया वृद्धिं नयेः, ततः समयमपि गौतम! मा प्रमादीरिति सूत्रार्थः ॥ इत्थं भगवदभिहितमिदमाकर्ण्य गौतमो यत् कृतवांस्तदाह-

मू. (३२७) *बुद्धस्स निसम्म भासियं, सुकहियमट्ठपदोवसोहियं ।*
रागं दोसं च छिंदिया, सिद्धिगइं गए गोयमे ॥

वृ. 'बुद्धस्य' केवलालोकालोकितसमस्तवस्तुतत्त्वस्य एकपाच्छीमन्महावीरस्य 'निशम्य' आकर्ण्य 'भाषितम्' उक्तं, सुष्ठु शोभनेन नयानुगतत्वादिना प्रकारेण कथितं-प्रबन्धेन प्रतिपादितं सुकथितम्, अत एवार्थप्रधानानि पदानि अर्थपदानि तैरुपशोभितं-जातशोभमर्थपदोपशोभितं 'रागं' विषयाद्यभिष्वङ्गं 'द्वेषम्' अपकारिण्यप्रीतिलक्षणं, 'चः' समुच्चये छित्त्वा' अपनीय 'सिद्धिगतिं' मुक्तिगतिं 'गतः' प्राप्तः 'गौतमः' इन्द्रभूतिनामा भगवत्प्रथमगणधर इति सूत्रार्थः ॥ 'इतिः' परिसमाप्तौ 'ब्रवीमि' इति पूर्ववत्, इत्युक्तोऽनुगमः, सम्प्रति नयाः, ते च पूर्ववत् ।

अध्ययनं-१० समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययन सूत्रे
सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं - ११ - बहुश्रुतपूजा

वृ. उक्तं दशममध्ययनं, साम्प्रतमेकादशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययनेऽप्रमादार्थमनुशासनमुक्तं, तच्च विवेकिनैव भावयितुं विवेकश्च बहुश्रुतपूजात उपजायत इति बहुश्रुतपूजोच्यते इत्यनेन सम्बन्धेनाऽऽयातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि प्ररूपयितव्यानि, यावन्नामनिष्पन्ने निक्षेपे 'बहुसूत्रपूजा बहुश्रुतपूजे'ति वा नाम, अतस्तन्निक्षेपप्रतिपिपादयिषयेदमाह निर्युक्तिकृत-

नि.[३१०] बहु सुए पूजाए य तिण्हंपि चउक्कओ य निक्खेवो ।
दव्वबहुगेण बहुगा जीवा तह पुग्गला चेव ॥

वृ. 'बहु'त्ति बहोः 'सुए'त्ति शतमुखत्वात् प्राकृतस्य सूत्रस्य श्रुतस्य वा 'पुयाए य'ति पूजायाश्च 'त्रयाणामपि' अमीषां पदानां 'चतुष्कस्तु' चतुष्प्रमाण एव 'निक्षेपः' न्यासः, स च नामादिः, तत्र नामस्थापने क्षुण्णे, द्रव्यतस्तु बहुभिधातुमाह-'दव्वबहुएण'त्ति आर्षत्वात् द्रव्यतो बहुत्वं द्रव्यबहुत्वं तेन 'बहुकाः' प्रभूताः 'जीवाः' उपयोगलक्षणाः, तथा 'पुद्गलाः' स्पर्शादिलक्षणाः, चशब्दः पुद्गलानां जीवापेक्षया बहुतरत्वं ख्यापयति, ते ह्येकैकस्मिन् संसारिजीवप्रदेशेऽनन्तानन्ता एव सन्ति, 'एवः' अवधारणे, जीवपुद्गला एव द्रव्यबहवः, तत्र धर्माधर्माऽऽकाशानामेकद्रव्यत्वात् कालस्यापि तत्त्वतः समयरूपत्वेन बहुत्वाभावादिति

नि.[३११] भावबहुएण बहुगा चउदस पुव्वा अनंतगमजुत्ता ।
भावे खओवसमिए खइयंमि य केवलं नाणं ॥

वृ. 'भावबहुएणं'ति प्राग्वत् भावबहुत्वेन 'बहुग'त्ति बहूकानि 'चतुर्दश' चतुर्दशसङ्ख्यानि

'पुव्व'त्ति पूर्वाण्युत्पादपूर्वादीनि 'अनंतगमजुत्त'त्ति अनन्ता-अपर्यवसिता गम्यते वस्तुस्वरूप मेभिरिति गमा-वस्तुपरिच्छेदप्रकाराः नामादयस्तैर्युक्तानि-अन्वितान्यनन्तगमयुक्तानि, पर्यायाद्युपलक्षणं च गमग्रहणम्, उक्तं हि "अनंता गमा अनंता पज्जवा अनंता हेतू" इत्यादि, अनेनैतदात्मकत्वात्, पूर्वाणां तेषामप्यानन्त्यमुक्तं, कथं पुनरमूनि भावे वर्तन्ते येन भावबहु-न्युच्यन्ते इत्याह-'भाव' इत्यात्मपर्यायं क्षायोपशमिके चतुर्दश पूर्वाणि वर्तन्ते इति प्रक्रमः, आह-किं न क्षायिके भावे किञ्चिद् भाववहु ?, अस्तीत्याह-'क्षायिके च' कर्मक्षयादुत्पन्नं पुनः केवलज्ञानम्, अनन्तपर्यायत्वात्, तदपि भाववहुकमिति गाथार्थः ॥ उक्तं वहु, सम्प्रति सूत्रं श्रुतं वाऽऽह-

नि.[३१२] दव्वसुयं पोंडवाइ अहवा लिहियं तु पुत्थयाईसुं ।
भावसुयं पुन दुविहं सम्मसुयं चेव मिच्छसुयं ॥

वृ. 'दव्वसुय'त्ति अनुस्वारलोपात् द्रव्यसूत्रं द्रव्यश्रुतं च, तत्राऽऽद्यं पुण्डजादि, द्वितीयमाह-'अथवा' इति पक्षान्तरसूचकः, ततो द्रव्यश्रुतं 'लिखितम्' अक्षररूपतया न्यस्तं पुस्तकादिषु, तुशब्दाद् भाष्यमानं वा द्रव्यश्रुतमुच्यते, भावश्रुतं पुनः 'द्विविधं' द्विभेदं 'सम्यक्श्रुतं चैव' इति प्राग्वत् ततो मिथ्याश्रुतं चेति गाथार्थः ॥ एतत्स्वरूपमाह-

नि.[३१३] भवसिद्धिया उ जीवा सम्मद्दिट्ठी उ जं अहिज्जंति ।
तं सम्मसुएण सुयं कम्मट्ठविहस्स सोहिकरं ॥

नि.[३१४] मिच्छद्दिट्ठी जीवा अभव्वसिद्धी य जं अहिज्जंति ।
तं मिच्छसुएण सुयं कम्मादानं च तं भणियं ॥

वृ. भवे भव्या वा सिद्धिरेषामिति भवसिद्धिका भव्यसिद्धिका वा, 'तुः' अवधारणे, एत एव 'जीवाः' प्राणिनः, तेऽपि 'सम्मद्दिट्ठी उ'त्ति सम्यग्दृष्टय एव 'यत्' इति श्रुतम् 'अधीयते' पठन्ति 'तं सम्मसुएण'त्ति सम्यक्श्रुतशब्देन 'श्रुतम्' इति प्रक्रमाद् भावश्रुतम्, उच्यते इति शेषः। आह-भाष्यमानत्वेनास्य कथं न द्रव्यश्रुतत्वम् ?, उच्यते, अनेनैतज्जनित उपयोग एवोप-लक्षित इति न दोषः, एवमन्यत्रापि भावनीयं। तन्माहात्म्यमाह-'कम्मट्ठविहस्स'त्ति अष्टविध-कर्मणः 'शुद्धिकरम्' अपनयनकर्तृ ॥ मिथ्याश्रुतमाह-मिथ्यादृष्टय जीवाः, भव्या इति गम्यते, 'अभव्यसिद्धयश्च' अभव्याः यदधीयते तत् 'मिथ्याश्रुतेन' मिथ्याश्रुतशब्देन 'श्रुतम्' इतीहापि भावश्रुतं भणितमिति सम्बन्धः, कर्म्म-ज्ञानावरणादि आदीयते-स्वीक्रियतेऽनेन जन्तुभिरिति कम्मादानं-कर्मोपादानहेतुः, 'चः' समुच्चये, 'तत्' श्रुतं 'भणितम्' उक्तमिति गाथाद्वयार्थः ॥

इदानीं पूजा, साऽपि नामादिभेदतश्चतुर्धैव, तत्राऽऽद्ये सुगमे, द्रव्यपूजामाह-

नि.[३१५] ईसरतलवरमाडंबिआण सिवइंदखंदविण्हूणं ।
जा किर कीरइ पूआ सा पूआ दव्वओ होइ ॥

वृ. ईश्वरश्च-द्रव्यपतिः तलवरश्च-प्रभुस्थानीयो नगरादिचिन्तकः माडम्बं-जलदुर्गं तस्मिन् भवो माडम्बिकः-तद्भोक्ता च ईश्वरतलवरमाडम्बिकास्तेषां, तथा शिवश्च-शम्भुः इन्द्रश्च-पुरन्दरः स्कन्दश्च-स्वामिकार्तिकेयः विष्णुश्च-वासुदेवः शिवेन्द्रस्कन्दविष्णवस्तेषां, या किल क्रियते पूजा सा पूजा 'द्रव्यतः' द्रव्यनिक्षेपमाश्रित्य भवति, द्रव्यपूजेति योऽर्थः, किलशब्द-

शिष्यवद्यापारमाश्रित्यकत्वख्यापकः, द्रव्यतोऽपि हि भावपूजाहेतुरेव पूजार्त्यते, इयं तु द्रव्यार्थमप्रधाना वा पूजेति द्रव्यपूजा, अतोऽपारमार्थिक्येव, एतदभिधानं तु द्रव्यशब्दस्यानेकार्थत्वसूचकमिति गाथार्थः ॥ भावपूजामाह-

नि.[३१६] तित्थयरकेवलीणं सिद्धायरिआण सव्वसाहूणं ।
जा किर कीरइ पूआ सा पूआ भावओ होइ ॥

वृ. तीर्थङ्कराश्च अर्हन्तः केवलिनाश्च-सामान्येनोत्पन्नकेवलाः तीर्थकरकेवलिनस्तेषां, 'सिद्धाचार्याणां' प्रतीतानां, तथा सर्वसाधूनां, का ?-या किल 'क्रियते' विधीयते पूजा सा पूजा 'भावतः' भावनिक्षेपमाश्रित्य भवति, किलशब्दः परोक्षप्रवादसूचकः, तीर्थङ्करादिपूजा हि सर्वोऽपि क्षायोपशमिकादिभाववर्तिन एव भवतीति भावपूजैव, यत् पुष्पादिपूजायां द्रव्यस्तवत्वमुक्तं तद् द्रव्यैः पुष्पादिभिः स्तव इति व्युत्पत्तिमाश्रित्य सम्पूर्णभावस्तवकारणत्वेन वेति गाथार्थः ॥ सम्प्रति प्रस्तुतोपयोग्याह-

नि.[३१७] जे किर चउदसपुव्वी सव्वक्खरसन्निवाइणो निउणा ।
जा तेसिं पया खलु सा भावे ताइ अहिगारे ॥

वृ. 'ये' प्राग्वत् 'किल' इति वाक्यालङ्कारे 'चतुर्दशपूर्विणः' चतुर्दशपूर्वधराः सर्वाणि-समस्तानि वाच्यक्षराणि अकारादीनि तेषां सन्निपातनं-ततत्तदर्थाभिधायकतया साङ्गत्येन घटनाकरणं सर्वाक्षरसन्निपातः स विद्यते अभिगमविषयतया येषां ते ऽमी सर्वाक्षरसन्निपातिनः 'निपुणाः' कुशलाः, या 'तेषां' चतुर्दशपूर्विणां 'पूजा' उचितप्रतिपत्तिरूपया, उपलक्षणं चैवं शेषबहुश्रुतपूजायाः, प्राधान्याच्चास्या एवोपादानं, 'खलु' निश्चितं, सा 'भावे' भावविषया, 'तया' बहुश्रुतपूजालक्षणया भावपूजया इह 'अधिकारः' प्रकृतमिति गाथार्थः ॥ इत्युक्तो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्

मू.(३२८) *संजोगा विप्पमुक्कस्स, अनगारस्स भिक्खुणो ।*
आयारं पाउकरिस्सामि, आनुपुव्विं सुणेह मे ॥

वृ. संयोगाद्विप्रमुक्तस्यानगारस्य भिक्षोः आचरणमाचारः-उचितक्रिया विनय इतियावत्, तथा च वृद्धाः-'आयारोत्ति वा विनओत्ति वा एगट्ठ'त्ति स चेह बहुश्रुतपूजात्मक एव गृह्यते, तस्या एवात्राधिकृतत्वात्, तं 'प्रादुष्करिष्यामि' प्रकटयिष्यामि आनुपूर्व्या, शृणुत 'मे' मम कथयत इति शेषः इति सूत्रार्थः ॥ इह च बहुश्रुतपूजा प्रक्रान्ता, सा च बहुश्रुतस्वरूपपरिज्ञान एव कर्तुं शक्या, बहुश्रुतस्वरूपं च तद्विपर्ययपरिज्ञाने तद्विविक्तं सुखेनैव ज्ञायत इत्यबहु-श्रुतस्वरूपमाह-

मू.(३२९) *जे यावि होइ निव्विज्जे, थद्धे लुद्धे अनिग्गहे ।*
अभिक्खणं उल्लवई, अविनीए अबहुस्सुए ॥

वृ. 'जे यावि'त्ति यः कश्चित्, चापिशब्दौ भिन्नक्रमावुत्तरत्र योक्ष्येते, 'भवति' जायते निर्गतो विद्यायाः-सम्यक्शास्त्रावगमरूपायाः निर्विद्यः, अपिशब्दसम्बन्धात् सविद्योऽपि, यः 'स्तब्धः' अहङ्कारी 'लुब्धः' रसादिगृद्धिमान्, न विद्यते इन्द्रियनिग्रहः-इन्द्रियनियमनात्मको ऽस्येति अनिग्रहः 'अभीक्ष्णं' पुनः पुनः उत्-प्राबल्येनासम्बद्धभाषितादिरूपेण लपति-वक्ति उल्लपति

'अविनीतश्च' विनयविरहितः 'अबहुस्सुए'त्ति यत्तदोर्नित्याभिसम्बन्धात् सोऽबहुश्रुतः, उच्यते इति शेषः, सविद्यमान्यबहुश्रुतत्वं बाहुश्रुत्यफलाभावादिति भावनीयम्, एतद्विपरीतस्त्वर्थाद् बहुश्रुत इति सूत्रार्थः ॥ कुतः पुनरीदृशमबहुश्रुतत्वं बहुश्रुतत्वं वा लभ्यत इत्याह-

मू.(३३०) अह पंचहिं ठाणेहिं, जेहिं सिक्खा न लब्भइ।
थंभा कोहा पमाएणं, रोगेणालस्सेण य॥

वृ. 'अथ' इत्युपन्यासार्थः 'पञ्चभिः' पञ्चसङ्ख्यैः तिष्ठन्त्यंयेषु कर्म्मवशगा जन्तव इति स्थानानि तैः, 'यैः' इति वक्ष्यमाणैर्हेतुभिः -शिक्षणं शिक्षा-ग्रहणासेवनात्मिका 'न लभ्यते' नावाप्यते, तेरीदृशमबहुश्रुतत्वमवाप्यत इति शेषः, कैः पुनः सा न लभ्यते ? इत्याह-'स्तम्भात्' मानात् 'क्रोधात्' कोपात् 'प्रमादेन' मद्यविषयादिना 'रोगेण' गलत्कुष्ठादिना 'आलस्येन' अनुत्साहात्मना, शिक्षा न लभ्यत इति **प्रक्रमः**, चः समस्तानां व्यस्तानां च हेतुत्वमेषां द्योतयति॥

इत्थमबहुश्रुतत्वहेतूनभिधाय बहुश्रुतत्वहेतूनाह-

मू.(३३१) अह अट्ठहिं ठाणेहिं, सिक्खासीलेत्ति वुच्चइ।
अहस्सिरे सयादंते, न य मम्ममुयाहरे॥

वृ. अथाष्टभिः स्थानैः शिक्षायां शीलः -स्वभावो यस्य शिक्षां वा शीलयति-अभ्यस्यतीति शिक्षाशीलः द्विविधशिक्षाभ्यासकृद्, इतिशब्दः स्वरूपपरामर्शकः, उच्यते तीर्थकृद्गणधरादिभिरिति गम्यते, तान्येवाह-'अहस्सिरे'त्ति 'तृन इर' इति प्राकृतलक्षणादहसनशीलः अहसिता-न सहेतुकमहेतुकं वा हसत्नेवास्ते, 'सदा' सर्वकालं 'दान्तः' इन्द्रियनोइन्द्रियदमवान् 'न च' नैव 'मर्म' परपभ्राजनाकारि कुत्सितं जात्यादि 'उदाहरेत्' उदघट्टयेत।

मू.(३३२) नासीले न विसीले, न सिया अइलोलुए।
अकोहणे सच्चरए, सिक्खासीलेत्ति वुच्चइ॥

वृ. 'न' नैव 'अशीलः' अविद्यमानशीलः, सर्वथा विनष्टचारित्रधर्म इत्यर्थः, न 'विशीलः' विरूपशीलः, अतीचारकलुषितव्रत इतियावत, 'न स्यात्' न भवेद्, इह पूर्वत्र च सम्भावने लिङ् 'अतिलोलुपः' अतीव रसलम्पटः, 'अक्रोधनः' अपराधिन्यनपराधिनि वा न कथञ्चित् क्रुध्यति, सत्यम्-अवितथभापणं तस्मिन् रतः-आसक्तः सत्यरतः इति, निगमयितुमाह-शिक्षाशील 'इति' इत्यनन्तरोक्तगुणभाग् उच्यते, स च बहुश्रुत एव भवतीति भावः। इह च स्थानप्रक्रमेऽप्येवमभिधानं धर्मधर्मिणोः कथञ्चिदनन्यत्वख्यापनार्थं, विशेषाभिधायित्वाच्च क्वचित् केषाञ्चिदन्तर्भावसम्भवेऽपि पृथगुपादानं, परिहारद्वयमपीदमुत्तरत्रापि भावनीयमिति सूत्रत्रयार्थः॥ किञ्च-अबहुश्रुतत्वे बहुश्रुतत्वे वाऽविनयो विनयश्च मूलकारणं, तत्त्वत उक्तहेतूनामप्यनयोरेवान्तर्भावात्, न च अविनीतविनीतयोः स्वरूपमविज्ञाय तौ ज्ञातुं शक्याविति यैः स्थानैरविनीत उच्यते यैश्च विनीतस्तान्यभिधातुमाह-

मू.(३३३) अह चोद्दसहिं ठाणेहिं, वट्टमाणो उ संजए।
अविनीए वुच्चती सो उ, निव्वाणं च न गच्छइ॥

वृ. 'अथ' इति प्राग्वत्, चतुर्भिरधिका दश चतुर्दश तेषु चतुर्दशसङ्ख्येषु स्थानेषु, सूत्रे चु

सुब्व्यत्ययेन सप्तम्यर्थे तृतीया, 'वर्तमानः' तिष्ठन् 'तुः' पूरणे 'संयतः' तपस्वी, अविनीत उच्यते, 'स तु' इत्यविनीतः पुनः, किमित्याह - 'निर्वाणं च' मोक्षं, चशब्दादिहैव ज्ञानादींश्च 'न गच्छति' न प्राप्नोति ॥ कानि पुनश्चतुर्दश स्थानानीत्याह-

मू. (३३४) अभिक्खणं कोही भवइ, पबंधं च पकुव्वइ।
मित्तिज्जमाणो वमति, सुयं लद्धूण मज्जइ ॥

वृ. 'अभीक्ष्णं' पुनः पुनः, यद्वा - क्षणं क्षणमपि अभिक्षणम् अनवरतं 'कोही' क्रोधनः भवति, सनिमित्तनिमित्तं वा कुप्यत्रेवास्ते, 'प्रबन्धं च' प्रकृतत्वात् कोपस्यैवाविच्छेदात्मकं 'पकुव्वइ'त्ति प्रकर्षेण कुरुते, कुपितः सन् सान्त्वनैरनेकैरपि नोपशाम्यति, विकथादिषु वाऽविच्छेदेन प्रवर्तनं प्रबन्धस्तं च प्रकुरुते, तथा 'मेत्तिज्जमानो'त्ति मित्रीय्यमानोऽपि मित्रं ममायमस्मित्वतीष्यमानोऽपि अपिशब्दस्य लुप्तनिर्दिष्टत्वात् 'वमति' त्यजति, प्रस्तावान्मित्रयितारं मैत्री वा, किमुक्तं भवति ? - यदि कश्चिद्धार्मिकतया वक्ति - यथा त्वं न वेत्सीत्यहं तव पात्रं लेपयामि, ततोऽसौ प्रत्युपकारभीरुतया प्रतिवक्ति - ममालेमेतेन, कृतमपि वा कृतघ्नतया न मन्यत इति वमतीत्युच्यते, तथा 'सुयं'ति अपेक्ष्यमाणत्वात् श्रुतमपि - आगममपि 'लब्ध्वा' प्राप्य 'माद्यति दर्पं याति, किमुक्तं भवति ? श्रुतं हि मदापहारहेतुः, स तु तेनापि दर्प्यति।

मू. (३३५) अवि पावपरिक्खेवी, अवि मित्तेसु कुप्पति।
सुप्पियस्सावि मित्तस्स, रहे भासइ पावगं ॥

वृ. तथा 'अपिः' सम्भावनायां, सम्भाव्यत एतत्, यथाऽसौ पापः - कथञ्चित् समित्यादिषु स्खलितलक्षणैः परिक्षिपति - तिरस्करोत इत्येवंशीलः पापपरिक्षेपी, आचार्यादीनामिति गम्यते, तथा 'अपिः' भिन्नक्रमः, ततः 'मित्रेभ्योऽपि' सुहृद्भ्योऽप्यास्तामन्येभ्यः 'कुप्यति' क्रुध्यति, सूत्रे तु चतुर्थ्यर्थे सप्तमी, "क्रुधिद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" इत्यनेनेह चतुर्थीविधानात्, तथा 'सुप्रियस्यापि' अतिवल्लभस्यापि मित्रस्य 'रहसि' एकान्ते 'भाषते' वक्ति पापमेव पापकं, किमुक्तं ? - अग्रतः प्रियं वक्ति पृष्ठस्तु प्रतिसेवकोऽयमित्यादिकमनाचारमेवाविष्करोति।

मू. (३३६) पइन्नवाई दुहिले, थद्धे लुद्धे अनिग्गहे।
असंविभागी अचियत्ते, अविनीएत्ति वुच्चइ ॥

वृ. तथा प्रकीर्णम् - इतस्ततो विक्षिप्तम्, असम्बद्धमित्यर्थः, वदतिजल्पतीत्येवंशीलः प्रकीर्णवादी, वस्तुतत्त्वविचारेऽपि यत्किञ्चनवादीत्यर्थः, अथवा - यः पात्रमिदमपात्रमिदमिति वाऽपरीक्ष्यैव कथञ्चिदधिगतं श्रुतरहस्यं वदतीत्येवंशीलः प्रकीर्णवादी इति, प्रतिज्ञया वा - इदमित्थमेव इत्येकान्ताभ्युपगमरूपया वदनशीलः प्रतिज्ञावादी, तथा 'दुहील'त्ति द्रोहणशीलो - दोग्धा, न मित्रमप्यनभिद्रुह्यास्ते, तथा 'स्तब्धः' तपस्व्यमित्याद्यहंकृतीमान्, तथा 'लुब्धः' अन्नादिष्वभिकाङ्क्षावान्, तथा 'अनिग्रहः' प्राग्वत्, तथाऽसंविभजनशीलः असंविभागी, नाऽऽहारादिकमवाप्यातिगर्द्धनोऽन्यस्मै स्वल्पमपि यच्छति, किन्त्वात्मानमेव पोषयति, तथा 'अचियत्ते'त्ति अप्रीतिकारः - दृश्यमानः सम्भाष्यमानो वा सर्वस्याप्रीतिमेवोत्पादयति, एवंविधदोषान्वितः अविनीत उच्यते इति निगमनम्। इत्थमविनीतस्थानान्यभिधाय विनीतस्थानान्याह-

मू. (३३७) *अह पन्नरसहिं ठाणेहिं, सुविनीएत्ति वुच्चइ।*
नीयावित्ती अचवले, अमाई अकुऊहले ॥

वृ. अथ पञ्चदशभिः स्थानैः सुष्ठु-शोभनो विनीतो-विनयान्वितः सुविनीत इत्युच्यते, तान्येवाह-'नियाविति'त्ति नीचम्-अनुद्धतं यथा भवत्येवं नीचेषु वा शय्यादिषु वर्तत इत्येवंशीलो नीचवर्ती-गुरुषु न्यग्वृत्तिमान्, यथाऽऽह

"नीयं सेज्जं गइं ठाणं, नियं च आसनानि य।
नियं च पाय वंदेज्जा, नीयं कुज्जा य अंजलिं ॥"

'अचपलः' नाऽऽलब्यकार्यं प्रत्यस्थिरः, अथवाऽचपलो-गतिस्थानभाषाभावभेदनश्चतुर्धा, तत्र-गतिचपलः- द्रुतचारी, स्थानचपलः- निष्ठापि चलत्येवास्तो हस्तादिभिः भाषाचपलः- असदसभ्यासमीक्ष्यादेशकालप्रलापिभेदाच्चतुर्धाः, तत्र असद्-अविद्यमानमसभ्यं-खरपुरुषादि असमीक्ष्य-अनालोच्य प्रलपन्तीत्येवंशीला असदसभ्यासमीक्ष्यप्रलापिनस्त्रयः, अदेशकालप्रलापी चतुर्थः अतीते कार्ये यो वक्ति-यदिदं तत्र देशे काले वाऽकरिष्यत् ततः सुन्दरमभविष्यद्, भावचपलः सूत्रेऽर्थे वाऽनाद्रियमाणः एवं योऽन्यद् गृह्णाति, 'अमायी' न मनोज्ञाहारादिकमवाप्य गुर्वादिवञ्चकः, 'अकुतूहलः' न कुहुकेन्द्रजालाद्यवलोकनपरः,

मू. (३३८) *अप्पं च अहिक्खिवति, पबंधं च न कुव्वइ।*
मित्तिज्जमानो भजति, सुयं लद्धुं न मज्जति ॥

वृ. 'अल्पं च' इति स्तोकमेव 'अधिक्षिपति' तिरस्करुते, किमुक्तं भवति ? -नाधिक्षिपत्येव तावदसौ कञ्चन, अधिक्षिपन् वा कञ्चन कङ्कटुकरूपं धर्मं प्रति प्रेरयन्नल्पमेवाधिक्षिपति, अभाववचनो वाऽल्पशब्दः, तथा च वृद्धाः-"अल्पशब्दो हि स्तोके ऽभावे च", ततो नैव कञ्चनाधिक्षिपति, 'प्रबन्धं' चोक्तरूपं न करोति, 'मित्रीय्यमानः' उक्तन्यायेन 'भजते' मित्रीयितारमुपकुरुते, न तु प्रत्युपकारं प्रत्यसमर्थः कृतघ्नो वा, श्रुतं लब्ध्वा न माद्यति, किन्तु मददोषपरिज्ञानतः सुतरामवनमति,

मू. (३३९) *न य पावपरिक्खेवी, न य मित्तेसु कुप्पति।*
अप्पियस्सावि मित्तस्स, रहे कल्लाण भासइ ॥

वृ. 'न च' नैव 'पापपरिक्षेपी' उक्तरूपः, न च मित्रेभ्यः कृतज्ञतया कथञ्चिदपराधेऽपि कुप्यति, अप्रियस्यापि विधत्ते तथाऽप्येकमपि सुकृतमनुस्मरन् न रहस्यपि तद्दोषमुदीरयति,

"एकसुकृतेन दुष्कृतशतानि ये नाशयन्ति ते धन्याः।
न त्वेदकदोषजनितो येषां कोपः स च कृतघ्नः ॥"

मू. (३४०) *कलहडमरवज्जए, बुद्धे (अ) अभिजाइए।*
हिरिमं पडिसंलीणो, सुविनीएत्ति वुच्चइ ॥

वृ. इति, कलहश्च-वाचिको विग्रहः डमरं च-प्राणिघातादिभिस्सङ्गजको, 'बुद्धो' बुद्धिमान्, एतच्च सर्वत्रानुगम्यत एवेति न प्रकृतसङ्ख्याविरोधः, 'अभिजातिए'त्ति अभिजातिः-कुलीनता तां गच्छति-उत्क्षिप्तभारनिर्वाहणादिनेत्यभिजातिगः, ह्रीः-लज्जा सा विद्यतेऽस्य ह्रीमान्, कथञ्चित् कलुषाध्यवसायतायामप्यकार्यमाचरन् लज्जते, 'प्रतिसंलीनः' गुरुसकाशेऽन्यत्र वा कार्यं

विना न यतस्ततश्चेष्टते, प्रस्तुतमुपसंहरन्नाह-'सुविनितः' सुविनितशब्दवाच्यः 'इति' इत्येवंविधगुणान्वितः उच्यते, इति सूत्राष्टकार्थः ॥ यश्चैवं विनीतः स कीदृक् स्यादित्याह-

मू. (३४१) *वसे गुरुकुले निच्चं, जोगवं उवहाणवं।*
पियंकरे पियंवाई, से सिक्खं लद्धुमरिहति ॥

वृ. 'वसेत्' आसीत क्व ?-गुरूणाम्, आचार्यादीनां कुलम्-अन्वयो गच्छ इत्यर्थः गुरुकुलं तत्र, तदाज्ञोपलक्षणं च कुलग्रहणं, 'नित्यं' सदा, किमुक्तं भवति ? यावज्जीवमपि गुर्वाज्ञायामेव लिष्टेत्, उक्तं हि-"नाणस्स होइ भागी" इत्यादि, योजनं योगो-व्यापारः, स चेह प्रक्रमाद्ध्ययनं गत एव तद्वान्, अतिशायने मतुप्, यद्वा योगः-समाधिः सोऽस्यास्तीति योगवान्, प्रशंसायां मतुप्, उपधानतम्-अङ्गानङ्गाध्ययनादौ यथायोगमाचाम्लादितपोविशेषस्तद्वान्, यद्यस्योपधानमुक्तं न तत् कृत्वाभीरुतयोत्सृज्यान्यथा वाऽधीते शृणोति वा, प्रियम्-अनुकूलं करोतीति प्रियङ्करः, कथञ्चित् केनचिदकृतोऽपि न तत्प्रतिकूलमाचरति, किन्तु मय्येव कृतमद्य तेन इत्यवधार्यन्नप्रियकारिण्यपि प्रियमेव चेष्टते, अत एव च 'प्रियमेव'त्ति केनचिदप्रियमुक्तोऽपि प्रियमेव वदतीत्येवंशीलः प्रियवादी, यद्वा-'प्रियङ्करः' आचार्यादेर्भक्तपानाहारादिभिरनुकूलकारी, एवं 'प्रियवाद्यपि' आचार्याभिप्रायानुवर्तितयैव वक्ता, तथा चास्य को गुण इत्याह-'स' एवंगुणविशिष्टः 'शिक्षां' शास्त्रार्थग्रहणादिरूपां 'लब्धुम्' अवाप्तुम् 'अर्हति' योग्यो भवतीति, अनेनैव अविनीतस्त्वेतद्विपरीतः शिक्षां लब्धुं नार्हतीत्यर्थादुक्तं भवति, तथा च यः शिक्षां लभते स बहुश्रुतः इतर स्त्वबहुश्रुत इति भाव इति सूत्रार्थः ॥ एवं च सविपक्षं बहुश्रुतं प्रपञ्चतोऽभिधाय प्रतिज्ञातं तत्प्रतिपत्तिरूपमाचारं तस्यैव स्तवद्वारेणाह-

मू. (३४२) *जहा संखंमि पयं निहियं, दुहओवि विरायइ।*
एवं बहुस्सुए भिक्खू, धम्मो कित्ती तहा सुयं ॥

वृ. 'यथा' इति दृष्टान्तोपन्यासे 'शङ्खे' जलजे 'पयो' दुग्धं 'निहितं' न्यस्तं दुहओवि'त्ति द्वाभ्यां प्रकाराभ्यां द्विधा, न शुद्धतादिना स्वसम्बन्धिगुणलक्षणेनैकेनैव प्रकारेण, किन्तु स्वसम्बन्ध्याश्रयसम्बन्धिगुणद्वयलक्षणेन प्रकारद्वयेनापीत्यपिशब्दार्थः, 'विराजते' शोभते, तत्र हि न तत् कलुषीभवति, न चाम्लतां भजते, नापि च परिस्रवति, 'एवम्' अनेन प्रकारेण बहुश्रुते 'भिक्खु'त्ति आर्षत्वाद् भिक्षौ-तपस्विनि, 'धर्मः' यतिधर्मः 'कीर्तिः' श्लाघा 'तथा' इति धर्मकीर्तिवत् 'श्रुतम्' आगमो, विराजत इति सम्बन्धः, किमुक्तं भवति ?-यद्यपि धर्मकीर्तिश्रुतानि निरुपलेपतादिगुणेन स्वयं शोभाभाञ्जि तथापि मिथ्यात्वादिकालुष्यविगमतो निर्मलतादिगुणेन शङ्ख इव पयो बहुश्रुते स्थितान्याश्रयगुणेन विशेषतः शोभन्ते, तान्यपि हि न तत्र मालिन्यम् अन्यथाभावं हानिं वा कदाचन प्रतिपद्यन्ते, अन्यत्र त्वन्यथाभूतभाजनस्थपयोवदन्यथाऽपि स्युः, वृद्धास्तु व्याचक्षते-

'यथे' त्यौपम्ये, 'संखंमि' संखभायणे 'पयं' खीरं 'निहितं' ठवितं न्यस्तमित्यर्थः, 'दुहतो' उभयतो संखो खीरं च, अहवा ठवंतओ खीरं च, संखे न परिस्सवति न य अंबी भवति, 'विरायति' सोभति, 'एव'मुपसंहारे अनुमाने वा 'बहुसुओ' सुत्तत्थविसारतो, जाणक इत्यर्थः, 'तस्स' एवं भिक्खुभायणे ठितस्स धम्मो भवति कित्ती जसो तथा सुयमाराधियं भवति, अपते ठितस्स

असुयमेव भवति, अहवा इहलोए परलोए य सोहइ पत्तदाई .अहवा एवंगुणजाइए भिक्खू बहुस्सुए भवति, धम्मो कित्ती जसो य हवइ, सुयमाराहियं हवइ. अहवा इहलोए परलोए य विरायइ, अहवा मीलेण य सुएण य" इति सूत्रार्थः ॥ पुनर्बहु- श्रुतस्तवमाह-

मू. (३४३) *जहा से कंबोयाणं, आइन्ने कंथए सिया ।*
आसे जवेण पवरे, एवं हवइ बहुस्सए ॥

वृ. 'यथा' येन प्रकारेण 'स' इति प्रतीतः 'काम्बोजदेशोद्भवानां प्रक्रमादश्वानां, निर्द्धारणे षष्ठी, 'आकीर्णः' व्याप्तः, शीलादिगुणैरिति गम्यते, 'कन्थकः' प्रधानोऽश्वो, यः किल हपच्छकलभृतकुतुपनिपतनध्वनेर्न सन्त्रस्यति, 'स्यात्' भवेत् 'अश्वः' तुरङ्गमः 'जवेन' वेगेन 'प्रवरः' प्रधानः 'एवम्' इत्युपनयः तत ईदृशो भवति बहुश्रुतः, जिनधर्मप्रपन्ना हि व्रतिनः काम्बोजा इवाश्वेषु जातिजवादिभिर्गुणैरन्यधार्मिकापेक्षया श्रुतशीलादिभिर्वरा एव, अयं त्वाकीर्णकन्थकाश्ववत् तेष्वपि प्रवर इति सूत्रार्थः ॥ किञ्च-

मू. (३४४) *जहाइन्नसमारूढे, सूरे दढपरक्कमे ।*
उभओ नंदिघोसेणं, एवं हवइ बहुस्सए ॥

वृ. यथा आकीर्णं- जात्यादिगुणोपेतं तुरङ्गमं सम्यगारूढः- अध्यासितः आकीर्णसमारूढः, सोऽपि कदाचित् कातर एव स्यादत आह 'शूरः' चारभटः दृढः- गाढः पराक्रमः- शरीरसाम- र्थ्यात्मको यस्य स तथा, 'उभउ'त्ति उभयतो वामतो दक्षिणतश्च यद्वाऽग्रतः पृष्ठतश्च 'नन्दीघोषेण' द्वादशतूर्यनिनादात्मकेन, यद्वा आशीर्वचनानि नान्दी जीयास्त्वमित्यादीनि तद्घोषेण बन्दिकोलाहलात्मकेन, लक्षणे तृतीया, एवं भवति बहुश्रुतः, किमुक्तं भवति ?- यथैवंविधः शूरो न केनचिदभिभूयते न चान्यस्तदाश्रितः, तथाऽयमपि जिनप्रवचनतुरङ्गाश्रितो हन्यत्पर- वादिदर्शनेऽपि चात्रस्तः तद्विजयं च प्रति समर्थः उभयतश्च दिनरजन्योः स्वाध्यायघोषरूपेण स्वपक्षपरपक्षयोर्वा चिरं जीवत्वसौ येनानेन प्रवचनमुद्दीपितमित्याद्याशीर्वचनात्मकेन नान्दीघोषेणोपलक्षितः परतीर्थिभिरतीव मदाबलिप्तैरपि नाभिभवितुं शक्यः, न चात्र प्रतपत्येतदाश्रितोऽन्योऽपि कथञ्चिज्जीयत इति सूत्रार्थः ॥ तथा-

मू. (३४५) *जहा करेणुपरिकिन्ने, कुंजरे सट्ठिहायणे ।*
बलवंते अप्पडिहए, एवं भवइ बहुस्सए ॥

वृ. 'यथा' करेणुकाभिः- हस्तिनीभिः परिकीर्णः- परिवृतो यः स तथा, न पुनरेकाक्येव 'कुञ्जरः' हस्तीषष्टिर्हायनान्यस्येति षष्टिहायनः- षष्टिवर्षप्रमाणः, तस्य हि एतावत्कालं यावत् प्रतिवर्षं बलोपचयः ततस्तदपचय इत्येवमुक्तम्, अत एव च 'बलवंते'त्ति बलं- शरीरसाम र्थ्यमस्यास्तीति बलवान् सन् अप्रतिहतो भवति, कोऽर्थः ?- नान्यैर्मदमुखैरपि मतङ्गजैः पराङ्मुखी- क्रियते, एवं भवति बहुश्रुतः, सोऽपि हि करेणुभिरिव परप्रसरनिरोधिनीभिरौत्पत्तिक्यादि- बुद्धिभिर्विद्याभिश्च विविधाभिर्वृतः षष्टिहायनतया चात्यन्तस्थिरमतिः, अत एव च बलवत्त्वेना- प्रतिहतो भवति, दर्शनोपहन्तृभिर्बहुभिरपि न प्रतिहन्तुं शक्यत इति सूत्रार्थः ॥ अन्यच्च-

मू. (३४६) *जहा से तिक्खसिंगे, जायक्खंधे विरायइ ।*
वसभे जूहाहिवती, एवं भवति बहुस्सुए ॥

वृ. यथा स तीक्ष्णे-निशिताग्रे शृङ्गे-विषाणे यस्य स तथा, जातः-अत्यन्तोपचितोभूतः स्कन्धः-प्रतीत एवास्येति जातस्कन्धः, समस्ताङ्गोपाङ्गोपचितत्वोपलक्षणं चैतत्, तदुपचये हि शेषाङ्गान्युपचितान्येवास्य भवन्ति, 'विराजते' विशेषेण राजते-शोभते 'वृषभः' प्रतीतो, यूथस्य गवां समूहस्याधिपतिः स्वामी यूथाधिपतिः सन्, एवं भवति बहुश्रुतः, सोऽपि हि परपक्षभेत्तृतया तीक्ष्णाभ्यां स्वशास्त्रपरशास्त्राभ्यां शृङ्गाभ्यामिवलोपलक्षितः गच्छगुरुकार्यधुरोधरणधौरेयतया च जातस्कन्ध इव जातस्कन्धः, अत एव च यूथस्य साध्वादिसमूहस्याधिपतिः-आचार्यपदवीं गतः सन् विराजते इति सूत्रार्थः ॥ अन्यच्च-

मू. (३४७) *जहा से तिक्खदाढे, ओदग्गे दुप्पहंसए।*
सीहे मियाण पवरे, एवं भवइ बहुस्सुए॥

वृ. यथा स तीक्ष्णाः-निशिता दंष्ट्राः-प्रतीता एव यस्य स तीक्ष्णदंष्ट्रः, 'उदग्रः' उत्कट उदग्रवयःस्थितत्वेन वा उदग्रः, अत एव 'दुप्पहंसए' ति दुष्प्रधर्ष एव दुष्प्रधर्षकः-अन्यैर्दुरभिभवः 'सिंहः' केशरी 'मृगाणाम्' आरण्यप्राणिनां 'प्रवरः' प्रधानो भवति, एवं भवति बहुश्रुतः, अयमपि हि परपक्षमेत्तृतया तीक्ष्णदंष्ट्राभिरिव नैगमादिनयैः प्रतिभादिगुणोदग्रतया च दुरभिभवः इत्यन्यतीर्थानां मृगस्थानीयानां प्रवर एवेति सूत्रार्थः ॥ अपरं च-

मू. (३४८) *जहा से वासुदेवे, संखचक्कगदाधरे।*
अप्पडिहयबले जोहे, एवं भवइ बहुस्सुए॥

वृ. यथा स 'वासुदेवः' विष्णुः, शङ्खश्च-पाञ्चजन्यः चक्रं च-सुदर्शनं गदा च-कौमोदकी शङ्खचक्रगदास्ताधारयति-वहतीति शङ्खचक्रगदाधरः, अप्रतिहतम्-अन्यैः स्खलयितुमशक्यं बलं-सामर्थ्यमस्येत्यप्रतिहतबलः, किमुक्तं भवति?-एकं सहजसामर्थ्यवान्यच्च तथाविधायोधान्वित इति, युध्यतीति योधः-सुभटो भवति, एवं भवति बहुश्रुतः, सोऽपि ह्येकं स्वाभाविकप्रतिभाप्रागल्भ्यवान् अपरं शङ्खचक्रगदाभिरिव सम्यग्दर्शनज्ञानचारित्रैरुपेत इति, योध इव योधः कर्मवैरिपराभवं प्रतीति सूत्रार्थः ॥ अपरं-

मू. (३४९) *जहा से चाउरंते, चक्कवट्टी महिड्ढिए।*
चोद्दसरयणाहिवई, एवं हवइ बहुस्सुए॥

वृ. यथा स चतसृष्वपि दिक्ष्वन्तः-पर्यन्त एकत्र हिमवदन्यत्र च दिक्त्रये समुद्रः स्वसम्बन्धितयाऽस्येति चतुरन्तः, चतुर्भिर्वा-हयगजरथनरात्मकैरन्तः-शत्रुविनाशात्मको यस्य स तथा, 'चक्रवर्ती' षट्खण्डभरताधिपतिः, महती ऋद्धिः-समृद्धिरस्येति महर्द्धिकः-दिव्यानुकारिलक्ष्मीकः, चतुर्दश च तानि रत्नानि च चतुर्दशरत्नानि, तानि चामूनि-

"सेनावइ गाहावइ पुरोहिय गय तुरंग वड्ढइग इत्थी।
चक्कं छत्तं चम्मं मणि कागिणी खग्ग दंडो य॥"

तेषामधिपतिः चतुर्दशरत्नाधिपतिः, 'एवं भवति बहुश्रुतः' सोऽपि ह्यासमुद्रमहीमण्डलख्यातकीर्तिः तिसृषु दिक्ष्वन्यत्र च बन्दीभूतविद्याधरवृन्द इति दिक्चतुष्ट्यापिकीर्तितया चतुरन्त उच्यते, चतुर्भिर्वा दानादिधर्मैरन्तः कर्मवैरिविनाशोऽस्येति चतुरन्तः, ऋद्धयशःसर्वौषध्यादयश्चक्रवर्तिनमपि योधयेदित्येवंविधपुलाकलब्ध्यादयश्च महत्य एवास्य भवन्ति, सन्ति चास्यापि चतुर्दशरत्नं

तपसानि सकलातिशयनिधानानि पूर्वाणीति कथं न चक्रवर्तितुल्यताऽस्येति सूत्रार्थः ॥ अन्यच्च

मू. (३५०) जहा से सहस्सक्खे, वज्जपाणी पुरंदरे।
सक्के देवाहिवई, एवं हवइ बहुस्सुए ॥

वृ. यथा स सहस्रमक्षीण्यस्येति सहस्राक्षः - सहस्रलोचनः, अत्र च सम्प्रदायः 'सहस्सक्खत्ति पंच मंतिसया देवाणं तस्स, तेसिं सहस्सं अच्छीणं, तेसिं नीईए विकामंति, अहवा जं सहस्सेणं अच्छीणं दीसति तं सो दोहिं अच्छीहिं अब्भहियगाणं पेच्छती'ति । वज्रंवज्राभिधानमायुधं पाणावस्येति वज्रपाणिः, लोकोक्तत्वा च पूर्दारणात् पुरन्दरः, क इंदगित्याहशक्रो 'देवाधिपतिः' देवानां स्वामी, एवं भवति बहुश्रुतः, सोऽपि हि श्रुतज्ञानेनाशेषातिशयरत्ननिधानतुल्येन लोचनसहस्रेणेव जानीते, यश्चैवं तस्यैवविधत्वोपलक्षणं, वज्रमपि लक्षणं पाणौ सम्भवतीति वज्रपाणिः, गूढ शरीरमप्युच्यते, तद्विकृष्टतपोऽनुष्ठानतो दारयतीव दारयतीति पुरन्दरः, शक्रवत् देवैरपि धर्मेऽत्यन्तनिश्चलतया पूज्यत इति तत्पतिरप्युच्यते, तथा चाह-"देवावि तं नमंसंति, जस्स धम्मे सया मणो"त्ति सूत्रार्थः ॥ अपि च-

मू. (३५१) जहा से तिमिरविद्धंसे, उत्तिट्ठंति दिवागरे।
जलंते इव तेएणं, एवं भवइ बहुस्सुए ॥

वृ. यथा सः तिमिरम्-अन्धकारं विध्वंसयति-अपनयति तिमिरविध्वंसः, 'उत्तिष्ठन्' उद्गच्छन् दिवाकरः' सूर्यः, स हि क्षणेनैवाशेषाक्रान्तभरतैकक्षेत्रतां भजते अवतरंस्तं न तथैत्येवं विशिष्यते, यद्वा उत्थानं-प्रथममुद्गमनं तत्र चायं न तीव्र इति तीव्रत्वाभावख्यापकमेतत्, अन्यदा हि तीव्रोऽयमिति न सम्यग् दृष्टान्तः स्यात्, 'ज्वलन्निव' ज्वालां मुञ्चन्निव 'तेजसा' महसा, एवं भवति बहुश्रुतः, सोऽपि ह्याज्ञानरूपतिमिरापहारकः संयमस्थानेषु विशुद्धविशुद्धतराध्यवसायत उपसर्पंस्तपस्तेजसा च ज्वलन्निव भवतीति सूत्रार्थः ॥ अन्यच्च-

मू. (३५२) जहा से उडुवई चंदे, नक्खत्तपरिवारिए।
पडिपुन्ने पुन्निमासीए, एवं भवइ बहुस्सुए ॥

वृ. यथा सः उडूनां-नक्षत्राणां पतिः-प्रभुः उडुपतिः, क इत्याह-'चन्द्रः' शशी, 'नक्षत्रैः' अश्विन्यादिभिः, उपलक्षणत्वाद्ग्रहैस्ताराभिश्च परिवारः-परिकरः सञ्जातोऽस्येति परिवारितः नक्षत्रपरिवारितः 'प्रतिपूर्णः' समस्तकलोपेतः, स चेदेक कदा भवति ? अत आह-पौर्णमास्याम्। इह च चन्द्र इत्युक्ते मा भूत्रामचन्द्रादावपि सम्प्रत्ययः इत्युडुपतिग्रहणं, उडुपतिरपि च कश्चिदेकाक्येव भवति मृगपतिवत् अत उक्तं नक्षत्रपरिवारितः, सोऽप्यपरिपूर्णोऽपि द्वितीयादिषु सम्भवतीति परिपूर्णः पौर्णमास्यामित्युक्तं, एवं भवति बहुश्रुतः, असावपि हि नक्षत्राणामिवानेकसाधूनामधिपतिः तथा तत्परिवारितः सकलकलोपेतत्वेन प्रतिपूर्णश्च भवतीति सूत्रार्थः ॥

मू. (३५३) जहा से सामाइयाणं, कोट्ठागारे सुरक्खिए।
नानाधन्नपडिपुन्ने, एवं हवइ बहुस्सुए ॥

वृ. यथा स 'सामाइयाणं'ति समाजः-समूहस्तं समवयन्ति सामाजिकाः-समूहवृत्तयो लोकास्तेषां, पठन्ति च-'सामाइयंगाणं'ति तत्र च श्यामा-अतसी तदादीनि च तानि अङ्गानी च उपभोगाङ्गतया श्यामाद्यङ्गानि धान्यानि तेषां 'कोट्ठागारे'ति कोष्ठा-धान्यपल्यास्तेषामगारं

तदाधारभूतं गृहम्, उपलक्षणत्वादन्यदपि प्रभूतधान्यस्थानं, यत्र प्रदीपनकादिभयात् धान्यकोष्ठाः क्रियन्ते तत् कोष्ठागारमुच्यते, यदिवा कोष्ठान् आ-समन्तात् कुर्वन्ति तस्मिन्निति कोष्ठकागारः, "अकर्तरि च कारके संज्ञायां" मिति घञ्, तथा सुष्ठुप्राहरिकपुरुषादिव्यापारणद्वारेण रक्षितः-पालितो दस्युमूषिकादिभ्यः सुरक्षितः, स च कदाचित् प्रतिनियतधान्यविषयोऽप्रतिपूर्णश्च स्यात् अत आह-नाना-अनेकप्रकाराणि धान्यानि-शालिमुद्गादीनि तैः प्रतिपूर्णो-भृतः नानाधान्यप्रतिपूर्णः, आद्यपक्षे तु विशेषणं नपुंसकलिङ्गतया नेयं, एवं भवति बहुश्रुतः, असावपि सामाजिकलोकानामिव गच्छवासिनामुपयोगिभिर्नानाधान्यैरिवाङ्गोपाङ्गप्रकीर्णकादिभेदैः श्रुतज्ञानविशेषैः प्रतिपूर्ण एव भवति, सुरक्षितश्च प्रवचनाधारतया, यत उक्तम "जेन कुलं आयत्तं तं पुरिसं आयरेण रक्खेह" इत्यादीति सूत्रार्थः ॥ अपि च-

मू. (३५४) *जहा सा दुमाण पवरा, जंबूनाम सुदंसणा।*
अनाढियस्स देवस्स, एवं हवइ बहुस्सए॥

वृ. यथा सा द्रुमानां मध्ये प्रवरा-प्रधाना जम्बूः नाम्ना-अभिधानेन सुदर्शना नाम सुदर्शना, न हि यथेयममृतोपमफला देवाद्या श्रयश्च तथाऽन्यः कश्चिद् द्रुमोऽस्ति, द्रुमत्वं फलव्यवहारश्चास्यास्तत्प्रतिरूपलयैव, वस्तुतः पार्थिवत्वेनोक्तत्वात्, वज्रवैडूर्यादिमयानि हि तन्मूलादीनि तत्र तत्रोक्तानि, सा च कस्येत्याह-'अनाहतस्य' अनाहतनाम्नो 'देवस्य' जम्बूद्वीपाधिपतेर्व्यन्तरसुरस्य आश्रयत्वेन सम्बन्धिनी, एवं भवति बहुश्रुतः, सोऽपि ह्यमृतोपमफलकल्पश्रुतान्वितो देवादीनामपि च पूज्यतयाऽभिगमनीयः शेषद्रुमोपमसाधुषु च प्रधान इति सूत्रार्थः ॥

मू. (३५५) *जहा सा नईण पवरा, सलिला सागरंगमा।*
सीया नीलवंतपवहा, एवं हवइ बहुस्सए॥

वृ. यथा सा 'नदीना' सरितां 'प्रवरा' प्रधाना सलिलं-जलमस्यामस्तीति, अर्शआदेराकृतिगणत्वादच्प्रत्ययलिला-नदी, सागरं-समुद्रं गच्छतीति सागरङ्गमा-समुद्रपातिनित्यर्थः, न तु क्षुद्रनदीवदपान्तराल एव विशीर्यते, 'शीता' शीतानाम्नी, नीलवान्-मेरोरुत्तरस्यां दिशि वर्षधरपर्वतस्ततः प्रभवति पानान्तरतः प्रवहति वा नीलवत्प्रभवा नीलवत्प्रवहा वा, 'एवं' शीतानदीवद् भवति बहुश्रुतः, असावपि हि सरितामिवान्यसाधूनामशेषश्रुतज्ञानिनां वा मध्ये प्रधानो विमलजलकल्पश्रुतज्ञानान्वितश्च, तथा सागरमिव मुक्तिमेवासौ गच्छति, तदुचितानुष्ठान एवास्य प्रवृत्तत्वात्, न ह्यन्यदर्शनिनामिव देवादिभव एवास्य विवेकिनो वाञ्छा, तथा च कथमस्य तेषामिव प्रायोऽपान्तरालावस्थानं ?, नीलवत्तुल्याच्च उच्छ्रितोच्छ्रितमहाकुलादेवास्य प्रसूतिः, कथमिवान्यथैवंविधयोग्यतासम्भव इति सूत्रार्थः ॥ किञ्च-

मू. (३५६) *जहा से नगाण पवरे, सुमहं मंदरे गिरि।*
नानोसहीपज्जलिए, एवं हवइ बहुस्सुए॥

वृ. यथा स 'नगानां' पर्वतानां मध्ये 'प्रवरः' अतिप्रधानः 'सुमहान्' अतिशयगुरुरत्युच्च इतियावत्, 'मन्दरः' मन्दराभिधानः, कः पुनरसौ ? इत्याह-'गिरिः, किमुक्तं भवति ?-मेरुपर्वतः, 'नानौषधिभिः' अनेकविधविशिष्टमाहात्म्यवनस्पतिविशेषरूपाभिः प्रकर्षेण ज्वलितोद्योतः नानौषधिप्रज्वलितः, ता ह्यतिशायिन्यः प्रज्वलन्त्य एवासत इति तद्योगादसावपि प्रज्वलित इत्युक्तः, यद्वा प्रज्वलिता नानौषधयोऽस्मिन्निति प्रज्वलितनानौषधिः, प्रज्वलितशब्दस्य तु

परनिपातः प्राग्वत्, 'एवम्' इति मन्दरवत् भवति बहुश्रुतः, श्रुतमाहात्म्येन ह्यसावत्यन्तस्थिर इति शैवगिरिकल्पापगस्थिरमाध्वपेक्षया प्रवर एव भवति, तथाऽन्धकारेऽपि प्रकाशनकर्त्र्यन्विता आमर्शौषध्यादयस्तत्रातीप्रतीता एवेति सूत्रार्थः ॥ किं बहुना ?

मू. (३५७) *जहा से सयंभूरमणे, उदही अक्खओदए।*
नानारयणपडिपुन्ने, एवं भवइ बहुस्सुए।

वृ. यथा स 'स्वम्भूरमणः' स्वयम्भूरमणाभिधानः 'उदधिः' समुद्रः अक्षयम्-अविनाश्युदकं-जलं यस्मिन् स तथा, नानारत्नैः-नानाप्रकारैर्मरकतादिभिः प्रतिपूर्णो-भृतः नानारत्नप्रतिपूर्णः, एवं भवति बहुश्रुतः, अयमपि ह्यक्षयसम्यग्ज्ञानोदको नानाऽतिशयरत्नवांश्च भवति, यदिवाऽक्षत उदयः-प्रादुर्भावो यस्य सोऽक्षतोदय इति सूत्रार्थः ॥ साम्प्रतमुक्तगुणानुवादतः फलोपदर्शनतश्च तस्यैव माहात्म्यमाह-

मू. (३५८) *समुद्दगंभीरसमा दुरासया, अचक्किया केणइ दुप्पहंसया।*
सुयस्स पुन्ना विउलस्स ताइणो, खवेतु कम्मं गइमुत्तमं गया॥

वृ. 'समुद्दगंभीरसम'त्ति आर्षत्वादगाम्भीर्येण-अलब्धमध्यात्मकेन गुणेन समा गाम्भीर्यसमाः समुद्रस्य गाम्भीर्यसमाः समुद्रगाम्भीर्यसमाः, 'दुरासय'त्ति दुःखेनाश्रीयन्ते-अभिभवबुद्धयाऽऽसाद्यन्ते वा-जेतुं सम्भाव्यन्ते केनापीति दुराश्रया दुरासदा वा, अत एव 'अचक्किय'त्ति अचकिताः-अत्रासिताः, 'केनचिदि'ति परीषहादिना परप्रवादिना वा, तथा दुःखेन प्रधर्ष्यन्ते-पराभूयन्ते केनापीति दुष्प्रधर्षास्त एव दुष्प्रधर्षकाः, क एवंविधाः ? इत्याह-'सुयस्स पुन्ना विउलस्स'त्ति-सुब्व्यत्ययाच्छ्रुतेन-आगमेन पूर्णाः-परिपूर्णा विपुलेन-अङ्गानङ्गादिभेदतो विस्तीर्णेन तायिनः त्रायिणो वा, एवंविधाश्च बहुश्रुता एव, तानेव फलतो विशेषयितुमाह-'क्षपयित्वा' विनाश्य 'कर्म्म' ज्ञानावरणादि, गम्यत इति गतिस्ताम्, 'उत्तमां' प्रधानां, मुक्तिमित्यर्थः, 'गताः' प्राप्ताः, उपलक्षणत्वाद्गच्छन्ति गमिष्यन्ति च। इह चैकवचनप्रक्रमेऽपि बहुवचननिर्देशः, पूज्यताख्यापनार्थं व्याप्तिप्रदर्शनार्थं चेति सूत्रार्थः ॥ इत्थं बहुश्रुतस्य गुणवर्णनात्मिकां पूजामभिधाय शिष्योपदेशमाह-

मू. (३५९) *तम्हा सुयमहिट्ठेज्जा, उत्तमट्ठगवेसए।*
जेणऽप्पाणं परं चेव, सिद्धिं संपाउणिज्जासि॥ त्तिबेमि

वृ. यस्मादमी मुक्तिगमनावसाना बहुश्रुतगुणाः तस्मात् 'श्रुतम्' आगमम् 'अधितिष्ठेत्' अध्ययनश्रवणचिन्तनादिनाऽऽश्रयेत्, उत्तमः-प्रधानोऽर्थः-प्रयोजनम्-उत्तमार्थः, स च मोक्ष एव तं 'गवेषयति' अन्वेषयतीति उत्तमार्थगवेषकः, येन किं स्यादित्याह-'येन' श्रुताश्रवणेन 'आत्मानं' स्वं 'परं' चान्यं तपस्व्यादिकं 'एव' अवधारणे भिन्नक्रमश्च सम्प्रापयेदित्यस्यानन्तरं द्रष्टव्यः, ततः 'सिद्धिं' मुक्तिगतिं 'संपाउणिज्जासि'त्ति सम्यक् प्रापयेदेव, नेह कश्चित् सन्देह इति सूत्रार्थः ॥ 'इतिः' परिसमाप्तौ 'ब्रवीमि' इति पूर्ववत्, उक्तोऽनुगमः, सम्प्रति नयास्तेऽपि पूर्ववदेव ॥

अध्ययनं - ११ समाप्तम्

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता उत्तराध्ययन सूत्रे एकादश अध्ययनस्य भद्रबाहुस्वामि विरचिता निर्युक्तिः एवं शान्त्याचार्य विरचिता टीका परिसमाप्ता

अध्ययनं - १२- हरिकेशीय

वृ. व्याख्यातमेकादशमध्ययनमधुना द्वादशमारभ्यते, अस्य चायमभिसम्बन्धः अनन्तराध्ययने बहुश्रुतपूजोक्ता, इह तु बहुश्रुतेनापि तपसि यत्नो विधेय इति ख्यापनार्थं तपःसमृद्धिरुपवर्ण्यत इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चतुरनुयोगद्वारव्याख्यां प्राग्वत् तावद्यावन्नामनिष्पन्ननिक्षेपेऽस्य हरिकेशीयमिति नाम, अतो हरिकेशनिक्षेपमाह निर्युक्तिकृत्-

नि.[३१८] नामं ठवणादविए० ॥
नि.[३१९] जाणयसरीरभविए० ॥
नि.[३२०] हरिएसनामगोअं वेअंतो भावओ अ हरिएसो ।
तत्तो समुट्ठियमिणं हरिएसिज्जंति अज्झयणं ॥

वृ. हरिकेशे निक्षेपश्चतुर्विधो नामादिः, तत्र नामस्थापने क्षुण्णे, द्विविधो भवति 'द्रव्ये' द्रव्यविषयः आगमनोआगमतश्च, तत्र आगमतो ज्ञाताऽनुपयुक्तो, नोआगमतश्च स त्रिविधो-ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तश्च, स पुनः त्रिविधः-एकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्च, हरिकेशनामगोत्रं वेदयन् भावतस्तु हरिकेश उच्यते, ततोऽभिधेयभूतात् समुत्थितमिदं हरिकेशीयं इत्यध्ययनमुच्यते इति शेषः, इति गाथात्रयार्थः ॥ सम्प्रति हरिकेशवक्तव्यतामाह निर्युक्तिकृत्

नि.[३२१] पुव्वभवे संखस्स उ जुवरन्नो अंतिअं तु पव्वज्जा ।
जाईमयं तु काउं हरिएससकुलंमि आयाओ ॥
नि.[३२२] महुराए संखो खलु पुरोहिअसुओ अ गयडरे आसी ।
दट्ठूण पाडिहेरं हुयवहरत्थाइ निक्खंतो ॥
नि.[३२३] हरिएसा चंडाला सोवाग मयंग वाहिरा पाणा ।
साणघणा य मयासा सुसाणवित्ती य नीया य ॥
नि.[३२४] जम्मं मयंगतीरे वाणारसिगंडितिदुगवनं च ।
कोसलिएसु सुभद्दा इसिवंता जन्नवाडंमि ॥
नि.[३२५] बलकुट्टे बलकोट्टो गोरी गंधारि सुविनगवसंतो ।
नामनिरुत्ति छगसप्प संभवो दुंदुहे बीओ ॥
नि.[३२६] भद्दएणेव हो अव्वं पावइ भद्दाणि भद्दओ ।
सविसो हम्मए सप्पो, भेरुंडो तत्थ मुच्चइ ॥
नि.[३२७] इत्थीण कहित्थ वट्टई, जनवयरायकहित्थ नट्टई ।
पडिगच्छह रम्म तिंदुअं, अइसहसा बहुमुंडिए जने ॥

वृ. एतदक्षरार्थः सुगम एव, नवरं 'अंतियं तु' इति अन्तिके-सपोमे, 'तुः' पूरणे, 'पाडिहेरं'ति प्रतिहारो-दौवारिकस्तद्वत्सदा सन्निहितवृत्तिर्देवताविशेषोऽपि प्रतिहारस्तस्य कर्म्म प्रातिहार्यं, तच्चेह हुतवहरक्षायाः शीतलत्वं, तथा हरिकेशाश्चाण्डालाः, श्वमाकाः मातङ्गा बाह्याः पाणाः श्वघनाश्च मृताशाः श्मशानवृत्तयश्च नीचाश्चेत्येकार्थिकाः, तथा 'मयङ्गतीरे'त्ति मृतेव मृता विवक्षितभूदेशे तत्कालाप्रवाहिणी सा चासौ गङ्गा च मृतगङ्गा तस्यास्तीरं तस्मिन् ऋषिवन्ता-

ऋषिप्रव्रज्या, तथा भद्र एव भद्रको यो न कस्यचिदशुभे प्रवर्तते, भद्राणि-कल्याणानि, तथा स्त्रीणां कथा तासां नेपथ्याभरणभाषादिविषया 'अत्र' अस्मिन् यत्राश्रमे प्रवर्तते, 'जनव यरायकह'त्ति जनपदकथा मालवकादिदेशप्रशंसानिन्दात्मिका राजकथा च राज्ञां शौर्यादिगुणवर्णनादिरूपा, 'पडिगच्छह'त्ति तिव्यत्ययात् प्रतिगच्छामो-निवर्त्तावहे, 'अरी'त्यामन्त्रणे 'सहसे'त्यपर्यालोच्य, कोऽर्थः ? अपर्यालोचितयोग्यतावि शेषो, 'बहुमुण्डितो जनो' मुण्डमात्रेणैव गृहीतदीक्षः प्रायो जनो, गृहीतभावदीक्षस्तु स्वल्प एवेति भावः ।

तथेहाद्यगाथाया एव पादद्वयं द्वितीयगाथया स्पष्टीकृतं, ततस्तृतीयपादः स्पष्ट एवेति, शेषगाथाभिश्चतुर्थपादस्य पर्यायदर्शनतस्तत्सूचितार्थाभिधानतश्चाभिव्यञ्जनं। भावार्थस्तु कथानकादवसेयः, तत्र च सम्प्रदायः-महुराए नयरीए संखो नाम जुवराया, सो धम्मं सोउं पव्वतितो, विहरंतो य गयउरं गओ। तहिं च भिक्खं हिंडंतो एगं रत्थं पत्तो, सा य किर अतीव उण्हा मुग्गुरसमा, उण्हकालं न सक्कति पुरोहियपुत्तो पुच्छति-एसा रत्था निव्वहति ?, सो पुरोहियस्स पुत्तो चिंतेति

एस डज्झउत्ति निव्वहति इइ वुत्तं, सो पडिओ, इयरो य अलिंदट्ठिओ पेच्छति अतुग्गियाए गईए वच्चंतं तं, सो आसंकाए उइण्णो तं रत्थं, जाव सा तस्स तवप्पभावेणं सीतीभूया, आउट्टो-अहो इमो महातवस्सी मए आसादितो, उज्जाणट्ठियं गन्तुं भणति-भगवं ! मए पावकम्मं कयं, कहं वा तस्स मुच्चेज्जामि ?, तेन भण्णति-पव्वयह, पव्वइतो, जातिमयं रूवमयं च काउं मओ, देवलोगगमनं, चुओ संतो मयगंगाए तीरे बलकोट्ठा नाम हरिएसा, तेसिं अहिवई बलकोट्ठो नाम, तस्स दुवे भारियाओ-गोरी गंधारी य, गोरीए कुच्छिंसि भण्णति-महप्पा ते पुत्तो भविस्सति, समएण पसूया, दारगो जाओ काली विरूओ पुव्वभवजाइरूवमयदोसेणं, बलकोट्टेसु जाउत्ति बलो से नामं कयं, भंडणसीलो असहणो।

अन्नया ते छणेण समागया भुंजंति सुरं च पिबंति, सोऽवि अणियंणियं करेइत्ति निच्छूढो अच्छति समंतओ पलोएंतो, जाव अही आगतो, उट्ठिया सहसा सव्वे, सो अही नेहिं मारिओ, अन्तमुहुत्तस्स भेरुंडसप्पो आगतो, भेरुंडो नाम दिव्वगो, भीया पुनो उट्ठिया, नाए दिव्वगो-त्तिकाऊण मुक्को, बलस्स चिंता जाया-अहो सदोसेण जीवा किलेसभागिणो भवंति-तम्हा

"भद्दएणेव होयव्वं, पावंति भद्दाणि भद्दओ।
सविसो हम्मति सप्पो, भेरुंडो तत्थ मुच्चति ॥"

एवं चिंतेंतो संबुद्धो पव्वतिओ। विहरंतो खाणारसिं गओ, उज्जाणं तेंदुयवणं, तेंदुगं नाम जक्खाययणं, तत्थ गंडीतेंदुगो नाम जक्खो परिवसति, सो तत्थ अनुत्तरेउं ठितो, जक्खो उवसंतो, अन्नो जक्खो अन्नहिं वणे वसति, तत्थवि अन्ने बहू साहूणो ठिया, सो य गंडीजक्खं पुच्छति-न दीससि ?, पुणाइं तेन भणियं-साहुं पज्जुवासामि, तत्थ य तेंदुएण दिट्ठो, सोऽवि उवसंतो, सो भणति-ममवि उज्जाणे बहवे साहू ठिया, एहि पासामो, ते गया, तेऽपि समावत्तीए साहुणो विकहमाना अच्छंति, ततो सो जक्खो इमं भणति-

"इत्थीण कहउत्थ वट्टइ, जनवयरायकहत्थ वट्टई।
पडिगच्छह रम्म तेंदुगं, अइसहसा बहुमुंडिए जने ॥"

अह अन्नया जक्खायतणं कोसलियरायधूया भद्दा नाम पुप्फचूयमादी गहाय अच्चिरं निग्गया पयाहिणं करेमाना तं दट्ठूण कालं विगरालं छित्तिकाऊण निट्ठुहति, जक्खेण रुद्देण अन्नइट्ठा काय, नीया नोयघरं, अगवेसिया भणंति ते-नवरं मुंचामि जइ नं तस्सेव देह, तं च साहति-जहा एईए सो साहू ओदूहो, रन्नावि जीवउत्तिकाऊण दिन्ना, महत्तरियाहिं समं तत्थाणीया, रन्नि ताहिं भणंति-वच्च पतिसगासंति, पविट्ठा जक्खायतणं, सो पडिमं ठिओ नेच्छति, ताहे जक्खोवि इसिसरीरं छाइऊण दिव्वरूवं दंसेति, घुणो मुणिरूवं, एवं सव्वरत्तिं वेलंबिया, पभाए नेच्छएत्ति काऊणं पविसंती सघरं पुरोहिएण गया भणिओ-एसा रिसिघज्जा बंभणाणं कप्पइत्ति, दिन्ना तस्सेव। सो य जन्नं दिक्खेज्जिउकामो सा अन्नेन लद्धा, साविजन्नपत्तित्तिकाऊण दिक्खिया।

इत्युक्तः सम्प्रदायोऽवसतिश्च नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिष्पन्नस्यावसरः, स च सूत्रे सति सम्भवत्यतः सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्

मू.(३६०) सोवगकुलसंभूओ, गुणुत्तरधरो मुनी।
हरिएस बलो नाम, आसि भिक्खू जिइंदिओ॥

वृ. श्वपाकः-चाण्डालास्तेषां कुलम्-अन्वयस्तस्मिन् सम्भूतः-समुत्पन्नः श्वपाककुल-सम्भूतः, तत्किं तत्कुलोत्पत्त्यनुरूप एवायमुत नेत्याह-गुणेषूत्तराः-प्रधाना गुणोत्तराः-ज्ञानादयः तान् धारयति गुणोत्तरधरः, पठन्ति च-'अनुत्तरधरे'त्ति, तत्र न विद्यते उत्तरम्-अन्यत्प्रधानमेषा-मित्यनुत्तराः, ते च प्रक्रमात्प्रकर्षप्राप्ता ज्ञानादय एव गुणास्तान् धारयत्यनुत्तरोधरो, यद्वा अनुत्तरान् गुणान् धारयतीत्यनुत्तरधर इति मयूरव्यंसकादिषु द्रष्टव्यो, मुणति-प्रतिजानीते सर्व्वविरतिमिति मुनिः, श्वपाककुलोत्पन्नोऽपि कदाचित्संवासादिनाऽन्यथैव प्रतीतः स्यादत आह हरिकेशः सर्वत्र हरिकेशतयैव प्रतीतो बलो नाम-बलाभिधानः आसद्-अभूत, तस्य च मुनित्वं प्रतिज्ञा-मात्रेणापि स्यादत आह-'भिक्खू'त्ति भिनत्ति-यथाप्रतिज्ञातेनानुष्ठानेन क्षुधमष्टविधं वा कर्म्मेति भिक्षुः, अत एव जितानि-वशीकृतानीन्द्रियाणि-स्पर्शनादीन्यनेनेति जितेन्द्रिय इति सूत्रार्थः॥

मू.(३६१) इरिएसणभासाए, उच्चारसमिईसु य।
जओ आयाणनिक्खेवे, संजओ सुसमाहिओ॥

वृ.ईरणमीर्य्या एष्यत इत्येषणा अनयोर्द्वन्द्वस्तताभ्यां सहिता भाष्यत इति भाषा ईर्येषणा-भाषेति मध्यमपदलोपी समासः, तस्यां, तथा उच्चारं-पुरीषपरिष्ठापनमपीहोच्चार उक्तः, प्रश्रवणपरिष्ठापनोपलक्षणं चैतत्, तद्विषया समितिः-सम्यग्गमनं, तत्र सम्यक्प्रवर्त्तनमितियावत्, उच्चारसमितिः, तस्यां च, यतत इति यतो-यत्नवान्, तथा आदानं च-ग्रहणं पीठफलकादे-र्निक्षेपश्च-स्थापनं तस्यैव आदाननिक्षेपं, तत इहापि चकारानुवृत्तेस्तस्मिंश्च, इह च 'उच्चार-समिएसु'त्ति एकत्वेऽपि बहुवचनं सूत्रत्वात्, समितिशब्दश्च मध्यव्यवस्थितो डमरुक-मणिरिवाद्यन्तयोरपि सम्बध्यते, ततश्च ईर्यासमितावेषणासमितौ भाषासमितावादाननिक्षेप-समितावितियोज्यं, यद्वा ईर्येषणाभाषोच्चारमितिष्वत्येकमेव पदं, 'भासाए' इति च एकारोऽ-लाक्षणिकः, स चैवं कोदृगित्याह-संयतः-संयमान्वितः सुसमाहितः-सुष्ठुसमाधिमानिति सूत्रार्थः॥ तथा-

मू.(३६२) मनगुत्तो वयगुत्तो, कायगुत्तो जिइंदिओ।

भिक्खट्ठा बंभइज्जंमि, जन्नवाडमुवट्ठिओ ॥

वृ.मनोगुप्त्या-मनोनिबन्धनात्मिकया गुप्तः-संवृतो मनोगुप्तो, मध्यमपदलोपी समासः, मनो गुप्तमस्येति वा मनोगुप्तः, आहिताग्न्यादित्वाच्च गुप्तशब्दस्य परनिपातः, एवं वाग्गुप्तो-निरुद्धवाक्प्रसरः, कायगुप्तः, असत्कार्यादिनिवृत्तः, जितेन्द्रिय इत्यर्थः, [illegible] कादाचित्कत्वनिराकरणार्थमतिशयख्यापनार्थं वा, 'भिक्षार्थं' भिक्षानिमित्तं, न तु निष्प्रयोजनमेव, निष्प्रयोजनगमनस्यागमे निषिद्धत्वात्, 'बंभइज्जंमि'त्ति ब्राह्मणां-ब्राह्मणानामिज्या-यजनं यस्मिन् सोऽयं ब्राह्मेज्यस्तस्मिन्, 'जन्नवाडं'ति यज्ञवाटे यज्ञपाटे वा 'उपस्थितः' प्राप्त इति सूत्रार्थः ॥ त च तत्राऽऽयान्तमवलोक्य तत्रत्यलोका यदकुर्व्वंस्तदाह-

मू.(३६३) तं पासिऊणमेज्जंतं, तवेण परिसोसियं ।
पंतोवहिउवगरणं, उवहसंति अणारिया ॥

वृ.'त'मिति बलनामानं मुनिं 'पासिऊणं'ति दृष्ट्वा-निरीक्ष्य 'एज्जंत'न्ति आयान्तमा-गच्छन्तं तपसा-षष्ठाष्टमादिरूपेण परि-समन्ताच्छोषितम्-अपचितीकृतमांसशोणितं कृशीकृत मित्यावत् परिशोषितं, तथा प्रान्तं-जीर्णमलीनत्वादिभिरसारमुपधिः-वर्षाकल्पादिः स एव च उपकरणं-धर्म्मशरीरोपष्टम्भहेतुरस्येति प्रान्तोपध्युपकरणस्तं, यद्वोपधिः स एवोपकरणम्-औपग्रहिकं, द्वन्द्वगर्भश्च बहुव्रीहिः, 'उवहसंति'त्ति उपहसन्ति आर्याः-उक्तनिरुक्ता न तथा अनार्याः, यद्वा अनार्या-म्लेच्छाः, ततश्च साधुनिन्दादिना अनार्या इव अनार्या इति सूत्रार्थः ॥

कथं पुनरनार्याः ?, कथं चोपहसितवन्तस्ते ? इत्याह-

मू.(३६४) जाइमयं पडिथद्धा, हिंसगा अजिइंदिया ।
अबंभचारिणो बाला, इमं वयणमब्बवी ॥

मू.(३६५) कयरे आगच्छई दित्तरूवे ?, काले विकराल फुक्कनासे ।
ओमचेलए पंसुपिसायभूए, संकरदूसं परिहरिय कंठे ॥

वृ. जातिमिदो-जातिदर्प्पो यदुत ब्राह्मण वर्यामति तेन प्रतिस्तब्धाः पाठान्तरतः प्रतिबद्धा वा ये ते तथाप 'हिंसकाः' प्राण्युपमर्दकारिणः 'अजितेन्द्रियाः' न वशीकृतस्पर्शनादयोऽत एवाब्रह्म-मैथुनं तच्चरितुं-आसेवितुं शीलं धर्म्मो वा येषां ते ऽमी अब्रह्मचारिणो, वर्ण्यते हि तन्मते मैथुनमपि-

"धर्म्मार्थं पुत्रकामस्य, स्वदारेष्वधिकारिणः ।
ऋतुकाले विधानेन, तत्र दोषो न विद्यते ॥"

तथा 'अपुत्रस्य गतिर्नास्ती'त्यादि, अत एव बाला इव बालक्रीडितानुकारिण्यग्निहोत्रादिषु तत्प्रवृत्तेः, उक्तं हि केनचिद्-"अग्निहोत्रादिकं कर्म, बालक्रीडेति लक्ष्यते" ईदृशास्ते किमि-त्याह-'इदं' वक्ष्यमानलक्षणं 'वचनं' वचः 'अब्बवि'त्ति आर्षत्वाद्वचनव्यत्ययेन अब्रुवन्-उक्तवन्तः । किं तदित्याह-'कयरे'त्ति कतरः, एकारस्तु प्राकृतत्वात्, तथा च तल्लक्षणं-'ए होति अयारंते' इत्यादि, एवमन्यत्रापि, आगच्छति-आयाति, पठ्यते च-'को रे आगच्छइ'त्ति, ते ह्यन्योऽन्यमाहुः-कोऽयमीदृक् 'रे' इति लघोरामन्त्रणं साक्षेपवचनेषु च दृश्यते, 'दित्तरूवे'त्ति दीप्तं रूपमस्येति दीप्तरूपः, दीप्तवचनं त्वतिवीभत्सोपलक्षकम्, अत्यन्तदाहिषु स्फोटके शीतल-

कव्यपदेशवत्, विकृततया वा दुर्दर्शमिति दीप्तमिव दीप्तमुच्यते, कालो वर्णतो विकरालो दन्तुरतादिना भयानकः पिशाचवत् स एव विकरालकः 'फोक'त्ति देशीपदं, ततश्च फोक्का-अग्रे स्थूलोन्नता च नासाऽस्येति फोक्कनासः अवमानि-असाराणि लघुत्वजीर्णत्वादिना चेलानि-वस्त्राण्यस्येत्यवमचेलकः, पांशुना-रजसा पिशाचवद्भूततो-जातः पांशुपिशाचभूतः गमकत्वात्समासः, पिशाचो हि लौकिकानां दीर्घश्मश्रुनस्वरोमा पुनश्च पांशुभिः समविध्वस्त इष्टः,

ततः सोऽपि निष्परिकर्म्मतया रजोदिग्धदेहतया चैवमुच्यते, 'संकरे'ति सङ्करः, स चेह प्रस्तावात्तृणभस्मगोमयाङ्गारादिगोलक उक्करुडिकेतियावत् तत्र दुष्यं वस्त्रं सङ्करदुष्यं, तत्र हि यदत्यन्तानिष्कटं निरुपयोगी तल्लोकैरुत्सृज्यते, ततस्तत्प्रायमन्यदपि तथोक्तं, यद्वा उज्झित धर्म्मकमेवासौ गृह्णातीत्येवमभिधानं, 'परिहरिय'त्ति परिवृत्त्य, निक्षिप्येत्यर्थः क्व ?-'कण्ठे' गले, स ह्यनिक्षिप्तोपकरण इति स्वमुपधिमुपादायैव भ्राम्यति, अत्र कण्ठैकपार्श्वः कण्ठशब्द इति कण्ठे परिवृत्त्येत्युच्यत इति सूत्रद्वयार्थः ॥

इत्थं दूरादागच्छन्नुक्तः, सन्निकृष्टं चैनं किमूचुरित्याह-

मू. (३६६) कयरे तुमं इय अदंसणिज्जे ?, काए व आसा इहमागओऽसि ? ।
ओमचेलगा पंसुपिसायभूया, गच्छ क्खलाहि किमिहं ठिओऽसि ॥

वृ. कतरस्त्वं, पाठान्तरश्च-को रे त्वम्, अधिक्षेपे रेशब्दः 'इती' त्येवमदर्शनीयो-द्रष्टुमनर्हः, 'कया वा' किरूपया वा ?, 'आसा इहमागओऽसि'त्ति 'अचां' सन्धिलोपौ बहुल' मितिवचनादेकारलोपो, मकारश्चागमिकः, तत आशया-वाञ्छया 'इह' अस्मिन्यज्ञपट्टके आगतः-प्राप्तोऽसि-भवसि, अवमचेलकः पांसुपिशाचभूत इति च प्राग्वत्, पुनरनयोरुपादानमत्यन्ताधिक्षेपदर्शनार्थं, गच्छ-प्रव्रज, प्रक्रमादितो यज्ञवाटकात्, 'खलाहि'त्ति देशीपदमपसरेत्यस्यार्थे वर्त्तते, ततोऽयमर्थः-अस्मद्दृष्टिपथादपसर, तथा किमिह स्थितोऽसि त्वं ?, नैवेह त्वया स्थातव्यमिति भाव इति सूत्रार्थः ॥ एवमधिक्षिप्तेऽपि तस्मिन् मुनौ प्रशमपरतया किञ्चिदप्यजल्पति तत्सान्निध्यकारी गण्डीतिन्दुकयक्षो यदचेष्टत तदाह-

मू. (३६७) जक्खो तहिं तिंदुयरुक्खवासी, अनुकंपओ तस्स महामुनिस्स ।
पच्छायइत्ता नियगं सरीरं, इमाइं वयणाइं उदाहरित्था ॥

वृ. यक्षो व्यन्तरविशेषः, तस्मिन् अवसर इति गम्यते, तिन्दुको नाम वृक्षस्तद्वासी, तथा च सम्प्रदायः-तस्स तिंदुगवणस्स मज्झे महंतो तिंदुगरुक्खो, तहिं सो वसति, तस्सेव हेट्ठा चेइयं, जत्थ सो साहू चिट्ठति । 'अनुकंपउ'त्ति अनुशब्दोऽनुरूपार्थे ततश्चानुरूपं कम्पते-चेष्टत इत्यनुकम्पकः-अनुरूपक्रियाप्रवृत्तिः, कस्येत्याह-'तस्य' हरिकेशबलस्य 'महामुनेः' प्रशस्यतपस्विनः 'प्रच्छाद्य' प्रकर्षेणावृत्य निजकम्-आत्मीयं शरीरं, कोऽभिप्रायः ?-तपस्वीशरीर एवाशिष्य स्वयमनुपलक्ष्यः सन्निमानि-वक्ष्यमानानि 'वचनानि' वचांसि 'उदाहरित्थ'त्ति उदाहार्षीदुदाहृतवानित्यर्थः, इति सूत्रार्थः ॥ कानि पुनस्तानि ?, इत्याह-

मू. (३६८) समणो अहं संजओ बंभयारी, विरओ धनपयणपरिग्गहाओ ।
परप्पवित्तस्स उ भिक्खकाले, अन्नस्स अट्ठा इहमागओमि ॥

वृ. श्रमणो-मुनिः 'अह' मित्यात्मनिर्देशः, किमभिधानत एवेत्याशङ्क्याह-सम्यग् यतः

संयतः - असद्व्यापारेभ्य उपरतः, अत एव च ब्रह्मचारी - ब्रह्मचर्यवान्, तथा विरतो निवृत्तः, कुतो ? - धनं च पचनं च परिग्रहश्च धनपचनपरिग्रहाः तेभ्यः, तत्र धनं हिरण्यादि पचनमाहारनिष्पादनं परिग्रहो द्रव्यादिषु मूर्च्छा, अत एव च परस्मै प्रवृत्तेभ्यः स्वार्थं निष्पादितत्वेन परप्रवृत्तं तस्य, तुरवधारणे, ततः परप्रवृत्तस्यैव, न तु मदर्थं साधितस्येति भावः, 'भिक्षाकाले' भिक्षाप्रस्तावे, कदाचिदकालोऽयं ब्रूयादित्येवमुक्तं, 'अन्नस्य' अशनस्य 'अट्ठ'त्ति सूत्रत्वादर्थाय, भोजनार्थमिति भावः, 'इह' अस्मिन् यज्ञवाटके आगतोऽस्मि, अनेन यदुक्तं कतरत्वं किमिहागतोऽसि ?, तत्प्रतिवचनमुक्तम्, एवमुक्ते च ते कदाचिदभिदध्युः - नेह किञ्चित् कस्मैचिद्दीयते न वा देयमस्त्यत आह-

मू. (३६९) वितीर्यते स्वज्यते भुज्यते च, अन्नं प्रभूतं भवतामेतत् ।
जानीत मे यायणजीविनुत्ति, सेसावसेसं लहओ तवस्सी ॥

वृ. 'वितीर्यते' दीयते दीनानाथादिभ्यः खाद्यते खण्डखाद्यादि, भुज्यते च भक्तसूपादि, अद्यत इत्यन्नं स सर्व्वमपि सामान्येनोच्यते, तदप्यल्पमेव स्यादत आह-'प्रभूतं' बहु, प्रभूतमपि परकीयमेव स्यात्, अत आह-'भवतां' युष्माकमेव सम्बन्धि 'एतदि'ति प्रत्यक्षं, तथा च 'जानीत' अवगच्छत 'मे'त्ति सूत्रत्वान्नां 'जायणजीविनो'त्ति याचनेन जीवनं - प्राणधारणमस्येति याचन जीवनं, आर्षत्वादिकारः, पठ्यते च-'जायणजीवणो'त्ति, इतिशब्दः स्वरूपपरामर्शकः, तत एवंस्वरूपं, यतश्चैवमतो मह्यमपि ददध्वमिति भावः, कदाचिदुत्कृष्टमेवासौ याचत इति तेषामाशयः स्यादत आह, अथवा जानीत मां याचनजीविनं - याचनेन जीवनशीलं, द्वितीयार्थे षष्ठी, पाठान्तरे तु प्रथमा, 'इती'त्यस्माद्धेतोः, किमित्याह - शेषावशेषम् - उद्धरितस्याप्युद्धरितम्, अन्तप्रान्तमित्यर्थः, लभतां - प्राप्नोतु, तपस्वी - यतिवराको वा भवदभिप्रायेण, अनेनात्मानं निर्दिशतीति सूत्रद्वयार्थः ॥ एवं यक्षेणोक्ते यज्ञवाटवासिनः प्राहुः-

मू. (३७०) उवक्खडं भोयण माहणाणं, अत्तट्ठियं सिद्धमिहेगपक्खं ।
न ऊ वयं एरिसमन्नपाणं, दाहामु तुज्झं किमिहं ठिओऽसि ? ॥

वृ. 'उपस्कृतं' लवणवेसवारादिसंस्कृतं 'भोयण'त्ति भोजनं माहनानां - ब्राह्मणानां आत्मनोऽर्थः आत्मार्थस्तस्मिन् भवमात्मार्थिकं, ब्राह्मणैरप्यात्मनैव भोज्यं न त्वन्मस्मै देयं, किमिति ?, यतः सिद्धं - निष्पन्नं 'इह' अस्मिन् यज्ञे एकः पक्षो - ब्राह्मणलक्षणो यस्य तदेकपक्षं, किमुक्तं भवति ? - यदस्मिन्नुपस्क्रियते न तद्ब्राह्मणव्यतिरिक्तायान्यस्मै दीयते, विशेषतस्तु शूद्राय, यत उक्तम्-

"न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविः कृतम् ।
न चास्योपदिशेद् धर्मं, न चास्य व्रतमादिशेत् ॥"

यतश्चैवमतो 'न तु' नैव वयमीदृशमुक्तरूपं अन्नं च - ओदनादि पानं च - द्राक्षापानाद्यन्नपानं 'दाहामो'त्ति दास्यामः 'तुज्झं'ति तुभ्यं, किमिह स्थितोऽसि ?, नैवेहावस्थितावपि तव किञ्चिदिति भाव इति सूत्रार्थः ॥ यक्ष आह-

मू. (३७१) थलेसु बीयाइं ववंति कासगा, तहेव निन्नेसु य आससाए ।
एयाइ सद्धाइ दलाह मज्झं, आराहए पुन्नमिणं खु खित्तं ॥

वृ. 'स्थलेषु' जलावस्थितिविरहितेषूच्चभूभागेषु 'बीजानि' गोधूमशाल्यादीनि 'वपन्ति' रोपयन्ति 'कासग'त्ति कर्षकाः कृषीवलाः, 'तथैव' यथोच्चस्थलेष्वेवमेव 'निम्नेषु च' नीचभूभागेषु च 'आससाए'त्ति आशंसया यद्यत्यन्तप्रवर्षणं भावि तदा स्थलेषु फलावाप्तिरथान्यथा तदा निम्नेष्वित्येवमभिलाषात्मिकया, एतयैवैतया-एतदुपमया, को ऽर्थः ?-उक्तरूपकर्षकाशंसातुल्यया 'श्रद्धया' वाञ्छया 'दलाह'त्ति ददध्वं मह्यं, किमुक्तं भवति ?-यद्यपि भवतां निम्नोपमत्वबुद्धिरात्मनि मयि तु स्थलतुल्यताधीः तथापि मह्यमपि दातुमुचितम्, अथ स्याद्-एवं दत्तेऽपि न फलावाप्तिरित्याह-'आराहए पुन्नमिणं खु'त्ति खुशब्दस्यावधारणार्थस्य भिन्नक्रमत्वादाराधयेदेव-समन्तात्साधयेदेव, नात्रान्यथाभावः, 'पुण्यं' शुभमिदं-परिदृश्यमानं क्षेत्रमिव क्षेत्रं पुण्यशस्यप्ररोहहेतुतया, आत्मानमेव पात्रभूतमवमाह, पठ्यते च-'आराहगा होहिम पुन्नखेत्त'न्ति आराधका-आवर्जका गम्यमानत्वात्पुण्यस्य भवत, अनेन दानफलमाह, कुत एतदित्याह-इदं पुण्यक्षेत्रं-पुण्यप्राप्तिहेतुः क्षेत्रं यत इति गम्यते, इति सूत्रार्थः ॥

यक्षवचनानन्तरं त इदमाहुः

मू. (३७२) खित्ताणी अम्हं विइयाणि लोए, जहिं पकिन्ना विरुहंति पुन्ना।
जे माहणा जाइविज्जोववेया, ताइं तु खित्ताइं सुपेसलाइं ॥

वृ. 'क्षेत्राणी'ति क्षेत्रोपमानि प्राज्ञाण्यस्माकं 'विदितानि' ज्ञातानि, वर्तन्त इति गम्यते, 'लोके' जगति 'जहि'त्ति वचनव्यत्ययाद्येषु क्षेत्रेषु प्रकीर्णानीव प्रकीर्णानि-दत्तान्यशनादीनि 'विरोहन्ति' जन्मान्तरोपसर्थानतः प्रादुर्भवन्ति 'पुण्यानि' समस्तानि, न तु तथाविधदोषसद्भावतः कानिचिदेव, स्यादेतद्-अहमपि तन्मध्यवर्त्येवेत्याशङ्क्याह-ये 'ब्राह्मणाः' द्विजाः, तेऽपि न नामत एव, किन्तु जातिश्च-ब्राह्मणजातिरूपा विद्या च-चतुर्दशविद्यास्थानात्मिका ताभ्याम् 'उववेय'त्ति उपेता-अन्विता जातिविद्योपेताः, 'ताइं तु'त्ति तान्येव क्षेत्राणि 'सुपेसलाणि'त्ति सुपेशलं नाम शोभनं प्रीतिकरं वा इति वृद्धाः, ततश्च सुपेशलानि-शोभनानि प्रीतिकराणि वा, न तु भवादृशानि शूद्रादीनि, शूद्रजातित्वादेव वेदादिविद्याबहिष्कृतानीति, यत उक्तम्-

"सममश्रोत्रिये दानं, द्विगुणं ब्राह्मणब्रुवे।
सहस्रगुणमाचार्ये, अनन्तं वेदपारगे ॥"

इति सूत्रार्थः यक्ष उवाच-

मू. (३७३) कोहो य माणो य वहो य जेसिं, मोसं अदत्तं च परिग्गहं च।
ते माहणा जाइविज्जाविहीणा, ताइं तु खित्ताइं सुपावयाइं ॥

वृ. 'क्रोधश्च' रोषः 'मानश्च' गर्वः, चशब्दान्मायालोभौ च, 'वधश्च' प्राणिघातो 'येषा'मिति प्रक्रमाद्भवतां ब्राह्मणानां 'मोसं'ति मृषा-अलीकभाषणं 'अदत्त'ति पदेऽपि पदैकदेशस्य दर्शनात्सत्यभामा सत्येतिवत् अदत्तादानमुक्तं, चशब्दान्मैथुनं, 'परिग्रहश्च' गोभूम्यादिस्वीकारः, अस्तीति सर्वत्र गम्यते, 'ते' इति क्रोधाद्युपेता यूयं ब्राह्मणा जातिविद्याभ्यां विहीनारहिता जातिविद्याविहीनाः, क्रियाकर्मविभागेन हि चातुर्वर्ण्यव्यवस्था, यत उक्तम्-

"एकवर्णमिदं सर्व्वं, पूर्वमासीद्युधिष्ठिर!।
क्रियाकर्मविभागेन, चातुर्वर्ण्यं व्यवस्थितम् ॥१॥

ब्राह्मणो ब्रह्मचर्येण, यथा शिल्पेन शिल्पिकः ।
अन्यथा नामभाजं त्वादिदृशं फल्गुकोत्तमम् ॥२॥

न चैवंविधक्रिया ब्रह्मचर्यात्मिका कोपाद्युपेतेषु तत्त्वतः सम्भवन्यतो न तावज्जातिसम्भवः, तथा विद्यापि सच्छास्त्रात्मिका, सच्छास्त्रेषु च सर्वेष्वहिंसादिपञ्चकमेव वाच्यं, यत उक्तम्-

"पञ्चैतानि पवित्राणि, सर्व्वेषां धर्म्मचारिणाम् ।
अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्ज्जनम् ॥"

तद्युक्तत्वयं च तत्तज्ज्ञानादेव भवति, ज्ञानस्य तु विरतिः फलं रागाद्यभावश्च, यत उक्तम्-

"तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः ।
तमसः कुतोऽस्ति ? शक्तिर्दिनकरकिरणागतः स्थातुम् ॥"

न चैवमन्याद्यारम्भिषु कोपादिमत्सु च भवत्सु विरते रागाद्यभावस्य च सम्भवोऽस्ति, न च निश्चयनयमतेन फलरहितं वस्तु सत्, तथा च निश्चयो यदेवार्थक्रियाकारि तदेव परमार्थसदित्याह, ततः स्थितमेतत्-'ताइं तु'त्ति तुरयधारणे भिन्नक्रमश्च, ततश्च तानि भवद्भिरुदितानि ब्राह्मणलक्षणानि क्षेत्राणि सुपापकान्येव, न तु सुपेशलानि, क्रोधाद्युपेतत्वेनातिशयपापहेतुत्वादिति सूत्रार्थः ॥ कदाचिदेते ब्रूयुः-वेदविद्याविदो वयमत एव च ब्राह्मणजातयस्तत्कथं जातिविद्याविहीना इत्युक्तावानभीत्याह-

मू. (३७४) तुब्भित्थ भो ! भारहरा गिराणं, अट्ठं न याणाह अहिज्ज वेए ।
उच्चावयाइं मुणिणो चरंति, ताइं तु खित्ताइं सुपेसलाइं ॥

वृ. यूयमत्रेति-लोके 'भो' इत्यामन्त्रणे भारं धरन्तीति भारधराः, पाठान्तरतो वा-'भारवहा' वा, कासां ?-'गिरां' वाचां, प्रक्रमाद्वेदसम्बन्धिनीनाम्, इह च भारस्तासां भूयस्त्वमेव, किमिति भारधराः भारवहा वेति उच्यते, यतोऽर्थम् अभिधेयं न जानीथ-नावबुध्यध्वे ?, 'अहिज्ज'त्ति अपेर्गम्यमानत्वादधीत्यापि 'वेदान्' ऋग्वेदादीन्, तथाहि-'आत्मा वा रे ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः" तथा "कर्म्मभिर्मृत्युमृषयो निषेदुः, प्रजावन्तो द्रविनमन्विच्छमानाः, अथापरं कर्म्मभ्योऽमृतत्वमानशुः,

परेण नाकं निहितं गुहायां, विभ्राजते यद्यतयो विशन्ति ।
वेदाहमेनं पुरुषं महान्तं, तमेव विदित्वा अमृतत्वमेति ॥

'नान्यः पन्थाः अयनाय' त्वादिवचनानां यद्यर्थवेत्तारः स्युस्तत्किमित्थं यागादि कुर्व्वीरन् ?, ततस्तत्त्वतो वेदविद्याविदो भवन्ता न भवन्ति, तत्कथं जातिविद्यासम्पन्नत्वेन क्षेत्रभूताः स्युः ? । कानि तर्हि भवदभिप्रायेण क्षेत्राणीत्याह-'उच्चावयाइं'नि उच्चावचानि-उत्तमाधमानि मुनयश्चरन्ति भिक्षानिमित्तं पर्यटन्ति गृहाणि, ये इति गम्यते, न तु भवन्त इव पचनाद्यारम्भप्रवृत्तयः, त एव परमार्थतो वेदार्थं विदन्ति, तत्रापि भैक्षवृत्तेरेव समर्थितत्वात्, तथा च वेदानुवादिनः-

"चरेद् माधुकरीं वृत्तिमपि म्लेच्छकुलादपि ।
एकान्नं नैव भुञ्जीत, बृहस्पतिसमादपि ॥"

यदिवोच्चावचानि-विकृष्टाविकृष्टतया नानाविधानि, तपांसीति गम्यते, उच्चव्रतानि वा शेषव्रतापेक्षया महाव्रतानि ये मुनयश्चरन्ति-आसेवन्ते, न तु यूयमिवाजितेन्द्रिया अशीला वा, तान्येव मुनिलक्षणानि क्षेत्राणि सुपेशलानीति प्राग्वदिति सूत्रार्थः ॥ इत्थमध्यापकं यक्षेण निर्मुखीकृतमवलोक्य तच्छात्राः प्राहुः-

मू. (३७५) अज्झावयाणं पडिकूलभासी, पभाससे किंसु सगासि अम्हं ?।
अज्जि एयं विनस्सउ अन्नपाणं, न य णं दाहामु तुमं नियंठा !॥

वृ. अध्यापयन्ति-पाठयन्तीत्यध्यापकाः-उपाध्यायास्तेषां प्रतिकूलं-प्रतिलोमं भाषते वक्तीत्येवंशीलः प्रतिकूलभाषी सन् प्रकर्षेण भाषसे-ब्रूषे प्रभाषसे, किमिति क्षेपे, तुच्छ्यक्षमायां, ततश्च धिग् भवन्तं न वयं क्षमामहे यदित्थं भवान् ब्रूते सकाशे-समीपे 'अम्हं'ति अस्माकम्, अपिः सम्भावनायां, 'एतद्' अनिष्टशब्दार्थं 'किंसु' वक्तीति वाक्यालङ्कारे स्वरूपहानिमाप्नोतु 'अन्नपानम्' ओदनकाञ्जिकादि, 'न च' नैव 'न'मिति वाक्यालङ्कारे 'दाहामु'त्ति दास्यामस्तव हे निर्ग्रन्थ! निष्किञ्चन!, गुरुप्रत्यनीको हि भवान्, अन्यथा तु कदाचिदनुकम्पया किञ्चिदन्तप्रान्तादि दद्यामोऽपीति भाव इति सूत्रार्थः ॥ यक्ष आह-

मू. (३७६) समिईहिं मज्झं सुसमाहियस्स, गुत्तीहि गुत्तस्स जिइंदियस्स।
जइ मे न दाहित्थ अहेसणिज्जं, किमज्ज जन्नाण लभित्थ लाभं ?॥

वृ. समितिभिः-ईर्यासमित्यादिभिर्मह्यं सुष्ठु समाहिताय-समाधिमते सुसमाहिताय गुप्तिभिः-मनोगुप्त्यादिभिर्गुप्ताय जितेन्द्रियायेति च प्राग्वत्, सर्वत्र च चतुर्थ्यर्थे षष्ठी, 'यदी'त्यभ्युपगमे 'मे' मह्यं 'मज्झं'तीत्यस्य व्यहितत्वात् क्रिया प्रति पुनरुपादानमदुष्टमेव 'न दास्यथ' न वितरिष्यथ, 'अथे'त्युपन्यासे आनन्तर्ये वा, 'एषणीयम्' एषणाविशुद्धमन्नादिकं, किं न किञ्चिदित्यर्थः, 'अज्ज'त्ति अद्य ये यज्ञास्तेषामिदानीमारब्धयज्ञानां, यद्वा 'अज्ज'त्ति हे आर्या! यज्ञानां 'लभित्थ'त्ति सूत्रत्वाल्लप्स्यध्वे प्राप्स्यध्वं 'लाभं' पुण्यप्राप्तिरूपं, पात्रदानादेव हि विशिष्टपुण्याप्तिः, अन्यत्र तु तथाविधफलाभावेन दीयमानस् हानिरेव, उक्तं हि-

"दधिमधुघृतान्यपात्रे क्षिप्तानि यथाऽऽशु नाशमुपयान्ति।
एवमपात्रे दत्तानि केवलं नाशमुपयान्ती॥"ति

सूत्रार्थः ॥ इत्थं तेनोक्ते यदध्यापकप्रधान आह तदुच्यते-

मू. (३७७) के इत्थ खत्ता उवजोइया वा, अज्झावया वा सह खंडिएहिं ?।
एयं खु दंडेण फलेण हंता, कंठंमि घित्तूण खलिज्ज जो णं॥

वृ. के 'अत्रे'त्यंतस्मिन् स्थाने 'क्षत्राः' क्षत्रियजातयो वर्णसङ्करोत्पन्ना वा तत्कर्मनियुक्ताः 'उवजोइय'त्ति ज्योतिषः समीपे ये त उपज्योतिषस्त एवोपज्योतिष्काः-अग्निसमीपवर्त्तिनो महानसिका ऋत्विजो वा 'अध्यापकाः' पाठकाः, ते वा उभयत्र वा विकल्पे 'सहे'ति युक्ताः, कैः ?-'खण्डिकैः' छात्रैः, ये किमित्याह-'एनं' श्रमणकं 'दण्डेन' वंशयष्ट्यादिना 'फलेन' बिल्वादिना 'हंते'ति हत्वा-ताडयित्वा यद्वा 'दण्डेने'ति कूर्परादिघातेन 'फलेन' च मुष्टिप्रहारेणेति वृद्धाः, ततश्च 'कण्ठे' गले 'गृहीत्वा' उपादाय 'खलेज्ज'त्ति स्खलयेयुः-निष्काशयेयुः, 'यो'त्ति वचनव्यत्ययाद्ये इत्थमेतदभिघाते निष्काशने वा शक्ताः, 'नमि'ति

त्वाक्यालङ्कारे इति सूत्रार्थः ॥ अथान्तरे यदभूत्तदाह-

मू. (३७८) अज्झावयाणं वयणं सुणित्ता, उद्धाइया तत्थ बहू कुमारा।
दंडेहिं वित्तेहिं कसेहिं चेव, समागया तं इसिं तालयंति ॥

वृ. अध्यापकानाम्-उपाध्यायानाम्, एकत्वेऽपि पूज्यत्वाद्बहुवचनं, 'वचनम्' उक्तरूपं 'श्रुत्वा' आकर्ण्य 'उद्धाविता' वेगेन प्रसृताः 'तत्र' यत्रासौ मुनिस्तिष्ठति 'बहवः' प्रभूताः 'कुमाराः' द्वितीयवयोवर्त्तिनश्छात्रादय इति गम्यते, ते हि क्रीडनकपरा इत्यतो क्रीडनकमागतमिति रभसतो 'दण्डैः' वंशयष्ट्यादिभिर्वेत्रैः-जलजवंशात्मकैः 'कशैः' वर्द्धविकारैः, चः समुच्चये, एवेति पूरणे, 'समागताः' सम्प्राप्ता मिलिता वा तमृषिं-मुनिं 'ताडयन्ति' घ्नन्ति, सर्वत्र वर्त्तमान-निर्देशः प्राग्वत् इति सूत्रार्थः ॥ अस्मिंश्चावसरे

मू. (३७९) रण्णो तहिं कोसलियस्स धूया, भद्दत्ति नामेण अनिंदियंगी।
तं पासिया संजय हम्ममानं, कुद्धे कुमारे परिनिव्ववेइ ॥

वृ. 'रण्णो' नृपतेस्तत्र-यज्ञवाटे कोशलायां भवः कौशलिकस्तस्य 'धूय'त्ति दुहिता भद्रेति 'नाम्ना' अभिधानेन 'अनिन्दिताङ्गी' कल्याणशरीरा 'तं' हरिकेशबलं 'पासिय'त्ति दृष्ट्वा 'सञ्जय'त्ति संयतं तस्यामप्यवस्थायां हिंसादेः सम्यगुपरतं 'हन्यमानं' दण्डादिभिस्ताड्यमानं 'क्रुद्धान्' कोपवतः 'कुमारान्' उक्तरूपान् 'परिनिर्व्वापयति' कोपाग्निविध्यापनात् समन्तात् शीतीकरोति उपशमयतीतियावदिति सूत्रार्थः ॥ सा च तान् परिनिर्व्वापयन्ती तस्य व्य-मतिनिःस्पृहतां चाह-

मू. (३८०) देवाभिओगेण निओइएणं, दिन्ना मु रण्णा मनसा न झाया।
नरिंददेविंदऽभिवंदिएणं, जेनामि वंता इसिणा स एसो ॥

वृ. देवस्य-अमरस्याभियोगो-बलात्कारो देवाभियोगस्तेन 'नियोजितेन' व्यापारितेन न त्वप्रियेतिकृत्वा 'दिन्नामु'त्ति दत्ताऽस्मि, अहं यस्मै इति गम्यते, दत्ता च केन ?-राज्ञा प्रक्रमा-त्कौशलिकेन, तथापि 'मणस'त्ति अपेर्गम्यमानत्वान्मनसाऽपि-चित्तेनापि 'न ध्याता' न चिन्तिता नाभिलषितेतियावत्, प्रक्रमादेतेन मुनिना, कीदृशेन ?-नरेन्द्राश्च-नृपतयो देवेन्द्राश्च-शक्रादयो नरेन्द्रदेवेन्द्रास्तैरभि-आभिमुख्येन वन्दितः-स्तुतो नरेन्द्रदेवेन्द्राभिवन्दितस्तेन, अनभि-ध्याताऽपि नृपोपरोधतः स्वीकृता स्यादत आह-येनास्म्यहं 'वान्ता' त्यक्ता 'ऋषिणा' मुनिना, स एष युष्माभिर्यः कदर्थयितुमारब्धः, ततो न कदर्थयितुमुचित इति भावः, पुनरिममेवार्थं समर्थयितुमाह

मू. (३८१) एसो हु सो उग्गतवो महप्पा, जिइंदिओ संजओ बंभयारी।
जो मे तया नेच्छइ दिज्जमानी, पिउणा सयं कोसलिएण रण्णा ॥

वृ. 'एसो हु सो'त्ति, एष एव स न मनागप्यत्र संशयः, उग्रं-उत्कटं दारुणं वा कर्म्मशत्रून् प्रति तपः-अनशनाद्यस्येति उग्रतपाः, अत एव महान्-प्रशस्या विशिष्टवोर्योल्लासत आत्मा अस्येति महात्मा, जितेन्द्रियः संयतो ब्रह्मचारी च प्राग्वत्, स इति क ? इत्याह-यो 'मि'त्ति मां 'तदा' तस्मिन् विवक्षितसमये 'नेच्छति' नाभिलषति 'दीयमानां' निमृज्यमानां, केन ?-'पित्रा' जनकेन 'स्वयं' आत्मना, न तु प्रधानप्रेषणादिना, तेनापि कीदृशा ?-कौशलिकेन राज्ञा, न

त्वितरजनसाधारणेन, तदनेन विभूतावपि निःस्पृहत्वमुक्तं, पुनस्तन्माहात्म्यमाह-

मू.(३८२) महाजसो एस महानुभागो, घोरव्वओ घोरपरक्कमो य।
मा एयं हीलेह अहीलणिज्जं, मा सव्वे तेएण भे निद्दहिज्जा॥

वृ. 'महायसा' अपरिमितिकीर्त्तिः 'एष' प्रत्यक्षो मुनिर्महानुभागः-अतिशयाचिन्त्यशक्तिः, पाठान्तरतो महानुभावो वा, तत्र चानुभावः-शापानुग्रहसामर्थ्यं, 'घोरव्रतो' धृतात्यन्तदुर्द्धर महाव्रतः 'घोरपराक्रमश्च' कषायादिजये प्रति गैद्रसामर्थ्यो, यतोऽयमीदृक् ततः किमित्याह-'मा' इति निषेधे 'एनं' यति 'हीलयत' अवधूतं पश्यत 'अहीलनीयम्' अवज्ञातुमनुचितं, किमित्याह आह-मा सर्व्वान्-समस्तांस्तेजसा-तपोमाहात्म्येन 'भे' भवतो निर्घाक्षीद्-भस्मसात्कार्षीद्, अयं हि हीलितः यदि कदाचिद्रुष्येन्नदा सर्व्वं भस्मसादेव कुर्यादिति भाव इति सूत्रत्रयार्थः॥ अन्तरे मा भूदेतस्या वचनं मृषेति यक्षः कृतवांस्तदाह-

मू.(३८३) एयाइं तीसे वयणाइं सुच्चा, पत्तीइ भद्दाइ सुभासियाइं।
इसिस्स वेयावडियट्ठयाए, जक्खा कुमारे विणिवारयंति॥

वृ. 'एतानि' अनन्तरोक्तानि 'तस्याः' अनन्तरोक्तायाः 'वचनानि' भाषितानि 'श्रुत्वा' निशम्य 'पत्याः' यज्ञवाटकाधिपतेः सोमदेवपुरोहितस्य, तस्यैव वा पुनरिति गम्यते, 'भद्रायाः' भद्राभिधानायाः 'सुभाषितानि' सूक्तानि वचनानीति योज्यते, ऋषेः-तस्यैव तपस्विनः 'वेयावडिडुयाए'त्ति सूत्रत्वाद्वैयावृत्त्यार्थमेतत् प्रत्यनीककनिवारणलक्षणे प्रयोजने व्यावृता भवाम इत्येवमर्थं यक्षाः, यक्षपरिवारस्य बहुत्वात् बहुवचनं, कुमारान् प्रक्रमात्तानेवोपहन्तुं 'विनिपातयन्ति' विविधं नितरां पातयन्ति-भूमौ विलोलयन्ति, पठ्यते च-'विनिवारयंति'त्ति विशेषेणोपहतिं कुर्वतो निराकुर्व्वन्ति,

मू.(३८४) ते घोररूवा ठिअ अंतलिक्खे, असुरा तहिं तं जणं तालयंति।
ते भिन्नदेहे रुहिरं वमंते, पासित्तु भद्दा इणमाहु भुज्जो॥

वृ. तथा 'ते' इति यक्षाः 'घोररूपा' गैद्राकारधारिणः 'ठिय'त्ति स्थिताः 'अन्तरिक्षे' आकाशे 'असुरा' आसुरभावान्वितत्वात् त एव यक्षाः 'तस्मिन्' यज्ञवाटे 'तम्' उपसर्गकारिणं 'जनं' छात्रलोकं 'ताडयन्ति' घ्नन्ति, ततस्तान् कुमारान् भिन्ना-विदारिताः प्रक्रमाद्यक्षप्रहारैर्देहाः-शरीराणि येषां ते भिन्नदेहास्तान् रुधिरं-शोणितं वमतः-उद्गिरतः 'पासित्ति'त्ति दृष्ट्वा 'भद्रा' सैव कौशलिकराजदुहिता 'इदं' वक्ष्यमाणं 'आहु'त्ति वचनव्यत्ययेनाह-ब्रूते 'भूयः' पुनरिति सूत्रद्वयार्थः॥ किं तदित्याह-

मू.(३८५) गिरिं नहेहिं खणह, अयं दंतेहिं खायह।
जायतेयं पायेहिं हणह जे भिक्खुं अवमन्नह॥

वृ. 'गिरिं' पर्वतं 'नखैः' कररुहैः 'खनथ' विदारयथ, इह च मुख्यखननक्रियाद्यसम्भवादिन्नवतिमन्तरेणाप्युपमार्थो गम्यते, ततश्च खनथेव खनथ, 'अयो' लोहं 'दन्तैः' दशनैः खादथेव खादथ, जाततेजसम्-अग्निं पादैः-चरणैर्हथेव हथ, ताडयतेत्यर्थः, ये वयं किं कुर्मः इत्याह-ये यूयं भिक्षुं प्रक्रमादेनं 'अवमन्नह'त्ति अवमन्यध्वे-अवधीरयथ, अनर्थफलत्वात्, भिक्षवः-पमनास्येति भावः, कथमिदमित्याह-

मू.(३८६) आसीविसो उग्गतवो महेसी, घोरव्वओ. घोरपरक्कमो य।
अगणिं व पक्खंद पयंगसेना, जे भिक्खुं भत्तकाले वहेह॥

वृ. आस्यां-दंष्ट्रास्तासु विषमस्येत्यासीविषः-आसीविषबलब्धियुक्तान्, शापानुग्रहसमर्थ इत्यर्थः, यद्वा आसीविष इव आसीविषः, यथा हि तमत्यन्तमवजानानो मृत्युमवाप्नोति, एवमेनमपि मुनिमवमन्यमानानामवश्यं भावि मरणमित्याशयः, कुतः पुनरयमेवंविधो ?, यतः उग्रतपाः प्राग्वत्, 'महेसि'त्ति महान्-सुदुष्करोपवासाद्यपेक्षया ऋषिभ्यस्तमिच्छति-अभिलषतीति महेषी महर्षिर्वा, घोरव्रतो घोरपराक्रमश्च पूर्ववत्, यतश्चैवमतः 'अगणिं व'त्ति अग्निं-ज्वलनं, वाशब्द इवार्थो भिन्नक्रमश्च, ततः 'पक्खंद'त्ति प्रस्तकन्दथेव-आक्रामथेव, केव ?-'पतंगसेन'त्ति उपमार्थस्य गम्यमानत्वात्पतङ्गानां-शलभानां सेनेव सेना-महती सन्ततिः पतङ्गसेना तद्वत्, यथा हि अमी तत्र निपतन्त्याशु घातमाप्नोत्येवं भवन्तोऽपीति भावः, ये यूयमनुकम्पितं भिक्षुं भिक्षुकं 'भक्तकाले' भोजनसमये, तत्र दीनादेरवश्यं देयमिति शिष्टसमयो यूयं तु न केवलं न यच्छत किन्तु तत्रापि 'वधह'त्ति विध्यथ-ताडयथ, अयमाशयो-यतोऽयमासीविषादिविशेषणान्वितो मुनिरतो गिरिनखखननादिप्रायमेव यदेनं भक्तकालेऽपि भक्तार्थिनमित्थं विध्यथ।

मू.(३८७) सीसेण एयं सरणं उवेह, समागया सव्वजनेन तुम्हे।
जइ इच्छह जीवियं वा धनं वा, लोगंपि एसो कुविओ डहिज्जा॥

वृ. अथ स्वकृत्योपदेशमाह-'शीर्षेण' शिरसा 'एनं' मुनिं 'शरणार्थं' रक्षणार्थमाश्रयमुपेत-अभ्युपगच्छत, किमुक्तं भवति ?-शिरःप्रणामपूर्वकमयमेवास्माकं शरणमिति प्रपद्यध्वं, 'समागताः' सम्मिलिताः 'सव्वजनेन' समस्तलोकेन, सहार्थे तृतीया, 'यूयं' भवन्तो, यदीच्छत-अभिलषत 'जीवितं' प्राणधारणात्मकं धनं वा द्रव्यं, न तस्मिन् कुपिते जीवितव्यादिरक्षाक्षमं-मन्यच्छरणमस्ति, किमित्येवमत आह-'लोकमपि' भुवनमप्येष कुपितः-क्रुद्धो 'दहेद्' भस्मात्कुर्यात्, तथा च वाचकः-

"कल्पान्तोग्रानलवत्प्रज्वलनं तेजसैकतस्तेषाम्॥"

तथा लौकिका अप्याहुः-

"न तत् दूरं यदक्षेपु, यवाग्नौ यच्च मारुते।
विषे च रुधिरप्राप्ते, साधौ च कृतनिश्चये॥"

इति सूत्रत्रयार्थः॥ सम्प्रति तत्पतितस्तान् यादृशान् ददर्श दृष्ट्वा च यदचेष्टत तदाह-

मू.(३८८) अवहेडियपिट्ठिसउत्तमंगे, पसारियाबाहुअकम्मचिट्ठे।
निब्भेरियच्छे रुहिरं वमंते, उड्ढंमुहे निग्गयजीहनित्ते॥

वृ. 'अवे'त्यधो 'हेडिय'त्ति हेठितानि-बाधितानि, किमुक्तं भवति ?-अधोनामितानि, पठन्ति च 'आवेडिए'त्ति तत्र सूत्रत्वादवकोटितानि-अधस्तादामोटितानि 'पट्ठि'त्ति पृष्ठं यावत् तदभिमुखं वा सन्ति-शोभनान्युत्माङ्गानि येषां ते अवहेठितपृष्ठसदुत्तमाङ्गाः अवकोटितपृष्ठसदुत्तमाङ्गा वा, प्राग्वन्मध्यपदलोपी समासस्तान्, 'पसारियाबाहुअकम्मचिट्ठ'त्ति प्रसारिता-विरलीकृता बाहवो-भुजा यैर्येषां वा ते तथा ततस्ते च ते अकर्मचेष्टाश्च-अविद्यमानकर्म-हेतुव्यापारतया प्रसारितबाह्यकर्मचेष्टास्तान्, यद्वा क्रियन्त इति कर्माणि-अग्नौ समित्प्रक्षेप-

णादीनि तद्विषया चेष्टा कर्मचेष्टेह गृह्यते-'निब्भेरिय'त्ति प्रसारितान्यक्षीणि-लोचनानि येषां ते तथोक्तास्तान्, रुधिरं वमद-उद्गिरत् 'उड्ढमुह'त्ति ऊर्ध्वमुखान्-उन्मुखीभूतवक्त्रान्, अत एव निर्गतानि-निःसृतानि जिह्वाश्च प्रतीता नेत्राणि च-नयनानि जिह्वानेत्राणि येषां ते तथा तान्,

मू. (३८९) ते पासिया खंडिय कट्ठभूए, विमणो विसन्नो अह माहणो सो।
इसिं पसाएइ सभारियाओ, हीलं च निंदं च खमाह भंते! ॥

वृ. 'तानि'त्युक्तरूपान् 'दृष्ट्वा' अवलोक्य 'खंडिय'त्ति आर्षत्वात्सुपो लुकि खण्डिकान्-छत्रान् काष्ठभूतान्-अत्यन्तनिश्चेष्टतया काष्ठोपमान् विगतमिव विगतं मनः-चित्तमस्येति विमनाः, विषण्णः-कथममी प्रवणां भविष्यन्तीति चिन्तया व्याकुलितः 'अथे'ति दर्शनानन्तरं 'ब्राह्मणो' द्विजातिः 'स' इति सोमदेवनामा 'ऋषिं' तमेव हरिकेशबलनामानं मुनिं 'प्रसादयति' प्रसन्नं ग्राहयति, सह भार्यया-पत्न्या तयैव भद्राभिधानया वर्त्तते इति सभार्यकः, कथमित्याह-हीलां च-अवज्ञां निन्दां च-दोषोद्घट्टनं 'खमाह'त्ति क्षमस्व सहस्व 'भंतेति' सूत्रद्वयार्थः ॥

पुनः स प्रसादनामेवाह-

मू. (३९०) बालेहिं मूढेहिं अयाणएहिं, जं हीलिया तस्स खमाह भंते!
महप्पसाया इसिणो हवंति, न हु मुनी कोवपरा हवंति ॥

वृ. बालैः-शिशुभिर्मूढैः-कषायमोहनीयोदयाद्विचित्तता गतैः अत एव चाज्ञैः-हिताहित-विवेकविकलैः 'यदि' त्युपप्रदर्शने 'हीलिताः' अवज्ञाताः 'तस्स'त्ति सूत्रत्वात् तत् 'खमाह'त्ति क्षमध्वं भदन्त!, अनेनैतदाह-यतोऽमी शिशवो मूढा अज्ञानाश्च तत्किमेषामुपरि कोपेन?, यतोऽनुकम्पनीया एवामी, उक्तं च केनचिद्-"आत्मद्रुहममर्यादं, मूढमुज्झितसत्पथम्। सुतरामनुकम्पेत, नरकार्चिष्मदिन्धनम्॥" किं च-महान् प्रसादः-चित्तप्रसन्नरूपो येषां ते महाप्रसादा ऋषयः-साधवो भवन्ति, व्यतिरेकमाह-'न हु'त्ति न पुनर्मुनयो-यतयः 'कोपपराः' क्रोधवशगा भवन्ति, भिन्नवाक्यत्वाच्च मुनिग्रहणमदुष्टमेवेति सूत्रार्थः ॥ मुनिराह-

मू. (३९१) पुव्विं च इण्हिं च अनागयं च, मनप्पओसो न मे अत्थि कोई।
जक्खा हु वेयावडियं करिंति, तम्हा हु एए निहया कुमारा ॥

वृ. 'पुव्विं च'त्ति पूर्वं च पुरा इदानीं च-अस्मिन् काले 'अनागयं चे'ति अनागते च भविष्यत्काले मनःप्रद्वेषः-चित्तानुशयलक्षणो न 'मे' ममास्तीत्युपलक्षणत्वादासीद्भविष्यति च, 'कोऽपि'त्यल्पोऽपि, इह च भाविनि प्रमाणाभावेऽपि 'अनागतं प्रत्याचक्ष' इति वचनादनागतस्यापि तस्य निषिद्धत्वाच्छ्रुतज्ञानबलतः कालत्रयपरिज्ञानसम्भवाच्चैवमभिधानं, पठन्ति च 'पुव्विं च पच्छा व तहेव मज्झे' तत्र च पूर्वं वा पश्चाद्वेति विहेठनकालापेक्षं तथैव मध्ये विहेठनकाल एव, न च कुमारावहेठनादिदर्शनात्प्रत्यक्षविरुद्धता शङ्कनीया, 'यक्षा' देवविशेषा 'हु'रिति यस्माद्वैयावृत्त्यं-प्रत्यनीकप्रतिघातरूपं 'कुर्वन्ति' विदधति, 'तम्ह'त्ति तस्मात् हुरवधारणे ततस्तस्मादेव हेतोरेते-पुरोवर्त्तिनो निहताः-ताडिता निहताः कुमाराः, न तु मनःप्रद्वेषोऽत्र हेतुरिति भाव इति सूत्रार्थः ॥ सम्प्रति तद्गुणा कृष्टचेतस उपाध्यायप्रमुखा इदमाहुः-

मू. (३९२) अत्थं च धम्मं च वियाणमाना, तुब्भे नवि कुप्पह भूइपन्ना।
तुब्भं तु पाए सरणं उवेमो, समागया सव्वजनेन अम्हे ॥

वृ. अर्गत इत्यर्थो - ज्ञेयत्वात्सर्व्वमेव वस्तु, इह तु प्रक्रमाच्छुभाशुभकर्म्मविभागो रागद्वेषविपाको वा परिगृह्यते, यद्वा अर्थः - अभिधेयः स चार्थाच्छास्त्राणामेव तु, चशब्दस्तद्गतानेकभेदसंसूचकः, धर्मः - सदाचारो दशविधो वा यतिधर्म्मस्तं च 'विआणमाने'त्ति विशेषेण विविधं वा जानन्तः - आगच्छन्तो यूयं 'नापि' नैव कुप्यथ - क्रोधं कुरुध्वं, भूतिप्रज्ञा इति, भूतिर्मङ्गलं वृद्धी रक्षा चेती वृद्धाः, प्रज्ञायतेऽनया वस्तुतत्त्वमिति प्रज्ञा, ततश्च भूतिः - मङ्गलं सर्वमङ्गलोत्तमत्वेन वृद्धिर्वा वृद्धिविशिष्टत्वेन रक्षा वा प्राणिरक्षकत्वेन प्रज्ञा - बुद्धिरस्येति भूतिप्रज्ञः, अतश्च 'तुब्भं तु'त्ति तुशब्दस्यैवकारार्थत्वात् युष्माकमेव पादौ - चरणौ शरणमुपेमः - उपगच्छामः समागताः - मिलिताः, केन सह ? - सर्व्वजनेन, वयमिति सूत्रार्थः ॥ किं च -

मू. (३१३) अच्चेमु ते महाभागा !, न ते किंचन नाच्चिमो ।
भुंजाहि सालिमं कूरं, नाणावंजणसंजुयं ॥

वृ. 'अच्चेयामः' पूज्यामस्ते - तव सम्बन्धि सर्व्वमपीति गम्यते, प्रविश पिण्डमित्युक्ते यथा गृहमिति भक्षयेति च, महाभाग ! अतिशयाचिन्त्यशक्तियुक्तत्वेनेति, नैव 'ते' तव किञ्चिदिति चरणरेण्वादिकमपि नार्च्चयामो - न पूजयामः, अपि तु सर्व्वगुणैर्गम्यः, अस्यैव पूर्वैरेव गतार्थत्वे पुनरभिधानमन्वयव्यतिरेकाभ्यामुक्तोऽर्थः सुखावगमो भवतीतिकृत्वा, अथवा अर्च्चयामस्ते इति सुब्व्यत्ययात्त्वाम्, अनेन स्वतस्तस्य पूज्यत्वमुक्तं, उत्तरेण तु तत्स्वामित्वमपि पूज्यताहेतुरिति, तथा भुङ्क्षेतो गृहीत्वेति गम्यते 'शालिम'न्ति शालिमयं, कोऽर्थः ? - शालिनिष्पन्नं 'कूरम्' ओदनं नानाव्यञ्जनैः अनेकप्रकारैर्दध्यादिभिः संयुतं - सम्मिश्रं नानाव्यञ्जनसंयुतं, न त्वेकमेवेति सूत्रार्थः ॥ अन्यच्च -

मू. (३१४) इमं च मे अत्थि पभूयमन्नं, तं भुंजसू अम्ह अणुग्गहट्ठा ।
बाढंति पडिच्छइ भत्तपानं, मासस्स उ पारणए महप्पा ॥

वृ. 'इदं च' प्रत्यक्षत एव परिदृश्यमानं 'मे' ममास्ति - विद्यते 'प्रभूतं' प्रचूरमन्नं - मण्डकखण्डस्वाद्यादि समस्तमपि भोजनं, यत्प्राक् पृथगोदनग्रहणं तन्तस्य सर्वान्नप्रधानत्वख्यापनार्थं, तद्भुङ्क्ष्वास्माकमनुग्रहार्थं - वयमनुगृहीता भवाम इति हेतोः, एवं च तेनोक्ते मुनिराह - 'बाढम्' एवं कुर्म्म इतीत्येवं ब्रुवाण इति शेषः, 'प्रतीच्छति' द्रव्यादितः शुद्धमिति गृह्णाति, भक्तपानमुक्तरूपं, 'मासस्स उ'त्ति मासादेव, यद्वा अन्त इत्यध्याहियते, ततश्च मासस्यैवान्ते यत्पार्यते पर्यन्तः क्रियते गृहीतनियमस्यानेनेति पारणं तदेव पारणकं, भोजनमित्युक्तं भवति, तस्मिन् - तन्निमित्तं, 'निमित्तात्कर्म्मसंयोगे सप्तमिति' सप्तमी, माहात्म्येति प्राग्वत् इति सूत्रार्थः ॥

तदा च तत्र यदभूत्तदाह -

मू. (३१५) तहियं गंधोदयपुप्फवासं, दिव्वा तहिं वसुहारा य वुट्ठा ।
पहया दुंदुहीओ सुरेहिं, आगासे अहोदानं च घुट्ठं ॥

वृ. 'तहियं'ति तस्मिन् मुनौ भक्तपानं प्रतीच्छति यज्ञवाटे वा गन्धः - आमोदतस्तत्प्रधानमुदकं - जलं गन्धोदकं तच्च पुष्पाणि च - कुसुमानि तेषां वर्षं - वर्षणं गन्धोदकपुष्पवर्षं, सुरैरिति सम्बन्धात् कृतमिति गम्यते, दिव्या - श्रेष्ठा यदिवा दिवि - गगने भवा दिव्या, 'तहिं'ति तस्मिन्नेव नान्यत्र, अनेन कथमियतामेकत्र कल्याणानां मीलक इत्यन्यत्रैवान्यतरत्कल्याणान्तरं भविष्यती-

त्याशङ्का निराकृता, वसु-द्रव्यं तस्य धारा-सततपातजनिता सन्ततिर्व 'दुन्दुभयो' देवानकाः, उपलक्षणत्वाच्छेषातोद्यानि च, कैः ?-'सुरैः' देवैः, तथा तैरेव 'आकाशे' नभसि 'अहो' इति विस्मये, विस्मयनीयमिदं दानं, कोऽन्यः किलैवं शक्नोति दातुं ?, एवं दत्तं सुदत्तमिति च 'घुष्टं' संशब्दितमिति सूत्रार्थः ॥ तेऽपि ब्राह्मण विस्मितमनस इदमाहुः-

मू. (३१६) सक्खं खु दीसइ तवोविसेसो, न दीसई जाईविसेस कोई ।
सोवागपुत्तं हरिएससाहुं, जस्सेरिसा इड्ढि महानुभागा ॥

वृ. 'साक्षात्' प्रत्यक्षं 'खु' रिति निश्चितं अवधारणं वा ततः साक्षादेव 'दृश्यते' अवलोक्यते, काऽसौ ?-तपो-लोकप्रसिद्धा व्रतमुपवासादिर्वा तस्य विशेषो-विशिष्टत्वं माहात्म्यमिति-यावत्तपोविशेषो, 'न' नैव दृश्यते 'जातिविशेषो' जातिमाहात्म्यलक्षणः 'कोऽयो'ति स्वल्पोऽपि, किमित्येवमत आह-यतः स्वपाकपुत्रः-चाण्डालसुतो हरिकेशसाधुः गातङ्गत्वेन प्रसिद्धत्वात् साधुश्च सन्नित्याद्धरिकेशसाधुः, पठ्यते च-'सोवागपुत्तं हरिएससाहु'न्ति, अत्र च पश्यतेति शेषः, कदाचिदन्य एव कश्चिदत आह-यस्येदृशी-दृश्यमानरूपा ऋद्धिः-देवसन्निधानात्मिका सम्पत् महानुभागा-सातिशयमाहात्म्या, जातिविशेषे हि सति सर्वोत्तमत्वाद्ब्राह्मणजातेस्तद्गतामस्माकमेव देवा वैयावृत्त्यं कुर्युरिति भाव इति सूत्रार्थः ॥

साम्प्रतं स एव मुनिस्तानुपशान्तमिथ्यात्वमोहनीयोदयानिव पश्यन्निदमाह-

मू. (३१७) किं माहणा ! जोइसमारभंता, उदएण सोहिं बहिया विमग्गहा ? ।
जं मग्गहा बाहिरियं विसोहिं, न तं सुदिट्ठं कुसला वयंति ॥

वृ. 'किं'मिति क्षेपे, ततो न युक्तमिदं, यत् 'माहना' ब्राह्मणा ! 'ज्योतिः' अग्निं 'समारभमानाः' प्रस्तावद्यागकरणतः प्रवर्त्तमानाः, यागं कुर्व्वन्त इत्यर्थः, 'उदकेन' जलेन 'सोहि'ति शुद्धिं निर्म्मलतां 'बहिय'त्ति बाह्यां, कोऽर्थो ?-बाह्यहेतुकां, यागं हि समारभमानैर्जलेन या शुद्धिमाङ्ग्यते तत्र यागस्नाने एव तत्त्वतो हेतुत्वेनेष्टे, ते च भवदभिमते बाह्ये एवेति 'विमार्गयथ' विशेषेणान्वेषयथ, किमेवमुपदिश्यत इत्याह-यद्यूयं मार्गयथ बाह्यां-बाह्यहेतुकां विशुद्धिं, न तत् सुदृष्टं-सुष्ठु प्रेक्षितं 'कुशलाः' तत्त्वविचारं प्रति निपुणा 'वदन्ति' प्रतिपादयन्तीति सूत्रार्थः

यथा चैतत् सुदृष्टं न भवति तथा स्वत एवाह-

मू. (३१८) कुसं च जूवं तणकट्ठमग्गिं, सायं च पायं उदयं फुसंता ।
पाणाइं भूयाइं विहेडयंता, मुज्जो ऽवि मंदा ! पकरेह पावं ॥

वृ. 'कुशं च' दर्भं च 'यूपं' प्रतीतमेव तृणं च-वीरणादि काष्ठं-समिदादि तृणकाष्ठम् अग्निं-प्रतीतं, सर्वत्र परिगृह्यन्त इति शेषः, 'सायं' सन्ध्यायां, चशब्दो भिन्नक्रमस्ततः 'पायं'ति प्रातश्च प्रभाते उदकं-जलं 'स्पृशन्तः' आचमनादिषु परामृशन्तः 'पाणाइं'ति प्राणयोगात् प्राणिनो यद्वा प्रकर्षेणानन्तीति-वसन्तीति प्राणाः-द्वीन्द्रियादयः, सम्भवन्ति हि जले पूतरकादिरूपास्त इति, 'भूयाइं' इति भूतान्-तरून् 'भूताश्च तरवः स्मृता' इति वचनात्, पृथिव्याद्येकेन्द्रियोपलक्षणं चैतत् 'विहेडयंति'त्ति विहेठयन्तो-विशेषेण विविधं वा बाधमानाः विनाशयन्त इत्यर्थः, किमित्याह-'भूयोऽपि' पुनरपि, न केवलं पुरा किन्तु विशुद्धिकालेऽपि जलानलादिजीवोपमर्दतो 'मन्दाः' जडाः 'प्रकुरुथ' प्रकर्षेणोपचिनुथ यूयं, 'किं तत् ?-पापम्-अशुभकर्म्म,

अयमाशयः -कुशला हि कर्ममलविलयात्मिकां तात्त्विकीमेव शुद्धिं मन्यन्ते, भवदभिमतयाग-स्नाने च यूपादिपरिग्रहजन्यस्पर्शादिना भावित्वेन भूतोपमर्दहेतुतया प्रत्युत कर्ममलोपचयनिबन्धने एवेति नातः तत्सम्भव इति कथं तद्धेतुकशुद्धिमार्गं सुदृष्टं ते वदेयुः ?, तथा च वाचकः -

"शौचमाध्यात्मिकं त्यक्त्वा, भावशुद्धयाऽऽत्मकं शुभम् ।
जलादिशौचं यत्रेष्टं, मूढविस्मापनं हि तत् ॥"

इति सूत्रार्थः ॥ इत्थं तद्वचनतः समुत्पन्नशङ्कास्ते यागं प्रति एवं पप्रच्छुः -

मू. (३९९) कहं चरे भिक्खु ! वयं जयामो ?, पावाइं कम्माइं पणुल्लयामो ।
अक्खाहि णे संजय जक्खपूइआ, कहं सुदिट्ठं कुसला वयंति ? ॥

वृ. 'कथं' केन प्रकारेण 'चरे'त्ति 'विभाषा कथमि'ति च इति लिङ्गवचनव्यत्यये वचन व्यत्ययाच्चरेमहि-यागार्थं प्रवर्तेमहि, हे भिक्षो ! मुने ! वर्यामित्यात्मनिर्देशः, तथा 'यजामो' यागं कुर्म्मः, कथमिति योग्यं ?, पापानि- अशुभानि कर्म्माणि कुतोऽपि निमित्तादिधारणेन 'पणुल्लयामो'त्ति प्रणुदामः प्रेरयामो, येनेति गम्यते, 'आख्याहि' कथय 'नः' अस्माकं 'संयतः' पाप-स्थानेभ्यः सम्यगुपरतः 'यक्षपूजित' यक्षार्चित !, किमुक्तं भवति ?-यो ह्यस्माद्भवादतः कर्म्म-प्रणोदनोपायत्वेन यागः स युष्माभिर्दूषित इति भवन्त एवापरं यागमुपदिशन्तु, कदाचि-दविशिष्टमेव यजनमुपदिशेदित्याशङ्क्याह-कथं' केन प्रकारेण 'सुदिट्ठं' शोभनं यजनं 'कुसला' उक्तरूपा 'वदन्ति' प्रतिपादयन्ति, न तं 'सुदिट्ठं कुसला वयंति'त्ति कुशलमुखेनैव मुनिना दूषितमिति तैरपि तथैव पृष्टमिति सूत्रार्थः ॥ मुनिराह-

मू. (४००) छज्जीवकाए असमारभंता, मोसं अदत्तं च असेवमाना ।
परिग्गहं इत्थिउ माण मायं, एयं परिन्नाय चरंति दंता ॥

वृ. षड् जीवनिकायान् पृथिव्यादीन् 'असमारभमाना' अनुपमर्दयन्तः 'मोसं'ति मृषा अलीकभाषणं 'अदत्तं चे'त्यदत्तादानं चानासेवमानाः-अनाचरन्तः परिग्रहं-मूर्च्छां स्त्रियो-योषितो 'मान'त्ति मानम्-अहङ्कारं मायां-परवञ्चनात्मिकां तत्सहचारित्वात्कोपलोभौ च, 'एतद्' अनन्तरोक्तं परिग्रहादि 'परिज्ञाय' ज्ञपरिज्ञया सर्व्वप्रकारं ज्ञात्वा प्रत्याख्यानपरिज्ञया च प्रत्याख्याय 'चरेज्ज दन्त'त्ति वचनव्यत्ययाच्चरेयुर्यागं प्रवर्तेरन्, भवन्त इति गम्यते, पठन्ति च 'चरन्ति दंत'त्ति अत्र च यत एवं दान्ताश्चरन्त्यतो भवादृभरप्येवं चरितव्यमिति भाव इति सूत्रार्थः ॥

प्रथमप्रश्नप्रतिवचनमुक्तं, शेषप्रश्नप्रतिवचनमाह-

मू. (४०१) सुसंवुडा पंचहिं संवरेहिं, इह जीवियं अनवकंखमाना ।
वोसट्ठकाओ सुइचत्तदेहो, महाजयं जयइ जन्नसिट्ठं ॥

वृ. सुष्ठु संवृताः-स्थगितसमस्तास्रवद्वाराः सुसंवृताः, कैः ? पञ्चभिः-पञ्चसङ्ख्यैः संवरैः प्राणातिपातविरत्यादिव्रतैः 'इहे'त्यस्मिन् मनुष्यजन्मनि, उपलक्षणत्वात्परत्र च 'जीवितं' स्तावादसंयमजीवितम् 'अनवकाङ्क्षन्' अनिच्छन्, यद्वा अपेक्ष्यमाणत्वाज्जीवितमपि-आयुरप्यास्तामन्यद्धनादि, अनवकाङ्क्षन्, व्रतबाधा तत्रासौ जीवितमपि न गणयति, अत एव व्युत्सृष्टो-विविधैरुपायैर्विशेषेण वा परीषहोपसर्गसहिष्णुतालक्षणेनोत्सृष्टः-त्यक्तः कायः-शरीरमनेनेति व्युत्सृष्टकायः, शुचिः अकलुषव्रतः स चासौ त्यक्तदेहश्च-अत्यन्तनिष्प्रति-

कर्म्मतया शुचित्यक्तदेहो महान् जयः-कर्म्मशत्रुपराभवनलक्षणो यस्मिन् यज्ञश्रेष्ठोऽसौ महाज यस्तं, क्रियाविशेषणं वा महाजयं यथा भवत्येवं यजते यतिरिति गम्यते, ततो भवन्तोऽप्येवमेव यजन्तामिति भावः, तिङव्यत्ययेन वा 'जयइ'त्ति यजतां, कमित्याह-'जन्नसेट्ठं'ति प्राकृतत्वाच्छ्रेष्ठयज्ञं, श्रेष्ठवचनेन चैतद्यजन एव स्विष्टं कुशला वदन्ति, एष एव च कर्म्मप्राणोदनोपाय इत्युक्तं भवतीति सूत्रार्थः ॥ यदीदृग्गुणः श्रेष्ठयज्ञं यजते अतस्त्वमपीदृग्गुण एव, तथा च तं यजमानस्य कान्युपकरणानि को वा यजनविधिरित्यभिप्रायेण च एवमाहुः-

मू. (४०२) के ते जोई के व ते जोइठाणा ?, का ते सुया किं च ते कारिसंगं ?।
एहा य ते कयरा संति भिक्खू !, कयरेण होमेण हुणासि जोइं ? ॥

वृ. किं, अयमर्थः किंरूपं 'ते' तव 'ज्योति'रिति अग्निः 'के व ते जोइठाणे'त्ति किं वा ते-तव ज्योतिःस्थानं यत्र ज्योतिर्निधीयते, का श्रुवो ?-घृतादिप्रक्षेपिका दर्व्यः, 'किं च'त्ति किं वा करीषः-प्रतीतः स एवाङ्गम्-अग्न्युद्दीपनकारणं करीषाङ्गं येनासौ सन्धुक्ष्यते, एधाश्च-समिधो यकाभिरग्निः प्रज्वाल्यते, 'ते' तव कतरा इति-काः ?'संति'त्ति चास्य गम्यमानत्वाच्छ्रन्तिश्च-दुरितोपशमनहेतुरध्ययनपद्धतिः कतरेति प्रक्रमो, 'भिक्खु' इति भिक्षो ! कतरेण 'होमेन' हवनविधिना, समेन यावतीत्यादिवत् तृतीया, जुहोषि-आहुतिभिः प्रीणयसि, किं ? ज्योतिः-अग्निम्, षड्जीवनिकायसमारम्भनिषेधेन ह्यस्मदभिमतो होमः तदुपकरणानि च पूर्व्वं निषिद्धानीति कथं भवतो यजनसम्भवः ? इति सूत्रार्थः ॥ मुनिराह-

मू. (४०३) तवो जोई जीवो जोइठाणं, जोगा सुया सरीरं कारिसंगं।
कम्म एहा संजमजोग संती, होमं हुणामी इसिणं पसत्थं ॥

वृ. 'तपो' बाह्याभ्यन्तरभेदभिन्नं, 'ज्योतिः' अग्निः, यथा हि ज्योतिरिन्धनानि भस्मीकरोत्येवं तपोऽपि भावेन्धनानि-कर्म्माणि, जीवो-जन्तुर्ज्योतिःस्थानं, तपोज्योतिषस्तदाश्रयत्वात्, युज्यन्ते-सम्बध्यन्ते स्वकर्म्मणेति योगाः-मनोवाक्कायाः श्रुवः, ते हि शुभव्यापारः स्नेहस्थानीयाः, तपोज्योतिषो ज्वलनहेतुभूताः तत्र संस्थाप्यन्त इति, शरीरं करीषाङ्गं, तेनैव हि तपोज्योतिरुद्दीप्यते, तद्भावभावित्वात्तस्य, 'कर्म' उक्तरूपं एधास्तस्यैव तपसा भस्मीभावनयनात्, 'संजमजोग'त्ति संयमयोगाः संयमव्यापाराः शान्तिः सर्व्वप्राण्युपद्रवापहारित्वात्तेषां, तथा 'होम'न्ति होमेन जुहोति तपोज्योतिर्गिरति गम्यते, ऋषीणां-मुनीनां सम्बन्धिना 'पसत्थं'ति प्रशस्तेन जीवोपघातरहितत्वेन विवेकिभिः श्लाघितेन सम्यक्चारित्रेणेति भावः, अनेन च कतरेण होमेन जुहोषि ज्योतिरिति प्रत्युक्तमिति सूत्रार्थः ॥ तदेतेन 'किं माहना जोइसमारहंता' इत्यादिना लोकप्रसिद्धयज्ञानं स्नानस्य च निषिद्धत्वाद्यज्ञस्वरूपं तैः पृष्टं कथितं च मुनिना ॥

इदानीं स्नानरूपं पिपृच्छिषव इदमाहुः-

मू. (४०४) के ते हरए के य संतितित्थे ?, कहंसि न्हाओ व रयं जहासि ?।
आइक्ख णे संजय जक्खपूइया ! इच्छामु नाउं भवओ सगासे ॥

वृ. कस्ते तव 'ह्रदः' नदः ?, 'के च ते संतितित्थे'त्ति किं च ते-तव शान्त्यै-पापोपशमनिमित्तं तीर्थं-पुण्यक्षेत्रं शान्तितीर्थम्, अथवा 'कानि च' किंरूपाणि 'ते' तव 'सन्ति' विद्यन्ते 'तीर्थानि' संसारोदधितरणोपायभूतानि, लोकप्रसिद्धतीर्थानि हि त्वया निषिद्धानीति, तथा च

'कहिंसि न्हाओ वे' ति वाशब्दस्य भिन्नक्रमत्वात्कस्मिन् वा स्नातः शुचिर्भूतो रज इव रजः-कर्म्म जहासि-त्यजसि त्वं ?, गम्भीराभिप्रायो हि भवांस्ततू किमस्माकमिव भवतोऽपि हृदतीर्थ एव शुद्धिस्थानमन्यद्वेति न विद्म इति भावः, 'आचक्ष्व' व्यक्तं वद संयत! यक्षपूजित! 'इच्छामः' अभिलषामो 'ज्ञातुम्' अवगन्तुं 'भवतः' तव 'सकाशे' समीपे इति सूत्रार्थः ॥ मुनिराह-

मू. (४०५) धम्मे हरए बंभे संतितित्थे, अणाविले अत्तपसन्नलेसे।
जहिंसि न्हाओ विमलो विसुद्धो, सुसीइभूओ पजहामि दोसं॥

वृ. 'धर्म्मः' अहिंसाद्यात्मको हृदः कर्म्मरजोऽपहन्तृत्वाद्ब्रह्मेति-ब्रह्मचर्यं शान्तितीर्थं, तदासेवनेन हि सकलमलमूलं रागद्वेषावुन्मूलितावेव भवतः, तदुन्मूलनाच्च न कदाचिन्मल्य सम्भवोऽस्ति, सत्याद्युपलक्षणं चैतत्, तथा चाह-

"ब्रह्मचर्येण सत्येन, तपसा संयमेन च।
मातङ्गर्षिर्गतः शुद्धिं, न शुद्धितीर्थयात्रया॥"

अथवा 'ब्रह्मे'ति ब्रह्मचर्यवन्तो मतुल्लोपादर्शदेर्वोपचारद्वा साधव उच्यन्ते, सुब्व्यत्ययाच्चैकवचनं, 'संति' विद्यन्ते तीर्थानि ममेति गम्यते, उक्तं हि-

"साधूनां दर्शनं श्रेष्ठं, तीर्थभूता हि साधवः।
तीर्थं पुनाति कालेन, सद्यः साधुसमागमः॥"

किं च-भवत्प्रतीततीर्थानि प्राण्युपमर्दहेतुतया प्रत्युत मलोपचयनिमित्तानीति कुतस्तेषां शुद्धिहेतुता ?, तथा चोक्तम्-

"कुर्याद्वर्षसहस्रं तु, अहन्यहनि मज्जनम्।
सागरेणापि कृत्स्नेन, बभ्रुको नैव शुद्धयति॥"

हृदशान्तितीर्थे एव विशिनष्टि-'अनाविले' मिथ्यात्वगुप्तिविरत्यनादिभिरकलुषे अनाविलत्वादेवात्मनो-जीवस्य प्रसन्ना-मानगम्यकलुषा पीताद्यन्यतरा लेश्या यस्मिंस्तदात्मप्रसन्नलेश्यं तस्मिन्, अथवा आत्मा-प्राणिनामिह परत्र च हिता प्राप्ता वा तैरेव प्रसन्नलेश्या-उक्तरूपा यस्मिंस्तदात्मप्रसन्नलेश्यं तस्मिन्नेवंविधे धर्म्महृदे, ब्रह्माख्यशान्तितीर्थे च, यदा ब्रह्मशब्देन ब्रह्मचर्यवन्त उच्यन्ते तत्पक्षे वचनविपरिणामेन विशेषणद्वयं व्याख्येयं, 'जहिंसि'त्ति यत्रास्मिन् स्नात इव स्नातः-अत्यन्तशुद्धिभवनाद्विमलो-भावमलरहितोऽत एवातो(व)विशुद्धो-गतकलङ्कः, 'सुसीतीभूओ'त्ति सुशीतीभूतो रागाद्युत्पत्तिविरहतः सुष्ठु शैत्यं प्राप्तः, पठ्यते च-'सुसीलभूओ'त्ति सुष्ठु-शोभनं शीलं-समाधानं चारित्रं वा भूतः-प्राप्तः सुशीलभूतः 'प्रजहामि' प्रकर्षेण त्यजामि दूषयन्ति-विशुद्धमप्यात्मानं विकृतिं नयतीति दोषः-कर्म्म तं, अनेनैतदा-ममापि हृदतीर्थे एव शुद्धिस्थानं परमेवंविधे एवेति, निगमयितुमाह-

मू. (४०६) एयं सिणाणं कुसलेण दिट्ठं, महासिणाणं इसिणं पसत्थं।
जहिंसि न्हाया विमला विसुद्धा, महारिसी उत्तमं ठाणं पत्ति॥

वृ. 'एतदि'त्यनन्तरमुक्तं 'स्नानं' रजोहीनं 'कुशलैः' प्रागुक्तरूपैर्दृष्टं-प्रेक्षितभिदमेव च महास्नानं, न तु युष्मत्प्रतीतम्, अस्यैव सकलमलापहारित्वाद्, अत एव चेदं ऋषीणां प्रशस्तं-प्रशंसास्पदं, न तु जलस्नानवत्सदोषतया निन्द्यम्, अस्यैव फलमाह-"जहिंसि'त्ति सुब्व्य-

त्ययाद्येन स्नाता विमला विशुद्धा इति च प्राग्वत् महर्षयो - महामुनय उत्तमं स्थानं-मुक्तिलक्षणं 'प्राप्ताः' गता इति सूत्रद्वयार्थः ॥

इति परिसमाप्तौ, ब्रवीमीति पूर्ववद्, गतोऽनुगमः, सम्प्रति नयास्ते च प्राग्वदेव ॥

अध्ययनं - १२ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे द्वादशअध्ययनस्य भद्रबाहुसूरिविरचिता निर्युक्तिः एवं शान्त्याचार्य विरचित टीका परिसमाप्ता

अध्ययनं - १३ - चित्रसंभूतिय

वृ. व्याख्यातं हरिकेशीयं नाम द्वादशमध्ययनम्, अधुना त्रयोदशममारभ्यते, अस्य चायमभिसंबन्धः-इहानन्तराध्ययने श्रुतवत्तपस्यपि यत्नो विधेय इति ख्यापयितुं तपःसमृद्धिरभिहिता, इह तु तत्प्राप्तावपि निदानं परिहर्त्तव्यमिति दर्शयितुं यथा तत् महापायहेतुस्तथा चित्रसंभूतोदाहरणेन निदर्श्यत इति, अनेन सम्बन्धेनायातस्यास्याध्ययनस्यानुयोगद्वारचतुष्टयचर्चा प्राग्वद्याववाक्यनिष्पन्ननिक्षेपे चित्रसंभूतीयमिति नाम, अतश्चित्रसंभूतनिक्षेपाभिधानायाह निर्युक्तिकृत्-

नि.[३३०] चित्ते संभूअंमि अ निक्खेवो चउक्कओ दुहा दव्वे ।
आगमनोआगमओ नोआगमओ अ सो तिविहो ।

नि.[३३१] जाणगसरीरभविए तव्वतिरित्ते य सो पुनो तिविहो ।
एगभविअ बद्धाऊ अभिमुहओ नामगोए य ॥

नि.[३३२] चित्तसंभूआउं वेअंतो भावओ अ नायव्वो ।
तत्तो समुट्ठिअमिणं अज्झयणं चित्तसंभूयं ॥

वृ. गाथात्रयं स्पष्टमेव, नवरं 'चित्तसंभूयाउं'ति एकारोऽलाक्षणिकः, 'ततः समुत्थित'मिति ताभ्यां-चित्रसम्भू ताभ्यामभिधेयभूतामागतं, 'तेसुं'ति च पाठे तयोः 'समुत्थित'मिति पदं चित्रसंभूतीयं, 'वृद्धच्छः' इति छप्रत्यये वृद्धसञ्ज्ञा तु 'वा नामधेयं यस्ये'ति वचनात् ॥

सम्प्रति कावियौ चित्रसंभूतौ ? केन चानयोरत्राधिकारः ? इत्याशङ्क्याह-

नि.[३३३] सागए चंडवडिंगसयस्स पुत्तो अ आसि मुनिचंदो ।
सोऽवि अ सागरचंदस्स अंतिए पव्वए समणो ॥

नि.[३३४] तण्हाछुहाकिलंतं समणं दट्ठूण अडविनीहुत्तं ।
पडिलाहणा य बोही पत्ता गोवालपुत्तेहिं ॥

नि.[३३५] तत्तो दुन्नि दुगछं काउं दासा दसन्नि आयाया ।
दुन्नि अ उसुआरपुरे अहिगारो बंभदत्तेणं ॥

वृ. गाथात्रयमस्याप्यक्षरार्थः स्पष्ट एव, नवरं 'पव्वए समणो'त्ति प्राव्राजीत् समानं मनोऽस्येति समनाः - सर्वत्रारक्तद्विष्टचित्तः सन्, यद्वा श्राम्यतीति श्रमणः-तपस्वी सन्, निश्चयनयापेक्षं चैतत्, "नेरइए नेरइएसु उववज्जति" इत्यादिवत्, तथा 'अडविनीहुत्तं'ति अटवीनिःसृतम्, अरण्यान्निष्क्रान्तमित्यर्थः । भावार्थस्तु कथानकगम्यः, तच्चेदम्-अस्ति कोसलालङ्कारभूतं साकेतं नाम नगरं, तत्र चाभूदधिगतजीवाजीवादितत्त्वश्चन्द्रावतंसको नाम राजा, तस्य च धारिणी देवी,

तदङ्गजो मुनिचन्द्रः, स च राजाऽन्यदा समुत्पन्नसंवेगस्तमेव सुतं राज्येऽभिषिच्य प्रव्रज्याम-शिश्रियत्, प्रतिपाल्य च प्रव्रज्यामपगतमलकलङ्कोऽपवर्गमगमत् ।

अन्यदा च सागरचन्द्राचार्या बहुशिष्यपरिवृतास्तत्रागताः निर्गतश्च मुनिचन्द्रनृपतिस्तद्वन्दनाय, दृष्टश्चानेन सूरयः, स्तुत्वा च तानुपविष्टस्तदन्तिके, श्रुतश्च तत्कथितो विशुद्धधर्मः, समुत्पन्नश्चास्य तत्करणाभिलाषः, ततः स्वसुतं राज्ये निवेश्य प्रतिपन्नो दीक्षां श्रामण्यं, गृहीता चानेन ग्रहणासेवनाभयलक्षणा शिक्षा, प्रवृत्ताश्चान्यदा सुसार्थेन सगच्छाः सागरचन्द्रसूरयोऽध्वानं, मुनिचन्द्रमुनिश्च तैः समं व्रजन् गुरुनियोगादेकाकीव भक्तपाननिमित्तं क्वचित्प्रत्यन्तग्रामे प्राविशत्, प्रविष्टे चास्मिन् प्रवृत्तः सार्थो गन्तुं, प्रज्वलिताः सहानेन सूरयो, विस्मृतश्चायमेषां, प्रस्थितश्च क्षणान्तरेण गृहीतभक्तपानस्तदनुमार्गेण, पतितश्च मूर्द्धादिकश्चक्रवालः सार्थविषण्णापरः, मार्गात्परिभ्रष्टो भ्रमदनेकशार्दूलजालां द्विपकदम्बकभज्यमानशालशल्लकीप्रभृतितरुनिकरामनर्वाक्पारतया च संसारानुकारिणीं विभ्याटवीं, तत्र चासौ परिभ्रमन् गिरिकन्दराण्यतिक्रामन्नतिनिम्नोन्नतभूभागान् पश्यन् भयानकानेकद्वीपितरक्षाच्छभल्लादिश्वापदान् उत्तीर्णस्तृतीयदिने, तदा च क्षुत्क्षामकुक्षिः शुष्कोष्ठकण्ठतालुरेकत्र वृक्षच्छायायां मूर्च्छावशनष्टचेष्टो दृष्टश्चतुर्भिर्गोपालदारकैः, उत्पन्ना अमीषामनुकम्पा, सिक्तत्वरितमागत्य गोरसाम्भिश्रहरितजलेन, पायितोऽसौ तदेव, समाश्वस्तश्च नीतो गोकुलं, प्रतिजागरितश्च तत्कालोचितकृत्येन, प्रतिलाभितः प्रासुकान्नादिना, कथितस्तेषा-मनेन जिनप्रणीतधर्मः, गृहीतश्चायमेतैर्भावगर्भं, गतश्चासौ विवक्षितस्थानं, तं च मलदिग्धदेहमव-लोक्य द्वयोः समजनि जुगुप्सा, तदनुकम्पातः सम्यक्त्वानुभावतश्च निर्वर्तितं चतुर्भिरपि देवायुः, जग्मुश्च देवलोकं, ततश्च्युतौ चाकृतजडुगुप्सौ तु कतिचिद्भवान्तरितौ हाविषुकारपुरे द्विजकुले जातौ, तद्वक्तव्यता च इषुकारीयनाम्यनन्तराध्ययनेऽभिधास्यते, यौ च द्वौ जुगुप्सकौ तौ दशार्ण-जनपदे ब्राह्मणकुले दासतयोत्पन्नौ, तयोश्च य इह ब्रह्मदत्तो भविष्यति तेनात्राधिकारो, निदान-स्यैवात्र वक्तुमुपक्रान्तत्वान्नेतरेण च तद्विधानाद्, द्वितीयस्य तु प्रसङ्गत एवाभिधीयमानत्वात्, इह च नामनिष्पन्ननिक्षेपे प्रस्तुते प्रसङ्गतोऽर्थाधिकारेऽप्युक्त इति गाथात्रयभावार्थः ।

उक्तो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिष्पन्नस्यावसर इति सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (४०७) जाईपराजिओ खलु कासि नियाणं तु हत्थिणपुरंमि ।
चुलणीइ बंभदत्तो उववन्नो पउमगुम्माओ ॥

वृ. 'जातिपराजितः' इति जात्या-प्रस्तावाच्चाण्डालाख्या पराजितः-अभिभूतः, स हि वाराणस्यां हस्तिनागपुरे च वक्ष्यमाणन्यायतो नृपेण नमुचिनाम्ना च द्विजेन चाण्डाल इति नगर-निष्कासनन्यक्कारादिना पुरा जन्मन्यपमानित इत्येवमुक्तः, यद्वा जातिभिः-दासादिनीचस्थानो-त्पत्तिभिरुपर्युपरिजाताभिः पराजित इति-पराभवं मन्यमानोऽहो ! अहमधन्यो यदित्थं नीचास्वेव जातिषु पुनः पुनरुत्पन्न इति, 'खलुः' वाक्यालङ्कारे, स चैवंविधः किमित्याह- 'कासि'त्ति अकार्षीत्, किमित्याह- 'निदानं' चक्रवर्त्ति पदावाप्तिर्मम भवेदित्येवमात्मकं 'तुः' पूरणे, क्वेदं कृतवान् ? इत्याह-'हत्थिणपुरंमि'त्ति हस्तिनागपुरे, चुलन्यां ब्रह्मदत्तः 'उववन्नो'त्ति उत्पन्नः 'पद्मगुल्मात्' इति नलिनगुल्मविमानाच्च्युत्वेति शेषः, इति सूत्राक्षरार्थः ॥

भावार्थस्त्वयम्-स हि ब्रह्मदत्तः पूर्वजन्मनि वाराणस्यां संभूतनामा चण्डालश्चित्रश्च तज्ज्येष्ठ आसीत्, तत्र च नमुचिनामा ब्राह्मणो ममान्तःपुरमपध्वंसितमनेनेत्युत्पन्नकोपेन राज्ञा समर्पितो मारणनिमित्तं मातङ्गाधिपस्य तत्पितुः, उक्तश्चायमेतेन-यदि मत्सुतौ सकलकलाकलापकुशलौ विधत्से ततोऽस्ति ते जीवितमन्यथा नेति, प्रारब्धं च तदर्थिनाऽनेन तद्गृह एवातिगुप्तस्थानस्थितेन तदध्यापनं, ग्राहितो तौ व्याकरणवीणापुरःसरः सकला अपि कलाः, अन्यदा च शुश्रूषापरायां तन्मातरि मोहोदयादयमुपपतित्वमाजगाम, ज्ञातस्तज्जनकेन, इष्टश्च मारयितुं, ज्ञातं तताभ्यां, ज्ञापितं चास्मै, उपाध्यायोऽयमावयोस्ततो मा भूदस्यापदिति, तदवगमाच्च पलायितोऽसौ ततः स्थानात्, प्राप्तो हस्तिनागपुरं, कृतः सनत्कुमारचक्रवर्त्तिना मन्त्री।

इतश्च तौ चित्रसंभूतौ सातिशयगीतकलाक्षिप्तकर्णीजनात्यासक्तिहेतुतया त्याजितस्पृश्यास्पृश्य विभागौ जनेन राज्ञे निवेदितौ, यथाविनाशितं नगरमाभ्यां, निषिद्धस्तेन नगरस्यान्तस्तत्प्रचारः, कदाचिच्च तावतिकुतूहलतया कौमुदीमहविलोकनार्थमागतौ, दृष्टौ जनेन, कदर्थितावत्यर्थं, प्रवव्रजतुश्च ततः सोत्तरापथगौ, जातौ विकृष्टतपोनिष्ठदेहौ, प्राप्ताश्चाभ्यां तेजोलेश्यादिलब्धयः, समापन्नितश्च गतौ हस्तिनागपुरं, प्रविष्टौ मासक्षपणपारणके तत्र भिक्षार्थं संभूतयतिः, दृष्टश्च नमुचिना, जातोऽस्य चेतसि दुरध्यवसायो-महदुश्चरितमयंप्रकाशयिष्यतीति, निर्भर्त्सितो-धिग् मुण्ड चाण्डाल! क्व नगरस्यान्तः प्रविष्टोऽसि? इत्यादिनिष्ठुरवचोभिः, प्रहृत इष्टकोपलशकलादिभिस्तत्परिजनेन, तदनु च समस्तलोकेन, कुपितश्चासौ तेभ्यः समस्तजनदहनक्षमासङ्घातेजोलेश्यां मोक्तुमुपचक्रमे, तत्र च मुखविनिर्यद्बहलधूमपटलान्धकारितदिक्चक्रवाले व्याकुलितः सान्तःपुरः सनत्कुमारचक्रवर्त्ती सकलो नगरलोकश्च समायातस्वत्पार्श्वे, तदृत्तान्तश्रवणतश्चित्रश्च, प्रारब्धस्तैरनेकधा सान्त्वनववनैरुपशमयितुं, तथाऽपि तत्रात्मानमस्मरत्यतिकोपवशगे भगवति मा भूदस्माकमकस्माद्भस्मीभवनमिति स्त्रीरत्नसहितो महीपतिस्तं क्षमयाम्बभूव, यथा-भगवन्! क्षमितव्यमस्माकमिदमिति, अस्मिंश्चान्तरे स्त्रीरत्नकोमलालकस्पर्शसमुत्पन्नतदभिलाषो विगलितानुशयश्चाण्डालजातिरेव ममैवमनेकधा कदर्थनाहेतुरिति चिन्तयंश्चित्रयतिना निवार्यमानोऽपि यदि ममास्य तपसः फलमस्ति तदाऽन्यजन्मनि चक्रवर्त्तित्वमेव मम भयाद् येनाहमप्येवं ललिताललनाविलासास्पदमुत्तमजातिश्च भवामीति निदानवशगोऽनशनं प्रपेदे।

ततः स तपोऽनुभावतो नलिनगुल्मविमाने वैमानिकत्वेनाजनि, ततश्च च्युतश्चुलन्यां ब्रह्मदत्तः समुत्पेदे। क्व? इत्याह -

सू.(४०८/१) *कांपिल्ले संभूओ।*

वृ. 'काम्पिल्य' इति पञ्चालमण्डलस्य तिलक इव काम्पिल्यनाम्नि नगरे 'संभूत' इति पूर्वजन्मनि संभूतनामा। अमुं पादमतिक्रान्तसूत्रोत्तरपादद्वयं चैतद्गदितार्थप्रसङ्गायातार्थान्तराभिधानद्वारतः स्पृशन् सूत्रस्पर्शिकनिर्युक्तिमाह निर्युक्तिकृत्-

नि.[३३६] राया य तत्थ बंभो कडओ तइओ कणेरदत्तोति।
राया य पुप्फचूलो दीहो पुण होइ कोसलिओ॥

नि.[३३७] एए पंच वयंसा सव्वे सह दारदंडिसिणो भोच्चा।

संवच्छरं अन्नूणं वसंति इक्किक्करज्जंमि ॥

नि. [३३८] राया य बंभदत्तो धनुओ सेनावई अ वरधनुओ ।
इंदासरी इंदजसा इंदुवसु चुलनिदेवीओ ॥

वृ. राजा च तत्र पाञ्चालेषु काम्पिल्ये 'ब्रह्म' इति ब्रह्मनामा कामीजनपदाधिपः कटकस्तृतीयः कुरुषु गजपुराधिपतिः कणेरुदत्त इति राजा च अङ्गेषु चम्पास्वामी पुष्पचूलो यः किल ब्रह्मपत्न्याश्चुलिन्या भ्राता 'दीर्घ' इति दीर्घपृष्ठः पुनर्भवति कौशलिकः साकेतपुराधिपतिः एतेऽनन्तरोक्ताः पञ्च वयस्यां 'सर्वे' समस्ताः सह दारान पश्यन्तीत्येवंशीलाः महदारदर्शिनः, किमुक्तं भवति ?- एककालकृतकलत्रस्वीकाराः समानवयस इतियावत् 'गोरूव'त्ति भूत्वा संवत्सरं वर्षम् 'अन्यूनं' परिपूर्णं 'वसन्ति' आसते, तत्कालापेक्षया वर्तमानता, 'एकैकराज्ये' एककसंबन्धिनि नृपतित्वे ।

एष तावद्गाथाद्वयार्थः, तृतीयगाथा तु तात्पर्यतो व्याख्यायते-ब्रह्मराजस्येन्द्रश्रीप्रमुखाश्चतस्रो देव्यः, तत्र च चुलन्याः पुत्रोऽजनि, धनुर्नाम्नः सेनापतेरपरायां तद्भार्यायां सूनुः वरधनुरपादि, कृतानि द्वयोरपि मङ्गलकौतुकानि, दत्तानि च दीनानाथेभ्यो दानानि, विहितं च स्वसमये राजपुत्रस्य ब्रह्मदत्त इति नाम, इतरस्य तु वरधनुरिति, कालक्रमेण च जातौ कलाग्रहणोचितौ, ग्राहितौ सर्वा अपि कलाः, अस्मिंश्चान्तरे मरणपर्यवसानतया जीवलोकस्य मृतो ब्रह्मराजः, कृतमौर्द्धदेहिकम्, अतिक्रान्तेषु च कतिपयदिनेषु तद्वयस्यैरभिषिक्तो राज्ये ब्रह्मदत्तः, पर्यालोचितं च तैः-तथैष नाद्यापि राज्यधुराधरणधौरेय इति पालयितुमुचितः कतिचित्संवत्सरान्, निरूपितैस्तैस्तत्र दीर्घपृष्ठः, गताः स्वस्वदेशेषु कटकादयः, जातश्च सर्वत्राप्रतिहतप्रवेशतया दीर्घपृष्ठस्य सह चुलन्या सम्बन्धः, ज्ञातं चैतदन्तःपुरपालिकया, न्यवेदि च तया धनुर्नाम्नः सेनापतिमन्त्रिणः सकलमपि तद्वृत्तं, निरूपितमनेन वरधनुर्यथा न कदाचित्कुमारस्त्वया मोक्तव्य इति, आरब्धश्चासौ तथैवानुष्ठातुम्, अन्यदा चायं विदितदीर्घपृष्ठचुलनीवृत्तान्तः केनचिदुपायेनामू निवारयामीति विजातिशकुनिकसङ्ग्रहणकमानीय कुमारायोपनिन्ये, तच्चातिनियमितमादायान्तःपुरस्यान्तः किलान्योऽपि य एवं दुष्टशीलः सोऽस्माभिरित्थं नियन्त्रणीय इति तौ स्वयं स्वसहचरैश्च डिम्भैरुद्घोषयन्तौ प्रतिदिनमितश्चेतश्च भ्रमितुमारब्धौ, उपलब्धं च ताभ्यामनुक्रीयमाणं दीर्घपृष्ठेन, कुपितश्चासौ कुमाराय, भणिता च चुलनी-यथाऽयमुपायेन केनापि विनाश्यतां यतो न विषकन्दल इवैष उपेक्षितः क्षेमङ्करोऽस्माकं भवेतेति, प्रतिपन्नं च तत्तया दुरन्ततया मोहोदयस्य, निरूपितश्च ताभ्यामुपायः-यथाऽस्मै पुष्पचूलमातुलेन स्वदुहिता पुष्पचूला नाम पूर्वदत्तेति तामसौ परिणाय्यते, कार्यते चैतच्छयनाय जतुगृहम्, एतश्च तन्मन्त्रितमशेषमपि तथैवान्तःपुररक्षिकया निवेदितं धनोः, तेनापि विनष्टमेतदिति पर्यालोच्य कुमारसंरक्षणाय प्रयत्नः कर्तुमुपचक्रमे, तथाहि-पृष्टोऽसावनेन दीर्घपृष्ठो यथा वयमिदानीं वृद्धास्तात्किमिदानीमपरेण ?, युष्माभिरनुज्ञाता धर्ममेवैतत्कालोचितं कुर्मः, तेनालोचितं-यथैष दुरात्मा दूरस्थो न सुन्दर इति, उक्तश्च-

यथैतत्त्वदहितमखिलमपि राज्यं विनश्यत्यत इहैव स्थितो जपहोमदानादिभिर्धर्ममुपचिनु, तेन चोक्तं यदादिशन्ति भवन्तः, इत्युक्त्वा च गतः स्वगृहं, कारितं चानेन भागीरथ्यास्तटे

स्वनिवासस्थानं, निरूपितं तत्र सत्रं, स्थापिता च तत्र प्रत्यासिकपुरुषैर्जतुगृहं यावत्पुरक्षा, ज्ञापिता ऽसौ वरधनोः, इतश्च गणितं तत्परिणायनलग्नं, निष्पन्नं च जतुगृहं, प्रेषिता च मन्त्रिवचनतो ऽन्यैव कन्यका मातुलेन, समागतो लग्नदिनः, कृतं सर्वसमृद्धयोपयमनं, शायितश्च रजन्यां जतुगृहे कुमारः, प्रदीपितं च तद्द्वार एव सुप्तजनायां रजन्यां, ज्ञातं चासन्नस्थितेन वरधनुना, उत्थापितः कुमारो, दृष्टं च सर्वतः प्रदीप्तमेतेन, उक्तश्च वरधनुः- मित्र! किमिदानीं क्रियतामिति, तेनोक्तं -मा भैषीः, यतः प्रतिविहितमत्र तातेन, अत्रान्तरे चागतं नागकुमारद्वयानुकारि भुवनमुद्भिद्य पुरुषद्वयम्, अभ्यधाश्च तत्- मा भैष्टाम्, आवां हि धनोर्गृहजातौ दासचेटकौ, तत्क्रियतां प्रसादो, निर्गम्यतां सुरङ्गामार्गेण, इत्युक्तौ च तौ गतौ सुरङ्गाद्वारं, दृष्टं च तत्र प्रधानगन्धहस्तियुगलम्, उक्तं च ताभ्यां चेटकाभ्याम्-एतावारुह्य देशान्तरापक्रमणेनात्मानं रक्षतां दीर्घपृष्ठाद्भवन्तौ यावत्क्वचिदवसरः शुभो भवति, ततस्तद्वचनमाकर्ण्य किं किमेतत् ? इत्याकुलितचेतसो ब्रह्मदत्तस्य कथितः सर्वो ऽपि वरधनुना चुल्लनीवृत्तान्तः, अभिहितं च-यथेदमेवेदानीं प्राप्तकालमिति, विनिर्गतौ च तत्प्रधानगन्धयुगलमारुह्येति तृतीयगाथातात्पर्यार्थः।

एवं च प्राप्तावसरा ब्रह्मदत्तहिण्डी, ततस्तत्र ये कन्यालाभा ये च तत्पितरस्तदुपदर्शनाय गाथापञ्चकमाह-

नि.[३३९] चित्त अ विज्जुमाला विज्जुमई चित्तसेनओ भद्दा।
पंथग नागजसा पुन किंत्तिमई किंत्तिसेनो य॥

नि.[३४०] देवी अ नागदत्ता जसवइ रयणवइ जक्खहरिलो य।
वच्छी अ चारुदत्तो उसभो कच्चाइणो य सिलो॥

नि.[३४१] धनदेवे वसुमित्ते सुदंसणे दारुए य निअडिल्ले।
पुत्थी पिंगल पोए सागरदत्ते अ दीवसिहा॥

नि.[३४२] कंपिल्ले मलयवई वनराइ सिंधुदत्त सोमा य।
तह सिंधुसेन पज्जुन्नसेन वाणीर पइगा य॥

नि.[३४३] हरिएसा गोदत्ता कणेरुदत्ता कनेरुपइगा य।
कुंजरकण्णेरुसेणा इसिचुड्डी कुरुमई देवी॥

वृ. इदं च सोपस्कारतया व्याख्यायते-'चित्रश्च' चित्रनामा जनकस्तदुहितरौ विद्युन्माला विद्युन्मती च, तथा चित्रसेनकः पिता भद्रा च तद्दुहिता, तथा पन्थकः पिता नागजसा कन्यका, पुनः समुच्चये, तथा कीर्त्तिमती कन्या कीर्त्तिसेनश्च तत्पिता। तथा देवी च नागदत्ता यशोमती रत्नवती च, पिता च सर्वासामपि यक्षहरिलः, 'चः' समुच्चये, वच्छी च कन्या चारुदत्तः पिता, तथा वृषभो जनकः, कात्यायनसगोत्रा तत्सुता शिला नाम।

तथा धनदेवो नाम वणिक् अपरश्च वसुमित्रोऽन्यश्च सुदर्शनो दारुकश्च 'निकृतिमान्' मायापरः, चत्वारोऽमी कुक्कुटयुद्धव्यतिकरे मिलितास्तत्र च पुस्ती नाम कन्यका, तथा पिङ्गला नाम कन्या पोतश्च तत्पिता, सामस्तत्तश्च वणिक् तदङ्गजा च दीपशिखा। तथा काम्पिल्यः पिता मलयवती दुहिता, तथा वनराजी नाम कन्या तज्जनकश्च सिन्धुदत्तः, तथा तस्यैवान्या सोमा च नाम कन्या, तथा सिन्धुसेनप्रद्युम्नसेनयोर्यथाक्रमं वानीरनाम्नी प्रतिकाभिधाना चेति, पठ्यते च 'प्रतिभा

वे'ति, द्वे दुहितरौ ।

तथा हरिकेशा गोदत्ता करेणुदत्ता करेणुपालिका च, 'कुंजरकरेणुसेण' त्ति सेनाशब्दस्य प्रत्येकमभिसंबन्धात्कुञ्जरसेना करेणुसेना च, ऋषिवृद्धिः कुरुमती च देवी मकलान्तःपुरप्रधाना अष्टौ, कुरुमती च स्त्रीरत्नं, ब्रह्मदत्तेनावाप्तेति सर्वत्र शेषः, अतिप्रसिद्धत्वाच्च तदेतज्जनकनाम्नामनभिधानमिति गाथापञ्चकार्थः ॥ अधुना येषु स्थानेषु असौ भ्रान्तस्तान्यभिधातुमाह-

नि.[३४४] कंपिल्लं गिरितडगं चंपा हत्थिणपुरं च साएयं ।
समकडगं ओसाणं(नंदीसा)वंसीपासाय समकडगं ॥

नि.[३४५] समकडगाओ अडवी तण्हा वडपायवंमि संकेओ ।
गहणं वरधनुअस्स य बंधनमक्कोसणं चेव ॥

नि.[३४६] सो हम्मई अमच्चो देहि कुमारं कहिं तुमे नीओ ?।
गुलियविरेयणपोओ कवडमओ छड्डिओ तेहिं ॥

नि.[३४७] तं सोऊण कुमारो भीओ अह उप्पहं पलाइत्था ।
काऊण थेररूवं देवो वोहेसिअ कुमारं ॥

नि.[३४८] वड्ढपुरगबंभथलयं वडथलगं चेव होइ कोसंबी
वाणारसि रायगिहि गिरिपुर मुहुरा य अहिछत्ता ॥

नि.[३४९] वनहत्थी अ कुमारं जणयइ आहरण वसनगुणलुद्धो ।
वच्चंतो अ पुराओ अहिछत्तं अंतरा मापो ॥

नि.[३५०] गहणं नइंकुडंगं गहणतरागाणि पुरिसहिअयाणि ।
देहाणि पुन्नपत्तं पिअं खुणो दोरओ जाओ ॥

नि.[३५१] सुपइट्ठे कुसकुंडि गहनतरागाणि पुरिसहिअयाणि ।
देहाणि पुन्नपत्तं पिअं खुणो दारओ जाओ ॥

नि.[३५२] इंदपुरे रुद्दपुरे सिवदत्त विसाहदत्त भूआओ ।
बहुअत्तनेण लहइ कन्नाओ दुन्नि रज्जं च ॥

नि.[३५३] रायगिहमिहिलहत्थिणपुरं च चंपा तहेव सावत्थी ।
एसा उ नगरहिंडी बोद्धव्वा बंभदत्तस्स ॥

नि.[३५४] रयणुप्पया य विजओ बोद्धव्वो दीहरोसमुक्खे य ।
संभरणनलिनिगुम्मं जाईइ पगासणं चेव ॥

वृ. गाथा एकादश, आसामपि तथैव व्याख्या, काम्पिल्यं पुरं यत्रास्य जन्म, ततोऽसौ गतो गिरितटके सन्निवेशं तस्माच्चम्पां ततो हस्तिनागपुरं चानन्तरं च साकेतं साकेतात्मकटकं, ततश्च नन्दिनामकं संनिवेशं, ततोऽवश्यानकं नाम स्थानं, ततोऽपि चारण्यं परिभ्रमन् वंशीति-वंशगहनं तदुपलक्षितं प्रासादं वंशीप्रासादं, ततोऽपि समकटकं ॥

समकटकादटवीं, तां च पर्यटतो ब्रह्मदत्तस्य तृडतिशयतः शुष्ककण्ठौष्ठतालुताऽजनि, ततस्तेनोक्तो वरधनुः-भ्रातः ! बाधते मां तृट्, तदुपाहर कुतोऽपि जलम्, अत्रान्तरे दृष्टोऽनेन

निटङ्कवर्त्ती कटपादपः, शायितस्तत्र शीतलच्छाये तत्पल्लवोपरचितशस्तरे ब्रह्मदत्तः, कृतश्च वरधनुना तेन सह सङ्केतः- यथा यदि मां कथञ्चिद्दीर्घप्रहितपुरुषाः प्राप्स्यन्ति ततोऽहमन्योक्त्याऽभिज्ञानं करिष्यं, तत इतस्त्वया पलायितव्यमिति, गतोऽयौ जलान्वेषणाय, दृष्टं चैकत्र पद्मिनीखण्डमण्डितं सरः, गृहीतं च पद्मिनीपत्रपुटके जलं, प्रवृत्तस्य च ब्रह्मदत्तस्याभिमुखमागन्तुं ग्रहणं तद्वटासन्नदेशे, कथञ्चिदुपलब्धतदपसरणवृत्तान्तैर्दीर्घपृष्ठप्रहितपुरुषैरतिरोषवद्भिर्वरधनोर्बन्धनं वल्लीवितानेन आक्रोशनं चैव दुष्टवचसा कृतं। अन्यच्च- स हन्यते मुष्टिप्रहारादिभिरमात्यो-वरधनुः, भण्यते च-यथा 'देही'ति ढोक्य कुमारमरे! दुरात्मन्! क्व पुनरसौ नीतस्त्वया राजपुत्र इति?, अत्रान्तरे सङ्केतमनुसरता पठितमिदमनेन-

'सहकारमञ्जरीमनुधावति मधुपो विमुच्य मधु मधुरम्।
कमले कलयन् पश्चात्सङ्कोचकृतां क्षतनुबाधाम्॥'

गुलीयविरेयणपीतो'त्ति प्राकृतत्वात्पीतविरेचनगुलिकः, स हि तैर्ग्रहीतुमुपक्रान्तोऽन्यथाऽऽत्मनो विमुक्तिमनवगच्छन् पूर्वलब्धां विरेचनगुटिकां प्रथममेव पयसा पीतवान्, विरक्तश्च तया, जाताश्च मुखे फेनबुद्बुदाः, एवं च कपटेन मृतः कपटमृतो मृत इति 'छर्दितः' त्यक्तस्तैः। इतश्च तत्पठितं श्रुत्वा कुमारो 'भीतः' इति त्रस्तः 'अथ' अनन्तरम् 'उप्पहं'ति उत्पथेन 'पलायित्थ'त्ति पलायितवान्, तथा च तं पलायमानमवलोक्य कृत्वा स्थविररूपं देवः किमस्य सत्त्वमस्त्युत नेति परीक्षणार्थं 'वाहेसिअ'त्ति व्याहितवान् व्यंसितवानित्यर्थः कुमारं।

ततश्च परिभ्रमतो वटपुरके तस्माच्च ब्रह्मस्थलके वटस्थलके चैव भवति विश्रामविषयः कौशाम्बी वाराणसी राजगृहं गिरिपुरं मथुरा अहिच्छत्रा च।

ततोऽपि गच्छता ऽरण्यानीं प्रविष्टेन दृष्टास्तापसाः, प्रत्यभिज्ञातश्च तैर्ब्रह्मराजस्यास्मज्जिजकस्य सुत इति, धृतश्चातुर्मासीं, तत्र च तापसकुमारकैः सह क्रीडतैकस्मिन् दिनेऽवलोकितो वनहस्ती, समुत्पन्नं च नृपसुतसुलभमस्य कुतूहलं, प्रारब्धश्च विविधगजशिक्षाभिरमुं खेदयितुं, आरूढश्च निष्पन्दीकृत्य तत्पृष्ठं, प्रवृत्तश्चासौ कुमारापहरणाय, वीक्षितश्च कियदपि दूरं गतेनैकस्मात्, लग्नश्च तदधो व्रजति हस्तिनि विटपैकदेशे कुमारः, अपक्रान्ते च करिणि ततस्तरोरिलीर्य विमूढदिग्भागो भ्रमितुमारेभे, भ्राम्यंश्चारण्याद्विनिर्गत्य गतो वटपुरं, वटपुराच्च प्रस्थितः श्रावस्तिं, गच्छंश्च प्राप्तस्तथाविधमेकमन्तरा ग्रामं, उपविष्टश्च तन्निकटविटपिनि विश्रमितुं, दृष्टश्चैकेन तत्रत्यश्रेष्ठिना, नीतश्च तेन स्वं गृहं, कृतं चाभ्यागतकर्त्तव्यं, परिणायितश्च नैमित्तिकादेशतः स्वदुहितरं, उपचरितश्च भुजगनिर्मोकसदृशैर्विविधवसनैर्लग्नेन्द्रनीलादिप्रधानमणिभिः कटककेयूरकुण्डलादिभिश्चाभरणैः, ततस्तद्गुणलुब्ध्यमानसः स्थितस्तत्रैव कियत्कालं, जनयति तदा तद्दुहितरि कुमारं।

इतश्च प्राप्ताः कृतान्तानुकारिणो दीर्घपृष्ठप्रहितपुरुषाः, प्रारब्धाः समन्ततस्तमवलोकितुं, उपलब्धतद्वृत्तान्तश्च नष्टस्तद्भयात्, प्रचलितश्च सुप्रतिष्ठपुराभिमुखं गन्तुं, तत्र च मिलितः कश्चिद्विटः कार्षटिको, दृष्टं चाभिमुखमागच्छत् किञ्चित् तथाविधं मिथुनकं, दृष्ट्वा च तदङ्गनां उदाररूपां कुमारमयमवोचत्-यदि युष्मत्प्रसादतः कथञ्चिदेनां कामयेय इति, ततस्तदुपरोधानेनोक्तं-प्रविश तर्हि वंशीकुडङ्गं, स्थितः पथि कुमारः प्राप्तं च मिथुनं, उक्तस्तत्पतिः- मदीयं कलत्रमिह गर्भशूलाभ्याहतमास्ते तद्विसर्जय क्षणमेकं स्वकीयपत्नीं, विसर्जिता चासौ

तेनानुकम्पापरेण, दृष्टश्च तयाऽसौ, जातस्तस्यापि तदनुरागः, प्रवृत्तं च तयोर्मोहनकं, एवं च कियतोऽपि वेलामतिक्रम्य विनिर्गतोऽसौ कुडङ्गात्, उक्तं चात्मानं ख्यापयितुं कुमारं प्रति, यथा-गहनं नदीकुडङ्गं ततोऽपि गहनतरगर्भेव गहनतरकाणि पुरुषहृदयानि भवन्ति, अयं चानेन व्यतिरेकोऽर्थः-यथा स्वयं जानीमः स्त्रीहृदयान्यतिगहनानि सर्वविद्धेनेन दर्शनादिभिर्जितानीत्युक्त्वा प्रति प्रत्याययितुमाह- 'देहाणि'त्ति देहीदानीं 'पूर्णपात्रम्' अक्षतभृतभाजनं प्रियं खलु 'नः' अस्माकं यद्वारको जात इति, ते (इति) वक्तव्ये यत इत्युक्तं तदैक्यं द्योतयितुं, इत्युक्त्वा च तया मूर्त्या गृहीतं ब्रह्मदत्तोत्तरीयं, गता च पत्यैव सह, ततश्च निर्गतोऽसौ कुडङ्गात्कृतपरिहासः प्रवृत्तो गन्तुं, प्राप्तः सुप्रतिष्ठं, तत्र च कुसकुण्डी नाम कन्या 'भिकुंडिवित्तासियंपि जियसत्तुं'ति आर्षत्वादुभयत्र सुब्व्यत्ययः, 'भिकुण्डिवित्रासितात्' भिकुण्डिनामनृपतिनिष्काशितात् 'जितशत्रोः' जितशत्रुनामनृपतेः सकाशान्मथुरातोऽहिच्छत्रां व्रजन् 'अन्तरे' अन्तराले 'लभते' प्राप्नोति । तथेन्द्रपुरे शिवदत्तो नाम रुद्रपुरे च विशाखदत्ताभिधानस्तदुहितरौ 'बटुकत्वेन' दीर्घपृष्ठपुरुषभीत्या कृतब्राह्मणवेषेण लभते कन्ये द्वे राज्यं च ।

ततो गजगृहं मिथिलां हस्तिनागपुरं चम्पां तथैव श्रावस्तीम्, अधर्मोदिति शेषः 'एगा तु' अनन्तरमुपदर्शिता नगरीहण्डबौद्धव्या ब्रह्मदत्तस्येति ॥ एवं च भ्रमतोऽस्य मिलिताः कटक-करेणुदत्तादयः पितृव्यस्याः, गृहीताः कियन्तोऽपि प्रत्यन्तराजानः, समुत्पन्नं चक्ररत्नं, प्रारब्धस्तदुपदर्शितमार्गेण दिग्विजयः, प्राप्तः काम्पिल्ये, निर्गतस्तदभिमुखं दीर्घपृष्ठो, लग्नमनयोर्युद्धं, विनिपातितोऽसौ ब्रह्मदत्तेन, एवं च बोद्धव्यस्तस्य दीर्घपृष्ठविषयरोषमोक्षश्च, अत्रान्तरे मिलिताः परिणीतकन्यापितरः, समुत्पन्नानि च यथाऽवसरं शेषरत्नानि, साधितं षट्खण्डमपि भरतं, प्राप्ताश्च नवापि निधयः, परिणीतं चक्रवर्तिपदं, एवं च सुकृतफलमुपभुञ्जतोऽतिक्रान्तः कियानपि कालः, अन्यदा चोपनीतं देवतया मन्दारदाम, समुत्पन्नं तद्दर्शनादस्य जातिस्मरणं-अनुभूतानि मयैवंविधकुसुमदामानि, अहं हि नलिनगुल्मविमाने देवोऽभवं ॥ इत्येकादश-निर्युक्तिगाथार्थः ।

इत्थं तावत्काम्पिल्ये संभूतश्चक्रवर्त्ती जातः, चित्रस्य तु का वार्तेत्याह-

मू.(४०८/२) *चित्तो पुण जाओ पुरिमतालंमि ।*
सिट्ठिकुलंमि विसाले धम्मं सोऊण पव्वइओ ॥

वृ. पादत्रयं, चित्रः पुनर्जातः पुरिमतालं, स हि चित्रनामा महर्षिः तत्र संभूतिनाम्नि भ्रातरि तथाऽनशनं प्रतिपन्नवत्यहो दुरन्तो मोहश्चित्रा कर्मपरिणतिश्चञ्चलं चित्तमित्यादि विचिन्त्य चतुर्विधमप्याहारं प्रत्याख्यातवान्, मृत्वा च पण्डितमरणेन समुत्पन्नस्तत्रैव नलिनगुल्मनाम्नि विमाने, ततस्तत्र स्वस्थितिमनुपाल्योत्पन्नः पुरिमतालपुरे, तत्रापि क्वेत्याह-'श्रेष्ठिकुले' वणिक्-प्रधानान्वये 'विशाले' विस्तीर्णे पुत्रपौत्रादिवृद्धिमति, प्राप्तवयाश्च तथाविधस्थविरसन्निधौ 'धर्मं' यतिधर्मं क्षान्त्यादिकं 'श्रुत्वा' आकर्ण्य 'प्रव्रजितः' प्रव्रज्यां प्रतिपन्नवान् इति सूत्रभावार्थः ॥ ततः किमित्याह-

मू.(४०९) *कंपिल्लंमि अ नयरे समागया दोऽवि चित्तसंभूया ।*
सुहदुक्खफलविवागं कहिंति ते इक्कमिक्कस्स ॥

वृ. काम्पिल्ये च नगरे ब्रह्मदत्तोत्पत्तिस्थाने 'समादर्तौ' मिलितौ द्वावपि चित्रसंभूतौ जन्मान्तरनामतः 'सुखदुःखफलविपाकं' सुकृतदुष्कृतकर्मानुभवरूपं 'कहंति'त्ति कथयतः स्मेति शेषः, ततश्च कथितवन्तौ तौ चित्रजीवयतिब्रह्मदत्तौ 'एक्कमेक्कस्स'त्ति एकैकस्य परस्परमितियावत् इति सूत्राक्षरार्थः ॥ भावार्थस्तु निर्युक्तिकृतोऽभिधास्यते

नि.[३५५] जाइंड पगास निवेयणं च जाईपयासणं चित्ते ।
चित्तस्स य आगमणं इड्ढिपरिच्चागसुत्तत्थो ॥

वृ. तदा हि ब्रह्मदत्तो जातिस्मरणोपलब्धस्वजातीनां 'दासा दसन्नये आसी' इत्यादिना सार्द्धश्लोकेन जनाय प्रकाशनं निवेदनं च-यः इमं द्वितीयश्लोकं पूरयति तस्मै राज्यार्द्धमहं प्रयच्छामीति विहितवान्, ततस्तदर्थिना जनेनोद्घुष्यते, तद् ग्रामनगराकारादिषु पठ्यमानं चाकर्णितं कर्णोपकर्ण्या चित्रजीवयतिना, ततस्तथाविधज्ञानातिशयोपयोगतः स्वजातीरुपलभ्य जातोऽस्याभिप्रायो यथा-गत्वा तं जन्मान्तरनिजभ्रातरं संभूतजीवमवबोधयामीति, प्रस्थितस्ततः स्थानात्, प्राप्तः क्रमेण काम्पिल्यं, स्थितस्तद्बहिरुद्याने, श्रुतश्चारघट्टिकपरिपठ्यमानः सार्द्ध-श्लोकः, पूरितश्चानेन द्वितीयश्लोकः, अवधारितश्चारघट्टिकेन, धावितश्चासौ नृपसकाशं राज्यलोभेन, पठितं चैतेन तत्पुरतः, परिपूर्णः श्लोकद्वयं, जातस्तदाकर्णनात्तस्य चित्तावेशः, निरुद्धश्च तज्जनितमूर्च्छयाऽऽश्वासमार्गो, निमीलितं लोचनयुगलं, लुठितः स आसनात्, निपतितो भुवि, किमेतत् किमेतदित्यादिनाऽऽकुलितः सर्वोऽपि तत्परिच्छदः, दृष्टश्च तेनारघट्टिकः, ताडितः पार्ष्णिप्रहारादिभिः, आरटितमेतेन-न मयैतत्पूरितं न मयेति, किन्त्वन्धेनैव भिक्षुणैतत्कालिकन्दमूलेनेति, अत्रान्तरे लब्धा चेतना, प्राप्तं च स्वास्थ्यं चक्रवर्तिना, उक्तं च-क्वासौ श्लोकपूरयिताऽऽस्त इति ?,

कथितस्तद्व्यतिकरो यथा-केनचिद् भिक्षुणैतत्पूरितं नत्वमुनेति, पृष्टं च पुनरनेन हर्षात्फुल्लनयनयुगलेन-क्व तर्ह्यसाविति, कथितमारघट्टिकेन-देव! मदीयवाटिकायां, एतच्चाकर्ण्य प्रचलितः सबलवाहनः सकलान्तः पुरसमन्वितश्च तद्दर्शनाय, प्राप्तस्तद्उद्यानं, दृष्टो मुनिः, वन्दितः सबहुमानं, उपवेशितश्चैकासने, पप्रच्छतुः परस्परमनामयं, कथयामासतुश्च यथास्वमनुभूत-सुखदुःखफलविपाकं, तत्कथनानन्तरं च वर्णिता निजसमृद्धिश्चक्रवर्तिना, प्ररूपितस्तद्विपाक-दर्शनतस्तत्परित्यागश्चित्रयतिना, एतावानेव प्रस्तुताध्ययनसूत्रस्यार्थोऽभिधेय इति सूत्रनिर्युक्ति-गाथयोर्भावार्थः। सम्प्रति यदुक्तं-'सुखदुःखफलविपाकं तौ कथयामासतु'रिति, तत्र चक्रवर्ती यथा कथयामास तथा सम्बन्धपुरस्सरमाह-

मू.(४१०) *चक्कवट्टी महिड्ढीओ, बंभदत्तो महायसो ।*
भायरं बहुमानेन, इमं वयणमब्बवी ॥

मू.(४११) *आसिमो भायरा दोऽवि, अन्नमन्नवसाणुगा ।*
अन्नमन्नमनूरत्ता, अन्नमन्नहिएसिणो ॥

मू.(४१२) *दासा दसन्नये आसी, मिआ कालिंजरे नगे ।*
हंसा मयंगतीराए, सोवागा कासिभूमिए ॥

मू.(४१३) *देवा य देवलोगंमि, आसि अम्हे महिड्ढिआ ।*

इमा नो छट्ठिया जाई, अन्नमन्नेण जा विना ॥

वृ. चक्रवर्ती 'महर्द्धिकः' बृहद्विभूतिर्वन्द्यतो महायशाः 'भ्रातरं' जन्मान्तरसोदर्यं 'बहुमानेन' मानसप्रतिबन्धेन 'इदं' वक्ष्यमाणलक्षणं 'वचनं' वाक्यं 'अब्रवीद' इत्युक्तवान्, यथा 'आसिमो'त्ति अभूवावां भ्रातरौ द्वावपि 'अन्योऽन्यं' वन्दौ, तथा अन्योऽन्यहितैषिणौ' परस्परशुभाभिलाषिणौ, पुनः पुनरन्योऽन्यग्रहणं च तुल्यचित्ततातिशयख्यापनार्थं, मकारश्च सर्वत्रालाक्षणिकः ।

केषु पुनर्भवेष्वित्थमावामभूवेत्याह-दासौ 'दशार्णे' दशार्णदेशे 'आसि'त्ति अभूव, मृगौ 'कालिञ्जरे' कालिञ्जरनाम्नि नगे, हंसौ 'मृतगङ्गातीरे' उक्तरूपे, 'श्वपाकौ' चाण्डालौ 'काशिभूमिए'त्ति काशीभूम्यां काश्यभिधाने जनपदे, देवौ च देवलोके सौधर्मेऽभिधानेऽभूव 'अम्हे'त्ति आवां महर्द्धिकौ न तु किल्बिषिकौ, 'इमा मे'त्ति 'इमा नो'त्ति वा उभयत्रेयमावयोः षष्ठ्येव षष्ठिका जातिः, कीदृशी येत्याह-'अन्नमन्नेण'ति अन्योऽन्येन परस्परेण या विना, कोऽर्थः ? परस्परसाहित्यरहिता, वियुक्तयोर्ययोर्कति भाव इति सूत्रचतुष्टयार्थः ॥

इत्थं चक्रवर्तिनोक्ते मुनिराह-

मू. (४१४) कम्मा नियाणप्पगडा, तुमे राय ! विचिंतिया ।
तेसिं फलविवागेणं, विप्पओगमुवागया ॥

वृ. 'कर्माणि' ज्ञानावरणादीनि नितरां दीयन्ते-लूयन्ते दीयन्ते वा खण्ड्यन्ते तथाविधमानुबन्धफलाभावतस्तपः-प्रभृतीन्यनेनेति निदानं-माभिष्वङ्गप्रार्थनारूपं तेन प्रकर्षेण कृतानि विहितानि निदानप्रकृतानि, निदानवशनिबद्धानीति योऽर्थः, त्वया राजन् ! विचिन्तितानीति, तद्धेतुभूतार्त्तध्यानादिध्यानतः कर्माण्यपि तथोच्यन्ते 'तेषाम्' एवंविधकर्मणां फलं च यो विपाकश्च-शुभाशुभजनकत्वलक्षणः फलविपाकस्तेन, यद्वा कर्माणि-अनुष्ठानानि 'नियानप्पगड'त्ति निदानेनैव शेषशुभानुष्ठानस्याच्छादितत्वात्प्राग्वत्प्रकटनिदानानि त्वया राजन् ! विचिन्तितानि कृतानीतियावत्, तेषां फलं क्रमात्कर्म तद्विपाकेन 'विप्रयोगं' विरहं 'उपागतौ' प्राप्तौ, किमुक्तं भवति ?-यत्तदा त्वयाऽस्मच्छिवारितेनापि निदानमनुष्ठितं तत्फलमेतद् यदावयोरित्थंभूतयोरपि वियोग इति सूत्रार्थः ॥ इत्थमवगतवियोगहेतुश्चक्री पुनः प्रश्नयितुमाह-

मू. (४१५) सच्चसोअप्पगडा, कम्मा मए पुरा कडा ।
ते अज्ज परिभुंजामो, किं नु चित्तेवि से तहा ? ॥

वृ. सत्यं-मृषाभाषापरिहाररूपं शौचम्-अमायमनुष्ठानं ताभ्यां प्रकटानि-प्रख्यातानि कर्माणि-प्रक्रमाच्छुभानुष्ठानानि शुभप्रकृतिरूपाणि वा मया पुरा कृतानि, यानीति गम्यते, तानि 'अद्य' अस्मिन्नहनि, शेषतद्भवकालोपलक्षणं चैतत् 'परिभुंजामो'त्ति परिभुञ्जे-तद्विपाकोपनतस्त्रीरत्नादिपरिभोगद्वारेण वेदये, यथेति गम्यते, किमिति प्रश्ने, 'नु' इति वितर्के, 'चित्रेऽपि' चित्रनामाऽपि, कोऽर्थः ?- भवानपि 'से' इति तानि तथा परिभुङ्क्ते ?, नैव भुङ्क्ते, भिक्षुकत्वाद्भवतः, तथा च किमिति भवताऽपि मयैव सहोपार्जितानि शुभकर्माणि विफलानिर्जातानीत्याशय इति सूत्रार्थः ॥ मुनिराह-

मू. (४१६) सच्चं सुचिण्णं सफलं नराणं, कडाण कम्माण न मुक्ख अत्थि ।

अत्थोहि कामेहि अ उत्तमेहिं, आया मम पुन्नफलोववेओ ॥

वृ. 'सर्वं' निरवशेषं 'सुचीर्णं' शोभनमनुष्ठितं, तपःप्रभृतीति गम्यते, चीर्णशब्दस्य 'सुचीर्णं' प्रोषितव्रत' मित्यादिरूढितः साधुत्वं, सह फलेन वर्तत इति सफलं, नराणामिति, उपलक्षणत्वादशेषाणामपि प्राणिनां, किमिति ?, यतः कृतेभ्यः - अर्थादवश्यवेद्यतयोपचितेभ्यः कर्मभ्यो न 'मोक्षः' मुक्तिरस्तीति, ददति हि तानि निजफलमवश्यमिति भावः, प्राकृतत्वाच्च मुच्यत्यय:, स्यादेतत्-त्वयैव व्यभिचार इत्याह- 'अर्थैः' द्रव्यैरर्थैर्वा प्रार्थनीयैः, वस्तुभिरिति गम्यते, कामैश्च- मनोज्ञशब्दादिभिः 'उत्तमैः' प्रधानैः, लक्षणे तृतीया, तत एतदुपलक्षितः सन्नात्मा मम पुण्यफलेन-शुभकर्मफलेनोपपेतः - अन्वितः स पुण्यफलोपपेतः इति ॥

यथा त्वं 'जानासि' अवधारयसि 'संभूत!' पूर्वजन्मनि संभूताभिधान! 'महानुभागं' बृहन्माहात्म्यं 'महर्द्धिकं' सातिशयविभूतियुक्तम् अत एव पुण्यफलोपेतं चित्रमपि 'जानीहि' अवबुद्धस्व 'तथैव' अविशिष्टमेव 'राजन्!' नृप!, किमित्येवमत आह-ऋद्धिः - सम्पत् द्युतिः -दीप्तिस्तस्यापीति-जन्मान्तरनामतश्चित्राभिधानस्य, ममापीति भावः, चशब्दो यस्मादर्थे, ततो यस्मात्प्रभृता- बह्वीत्यर्थः, यद्वाऽऽत्मा मम पुण्यफलोपेत इति, अनेन चित्र एवात्मानं निर्दिशति, तथा जानीहि संभूत इत्यादौ आत्मेत्यनुवर्तते, अर्थवशाच्च विभक्तिपरिणामः, ततश्चैवं योज्यते- हे संभूत! यथा त्वमात्मानं महानुभागादिविशेषणविशिष्टं जानासि तथा चित्रमपि जानीहि, चित्रनाम्नो ममापि गृहस्थभावे एवंविधत्वादेवेति भावः, शेषं प्राग्वत् ॥

मू. (४१७) 'जानाहि संभूय! महानुभागं, महिड्ढियं पुन्नफलोववेयं।
चित्तंपि जानाहि तहेव रायं!, इड्ढी जुई तस्सवि अप्पभूआ ॥

मू. (४१८) महत्थरूवा वयणप्पभूया, गाहानुगीया नरसंघमज्झे।
जं भिक्खुणो सीलगुणोववेया, इहऽज्जयंते समणोऽम्हि जाओ ॥

वृ. यदि तवाप्येवंविधा समृद्धिरासीत् तत्किमिति प्रव्रजित इत्याह-महान्-अपरिमितोऽनन्तद्रव्यपर्यायात्मकतयाऽर्थः-अभिधेयं यस्य तन्महार्थं रूपं-स्वरूपं न तु चक्षुर्ग्राह्यो गुणः, ततो महार्थं रूपं यस्याः सा तथा, महतो वाऽर्थान्-जीवादितत्त्वरूपान् रूपयति-दर्शयतीति महार्थरूपा, 'वयणप्पभूय'त्ति वचनेन अल्पभूता अल्पभूता वा-अल्पत्वं प्राप्ता वचनाल्पभूता वचनात्प्रभूता वा श्लोकाक्षरेतियावत्, केयमीदृशीत्याह-गीयत इति गाथा, सा चेहार्थाद्धर्माभिधायिनी सूत्रपद्धतिः, अन्विति-तीर्थकृद्गणधरादिभ्यः पश्चाद्गीता अनुगीता, कोऽर्थः ?-तीर्थकरादिभ्यः श्रुत्वा प्रतिपादिता स्थविरैरिति शेषः, अनुलोमं वा गीताऽनुगीता, अनेन श्रोत्रनुकूलैव देशना क्रियते इति ख्यापितं भवति। क्वेत्याह-नराणां-पुरुषाणां सङ्घः-समूहस्तन्मध्ये, गाथामेव पुनर्विशेषयितुमाह-'यां' गाथां 'भिक्षवः' मुनयः शीलं-चारित्रं तदेव गुणः, यद्वा गुणः पृथगेव ज्ञानं, ततः शीलगुणेन शीलगुणाभ्यां वा-चारित्रज्ञानाभ्यामुपेताः-युक्ताः शीलगुणोपेताः 'इह' अस्मिन् जगति 'अज्जयंते'त्ति अर्जयन्ति पठनश्रवणतदर्थानुष्ठानादिभिरुद्यवर्जयन्ति। यद्वा 'जं भिक्खुणो' इत्यत्र श्रुत्वेति शेषः, ततो यां श्रुत्वा 'जयंति'त्ति 'इह' अस्मिन् जिनप्रवचने 'यतन्ते' यत्नवन्तो भवन्ति, सोपस्कारत्वात्सा मयाऽप्याकर्णिता, ततः 'श्रमणः' तपस्वी अस्मि अहं जातो, न तु दुःखदग्धत्वादिति भावः, पठ्यते च-'सुमणो'त्ति सुमनाः

शोभनमनाः इति सूत्रत्रयार्थः ॥ इत्थं मुनिनाऽभिहिते ब्रह्मदत्तः स्वसमृद्ध्या निमन्त्रयितुमाह-

मू. (४१९) उच्चोअए महुकक्के य बंभे, पवेइया आवसहा य रम्मा ।
इमं गिहं चित्तधणप्पभूयं, पसाहि पंचालगुणोववेयं ॥

वृ. उच्चोदयो मधुः कर्कः, चशब्दान्मध्यो ब्रह्मा च पञ्च प्रधानाः प्रासादाः, प्रवेदिताः, मम वर्द्धकिपुरःसरैः सुरैरुपनीता इत्यर्थः, 'आवसथाश्च' शेषभवनप्रकारा 'रम्याः' रमणीयाः, पाठान्तरतश्च आवसथाः अतिरम्याः अतिगम्याः-सुरम्या वा, एते तु यत्रैव चक्रिणे रोचते तत्रैव भवन्तीति वृद्धाः, किञ्च-'इदं' प्रत्यक्षं 'गृहम्' अयोरिन्यादारूपं चित्रं आश्चर्यं तच्च तद्धनं च-हिरण्यादि तेनोपेतं-युक्तं चित्रधनोपेतं, पठन्ति च 'चित्तधणप्पभूयं'ति, तत्र प्रभूतं बहु चित्रम् आश्चर्यमनेकप्रकारं वा धनमस्मिन्निति प्रभूतचित्रधनं, सूत्रे तु प्रभूतशब्दस्य परनिपातः प्राग्वत्, 'प्रसाधि' प्रतिपालय पञ्चाला नाम जनपदस्तस्मिन् गुणा-इन्द्रियोपकारिणो रूपादयस्तैरुपेतं पञ्चालगुणोपेतं, किमुक्तं भवति ?-पञ्चालेषु यानि विशिष्टवस्तु तत् तद्गेह एव तदासीत् ।

मू. (४२०) नट्टेहि गीएहि य वाइएहिं, नारीजनाहिं परिवारयंतो ।
भुंजाहि भोगाइं इमाइं भिक्खू !, मम रोअई पव्वज्जा हु दुक्खं ॥

वृ. किं च 'नट्टेहिं'ति द्वात्रिंशत्पात्रोपलक्षितैर्नाट्यैर्नृत्तैर्वा-विविधाङ्गहारादिस्वरूपैर्गीतैः-ग्रामस्वरमूर्च्छनालक्षणैः, चस्य भिन्नक्रमत्वात्, 'वाइएहिं'ति वादित्रैश्च मृदङ्गमुकुन्दादिभिः 'नारीजनान्' स्त्रीजनान् परिवार्यमानान्, सूत्रत्वात् सर्वत्र लिङ्गव्यत्ययः, भिक्षो !, इह तु यद्गजतुरङ्गमाद्यनभिधाय स्त्रीणामेवाभिधानं तत् स्त्रीलोलुपत्वात्तस्य, तासामेव वाऽत्यन्ताक्षेपकत्वख्यापनार्थं, कदाचिच्चित्रो वदेदित्थमेव सुखमित्याह-मह्यं 'रोचते' प्रतिभाति प्रव्रज्या, 'हु:' अवधारणे भिन्नक्रमश्च, दुःखमेव, न मनागपि सुखं, दुःखहेतुत्वादिति भाव इति सूत्रद्वयार्थः ॥

इत्थं चक्रिणोक्ते मुनिः किं कृतवान् ? इत्याह-

मू. (४२१) तं पुव्वनेहेण कयानुरागं, नराहिवं कामगुणेसु गिद्धं ।
धम्मम्मि ओ तस्स हियानुपेही, चित्तो इमं वयणमुदाहरित्था ॥

वृ. 'तं' ब्रह्मदत्तं 'पूर्वस्नेहेन' जन्मान्तरप्ररूढप्रणयेन 'कृतानुरागं' विहितामिष्वङ्गं 'नराधिपं' राजानं 'कामगुणेषु' अभिलष्यमाणशब्दादिषु 'गृद्धम्' अभिकाङ्क्षान्वितं 'धर्मास्थितः' धर्मस्थितः 'तस्य' इति चक्रिणः हितं-पथ्यम् अनुप्रेक्षते-पर्यालोचयतीत्येवंशीलो हितानुप्रेक्षी-कथं नु नामास्य हितं स्यादिति विचिन्तनपरश्चित्रजीवयतिरिदं वाक्यं पाठान्तरतो वचनं वा 'उदाहरित्थ'त्ति 'उदाहृतवान्' उक्तवानिति सूत्रार्थः ॥ किं तदुदाहृतवानित्याह-

मू. (४२२) सव्वं विलवियं गीयं, सव्वं नट्टं विडंबणा ।
सव्वे आभरणा भारा, सव्वे कामा दुहावहा ॥

वृ. 'सर्वम्' अशेषं विलपितमिव विलपितं निरर्थकतया रुदितयोनितया च, तत्र निरर्थकतया मत्तबालकगीतवत् रुदितयोनितया च विरहावस्थमृतप्रोषितभर्तृकागीतवत्, किमित्याह-'गीतं' गानं, तथा सर्वं 'नृत्यं' गात्रविक्षेपणरूपं विडम्बितमिव विडम्बितं, यथा हि यक्षाविष्टः पीतमद्यादिर्वा यतस्ततो हस्तपादादीन् विक्षिपति, एवं नृत्यन्नपीति, तथा सर्वाणि 'आभरणानि'

मुकुटाङ्गदादीनि 'भाराः' तत्त्वतो भाररूपत्वात्तेषां, तथाविधवनिताभर्तृकारितसुवर्णस्थगितशिलापुत्रकाभरणवत्, सर्वे 'कामाः' शब्दादयो 'दुःखवहाः' मृगाजीनामिवायतौ दुःखावाप्तिहेतुत्वात्, मत्सरेर्ष्याविषादादिविक्षिप्तव्याकुलत्वोत्पादकत्वान्नरकादिहेतुत्वाच्चेति।

मू. (४२३) बालाभिरामेसु दुहावहेसु, न तं सुहं कामगुणेसु रायं!।
विरत्तकामान तवोधनानं, जं भिक्खुणं सीलगुणे रयाणं॥

वृ. तथा बालानां-विवेकरहितानामभिरामाः-चित्ताभिरतिहेतवो ये तेषु 'दुःखावहेषु' उक्तन्यायेन दुःखप्रापकेषु न तत्सुखं 'कामगुणेषु' मनोज्ञशब्दादिषु, संव्यमानेष्विति शेषः, 'राजन!' पृथ्वीपते! 'विरक्तकामानं'ति प्राग्वत्, कामविरक्तानां-विषयपराङ्मुखानां तप एव धनं येषां ते तपोधनास्तेषां यत्सुखमिति सम्बन्धः, 'भिक्षूणां' यतीनां शीलगुणयोर्वा सूत्रत्वाद् 'रतानां' आसक्तानामिति सूत्रद्वयार्थः॥ बालेत्यादिसूत्रं चूर्णिकृता न व्याख्यातं, क्वचित्तु दृश्यत इत्यस्माभिरुक्तमिति॥ सम्प्रति धर्मफलोपदर्शनपुरःसरमुपदेशमाह-

मू. (४२४) नरिंद जाई अहमा नराणं, सोवागजाई दुहओ गयाणं।
जहिं वयं सव्वजणस्स वेसा, वसीअ सोवागनिवेसनेसु॥

वृ. 'नरेन्द्र!' चक्रवर्तिन्! जायन्तेऽस्यामिति जातिः 'अधमा' निकृष्टा 'नराणां' मनुष्याणां मध्ये 'श्वपाकजातिः' चाण्डालजातिः 'दुहतो'त्ति द्वयोरपि 'गतयोः' प्राप्तयोः, किमुक्तं भवति?-यदाऽऽवां श्वपाकजातावुत्पन्नौ तदा सर्वजनगर्हिता जातिरगमीत्, कदाचित्तामवाप्याप्यत्रैवोपितौ स्यातामित्याह-यस्यां वयं प्राग्वच्च बहुवचनं, 'सर्वजनस्य' अशेषलोकस्य 'द्वेष्यौ' अप्रीतिकरौ 'वसीय'त्ति अवसाय-उषितौ, केषु?-श्वपाकानां निवेशनानि-गृहाणि श्वपाकनिवेशनानि तेषु, कदाचिदत्रापि विज्ञानविशेषादिनाऽहीलनीयावेव स्यातामित्याह-

मू. (४२५) तीसे अ जाईइ उ पावियाए, वुच्छा मु सोवागनिवेसणेसुं।
सव्वस्स लोगस्स दुगुंछणिज्जा, इहं तु कम्माइं पुरेकडाइं॥

वृ. तस्यां च जातौ श्वपाकसम्बन्धिन्यां च, 'तुः' विशेषणे, ततश्च जात्यन्तरेभ्यः कुत्सितत्वं विशिनष्टि, पापैव पापिका तस्यां कुत्सितायां, पापहेतुभूतत्वेन वा पापिका तस्यां, प्राणिकायां वा नरकादिकुगतेरिति गम्यते, 'वुच्छे'ति उषितौ 'मु' इत्यावां, केषु?-श्वपाकनिवेशनेषु, कीदृशौ?-सर्वस्य लोकस्य 'जुगुप्सनीयौ' हीलनीयौ 'इह' इत्यस्मिन् जन्मनि 'तुः' पुनरर्थस्तत इह पुनः 'कर्माणि' शुभानुष्ठानानि 'पुरेकडाइं'ति पूर्वजन्मोपार्जितानि विशिष्टजात्यादिनिबन्धनानीति शेषः, तत उत्पन्नप्रत्ययैः पुनस्तदुपार्जन एव यत्नो विधेयो न तु विषयाभिष्वङ्गव्याकुलितमानसैरेव स्थेयमिति भाव इति॥

मू. (४२६) सो दानिं सि राय! महानुभागो महिड्ढिओ पुन्नफलोववेओ।
चइत्तु भोगाइं असासयाइं, आयाणहेउं अभिनिक्खमाहि॥

वृ. यतश्चैवमतः 'सः' इति यः पुरा संभूतनामाऽनगारः आसीद् 'इदानीम्' अस्मिन् काले 'स'त्ति पूरणे यद्वा 'दाणिसि'ति दर्शनीयमाषयेदानीं राजा महानुभागो महर्द्धिकः पुण्यफलोपेतश्च सन् दृष्टधर्मफलत्वेनाभिनिष्क्रामेति सम्बन्धः, अथवा सोपस्कारत्वाद्वाक्यस्य स एव त्वमिदानीं राजा महानुभागताद्यन्वितः इह जातस्तत्कर्माणि पुराकृतानीति पूर्वेण सम्बन्धः, कोऽर्थः?-

पुराकृतकर्मविजम्भितमेवैतत्, कथमन्यथा तथाभूतस्यैवंविधमृद्धवासिगति भावः, यतश्चैवमतोऽभिनिष्क्रामेति सम्बन्धः, किं कृत्वेत्याह-'त्यक्त्वा' अपहाय भुज्यन्त इति भोगाः-द्रव्यविच्चयाः कामा वा तान 'अशाश्वतान' अनित्यान् आदीयते सद्विवेकेर्गृह्यत इत्यादानः-चरित्रधर्मस्तद्धेतोरभिनिष्क्राम-आभिमुख्येन प्रव्रजतो भव, गृहस्थतायां हि न सर्वविरतिरूप-चारित्रम्भव इति भावः, पठन्ति च-'आयाणमेवा अनुचिंतयाहो'ति, स्पष्टमिति सूत्रत्रयार्थः ॥

क एवमकरणे दोष इत्याह-

मू. (४२७) इह जीविए राय ! असासयंमि, धणियं तु पुन्नाइं अकुव्वमानो ।
से सोअई मच्चुमुहोवनीए, धम्मं अकाऊण परंमि लोगे ॥

वृ. इह 'जीविते' मनुष्यसम्बन्धिन्यायुषि राजन् ! 'अशाश्वते' अस्थिरे 'धनियं तु'नि अति-शयेनैव न तु व्यञ्जनपदप्रान्ताद्यन्यास्थिरवस्तुसाधारणतया 'पुण्यानि' पुण्यहेतुभूतानि शुभानुष्ठानान्यकुर्वाणः 'सः' इति पुण्यानुपार्जकः 'शोचते' दुःखार्तः पश्चात्तापं विधत्ते, मृत्युः-आयुःपरिक्षयस्तस्य मुखमिव मुखं मृत्युमुखं-शिथिलीभवद्बन्धनाद्यवस्था तदुपनीतस्त-थाविधकर्मभिरुपढौकितो मृत्युमुखोपनीतः सन् 'धर्मं' शुभानुष्ठानम् 'अकृत्वा' अननुष्ठाय 'परंमि'ति चस्य गम्यमानत्वात् परस्मिंश्च 'लोके' जन्मान्तररूपे, गत इति शेषः, नरकादिषु ह्यसद्व्यापातवेदनार्दितशरीरः शशिनृपतिवर्त्तिक न मया तदैव सदनुष्ठानमनुष्ठितमिति खिद्यत एवाधर्मकारीति सूत्रार्थः ॥ स्यादेतत्-मृत्युमुखोपनीतस्य परत्र वा दुःखाभिहतस्य स्वजना-दयस्त्राणाय शविष्यन्ति, ततो न शोचिष्यन्ते इत्याशङ्क्याह-

मू. (४२८) जहेह सीहो व मियं गहाय, मच्चू नरं नेइ हु अंतकाले ।
न तस्स माया व पिया व भाया, कालंमि तंमंसहरा भवंति ॥

वृ. 'यथे'त्यौपम्ये 'इहे'ति लोके 'सिंहः' मृगपतिः, वेति पूरणे, यद्वा वाशब्दोऽयं विकल्पार्थे, ततो व्याघ्रादिर्वा 'मृगं' कुरङ्गं 'गृहीत्वा' उपादाय प्रक्रमात्स्वमुखं परलोकं वा नयतीति सम्बन्धः, एवं 'मृत्युः' कृतान्तः 'नरं' पुरुषं नयति 'हु:' अवधारणे, ततो नयत्येव, कदा ?-अन्तकाले जीवितव्यावसानसमये, कुमृक्तं भवति ?-यथाऽसौ सिंहेन नीयमानो न तस्य अलम्, एवमयमपि जन्तुर्मृत्युना, कदाचित्स्वजनस्तत्र साहाय्यं करिष्यत्यत आह-न तस्यमृत्युना नीयमानस्य माता वा पिता वा 'भाय'त्ति वाशब्दस्येह गम्यमानत्वाद्भ्राता वा 'काले तस्मिन्' जीवितान्तरूपे अंशे-प्रक्रमाज्जीवितव्यभागं धारयन्ति-मृत्युना नीयमानं रक्षन्तीत्यंशधराः, यथा हि नृपादौ स्वजनसर्वस्वमपहरति स्वद्रविनदानतः स्वजनादिभिस्तद्रक्ष्यते नैवं स्वजीवितव्यांशदानतस्त-ज्जीवितं मृत्युना नीयमानम्, उक्तं हि-

"न पिता भ्रातरः पुत्रा, न भार्या न च बान्धवाः ।
न शक्ताः मरणात्त्रातुं, शक्ताः संसारसागरं ॥"इति,

अथवाऽंशा-दुःखभागस्तं हरन्ति-अपनयन्ति ये ते ऽंशहरा भवन्तीति, इदमेवाभिधत्ते, आद्यव्याख्याने तु स्यादेतद्-जीवितारक्षणेऽपि दुःखांशहारिणो भविष्यन्त्यत आह-

मू. (४२९)न तस्स दुक्खं विभयंति नायओ, न मित्तवग्गा न सुआ न बंधवा ।
इक्को सयं पच्चनुहोइ दुक्खं, कत्तारमेवं अनुजाइ कम्मं ॥

वृ.न तस्य- मृत्युना नीयमानस्य तत्कालभाविना दुःखेनात्यन्तपीडितस्य दुःखं शारीरं मानसं वा 'विभजन्ति' विभागीकुर्वन्ति 'ज्ञातयः' दूरवर्तिनः स्वजना न 'मित्रवर्गा' सुहृत्समूहा न 'सुताः' पुत्रा न 'बान्धवाः' निकटवर्तिनः स्वजनाः, किन्तु एकः - अद्वितीयः 'स्वयम्' आत्मना 'प्रत्यनुभवति' वेदयते 'दुःखं' कर्तेश, किमिति ?, यतः 'कर्तारमेव' उपार्जयितारमेव 'अनुयाति' अनुगच्छति, किं तत् ?- कर्म, येन तत्कृतं तस्यैव फलमुपनयतीति गाथे इति सूत्रद्वयार्थः ॥ इत्थमशरणत्वभावनामभिधायैकत्वभावनामाह-

मू.(४३०) *चिच्चा दुपयं च चउप्पयं च, खित्तं गिहं धणधन्नं च सव्वं ।*
कम्मप्पबीओ अवसो पयाइ, परं भवं सुंदर पावगं वा ॥

वृ. 'त्यक्त्वा' उत्सृज्य 'द्विपदं च' भार्यादि 'चतुष्पदं च' हस्त्यादि 'क्षेत्रम्' इक्षुक्षेत्रादि 'गृहं' भवनगृहादि 'धण'त्ति धनं-कनकादि 'धान्यं' शाल्यादि, चशब्दाद् वस्त्रादि च, 'सर्वं' निरवशेषं, ततः किमित्याह- कर्मैवात्मनो द्वितीयमस्येति कर्मात्मद्वितीयः 'अवशः' अस्वतन्त्रः प्रकर्षेण याति-प्राप्नोति प्रयाति, कं ?-'परम्' अन्यं 'भवं' जन्म 'सुंदर'त्ति विन्दुलोपात् 'सुन्दरं' स्वर्गादि 'पापकं वा' नरकादि, स्वकृतकर्मानुरूपमिति भावः ॥ तत्र किमन्यदर्शनिनामिव सशरीर एव भवान्तरं यात्युत अन्यथेति ?, उच्यते, औदारिकशरीरापेक्षयाऽशरीर एव, तर्हि तत्त्यक्त्वेत्यत्र का वार्तेत्याह-

मू.(४३१) *तं इक्कगं तुच्छसरीरगं से, चिईगयं दहिउं पावगेणं ।*
भज्जा य पुत्तावि य नायओ अ, दायारमन्नं अणुसंकमंति ॥

वृ. 'तद्' इति यत्तेन त्यक्तम् 'एकम्' अद्वितीयं तदद्वितीयस्य जन्तोरन्यत्र सङ्क्रमणात् तुच्छम्असारमत एव कुत्सितं शरीरं शरीरकम्, अनयोस्तु विशेषणसमासः, 'से' तस्य भवान्तरगतस्य संबन्धि चीयन्तेमृतकदहनाय इन्धनानि अस्यामिति चितः-काष्ठरचनात्मिका तस्यां गतं-स्थितं चितिगतं दग्ध्वा 'तुः' पूरणे 'पावकेन' अग्निना भार्या च पुत्रोऽपि च ज्ञातयश्च 'दातारम्' अभिलषितवस्तुसम्पादयितारमन्यम्' अनुसङ्क्रामन्ति' उपसर्पन्ति, ते हि गृहमनेनावरुद्धमास्त इति तद्बहिर्निष्काश्य जनलज्जादिना च भस्मासात्कृत्य कृत्वा च लौकिककृत्यान्याक्रन्द्य च कतिचिद्दिनानि पुनः स्वार्थतत्परतया तथाविधमन्यमेवानुवर्त्तन्ते, न तु तत्प्रवृत्तिमपि पृच्छन्ति, आस्तां तदनुगमनमित्यभिप्राय इति सूत्रद्वयार्थः ॥ किञ्च-

मू.(४३२) *उवणिज्जइ जीवियमप्पमायं, वण्णं जरा हरइ नरस्स राय ! ।*
पंचालराया ! वयणं सुणाहि, मा कासि कम्माइं महालयाइ ॥

वृ. 'उपनीयते' ढौक्यते प्रक्रमान्मृत्यवे तथाविधकर्मभिः 'जीवितम्' आयुः 'अप्रमादं' प्रमादं विनैव, आवीचीमरणतो निरन्तरमित्यभिप्रायः, सत्यपि च जीविते 'वर्णं' मुखेन्द्रियच्छायात्मकं 'जरा' विश्रसा 'हरति' अपनयति 'नरस्य' मनुष्यस्य 'राजन्!' चक्रवर्त्तिन्!, यतश्चैवमतः 'पञ्चालराज!' पञ्चमण्डलोद्भवनृपते! 'वचनं' वाक्यं 'शृणु' आकर्णय, किं तत् ?-मा कार्षीः, कानि ?-'कर्माणि' असदारम्भरूपाणि 'महालयानि'त्ति अतिशयमहान्ति, महान् वा लयः-कर्माश्लेषो येषु तानि, उभयत्र पञ्चेन्द्रियव्यपरोपणकुणिमभक्षणादीनीति सूत्रार्थः ॥ एवं मुनिनोक्ते नृपतिराह

मू. (४३३) अहंपि जाणामि जहेह साहू ! जं मे तुमं साहसि वक्कमेयं ।
भोगा इमे संगकरा भवंति, जे दुज्जया अज्जो ! अम्हारिसेहिं ॥

वृ. अहमपि, न केवलं भवानित्यापिशब्दार्थः, 'जानामि' अवबुध्ये, तथा इति शेषः, 'यथा' येन प्रकारेण 'इह' अस्मिन् जगति साधो ! यत् 'मे' मम त्वं 'साधयसि' कथयसि 'वाक्यम्' उपदेशरूपं वचः 'एतत्' यदनन्तरं भवतोक्तं, तत् किं न विषयान् परित्यजस्यत आह-'भोगाः' शब्दादयः 'इमे' प्रत्यक्षाः 'सङ्गकराः' प्रतिबन्धोत्पादका भवन्ति ये यत्तदोश्च नित्याभिसम्बन्धात्ते दुःखेन जीयन्ते· अभिभूयन्ते इति दुर्जयाः दुस्त्यजा इत्यर्थावत् 'अज्जो'त्ति आर्य ! अस्मादृशैः, गुरुकर्मभिर्जन्तुभिरिति गम्यते, पठ्यते च 'अहंपि जाणामि जो एत्थ साहो' पादत्रयं तदेव, अहमपि जानामि योऽत्र साधो-यदिह मनुजजन्मनि प्रधानं चारित्रधर्मात्मकं, तस्य गम्यमानत्वात्, यच्च मे त्वं साधयसि, शेषं प्राग्वदिति सूत्रार्थः ॥ किञ्च-

मू. (४३४) हत्थिणपुरंमि चित्ता ! दट्ठूणं नरवइं महिड्ढियं ।
कामभोगेसु गिद्धेणं नियाणमसुभं कडं ॥

वृ. हस्तिनागपुरे 'चित्रा' इति आकारोऽलाक्षणिकः, हे 'चित्र !' चित्रनामन् मुने ! दृष्ट्वा 'नरपतिं' सनत्कुमारनामानं चतुर्थचक्रवर्त्तिनं 'महर्द्धिकं' सातिशयसम्पदं 'कामभोगेषु' उक्तरूपेषु 'गृद्धेन' अभिकाङ्क्षावता 'निदानं' जन्मान्तरे भोगाशंसात्मकम् 'अशुभानुबन्धि 'कृतं' निर्वर्तितमिति ॥ कदाचित्तत्र कृतेऽपि ततः प्रतिक्रान्तः स्यादत आह-

मू. (४३५) तस्स मे अप्पडिकंतस्स, इमं एयारिसं फलं ।
जाणमाणोऽवि जं धम्मं, कामभोगेसु मुच्छिओ ॥

वृ. 'तस्स'त्ति सुब्व्यत्ययेन तस्मात् निदानात् 'मे' मम 'अप्रतिनिवृत्तस्य, तदा हि त्वया बहुधोच्यमानेऽपि न मच्चेतसः प्रत्यावृत्तिभूदिति, 'इदमेतादृशम्' अनन्तरवक्ष्यमाणरूपं 'फलं' कार्यं, यत् कीदृगित्याह-'जाणमाणोऽवि'त्ति प्राकृतत्वात् 'जानन्नपि' अवबुध्यमानोऽपि यदहं 'धर्मं' श्रुतधर्मादिकं कामभोगेषु मूर्छितः· गृद्धः, तदेतत्कामभोगेषु मूर्छनं मम निदानकर्मणः फलम्, अन्यथा हि 'ज्ञानस्य फलं विरती'रिति कथं न जानतोऽपि धर्मानुष्ठानावाप्तिः स्यादिति भाव इति सूत्रद्वयार्थः ॥ पुनर्दिदानफलमेवोदाहरणतो दर्शयितुमाह-

मू. (४३६) नागो जहा पंकजलावसन्नो, दट्ठुं थलं नाभिसमेइ तीरं ।
एवं वयं कामगुणेसु गिद्धा, न भिक्खुणो मग्गमणुव्वयामो ॥

वृ. 'नागः' हस्ती 'यथे'ति दृष्टान्तोपदर्शकः पङ्कप्रधानं जलं यत्कलमुच्यते तत्रावसन्नो-निमग्नः पङ्कजलावसन्नः, सन् 'दृष्ट्वा' अवलोक्य 'स्थलं' जलविकलभूतलं 'न' नैव 'अभि-समेति' प्राप्नोति 'तीरं' पारम्, अपेर्गम्यमानत्वात्तीरमप्यास्तां स्थलमिति भावः, इत्येवंविध-नागवत् वयमित्यात्मनिर्देशः 'कामगुणेषु' उक्तरूपेषु 'गृद्धाः' मूर्च्छिता न 'भिक्षोः' साधोः 'मार्गं' पन्थानं सदाचारलक्षणम् 'अनुव्रजामः' अनुसरामः । अयं हि पङ्कजलोपमाः कामभोगाः, ततस्तत्परतन्त्रतया न तत्परित्यागतो निरपायतया स्थलमिव मुनिमार्गमवच्छन्नोऽपि पङ्कजलाव-मग्नगजवद्वयमनुगन्तुं शक्नुम इति सूत्रार्थः ॥ पुनरनित्यतादर्शनायाह मुनिराह-

मू. (४३७) अच्चेइ कालो तूरंति राइओ, न यावि भोगा पुरिसाण निच्चा ।

उविच्च भोगा पुरिसं चयंति, दुमं जहा खीणफलं व पक्खी ॥

वृ. 'अत्येति' अतिक्रामति कालः यथाऽऽयुःकालः, किमित्येवमुच्यते ?, अत आह-'त्वरन्ति' शीघ्रं गच्छन्ति 'रात्रयः' रजन्यः, दिनोपलक्षणं चैतत्, ततोऽनेन जीवितव्यस्यानित्यत्वमुक्तम्, उक्तं हि-

"क्षणयामदिवसमासच्छलेन गच्छन्ति जीवितदलानि।
इति विद्वानपि कथमिह गच्छसि निद्रावशं रात्रौ ? ॥"

अथवा 'अत्येति' अतीवयाति, कोऽसौ ?-कालः, कुत एतत् ?-यतस्त्वरन्ति रात्रयो, न चापि भोगाः पुरुषाणां 'नित्याः' शाश्वताः, अपेर्भिन्नक्रमत्वान्न केवलं जीवितमुक्तिनीतितो न नित्यं, किन्तु भोगा अपि, यत उपेत्य स्वप्रवृत्त्या न तु पुरुषाभिप्रायेण भोगाः पुरुषं 'त्यजन्ति' परिहरन्ति, कमिव क इवेत्याह- 'द्रुमं' वृक्षं यथा क्षीणानिचिरनष्टानि फलानि यस्यासौ क्षीणफलस्तं, 'वा' इत्यौपम्ये, उक्तं हि-"पिव मिव विव वा इवार्थे" भिन्नक्रमश्चायं, ततः 'पक्षीव' विहग इव, फलोपमानि हि पुण्यानि, ततस्तदपगमे क्षीणफलं वृक्षमिव पुरुषं पक्षिवद्भोगा विमुञ्चन्तीति सूत्रार्थः ॥ यत एवमतः

मू. (३४८) जईऽसि भोगे चइउं असत्तो, अज्जाइं कम्माइं करेहि रायं !।
धम्मे ठिओ सव्वपयाणुकंपी, तं होहिसि देवो इओ विउव्वी ॥

वृ. यदि तावदसि त्वं भोगान् 'त्यक्तम्' अपहातुम् 'अशक्तः' असमर्थः, पठ्यते च 'जइ तंसि भोगे चइतुं असत्ते'त्ति, यदि चैवं तावत्कर्तुं न शक्तस्ततः किमित्याह-'आर्याणि' हेयधर्मेभ्यः-अतिनिर्लिशतादिभ्यो दूरयातानि शिष्टजनोचितानीतियावत् 'कर्माणि' अनुष्ठानानि कुरु राजन् ! 'धर्मे' प्रक्रमाद्गृहस्थधर्मे सम्यग्दृष्ट्यादिशिष्टाचरिताचारलक्षणे स्थितः सन् 'सर्वप्रजानुकम्पी' समस्तप्राणिदयापरः, ततः किं फलमित्याह-'ततः' इत्यार्यकर्मकरणाद् भविष्यसि 'देवः' वैमानिकः 'इतः' इत्यस्मान्मनुष्यभवादनन्तरं विउव्वि'त्ति वैक्रियशरीरवानित्यर्थ इति वृद्धाः, गृहस्थधर्मस्यापि सम्यक्त्वदेशविरतिरूपस्य देवलोकफलत्वेनोक्तत्वादिति भाव इति सूत्रार्थः ॥ एवमुक्तोऽपि यदाऽसौ न किञ्चित्प्रतिपद्यते तदा तदविनेयतामवधार्य मुनिराह-

मू. (४३९) न तुज्झ भोगे चइऊण बुद्धी, गिद्धोऽसि आरंभपरिग्गहेसुं।
मोहं कओ इत्तिउ विप्पलावो, गच्छामि रायं ! आमंतिओऽसि ॥

वृ. 'ने'ति प्रतिषेधे तव 'भोगान्' शब्दादीन्, उपलक्षणत्वादनार्यकर्माणि वा, 'चइऊण'त्ति युक्तं, यद्वा सोपस्कारत्वाद्भोगांस्त्यक्त्वा धर्मो मया विधेयइति 'बुद्धिः' अवगतिः, किन्तु 'गृद्धः' मूर्च्छितः 'असि' भवसि, केषु ?-'आरम्भपरिग्रहेषु' अवद्यहेतुषु व्यापारेषु चतुष्पदद्विपदादिस्त्रीकारेषु च, 'मोह'ति मोघं निष्फलं यथा भवति एवं, सुब्व्यत्ययाद्वा मोघो-निष्फलो मोहेन वा-पूर्वजन्मनि मम भ्राताऽऽसीदिति स्नेहलक्षणेन 'कृतः' विहितः एतावान् 'विप्रलापः' विविधव्यर्थवचनोपन्यासात्मकः, सम्प्रती तु 'गच्छामि' व्रजामि राजन् ! आमन्त्रितः-संभाषितः, अनेकार्थत्वाद्धातूनां पृष्टो वा 'असि' भवसि, अयमाशयः-अनेकधा जीवितानित्यत्वादिदर्शनद्वारेणानुशास्यमानस्यापि गुणाधिकक्लिश्यमानाविनेयेषु" इति सूत्रार्थः ॥

इत्थमुक्त्वा गते मुनौ ब्रह्मदत्तस्य यदभूत्तदाह -

मू. (४४०) पंचालरायाऽवि य बंभदत्तो, साहुस्स तस्स वयणं अकारं।
अनुत्तरे भुंजिय कामभोगे, अनुत्तरे सो नरए पविट्ठो ॥

वृ. 'पंचालराआऽवि य'त्ति 'अपि' पुनरर्थः, 'च:' पूरणे, ततः पञ्चालराजः पुनर्ब्रह्मदत्तो-ब्रह्मदत्ताभिधानः 'साधोः' तपस्विनः 'तस्य' अनन्तरोक्तस्य 'वचनं' हितोपदेशदर्शके वाक्यम् 'अकृत्वा' वज्रतन्दुलवद्गुरुकर्मतयाऽत्यन्तदुर्भेदत्वादननुष्ठान 'अनुत्तरान्' सर्वोत्तमान् 'भुक्त्वा' अनुपाल्य 'कामभोगान्' उक्तरूपान् 'अनुत्तरे' म्थित्यादिभिः सकलनरकज्येष्ठेऽप्रतिष्ठान इतियावत् 'स' ब्रह्मदत्तः 'नरके' प्रतीते 'प्रविष्टः' तदन्तरुत्पन्नः, तदनेन निदानस्य नरक-पर्यवसानफलत्वमुपदर्शितं भवतीति सूत्रार्थः ॥

इह चास्य शेषवक्तव्यतासूचिका अपि निर्युक्ति-गाथाः पञ्च दृश्यन्ते, तद्यथा

नि. [३५५] इत्थीरयणपुरोहियभिज्जाणं वुग्गहो विनासंमि।
सेनावइस्स भेओ वक्कमणं चेव पुत्ताणं ॥

नि. [३५६] संगाम अत्थि भेओ मरणं पुन चूयपायकुज्जाणं।
कडगस्स य निब्भेओ दंडो अ पुरोहितयकुलस्स ॥

नि. [३५७] जउभरपासायंमि अ दारे य सयंवरे अ थाले अ।
तत्तो अ आसए हत्थिए अ तह कुंडए चेव ॥

नि. [३५८] कुक्कडरहतिलपत्ते सुंदसणो दारुए य नयनिल्ले।
पत्तच्छेज्जसंयवर कलाउ तह आसने चेव ॥

नि. [३५९] कंचुयपज्जुन्नंमि अ हत्थी वणकुंजरे कुरुमई अ।
एए कन्नालंभा बोद्धव्वा बंभदत्तस्स ॥

वृ. एतास्तु विशिष्टसम्प्रदायाभावान्न विव्रियन्ते ॥ सम्प्रति प्रसङ्गत एव चित्रवक्तव्यतोच्यते-

मू. (४४१) चित्तोऽवि कामेहिं विरत्तकामो, उदत्तचारित्ततवो महेसी।
अनुत्तरं संजम पालइत्ता, अनुत्तरं सिद्धिगइं गओ ॥ त्तिबेमि।

वृ. 'चित्रोऽपि' जन्मान्तरनामतश्चित्राभिधानस्तपस्व्यपि, अत्रापि 'अपिः' पुनरर्थे, तताश्चित्रः पुनः 'कामेभ्यः' अभिलषणीयशब्दादिभ्यो विरक्तः पराङ्मुखीभूतः कामः अभिलाषोऽस्येति विरक्तकामः उदात्तं-प्रधानं चारित्रं च सर्वविरतिरूपं तपश्च-द्वादशविधं यस्य च उदात्तचारि-त्रतपाः, पाठान्तरतः-उदग्रचारित्रता वा महेषी महर्षिर्वा, 'अनुत्तरं' सर्वसंयमस्थानोपरिवर्तिनं 'संजम'त्ति संयमम्-आश्रवोपरमाणिदकं' पालयित्वा' आसेव्य 'अनुत्तरां' सर्वलोकाकाशो-परिवर्तिनीमतिप्रधानां वा 'सिद्धिगतिं मुक्तिनाम्नीं गतिं 'गतः' प्राप्त इति सूत्रार्थः ॥

'इति' परिसमाप्तौ, ब्रवमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयास्ते च पूर्ववत्।

अध्ययनं १३ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
त्रयोदशमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं - १४ -इषुकारियं

वृ. व्याख्यातं त्रयोदशमध्ययनं चित्रसम्भूतीयम्, अधुना चतुर्दशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने मुख्यतो निदानशल्योद्धरणतः प्रसङ्गतो निर्निदानतागुणश्च, अत्र तु मुख्यतः स एवोच्यते इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य चानुयोगद्वारचतुष्टयचिन्त्यः प्राग्वत्तावद्यावन्नामनिष्पन्ननिक्षेपे इषुकारीयमिति नाम, अत इषुकारनिक्षेपमभिधातुमाह-

नि.[३६०] उसुआरे निक्खेवो चउ० ॥
नि.[३६१] जाणग भविय सरीर० ॥
नि.[३६२] उसुआरनामगोए वेयंतो भावओ अ उसुआरो ।
तत्तो समुट्ठियमिणं उसुआरिज्जंति अज्झयणं ॥

वृ. गाथात्रयं स्पष्टमेव, नवरमिषुकाराभिलापेन नेयं, तथा यदिषुकारात्समुत्थितं तत्तस्मै प्रायो हितमेव भवतीति इषुकाराय हितमिषुकारीयमुच्यते, प्राधान्याच्च राज्ञा निर्देशः, अन्यथा षड्भ्योऽप्येतत्समुत्थानं तुल्यमेवेति ॥ सम्प्रति को ऽयमिषुकार इति तद्वक्तव्यतामाह

नि.[३६३] पुव्वभवे संघडिआ संपीआ अन्नमन्नमनुरत्ता ।
भूतूण भोगभोए निग्गंथा पव्वए समणा ॥
नि.[३६४] काऊण य सामन्नं पढमगुम्मे विमाणि उववन्ना ।
पलिओवमाइं चउरो ठिई उक्कोसिआ तेसिं ॥
नि.[३६५] तत्तो य चुआ संता कुरुजनवयपुरवरंमि असुआरे ।
छावि जना उववन्ना चरिमसरीरा विगयमोहा ॥
नि.[३६६] राया उसुयारो या कमलावइ देवि अग्गमहिसी से ।
भिगुनामे य पुरोहिय वासिट्ठा भारिआ तस्स ॥
नि.[३६७] उसुआरपुरे नयरे उसुआरपुरोहिओ अ अनवच्चो ।
पुत्तस्स कए बहुसो परितप्पंती दुअग्गावि ॥
नि.[३६८] काऊण समणरूवं तहिअं देवो पुरोहिअं भणइ ।
होहिंति तुज्झ पुत्ता दुन्नि जणा देवलोगचुआ ॥
नि.[३६९] तेहि अ पव्वइअव्वं जहा य न करेह अंतरायं णे ।
ते पव्वइआ संता बोहेहिंती जनं बहुअं ॥
नि.[३७०] तं वयणं सोऊणं नगराओ निंति ते वयग्गामे ।
वड्ढंति अ ते तहिअं गाहिंति अ णं असब्भावं ॥
नि.[३७१] एए समणा धुत्ता पेयपिसाया य पोरुसादा य ।
मा तेसिं अल्लिअहा मा भे पुत्ता ! विनासिज्जा ॥
नि.[३७२] दट्ठूण तहिं समणे जाइं पोराणिअं च सरिऊणं ।
बोहितऽम्मापिअरं उसुआरं रायपुतं च ॥
नि.[३७३] सीमंधरो य राया भिगू अ वासिट्ठ रायपत्ती य ।

बंभणी दारगा चेव छप्पए परिनिव्वुआ ॥

वृ. आसामक्षराणि स्पष्ट एव, नवरं 'संघडिय'त्ति सम्यग् घटिताः परस्परं स्नेहेन संबद्धा वयस्या इतियावत्, ते ऽपि कदाचिद्विगलितान्तरप्रीतयो ऽपि दाक्षिण्याज्जनलज्जादितस्तथा स्युरत आह-'संप्रीताः' सम्यगान्तरप्रीतिभाजः, तथा 'अन्नो ऽन्नमनुरक्ताः' अतिशयख्यापनफलत्वादत्यन्तस्नेहभाजः, अथवा 'संघडिय'त्ति देशीपदमव्युत्पन्नमेव मित्राभिधायि, प्रीतिबाह्या अनुरागस्तु भावतः प्रतिबन्धः, पठ्यते च-'घडियाउ'त्ति घटिता मलिताः, तथा 'भोगभोगे'त्ति भोक्तुं योग्या भोग्या ये भोगास्तान भोग्यभोगान् भोगभोगान् वा ऽतिशायिनो भोगान्, पाठान्तरतः कामभोगान् वा, 'निग्गंथा पव्वए समण'त्ति निर्ग्रन्थाः-त्यक्तग्रन्थाः 'प्राव्राजन्' प्रव्रज्यां गृहीतवन्तः, ततश्च 'श्रमणाः' तपस्विनो ऽभूवन्निति शेषः ।

'दुयग्गावि'त्ति देशीपदं प्रक्रमाच्च द्वावपि दम्पती, तथा 'अन्तरायं' विघ्नं 'गहे'ति अनयोः, तथा 'निंति'त्ति निर्यन्ति आभिमुख्येन गच्छन्ति, कं ?-'व्रजग्रामं' गोकुलप्रायग्रामं, प्रत्यन्तग्राममित्यर्थः, 'गाहिंति अनं असब्भावं'ति ग्राहयतो ऽसद्भावमसन्तम् असुन्दरं वा ऽर्थं-साधुप्रेतत्वादिलक्षणं प्रेताः 'पिशाचाश्च' पिशाचनिकायोत्पन्नाः 'पोरुषादाश्च' प्रस्तावात्पुरुषसम्बन्धिमांसभक्षका राक्षसा इतियावत्, 'तेसिं'ति सूत्रत्वात् तान् 'अल्लियह'त्ति आलीयेताम्-आश्रयतां, किमित्यत आह मा 'मे' भवन्तौ पुत्रौ विनश्येतामिति ।

अत्र चेषुकारमिति राज्यकालानाम्ना सीमन्धरक्षेति मौलिकनाम्नेति सम्भावयामः इति गाथैकादशकावयवार्थः ॥ भावार्थस्तु सम्प्रदायादवसेयः, स चायं-जं' ते दोन्नि गोवदारया साहुअनुकंपयाए लद्धसंमत्ता कालं काऊण देवलोगे उववन्ना, ते तओ देवलोगाउ चइउं खिइपइट्ठियनयरे इब्भकुले दोवि भायरो जाया, तत्थ तेसिं अन्नेवि चत्तारि इब्भदारगा वयंसिया जाया, तत्थवि भोगे भुंजिउं तहारूवाणं थेराणं अंतिते धम्मं सोऊण पव्वइया, सुचिरकालं संयमं अनुपालेऊण भत्तं पच्चक्खाउं कालं काऊण सोहम्मे कप्पे पउमगुम्मे विमाने छावि जना चउपलिओवमठितिया देवा उववन्ना, तत्थ जे ते गोववज्जा देवा ते चइऊण कुरुजणवए उसुयारपुरे नयरे एगो उसुयारे नाम राया जातो, बीओ तस्सेव महादेवी कमलावईनाम संवुत्ता, ततिओ तस्स चेव राइणो भिगुनाम पुरोहितो संवुत्तो, चउत्थो तस्स चेव पुरोहियस्स भारिया संवुत्ता वसिट्ठा गोत्तेण जसानामं ।

सो य भिगु अनवच्चो गाढं तप्पए अवच्चनिमित्तं, उवायणाए देवयाणि पुच्छइ नेमित्तिए।

ते दोऽवि पुव्वभवगोवा देवभवे वट्टमाना ओहिणा जाणिउं जधा अम्हे एयस्स भिगुस्स पुरोहियस्स पुत्ता भविस्सामो, तओ समणरूवं काऊण उवगया भिगुसमीवं, भिगुणा सभारिएण वंदिया, सुहासणत्था य धम्मं कहेंति, तेहिं दोहिवि सावगवयाणि गहियाणि, पुरोहिएण भन्नति भगवं ! अम्हं अवच्चं होज्जत्ति ?, साहूहिं भन्नति-भविस्संति दुवे ऽवि दारगा, ते य डहरगा चेव पव्वइस्संति, तेसिं तुब्भेहिं वाघाओ न कायव्वो पव्वयंताणं, ते सुबहुं जनं संबोहिस्संतित्ति भणिऊण पडिगया देवा, नातिचिरेण चइऊण य तस्स पुरोहियस्स भारियाए वासिट्ठीए दुवे उदरे पच्चायाया, ततो पुरोहितो सभारितो नगरविनिग्गतो पच्चंतगामे ठितो, तत्थेव सा माहिणी पसूया, दारगा जाया, तओ मा पव्वइस्संतित्ति काउं मायाविलेहिं वुग्गा

हिज्जंति जहा एए पव्वइयगा दिव्वरूवाइं चेनुं मारेंति, पच्छा तेसिं मंसं खावेंति, मा तुब्भे कयाइं एएसिं आलियस्सह।

अन्नया ते तम्मि गामे रमंता बाहिं निग्गया, इओ य अद्धाणपडिवन्ना साहू आगच्छंति, ततो ते दारगा साहू दट्ठुम भयभीया पलायंता एगम्मि वडपायवे आरूढा, साहूणो समावन्नीए गहियभत्तपाना तम्मि चेव वडपायवच्छिद्दे ठिया, मुहुत्तं च वीसमिऊणं भुंजिउं पयत्ता, ते वडारूढा पासंति साभाविय भत्तपाणं, नत्थि संसंति तओ चिंतिउं पयत्ता-कत्थ अम्हेहि एयारिसाणि रूवाणि दिट्ठपुव्वाणित्ति ?, जाई संभरिया, संबुद्धा, साहुणो वंदिउं गया अम्मापिउसमीवं, मायाविनं संबोहिऊण सह मायाविनं पव्वया, देवी संबुद्धा, देवीए राया संबोहिओ, तानिवि पव्वइयाणि, एवं तानि छावि केवलनाणं पाविऊण निव्वाणमुवगयाणि त्ति।

इह तु सूत्रोक्तस्याप्यर्थस्याभिधानं प्रसङ्गत इत्यदोषः। उक्तो नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (४४२) *देवा भवित्ताण पुरे भवंमी, केई चुया एगविमाणवासी।*
पुरे पुराणे इसुयारनामे, खाए समिद्धे सुरलोगरम्मे॥

वृ. 'देवाः' सुराः 'भूत्वा' उत्पद्य 'पुरे भवंमि'त्ति अनन्तरातीतजन्मनि 'केचित्' इत्यनिर्दिष्टनामानः 'च्युताः' भ्रष्टाः एकस्मिन् पद्मगुल्मनाम्नि विमाने वसन्तीत्येवंशीला एकविमानवासिनः 'पुरे' नगरे 'पुराणे' चिरन्तने इषुकारनाम्नि 'ख्याते' प्रथिते 'समृद्धे' ऋद्धिमत्यत एव 'सुरलोकरम्ये' देवलोकवद्रमणीये ते च किं सर्वथोपभुक्तपुण्या एव ततश्च्युता उतान्यथेत्याह-

मू. (४४३) *सकम्मसेसेण पुराकएणं, कुलेसु उग्गे(सुदत्ते०) सु य ते पसूआ।*
निव्विन्नसंसारभया जहाय, जिणिंदमग्गं सरणं पवन्ना॥

वृ. स्वम्-आत्मीयं कर्म-पुण्यप्रकृतिलक्षणं तस्य शेषम्-उद्धरितं स्वकर्मशेषस्तेन, लक्षणे तृतीया, 'पुराकृतेन' पूर्वजन्मान्तरोपार्जितेन 'कुलेषु' अन्वयेषु 'उदात्तेषु' उच्चेषु 'च:' पूरणे, 'ते' इति ये देवा भूत्वा च्युताः 'प्रसूताः' उत्पन्नाः, 'निर्विन्न'त्ति आर्षत्वात् 'निर्विन्नाः' उद्विग्नाः, कुतः ?-संसारभयात्, 'जहाय'त्ति परित्यज्य, भोगादीनिति गम्यते, किमित्याह-'जिनेन्द्रमार्गं' तीर्थकृदुपदर्शितं सम्यग्दर्शनज्ञानचारित्रात्मकं मुक्तिपथं 'शरणम्' अपायरक्षाक्षममाश्रयं 'प्रपन्नाः' अभ्युपगता इत्यध्ययनार्थसूचनम्। कश्च किरूपः सन् जिनेन्द्रमार्गं शरणं प्रपन्न इत्याह-

मू. (४४४) *पुमत्तमागम्म कुमार दोऽवि, पुरोहिओ तस्स जसा य पत्ती।*
विसालकित्ती य तहेसुआरो, रायऽत्थ देवो कमलावई य॥

वृ. 'पुंस्त्वं' पुरुषत्वम् 'आगम्य' प्राप्य 'कुमार'त्ति 'कुमारौ' अकृतपाणिग्रहणौ द्वौ, 'अपिः' पूरणे, सुलभ बोधिकत्वेन प्राधान्यख्यापनार्थं चानयोः पूर्वमुपादानम्, पुरोहितस्तृतीयस्तस्य जसा च नाम्ना पत्नी चतुर्थः, 'विशालकीर्त्तिश्च' विस्तीर्णयशाश्च तथेषुकारो नाम राजा पञ्चमः, 'अत्र' एतस्मिन भवे 'देवो' इति प्रधानपत्नि, प्रक्रमात्तस्यैव राज्ञः कमलावती नाम्ना षष्ठ इति सूत्रत्रयार्थः॥ सम्प्रति यथैतेषु जिनेन्द्रमार्गप्रतिपत्तिः कुमारयोर्जाता तथा दर्शयितुमाह-

मू. (४४५) *जाईजरामच्चुभयाभिभूया, बहिंविहाराभिनिविट्ठचित्ता।*
संसारचक्कस्स विमुक्खणट्ठा, दट्ठूण ते कामगुणे विरत्ता॥

मू. (४४६) पियपुत्तगा दुन्नि वि माहणस्स, सकम्मसीलस्स पुरोहियस्स।
सरित्तु पोराणिय तत्थ जाइं, तहा सुचिण्णं तव संजमं च॥

वृ. जातिः जन्म जरा-त्रिश्रमा मृत्युः-प्राणत्यागलक्षणस्तेभ्यो भयं साध्वसं तेनाभिभूतौ व्याप्तौ जातिजरामृत्युभयाभिभूतौ, पाठान्तरतश्च जातिजरामृत्युभयाभिभूते सत्यर्थात् संसारिजने बहिः संसाराद्विहारः-स्थानं बहिर्विहारः, स चार्थान्मोक्षस्तस्मिन्नभिनिविष्टं बद्धाग्रहं चित्तम्-अन्तःकरणं ययोस्तौ, तथा संसारश्चक्रमिव चक्रं भ्रमणोपलक्षितत्वात्संसारचक्रं तस्य विमोक्षणार्थं-परित्यागनिमित्तं 'दृष्ट्वा' निरीक्ष्य साधूनिति शेषः, यद्वा 'दृष्ट्वे' ति प्रेक्ष्य मुक्तिपरिपन्थिनो ऽमी कामगुणा इति पर्यालोच्य 'तौ' अनन्तरोक्तौ 'कामगुणे' त्ति सुब्व्यत्ययात् 'कामगुणेभ्यः' शब्दादिभ्यो, विषयसप्तमी वा, 'विरक्तौ' पराङ्मुखीभूतौ प्रियौ-वल्लभौ तौ च तौ पुत्रावेव पुत्रकौ, द्वावपि नैक एवेत्यपिशब्दार्थः 'माहनस्य' ब्राह्मणस्य 'स्वकर्मशीलस्य' यजनयाजनादिस्वकीयानुष्ठाननिरतस्य 'पुरोहितस्य' शान्तिकर्तुः 'सरित्तु' त्ति स्मृत्वा 'पोराणिय' त्ति सूत्रत्वात्पुराणानेव पौराणिकीं-चिरन्तनीं 'तत्र' त्ति सन्निवेशे कुमारभावे वा, वर्तमानावस्थेति शेषः, 'जातिं' जन्म तथा 'सुचिन्नं' त्ति सुष्ठूर्णं सुचीर्णं वा निदानादिनाऽनुपहतत्वात् तपः-अनशनादिः, प्राकृतत्वाद्विन्दुलोपः, संयमं च, तपःसंयमामिति समाहारद्वन्द्वो वा, अत्र कामगुणविरक्तेरेव जिनेन्द्रमार्गप्रतिपत्तिरिति सूत्रद्वयार्थः॥ ततस्तौ किमकार्ष्टाम्? इत्याह-

मू. (४४७) ते कामभोगेसु असज्जमाना, माणुस्सएसुं जे यावि दिव्वा।
मोक्खाभिकंखी अभिजायसद्धा, तायं उवागम्म इमं उदाहु॥

वृ. 'तौ' पुरोहितपुत्रौ 'कामभोगेषु' उक्तरूपेषु 'असज्जमान' त्ति असंसजन्तौ-सङ्गमकुर्वन्तौ 'मानुष्यकेषु' मनुजसम्बन्धिषु, ये चापि 'दिव्याः' देवसम्बन्धिनः कामभोगास्तेषु चेति प्रक्रमः, 'मोक्षाभिकाङ्क्षिणौ' मुक्त्यभिलाषिणौ 'अभिजातश्रद्धौ' उत्पन्नतत्त्वरुची 'तातं' पितरमुपागम्य 'इदं' वक्ष्यमाणं 'उदाहु' त्ति उदाहरताम्। तयोर्हि साधुदर्शनानन्तरं क्वास्माभिरित्थंभूतानि रूपाणि पुराऽपि दृष्टानीति चिन्तयतो जातिस्मरणमुत्पन्नं, ततो जातवैराग्यौ प्रव्रज्याभिमुखावात्ममुत्कलीकरणाय तयोश्च प्रतिबोधोत्पादनाय वक्ष्यमानमुक्तवन्ताविति सूत्रार्थः॥

यच्च तावुक्तवन्तौ तदाह-

मू. (४४८) असासयं दट्ठु इमं विहारं, बहुअंतरायं न य दीहमाउं।
तम्हा गिहंसि न रइं लभामो, आमंतयामो चरिस्सामु मोनं॥

वृ. 'अशाश्वतम्' अनित्यं दृष्ट्वा 'इमं' प्रत्यक्षं विहरणं विहारं, मनुष्यत्वेनावस्थानमित्यर्थः, भण्यते हि-"भोगभोगाइं भुंजमाने विहरति" त्ति, किमित्येवमत आह-बहवः-प्रभूता अन्तरायाः-विघ्ना व्याध्यादयः यस्य तद्बहन्तरायं, बहन्तरायमपि दीर्घत्वा (यायुर्भवे)त्सम्पद्यायं स्यादित्याह-'न च' नैव 'दीर्घं' दीर्घकालस्थित्या 'आयुः' जीवितं, सम्प्रति पल्योपमायुष्कतायाः अप्यभावात्, यत एवं सर्वमनित्यं तस्माद् 'गिहंसि' त्ति 'गृहे' वेश्मनि न 'रतिं' धृतिं 'लभामो' त्ति लभावहे-प्राप्नुवः, अतश्च 'आमन्त्रयावहे' पृच्छाव आवां यथा 'चरिष्यामः' आसेविष्यावहे 'मौनं' मुनिभावं संयममिति सूत्रार्थः॥ एवं च ताभ्यामुक्ते

मू. (४४९) अह ताय ओ तत्थ मुनीण तेसिं, तवस्स वाधायकरं वयासी।
इमं वयं वेयविओ वयंति, तहा न होइ असुआण लोगो॥

वृ. 'अथ' अनन्तरं तातेन- मन्त्रानं कारोति पुत्रयोर्न च भवांपदभ्य इति तातः स एव तातकः 'तत्र' तस्मिन् मौनवेशे लक्षणे वा 'मुन्योः' भावतः प्रांतपन्नमुनिभावयोः 'तयोः' कुमारयोः 'तपसः' अनशनादेः सफलक्षणत्वाच्छेषसद्धमानुष्ठानस्य च 'व्याघातकरं' बाधाविधायि, वचनमिति शेषः, 'वयासि'त्ति अवादीत्, यदवादीत्तदाह इमां वाचं वेदविदो 'वदन्ति' प्रतिपादयन्ति, यथा -'न भवति' न जायते 'असुतानाम्' अविद्यमानपुत्राणां 'लोकः' परलोकः, तं विना पिण्डप्रदानाद्यभावे तत्प्रत्याद्यभावात्, तथा च वेदवचनः 'अनपत्यस्य लोका न सन्ति", तथाऽन्यैरप्युक्तम्

"पुत्रेण जायते लोकः, इत्येषा वैदिकी श्रुतिः।
अथ पुत्रस्य पुत्रेण, स्वर्गलोके महीयते॥"

तथा- "अपुत्रस्य गतिर्नास्ति, स्वर्गो नैव च नैव च।
गृहिधर्ममनुष्ठाय, तेन स्वर्गं गमिष्यति॥"

मू. (४५०) अहिज्ज वेए परिविस्स विप्पे, पुत्ते परिट्ठप्प गिहंसि जाया!।
भुच्चा न भोए सह इत्थियाहिं, आरण्णगा होह मुनी पसत्था॥

वृ. यत एवं तस्माद् 'अधीत्य' पठित्वा 'वेदान्' ऋग्वेदादीन् 'परिवेष्य' भोजयित्वा 'विप्रान्' ब्राह्मणान्, तथा पुत्रान् 'प्रतिष्ठाप्य' कलाकलापग्रहणादिना गृहस्थधर्मे निवेश्य, कीदृशः पुत्रान्? 'गृहे' जातान्, न तु गृहीतप्रतिपन्नकादीन्, पाठान्तरे च- पुत्रान् 'परिष्ठाप्य' स्वामित्वेन निवेश्य गृहे 'जाय'त्ति हे जातौ -पुत्रौ!, तथा 'भुक्त्वा' भुक्त्वा 'च' इति वाक्यालङ्कारे 'भोगान्' शब्दादीन् सह 'स्त्रीभिः' नारीभिस्ततोऽरण्ये भवौ आरण्यौ, 'अरण्यान्नो वक्तव्यः' (अरण्यात्। वार्तिकं) इति नप्रत्ययः, आरण्यावेव आरण्यकौ आरण्यकव्रतधारिणौ 'होह'त्ति भवतं- सम्पद्येथां युवां 'मुनी' तपस्विनौ 'प्रशस्तौ' श्लाघ्यौ, इत्थमेव ब्रह्मचर्याद्याश्रमव्यवस्थानात्, उक्तं हि-"ब्रह्मचारी गृहस्थश्च, वानप्रस्थो यतिस्तथे"ति, इह च 'अधीत्य वेदान्' इत्यनेन ब्रह्मचर्याश्रम उक्तः परिवेष्येत्यादिना च गृहस्थाश्रमः आरण्यकावित्यनेन च वानप्रस्थाश्रमः मुनिग्रहणेन च यत्याश्रम इति सूत्रद्वयार्थः॥ इत्थं तयोक्तौ कुमारकौ यदकार्षातां तदाह

मू. (४५१) सोअग्गिणा आयगुणिंधनेणं, मोहानिला पज्जलणाहिएणं।
संतत्तभावं परितप्पमानं, लोलुप्पमानं बहुसो बहुं च॥

वृ. पुत्रविषोगसम्भावनाजनितं मनोदुःखमिह शोकः स चाग्निश्च शोकाग्निस्तेन, आत्मनो गुणा आत्मगुणाः -कर्मक्षयोपशमादिसमुद्भूताः सम्यग्दर्शनादयस्त इन्धनमिवेन्धनं दाह्यतया यस्य स तथा तेन, अनादिकालसहचरितत्वेन रागादयो वाऽऽत्मगुणास्त इन्धनमुद्दीपकतया यस्य स तथा तेन, मोहो भुक्तोऽज्ञानमितियावत् स एवानिल इव मोहानिलस्तस्मादधिकं-महानगरदाहादिभ्योऽप्यगाधं प्रज्वलनं भवतीत्येष तोषमश्नुवीति अधिकप्रज्वलनः, यद्वा प्रज्वलनेनाधिक इतरापेक्षया यस्तेन भवति प्राकृतत्वादीर्घकरणं शब्दस्य पर्यायेणः, तथा संमति- समन्तात् तप्त इव तप्तः आत्मगुणरूपो भावः आत्मः कारणमस्येति संतप्तभावस्तम्, अत एव च 'परितप्यमानं'

समन्ताद्दह्यमानम्, अर्थात् शरीरे दाहस्यापि शोकावेशत उत्पत्तेः, लोलुप्यमानं तद्वियोगशङ्का-वशोत्पन्नदुःखपरशुभिरतिशयेन हृदि छिद्यमानं, वृद्धास्तु व्याचक्षते-'लोलुप्यमानं'ति लालप्यमानं-'भरणपोषणकुलसंतःणेसु य तुल्ले भविस्सह'त्ति, 'बहुधा' अनेकप्रकारं 'बहुं' च प्रभूतं यथा भवत्येवं लोलुप्यमानं लालप्यमानं वेति सम्बन्धः.

मू. (४५२) *पुरोहियं तं कमसोऽनुणंतं, निमंतयंतं च सुए धनेणं।*
जहक्कमं कामगुणेहिं चेव, कुमारगा ते पसमिक्ख वक्कं ॥

वृ. 'पुरोहितं' 'पुरोधसं' 'तं'मिति प्रक्रान्तं 'कमसो'त्ति क्रमेण-परिपाट्या 'अनुनयन्तं' स्वाभिप्रायेण प्रज्ञापयन्तं निमन्त्रयन्तं च तं भोगरूपच्छन्दयन्तं 'सुतौ' पुत्रौ 'धनेन' द्रव्येण यथाक्रमं प्रक्रमातिक्रमणं 'कामगुणैः' औदारिकशब्दादिविषयैः, पाठान्तरेण-कामगुणेषु वा, 'च' समुच्चये 'एव' इति पूरणे, कुमारकौ तावनन्तरप्रक्रान्तौ 'प्रसमीक्ष्य' प्रकर्षेणाज्ञानाच्छादितमतिमालोच्य 'वाक्यं' वचो वक्ष्यमाणमुक्तवन्ताविति गम्यते।

मू. (४५३) *वेआ अधीआ न भवंति ताणं, भुत्ता दिया निंति तमं तमेणं।*
जाया य पुत्ता न हवंति ताणं, को नाम ते अणुमन्निज्ज एयं ?॥

वृ. किं तदित्याह 'वेदाः' ऋग्वेदादयः 'अधीताः' पठिता न 'भवन्ति' जायन्ते 'त्राणं' शरणं, तदध्ययनमात्रतो दुर्गतिपतनरक्षणासिद्धेः, उक्तं हि तैरपि-

"अकारणमधीयानः, ब्राह्मणस्तु युधिष्ठिरः।
दुष्कुलेनाप्यधीयन्ते, शीलं यस्य स शोचते ॥"

(तथा) "शिल्पमध्ययनं नाम, वृत्तं ब्राह्मणलक्षणम्।
वृत्तस्थं ब्राह्मणं प्राहुर्नेतरान् वेदजीवकान् ॥"

तथा 'भुज्ज'त्ति अन्तर्भावितण्यर्थत्वाद्भोजिताः 'द्विजाः' ब्राह्मणाः 'नयन्ति' प्रापयन्ति तमोरूपत्वात्तमो-नरकस्तत्तमसा-अज्ञानेन यद्वा तमसोऽपि यत्तमस्तस्मिन्-अतिगाढे गौरवादिनरके नमिति वाक्यालङ्कारे, ते हि भोजिताः कुमार्गप्ररूपणपशुवधादावेव कर्मोपचयनिबन्धने असद्व्यापारे प्रवर्त्तन्त इत्यसत्प्रवर्त्तनतस्तद्भोजनस्य नरकगतिहेतुत्वमेव, अनेन च तेषां निस्तारकत्वं दूरापास्तमित्यर्थादुक्तं, तथा 'जाताश्च' उत्पन्नाः 'पुत्राः' सुता न भवन्ति 'त्राणं' शरणं नरकादिगतौ निपततामिति गम्यते, उक्तं हि तन्मतानुसारिभिरपि-

"यदि पुत्राद्भवेत्स्वर्गो, दानधर्मो न विद्यते।
मुषितस्तत्र लोकोऽयं, दानधर्मो निरर्थकः ॥"
बहुपुत्रा दुली गोधा, ताम्रचूडस्तथैव च।
तेषां च प्रथमं स्वर्गः, पश्चाल्लोको गमिष्यति ॥"

यतश्चैवं ततः को नाम ? न कश्चित्सम्भाव्यते यस्ते तवानुमन्येत-शोभनमिदमित्यनुजानीयात्सविवेक इति गम्यते, 'एतद्' अनन्तरमुक्तं वेदाध्ययनादित्रितयमिति, भुक्त्वा भोगानिति च चतुर्थोपदेशप्रतिवचनमाह-

मू. (४५४) *खणमित्तसुक्खा बहुकालदुक्खा, पगामदुक्खा अनिगामसुक्खा।*
संसारमुक्खस्स विपक्खभूआ, खाणी अनत्थाण उ काम भोगा ॥

वृ. क्षणमात्रं सौख्यं येषु ते तथा, बहुकालं नरकादिषु दुःखं शारीरं मानसं च येष्यन्ते तथाविधाः, कदाचित्स्वल्पकालमपि सुखमतिशयि स्याद् दुःखं त्वन्यथेति स्वल्पकालमपि तद्बहुकालभाविनोऽपि दुःखस्योपहन्तृ स्यादत आह-प्रकामम् अतिशयेन दुःखं येष्यन्ते तथा, 'अनिकामसौख्याः' अप्रकृष्टसुखाः, ईदृशा अप्यायतौ शुभफलाः स्युरत आह- संसारान्मोक्षो-विश्लेषः संसारमोक्षो निर्वृत्तिरित्यर्थस्तस्य विपक्षभूताः-तत्प्रतिबन्धकतयाऽत्यन्तप्रतिकूलाः, किमित्येतादृशा एते इत्याह-खानयः खनिः-आकरः 'अनर्थानाम्' इहपरलोकदुःखावाप्तिरूपाणां, तुशब्दोऽवधारणे भिन्नक्रमश्च ततः खनिरेव, के एवंविधाः ? 'कामभोगाः' उक्तरूपाः, अनर्थखनित्वमेव स्पष्टयितुमाह-

मू. (४५५) परिव्वयंते अनियत्तकामे, अहो अ राओ परितप्पमाने।
अन्नप्पमत्ते धनमेसमाने, पप्पोति मच्चुं पुरिसो जरं च॥

वृ. 'परिव्रजन्' विषयसुखलाभार्थमितस्ततो भ्राम्यन् 'अनिवृत्तकामः' अनुपरतेच्छः सन् 'अहो य राओ'त्ति आर्षत्वान्च्वस्य च भिन्नक्रमादहिश्च रात्रौ च अहर्निशमितियावत् 'परितप्यमानः' तदवाप्त्यै समन्ताच्चिन्ताग्निना दह्यमानः, अन्ये-सुहृत्स्वजनादयः, अथवाऽन्नं-भोजनं तदर्थं प्रभक्तः-तत्कृत्यासक्तचेता अन्यप्रमत्तः अन्नप्रमत्तो वा 'धनं' वित्तं 'एसमाने'ति 'एषयन्' विविधोपायैर्गवेषयमानः 'पप्पोत्ति' प्राप्नोति 'मृत्युं' प्राणत्यागं, कोऽसौ ?-पुरुषः 'जरां च' वयोहानिलक्षणाम्।

मू. (४५६) इमं च मे अत्थि इमं च नत्थि, इमं च मे किच्च इमं अकिच्चं।
तं एवमेवं लालप्पमानं, हरा हरंतित्ति कहं पमाओ ?॥

वृ. किञ्च-इदं च मेऽस्ति रजतरूप्यादि न कर्तुमुचितं 'त'मिति पुरुषमेवमेव-वृथैव 'लालप्यमानम्' अत्यर्थं व्यक्तवाचा वदन्तं हरन्ति-अपनयन्त्यायुरिति हराः-दिनरजन्यादयो व्याधि-विशेषा वा 'हरन्ति' जन्मान्तरं नयन्ति, उपसंहर्तुमाह-'इती'त्यस्माद्धेतोः 'कथं' केन प्रकारेण 'प्रमादः' अनुद्यमः प्रक्रमाद्धर्मे कर्तुमुचित इति शेषः ?, इति सूत्रषट्कार्थः॥

सम्प्रति तौ धनादिभिर्लोभयितुं पुरोहितः प्राह-

मू. (४५७) धनं पभूयं सह इत्थियाहिं, सयणा तहा कामगुणा पगामा।
तवं कए तप्पए जस्स लोगो, तं सव्व साहीणमिहेव तुज्झं॥

वृ. 'धनं' द्रव्यं 'प्रभूतं' प्रचुरं 'सह स्त्रीभिः' समं नारीभिः 'स्वजनाः' पितृपितृव्यादयः, तथा 'कामगुणाः' शब्दादयः 'पगाम'त्ति 'प्रकामाः' इतिशायिनः 'तपः' कष्टानुष्ठानं 'कृते' निमित्तं 'तप्यते' अनुतिष्ठति 'यस्य' धनादेः 'लोकः' जनस्तत् 'सर्वम्' अशेषं 'स्वाधीनम्' आत्मायत्तम् 'इहैव' अस्मिन्नेव गृहे 'तुज्झं'ति सूत्रत्वाद्युवयोः, यद्यपि च तयोः स्त्रियस्तदा न सन्ति तथाऽपि तदवाप्तियोग्यताऽस्तीति तासामभिधानमिति सूत्रार्थः॥ तावाहतुः-

मू. (४५८) धनेन किं धम्मधुराहिगारे ?, सयणेन वा कामगुणेहिं चेव।
समणा भवस्सामु गुणोहधारी, बहिंविहारा अभिगम्म भिक्खं॥

वृ. 'धनेन' द्रव्येण किं ?, न किञ्चिदित्यर्थः, धर्म एवातिसात्त्विकैरुह्यमानतया भूरिवि धूर्धर्मधुरा तदधिकारेतत्प्रस्तावे स्वजनेन वा कामगुणैश्चैव ?, तथा च वेदऽप्युक्तं-"न प्रजया

न धनेन त्यागेनैकेनामृतत्वमानशु"रित्यादि, ततः 'श्रमणौ' तपस्विनौ भविष्यावः, गुणौघं-सम्यग्दर्शनादिगुणसमूहं धारयत इत्येवंशीलौ गुणौघधारिणौ बहिः - ग्रामनगरादिभ्यो बहिर्वर्तित्वाद् द्रव्यतो भावतश्च क्वचिदप्रतिबद्धत्वाद विहारः विहरणं वयोस्तौ बहिर्विहारौ अप्रतिबद्धविहारावित्यर्थः, 'अभिगम्य' आश्रित्य 'भिक्षां' शुद्धोञ्छां तामेवाहारयन्तावित्यभिप्रायः इति सूत्रार्थः ॥ आत्मास्तित्वमूर्तत्वात्सकलधर्मानुष्ठानस्य तन्निराकरणायाह पुरोहितः -

मू. (४५९) जहा य अग्गी अरणीउऽसंतो, खीरे घयं तिल्लमहा तिलेसु ।
एमेव जाया सरीरंमि सत्ता, संमुच्छई नासइ नावचिट्ठे ॥

वृ. 'यथे' त्यौपम्ये चशब्दोऽवधारणे, यथैव 'अग्निः' वैश्वानरः 'अरणिउ'त्ति अरणितः अग्निमन्थनकाष्ठाद् 'असत्' अविद्यमान एव संमूर्छति, तथा क्षीरे घृतं तैलमथ तिलेषु, एवमेव 'हे जातौ' पुत्रौ! 'सरीरंसि'त्ति शरीरे काये 'सत्त्वाः' प्राणिनः 'समुच्छंति'त्ति संमूर्छन्ति, पूर्वमसन्त एव शरीराकारपरिणतधातुसमुदायतः उत्पद्यन्ते, तथा चाहुः - "पृथिव्यपस्तेजोवायुरिति तत्त्वानि, एतेभ्यश्चैतन्यं, मद्याङ्गेभ्यो मदशक्तिवत्", तथा 'नासइ'त्ति नश्यन्ति - अभ्रपटलवत्प्रलयमुपयान्ति 'नावचिट्ठे'त्ति न पुनः अवतिष्ठन्ते शरीरनाशे सति न क्षणमप्यवस्थितिभाजो भवन्ति, यद्वा शरीरे सत्यप्यमी सत्त्वा नश्यन्ति, नावतिष्ठन्ते, जलबुद्बुदवत्, उक्तं हि- "जलबुद्बुदवज्जीवाः" अत्र च प्रत्यक्षतोऽनुपलम्भ एव प्रमाणं, न ह्यसौ शरीरे शरीरव्यतिरिक्तो वा भवान्तरप्राप्तौ प्रत्यक्षत उपलभ्यत इति नास्ति, शशविषाणवदिति भाव इति सूत्रार्थः ॥ कुमारकावाहतुः -

मू. (४६०) नो इंदियग्गेज्झ अमुत्तभावा, अमुत्तभावा वि य होइ निच्चो ।
अज्झत्थहेउं निययऽस्स बंधो, संसारहेउं च वयंति बंधं ॥

वृ. 'नो' इति प्रतिषेधे इन्द्रियैः - श्रोत्रादिभिर्ग्राह्यः - संवेद्य इन्द्रियग्राह्यः, सत्त्व इति प्रक्रमः, असत्त्वादेवायमिन्द्रियाग्राह्य इत्याशङ्क्याह - 'अमूर्त्तभावात्' इन्द्रियग्राह्यरूपाद्यभावात्, अयमाशयः - यदिन्द्रियग्राह्यं सन्नोपलभ्यते तदसदिति निश्चियते, यथा प्रदेशविशेषे घटो, वस्तु तद्ग्राह्यमेव न भवति न तस्यानुपलम्भेऽप्यभावनिश्चयः, पिशाचादिवत्, तद्विषयानुपलम्भस्य संशयहेतुत्वात्, न च साधकबाधकप्रमाणाभावात् संशयविषयतैवास्त्विति वाच्यं, तत्साधकस्यानुमानस्य सद्भावात्, तथाहि- अस्त्यात्मा अहं पश्यामि जिघ्रामीत्याद्यनुगतप्रत्ययान्यथानुपपत्तेः, आत्माभावे होन्द्रियाण्येव द्रष्टॄणि स्युः, तेषु च परस्परं विभिन्नेष्वहं पश्यामि जिघ्रामीत्यादिरनुगतोऽहमितिप्रत्ययोऽनेकेष्विवप्रतिपत्तृषु न स्यात्, उक्तं हि-

"अहं शृणोमि पश्यामि, जिघ्राम्यास्वादयामि च ।
चेतयाम्यध्यवस्यामि, बुध्यामीत्येवमस्ति सः ॥"

वृद्धास्तु व्याचक्षते - अमूर्त्तत्वान्नोइन्द्रियग्राह्यो, नोइन्द्रियं च मनो, मनश्चात्मैव, अतः स्वप्रत्यक्ष एवायमात्मा, कस्मात् ?, उच्यते, त्रैकाल्यकार्यव्यपदेशात्, तद्यथा - कृतवानहं कर्मोम्यहं करिष्याम्यहमुक्तवानहं ब्रवीम्यहं ज्ञातवानहं जाने ऽहं ज्ञास्येऽहमिति योऽयं त्रिकालकार्यव्यपदेशहेतुरहंप्रत्ययो नायमानुमानिको न चागमिकः, किं तर्हि ?, प्रत्यक्षकृत एवायम्, अनेनैवात्मानं प्रतिपद्यस्व, नायमनात्मके घटादावुपलभ्यत इति, तथाऽमूर्त्तभावादपि च भवति नित्यः, तथाहि- यद्द्रव्यत्वे सत्यमूर्त्तं तन्नित्यं, यथा व्योम, अमूर्त्तश्चायं द्रव्यत्वे सत्यनेन

विनाशानवस्थाने प्रत्युक्ते, न चैवममूर्तत्वादेव तस्य बन्धायसम्भवः सम्भवे वा सर्वस्य सर्वदा तत्प्रसङ्ग इति वाच्यं, यतः 'अज्झत्थहेउं निययऽस्स बंधो' अध्यात्मशब्देन आत्मस्था मिथ्यात्वादय इहोच्यन्ते, ततस्तद्धेतुः-तन्निमित्तोऽपरस्यहेतुकृतत्वेऽतिप्रसङ्गादिदोषसम्भवा · ध्रियतो-निश्चितो न संदिग्धो, जगद्वैचित्र्यान्यथानुपपत्तेः, 'अस्य' जन्तोर्बन्धः-कर्मभिः संश्लेषः, यथा ह्यमूर्तस्यापि व्योम्नो मूर्तैरपि घटादिभिः सम्बन्धः एवमस्याप्यमूर्तस्यापि मूर्तैरपि कर्मभिरसौ न विरुध्यते, तथा चाह-

"अरूपं हि यथाऽऽकाशं, रूपिद्रव्यादिभाजनम् ।
तथा ह्यरूपी जीवो, रूपिकर्मादिभाजनम् ॥" इति,

मिथ्यात्वादिहेतुत्वाच्च न सर्वदा तत्प्रसङ्ग इत्यादेरदोषः, एवं हि येषामेव मिथ्यात्वा · दितद्धेतुसम्भवस्तेषामेवासौ न तु तद्विरहितानां सिद्धानामपि, तथा संसारः चतुर्गतिपर्यटन · रूपस्तद्धेतुं च-तत्कारणं वदन्ति 'बन्धं' कर्मबन्धम्, एतेनामूर्तत्वाद्व्योम्न इव निष्क्रियत्वमपि निरस्कृतमिति सूत्रार्थः ॥ यत एवमस्त्यात्मा नित्योऽत एव च भवान्तरानुयायी तस्य च बन्धो बन्धादेव मोक्ष इत्यतः-

मू. (४६१) *जहा वयं धम्ममजाणमाना, पावं पुरा कम्ममकासि मोहा ।*
ओरुज्झमाना परिरक्खयंता, तं नेव भुज्जोऽवि समायरामो ॥

वृ. 'यथा' येन प्रकारेण वयं 'धर्मं' सम्यग्दर्शनादिकम् 'अजानानाः' अनवबुध्यमानाः 'पापं' पापहेतुं 'पुरा' पूर्वं 'कर्म' क्रियाम् 'अकार्ष्म'त्ति अकार्ष्म कृतवन्तः 'मोहात्' तत्त्वानव · बोधात् 'अवरुध्यमानाः' गृहान्निर्गममलभमानाः 'परिरक्षमाणाः' अनुजीविभिरनुपाल्यमानाः 'तद्' इति पापकर्म 'नेव'त्ति नैव 'भूयोऽपि' पुनरपि 'समाचरामः' अनुतिष्ठामो, यतः सम्प्रत्युप लब्धमेवास्माभिर्वस्तुतत्त्वमिति भावः, सर्वत्र च 'अस्मदो द्वयोश्च'ति द्वित्वेऽपि बहुवचनमिति

मू. (४६२) *अब्भाहयंमि लोगंमि, सव्वओ परिवारिए ।*
अमोहाहिं पडंतीहिं, गिहंसि न रइं लभे ॥

वृ. 'अभ्याहते' आधिमुख्येन पीडिते 'लोके' जने 'सर्वत्र' सर्वासु दिक्षु 'परिवारिते' परिवेष्टिते 'अमोघाभिः' अवन्ध्याभिः, प्रहरणोपमाभिः 'पतन्तीभि' आगच्छन्तीभिः 'गिहंसि'त्ति गृहे तस्य चोपलक्षणत्वाद् गृहवासे न 'रतिम्' आसक्तिं 'लभे'त्ति लभावहे, यथा हि वागुरया परिवेष्टितो मृगोऽमोघैश्च प्रहरणैर्व्याधेनाभ्याहतो न रतिं लभते, एवमावामपीति सूत्रार्थः ॥ भृगुरुह ·

मू. (४६३) *केण अब्भाहओ लोओ, केण वा परिवारिओ ।*
का वा अमोहा वुत्ता ?, जाया ! चिंतावरो हुमि ॥

वृ. केन व्याधतुल्येनाभ्याहतो लोकः ?, केन वा वागुरास्थानीयेन परिवारितः ?, का वा 'अमोघा' अमोघप्रहरणोपमा अभ्याहतिक्रियां प्रति करणतयोक्ता ?, 'जाते !' पुत्रि चिन्तापरः 'हुमि'त्ति भवामि, ततो ममावेद्यतामयमर्थ इति भाव इति सूत्रार्थः ॥ तावाहतुः-

मू. (४६४) *मच्चुणाऽब्भाहओ लोओ, जराए परिवारिओ ।*
अमोहा रयणी वुत्ता, एवं ताय ! वियाणह ॥

वृ. 'मृत्युना' कृतान्तेनाभ्याहतो लोकः, तस्य सर्वत्राप्रतिहतप्रसरत्वात्, जरया परिवारितः,

तस्या एव तदभिघातयोग्यतापादनपर्यालोचत्वात्, अमोघा 'रयणि' त्ति रजन्य उक्ताः, दिवसाविनाभावित्वात्तासां दिवसाश्च, तत्पतने ह्यवश्यंभावी जनस्याभिघातः, एवं ज्ञात ! 'विजानीत' अवगच्छतेति सूत्रार्थः ॥ किञ्च-

मू. (४६५) *जा जा वच्चइ रयणी, न सा पडिनियत्तई ।*
अहम्मं कुणमाणस्स, अहला जंति राइओ ॥

वृ. या या 'वच्चति' व्रजति 'रजनी' रात्रिरुपलक्षणत्वादिनं च न सा 'प्रतिनिवर्तते' पुनरागच्छति, तदागमने हि सर्वदा मैवैका जन्मरात्रिः स्यात्ततो न द्वितीया मरणरात्रिः कदाचित्प्रादुष्यात्, ताश्चाधर्मं कुर्वतो जन्तोरिति गम्यते अफला यान्ति गतयः, अधर्मनिबन्धनं च गृहस्थतेत्यायुषोऽनित्यत्वादधर्मकरणे च तस्य निष्फलत्वात्तत्परित्याग एव श्रेयानिति भावः ।

इत्थं व्यतिरेकद्वारेण प्रव्रज्याप्रतिपत्तिहेतुमभिधाय तमेवान्वयमुखेनाह

मू. (४६६) *जा जा वच्चइ रयणी, न सा पडिनियत्तई ।*
धम्मं च कुणमाणस्स, सफला जंति राइओ ॥

वृ. 'जा जे'त्यादि पूर्ववत्, नवरं 'धम्मं च' त्ति चशब्दः पुनरर्थे धर्मं पुनः कुर्वतः सफला धर्मलक्षणफलोपार्जनतो, न च व्रतप्रतिपत्तिं विना धर्म इत्यतो व्रतं प्रतिपत्स्यावहे इत्यभिप्राय इति सूत्रद्वयार्थः ॥ इत्थं कुमारवचनादाविर्भूतसम्यक्त्वस्तद्वचनमेव पुरस्कुर्वन् भृगुराह-

मू. (४६७) *एगओ संवसित्ता णं, दुहओ समत्तसंजुया ।*
पच्छा जाया ! गमिस्सामो, भिक्खमाणा कुले कुले ॥

वृ. 'एकतः' एकस्मिन स्थाने 'समुष्य' सहैवासित्वा 'दुहतो'त्ति द्वयं च द्वयं च द्वये आवां युवां च, व्यक्त्यपेक्षया बहुवचनं पुरुषप्राधान्याच्च पुंलिङ्गता, 'सम्यक्त्वसंयुताः' सम्यक्त्वेन-तत्त्वरुचिलक्षणेन संयुताः-सहिताः, उपलक्षणत्वादेशविरत्या च 'पश्चात्' यौवनावस्थोत्तरकालं, कोऽर्थः ? पश्चिमे वयसि, 'जातौ' पुत्रौ ! 'गमिष्यावः' व्रजिष्यावो वयं ग्रामनगरादिषु, मासकल्पादिक्रमेणेति शेषः, अर्थाच्च प्रव्रज्यां प्रतिपद्य, 'भिक्षमाणाः' याचमानाः, पिण्डादिकमिति गम्यते, क्व ?-'कुले कुले' गृहे गृहे न त्वेकस्मिन्नेव वेश्मनि, किमुक्तं भवति ?-अज्ञातोञ्छवृत्त्येति सूत्रार्थः ॥ कुमारावाहतुः-

मू. (४६८) *जस्सऽत्थि मच्चुणा सक्खं, जस्स वऽत्थि पलायनं ।*
जो जाणइ न मरिस्सामि, सो हु कंखे सुए सिया ॥

वृ. 'यस्य' इत्यनिर्दिष्टस्वरूपस्य 'अस्ति' विद्यते 'मृत्युना' कृतान्तेन 'सख्यं' मित्रत्वं, यस्य चास्ति 'पलायनं' नशनं, मृत्योरिति प्रक्रमाः, तथा 'जो जाणइ'त्ति यो जानीते यथाऽहं न मरिष्यामि, 'सो हु कंखे सुए सिय'त्ति स एव 'काङ्क्षति' प्रार्थयते 'श्वः' आगामिनि दिने स्यादिदमिति गम्यते । न च कस्यचिन्मृत्युना सह सख्यं ततो वा पलायनं तदभावज्ञानं वा ।

मू. (४६९) *अज्जेव धम्मं पडिवज्जयामो, जहिं पवन्ना न पुणब्भवामो ।*
अणागयं नेव य अत्थि किंची, सद्धाखमं णो विणइत्तु रागं ।

वृ. अतोऽद्यैव 'धर्मं' प्रक्रमाद्यतिधर्मं 'पडिवज्जयामो'त्ति 'प्रतिपद्यामहे' अङ्गीकुर्महे, तमेव फलोपदर्शनद्वारेण विशिनष्टि-'जहिं'ति आर्षत्वाद्यं धर्मं 'प्रपन्नाः' आश्रिताः 'न पुनर्भव-

वामो'त्ति न पुनर्भविष्यामो न पुनर्जन्मानुभावयिष्यामः, तत्रैव-स्वगृहत्वेनाभिमते, जरामरणाद्य-भावोपलक्षणं चैतत्, किञ्च-'अनागतम्' अप्राप्तं नैव चास्ति किञ्चिदिति मनोरममपि विषय-सौख्यादि अनादौ संसारे सर्वस्य प्राप्तपूर्वत्वात्ततो न तदर्थमपि गृहावस्थानं युक्तमिति भावः, यद्वा 'अनागतम्' आगतिविरहितं नैव चास्ति किंचित्, किन्तु सर्वमागतिमदेव जरामरणादि व्यसनजातं, ध्रुवभावित्वादस्य भवस्थानां, यद्वाऽनागतं यत्र मृत्युरागतिर्नास्ति तत्र किञ्चित्स्थान मस्ति, यतश्चैवमतः श्रद्धा-अभिलाषः क्षमं-युक्तमिहलोकपरलोकयोश्च श्रेयःप्राप्तिनिमित्त-मनुष्ठानं कर्तुमिति शेषः, 'न' इति नोऽस्माकं 'निर्णय' अपसारय, कं ?-'रागं' स्वजना-भिष्वङ्गलक्षणं, तत्त्वतो हि कः कस्य स्वजनो न वा स्वजन इति, उक्तं च- "अयं णं' भंते ! जीवे एगमेगस्स जीवस्स माइत्ताए (पियत्ताए) भाइत्ताए पुत्तत्ताए धूयत्ताए सुण्हत्ताए भज्जत्ताए सुहिसयणसंबंधसंथुयत्ताए उववन्नपुव्वे ?, हंता गोयमा !, असति अदुवा अनंतखुत्तो" त्ति, इति सूत्रद्वयार्थः ॥ ततस्तयोर्वचनमाकर्ण्य पुरोहित उत्पन्नव्रतग्रहणपरिणामो ब्राह्मणीं धर्मविघ्नकारिणीं मत्वेदमाह-

मू. (४७०) पहीणपुत्तस्स हु नत्थि वासो, वासिट्ठि ! भिक्खायरियाइ कालो ।
साहाहि रुक्खो लहई समाहिं, छिन्नाहि साहाहिं तमेव खाणुं ॥

वृ. प्रहीणौ-प्रभ्रष्टौ पुत्रौ यस्मात्स प्रहीणपुत्रः, अथवा प्राकृते पूर्वापरनिपातस्यातन्त्रत्वा-त्पुत्राभ्यां प्रहीणः-त्यक्तः पुत्रप्रहीणः तस्य 'हु:' पूरणे 'नास्ति' न विद्यते 'वासः' अवस्थानं, मम गृह इति गम्यते, वाशिष्ठि !-वशिष्ठगोत्रोद्भवे, गौरवख्यापनार्थं गोत्राभिधानं, तच्च कथं नु नाम धर्माभिमुख्यमस्याः स्यादिति, भिक्षाचर्यायाः-भिक्षाटनस्य, उपलक्षणं चैतद् व्रतग्रहणस्य कालः-प्रस्तावो वर्त्तत इति शेषः । किमित्येवमत आह-'शाखाभिः' प्रतीताभिः 'वृक्षः' द्रुमः 'लभते' प्राप्नोति 'समाधिं' स्वास्थ्यं, 'छिन्नाभिः' द्विधाकृताभिः शाखाभिः 'तमेव' वृक्षं यस्ताभिः समाधिमान्भवान् 'खाणुं'ति स्थाणुं जनोऽप्युपदिशतीत्युपस्कारः, यथा हि तास्तस्य शोभासंरक्षणसहायकृत्यकरणादिना समाधिहेतवः एवं ममाप्येतौ सुतावतस्तद्विरहितोऽहमपि स्थाणुकल्प एवेति किं ममैवंविधस्य स्वपरयोः कञ्चिदुपकारमपुण्यत एव गृहवासेनेत्यभि-प्रायः ।

मू. (४७१) पंखाविहूणो व जहेव पक्खी, भिच्चव्विहूणो व रणे नरिंदो ।
विवन्नसारो वणिउव्व पोए, पहीणपुत्तोमि तहा अहंपि ॥

वृ. किञ्च-पक्षाभ्यां-पततत्राभ्यां विहीनो-विरहितः पक्षविहीनः, 'वा' दृष्टान्तान्तरसमुच्चये, यथा 'इह' अस्मिन्लोके 'पक्षी' विहङ्गमः पलायितुमप्यशक्त इति मार्जारादिभिरभिभूयते । तथा भृत्याः-पदातयस्तद्विहीनो, वा प्राग्वत्, 'रणे' सङ्ग्रामे 'नरेन्द्रः' राजा शत्रुजनपराजयस्थान-मेव जायते, तथा विपन्नः-विनष्टः सारो-हिरण्यरत्नादिरस्येति विपन्नसारो वणिक् सांयात्रिको, वेति प्राग्वत्, 'पोते' प्रवहणे भिन्न इति गम्यते नार्वाग् न च परत इत्युदधिमध्यवर्त्ती विषीदति, पुत्रप्रहीणोऽस्मि तथाऽहमपि, कोऽर्थः ?-पक्षभृत्यार्थसारभूताभ्यां सुताभ्यां विरहितोऽहमप्येवं-विध एवेति सूत्रद्वयार्थः ॥ वाशिष्ठ्याह-

मू. (४७२) सुसंभिया कामगुणा इमे ते, संपिंडिया अग्गरसा पभूया ।

भुंजामु ता जाव पहाणं, पच्छा वयमिस्सामु पहाणमग्गं ॥

वृ. सुष्ठु-अतिशयेन संभृताः-संस्कृताः सुसंभृताः, के ते ?-'कामगुणा' वेणुवीणाक्वणितकाकलीगीतादयः 'इमे' इति स्वगृहवर्त्तिनः, तान् प्रत्यक्षतया निर्दिशति, 'ते' तव तथा 'संपिण्डिताः' सम्यक्पुञ्जीकृताः 'अग्गरस'त्ति चशब्दस्य गम्यमानत्वादग्र्या रसाश्च प्रधाना मधुरादयश्च प्रभूताः-प्रचुराः, कामगुणान्तर्गतत्वेऽपि रसानां पृथगुपादानमतिगृद्धिहेतुत्वाच्छब्दादिष्वपि चैषामेव प्रवर्तकत्वात्, कामगुणविशेषणं वा अग्र्या रसास्त एव शृङ्गारादयो वा येषु ते तथा, वृद्धास्त्वाहुः-रसानां-सुखानामग्रं रसाग्रं ये कामगुणाः, सूत्रे च प्राकृतत्वादग्रशब्दस्य पूर्वनिपातः, 'भुंजामो'त्ति भुञ्जीमहि 'तत्' तस्मादमी सुसंभृतादिविशेषणविशिष्टास्ते च स्वाधीनाः सन्ति, 'कामगुणान्' उक्तरूपान् 'प्रकामम्' अतिशयेन, ततो भुक्तभोगाः 'पश्चाद्' इति वृद्धावस्थायां 'गमिष्यामः' प्रतिपत्स्यामहे 'प्रधानमार्गं' महापुरुषसेवितं प्रव्रज्यारूपं मुक्तिपथमिति सूत्रार्थः ॥ पुरोहितः प्राह-

मू. (४७३) भुत्ता रसा भोई ! जहाइ णे वओ, न जीवियट्ठा पजहामि भोए ।
लाभं अलाभं च सुहं व दुक्खं, संचिक्खमाणो चरिसामि मोनं ॥

वृ. 'भुक्ताः' सेविताः 'रसाः' मधुरादयः, उपलक्षणत्वाच्छेषकामगुणाश्च, यद्वा रसा इह सामान्येनैवास्वाद्यमानत्वाद्भोगा भण्यन्ते 'होति'त्ति हे भवति !, आमन्त्रणवचनमेतत्, 'जहाति' त्यजति 'नः' इत्यस्मान् वयः शरीरावस्था कालकृतोच्यते, सा चेहाभिमतक्रियाकरणक्षमा गृह्यते, ततश्च यतो भुक्ता एवानेकशो भोगा वयश्चाभिमतक्रियाकरणक्षमं जहाति, उपलक्षणत्वाज्जीवितं च, ततो यावन्नैतत्त्यजति तावद्दीक्षां प्रतिपद्यामह इत्यभिप्रायः, तर्किं वयःस्थैर्याद्यर्थं दीक्षां प्रतिपद्यसे ?, उच्यते हि कैश्चित् दीक्षा वयःस्थैर्यादिविधायिनीत्याशङ्क्याह-'न' इति निषेधे जीवितम्-असंयमजीवितम्, उपलक्षणत्वाद्वयश्च तदर्थं 'प्रजहामि' प्रकर्षेण त्यजामि 'भोगान्' शब्दादीन्, किन्तु 'लाभम्' अभिमतवस्त्वासिरूपम् 'अलाभं च' तदभावरूपं 'सुखम्' अभिलषणीयविषयसम्भोगजं, चशब्दस्य भिन्नक्रमत्वाद् 'दुःखं च' बाधात्मकं 'संचिक्खमानो'त्ति समतया ईक्षमाणः-पश्यन्, किमुक्तं भवति ?-लाभालाभयोस्तथा सुखदुःखयोरुपलक्षणत्वाज्जीवितमरणादीनां च समतामेव भावयन् 'चरिष्यामि' आसेविष्ये, किं तत् ?-'मौनं' मुनिभावं, ततो मुक्त्यर्थमेव मम दीक्षाप्रतिपत्तिरिति भाव इति सूत्रार्थः ॥ वाशिष्ठ्याह-

मू. (४७४) मा हू तुमं सोदरियाण संभरे, जुन्नो व हंसो पडिसोयगामी ।
भुंजाहि भोगाइं मए समानं, दुक्खं खु भिक्खायरिया विहारो ॥

वृ. 'मा' इति निषेधे 'हूः' इति वाक्यालङ्कारे त्वं सोदरे शयिताः सोदर्याः, 'सोदराश्च इति यः प्रत्ययः, ते च समानकुक्षिभवा भ्रातरस्तेषाम्, उपलक्षणत्वाच्चोपस्वजनानां भोगानां च, 'संभरे'त्ति अस्मार्षीः, क इव ?-'जुन्नो व हंसो'त्ति इवशब्दस्य भिन्नक्रमत्वात् 'जीर्णः' वयोहानिमुपगतो 'हंस इव' प्रधानपक्षीव प्रतिकूलं स्रोतः प्रतिस्रोतस्तदगामी सन्, किमुक्तं भवति ?-यथाऽसौ नदीस्रोतस्यतिकष्टं प्रतिकूलगमनमारभ्यापि तत्राशक्तः पुनरनुस्रोत एवानुधावति, एवं भवानपि दुरनुचरं संयमभारं वोढुमसमर्थः पुनः सहोदरादीन् भोगान् वा स्मरिष्यति, तदिदमेवास्तु, भुङ्क्ष्व भोगान् मया 'समानं'ति सह 'दुःख'मिति दुःखहेतुः 'खु'

इति खलु निश्चितं 'भिक्षाचर्यां' भिक्षाटनं 'विहारः' ग्रामादिष्वप्रतिबद्धविहारः, दीक्षोपलक्षणं चैतदिति सूत्रार्थः ॥ पुरोहित आह-

मू. (४७५) जहा य भोई! तनुयं भुयंगो, निम्मोअणिं हिच्च पलाइ मुत्तो।
एमेए जाया पयहंति भोए, तेऽहं कहं नाणुगमिस्समिक्को ?॥

वृ. यथा हे भवति! पत्न्यामेव च-'भोगिन्' इति हे भोगिनि! तनुः शरीरं तत्र जातां तनुजां 'भुजङ्गमः' सर्पः 'निर्मोचनीं' निर्मोकं हित्वा 'पर्येति' ममन्तादुत्सृजति 'मुक्तः' इति निरपेक्षोऽनभिष्वक्त इत्यर्थः, 'एमेए'त्ति एवमेतौ, पठ्यते च 'इमेति'त्ति अत्र च तथेति गम्यते, ततस्तथेमौ 'ते' तव 'जातौ' पुत्रौ 'पयहंति' प्रजहीतः प्रकर्षेण त्यजतो भोगान्, ततः किमित्याह-तौ भोगांस्त्यजन्तौ जातौ अहं कथं न 'अनुगमिष्यामि' प्रव्रज्याग्रहणेनानुसरिष्यामि 'एकः' अद्वितीयः ?। यदि तावदनयोः कुमारकयोरपीयान् विवेको यन्निर्मोकवदत्यन्तमकिञ्चित्करानपि भोगान् भुजङ्गवत्त्यजतस्तत्किमिति भुक्तभोगोऽप्यहमेतान्न त्यक्ष्यामि ?, किं वा ममामहायस्य गृहवासेनेत भावः।

मू. (४७६) छित्तिनु जालं अबलं व रोहिया, मच्छा जहा कामगुणे पहाय।
धोरेयसीला तवसा उदारा, धीरा हु भिक्खायरियं चरंति॥

वृ. तथा 'छित्त्वा' द्विधाकृत्वा तीक्ष्णपुच्छादिना 'जालम्' आनायम् 'अबलामिव' जीर्णत्वादिना निःसारमिव, बलीयोऽपीति गम्यते, 'रोहिताः' रोहितजातीयाः 'मत्स्याः' मीनाश्चरन्तीति सम्बन्धः, 'यथे'ति दृष्टान्तोपदर्शने, यत्तदोश्च नित्यसम्बन्धात्तथेति गम्यते, ततस्तथा जालप्रायान् कामगुणान् 'प्रहाय' परित्यज्य, धुरिवहन्ति धौरेयास्तेषामिव शीलम्-उत्क्षिप्तभारवाहितालक्षणं स्वभावो येषां ते धौरेयशीलाः 'तपसा' अनशनादिना 'उदाराः' प्रधानाः 'धीराः' सत्त्ववन्तः हुरिति यस्माद् भिक्षाचर्यां 'चरन्ति' आसेवन्ते, व्रतग्रहणोपलक्षणमेतद्, अतोऽहमपीत्थं व्रतमेव गृहीष्ये इति भाव इति सूत्रद्वयार्थः ॥ इत्थं तत्प्रतिबोधिन ब्राह्मण्याह-

मू. (४७७) नहेव कुंचा समइक्कमंता, तयाणि जालाणि दलित्तु हंसा।
पलिंति पुत्ता य पई य मज्झं, तेऽहं कहं नाणुगमिस्समिक्का ?॥

वृ. 'नभसीव' आकाश इव 'क्रौञ्चाः' पक्षिविशेषाः 'समतिक्रामन्तः' तांस्तान् देशानुल्लङ्घयन्तः 'ततानि' विस्तीर्णानि 'जालानि' बन्धनविशेषरूपाण्यात्मनोऽनर्थहेतून् 'दलयित्वा' भित्त्वा 'हंस'त्ति चशब्दस्य गम्यमानत्वाद्धंसाश्च 'पलिंति'त्ति परियन्ति-समन्तादुत्सृजन्ति 'पुत्रौ च' सुतौ 'पतिश्च' भर्ता मम सम्बन्धिनो, गम्यमानत्वादेतत् (न)जालोपमविषयाभिष्वङ्गं भित्त्वा नभःकल्पे निरुपलेपतया संयमाध्वनि तानि तानि संयमस्थानानि अतिक्रामन्तमनहं कथं नानुगमिष्याम्येका सती ?, किन्त्वनुगमिष्याम्येव, एवंविधवयसां हि स्त्रीणां भर्ता वा पुत्रो वा गतिरिति, यदिवा जालानि भित्त्वेति हंसानामेव सम्बध्यते, समतिक्रामन्तः स्वातन्त्र्येण गच्छन्ता इति तु क्रौञ्चानां, ततश्च क्रौञ्चोदाहरणमजाकलत्रादिबन्धनसुतापेक्षं, हंसोदाहरणं तु तद्विपरीतपत्यपेक्षमिति भावनीयमिति सूत्रार्थः ॥

इत्थं चतुर्णामप्येकवाक्यतायां प्रव्रज्याप्रतिपत्तौ यदभूत्तदाह-

मू. (४७८) पुरोहियं तं ससुयं सदारं, सुच्चाऽभिनिक्खम्म पहाय भोए।

कुडुंबसारं विउलुत्तमं तं, रायं अभिक्खं समुवाय देवी ॥

वृ. 'पुरोहितं' पुरोधसं 'तम' इति भृगुनामानं 'सपुत्तं' पुत्रद्वयान्वितं 'सदारं' सपत्नीकं 'श्रुत्वा' आकर्ण्य 'अभिनिष्क्रम्य' गृहान्निर्गत्य 'प्रहाय' प्रकर्षेण त्यक्त्वा 'भोगान्' शब्दादीन् प्रव्रजितमिति गम्यते, 'कुटुम्बसारं' धनधान्यादि विपुलं च-विस्तीर्णतया उत्तमं च-प्रधानतया विपुलोत्तमं 'तदि'ति यत्पुरोहितेन त्यक्तं गृह्णन्तमिति शेषः, 'रायं'ति राजानं नृपतिम् 'अभीक्ष्णं' पुनः पुनः 'समुवाच' सम्यगुक्तवती 'देवी' कमलावती नाम तदग्रमहिषी, किमुक्तवतीत्याह

मू. (४७९) वंतासी पुरिसो रायं !, न सो होइ पसंसिओ ।
माहणेण परिच्चत्तं, धणं आदाउमिच्छसि ॥

वृ. वान्तम्-उद्गीर्णमशितुं भोक्तुं शीलमस्येति वान्ताशी 'पुरुषः' पुमान्, य इति गम्यते, 'न' नैव 'स' असौ 'भवति प्रशंसितः' श्लाघितो विद्वद्भिरिति शेषः, स्यादेतत्-कथमहं वान्ताशीत्यत आह-ब्राह्मणेन 'परित्यक्तं' परिहृतं 'धनं' द्रव्यम् 'आदातुं' गृहीतुमिच्छसि, परिहृतधनं हि गृहीतोज्झितत्वाद्वान्तमिव ततस्तदादातुमिच्छंस्त्वमपि वान्ताशीव, न चैतदुचितं भवादृशामित्यभिप्रायः। अथवा काक्वा नीयते-राजन्! वान्ताशी यः स प्रशस्यो न भवत्यतो ब्राह्मणेन परित्यक्तं धनं त्वमादातुमिच्छसि सैवैतद्भवत उचितं, यतत्वमप्येवं वान्ताशितयाऽश्लाघ्य एव भविष्यसीति काक्वर्थः ॥

मू. (४८०) सव्वं जगं जइ तुहं, सव्वं वावि धणं भवे ।
सव्वंपि ते अपज्जत्तं, नेव ताणाय तं तव ॥

वृ. किं ?-'सर्वं' निरवशेषं 'जगद्' भुवनं, भवेदिति सम्बन्धः, 'यदी'त्यस्यायमर्थः-न संभवत्येवैतत्, कथञ्चित्सम्भवे वा 'तुह'न्ति तव सर्वं वाऽपि धनं-रजतरूप्यादिद्रव्यं भवेत् यदि तत्रेतीहापि योज्यते, तदा सर्वमपि 'ते' तव 'अपर्याप्तम्' अशक्तम्, इच्छापरिपूर्तिं प्रतीति शेषः, आकाशसमत्वेन तस्या अपर्यवसितत्वात्, तथा नैव 'त्राणाय' जरामरणाद्यापदपनोदाय 'तदि'ति सर्वं जगद्धनं वा भवति ते, इह च पुनः पुनः सर्वशब्दस्य युष्मदर्थोपादानं भिन्नवाक्यत्वादपुनरुक्तमिति भावनीयं, पूर्वेण गर्हितत्वमनेन चानुपकारितां पुरोहितधनाद्यग्रहणहेतुमादर्श्य सम्प्रत्यनित्यतां तद्धेतुमाह-

मू. (४८१) मरिहिसि रायं ! जया तया वा, मनोरमे कामगुणे पहाय ।
एक्को हु धम्मो नरदेव ! ताणं, न विज्जई अन्नमिहेह किं च ॥

वृ. 'मरिष्यसि' प्राणांस्त्यक्ष्यसि 'राजन् !' नृप ! 'यदा तदा वा' यस्मिंस्तस्मिन् वा काले ऽवश्यमेव मर्तव्यं, 'जातस्य हि ध्रुवो मृत्यु'रिति, उक्तं हि-

"कश्चित्तावत्क्वचिद्दृष्टः, श्रुतो वा शङ्कितोऽपि वा ।
क्षितौ वा यदिवा स्वर्गे, यो जातो न मरिष्यति ॥"

तत्रापि च कदाचिदभिलषितवस्त्वादायैव मरिष्यतीत्यत आह- 'मनोरमान्' चित्तह्लादकान् 'कामगुणान्' उक्तरूपान् 'प्रहाय' प्रकर्षेण त्यक्त्वा 'त्वम्' एकाक्येव मरिष्यसि, न किञ्चिदन्यत्त्वया सह यास्यतीत्यभिप्रायः। तथा 'एक्को हु'न्ति एक एव-अद्वितीयः 'धर्म एव' सम्यग्दर्शनादिरूपः 'नरदेव !' नृप ! 'त्राणं' शरणमापत्परिरक्षणे क्षमं 'न विद्यते' नास्ति

'अन्यद्' अपरम् 'अहेह'ति वीप्साभिधानं सम्भ्रमख्यापनार्थं, 'किञ्चिदि'ति स्वजनधनादिकं, यदिवा 'इहे'ति लोके 'इहे'त्यस्मिन् मृत्यौ धर्म एवैकस्त्राणं, मुक्तिहेतुत्वेन, नान्यत्किञ्चित्, ततः स एवानुष्ठेय इति भाव, इति सूत्रचतुष्टयार्थः ॥ यतश्च धर्मादृते नान्यत्त्राणमतः-

मू. (४८२) *नाहं रमे पक्खिणि पंजरे वा, संताणछिन्ना चरिस्सामि मोनं।*
अकिंचणा उज्जुकडा निरामिसा, परिग्गहारंभनियत्तदोसा ॥

वृ. 'ने'ति निषेधे, 'अह'मित्यात्मनिर्देशे 'रमे' इति रतिमवाप्नोमि 'पक्खिणि पंजरे व'त्ति वाशब्द औपम्ये भिन्नक्रमश्च ततः 'पक्षीणीव' शकुनिकव सारिकादेः 'पञ्जरे' प्रतीत एव, किमुक्तं भवति ?-यथाऽसौ दुःखोत्पादिनि पञ्जरे न रतिं प्राप्नोति एवमहमपि जरामरणाद्युपद्रवविद्रुते भवपञ्जरे न रमे, अतश्छिन्नसन्ताना प्रक्रमाद् विनाशितस्नेहसन्ततिः सती, छिन्नशब्दस्य सूत्रे परनिपातः प्राग्वत्, 'चरिष्यामि' अनुष्ठास्यामि 'मौनं' मुनिभावम्, अविद्यमानं किञ्चनं-द्रव्यतो हिरण्यादि भावतः कषायादिरूपमस्या इत्यकिञ्चना, अत एव ऋजुभावविरहितं कृतम्-अनुष्ठितमस्या इति ऋजुकृता, कथं चैवंभूतेत्याह-निष्क्रान्ता आमिषाद्-गृद्धिहेतोरभिलषितविषयादेः निर्गतं वा आमिषदोषः-अभिष्वङ्गनिस्तृंशतादयस्येभ्यो निवृत्ता-उपरता परिग्रहारम्भदोषनिवृत्ता, यद्वा परिग्रहारम्भनिवृत्ता अत एव चादोष-विकृतिविरहिता, अनयोर्विशेषणसमासः।

मू. (४८३) *दवग्गिणा जहा रन्ने, डज्झमानेसु जंतुसु।*
अन्ने सत्ता पमोयंति, रागद्दोसवसं गया ॥

वृ. अपरं च 'दवाग्निना' दावानलेन यथा 'अरण्ये' वने 'दह्यमानेषु' भस्मसात्क्रियमाणेषु 'जन्तुषु' प्राणिषु 'अन्ये' अपरे 'सत्त्वाः' प्राणिनोऽविवेकिनः 'प्रमोदन्ते' प्रकर्षेण हृष्यन्ति, किमित्येवंविधास्ते इत्याह-रागद्वेषयोर्वशः-आयत्तता रागद्वेषवशास्तं गताः-प्राप्ताः।

मू. (४८४) *एवमेव वयं मूढा, कामभोगेसु मुच्छिया।*
डज्झमानं न बुज्झामो, रागद्दोसग्गिणा जगं ॥

वृ. 'एवमेवं'ति निन्दोरलाक्षणिकत्वादेवमेव वयं 'मूढ'त्ति 'मूढानि' मोहवशगानि 'कामभोगेषु' उक्तरूपेषु 'मुच्छिय'त्ति मूर्छितानि गृद्धानि दह्यमानमिव दह्यमानं न 'बुध्यामहे' नावगच्छामो रागद्वेषाग्निरिव रागद्वेषाग्निस्तेन, किं तत् ?-'जगत्' प्राणिसमूहं, यो हि सविवेको रागादिमांश्च न भवति स दावानलेन दह्यमानानन्यसत्त्वानवलोक्य अहमप्येवमनेन दहनीय इति तद्रक्षणोपायतत्पर एव भवति, न तु प्रमादवशगः सन् प्रमोदते, यस्त्वत्यन्तमज्ञो रागादिमांश्च स आयतिमचिन्तयन् हृष्यति न तु तदुपशमनोपाये प्रवर्त्तते, ततो वयमपि भोगापरित्यागादेवंविधान्येवेति भावः। ये त्वेवंविधा न भवन्ति ते किं कुर्वन्तीत्याह-

मू. (४८५) *भोगे मुच्चा वमित्ता य, लहुभूयविहारिणो।*
आमोअमाणा गच्छंति, दिया कामकमा इव ॥

वृ. 'भोगान्' मनोज्ञशब्दादीन् 'भोच्च'त्ति 'भुक्त्वा' आसेव्य पुनरुत्तरकालं 'वान्त्वा च' अपहाय विपाकदारुणत्वाल्लघुः-वायुस्तद्वद् भूतं-भवनमेषां लघुभूताः, कोऽर्थः ?-वायुप्रमाः तथाविधाः सन्तो विहरन्तीत्येवंशीलाः लघुभूतविहारिणः-अप्रतिबद्धविहारिण इत्यर्थः, यद्वा

लघुभूतः संयमस्तेन विहर्तुं शीलं येषां ते तथाविधाः, आ-समन्तान्मोदमाना ह्यन्त आमोदमानाः, तथाविदानुष्ठानेनेति गम्यते, गच्छन्ति विवक्षितं स्थानमिति शेषः, क इव ?-'दिया कामकमा इव' त्ति इवशब्दो भिन्नक्रमस्ततो द्विजा इव-पक्षिण इव कामः अभिलाषस्तेन क्रामन्तीति कामक्रमाः, यथा पक्षिणः स्वेच्छया यत्र यत्रावभासते तत्र तत्रामोदमाना भ्राम्यन्ति एवमेतेऽप्यभिष्वङ्गस्य परतन्त्रताहेतोरभावाद्यत्र यत्र संयमयात्रानिर्वहणं तत्र तत्र यान्तीत्याशयः ।

पुनर्वैहिरास्थां निराकुर्वन्त्याह-

मू. (४८६) *इमे य बद्धा फंदंति, मम हत्थऽज्जमागया ।*
वयं च सत्ता कामेसु, भविस्सामो जहा इमे ॥

वृ. 'इमे' इत्यनुभूयमानतया प्रत्यक्षाः शब्दादयः, 'चः' समुच्चये 'बद्धाः' नियन्त्रिता अनेकधोपायैः रक्षिता इत्यर्थः, एते किमित्याह-स्पन्दन्त इव स्पन्दन्ते अस्थितिधर्मतया, ये कीदृश इत्याह-'मम हत्थऽज्जमागय' त्ति 'ममे' त्यात्मनिर्देशे उपलक्षणत्वात्तव च 'हस्तं' करम्, आर्य ! अद्य वा 'आगताः' प्राप्ताः, कोऽर्थः ?-स्ववशाः, आत्मनोऽज्ञतां दर्शयितुमाह-'वयं च सत्त' त्ति वयं पुनः 'सक्तानि' संबद्धानि अभिष्वङ्गवन्तीत्यर्थः, अबहुत्वेऽप्यस्मदोर्द्वयोश्चेति बहुवचनं, 'कामेषु' अभिलषणीयशब्दादिषु, एवंविधेष्वपि चामीष्वभिष्वङ्ग इति मोहविलसितमिति भावः, यद्वा 'इमे चे'त्ति चशब्दाद्वयं च स्पन्दामह इव स्पन्दामहे आयुषश्चलतया परलोकगमनाय, शेषं तथैव, यत एवमतो भविष्यामो यथेमे पुरोहितादयः, किमुक्तं भवति ?-यथाऽभिश्वञ्चलत्वमवलोक्यैते परित्यक्तास्तथा वयमपि त्यक्ष्याम इति । स्यादेतद्-अस्थिरत्वेऽपि सुखहेतुत्वात्किमित्यमी त्यज्यन्ते इत्याह-

मू. (४८७) *सामिसं कुललं दिस्सा, बज्झमानं निरामिसं ।*
आमिसं सव्वमुज्झित्ता, विहरिस्सामो निरामिसा ॥

वृ. सहामिषेण-गृद्धिशतरूपेण वर्तत इति सामिषस्तं कुललमिह गृध्रं शकुनिकां वा 'दृष्ट्वा' अवलोक्य 'बाध्यमानं' पीड्यमानं पक्ष्यन्तरैरिति गम्यते, निरामिषम्-आमिषविरहितमन्यथाभूतं दृष्ट्वेति गम्यते, 'आमिषम्' अभिष्वङ्गहेतुं धनधान्यादि 'सर्वं' निरवशेषम् 'उज्झित्वा' त्यक्त्वा 'विहरिस्सामो' त्ति विहरण्याम्यप्रतिबद्धविहारितया चरिष्यामीत्यर्थः, 'निरामिषा' परित्यक्ताभिष्वङ्गहेतुः । उक्तानुवादेनोपदेष्टुमाह-

मू. (४८८) *गिद्धोवमे य नच्चा णं, कामे संसारवड्ढणे ।*
उरगो सुवन्नपासिव्व, संकमानो तणुं चरे ॥

वृ. गृद्ध्रेणोपमा येषां ते गृद्धोपमास्तानुक्तन्यायेन, 'तुः' समुच्चये भिन्नक्रमश्च योक्ष्यते, 'ज्ञात्वा' अवबुध्य, नमिति प्राग्वत्, कान् ?-प्रक्रमाद्विषयामिषवतो लोकान् 'कामाश्च' विषयांश्च 'संसारवर्द्धनान्' संसारवृद्धिहेतून् ज्ञात्वेति सम्बन्धः, अथवा कामयन्त इति कामा इति व्युत्पत्त्या कामयोगाद्वाऽत्यन्तगृद्धिख्यापनार्थं कामा विषयिण एवोक्ता अतस्तान् गृद्धोपमान् संसारवर्द्धनांश्च ज्ञात्वा किमित्याह-'उरगोसुवन्नपासे व'त्ति इवशब्दस्य भिन्नक्रमत्वात् आर्षत्वाच्च 'उरग इव' भुजग इव 'सौपर्णेयपार्श्वे' गरुडसमीपे 'शङ्कमानः' भयत्रस्तस्तन्विति-स्तोकं मन्दं यतनयेतियावत् 'चरेः' क्रियासु प्रवर्तस्व, अस्यायमाशयः-यथा सौपर्णेयोपमैर्विषयैर्न बाध्यसे

तथा संयममासेवस्व, ततश्च किमित्याह-

मू.(४८९) *नागोव्व बंधणं छित्ता अप्पणो वसहिं वए।*
इति एत्थं महाराय!, उसुआरित्ति मे सुयं॥

वृ. 'नागोव्व' अर्द्धं स्पष्टम्, अयमाशयश्चायं-यथा नागः बन्धनं वरत्रान्दुकादि 'छित्त्वा' द्विधा विधायात्मनो 'वसतिं' विन्ध्याटवीं व्रजति, एवं भवानपि कर्मबन्धनमुपहत्यात्मनो वसतिः-कर्मविगमतः शुद्धो यत्रात्माऽवतिष्ठते सा च मुक्तिरेव तां व्रजेः, अनेन दीक्षायाः प्रसङ्गतः फलमुक्तम्। एवं चोपदिश्य निगमयितुमाह-'एतद्' यन्मयोक्तं 'पथ्यं' हितं 'महाराज!' प्रशस्यभूपते? 'इषुकार!' इषुकारनामन्!, एतच्च न मया स्वमनीषिकयैवोच्यते, किन्तु 'इति' इत्येतन्मया 'श्रुतम्' अवधारितं साधुसकाशादिति गम्यत इति सूत्राष्टकार्थः॥ एवं च तद्वचनमाकर्ण्य प्रतिबुद्धो नृपः, ततश्च यत्तौ द्वावपि चक्रतुस्तदाह-

मू.(४९०) *चइत्ता विपुलं रज्जं, कामभोगे अ दुच्चए।*
निव्विसया निरामिसा, निन्नेहा निप्परिग्गहा॥

मू.(४९१) *सम्मं धम्मं वियाणित्ता, चिच्चा कामगुणे वरे।*
तवं पगिज्झऽहक्खायं, घोरं घोरपरक्कमा!॥

वृ. 'त्यक्त्वा' प्रहाय 'विपुलं' विस्तीर्णं 'राष्ट्रं' मण्डलं, पाठान्तरतो राज्यं वा 'कामभोगांश्च' उक्तरूपान् 'दुस्त्यजान्' दुष्परिहारान् 'निर्विषयौ' शब्दादिविषयरहितौ अत एव निरामिषौ, यद्वा विषयो-देशस्तद्विरहितौ राष्ट्रपरित्यागतः कामभोगात्यागतश्च निरामिषौ-अभिष्वङ्गहेतु-विरहितौ, कुतः पुनरेवंविधौ?, यतो 'निःस्नेहौ' निष्प्रतिबन्धौ 'निष्परिग्रहौ' क्वचिदविद्यमान-स्वीकारौ 'सम्यग्' अविपरीतं 'धर्मं' श्रुतचारित्रात्मकं 'विज्ञाय' विशेषतोऽवबुद्धय 'चिच्च'त्ति त्यक्त्वा 'कामगुणान्' शब्दादीन् 'वरान्' प्रधानान् पूर्वविशेषणैर्गतार्थत्वेऽपि पुनरभिधान-मतिशयख्यापकं, 'तपः' अनशनादि 'प्रगृह्य' अभ्युपगम्य 'यथाख्यातं' येन प्रकारेण तीर्थकरा दिभिः कथितं 'घोरम्' अत्यन्तदुरनुचरं घोरकर्मा-वैरिणः प्रति रौद्रः पराक्रमो धर्मानुष्ठान-विषयसामर्थ्यात्मको ययोस्तौ तथा देवीनृपौ तथैव च कृतवन्तावितिशेष इति सूत्रद्वयार्थः॥

सम्प्रति समस्तोपसंहारमाह-

मू.(४९२) *एवं ते कमसो बुद्धा, सव्वे धम्मपरायणा।*
जम्ममच्चुभउव्विग्गा, दुक्खस्संतगवेसिणो।

वृ. 'एवम्' अमुना प्रकारेण 'तानि' अनन्तरमुक्तरूपाणि षडपि 'क्रमशः' अभिहितपरिपाट्या 'बुद्धानि' अवगततत्त्वानि 'सर्वाणि' अशेषाणि 'धर्मपरायणानि' धर्मैकनिष्ठानि, पठ्यते च-'धम्मपरंपर'त्ति परम्परया धर्मो येषां तानि परम्पराधर्माणि, प्राकृतत्वाच्च परम्पराशब्दस्य पर-निपातः, तथा हि-साधुदर्शनात्कुमारकयोः कुमारवचनात्तत्पित्रोस्तदवलोकनात्कमलावत्या-स्ततोऽपि च राज्ञ इति परम्परयैव धर्मप्राप्तिः, जन्ममृत्युभयेभ्यः-उक्तरूपेभ्य एवोद्विग्नानि-त्रस्तानि जन्ममृत्युभयोद्विग्नानि 'दुःखस्य' असातस्यान्तः-पर्यन्तस्तदगवेषकानि तदन्वेषकाणि सापेक्षत्वेऽपि समासो यथा देवदत्तस्य गुरुकुलमिति। पुनस्तद्भक्तव्यतामेवाह-

मू.(४९३) *सासणे विगयमोहाणं, पुव्विं भावणभाविया।*

अचिरेणेव कालेन, दुक्खस्संतमुवागया ॥

वृ. 'शास्त्रे' दर्शने विगतमोहानाम्-अर्हतां 'पूर्वं' मिथ्यात्वजन्मनि भावनया - अभ्यासरूपया भावितानि - वासितानि भावनाभावितानि, यद्वा भाविता भावना येषां तानि भावितभावनानि, पूर्वोत्तरनिपातस्यातन्त्रत्वाद्, अत एवाचिरेणैव- स्वल्पेनैव कालेन 'दुःखस्यान्तं' मोक्षम् 'उपागतानि' प्राप्तानि, सर्वत्र च प्राकृतत्वात्पुंल्लिङ्गनिर्देशः । नन्दपतिस्मरणाद्याध्ययनार्थमुपसंहर्तुमाह-

सू. (४१४) *राया सह देवीए, माहणो अ पुरोहिओ ।*
माहणो दारगा चेव, सव्वे ते परिनिव्वुडे ॥ तिबेमि

वृ. 'राजा' इषुकारः सह 'देव्या' कमलावत्या ब्राह्मणश्च पुरोहितो भृगुनामा ब्राह्मणी तत्पत्नी यशा दारकौ तत्पुत्रौ चैवेति पूर्ववत्सर्वाणि तानि 'परिनिर्वृतानि' कर्माग्न्युपशमतः शीतीभूतानि मुक्तिं गतानीत्यावेदितं सूत्रत्रयार्थः ॥

'इति' परिसमाप्तौ ब्रवीमीति पूर्ववत् । उक्तोऽनुगमः, सम्प्रति नयास्ते च पूर्ववत् ।

अध्ययनं - १४ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे चतुर्दशअध्ययनस्य भद्रबाहुसूरिविरचिता निर्युक्तिः एवं शान्त्याचार्यविरचिता टीका परिसमाप्ता

अध्ययनं - १५- सभिक्षुकः

वृ. व्याख्यातं चतुर्दशमध्ययनं, सम्प्रति पञ्चदशमारभ्यते, अस्य चायमभिसम्बन्धः- इहानन्तराध्ययने निर्निदानतागुण उक्तः, स च मुख्यतो भिक्षोरेव, भिक्षुश्च गुणत इति तद्गुणा अनेनोच्यन्त इत्यनेन सम्बन्धेनायातस्याध्ययनस्य चत्वार्यनुयोगद्वाराणि पूर्ववद्व्याख्यानि तावद्यावन्नामनिष्पन्ननिक्षेपे सभिक्षुकमिति नाम, तत्र च सशब्दो भिक्षुशब्दश्च दशवैकालिक एव निक्षिप्तस्तथाऽपि स्थानाशून्यार्थं भिक्षुनिक्षेपमाह निर्युक्तिकृत्-

नि.[३७४] *निक्खेवो भिक्खुंमी चउव्विहो० ॥*

नि.[३७५] *जाणयसरीरभविए तव्वइरित्ते अ निण्हगाईसु ।*
जो भिंदइ खुहं खलु सो भिक्खू भावओ होइ ॥

वृ. 'निक्षेपः' न्यासः भिक्षौ विचार्ये चतुर्विधो नामस्थापनाद्रव्यभावभेदात्, तत्र नामस्थापने क्षुण्णे, द्विविधो भवति द्रव्ये विचार्ये आगमतो नोआगमतः, तत्रागमतो भिक्षुपदार्थज्ञस्तत्र चानुपयुक्तो, नोआगमतश्च स त्रिविधः- 'जाणगसरीरभविए'त्ति ज्ञशरीरभव्यशरीरे तद्व्यतिरिक्तश्च, तत्राद्यौ सुगमावेव, तद्व्यतिरिक्तस्तु द्रव्यभिक्षुर्निह्नवादिषु, आदि

शब्दात्मरजस्कादिषु चान्यतमो विवक्षित इति गम्यते, द्रव्यत्वं चास्य रागादिलक्षणक्षुद्भेत्तृत्वाभावात्, भावभिक्षुमाह- यो 'भिनत्ति' विदारयति क्षुधं 'खलुः' अवधारणे भिन्नक्रमश्च, ततः स एव भिक्षुभावतो भवतीति गाथाद्वयार्थः ॥ इह च भिनत्तीत्युक्तमतः कर्तृकरणकर्मभिः प्रयोजनं, सकर्मकत्वाद्भिदेः, अत आह-

नि.[३७६] *भेत्ता य भेअणं वा नायव्वं भिंदियव्वयं ।*
इक्किक्कंपि अ दुविहं दव्वे भावे अ नायव्वं ॥

नि.[३७७] रहकारपरसुमाई दारुगमाई अ दव्व ओ हुंति ।
साहू कम्म ऽट्ठविहं तवो अ भावंमि नायव्वो ॥

नि.[३७८] रागद्दोसा दंडा जोगा तह गारवा य सल्ला य ।
विगहाओ सन्नाओ सुहं कसाया पमाया य ॥

वृ. भेत्ता च कर्त्ता यो भिनत्ति, भेदनं करणं येन भिनत्ति 'वा' समुच्चये 'ज्ञातव्यं' बोद्धव्यं भेत्तव्यमेव भेत्तव्यकं कर्म यदिभद्यते, 'च:' समुच्चये, 'एव' इति पूरणे, 'एकैकमपि चे'ति भेत्ता भेदनं भेत्तव्यकं च 'द्विविधं' द्विभेदं द्रव्ये भावे च विचार्यमाने 'ज्ञातव्यम्' अवगन्तव्यं ।

तत्र द्रव्ये 'रहगारपरसुमाइ'त्ति आदिशब्दस्य प्रत्येकमभिसम्बन्धात्तद् रथकार:-तक्षकस्तदादिर्द्रव्यतो भेत्ता, आदिशब्दादयस्कारादिपग्रह:, परशु:-कुठारस्तदादिर्द्रव्यतो भेदनम्, आदिशब्दाद् घनादयो गृह्यन्ते, 'दारुगमाई य'त्ति दारुकं-काष्ठं तदादि च द्रव्यतो भेद्यम्, आदिशब्दाल्लोहादि परिग्रह:, भवन्तीति सर्वापेक्षं बहुवचनम् । 'साधु:' तपस्वी 'कर्म' ज्ञानावरणादि 'अष्टविधम्' अष्टप्रकारं 'तपश्च' अनशनादि भावे विचार्ये भेत्ता भेत्तव्यं भेदनं च क्रमेण ज्ञातव्यम् । इत्थं 'जो भिंदई खुहं खलु' इति ग्रहणकवाक्यं गतं, भिनत्तीति व्याख्याय क्षुधं व्याख्यातुमाह-

'रागद्वेषौ' उक्तरूपौ 'दण्डा:' मनोदण्डादयो 'योगा:' करणकारणानुमतिरूपा:, पठन्ति च 'रागद्दोसा छुहं दंडा' अत्र च 'छुहं'ति क्षुध्-बुभुक्षा उच्यते, तथा 'गौरवाणि च' ऋद्धि गौरवादीनि 'शल्यानि च' मायाशल्यादीनि 'विकथा:' स्त्रीकथादय: 'सञ्ज्ञा:' आहारसञ्ज्ञादय:, 'खुहं'ति एतद्भावभावित्वादष्टविधकर्मरूपाया: क्षुध: एतान्यपि क्षुदित्युच्यन्ते, प्राकृतत्वाच्च नपा निर्देश:, 'कषाया:' क्रोधादय: 'प्रमादाश्च' मद्यादय: क्षुदिति सम्बन्धनीयमिति गाथात्रयार्थ: ॥ उपसंहर्तुमाह-

नि.[३७९] एयाइं तु खुहाइं जे खलु भिंदंति सुव्वया रिसओ ।
ते भिन्नकम्मगंठी उविंति अयरामरं ठाणं ॥

वृ. 'एतानि' रागादीनि 'खुहाइं'ति क्षुच्छब्दवाच्यानि ये खलु 'भिंदंति' विदारयन्ति, खलुशब्द एवकारार्थो भिन्दन्त्येवेति शोभनानि अनतिचारतया व्रतानि-प्राणातिपातविरत्यादीनि येषां ते सुव्रता: 'ऋषय:' मुनय:, ते किमित्याह-भिन्न: कर्मैवातिदु:खेदतया ग्रन्थि: कर्मग्रन्थियैस्ते तथाविधा: 'उपयान्ति' प्राप्नुवन्ति 'अजरामरं स्थानं' मुक्तिपदमिति गाथार्थ: ॥

उक्तो नामनिष्पन्ननिक्षेप:, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू.(४९४) मोनं चरिस्सामि समिच्च धम्मं, सहिए उज्जुकडे नियाणछिन्ने ।
संथवं जहिज्ज अकामकामे, अन्नायएसी परिव्वए स भिक्खू ॥

वृ. मुने: कर्म मौनं तच्च सम्यक्चारित्रं 'चरिस्सामो'त्ति सूत्रत्वात् चरिष्यामि-आसेवाम्यहमित्यभिप्रायेणेत्युपस्कार:, 'समेत्य' प्राप्य 'धर्मं' श्रुतचारित्रभेदं दीक्षामित्युक्तं भवति, 'सहित:' सम्यग्दर्शनादिभिरन्यसाधुभिर्वेति गम्यते, स्वस्मै हित: स्वहितो वा सदनुष्ठानकरणत:, कथंभूतम् ? ऋजु:-संयमस्तत्प्रधानं ऋजु वा-मायात्यागत: कृतम्-अनुष्ठानं यस्येति ऋजुकृत:, ईदृक इत्याह-निदानं-विषयाभिष्वङ्गात्मकं, यदिवा 'निदान बन्धने' ततश्च करणे ल्युट्, निदानं-प्राणातिपातादिकर्मबन्धकरणं छिन्नम्-अपनीतं येन स तथा, कृतान्तस्य परनिपात: प्राग्व-

त्याकृतत्वात्, छिन्ननिदानो वा अप्रमत्तसंयत इत्यर्थः, 'संस्तवं' पूर्वसंस्तुतैर्मात्रादिभिः, पश्चात्संस्तुतैश्च श्वश्वादिभिः परिचयं 'जह्यात्' त्यजेत्, 'शकि च लिङ्' इत्यनेन शक्यार्थे लिङ्, ततः संस्तवं हातुं शक्तो य इति,

एवं लिङर्थभावना सर्वत्र कार्या, तथा कामान् इच्छाकाममदनकामभेदान् कामयते-प्रार्थयते यः स कामकामो न तथा अकामकामः यद्वाऽकामो मोक्षस्तत्र सकलाभिलाषनिवृत्तेस्तं कामयते यः स तथा, अत एव अज्ञातः-तपस्वित्वादिभिर्गुणैरनवगतः एषयते-ग्रासादिकं गवेषयतीत्येवंशीलोऽज्ञातैषी 'परिव्रजेद्' अनियतविहारितया विहरेत् 'स भिक्षुरिति' यत्तदोर्नित्याभिसम्बन्धाद् य एवंविधः स भिक्षुः, अनेन सिंहवृत्तयैव विहरणं भिक्षुत्वनिबन्धनमुक्तमिति सूत्रार्थः ॥ तच्च सिंहवृत्तया विहरणं यथा स्यात्तथा विशेषत आह-

मू. (४१६) रातोवरयं चरिज्ज लाढे, विरए वेदविया ऽऽयरक्खिए।
पन्ने अभिभूय सव्वदंसी, जे कम्हिवि न मुच्छिए स भिक्खू ॥

वृ. रागः-अभिष्वङ्ग उपरतो-निवृत्तो यस्मिंतद्रागोपरतं सर्वथा भवत्येवं 'चरेत्' विहरेत्, क्तान्तस्य परनिपातः प्राग्वत्, अनेन मैथुननिवृत्तिरुक्ता, रागाविनाभावित्वान्मैथुनस्य, यद्वाऽऽवृत्तिन्यायेन 'रातोवरयं'ति रात्र्युपरतं 'चरेत्' भक्षयेदित्यनेनैव रात्रिभोजननिवृत्तिरप्युक्ता, 'लाढे'ति सदनुष्ठानतया प्रधानो विरतः-असंयमान्निवृत्तः, अनेन च संयमस्याक्षेपात्प्राणातिपातनिवृत्तिः सावद्यवचननिवृत्तिरूपत्वाद्वाक्संयमस्य मृषावादनिवृत्तिश्चाभिहिता वेदितव्या, वेद्यतेऽनेन तत्त्वमिति वेदः-सिद्धान्तस्तस्य वेदनं विन्तया आत्मा रक्षितो-दुर्गतिपतनान्त्रातोऽनेनेति वेदविदात्मरक्षितः, यद्वा वेदं वेत्तीति वेदवित्, तथा रक्षिता आयाः-सम्यग्दर्शनादिलाभा येनेति रक्षितायः, रक्षितशब्दस्य परनिपातः प्राग्वत्, 'प्राज्ञः' हेयोपादेयबुद्धिमान् 'अभिभूय' पराजित्य परीषहोपसर्गानिति गम्यते, 'सर्वं' समस्तं गम्यमानत्वात्प्राणिगणं पश्यति-आत्मवत्प्रेक्षत इत्येवंशीलः, अथवाऽभिभूय रागद्वेषौ सर्वं वस्तु समतया पश्यतीत्येवंशीलः सर्वदर्शी, यदिवा सर्वं दशति-भक्षयतीत्येवंशीलः सर्वदंशी, उक्तं हि-

"पडिग्गहं संलिहित्ता णं, लेवमायाए संजए।
दुग्गंधं वा सुगंधं वा, सव्वं भुंजे न छड्डुए ॥"

अत एव यः कस्मिंश्चित्सचित्तादिवस्तुनि न मूर्च्छितः-प्रतिबद्धः, एतेन परिग्रहे निवृत्तेरभिधानमप्रतिबद्धश्च कथमदत्तमाददीत? इत्यदत्तादाननिवृत्तेश्च, तथा च य एवं मूलगुणान्वितः स भिक्षुरित्युक्तं भवतीति सूत्रार्थः ॥ अन्यच्च-

मू. (४१७) अक्कोसवहं विदित्तु धीरे, मुनी चरे लाढे निच्चमायगुत्ते।
अव्वग्गमने असंपहिट्ठे, जो कसिणं अहिआसए स भिक्खू ॥

वृ. आक्रोशनमाक्रोशः-असभ्यालापो वधो-घातस्ताडनं वा, अनयोः समाहारद्वन्द्वे आक्रोशवधं तद्विदित्वा स्वकृतकर्मफलमेतदिति मत्वा 'धीरः' अक्षोभ्यः सम्यक् सोढेतियावत् 'मुनिः' यतिः 'चरेत्' पर्यटेद् अनियतविहारतयेति गम्यते, ततश्चानेनाक्रोशवधचर्यापरीषहसहनमुक्तं, 'लाढे'ति प्राग्वत्, 'नित्यम्' इति सदा 'आत्मा' शरीरम्, आत्मशब्दस्य शरीरवचन-

स्यापि दर्शनात्, उक्तं हि-

"धर्मधृत्यङ्गसंयोगान्नैर्ग्रन्थ्यात्तत्त्वदर्शनात् ।
शीलानिलमनोयत्नैकवीर्येष्वात्मनः स्मृतिः ॥" इति,

तेन गुप्त आत्मगुप्तो नियतस्ततः करणचरणादिविक्षेपकृत्, यद्वा गुप्तो-रक्षितोऽसंयमस्थानेभ्य आत्मा येन स तथा, अव्यग्रम् अनाकुलमसमञ्जसचिन्तोपरमतो मनः-चित्तमस्येत्यव्यग्रमनाः न संप्रहृष्टः असंप्रहृष्टः- आक्रोशादिषु न हृष्यंश्च, यथा कश्चिदाह- "कश्चित् पुमान् क्षिपति मां परिरूपवाक्यैः, श्रोमत्क्षमाभरणमेत्य मुदं व्रजामि" इत्यादि, प्रकृतोपसंहारमाह-यः 'कृत्स्नम्' उत्कृष्टादिभेदतः समस्तमाक्रोशवधम् 'अध्यास्ते' सहते समतयेति गम्यते, स भिक्षुरिति सूत्रार्थः ॥ किं च-

मू.(४९८) *पंतं सयनासनं भइत्ता, सीउण्हं विविहं च दंसमसगं ।*
अव्वग्गमने असंपहिट्ठे, जो कसिणं अहिआसए स भिक्खू ॥

वृ. 'प्रान्तम्' अवमं शयनं च-संस्तारकादि आसनं च-पीठकादि शयनासनम् उपलक्षणत्वाद्भोजनाच्छादनादि च 'भुक्त्वा' संवित्वा शीतं चोष्णं च शीतोष्णम्-उक्तरूपं, चस्य गम्यमानत्वात्तच्च सेवित्वा 'विविधं च' नानाप्रकारं दंशाश्च मशकाश्च दंशमशकं प्राग् व्याख्यातमेव प्राप्येति शेषो, मत्कुणाद्युपलक्षणं चैतत्, अव्यग्रमना असंप्रहृष्टो यः कृत्स्नमध्यास्ते स भिक्षुरिति प्राग्वत्। इह च प्रान्तं शयनासनं भुक्त्वेति अतिसात्त्विकतादर्शनार्थं, प्रान्तशयनादितायां हि सुदुःसहाः शीतादयः, अनेन शीतोष्णादंशमशकपरीषहसहनमुक्तमिति सूत्रार्थः ॥ अपरं-

मू.(४९९) *नो सक्कियमिच्छई न पूअं, नोवि य वंदणगं कुओ पसंसं ? ।*
से संजए सुव्वए तवस्सी, सहिए आयगवेसए स भिक्खू ॥

वृ. 'नो' निषेधे 'सत्कृतं' सत्कारमभ्युत्थानानुगमादिरूपम् 'इच्छति' अभिलषति, प्राकृतत्वाच्च सूत्रे दीर्घनिर्देशः, न 'पूजां' वस्त्रपात्रादिभिः सपर्यां, 'नो अपि च' इति नैव च 'वन्दनकं' द्वादशावर्तादिरूपं, कुतः 'प्रशंसां' निजगुणोत्कीर्तनरूपां ?, नैवेच्छतीत्यभिप्रायः, 'सः' एवंविधः सम्यग् यतते मदनुष्ठानं प्रतीति संयतोऽत एव च सुव्रतः, सुव्रतत्वाच्च 'तपस्वी' प्रशस्यातपाः, तथा च सहितः सम्यग्ज्ञानक्रियाभ्यां, यद्वा सत् हितेन-आत्महितेन अर्थादनुष्ठानेन वर्त्तत इति सहितः, तत एव चात्मानं-कर्मविगमाच्छुद्धस्वरूपं गवेषयति-कथमयमित्थंभूतो भवेदित्यन्वेषयते यः स आत्मगवेषकः, यद्वा आयः-सम्यग्दर्शनादिलाभः सूत्रत्वादायतो वा-मोक्षस्तं गवेषयतीत्वाय गवेषक आयतगवेषको वा यः स भिक्षुरिति सूत्रार्थः ॥

अनेन सत्कारपुरस्कारपरीषहसहनमुक्तं, सम्प्रति स्त्रीपरीषहसहनमाह-

मू.(५००) *जेन पुनो जहाइ जीवियं, मोहं वा कसिणं नियच्छई ।*
नारिं पयहे सया तवस्सी, न य कोऊहलं उवेइ स भिक्खू ॥

वृ. येन हेतुना, पुनःशब्दोऽस्य सर्वथा संयमघातित्वविशेषद्योतकः, 'जहाति' त्यजति 'जीवितं' संयमजीवितं 'मोहं वा' मोहनीयं वा कषायनोकषायापायादिरूपं 'कृत्स्नं' समस्तं कृष्णं वा शुद्धाशयविनाशकतया 'नियच्छति' बध्नाति तदेवंविधं नरश्च नारी च नरनारी 'प्रजह्यात्' प्रकर्षेण त्यजेत् यः 'सदा' सर्वकालं तपस्वी, न च 'कुतूहलम्' अभुक्तभोगितायां स्त्र्यादिविषयं

कौतुकम्, उपलक्षणत्वाद्भुक्तभोगतायाः स्मृतिं च 'उपैति' गच्छति स भिक्षुरिति सूत्रार्थः ॥ इत्थं परीषहसहनेन भिक्षुत्वसमर्थनात् सिंहविक्रान्तित्वमुक्त्वा तदेव पिण्डविशुद्धिद्वारेणाह-

मू. (५०१) छिन्नं सरं भौमं अंतलिक्खं, सुविनं लक्खणं दंड वत्थुविज्जं ।
अंगविगारं सरस्सविजयं, जो विज्जाहिं न जीवई स भिक्खू ॥

वृ. छेदनं छिन्नं वसनदशनदार्वादीनां, तद्विषयशुभाशुभनिरूपिका विद्या ऽपि छिन्नमित्युक्तम्, एवं सर्वत्र । 'देवेसु उत्तमो लाभो' इत्यादि, तथा 'सरं'ति स्वरस्वरूपाभिधानं,

"सज्जं रवइ मयूरो, कुक्कुडो रिसभं सरं ।
हंसो रत्तिं गंधारं, मज्झिमं तु गवेलए ॥"

इत्यादि, तथा- "सज्जेण लहइ वित्तिं, कयं च न विनस्सइ ।
गावो पुत्ता य मित्ता य, नारीणं होइ वल्लहो ॥"

रिसहेण उ ईसारियं, सेणावच्चं धणाणि य" इत्यादि । तथा भूमिः -पृथ्वी भूमा भवं भौमं भूकम्पादिलक्षणं, यथा-

"शब्देन महता भूमिर्यदा रसति कम्पते ।
सेनापतिवधश्चैव, राजा राष्ट्रं च पीड्यते ॥"

इत्यादि । तथा अन्तरिक्षम्- आकाशं तत्र भवम् आन्तरिक्षं-गन्धर्वनगरादिलक्षणं, यथा-

"कपिलं शस्यघाताय, माञ्जिष्ठं हरणं गवाम् ।
अव्यक्तवर्णं कुरुते, बलक्षोभं न संशयः ॥१॥
गन्धर्वनगरं स्निग्धं, सप्राकारं सतोरणम् ।
सौम्यां दिशं समाश्रित्य, राज्ञस्तद्विजयङ्करम् ॥२॥"

इत्यादि । तथा 'स्वप्नं' स्वप्नगतं शुभाशुभकथनं, यथा-

"गायने रोदनं ब्रूयान्नर्त्तने वधबन्धनम् ।
हसने शोचनं ब्रूयात्पठने कलहं तथा ॥"

इत्यादि । तथा 'लक्षणं' स्त्रीपुरुषयोर्यथा-

'चक्खुसिनेहे सुहितो दंतसिनेहे य भोयणं मिट्ठं ।
तयनेहेण य सोक्खं नहनेहे होइ परमधनं ॥"

इत्यादि, गजादीनां च यथायथं वास्तुकाप्यादिविहितम् । तथा 'दंड'त्ति 'दण्डः' यष्टित्सरुस्वरूपकथनम्, "एसपव्वं पसंसंति, दुपव्वा कलहकारिय"त्ति, इत्यादि । तथा 'वास्तुविद्या" प्रासादादिलक्षणाभिधायिशास्त्रात्मिका

"कुटिला भूमिजाश्चैव, वैनीका इन्द्रजास्तथा ।
लतिनो नागराश्चैव, प्रासादाः क्षितिमण्डनाः ॥१॥
सूक्ताः पदविभागेन, कर्ममार्गेण सुन्दराः ।
फलावाप्तिकरा लोके, भङ्गभेदयुता विभोः ॥२॥
अण्डकैस्तु विविक्तास्ते, निर्गमैश्चारुरूपकैः ।
चित्रपत्रैर्विचित्रैश्च, विविधाऽऽकाररूपकैः ॥३॥

इत्यादि। तथा 'अङ्गविकारः' शिरः-स्फुरणादिस्तच्छुभाशुभसूचकं शास्त्रमप्यङ्गविकारो यथा 'दक्षिणाक्षिस्पन्दने प्रियं भविष्यती'त्यादि। तथा स्वरः-पोदकोशिवादिरुतरूपस्तस्य विषयः-तत्सम्बन्धी शुभाशुभनिरूपणाभ्यासः, यथा-

"गतिस्तारा स्वरो वामः, पोदक्या: शुभदः स्मृतः।
विपरीतः प्रवेशे तु, स एवाभीष्टदायकः॥

तथा "दुर्गास्वरत्रयं स्याज्ज्ञातव्यं शाकुनेन नैपुण्यात्।
चिलिचिलिशब्दः सफलः सुसु मध्यश्चलचलो विफलः॥"

इत्यादि। ततो य एतैर्विद्याभिर्न जीवति नैता एव जीविकाः शुभाशुभः प्रकल्प्य प्राणान् धारयति स भिक्षुरिति सूत्रार्थः॥ अनेन निमित्तलक्षणोत्पादनादोषपरिहार उक्तः,

सम्प्रति मन्त्रादिरूपतदोषपरिहारायाह-

मू. (५०२) *मंतं मूलं विविहं विज्जचिंतं, वमनविरेयनधूमनित्तसिणाणं।*
आउरे सरणं तिगिच्छियं च, तं परिन्नाय परिव्वए स भिक्खू॥

वृ. 'मन्त्रम्' ॐकारादिस्वाहापर्यन्तो ह्रींकारादिवर्णविन्यासात्मकस्तं, 'मूलं' सहदेवी-मूलिकाकल्पादि तत्तच्छास्त्रविहितं मूलकर्म वा 'विविधं' नानाप्रकारं 'वैद्यचिन्त' वैद्यसम्बन्धिनीं नानाविधौषधपथ्यादिव्यापारात्मिकां, विविधामित्यत्रापि डमरुकमणिन्यायेन योज्यते, वमनम्-उद्गिरणं विरेचनं-कोष्ठशुद्धिरूपं धूमं-मनःशिलादिसम्बन्धि नेत्तंति-नेत्रशब्देन नेत्रसंस्कारमिह समीराञ्जनादि परिगृह्यते, स्नानम्-अपत्यार्थं मन्त्रौषधिसंस्कृतजलाभिषेकं, वमनादीनां च स्नानावसानानामिह कृतसमाहाराणां निर्देशः, 'आउरे सरणं'ति, सुब्व्यत्ययाद् 'आतुरस्य' रोगादिपीडितस्य 'शरणं' स्मरणं हा तात! हा मातः! इत्यादिरूपं 'चिकित्सितं च' आत्मनो रोगप्रतीकाररूपं 'तद्' इति यदनन्तरमुक्तं 'परिज्ञाय'ति ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया च प्रत्याख्याय 'परिव्रजेत्' सर्वप्रकारं संयमाध्वनि यायाद्यः स भिक्षुरिति सूत्रार्थः॥ अपरं च-

मू. (५०३) *खत्तियगणउग्गरायपुत्ता, माहणभोइं य विविहा य सिप्पिणो।*
नो तेसिं वयइ सिलोगपूअं, तं परिन्नाय परिव्वए स भिक्खू॥

वृ. क्षत्रियाः-हैहेयाद्यन्वयजा गणाः-मल्लादिसमूहाः उग्राः-आरक्षकादयः राजपुत्राः-नृपसुताः, एषां द्वन्द्वः, 'माहनभोगिकाः' तत्र माहना ब्राह्मणास्तथा भोगेन-विशिष्टनेपथ्यादिना चरन्ति भोगिकाः-नृपतिमान्याः प्रधानपुरुषाः, 'विविधाश्च' नानाप्रकाराः 'शिल्पिनः' स्थपतिप्रभृतयः, पठन्ति च 'सिप्पिनोऽन्ने' तत्र चान्ये इति शिल्पिविशेषणमुभयत्र च य इति शेषः, 'नो' नैव 'तेषां' क्षत्रियादीनां 'वदति' प्रतिपादयति, के?-'श्लोकपूजे' श्लोकं-श्लाघां यथैते शोभना इति, पूजां च-यथैतान् पूजयतेति, उभयत्र पापानुमत्यादिमहादोषसम्भवात्, किंतु 'तदि'ति श्लोकपूजादिकं द्विविधयाऽपि परिज्ञया परिज्ञाय परिव्रजेद्यः स भिक्षुरिति सूत्रार्थः॥ अनेन वनीपकत्वस्य परिहार उक्तः, साम्प्रतं संस्तवपरिहारमाह-

मू. (५०४) *गिहिणो जे पव्वइएण दिट्ठा, अप्पव्वइएण व संथुया हविज्जा।*
तेसिं इहलोयफलट्ठयाए, जो संथवं न करेइ स भिक्खू॥

वृ. 'गृहिणः' गृहस्था ये 'प्रव्रजितेन' गृहीतदीक्षेण दृष्टा उपलक्षणत्वात्परिचिताश्च 'अप्रव्रजितेन वा' गृहस्थावस्थेन सह 'संस्तुताः' परिचिता भवेयुर्गृहिणो य इति सम्बन्धः 'तेसि'ति 'तैः' उभयावस्थयोः परिचितैर्गृहिभिः 'इहलौकिकफलार्थं वस्त्रपात्रादिलाभनिमित्तं यः 'संस्तवं' परिचयं न करोति स भिक्षुरिति सूत्रार्थः ॥ तथा-

मू. (५०५) सेज्जासनभत्तपाणं, खाइमं साइमं परेसिं।
अदए पडिसेहिए नियंठे, जे तत्थ न पओसई स भिक्खू ॥

वृ. 'शयनासनपानभोजन'मिति शयनादीनि प्रतीतानि 'विविधम्' अनेकप्रकारं 'खादिम-स्वादिम'मिति खादिमंपिण्डखर्जूरादि स्वादिमम्-एलालवङ्गादि, उभयत्र समाहारः 'परेसि'ति 'परेभ्यः' गृहस्थादिभ्यः 'अदइ'त्ति अददद्भ्यः 'प्रतिषिद्धः' क्वचित् कारणान्तरे याचमानो निराकृतः सः 'निर्ग्रन्थः' मुक्तद्रव्यभावदग्रन्थो वः 'तत्र' इत्यदाने 'न प्रदुष्यति' न प्रद्वेषं याति पुनर्दास्यतीत्यभिधायकक्षपकर्षिवत्स भिक्षुरिति सूत्रार्थः ॥ अनेन क्रोधपिण्डपरिहार उक्तः, उपलक्षणं चैतदशेषभिक्षादोषपरिहारस्य, इदानीं ग्रासैषणादोषपरिहारमाह-

मू. (५०६) जं किंचाहारपानगं विविहं, खाइमसाइमं परेसिं लद्धुं।
जो तं तिविहेण नानुकंपे, मनवयकायसुसंवुडे जे स भिक्खू ॥

वृ. 'यत् किञ्चित्' अल्पमपि 'आहारपानम्' अशनपानीयं विविधं 'खाइमसाइमं'ति चस्य गम्यमानत्वात् स्वादिमस्वादिमं च उक्तरूपं 'परेसि'ति 'परेभ्यः' गृहस्थेभ्यः 'लद्धुं'ति 'लब्ध्वा' प्राप्य यः 'तं'ति सुब्व्यत्ययातेनाहारादिना 'त्रिविधेन' मनोवाक्कायलक्षणेन प्रकारत्रयेण नानु-कम्पते, कोऽर्थः ।-ग्लानबालादीन्नोपकुरुते न स भिक्षुरिति वाक्यशेषः, यस्तु मनोवाक्कायैः सुष्ठु संवृतो निरुद्धतथाविधाहारद्यभिलाषः सुसंवृता वा मनोवाक्काया यस्येति सुसंवृतमनो-वाक्कायः, तत एव ग्लानादीननुकम्पत इति गम्यते, स भिक्षुः, यदिवा 'नानुकम्पते' इत्यत्र 'ना' पुरुषोऽनुकम्पते (नानुरूपो न कम्पते) मनोवाक्कायसुसंवृतः सन् स भिक्षुरिति सूत्रार्थः ॥

अनेनार्थतो गृद्ध्यभावाभिधानादङ्गारदोषपरीहार उक्तः, सम्प्रति धूमपरिहारमाह-

मू. (५०७) आयामगं चेव जवोदनं च, सीयं सोवीरजवोदगं च।
नो हीलए पिंडं नीरसं तु, पंतकुलाणि परिव्वए स भिक्खू ॥

वृ. आयाममेव आयामकम्-अवश्रावणं चशब्द उक्तापेक्षया समुच्चये स्वगतानेकभेद-ख्यापको वा, 'एव' इति प्राग्वत्, 'यवोदनं च' यवभक्तं 'सीयं'ति शीतं-शीतलमन्तप्रान्तोप-लक्षणं चैतत्, सोवीरं-आचाम्लं यवोदकं च-यवप्रक्षालनं पानीयं सोवीरयवोदकं, तच्च 'नो हीलयेत्' धिगिदं किमनेनानभोज्येनेति न निन्देत्, पिण्ड्यते-सङ्घात्यते, कोऽर्थः ? गृहिभ्यः उपलभ्य संमील्यत इति पिण्डस्तमायामकाद्येन 'नीरसं' विगतास्वादं 'तु' अप्यर्थस्ततो नीरसमपि, अत एव 'प्रान्तकुलानि' तुच्छाशयगृहाणि दरिद्रकुलानि वा यः परिव्रजेत्स भिक्षुरिति सूत्रार्थः ॥ अन्यच्च-

मू. (५०८) सद्दा विविहा भवंति लोए, दिव्वा मानुसया तहा तिरिच्छा।
भीमा भयभेरवा उराला, जो सुच्चा न विहिज्जई स भिक्खू ॥

वृ. 'शब्दाः' ध्वनयः 'विविधाः' विमर्शप्रद्वेषादिना विधीयमानतया नानाप्रकाराः 'भवन्ति'

जायन्त 'लोके' जगति 'दिव्या:' देवसम्बन्धिन: 'मानुष्यका:' मनुष्यसम्बन्धिनस्तथा 'तैरश्चा:' तिर्यक्सम्बन्धिन: 'भीमा:' रौद्रा: भयेन भैरवा:-अत्यन्तसाध्वसोत्पादका भयभैरवा: 'उदारा:' महान्तो य: 'श्रुत्वा' आकर्ण्य प्रक्रमादुक्तविशेषणविशिष्टानेव शब्दान् 'न व्यथते' न बिभेति धर्मध्यानतो न चलति वा स भिक्षुरिति सूत्रार्थ: ॥ अनेनोपसर्गसहिष्णुत्वं सिंहविहारितायां निमित्तमुक्तं, सम्प्रति समस्तधर्माचारमूलं सम्यक्त्वस्थैर्यमाह-

मू. (५०९) वायं विविहं समिच्च लोए, सहिए खेयानुगए अ कोवियप्पा।
पन्ने अभिभूय सव्वदंसी, उवसंते अविहेडए स भिक्खू ॥

वृ. 'वादं' च स्वस्वदर्शनाभिप्रायवचनविज्ञानात्मकं 'विविधम्' अनेकप्रकारं, धर्मविषयेऽपि ह्यनेकधा विवदन्ते, यथोक्तं-

"सेतुकरणेऽपि धर्मो भवत्यसेतुकरणेऽपि किल धर्म:।
गृहवासेऽपि च धर्मो वनेऽपि वसतां भवति धर्म:॥"

मुण्डस्य भवति धर्मस्तथा जटाभि: सवाससां धर्म:" इत्यादिरूपं 'समेत्य' ज्ञात्वा लोके सहित: स्वहितो वा पारवत् खेदयत्यनेन कर्मेति खेद:-संयमस्तेनानुगतो युक्त: खेदानुगत: 'च:' पूरणे कोविद:-लब्धशास्त्रार्थरहस्यो आत्मज्ञ इति कोविदप्रज्ञ: 'पन्ने अभिभूय सव्वदंसी उवसंते'त्ति प्राग्वत्, 'अविहेठक:' न कस्यचिद्विबाधको य: स भिक्षुरिति सूत्रार्थ: ॥ तथा-

मू. (५१०) असिप्पजीवि अगिहे अमित्ते, जिइंदिओ सव्वओ विप्पमुक्के।
अणुक्कसाई लहु अप्पभक्खी, चिच्चा गिहं एगचरे स भिक्खू ॥

वृ. शिल्पेन-चित्रपत्रच्छेदादिविज्ञानेन जीवितुं शीलमस्येति शिल्पजीवी न तथाऽशिल्पजीवी 'अगृह:' गृहविरहित: तथा अविद्यमानानि मित्राणो-अभिष्वङ्गहेतवो वयस्या यस्यासावमित्र:, जितानि-वशीकृतानि 'इन्द्रियाणि' श्रोत्रादीनि येन स तथा, 'सर्वत:' बाह्याद्भ्यन्तराच्च ग्रन्थादिति गम्यते, विविधै: प्रकारै: प्रकर्षेण मुक्तो विप्रमुक्त:, तथा अनव:-स्वल्पा: सञ्ज्वलनानामान इतियावत् कषाया:-क्रोधादयो यस्येति सर्वधनादित्यादिनि प्रत्ययेऽणुकषायी, प्राकृतत्वात्सूत्रे ककारस्य द्वित्वं, यद्वा उत्कषायी-प्रबलकषायी न तथाऽनुत्कषायी अल्पानि-स्तोकानि लघूनि-नि: निष्पावादीनि भक्षयितुं शीलमस्येति अल्पलघुभक्षी, सूत्रे तिङ्व्यत्यय: प्राग्वत्, 'त्यक्त्वा' अपहा भेदभिन्नम्, एको-रागद्वेषरहित: तथाविधयोग्यतावासावसहायो वा चरति-विहरत्येकचरो अनेनैककविहार उपलक्षित इति सूत्रार्थ: ॥

'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववदेव,

अध्ययनं - १५ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
पञ्चदशमध्ययनं सनिर्युक्ति: सटीकं समाप्तम्

अध्ययनं - १६ - ब्रह्मचर्यसमाधि:

वृ. उक्तं पञ्चदशमध्ययनम्, अधुना षोडशमारभ्यते, अस्य चायमभिसम्बन्ध:-इहानन्तराध्ययने भिक्षुगुणा उक्ता:, ते च तत्त्वतो ब्रह्मचर्यव्यवस्थितस्य भवन्ति, तदपि च ब्रह्मगुप्तिपरिज्ञानत

इति वा इहाभिधीयन्ते इत्यनेन सम्बन्धनायातस्यास्याध्ययनस्य चतुरनुयोगद्वारव्याख्यायां प्राग्वद्यावन्नामनिष्पन्ननिक्षेपे दशब्रह्मचर्यसमाधिस्थानमिति नाम, ततो दशादिपदानां पञ्चानां निक्षेपः कर्तव्यः, तत्र च नैककाद्यभावे दशसम्भव इत्येककनिक्षेपमाह निर्युक्तिकृत्-

नि. [३७९] नामंठवणादविएमाउयपयसंगहेक्कए चेव ।
पज्जव भावे अ तहा सनेए इक्कगा हुंति ॥

वृ. एतदर्थस्तु चतुरङ्गीयाध्ययन एव कथित इति न प्रतन्यते ॥ एतदनुसारतश्च द्रव्यादिनिक्षेपः सुकर एवेति तमुपेक्ष्यैव दशनिक्षेपमाह

नि. [३८०] दससु अ छक्को दसे नामव्वो दसगएमिओ खंधो ।
ओगाहणाठिईए नायव्वो पज्जवदुगे अ ।

वृ. दशसु च निक्षेप्तव्येषु षट्को निक्षेप इति गम्यते, स च नामस्थापनाद्रव्यक्षेत्रकालभावभेदात्, तत्र नामस्थापने क्षुण्ने, 'दव्वे'त्ति द्रव्यविषयेषु दशसु विचार्यमाणेषु 'ज्ञातव्यः' अवगन्तव्यः दश प्रदेशाः परिमानमस्येति दशप्रदेशिकः स्कन्धो दशोच्यते, दशपरमाणुद्रव्यनिष्पन्नत्वात्, तथा 'ओगाहणाट्ठिईए'त्ति स्कन्ध एवावगाहनायां चिन्त्यमानः प्रक्रमाद्दशप्रदेशावगाढः क्षेत्रदशोच्यते, 'स्थितौ च दशसमयस्थितिकः स एव कालदशोच्यते, उपलक्षणं चैतत्सर्वं, यत आह चूर्णिकृत्-"द्रव्यदश दश सचित्तादीनि द्रव्याणि, क्षेत्रदश दशाकाशप्रदेशाः, कालदश दश समया इति ज्ञातव्याः" 'पज्जव'त्ति पर्याया दशसङ्ख्यत्वेन विवक्षिता भावदशे (क्षये) (क्वये) पर्याया इत्याह-'दुगे च' जीवाजीवरूपे 'चः' पूरणे, तत्र जीवपर्याया विवक्षया कषायादयः, अजीवपर्यायाश्च पुद्गलसम्बन्धिनो वर्णादय इति । इदानीं ब्रह्मनिक्षेपमाह-

नि. [३८१] बंभंमि उ चउक्के ठवणाबंभंमि बंभणुप्पत्ती ।
दव्वंमि बत्थिनिग्गहु अन्नाणीणं मुणेयव्वो ॥

नि. [३८२] भावे उ बत्थिनिग्गहु नायव्वो तस्स रक्खणट्ठाए ।
ठाणाणि तानि वज्जिज्ज जाणि भणियाणि अज्झयणे ॥

वृ. 'बंभंमि उ'त्ति ब्रह्मणि पुनर्विचार्ये 'चउक्के'ति चतुष्को नामस्थापनाद्रव्यभावभेदान्निक्षेप इति गम्यते, तत्र नामब्रह्म यस्य ब्रह्मेति नाम, स्थापनाब्रह्मणि ब्राह्मणोत्पत्तिर्वक्तव्या, यथाऽऽचारनाम्नि प्रथमाङ्गे-

"एका मणूसजाई रज्जुप्पत्तीय दो कया उसभे ।
तिन्नि य सिप्पवणिए सावगधम्मंमि चत्तारि ॥"

इत्यादिना निर्युक्तिकृताऽभिहिता, 'द्रव्ये बस्तिनिग्रहः' उपस्थनिरोधमात्रम् 'अज्ञानिनां' मिथ्यादृशां दशब्रह्मचर्यसमाधिस्थानावगमशून्यानां 'मुणितव्यः' प्रतिज्ञातव्यो ब्रह्मेति प्रक्रमः, 'भावे उ'त्ति भावे पुनर्विचार्ये बस्तिनिग्रहो 'ज्ञातव्यः' अवगन्तव्यः, कस्य सम्बन्धीत्याह 'तस्य' इति ब्रह्मणो 'रक्षणार्थाय' रक्षणप्रयोजनाय 'स्थानानि' विविक्तशयनासनसेवनादीनि तानि 'वर्जयेत्' परिहरेद्यस्तस्येति प्रक्रमः, स च ज्ञान्येव, तानि कानीत्याह यानि 'भणितानि' उक्तानि 'अध्ययने' इहैव प्रक्रान्त इति गाथाद्वयार्थः ॥ चरणनिक्षेपमाह-

नि. [३८३] चरणे छक्को दव्वे गईचरणं चेव भक्खणेचरणं ।

खित्ते काले जंमि उ भावे उ गुणाण आयरणं ॥

वृ. चरणविषयः 'षट्कः' षट्परिणाम उक्तरूपो निक्षेपः, तत्र नामस्थापने गतार्थे, द्रव्ये गतिरूपं चरणं गतिचरणं ग्रामादिगमनात्मकमित्यर्थः, 'चः' समुच्चये भिन्नक्रमश्च 'एवे'ति पूरणे, 'भक्खणेचरणं'ति एकारोऽलाक्षणिकस्ततो भक्षणचरणं, चरणशब्दस्योभयार्थत्वात्, पठ्यते हि 'चर गतिभक्षणयोः' इति, तथा 'खेत्ते काले जंमि'त्ति यस्मिन् क्षेत्रे काले वा चरणं चर्यते व्याक्रियते वा तत्क्षेत्रचरणं कालचरणं चेति प्रक्रमः, भावे तु 'गुणानां' मूलोत्तरगुणरूपाणाम् 'आचरणम्' आसेवनमिति गाथार्थः ॥ समाधिनिक्षेपमाह-

नि.[३८४] समाहीउ चउक्कं दव्वं दव्वेण जेण उ समाही ।
भावंमि नाणदंसणतवं चरित्ते अ नायव्वं ॥

वृ. समाधौ 'चउक्कं'ति पायच्चतुष्कं नामादिनिक्षेपः, तत्र नामस्थापने प्रसिद्धे, 'द्रव्य'मिति द्रव्यमसाधिः 'द्रव्येण' माधुर्यादिगुणान्वितेन 'येन' हेतुना 'तुः' पूरणे 'समाधिः' स्वास्थ्यमुपजायते तदेव समाधिहेतुत्वात्समाधिरिति। 'भावंमि नानदंसणतवं चरित्ते अ'त्ति सूत्रत्वाद्भावे ज्ञानदर्शनतपांसि चरित्रं च स्वस्वरूपाविरोधेनावस्थानात्समाधिर्ज्ञातव्यः, यद्वा ज्ञानं च दर्शनं तपश्चेति समाहारः ततो ज्ञानदर्शनतपांसि चरित्रं च, प्रक्रमाद्यः समाधिः - अमीषामेव परस्परमविरोधेनावस्थानं स भावसमाधिरिति ज्ञातव्यमिति गाथार्थः ॥ स्थाननिक्षेपमाह-

नि.[३८५] नामंठवणादविए खित्तद्धा उड्ढउवरई वसही ।
संजमपग्गह जोहे अचलगणणसंधणा भावे ॥

वृ. सर्वत्र स्थानमिति योजनीयं, नामस्थानमित्यादि, तत्र नामस्थानं प्रतीतं, स्थापनास्थानं तु यो यद्गुणोपेतो यस्मिन्नाचार्यादिपदे स्थाप्यते स एव तिष्ठत्यस्मिन स्थान इति स्थापनास्थानमुच्यते, 'द्रव्यस्थानम्' आकाशम्, अत्र हि जीवादिद्रव्याणि तिष्ठन्तीति, क्षेत्रस्थानमप्याकाशमेव, यतः क्षेत्रमाकाशं तच्चाकाश एव तिष्ठति, उक्तं हि-'आकाशं तु स्वप्रतिष्ठित'मिति, अद्धास्थानमर्द्धतृतीयद्वीपसमुद्ररूपं समयक्षेत्रं, तत्रैव समयावलिकाद्युपलक्षितस्याद्धाकालस्य स्थितेः, 'ऊर्द्धस्थानं' यत्रोर्द्धं स्थीयते, तच्च कायोत्सर्गः, 'उपरतिस्थानं' यत्र सर्वसावद्यविरतिरवाप्यते, 'वसतिस्थानं' यत्र स्त्रीपण्डकादिदोषविकले यतिनिवासः, संयमस्थानं-शुभशुभतराध्यवसायविशेषा येषु संयमस्यावस्थितिः, प्रग्रहस्थानं यद्यस्यायुधस्य ग्रहणस्थानं, योधस्थानम्-आलीढप्रत्यालीढादि, अचलस्थानं यस्मिन्न मनागपि चलनसम्भवः, तच्च मुख्यतो मुक्तिरेव, गणनास्थानं यत्रैककादौ शीर्षप्रहेलिकावसाने गणनाऽवतिष्ठते, 'संधण'त्ति सन्धानस्थानं यत्र देशे त्रुटितमुक्तावल्यादेरेकत्वं विधीयते, 'भावस्थानम्' औदयिकादिभावानां यथास्वमवस्थानविषय इति गाथार्थः ॥ गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

***मू.* (५११) *सुअं मे आउसं ! तेणं भगवया एवमक्खायं-इह खलु थेरेहिं भगवंतेहिं दसबंभचेरसमाहिट्ठाणा पन्नत्ता, जे भिक्खू सुच्चा निसम्म संजमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जा ॥**

वृ. श्रुतं मयाऽऽयुष्मंस्तेन भगवतैवम् 'आख्यातं' कथितं, कथमित्याह- सोपस्कार

त्वात्सूत्रस्य यथेति गम्यते, ततो यथेह क्षेत्रे प्रवचने वा 'खलु' निश्चयेन स्थविरैः-गणधरैः 'भगवद्भिः' परमैश्वर्यादियुक्तैर्दशब्रह्मचर्यसमाधिस्थानानि 'प्रज्ञप्तानि' प्ररूपितानि, कोऽभिप्रायः ?- नैषामियं स्वमनीषिका, किन्तु भगवताऽर्थतोऽभिहितमेतत् ततो यूयं मा अन्यथा कृथाः, तान्येव विशिनष्टि- 'यं' इति यानि ब्रह्मचर्यसमाधिस्थानानि भिक्षुः 'श्रुत्वा' आकर्ण्य शब्दतः 'निशम्य' अवधार्यार्थतः 'संजमबहुले'त्ति संयमम्-आश्रवविरमणादिकं बहु इति-बहुमङ्गल्यं यथा भवत्येवंलक्षणं-गृह्णाति,

कोऽभिप्रायः ?-विशुद्धविशुद्धतरं पुनः पुनः संयमं करोतीति संयमबहुलः, मयूरव्यंसकादित्वात्समासः, यदिवा बहुलः-प्रभूतः संयमोऽस्येति बहुलसंयमः, सूत्रे पूर्वापरनिपातस्यानन्तर्यात्, अत एव संवरः-आश्रवद्वारनिरोधः लब्धबहुलो बहुलसंवरो वा, तत एव समाधिः-चित्तस्वास्थ्यं तद्बहुलो बहुलसमाधिर्वा, 'गुप्तः' मनोवाक्कायगुप्तिभिः, गुप्तत्वादेव च गुप्तानि विषयप्रवृत्तितो रक्षितानि इन्द्रियाणि-श्रोत्रादीनी येन स तथा, तत एव गुप्तं नवगुप्तिसंवलनात् 'ब्रह्मे'ति ब्रह्मचर्यं चरितुम्-आसेवितुं शीलमस्येति गुप्तब्रह्मचारी 'सदा' सर्वकालम् 'अप्रमत्तः' प्रमादविरहितः 'विहरेत्' अप्रतिबद्धविहारितया चरेत् ॥ एतेन संयमबहुलत्वादि दशब्रह्मचर्यसमाधिस्थानफलमुक्तम्, एतदविनाभावित्यानस्येति सूत्रार्थः ॥

सू. (५१२) कयरे खलु थेरेहिं भगवंतेहिं दसबंभचेरसमाहिठाणा पन्नत्ता ?, इमे खलु ते जाव विहरिज्जा, तंजहा-विवित्ताइं सयणासणाइं सेविज्जा से निग्गंथे, नो इत्थीपसुपंडगसंसत्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाह-

निग्गंथस्स खलु इत्थिपसुपंडगसंसत्ताइं, सयणासणाइं सेवमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउनिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ धम्माओ वा भंसिज्जा, तम्हा नो इत्थिपसुपंडगसंसत्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे ॥

वृ. कतराणीत्यादिप्रश्नसूत्रम् इमानीत्यादि निर्वचनसूत्रं च प्राग्वत्, तान्येवाह-'तं जहे'त्यादि, 'तद्यथे' त्युपन्यासे 'विविक्तानि' स्त्रीपशुपण्डकाकीर्णत्वाद्विरहितानि, शय्यते येषु तानि शयनानि च-फलकसंस्तारकादीनि, आस्यते येषु तानि आसनानि च-पादपीठापुञ्छनादीनि शयनासनानि, उपलक्षणत्वात्स्थानानि च 'सेवेत' भजेत यः सः 'निर्ग्रन्थः' द्रव्यभावग्रन्थान्निष्क्रान्तो भवतीति शेषः । इत्थमन्वयेनाभिधायाव्युत्पन्नविनेयानुग्रहार्थमुभेवार्थं व्यतिरेकेणाह-

'नो' नैव स्त्रियश्चादित्या मानुष्यो वा पशवश्च-अजैडकादयः पण्डकाश्च-नपुंसकानि स्त्रीपशुपण्डकास्तैः संसक्तानि-आकीर्णानि स्त्रीपशुपण्डकसंसक्तानि 'शयनासनानि' उक्तरूपाणि 'सेविता' उपभोक्ता भवति, 'तदि'त्यनन्तरोक्तं 'कथं' केनोपपत्तिप्रकारेण ?, 'इति चेद्' एवं यदि मन्यसे, अत्रोच्यते-निर्ग्रन्थस्य खलं निश्चितं स्त्रीपशुपण्डकसंसक्तानि शयनासनानि 'सेवमानस्य' अपभुञ्जानस्य 'बंभयारिस्स'त्ति अपिशब्दस्य गम्यमानत्वाद् ब्रह्मचारिणोऽपि सतो ब्रह्मचर्ये 'शङ्का वा' किमेताः सेवे उत नेत्येवंरूपा, यदिवा इहान्येषामिति गम्यते, ततः शङ्का वाऽन्येषांयथा किमसावेवंविधशयनासनसेवी ब्रह्मचार्युत नेति, 'काङ्क्षा' वा स्याद्यभिलाषरूपा 'विचिकित्सा' वा धर्मं प्रति चित्तविप्लुतिः 'समुत्पद्यते' जायते, अथवा शङ्का

स्त्र्यादिभिरत्यन्तोपहृतचित्ततया विस्मृतसकलसोपदेशस्य-

"सत्यं ब्रवीमि हितं ब्रवीमि, सारं ब्रवीमि पुनः पुनः ।
अस्मिन्नसारे संसारे, सारं सारङ्गलोचनाः ॥"

इत्यादिकुविकल्पान् विकल्पयतो मिथ्यात्वोदयतः कदाचिदेतत्परिहार एव न तीर्थकृद्भि-रुक्तो भविष्यति, एतदासेवने वा यो दोष उक्तः स दोष एव न भवीत्येवंरूपः संशय उत्पद्यते, काङ्क्षा वा तत एव हेतोः

"प्रियादर्शनमेवास्तु, किमन्यैर्दर्शनान्तरैः ? ।
प्राप्यते येन निर्वाणं, सरागेणापि चेतसा ॥"

इत्याद्यभिधायकान्यान्यनीलपटादिदर्शनाग्रहरूपा, विचिकित्सा वा धर्म प्रतिकिमेतावतः कष्टानुष्ठानस्य फलं भविष्यति न वा ? तद्वरमेतदासेवनमेवास्मिन्वस्त्वेवंरूपा, 'भेदं' वा विनाशं चारित्रस्येति गम्यते, 'लभेत, प्राप्नुयात्, 'उन्मादं वा' कामग्रहात्मकं प्राप्नुयात् स्त्रीविषया-भिलाषातिरेकतस्तथाविधचित्तविप्लवसंभवात् 'दीर्घकालिकं वा' प्रभूतकालभावि रोगश्च-दाहज्वरादिगतङ्कश्च- आशुघाती शूलादि रोगातङ्कः 'भवेत्' स्यात्, संभवति हि स्त्र्याद्यभिलाषा-तिरेकतोऽरोचकत्वं ततश्च ज्वरादीनि, केवलप्रज्ञसात्, 'धर्मात्' श्रुतचारित्ररूपात् समस्ताद् 'भ्रश्येत्' अधः प्रतिपतेत्, कस्यचिदतिक्लिष्टकर्मोदयात्सर्वथा धर्मपरित्यागसम्भवात्, यत एवं तस्मादित्यादिनिगमनवाक्यं प्रकटार्थमेवेति सूत्रार्थः ॥ उक्तं प्रथमं समाधिस्थानं द्वितीयमाह -

मू. (५१३) नो इत्थीणं कहं कहित्ता हवइ से निग्गंथे, तं कहमिति चेदायरियाऽऽह-निग्गंथस्स खलु इत्थीणं कहं कहेमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउणिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा नो इत्थीणं कहं कहिज्जा ॥

वृ. नो स्त्रीणामेकाकिनीनामिति गम्यते, 'कथा' वाक्यप्रबन्धरूपा, यदिवा स्त्रीणां कथा,-'कर्णाटी सुरतोपचारचतुरा लाटी विदग्धप्रिया' इत्यादिका, अथवा जातिकुलरूपनेपथ्य-भेदाच्चतुर्धा स्त्रीकथा, तत्र जातिर्ब्राह्मण्यादिः कुलम्-उग्रादि रूपं-महाराष्ट्रिकादि संस्थानं-तत्तद्देशप्रसिद्धं, तां कथयिता भवति 'से निग्गंथे'त्ति य एवंविधः स निर्ग्रन्थः ।

शेषं प्रश्नप्रतिवचनाभिधायि पूर्ववदिति सूत्रार्थः ॥ तृतीयमाह-

मू. (५१४) नो इत्थीहिं सद्धिं संनिसिज्जागए विहरित्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाह-निग्गंथस्स खलु इत्थीणं सद्धिं संनिसिज्जागयस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउणिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा नो निग्गंथे इत्थीहिं सद्धिं संनिसिज्जागए विहरइ ॥

वृ. नो स्त्रीभिः 'सार्द्धं' सह सम्यग् निषीदन्ति- उपविशन्त्यस्यामिति संनिषद्या- पीठाद्यासनं तस्यां गतः -स्थितः संनिषद्यागतः सन् 'विहर्त्ता' अवस्थाता भवति, कोऽर्थः ? -स्त्रीभिः सहैकासने नोपविशेत्, टंकस्थितास्वपि हि तासु मुहूर्त्तं तत्र नोपवेष्टव्यमिति सम्प्रदायः, य एवंविधः स निर्ग्रन्थः, न त्वन्य इत्यभिप्रायः, शेषं प्रश्नप्रतिवचनाभिधायि पूर्ववदिति सूत्रार्थः ॥ चतुर्थमाह-

मू. (५१५) नो इत्थीणं इंदियाइं मनोहराइं मनोरमाइं आलोइत्ता निज्झाइत्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाऽऽह-निग्गंथस्स खलु इत्थीणं इंदियाइं मनोहराइं मनोरमाइं जाव निज्झाएमाणस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु निग्गंथे नो इत्थीणं इंदियाइं निज्झाइ ॥

वृ. नो स्त्रीणां 'इन्द्रियाणि' नयननासिकादीनि मनः-चित्तं हरन्ति दृष्टमात्राण्यप्याक्षिपन्तीति मनोहराणि, तथा मनो रमयन्तीति दर्शनानन्तरमनुचिन्त्यमानान्यह्लादयन्तीति मनोरमाणि 'आलोकिता' समन्ताद्दृष्ट 'निर्ध्याता' दर्शनानन्तरमतिशयेन चिन्तयिता, यथा अहो! सलवणत्वं लोचनयोः, ऋजुत्वं नासावंशस्येत्यादि, यद्वा 'आङीषदर्थे' तत 'आलोकिता' ईषद्दृष्टा 'निर्ध्याता' प्रबन्धेन निरीक्षिता भवति यः स निर्ग्रन्थः, अन्यत्प्रतीतमेवेति सूत्रार्थः ॥ पञ्चममाह-

मू. (५१६) नो निग्गंथे इत्थीणं कुड्डंतरंसि वा दूसंतरंसि वा भित्तिअंतरंसि वा कूइयसद्दं वा रुइयसद्दं वा गीयसद्दं वा हसियसद्दं वा थणियसद्दं वा कंदियसद्दं वा विलवियसद्दं वा सुणित्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाह इत्थीणं कुड्डंतरंसि वा दूसंतरंसि वा भित्तिअंतरंसि वा जाव विलवियसद्दं वा सुणमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु निग्गंथे नो इत्थीणं कुड्डंतरंसि वा जाव सुणेमाने विहरिज्जा ॥

वृ. नो स्त्रीणां कुड्यं-खटिकादिरचितं तेनान्तरं-व्यवधानं कुड्यान्तरं तस्मिन् वा, दूष्यं-वस्त्रं तदन्तरे वा, यवनिकान्तर, इत्यर्थः, भित्तिः-पक्वेष्टकादिरचिता तदन्तरे, वाशब्दः सर्वत्र विकल्पाभिधायी, स्थित्वेति शेषः, 'कूजितशब्दं वा' विविधविहगभाषयाऽव्यक्तशब्दं सुरत-समयभाविनं 'रुदितशब्दं वा' रतिकलहादिकं मानिनीकृतं 'गीतशब्दं वा' षड्जमादिहुंकृतिरूपं 'हसितशब्दं वा' कहकहादिकं 'स्तनितशब्दं वा' रतिसमयकृतं 'क्रन्दितशब्दं वा' प्रोषितभर्तृकादिकृताक्रन्दरूपं 'विलपितशब्दं वा' प्रलापरूपं श्रोता यो न भवति स निर्ग्रन्थः, शेषं स्पष्टमिति सूत्रार्थः ॥ षष्ठमाह-

मू. (५१७) नो निग्गंथे पुव्वरयं पुव्वकीलियं अनुसरिता हवइ, तं कहं इति चेदायरियाह-निग्गंथस्स खलु इत्थीणं पुव्वरयं पुव्वकीलियं अनुसरमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउनिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे इत्थीणं पुव्वरयं पुव्वकीलियं अनुसरिज्जा ॥

वृ. नो निर्ग्रन्थः पूर्वस्मिन्-गृहावस्थालक्षणे काले रतं-स्त्र्यादिभिः सह विषयानुभवनं पूर्वरतं, 'पूर्वक्रीडितं वा' स्त्र्यादिभिरेव पूर्वकालभावि दुरोदरादिरमणात्मकं वाशब्दस्य गम्यमानत्वात्, 'अनुस्मर्ता' अनुचिन्तयिता भवति, शेषं प्राग्वदिति सूत्रार्थः ॥ सप्तममाह-

मू. (५१८) नो निग्गंथे पणीयं आहारं आहारित्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाह-निग्गंथस्स पणीयं पानभोयणं आहारेमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा

वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउणिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे पणीयं आहारं आहारिज्जा ॥

वृ. 'नो' नैव 'प्रणीतं' गलद्बिन्दु, उपलक्षणत्वादन्यमप्यत्यन्तधातूद्रेककारिणम् 'आहारम्' अशनादिकम् 'आहारयिता' भोक्ता भवति यः स निर्ग्रन्थः, शेषं व्याख्यातमेव, नवरं 'प्रणीतं पानभोजनम्' इति पानभोजनयोरेवोपादानम्, एतयोरेव मुख्यतया यतिभिराहार्यमानत्वात्, अन्यथा खाद्यस्वाद्ये अप्येवंविधे वर्जनीये एवेति सूत्रार्थः ॥ अष्टममाह-

मू. (५१९) नो अइमायाए पानभोयणं आहारित्ता हवइ से निग्गंथे, तं कहं इति चेदायरियाह- अइमायाए पानभोयणं आहारेमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउणिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे अइमायाए पानभोयणं भुंजिज्जा ॥

वृ. 'नो' नैव 'अतिमात्रया' मात्रातिक्रमेण, तत्र मात्रा-परिमानं, सा च पुरुषस्य द्वात्रिंशत्कवलाः स्त्रियाः पुनरष्टाविंशतिः, उक्तं हि-

"बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ।
पुरिसस्स महिलियाए अट्ठावीसं भवे कवला ॥"

अतिक्रमस्तु तदाधिक्यसेवनं 'पानभोजनं' प्रतीतमेव 'आहारयिता' भोक्ता भवति यः स निर्ग्रन्थः, शेषं तथैवेति सूत्रार्थः ॥ नवममाह-

मू. (५२०) नो विभूसानुवाई हवइ से निग्गंथे, तं कहं इति चेदायरियाह-विभूसावत्तिए विभूसियसरीरे इत्थिजनस्सेअभिलसणिज्जे हवइ, तओ णं तस्स इत्थिजनेनं अभिलसिज्जमानस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउणिज्जा दीहकालीयं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे विभूसाणुवाई सिया ॥

वृ. 'नो' नैव विभूषणं विभूषा-शरीरोपकरणादिषु स्नानधावनादिभिः संस्कारस्तदनुपाती, कोऽर्थः ?-तत्कर्त्ता भवति यः स निर्ग्रन्थः, तत्कथमिति चेदुच्यते-'विभूसावत्तिए' त्ति विभूषां वर्त्तयितुं-विधातुं शीलमस्येति विभूषावर्ती, ताच्छीलिकोणिन्, स एव विभूषावर्त्तिकः, स किमित्याह-विभूषितम्-अलंकृतं स्नानादिना संस्कृतमितियावत् शरीरं-देहो यस्य स विभूषितशरीरः, तथा च 'उज्ज्वलवेषं पुरुषं दृष्ट्वा स्त्री कामयते' इति वचनाद्युवतिजनप्रार्थनीयो भवति, आह च सूत्रकारः-'इत्थिजनस्स अभिलसणिज्जे हवइ' त्ति, ततः को दोष इत्याह-'ततः' स्त्रीजनाभिलषणीयत्वतः, नमिति प्राग्वत्, 'तस्य' निर्ग्रन्थस्य 'स्त्रीजनेन' युवतिजनेनाभिलष्यमानस्य-प्रार्थ्यमानस्य ब्रह्मचारिणोऽपि ब्रह्मचर्ये शङ्का वा, यथा किमेतास्तावदित्थं प्रार्थयमाना उपभुञ्जे ?, आयतौ तु यद्भावि तद्भवतु, उक्तञ्चैतत्काष्ठाः शाल्मलीश्लेष्मादयो नरक एतद्विपाका इति परिहारमीत्येवंरूपः संशयः, शेषं प्राग्वदिति सूत्रार्थः ॥ दशममाह-

मू. (५२१) नो सद्दरूवरसगंधफासानुवाई हवइ से निग्गंथे, तं कहं इति चेदायरियाह-

निग्गंथस्स खलु सद्दरूवरसगंधफासाणुवाइयस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउणिज्जा दीहकालियं वा रोगायंकं हविज्जा केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे सद्दरूवरसगंधफासाणुवाई हवइ से निग्गंथे, दसमे बंभचेरसमाहिट्ठाणे भवइ ॥

वृ. 'नो' नैव शब्दो-मन्मनभाषितादि रूपं-कटाक्षनिरीक्षणादि चित्रादिगतं वा स्त्र्यादि सम्बन्धि रसो-मधुरादिर्गन्धः-सुरभिः स्पर्शः-स्पर्शनानुकूलः कोमलमृणाला-देर्गतानभिष्वङ्गहेतून् अनुपतति-अनुयातीत्येवंशीलः शब्दरूपरसगन्धस्पर्शानुपाति भवति यः स निर्ग्रन्थः । तत्कथमिति चेदित्यादि सुगमं, दशमं ब्रह्मचर्यसमाधिस्थानं भवतीति निगमनम् । इह च प्रत्येकं स्त्र्यादिसंसक्तशयनादेः शङ्कादिदोषदर्शनं तदत्यन्तदुष्टतादर्शकं प्रत्येकमपायहेतुतां प्रति तुल्यबलत्वख्यापकं चेति सूत्रार्थः ॥

[भवन्ति य इत्थ सिलोगा, तंजहा ·]

'भवन्ति' विद्यन्ते 'अत्रे'ति उक्त एवार्थे, किमुक्तं भवति ? - उक्तार्थाभिधायिनः 'श्लोकाः' पद्यरूपाः, 'तद्यथा' इत्युपप्रदर्शने ।

मू. (५२२) *जं विवित्तमणाइन्नं, रहियं थीजनेण य ।*
बंभचेरस्स रक्खट्ठा, आलयं तु निसेवए ॥

वृ. जमित्यादिसूत्राणि दश । यः 'विविक्तः' रहस्यभूतस्तत्रैव वास्तव्यस्त्र्याद्यभावाद् 'अना-कीर्णः' असंकुलस्तत्तत्प्रयोजनागतस्त्र्याद्यनाकुलत्वात्, 'रहितः' परित्यक्तोऽकालचारिणा वन्दनश्रवणादिनिमित्तागतेन स्त्रीजनेन, चशब्दात्पण्ढकैः पिङ्गादिपुरुषैश्च प्रक्रमापेक्षया चैवं व्याख्या, अन्यत्रापि चैवं प्रक्रमाद्यपेक्षत्वं भावनीयम्, उक्तं हि-"अर्थात् प्रकरणाल्लिङ्गादौ-चित्यादेशकालतः । शब्दार्थाः प्रविभज्यन्ते, न शब्दादेव केवलात् ॥ 'ब्रह्मचर्यस्य' उक्तरूपस्य 'रक्षार्थं' पालननिमित्तम् 'आलयः' आश्रयः, सर्वत्र लिङ्गव्यत्ययः प्राग्वत्, यत्तदोर्नित्यमभ्य-न्धातं 'तुः' पूरणे 'निषेवते' भजते ॥

मू. (५२३) *मनपल्हायजननी, कामरागविवड्ढणी ।*
बंभचेररओ भिक्खू, थीकहं तु विवज्जए ॥

वृ. मनः-चित्तं तस्य प्रह्लादः अहो ! अभिरूपा एता इत्यादिविकल्पज आनन्दस्तं जनयतीति मनःप्रह्लादजननी ताम्, अत एव कामरागो-विषयाभिष्वङ्गस्तस्य विवर्द्धनी-विशेषेण वृद्धि-हेतुः कामरागविवर्द्धनी तां, शेषं स्पष्टं, नवरं, 'स्त्रीकथां' "तद्वक्त्रं यदि मुद्रिता शशिकथा" इत्यादिरूपां ॥

मू. (५२४) *समं च संथवं थीहिं, संकहं च अभिक्खणं ।*
बंभचेररओ भिक्खू, निच्चओ परिवज्जए ॥

वृ. 'समं च' सह 'संस्तवं' परिचयं स्त्रीभिर्विद्या प्रक्रमादेकासनभोगेनेति गम्यते, 'संकथां च' ताभिरेव समं सन्ततभाषणोत्मिकाम् 'अभीक्ष्णं' पुनः पुन 'निच्चसो'त्ति नित्यमन्यत्स्पष्टम् ॥

मू. (५२५) *अंगपच्चंगसंठाणं, चारुल्लवियपेहियं ।*
बंभचेररओ थीणं, सोअगिज्झं विवज्जए ॥

वृ. अङ्गानि-शिरःप्रभृतीनि प्रत्यङ्गानि कुचकक्षादीनि संस्थानं-कटीनिविष्टकरादिसन्नि-वेशात्मकं [illegible] अङ्गप्रत्यङ्गयोर्वा संस्थानम्-आकारविशेषोऽङ्ग-प्रत्यङ्गसंस्थानं चारुशोभनम् उल्लपितं च-मनागभाषितादि तत्सहगतमुखादिविकारोपलक्षणमेतत् प्रेक्षितं च-अर्द्धकटाक्षनिरीक्षितादि उल्लपितप्रेक्षितं ब्रह्मचर्यरतः स्त्रीणां सम्बन्धि चक्षुषा गृह्यत इति चक्षुर्ग्राह्यं सद्विवर्जयेत् किमुक्तं भवति ?-चक्षुषि हि सति रूपग्रहणमवश्यंभावि, परं तद्दर्शनेऽपि तत्परिहार एव कर्त्तव्यो न तु रागवशगेन पुनः पुनस्तदेव वीक्षणीयमिति, उक्तं हि-

"असकं रूवमद्दक्खुं, चक्खुगोयरमागयं ।
रागदोसे उ जे तत्थ, ते बुहो परिवज्जए ॥"

मू. (५२६) कुड्यं रुइअं गीयं, हसियं थणिय कंदियं ।
बंभचेररओ थीणं, सोअगिज्झं विवज्जए ॥

वृ. कुड्यंसूत्रं प्रायो व्याख्यातमेव, नवरं कुड्यन्तादिष्विति शेषः ॥

मू. (५२७) हासं खिड्डं रइं दप्पं, सहसावत्तासियाणि य ।
बंभचेररओ थीणं, नानुचिंते कयाइवि ॥

वृ. हाससूत्रमपि तथैव, नवरं 'रतिं' दयिताङ्गसङ्गजनितां प्रीतिं 'दर्पं' मनस्विनीमानदलनोत्थं गर्वं 'सहसाऽवत्रासितानि च' परांमुखदयितादेः सपदि त्रासोत्पादकान्यक्षिस्थगनमर्मघट्टनादीनि, पठ्यते च-'हस्सं दप्पं रइं किड्डं सह भुत्तासियाणि य' अत्र च 'सहे'ति स्त्रीभिः सार्द्धं भुक्तानि च-भोजनानि आसितानि च-स्थितानि भुक्तासितानि, शेषं स्पष्टं, नवरं सर्वत्र पूर्वकृतत्वं प्रक्रमादपेक्षणीयम् ॥

मू. (५२८) पणीयं भत्तपानं च, खिप्पं मयविवड्ढणं ।
बंभचेररओ भिक्खू, निच्चसो परिवज्जए ॥

वृ. पणीयंसूत्रं निगदसिद्धमेव, नवरं मदः-कामोद्रेक इह गृह्यते, तस्य विवर्द्धनम्-अतिस्निग्धकतया विशेषतो वृद्धिहेतुं परिवर्जयेत् ॥

मू. (५२९) धम्मलद्धं मियं काले, जत्तत्थं पणिहाणवं ।
नाइमत्तं तु भुंजिज्जा, बंभचेररओ सया ॥

वृ. धर्मादनपेतं धर्म्यमेषणीयमित्यर्थः 'लब्धं' प्राप्तं गृहस्थेभ्य इति गम्यते, न तु स्वयमेवोपस्कृतं, पठ्यते च, 'धम्मलद्धं'ति धर्मेण हेतुनोपलक्षणत्वाद्धर्मलाभेन वा न तु कुण्डलादिकरणेन लब्धं धर्मलब्धं पठ्यते च 'धर्म्मलद्धं'ति धर्म्मः-उत्तमः क्षमादिरूपः, यथाऽऽह वाचकः-'उत्तमः क्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिञ्चन्यब्रह्मचर्याणि धर्मः'' इति, तं 'लब्धुं' प्राप्तुं, कथं ममायं निरतिचारः स्यात् इति, 'मितम्' 'अद्धमसणस्स' इत्याद्योगमोक्तमानान्वितमाहारमिति गम्यते, 'काले' प्रस्तावे 'यात्रार्थं' संयमनिर्वाहणार्थं न तु रूपाद्यर्थं 'प्रणिधानवान्' चित्तस्वास्थ्योपेतो न तु रागद्वेषवशगो भुञ्जीत 'न' इति निषेधे मात्रामतिक्रान्तः अतिमात्रः-अतिरिक्त इत्यर्थस्तं, यदिवा 'ईषदर्थे क्रियायोगे, मर्यादायां परिच्छेद' इत्यादिना मात्राशब्दस्य मर्यादार्थस्यापि दर्शनाद 'अतिमात्रम्' अतिक्रान्तमर्यादं, तुशब्दस्यैवकारार्थत्वाद्व्यवहित-सम्बन्धत्वाच्चैव 'भुञ्जीत' अभ्यवहरेद् ब्रह्मचर्ये रतः-आसक्तो ब्रह्मचर्यरतः 'सदा'

सर्वकालं, कदाचित्कारणतोऽतिमात्रस्याप्याहारस्यादुष्टत्वात् ॥

मू. (५३०) *विभूसं परिवज्जेज्जा, सरीरपरिमंडणं ।*
बंभचेररओ भिक्खू, सिंगारत्थं न धारए ॥

वृ. 'विभूषाम्' उपकरणगता भुक्तोष्टवस्त्राद्यात्मिकां 'परिवर्जयेत्' परिहरेत् 'शरीरपरिमण्डनं' केशश्मश्रुसमारचनादि ब्रह्मचर्यरतो भिक्षुः 'शृङ्गारार्थं' विलासार्थं 'न धारयेत्' न स्थापयेत् न कुर्यादितियावत् ॥

मू. (५३१) *सद्दे रूवे य गंधे य, रसे फासे तहेव य ।*
पंचविहे कामगुणे, निच्चसो परिवज्जए ॥

वृ. 'सद्दे' सूत्रं स्पष्टमेव, नवरं कामः -इच्छामदनरूपस्तस्य द्विविधस्यापि गुणाः -साधनभूता उपकारका इतियावत्, उक्तं हि- 'गुणः साधनमुपकारकं' कामगुणास्तानेवंविधान् शब्दादीनिति सूत्रदशकार्थः ॥

सम्प्रति यत्प्राक् प्रत्येकमुक्तं शङ्का वा स्यादित्यादि तदाशान्तः स्पष्टयितुमाह-

मू. (५३२) *आलओ थीजणाइन्नो, थीकहा य मनोरमा ।*
संथवो चेव नारीणं, तासिं इंदियदरिसणं ॥

मू. (५३३) *कुइयं रुइयं गीयं, हसियं भुत्तासियाणि य ।*
पणीयं भत्तपानं च, अइमायं पानभोयणं ॥

मू. (५३४) *गत्त भूसणमिट्ठं च, कामभोगा य दुज्जया ।*
नरस्सऽत्तगवेसिस्सा, विसं तालउडं जहा ॥

वृ. नवरं 'संस्तवः' परिचयः, स चेहाप्येकासनभोगेनेति प्रक्रमः, कूजितादीनि हसितपर्यन्तानि कुड्यान्तराद्यवस्थितिनिषेधोपलक्षणानि, भुक्तासितानि च स्मृतानीति शेषः, तत्र भुक्तानि-भोगरूपाणि आसितानि-स्त्र्यादिभिरेव सहावस्थितानि, हास्याद्युपलक्षणं चैतत्, गात्रभूषणमिष्टं चेति, चशब्दोऽपिशब्दार्थः, तत इष्टमप्यास्तां विहितं, तथा काम्यन्त इति कामाः भुज्यन्त इति भोगाः विशेषणसमासस्ते चेष्टाः शब्दादयः, नरस्योपलक्षणत्वात्स्त्र्यादेश्च आत्मगवेषिणः 'विषं' गरलः 'तालपुटं' सद्योघाति यत्रौष्ठपुटान्तर्वर्त्तिनि तालमात्रकालविलम्बतो मृत्युरुपजायते, 'यथे'त्यौपम्ये, ततोऽयमर्थः- यथैतद्विपाकदारुणं तथा स्त्रीजनाकीर्णालयाद्यपि, शङ्कादिकरणतः संयमात्मकभावजीवितस्येतरस्य च नाशहेतुत्वादिति सूत्रत्रयार्थः ॥

सम्प्रति निगमयितुमाह

मू. (५३५) *दुज्जए कामभोगे य, निच्चसो परिवज्जए ।*
संकाठाणाणि सव्वाणि, वज्जिज्जा पणिहाणवं ॥

वृ. दुःखेन जीयन्त इति दुर्जयास्तान्, 'कामभोगान्' उक्तरूपान् 'निच्चसो'त्ति नित्यं 'परिवर्जयेत्' सर्वप्रकारं त्यजेत् 'शङ्कास्थानानि च' अनन्तरोक्तानि, पूर्वत्र चास्य भिन्नक्रमत्वात् 'सर्वाणि' दशापि वर्जयेद्, अन्यथा आज्ञाऽनवस्थामिथ्यात्वविराधनादोषसम्भवः 'प्रणिधानवान्' एकाग्रमनाः । एतद्वर्जकश्च किं कुर्यादित्याह-

मू. (५३६) *धम्मारामे चरे भिक्खू, धिइमं धम्मसारही ।*

धम्मारामरए दंते, बंभचेरसमाहिए ॥

वृ. धर्म आगम इव पाप सन्तापोपतप्तानां जन्तूनां निर्वृत्तिहेतुतयाऽभिलषितफलप्रदानतश्च धर्मागमस्तस्मिन् 'चरेत्' गच्छेत् प्रवर्त्तेतेतियावत्, यद्वा धर्मे आ-समन्ताद्गमत इति धर्मागमः 'संचरेत्' संयमाध्वनि यायाद् भिक्षुः प्राग्वत् 'धृतिमान्' धृतिः-चित्तस्वास्थ्यं तद्वान्, स चैवं धर्मसारथिः-"ठिओ उ ठावए परं" इति वचनादन्येषामपि धर्मे प्रवर्त्तयिता, ततोऽन्यानपि धर्मे व्यवस्थितानुपलभ्य विशेषतो धर्मागमे रतः - आसक्तिमान् धर्मारामरतः, तथा च 'दान्तः' उपशान्तो ब्रह्मचर्ये समाहितः-समाधानवान् ब्रह्मचर्यसमाहित इति सूत्रद्वयार्थः ॥

ब्रह्मचर्यविशुद्धयर्थोऽयं सर्वोऽप्युपक्रम इति तन्माहात्म्यमाह-

मू. (५३७) *देवदानवगंधव्वा, जक्खरक्खसकिन्नरा ।*
बंभयारिं नमंसंति, दुक्करं जे करंति तं ॥

वृ. देवाः-ज्योतिष्कवैमानिकाः दानवाः-भुवनपतयः गन्धर्वयक्षराक्षसकिन्नराः-व्यन्तरविशेषाः समासः सुकर एव, उपलक्षणं चैतद्भूतपिशाचमहोरगकिंपुरुषाणाम्, एते सर्वेऽपि 'ब्रह्मचारिणं' ब्रह्मचर्यवन्तं यतिमिति शेषः, 'नमस्यन्ति' नमस्कुर्वन्ति 'दुष्करं' कातरजनदुरनुचरं 'जे' इति यः 'करोति' अनुतिष्ठति 'तं'ति प्रक्रमाद्ब्रह्मचर्यमिति सूत्रार्थः ॥

सम्प्रति सकलाध्ययनार्थोपसंहारमाह-

मू. (५३८) *एस धम्मे धुवे नियए, सासए जिनदेसिए ।*
सिद्धा सिज्झंति चानेन, सिज्झिस्संति तहापरे ॥

वृ. 'एषः' इत्यनन्तरोक्तः 'धर्मः' ब्रह्मचर्यलक्षणः, ध्रुवः परप्रवादिभिरप्रकम्प्यतया प्रमाणप्रतिष्ठित इतियावत् 'नित्यः' अप्रच्युतानुत्पन्नस्थिरैकस्वभावो द्रव्यार्थितया 'शाश्वतः' शश्वदन्याव्यरूपतया उत्पन्न(ः)पर्यायार्थितया, यद्वा 'नित्यः' त्रिकालमपि सम्भवात् 'शाश्वतः' अनवरतभवनात्, एकार्थिकानि वा नानादेशजविनेयानुग्रहार्थमुक्तानि, जिनैः-तीर्थकृद्भिर्देशितः-प्रतिपादितो जिनदेशितः, अस्यैव त्रिकालगोचरफलमाह-'सिद्धाः' पुरा अनन्तासूत्सर्पिण्यवसर्पिणीषु सिद्धयन्ति 'चः' समुच्चये महाविदेहे इहापि वा तत्कालापेक्षया 'अनेन' इति ब्रह्मचर्यलक्षणेन धर्मेण सेत्स्यन्ति तथा 'परे' अन्येऽनन्तायामनागताद्धायामिति सूत्रार्थः ॥ 'इति' परिसमाप्तौ ब्रवीमीति पूर्ववत् । उक्तोऽनुगमः, सम्प्रति नयास्ते च पूर्ववत् ॥

अध्ययनं १६ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे षोडशअध्ययनस्य भद्रबाहुसूरिविरचिता निर्युक्तिः एवं शान्त्याचार्यविरचिता टीका परिसमाप्तम्

४३-१ चतुर्थ-मूलसूत्रं "उत्तराध्ययनानि-१" समाप्तम्

नमो नमो निम्मल दंसणस्स
पंचम गणधर श्री सुधर्मा स्वामिने नमः

४३-२ उत्तराध्ययनानि-मूलसूत्रम् -२-

सटीकं

[चतुर्थं मूलसूत्रं]
[मूलम्+भद्रबाहुस्वामि रचितानिर्युक्तिः + शान्त्याचार्य विरचिता टीकाः]
अध्ययानि-१७.....३६

अध्ययन नं - १७ पापश्रमणीयम्

वृ. व्याख्यातं षोडशमध्ययनम्, अधुना सप्तदशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने ब्रह्मचर्यगुप्तय उक्ताः, ताश्च पापस्थानवर्जनादेवासेवितुं शक्यन्ते इति पापश्रमणस्वरूपाभिधानतस्तदेवात्र कावक्तव्यत इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य च चतुरनुयोगद्वारप्ररूपणा प्राग्वत्तावद्यावन्नामनिष्पन्ननिक्षेपेऽस्य पापश्रमणीयमिति नाम, अतः पापस्य श्रमणस्य च निक्षेपमाह निर्युक्तिकृत्

नि.[३८७] पावे छक्कं दव्वे सचित्ताचित्तमीसगं चेव।
खित्तंमि निरयमाई कालो अइदुस्समाईओ ॥

नि.[३८८] भावे पावं इणमो हिंस मुसा चोरिअ च अब्बंभं।
तत्तो परिग्गहो च्चिअ अगुणा भणिआ य जे सुत्ते ॥

नि.[३८९] समणे चउक्कनिक्खेवओ उ दव्वंमि निह्नगाईआ।
नाणी संजमसहिओ नायव्वो भावओ समणो ॥

वृ. 'पापे' पापविषयः 'छक्कं'ति षट्कः षट्परिमानो नामस्थापनाद्रव्यक्षेत्रकालभावभेदान्निक्षेप इति गम्यते, तत्र च नामस्थापने सुज्ञाने, द्रव्ये विचार्ये आगमतो ज्ञाताऽनुपयुक्तः, नोआगमतस्तु व्यतिरिक्तमाह-'सचित्ताचित्तमीसगंचेव'त्ति, इह च पापमिति योज्यते, प्राकृतत्वाच्चोभयत्र बिन्दुलोपः, तत्र सचित्तद्रव्यपापं यद्विपदचतुष्पदापदेषु मनुष्यपशुवृक्षादिष्वसुन्दरम्, अचित्तद्रव्यपापं-तदेव जीवविप्रयुक्तं चतुरशीतिपापप्रकृतयो वा वक्ष्यमाणाः, मिश्रद्रव्यपापं-तथाविधद्विपदाद्येवाशुभवस्त्रादियुक्तं तत्शरीराणि वा जीवविप्रयुक्तैकदेशयुक्तानि, सन्ति हि जीवशरीरेष्वपि जीवविप्रयुक्ताः नखकेशादयस्तद्देशदेशाः उक्तं हि

"तस्सेव देसे चिए तस्सेव देसे अनुवचिए"त्ति, जीवप्रदेशापेक्षमेव हि तत्र चितत्वमनुपचितत्वं वा विवक्षितं, पापप्रकृतियुक्तो वा जन्तुरेव मिश्रद्रव्यपापमुच्यते, 'खेत्ते'ति प्राग्वत्, क्षेत्रे विचार्ये 'पापं'नरकादिपापप्रकृत्युदयविषयभूतं यत्र तदुदयोऽस्ति, 'काल' इति कालपापं-दुष्षमादिकं यत्र कालानुभावतः प्रायः पापोदय एव जन्तूनां जायते, आदिशब्दादन्यत्र वा

काले यत्र कस्यचिज्जन्तोस्तदुदयः, भावे विचारयितुमुपक्रान्ते पापम् 'इदम्' अनन्तरमेव वक्ष्यमाणं 'हिंस'त्ति हिंसा प्रमत्तयोगात्प्राणव्यपरोपणं 'मृषा' असदभिधानं 'चौर्यं च' स्तैन्यम् 'अब्रह्म' मैथुनं ततः 'परिग्रहः' मूर्च्छात्मकः 'अपिः' समुच्चये 'चः' पूरणे 'गुणाः' सम्यग्दर्शनादयस्तद्विपक्षभूताः अगुणाः-मिथ्यात्वादयो दोषाः, नञो विपक्षेऽपि दर्शनादमित्रादिवत्, 'भणिताः' उक्ताः, 'तुः' समुच्चये व्यवहितक्रमश्च, अगुणाश्च ये 'सूत्रे' आगमे अन्यत्र इहैव वा प्रस्तुताध्ययने।

'श्रमणे' श्रमणविषयः 'चतुष्कनिक्षेपकः' नामादिः 'तुः' पूरणे नामस्थापने पूर्ववत्, द्रव्ये निह्नवादय एव निह्नवादिकाः उक्तरूपाः 'ज्ञानी' प्रशंसायां मत्वर्थीयोत्पत्तेः प्रशस्तज्ञानवान् समिति-सम्यक् सदनुष्ठानप्रवृत्त्या यमनं-पापस्थानेभ्य उपरमणं संयमश्चारित्रमितियावत्तेन सहितः-युक्तः संयमसहितो ज्ञातव्यो भावतः श्रमण इति गाथात्रयार्थः ॥

सम्प्रति प्रस्तुते योजयन्नाह-

नि.[३९०] जे भावा अकरणिज्जा इहमज्झयणंमि वन्निअ जिनेहिं।
ते भावे सेवंतो नायव्वो पावसमणोत्ति ॥

वृ. ये 'भावाः' संसक्तापठनशीलतादयोऽर्थाः 'अकरणीयाः' कर्त्तुमनुचिताः 'इह' प्रस्तुतेऽध्ययने 'वन्निय'त्ति वर्णिताः प्ररूपिताः 'जिनैः' तीर्थकृद्भिस्तान् भावान् 'सेवमानः' अनुतिष्ठान् 'ज्ञातव्यः' अवबोद्धव्यः पापेन-उक्तरूपेणोपलक्षितः श्रमणः पापश्रमणः, इतिशब्दः पापश्रमणशब्दस्य स्वरूपपरामर्शक इति गाथार्थः ॥ एतद्विपरीतास्तु श्रमणाः, तेषां फलमाह-

नि.[३९१] एयाइं पावाइं जे खलु वज्जंति सुव्वया रिसओ।
ते पावकम्ममुक्का सिद्धिमविग्घेण वच्चंति ॥

वृ. 'एतानि' एतदध्ययनोक्तानि 'पापानि' पापहेतुभूतानि शयालुतादीनि 'ये' इत्यनिर्दिष्टरूपाः 'खलुः' वाक्यालङ्कारे 'वर्जयन्ति' परिहरन्ति सुव्रता ऋषयः पूर्ववत्, ते पापं च तत्कर्म च पापकर्म तेन उपलक्षणत्वात्पुण्यकर्मणा च मुक्ताः-त्यक्ताः पापकर्ममुक्ता 'सिद्धिं' सिद्धिगतिम् 'अविघ्नेन' अन्तरायाभावेन 'वच्चंति'त्ति 'व्रजन्ति' गच्छन्तीति गाथार्थः ॥

गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू.(५३१) *जे केइ उ पव्वइए नियंठे, धम्मं सुणित्ता विनओववन्ने।*
सुदुल्लहं लहिउं बोहिलाभं, विहरिज्ज पच्छा य जहासुहं तु ॥

वृ. 'यः कश्चित्' इत्यविवक्षितविशेषः 'तुः' पूरणे, पठन्ति च -'जे के इम'त्ति तत्र च 'इमे'त्ति अयं 'प्रव्रजितः' निष्क्रान्तः निर्ग्रन्थः प्राग्वत्, कथं पुनरयं प्रव्रजित इत्याह-'धर्मं' श्रुतचारित्ररूपं 'श्रुत्वा' निशम्य विनयेन-ज्ञानदर्शनचारित्रोपचारात्मके नोपपन्नो-युक्तो विनयोपपन्नः सन् 'सुदुर्लभम्' अतिशयदुष्प्रापं 'लभिउं'त्ति लब्ध्वा 'बोधिलाभं' जिनप्रणीतधर्मप्राप्तिरूपम्, अनेन भावप्रतिपत्त्याऽसौ प्रव्रजित इत्युक्तं भवति, स किमित्याह-'विहरेत्' चरेत्, 'पश्चात्' प्रव्रजनोत्तरकाल 'चः' पुनरर्थो विशेषद्योतकस्ततश्च प्रथमं सिंहवृत्त्या प्रव्रज्य पश्चात्पुनः 'यथासुखं' यथा यथा विकथादिकरणलक्षणेन प्रकारेण सुखमात्मनोऽवभासते तुशब्दस्यैवकारार्थत्वाद्यथासुखमेव शृगालवृत्त्यैव विहरेदित्यर्थः उक्तं हि- "सीहत्ताए निक्खंतो

सीयालत्ताए विहरति" त्ति, स च गुरुणाऽन्येन वा हितैषिणाऽध्ययनं प्रति प्रेरितो यदुक्तिं तदाह-

मू. (५४०) *सिज्जा दढा पाउरणं मि अत्थि, उप्पज्जई भुत्तु तहेव पाउं।*
जाणामि जं वट्टइ आउसुत्ति!, किं नाम काहामि? सुएण भंते!॥

वृ. 'शय्या' वसतिः 'दृढा' वाततपजलाद्युपद्रवैरनभिभाव्या, तथा 'प्रावरणं' वर्षाकल्पादि 'मे' ममास्ति, किञ्च- 'उत्पद्यते' जायते 'भोक्तुं' भोजनाय तथैव 'पातुं' पानाय यथाक्रममशनं पानं चेति शेषः तथा 'जानामि' अवगच्छामि 'यद्वर्त्तते' यदिदानीमस्ति 'आयुष्मन्नि'ति प्रेरयितुरामन्त्रणमिति, एतस्माद्धेतोः किं नाम?, न किञ्चिदित्यर्थः 'काहामि'त्ति करिष्यामि 'श्रुतेन' आगमेनाधीतेनेत्यध्याहारः, 'भंते'त्ति पूज्यामन्त्रणम्, इह च प्रक्रमालक्षेपे, अयं हि किलास्याशयो यथा ये भवन्तो भदन्ता अधीयन्ते तेऽपि नातीन्द्रियं वस्तु किञ्चनावबुध्यन्ते, किन्तु?, साम्प्रतमात्रेक्षिण एव, तच्चैतावदस्मास्वेवमप्यस्ति, तत्किं हृदयगलतालुशोषविधायिनाऽधीतेनेति?, एवमध्यवसितो यः स पापश्रमण इत्युच्यत इतीहापि सिंहावलोकितन्यायेन संबध्यत इति सूत्रद्वयार्थः॥ किंच-

मू. (५४१) *जे केइ पव्वइए, निद्दासीले पगामसो।*
भुच्चा पिच्चा सुहं सुअई, पावसमणित्ति वुच्चई॥

वृ. यः कश्चित्प्रव्रजितः 'निद्राशीलः' निद्रालुः 'प्रकामशः' बहुशो 'भुक्त्वा' दध्योदनादि 'पीत्वा' तक्रादि 'सुखं' यथा भवत्येवं सकलक्रियानुष्ठाननिरपेक्ष एव 'स्वपिति' शेते, पठ्यते च- 'वसइ'त्ति 'वसति' आस्ते ग्रामादिषु, स इत्थम्भूतः किमित्याह- पापश्रमण इति 'उच्यते' प्रतिपाद्यत इति सूत्रार्थः॥ इत्थं न केवलमनधीयान एव पापश्रमण उच्यते, किन्तु-

मू. (५४२) *आयरियउवज्झाएहिं, सुअं विनयं च गाहिए।*
ते चेव खिंसई बाले, पावसमणित्ति वुच्चई॥

वृ. आचार्योपाध्यायैः 'श्रुतम्' आगममर्थतः शब्दतश्च 'विनयं च' उक्तरूपं 'ग्राहितः' शिक्षितो यैरिति गम्यते 'तानेव' आचार्यादीन् 'खिंसति' निन्दति 'बालः' विवेकविकलो गम्यमानत्वाद्यः स पापश्रमण इत्युच्यत इति सूत्रार्थः॥ इत्थं ज्ञानाचारनिरपेक्षं पापश्रमणमभिधाय दर्शनाचारनिरपेक्षं तमेवाह-

मू. (५४३) *आयरियउवज्झायाणं, सम्मं नो पडितप्पई।*
अप्पडिपूअए थद्धे, पावसमणित्ति वुच्चई॥

वृ. आचार्योपाध्यायानां 'सम्यग्' अवैपरीत्येन 'न परितप्यते' न तत्तत्सिं विधत्ते, दर्शनाचारान्तर्गतवात्सल्यविरहितो न तत्कार्येष्वभियोगं विधत्त इति भावः, 'अप्रतिपूजकः' प्रस्तावादर्हदादिषु यथोचितप्रतिपत्तिपराङ्मुखः 'स्तब्धः' गर्वाध्मातः केनचित्प्रेर्यमानोऽपि न तद्वचनतः प्रवर्त्तते यः स पापश्रमण इत्युच्यत इति सूत्रार्थः॥ सम्प्रति चारित्राचारविकलं तमेवाह-

मू. (५४४) *संमद्दमाणे पाणाणि, बीयाणि हरियाणि य।*
असंजए संजय मन्नमाणे, पावसमणित्ति वुच्चई॥

वृ. 'संमर्दन्' हिंसन् 'प्राणानि'ति प्राणयोगात् प्राणिनः- द्वीन्द्रियादीन् 'बीजानि' शाल्यादीनि 'हरितानि च' दूर्वाऽङ्कुरादीनि, सकलैकेन्द्रियोपलक्षणमेतत्, स्पष्टरचैतन्यलिङ्गत्वाचैत-

दुपादानम्, अत एवासंयतस्तथाऽपि 'संजय मन्नमाणे'त्ति सोपस्कारत्वात्संयतोऽहमिति मन्यमानः, अनेन च संविग्नपाक्षिकत्वमप्यस्य नास्तीत्युक्तं, पापश्रमण इत्युच्यते ॥

मू.(५४५) *संथारं फलगं पीढं, निसिज्जं पायकंबलं।*
अप्पमज्जियमारुहई, पावसमणित्ति वुच्चइ ॥

वृ.तथा 'संस्तारं' कम्बल्यादि 'फलकं' चम्पकपट्टादि 'पीठम्' आसनं 'निषद्यां' स्वध्याय-भूम्यादियां यत्र निषद्यते 'पादकम्बलं' पादपुञ्छनम् 'अप्रमृज्य' रजोहरणादिनाऽसंशोध्य उपलक्षणत्वादप्रत्युपेक्ष्य च 'आरोहति' समाक्रामिति यः स पापश्रमण इत्युच्यते ॥

मू.(५४६) *दवदवस्स चरई, पमत्ते अ अभिक्खणं।*
उल्लंघणे अ चंडे अ, पावसमणित्ति वुच्चइ ॥

वृ.तथा 'दवदवस्सत्ति द्रुतं द्रुतं तथाविधालम्बनं विनाऽपि त्वरितं २ 'चरति' गोचरचर्यादिषु परिभ्राम्यति, 'प्रमत्तश्च' प्रमादवशगश्च भवतीति शेषः 'अभीक्ष्णं' वारं वारम् 'उल्लङ्घनश्च' बालादीनामुचितप्रतिपत्त्यकरणतोऽधः कर्त्ता 'चण्डश्च' क्रोधनः, यद्वा 'प्रमत्तः' अनुपयुक्त ईर्यासमितौ उल्लङ्घनश्च वत्सडिम्भादीनां चण्डश्चारभटवृत्त्याश्रयणतः, शेषं तथैव।

मू.(५४७) *पडिलेहेइ पमत्तो, अवउज्झइ पायकंबलं।*
पडिलेहाअणाउत्ते, पावसमणित्ति वुच्चइ ॥

वृ.तथा 'प्रतिलेखयति' अनेकार्थत्वात्प्रत्युपेक्षते प्रमतः सन् 'अवउज्झइ'त्ति 'अपोज्झति' यत्र तत्र निक्षिपति, प्रत्युपेक्षमानो वा अपोज्झति, न प्रत्युपेक्षत इत्यर्थः, किं तत्?-पाद कम्बलं पात्रकम्बलं वा प्रतीतमेव, समस्तोपध्युपलक्षणं चैतत्, स एवं 'प्रतिलेखनाऽनायक्तः' प्रत्युपेक्षानपयुक्तः, शेषं तथैव ॥

मू.(५४८) *पडिलेहेइ पमत्ते, से किंचि हु निसामिआ।*
गुरुं परिभावए निच्चं, पावसमणित्ति वुच्चइ ॥

वृ. तथा प्रतिलेखयति प्रमत्तः सन् 'किंचि हु'त्ति 'हुः' अपिशब्दार्थः, ततः किञ्चिदपि विकथादीति गम्यते, 'निसामिअ'त्ति 'निशम्य' आकर्ण्य तत्राक्षिप्तचित्ततयेति भावः, 'गुरुपरिभासय'त्ति गुरुन् परिभाषते-विवदते गुरुपरिभाषकः, पाठान्तरतो गुरुपरिभावकः, 'नित्यं' सदा, किमुक्तं भवति?-असम्यक्प्रत्युपेक्षमानोऽन्यद्वा वितथमाचरन्,गुरुभिश्चोदितस्तानेव विवदतेऽभिभवति वाऽसभ्यवचनैः, यथा-स्वयमेव प्रत्युपेक्षध्वं, युष्माभिरेव वयमित्थं शिक्षितास्ततो युष्माकमेवैष दोष इत्यादि, शेषं तथैव, गुरुपरिभाषिकत्वं प्रमत्तत्वस्य च निशमनहेतुत्वं पूर्वस्माद्विशेष इति न पौनरुक्त्यम्। किञ्च-

मू.(५४९) *बहुमाई पमुहरी, थद्धे लुद्धे अनिग्गहे।*
असंविभागी अचियत्ते, पावसमणित्ति वुच्चइ ॥

वृ.'बहुमायी' प्रभूतवञ्चनाप्रयोगवान् प्रकर्षेण मुखरः प्रमुखरः स्तब्धो लुब्ध इति च प्राग्वत्, अविद्यमानो निग्रहः-इन्द्रियमनोऽनिन्द्रियनियन्त्रणात्मकोऽस्येत्यनिग्रहः, संविभजति-गुरुग्लानबालादिभ्य उचितमशनादि यच्छतीत्येवंशीलः संविभागी न तथा य आत्मपोषकत्वेनैव सोऽसंविभागी, 'अचियत्ते'ति गुर्वादिष्वप्रीतिमान् शेषं पूर्ववत् ॥ अन्यच्च-

मू.(५५०) *विवायं च उदीरेइ, अधम्मे अत्तपन्नहा।*
वुग्गहे कलहे रत्ते, पावसमणित्ति वुच्चई॥

वृ.विरूपो वादो विवादः-वाक्कहस्तं 'चः' पूरणे 'उदीरइ'त्ति कथञ्चिदुपशान्तमप्युत्प्रासनादिना वृद्धिं नयति, 'अधर्मः' अविद्यमानसदाचारः 'अत्तपण्हह'त्ति आत्मनि प्रश्नः आत्मप्रश्नस्तं हन्त्यात्मप्रश्नहाः, यदि कश्चित्परः पृच्छेत्-किं भवान्तरयायी आत्मा उत नेति?, ततस्तमेव प्रश्नमतिवाचालतया हन्ति, यथा-नास्त्यात्मा प्रत्यक्षादिप्रमाणैरनुपलभ्यमानत्वात्, ततोऽयुक्तोऽयं प्रश्नः, सति हि धर्मिणि धर्मा चिन्त्यन्त इति, पठ्यते च-'अत्तपन्नह'त्ति तत्र च आत्तसिद्धान्तादिश्रवणतो गृहीतामासां वा इहपरलोकयोः सद्बोधरूपतया हितां प्रज्ञाम्-आत्मनोऽन्येषां वा बुद्धिं कुतर्कव्याकुलकरणतो हन्ति यः स आत्तप्रज्ञाहा आत्मप्रज्ञाहा वा, 'वुग्गहे'त्ति व्युद्ग्रहे दण्डादिघातजनिते विरोधे 'कलहे' तस्मिन्नेव वाचिके 'रक्तः' अभिवध्वक्तः, शेषं प्राग्वत्॥

मू.(५५१) *अथिरासने कुक्कुईए, जत्थ तत्थ निसीअई।*
आसणंमि अनाउत्ते, पावसमणित्ति वुच्चइ॥

वृ.अपरं च अस्थिरासनः कुकुचः कुक्कुचो वा द्वयमपि पूर्ववत्, 'यत्र तत्र' इति संसक्तसरजस्कादावपीत्यर्थः 'निषीदति' उपविशति 'आसने' पीठादौ 'अनायुक्तः' अनुपयुक्तः सन्, शेषं प्राग्वत्॥

मू.(५५२) *ससरक्खापाओ सुअई, सिज्जं न पडिलेहई।*
संथारएअनाउत्तो, पावसमणित्ति वुच्चइ॥

वृ. तथा सह रजसा वर्तेते इति सरजस्कौ तथाविधौ पदौ यस्य स तथा 'स्वपिति'शेते, किमुक्तं भवति?-संयमविराधनां प्रत्यभीरुतया पादावप्रमृज्यैव शेते, तथा 'शय्यां'वसतिं न प्रतिलेखयति, उपलक्षणत्वात्र च प्रमार्जयति, 'संस्तारके' फलककम्बलादौ, सुप्त इति शेषः, 'अनायुक्तः' "कुक्कुडिपायपसारण आयामेउं पुणोवि आउंटे" इत्याद्यागमार्थानुपयुक्तः, अन्यत्तथैवेति सूत्रनवकार्थः॥ इदानीं तपआचारातिक्रमतः पापश्रमणमाह-

मू.(५५३) *दुद्धदहीविगईओ, आहारेइ अभिक्खणं।*
अरए अ तवोकम्मे, पावसमणित्ति वुच्चई॥

वृ.दुग्धं च-क्षीरं दधि च-तद्विकार एव दधिदुग्धे, सूत्रे च प्राग्वद्, विकृतिहेतुत्वाद्विकृती, उपलक्षणत्वाद् घृताद्यशेषविकृतिपरिग्रहः, 'आहरयति' अभ्यवहरति 'अभीक्ष्णं' वारं वारं, तथाविधपुष्टालम्बनं विनाऽपीति भावः, अत एव 'अरतश्च' अप्रीतिमांश्च 'तपःकर्मणि' अनशनादौ, शेषं प्राग्वत्॥ अपि च-

मू.(५५४) *अत्थंतंमि य सूरंमि, आहारेइ अभिक्खणं॥*
चोइओ पडिचोएइ, पावसमणित्ति वुच्चई॥

वृ. 'अत्थंतंमि य' त्ति 'अस्तान्ते' अस्तमयपर्यन्ते, 'चः' पूरणे, उदयादारभ्येति गम्यते, 'सूर्ये' भास्वति आहारयत्यभीक्ष्णं, किमुक्तं भवति?-प्रातरारभ्य सन्ध्यां यावत्पुनः पुनर्भुंक्ते, यदिवा 'अत्थंतमयंमि य'त्ति अस्तमयति सूर्ये आहारयति, तिष्ठति तु किमुच्यते? इति भावः, किमेकदैवेत्याह-'अभीक्ष्णं' पुनः पुनः, दिने दिने इत्युक्तं भवति, यदि चासौ केनचिन्दि-

तार्थसाधुना चोद्यते, यथा आयुष्मन्! किमेवं त्वयाऽऽहारतत्परेणैव स्थीयते?, दुर्लभा खल्विय मनुजत्वादिचतुरङ्गसामग्री, तत एनामवाप्य तपस्येवोद्यन्तुमुचितमिति, ततः किमित्याह- 'चोइओ पडिचोएए'त्ति चोदितः सन् प्रतिचोदयति यथा कुशलस्त्वमुपदेशकर्मणि न तु स्वयमनुष्ठाने, अन्यथा किमेवमवगच्छन्नपि भवान्न विकृष्टं तपोऽनुतिष्ठति?, शेषं तथैव।

मू.(५५५) *आयरियपरिच्चाई, परपासंडसेवए।*
गाणंगणिए दुब्भूए, पावसमणित्ति वुच्चई॥

वृ.'आचार्यपरित्यागी' ते हि तपःकर्मणि विषीदन्तमुद्यमयन्ति, आनीतमपि चान्नादि बाल-ग्लानादिभ्य् दापयन्त्यतोऽतीवाहारलौल्यात्तत्परित्यजनशीलः परान्-अन्यान् पाषण्डान-सौगतप्रभृतीन् 'मृद्वी शय्या प्रातरुत्थाय पेया' इत्यादिकदर्भिप्रायतोऽत्यन्तमाहारप्रसक्तांस्तत एव हेतोः सेवते-तथा तथाऽपसर्पतीति परपाषण्डसेवकः, तथा च स्वेच्छाप्रवृत्ततया 'गाणंगणिए'त्ति गणाद्गणं षण्मासाभ्यन्तरएव संक्रामतीति गाणङ्गणिकः इत्यागमिकी परिभाषा, तथा चागमः-''छम्मासऽब्भंतरतो गणा गणं संकमं करेमाणो'' इत्यादि, अत एव च 'दुर्निन्दायां', ततश्च 'दुः' इति निन्दितं भूतं-भवनमस्येति दुर्भूतः, दुराचारतया निन्द्यो भूत इत्यर्थः, अपरं तथैवेति सूत्रत्रयार्थः॥ सम्प्रति वीर्याविधारविरहतस्तमेवाह-

मू.(५५६) *सयं गेहं परिच्चज्ज, परगेहंसि वावरे।*
निमित्तेण य ववहरई, पावसमणित्ति वुच्चई॥

वृ. स्वमेव स्वकं, निजकमित्यर्थः, 'गेहं' गृहं 'परित्यज्य' परिहृत्य प्रव्रज्याङ्गीकरणतः 'परगेहे' अन्यवेश्मनि 'वावरे'त्ति व्याप्रियते-पिण्डार्थी सन् गृहिणामासभावं दर्शयन् स्वतस्तत्कृत्यानि कुरुते, पठ्यते च-'ववहरे'त्ति तत एव हेतोर्व्यवहरति-गृहिनिमित्तं क्रयविक्रयव्यवहारं करोति, 'निमित्तेन च' शुभाशुभसूचकेन 'व्यवहरति' द्रव्यार्जनं करोति, अपरं च पूर्ववत्।

मू.(५५७) *सन्नाइपिंडं जेमेइ, नेच्छई सामुदानियं।*
गिहिनिसिज्जं च वाहेइ, पावसमणित्ति वुच्चई॥

वृ.'सन्नाय'त्ति स्वज्ञातयः-स्वकीयस्वजनास्तैर्निजक इति यथेप्सितो यः स्निग्धमधुरादि आहारो दीयते स स्वज्ञातिपिण्डस्तं 'जेमति' भुंक्ते, 'नेच्छति' नाभिलषति सामुदानानि-भिक्षास्तेषां समूहः सामुदानिकम्, 'अचित्त हस्तिधेनोष्टकं' इति ठक्, बहुगृहसम्बन्धिनं भिक्षासमूहमज्ञातोञ्छमितियावत्, गृहिणां निषद्या-पर्यङ्कतूल्यादिका शय्या तां च 'वाहयति'त्ति सुखशीलतयाऽऽरोहति, शेषं तथैवेति सूत्रद्वयार्थः॥

सम्प्रत्यध्ययनार्थमुपसंहरन्नुक्तरूपदोषोसेवनपरिहारयोः फलमाह-

मू.(५५८) *एयारिसे पंचकुसीलसंवुडे, रूवंधरे मुनिपवराण हिट्ठिमे।*
अयंसि लोए विसमेव गरहिए, न से इहं नेव परत्थलोए॥

वृ.'एतादृशः' यादृश उक्त 'पञ्चे'ति पञ्चसङ्ख्यः कुत्सितं शीलमेषां कुशीलाः-पार्श्वस्थादयः समाहृताः पञ्चकुशीलं तद्वदसंवृतः-अनिरुद्धाश्रवद्वारः पञ्चकुशीलासंवृतो रूपं-रजोहरणादिकं वेषं धारयति रूपधरः सूत्रे तु प्राकृतत्वाद्विन्दुनिर्देशः, 'मुनिप्रवराणाम्' अतिप्रधानतपस्विनां 'हिट्ठिमो' अधस्ताद्वर्त्ती, अतिजघन्यसंयमस्थानवर्त्तित्वान्निकृष्ट इत्यर्थः। एतत्फलमाह-

'अयंसि'त्ति अस्मिन् 'लोके' जगति 'विषमिव'त्ति गर इव 'गर्हितः' निन्दितो, भ्रष्टप्रतिज्ञो हि प्राकृतजनैरपि निन्द्यते धिगेनमिति, अत एव न स 'इह' इतीह लोके 'नैत्रे'ति नापि परत्र लोके, परमार्थतः सन्निति शेषः, यो हि नैहिकमामुष्मिकं वा कञ्चन गुणमुपार्जयति स तद्गुणनाशाम-प्रवेशतस्तत्त्वतोऽविद्यमान एवेति।

मू. (५५१) *जे वज्जए एए उ सदा उ दोसे, से सुव्वए होइ मुणीण मज्झे।*
अयंसि लोए अमयं व पूइए, आराहए दुहओ लोगमिणं॥ त्तिबेमि॥

वृ. यः 'वर्जयति' परित्यजति 'एतान्' उक्तरूपान् 'सया उ'त्ति सदैव दोषान् यथासुख विहारादिपापानुष्ठानरूपान् स तथाविधः 'सुव्रतः' निरतिचारतया प्रशस्यव्रतो भवति मुनीनां मध्ये, किमुक्तं भवति?-भावमुनित्वेनासौ मुनि मध्ये गण्यते, तया चाऽस्मिन् लोके 'अमृतमिव' सुरभोज्यमिव 'पूजितः' अभ्यर्हित आराधयति 'दुहतो लोगमिणं'ति इहलोकपरलोकभेदेन द्विविधं लोकम् 'इणं'ति इममनेन चातिप्रतीततया प्रत्यक्षं निर्दिशतीति, इहलोके च सकललोक-पूज्यतया परलोके च सुगत्यवाप्तेः, ततः पापवर्जनमेव विधेयमिति भाव इति सूत्रद्वयार्थः॥

'इति' परिसमाप्तौ, ब्रवमीति पूर्ववत्, नयाः अपि तथैव॥

अध्ययनं - १७ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे सप्तदशअध्ययनस्य भद्रबाहुस्वामिरचिता निर्युक्ति एवं शान्त्याचार्य विरचिता टीका परिसमाप्ता।

अध्ययनं १८- संयतीय

वृ. उक्तं सप्तदशमध्ययनम्, अधुनाऽष्टादशमारभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तराध्ययने पापवर्जनमुक्तं, तच्च संयतस्यैव, स चो भोगर्द्धित्यागत एवेति स एव संजयोदाहरणत इहोच्यत इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य च चतुरनुयोगद्वारप्ररूपणा प्राग्वद्यावन्नामनिष्पन्ननिक्षेपे संजयीयमिति नाम, ततः सञ्जयशब्दनिक्षेपायाह निर्युक्तिकृत्-

नि.[३९२] निक्खेवो संजइज्जंमि चउ०॥
नि.[३९३] जाणगसरीरभविए०॥
नि.[३९४] संजयनामं गोयं वेयंतो भावसंजओ होइ।
तत्तो समुट्ठियमिणं अज्झयणं संजइज्जंति॥

वृ. गाथात्रयं व्याख्यातप्रायं, नवरं 'निक्खेवो संजइज्जंमि'त्ति 'निक्षेपः' न्यासः सञ्जयीयाध्ययने अर्थात्सञ्जयस्येति गम्यते। तथा च तृतीयगाथायां 'संजयनामं गोयं वेयंतो' इत्युक्तं 'तत' इति सञ्जयादभिधेयभूतात्, 'समुत्थितम्' उत्पन्नम् इदं अध्ययनं सञ्जयीयमिति, तस्मा-द्धेतोरुच्यत इति गाथात्रयार्थः॥ इत्युक्तो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिष्पन्नस्या-वसरः, स च सूत्रे सति भवत्यतः सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (५६०) *कंपिल्ले नयरे राया, उदिन्नबलवाहणे।*
नामेणं संजओ नाम, मिगव्वं उवनिग्गए॥

वृ. काम्पिल्ये नगरे 'राजा' नृपतिरुदीर्णम्-उदयप्राप्तं बलं-चतुरङ्गं वाहनं च-गिल्लिथिल्लया-

दिरूपं यस्य सोऽयमुदीर्णबलवाहनः, यद्वा बलं-शरीरसामर्थ्यं वाहनं-गजाश्वादि, पदात्युपलक्षणं चैतत्, स च 'नाम्ना' अभिधानेन सञ्जयः 'नाम' इति प्राकाश्ये, ततोऽयमर्थः-संजय इति नाम्ना प्रसिद्धो, मृगव्यां-मृगयां प्रतीति शेषः, उप-सामीप्येन निर्गतो-निष्क्रान्त उपनिर्गतस्तत एव नगरादिति शेष इति सूत्रार्थः ॥ स च कीदृग् विनिर्गतः किं च कृतवानित्याह-

मू.(५६१) *हयानीए गयानीए, रहानीए तहेव य।*
पायत्तानीए महया, सव्वओ परिवारिए॥

मू.(५६२) *मिए छुहित्ता हयगओ, कंपिल्लुज्जाणकेसरे।*
भीए संते मिए तत्थ, वहेइ रसमुच्छिए॥

वृ. पाठसिद्धं, नवरं पदातीनां समूहः पादातं तस्यानीकं-कटकं पादातानीकं तेन, सुब्व्यत्ययः प्राग्वत्, एवं पूर्वेष्वपि, 'महता' बृहत्प्रमाणेन मृगान् क्षिप्त्वा 'कंपिल्लुज्जाणकेसरि' त्ति तस्यैव काम्पील्यस्य नगरस्य सम्बन्धिनि केशरनाम्न्युद्याने 'भीतान्' त्रस्तान् सतो 'मितान्' परिमितान् 'तत्र' तेषु मृगेषु मध्ये 'वहेइ' त्ति व्यथति हन्ति वा, शरैरिति गम्यते, रसः-तत्पिशितास्वादस्तत्र मूर्च्छितो-गृद्धो रसमूर्च्छित इति सूत्रद्वयार्थः ॥ अमुमेवार्थं सूत्रस्पर्शिकनिर्युक्त्या स्पष्टयितुमाह-

नि.[३९५] कंपिल्लपुरवरंमि अ नामेणं संजओ नरवरिंदो।
सो सेनाए सहिओ नासीरं निग्गओ कयाइ॥

नि.[३९६] हयमारूढो राया मिए छुहित्ताण केसरुज्जाने।
ते तत्थ उ उत्तत्थे वहेइ रसमुच्छिओ संतो॥

वृ. गाथाद्वयं प्रतीतमेव, नवरमिह नासीरं-मृगयां प्रति 'उत्त्रस्तान्' अतिभीतानिति गाथाद्वयार्थः ॥ अत्रान्तरे यदभूत्तदाह सूत्रकृत्-

मू.(५६३) *अह केसरंमि उज्जाने, अनगारे तवोधने।*
सज्झायझाणजुत्तो, धम्मज्झाणं झियायइ॥

वृ. 'अथ' अनन्तरं केशरेउद्याने ऽनगारस्तपोधनः स्वाध्यायः-अनुप्रेक्षणादिर्ध्यानं-धर्मध्यानादि ताभ्यां युक्तो-यथाकालं तदासेवकतया सहितः स्वाध्यायध्यानयुक्तोऽत एव 'धर्मध्यानम्' आज्ञाविजयादि 'झियायइ' त्ति ध्यायति चिन्तयति क्व ?

मू.(५६४) *अप्फोवमंडवंमी, झायई झवियासवे।*
तस्सागए मिए पासं, वहेइ से नराहिवे॥

वृ. 'अप्फोवमंडवंमि' त्ति अप्फोवमण्डवमिति वृक्षाद्याकीर्णं, तथा च वृद्धाः-अप्फोव इति, किमुक्तं भवति ?-आस्तीर्णे, वृक्षगुच्छगुल्मलतासंछन्न इत्यर्थः, 'मण्डपे' नागवल्ल्यादिसम्बन्धिनि ध्यायति धर्मध्यानमिति गम्यते, पुनरभिधानमतिशयख्यापकं, झवियत्ति-क्षपिता निर्मूलिता आश्रवाः-कर्मबन्धहेतवो हिंसादयो येन स तथा, 'तस्य' इत्युक्तविशेषणान्वितस्यानगारस्य 'पार्श्वे' समीपमिति सम्बन्धः, 'आगतान्' प्राप्तान् मृगान् 'वहेइति' त्ति विध्यति हन्ति वा 'स' इति सञ्जयनामा 'नराधिपः' राजेति सूत्रद्वयार्थः ॥ अमुमेवार्थं सविशेषमाह निर्युक्तिकृत्-

नि.[३९७] अह केसरमुज्जाने नामेणं गद्दभालि अनगारो।
अप्फोवमंडवंमि अ झायइ झाणं झविअदोसो॥

वृ. अहेति गाथा व्याख्यातप्रायैव, नवरं 'नाम्ना' अभिधानेन गर्दभालि· गर्दभालिनामेत्यर्थः, 'झविय'त्ति क्षपिता दोषाः-कर्माश्रवहेतुभूता हिंसादयो येन स तथा ॥ पुनस्तत्र यदभूत्तदाह-

मू.(५६५) *अह आसगओ राया, खिप्पमागम्म सो तहिं।*
हए मिए उ पासित्ता, अनगारं तत्थ पासई ॥

वृ. 'अथ' अनन्तरम् 'अश्वगतः' तुरगारूढो राजा 'क्षिप्रं' शीघ्रमागत्य 'स' इति सञ्जयनामा 'तस्मिन्' यत्र मण्डपे स भगवान् ध्यायति, 'हतान्' विनाशितान् मृगान् तुशब्द एवकारार्थस्ततो मृगानेव, न पुनरनगारमित्यर्थः, 'पासित्त'त्ति दृष्ट्वा 'अनगारं' साधुं 'तत्र' इति तस्मिन्नेव स्थाने पश्यतीति सूत्रार्थः ॥ ततः किमसावकार्षीदित्याह-

मू.(५६६) *अह राया तत्थ संभंतो, अनगारो मनाऽऽहओ।*
मए उ मंदपुन्नेणं, रसगिद्धेण घंतुणा ॥

वृ. अथ राजा 'तत्रे'ती तद्दर्शने सति 'संभ्रान्तः' भयव्याकुलो, यथाऽनगारो-मुनिर्मनागिति-स्तोकेनैव 'आहतः' विनाशितः, तदासन्नमृगहननादित्यभिप्रायः, मया तु मन्दपुण्येन 'रसगृद्धेन' रसमूर्च्छितेन 'घंतुण'त्ति घातुकेन हनन शीलेनेत्यर्थः ॥ ततश्च-

मू.(५६७) *आसं विसज्जइत्ताणं, अनगारस्स सो निवो।*
विनएणं वंदई पाए, भगवं! इत्थ मे खमे ॥

वृ. 'अश्वं' तुरगं 'विसृज्य' विमुच्य 'णं' प्राग्वत्, 'अनगारस्य' उक्तस्यैव 'सः' सञ्जयनामा नृपः 'विनयेन' उचितप्रतिपत्तिरूपेण 'वन्दते' स्तौति 'पादौ' चरणौ, अत्यादरख्यापकं चैतत् 'पादावपि तस्य भगवतः स्तवनीयाविति, वक्ति च-यथा भगवन्! 'अत्र' एतस्मिन् मृगव्ये, मम अपराधमिति शेषः, 'क्षमस्व' सहस्व ॥

मू.(५६८) *अह मोनेन सो भगवं, अनगारो झाणमस्सिओ।*
रायाणं न पडिमंतेइ, तओ राया भयद्दुओ ॥

वृ. 'अथ' इत्यनन्तरं 'मौनेन' वाग्निरोधात्मकेन 'सो'त्ति स गर्दभालिनामा भगवान् अनगारः 'ध्यानं' धर्मध्यानम् 'आश्रितः' स्थितः 'राजान्' नृपं 'न प्रतिमन्त्रयते' न प्रतिवक्ति यथाऽहं क्षमिष्ये न वेति, 'ततः' तत्प्रतिवचनाभावतोऽवश्यमयं क्रुद्ध इति न किमपि मां प्रभाषते इति राजा 'भयद्रुतः' अतीव भयत्रस्तो, यथा न ज्ञायते किमसौ क्रुद्धः करिष्यतीति, उक्तवांश्च यथा-

मू.(५६९) *संजओ अहमस्सीति, भगवं! वाहिराहि मे।*
कुद्धे तेएण अनगारे, दहिज्जा नरकोडिओ ॥

वृ. 'सञ्जयः' सञ्जयनामा राजाऽहमस्मि, मा भूत्रीच एवायमिति सुतरां कोप इत्येतदभिधानमिति, 'इति' अस्माद्धेतोर्भगवन्! 'वाहराहि'त्ति व्याहर-संभाषय 'मे' इति सुब्व्यत्ययान्माम्, अथापि स्यात्-किमेवं भवान् भयद्रुत इत्याह-'क्रुद्धः' कुपितः 'तेजसा' तपोमाहात्म्यजनितेन तेजोलेश्यादिना 'अनगारः' मुनिः 'दहेत्' भस्मसात्यकुर्यात् नरकोटीः, आस्तां शतं सहस्रं वेति, अतोऽत्यन्तभयद्रुतोऽहमिति सूत्रचतुष्टयार्थः ॥ इदमेव व्यक्तीकर्त्तुमाह निर्युक्तिकृत्-

नि.[३९८] अह आसगओ राया तं पासिअ संभमागओ तत्थ।
भणइ अ हा जह इण्हिं इसिवज्झाए मना लित्तो ॥

नि.[३९९] वीसज्जिऊण आसं अह अनगारस्स एइ सो पासं ।
विनएण वंदिऊणं अवराहं ते खमावेइ ॥

नि.[४००] अह मोनमस्सिओ सो अनगारो नवरइं न वाहरइ ।
तस्स तवतेयभीओ इणमट्ठं सो उदाहरइ ॥

नि.[४०१] कंपिल्लपुराहिवई नामेणं संजओ अहं राया ।
तुज्झ सरणागओऽम्हि निद्दहिहा मा मि तेएणं ॥

वृ. गाथाचतुष्टयं स्पष्टमेव, नवरं तं पासिय 'संभमागतो'त्ति मुनिरत्र दृश्यत इत्यसावपि मया विद्धो भविष्यतीत्याकुलत्वमापन्नो, 'भणति त्त' वक्ति च 'हा' इति खेदे यथेदानीं 'इसिवज्झाए'त्ति ऋषिहत्यया मनागपि लिप्तोऽहं स्वल्पेनैव न स्पृष्टः 'तुब्भ'त्ति तव 'शरणागतोऽस्मि' त्वामेव शरणम्-आश्रयं प्रतिपन्नोऽस्मि, ततश्च निर्दाक्षीः 'मा' निषेधे 'मि' इति मां 'तेजसा' तपोजननितेनेति गम्यते, इति गाथाचतुष्टयार्थः ॥ इत्थं तेनोक्ते यन्मुनिरुक्तवांस्तदाह-

मू.(५७०) अभओ पत्थिवा ! तुज्झं, अभयदाया भवाहि य ।
अनिच्चे जीवलोगंमि, किं हिंसाए पसज्जसि ? ॥

वृ. 'अभओ'त्ति अभयं-भयाभावः 'पार्थिव !' नृपते ! आकारोऽलाक्षणिकः, कस्य ?-'तुब्भं'ति तव, न कश्चित्त्वां दहतीति भावः, इत्थं समाश्वास्योपदेशमाह-'अभयदाता च' प्राणिनां त्राणकर्ता 'भवाहि य'त्ति भव, यथा हि भवतो मृत्युभयमेवमन्येषामपीति भावः, चशब्दो योजित एव, अमुमेवार्थं सहेतुकं व्यतिरेकद्वारेणाह-'अनित्ये' अशाश्वते 'जीवलोके' प्राणिगणे, किमिति परिप्रश्ने 'हिंसायां' प्राणिवधरूपायां 'प्रसजसि' अभिष्वक्तो भवसि ?, जीवलोकस्य ह्यनित्यत्वे भवानप्यनित्यस्तत्किमिति-केन हेतुना स्वल्पदिनकृते पापमित्थमुपार्जयसि ?, नैवेदमुचितमिति भावः ॥ इत्थं हिंसात्यागमुपदिश्य राज्यपरित्यागोपदेशमाह-

मू.(५७१) जया सव्वं परिच्चज्ज, गंतव्वमवसस्स ते ।
अनिच्चे जीवलोगंमि, किं रज्जंमि पसज्जसि ? ॥

वृ. यदा 'सर्वं' कोशान्तःपुरादि परित्यज्य-इहैव विमुच्य गन्तव्यं भवान्तरमिति शेषः, तदपि न स्ववशस्य किन्तु अवशस्य-अस्वतन्त्रस्य 'ते' तव, क्व सति ?-अनित्ये जीवलोके, ततः किं 'राज्ये' नृपतित्वे प्रसजसि ?, राज्यपरित्याग एव युक्त इति भावः, पाठान्तरतश्च किं हिंसायां प्रसजसि ?, इह च पुनर्वचनमादरातिशयख्यापनार्थमिति न पुनरुक्तता ॥

जीवलोकानित्यत्वमेव भावयितुमाह-

मू.(५७२) जीवियं चेव रूवं च, विज्जुसंपायचंचलं ।
जत्थ तं मुज्झसी रायं !, पिच्चत्थं नावबुज्झसी ॥

वृ. 'जीवितम्' आयुः 'चः' समुच्चये 'एवे'ति पूरणे 'रूपं च' पिशितादिपुष्टस्य शरीरशोभात्मकं विद्युतः संपातः-चलनचमत्कारो विद्युत्सम्पातस्तद्वच्चञ्चलम्-अतीवास्थिरं विद्युत्सम्पातचञ्चलं 'यत्र' जीविते रूपे च 'तं'ति त्वं 'मुह्यसि' मोहं विधत्से, मूढश्च हिंसादौ प्रसजसीति भावः, 'राजन्' नृपते ! 'प्रेत्यार्थं' परलोकप्रयोजनं नावबुध्यसे, किमुक्तं भवति ?- जानास्यपि न किं, पुनस्तत्करणमिति ॥

मू. (५७३) दाराणि य सुया चेव, मित्ता य तह बंधवा।
जीवंतमनुजीवंति, मयं नानुव्वयंति य॥

वृ. तथा 'दाराश्च' कलत्राणि प्राकृतत्वान्नपुंसकनिर्देशः, सुताश्चैव 'मित्राणि च' प्रतीतान्येव, तथा 'बान्धवाः' स्वजनाः जीवन्तम् 'अनुजीवन्ति' तदुपार्जितवित्तादिसुभोगत उपजीवन्ति, मृतं 'नानुव्वयंति य'त्ति चशब्दस्यापिशब्दार्थत्वादनुव्रजन्त्यपि न, किं पुनः सह यास्यन्तीति, तदनेन दारादीनामपि कृतघ्नतया न तेष्वास्थां विधाय धर्मे उद्यमितव्यमित्युक्तमिति, इदं च सूत्रं चिरन्तनवृत्तिकृता न व्याख्यातं, प्रत्यन्तरेषु च दृश्यत इत्यस्माभिरुल्लिखितम्॥

पुनस्तत्प्रतिबन्धनिराकरणायाह-

मू. (५७४) नीहरंति मयं पुत्ता पियरं परमदुक्खिया।
पियरो अ तहा पुत्ते, बंधू रायं! तवं चरे॥

वृ. 'नीहरंति'त्ति निस्सारयन्ति 'मृतम्' इति गतायुषं 'पुत्राः' सुताः 'पितरं' जनकं 'परमदुःखिताः' अतिशयसञ्जातदुःखा अपि, किं पुनर्ये न तथा दुःखभाज इति भावः, पितरोऽपि तथा पुत्रान्, 'बंधु'त्ति बन्धवश्च बन्धूनिति शेषः, अतश्च किं कृत्यमित्याह-राजन्! तप उपलक्षणत्वाद्दानादि 'चरेः' आसेवस्वेति॥ अपरञ्च-

मू. (५७५) तओ तेणऽज्जिए दव्वे, दारे य परिरक्खिए।
कीलंतऽन्ने नरा रायं!, हट्ठतुट्ठमलंकिया॥

वृ. 'ततो'त्ति मृतानिःसारणादनन्तरं 'तेन' इति मित्रपित्रादिना 'अर्जिते' विढपिते 'द्रव्ये' वित्ते 'दारेषु च' कलत्रेषु च 'परिरक्षितेषु' सर्वापायपरिपालितेषु, उभयत्रार्षत्वादेकवचनं, 'क्रीडन्ति' विलसन्ति तेनैव वित्तेन दारैश्चेति गम्यते 'अन्ये' अपरे राजन्! 'हट्ठतुट्ठमलंकिय'त्ति हृष्टाः-बहिः पुलकादिमन्तः तुष्टः-आन्तरप्रीतिभाजः 'अलंकृताः' विभूषिताः, यत ईदृशी भवस्थितिस्ततो राजन्! तपश्चरेरिति मध्यदीपकत्वादनन्तरसूत्रोक्तेन सम्बन्धः॥

मृतस्य च वृत्तान्त इत्याह-

मू. (५७६) तेनावि जं कयं कम्मं, सुहं वा जइ वा दुहं।
कम्मुणा तेन संजुत्तो, गच्छई उ परं भवं॥

वृ. 'तेनापि' मृतेन यत् 'कृतम्' अनुष्ठितं कर्म 'शुभं वा' पुण्यप्रकृतिरूपं, यद्वा 'सुखं वा' सुखहेतुः 'यदिवे'त्यथवा 'दुःखं' दुःखहेतुः पापप्रकृत्यात्मकमित्यर्थः। कर्मणा तेन सुखहेतुना दुःखहेतुना वा, उत्तरत्र तुशब्दस्यैवकार्थत्वाद् भिन्नक्रमत्वाच्च तेनैव, न तु दुःखपरिरक्षितेनापि द्रव्यादिना 'संयुक्तः' सहितः 'गच्छति' याति 'परम्' अन्यं 'भवं' जन्म, यतश्च शुभाशुभयोरेवानुयायिता ततः शुभहेतुं तप एव चरेरिति भाव इति सूत्रसप्तकार्थः॥

ततस्तद्वचः श्रुत्वा राजा किमचेष्टतेत्याह-

मू. (५७७) सोऊण तस्स सो धम्मं, अनगारस्स अंतिए।
महया संवेगनिव्वेयं, समावन्नो नराहिवो॥

मू. (५७८) संजमो चइउं रज्जं, निक्खंतो जिनसासने।
गद्दभालिस्स भगवओ, अनगारस्स अंतिए॥

वृ. 'श्रुत्वा' आकर्ण्य 'तस्य' इत्यनगारस्य 'स' इति सञ्जयाभिधानो राजा 'धर्मम्' उक्तरूपम् 'अनगारस्य' भिक्षोः 'आन्तिके' समीपे 'महय'त्ति महता आदरेणेति शेषः, सुब्व्यत्ययेन वा महत्, 'संवेगनिर्वेदं' तत्र संवेगो-मोक्षाभिलाषो निर्वेदः--संसारोद्विग्नता 'समापन्नः' प्राप्तः 'नराधिपः' राजा 'सञ्जयः' सञ्जयनामा 'चइउं' त्यक्त्वा 'राज्यं' राष्ट्राश्वपत्यरूपं 'निष्क्रान्तः' प्रव्रजितः 'जिनशासने' अर्हद्दर्शने, न तु सगुतादिदेशितेऽसद्दर्शने एवेति भावः, 'गर्दभालेः' गर्दभालिनाम्नो भगवतोऽनगारस्यान्तिक इति सूत्रद्वयार्थः ॥ सूत्रनवकोक्तमेवार्थं स्पष्टयितुमाह

नि.[४०२] अभयं तुज्झ सरवई ! जलबुब्बुअसंनिभे अ मानुस्से ।
किं हिंसाइ पसज्जसि जाणंतो अप्पणो दुक्खं ? ॥

नि.[४०३] सव्वमिणं चइऊणं अवस्स जया य होइ गंतव्वं ।
किं भोगेसु पसज्जसि ?, किंपागफलोवमनिभेसुं ॥

नि.[४०४] सोऊण य सो धम्मं तस्सऽनगारस्स अंतिए राया ।
अनगारो पव्वइओ रज्जं चइउं गुणसमग्गं ॥

वृ. व्याख्यातप्रायमेव, नवरं 'अप्पणो दुक्खं'ति आत्मनो दुःखमिति- दुःखजनकं मरणमिति शेषः, 'किंपागफलोपमनिभेसु'न्ति किम्पाकफलोपमा निभा--छाया येषां ते तथा आपातमधुरत्व-परिणतिदारुणत्वाभ्यां, तथा 'अनगारः' अविद्यमानगृहो, जात इति शेषः, स च शाक्यादिरपि संभवेदत आह 'पवइओ'त्ति प्रकर्षेण--विषयाभिष्वङ्गादिपरिहाररूपेण व्रजितो-निष्क्रान्तः प्रव्रजितो, भावभिक्षुरितियावत्, तथा गुणाः-कामगुणा मनोज्ञशब्दादय आज्ञैश्वर्यादयो वा तैः समग्रं-सम्पूर्णं गुणसमग्रमिति गाथात्रयार्थः ॥

स चैवं गृहीतप्रव्रज्योऽधिगतहेयोपादेयविभागो दशविधचक्रवालसाचाचारीरतश्चानियत-विहारितया विहरन् तथाविधसन्निवेशमाजगाम, तत्र च तस्य यदभूत्तदाह-

मू.(५७९) *चिच्चा रुं पव्वइओ, खत्तिओ परिभासई ।*
जहा ते दीसई रूवं, पसन्नं ते तहा मनो ।

वृ. त्यक्त्वा 'राष्ट्रं' ग्रामनगरादिसमुदायं 'प्रव्रजितः' प्रतिपन्नदीक्षः 'क्षत्रियः' क्षत्रजातिरनिर्दिष्टनामा परिभाषते, सञ्जयमुनिमित्युपस्कारः, स हि पूर्वजन्मनि वैमानिक आसीत्, ततश्च्युतः क्षत्रियकुलेऽजनि, तत्र च कुतश्चित्तथाविध निमित्ततः स्मृतपूर्वजन्मा तत एव चोत्पन्नवैराग्यः प्रव्रज्यां गृहीतवान्, गृहीतप्रव्रज्यश्च विहरन् सञ्जयमुनिं दृष्ट्वा तद्विमर्शार्थमिदमुक्तवान्--यथा ते 'दृश्यते' अवलोक्यते 'रूपम्' आकृतिः 'प्रसन्नं' विकाररहितं 'ते' तव 'तथा' तेनैव प्रकारेण प्रसन्नमिति प्रक्रमः, किं तत् ?-'मनः' चित्तं, न ह्यन्तः कलुषतायां बहिरप्येवं प्रसन्नतासम्भवः,

मू.(५८०) *किंनामे किंगुत्ते कस्सट्ठाए व माहणे ?,*
कहं पडियरसी बुद्धे ?, कहं विनीयत्ति वुच्चसि ? ॥

वृ. तथा 'किंनामा' किमभिधानः 'किंगोत्रः' किमन्वयः 'कस्सट्ठाए व'त्ति कस्मै वा 'अर्थाय' प्रयोजनाय 'माहणे'त्ति मा वधीत्येवंरूपं मनो वाक् क्रिया च यस्यासौ माहनः, सर्वे धातवः पचादिषु दृश्यन्त इति वचनात्पचादित्वादच्, स चैवंविधः प्रव्रजित एव संभवत्यतः किं वा प्रयोजनमुद्दिश्य प्रव्रजितः, 'कथं' केन प्रकारेण 'प्रतिचरसि' सेवसे, कान् ?-'बुद्धान्'

आचार्यदीन्, कथं 'विनीय'त्ति 'विनीतः' विनयवानित्युच्यत इति सूत्रद्वयार्थः ॥ सञ्जयमुनिराह -

मू. (५८१) *संजओ नाम नामेणं, तहा गुत्तेण गोयमो।*
गद्दभाली ममायरिया, विज्जाचरणपारगा ॥

वृ. यदुक्तं त्वया-किंनामा त्वमिति, तत्र सञ्जयो नाम नाम्ना । यच्चावोचः-किंगोत्रः ? इति, तत्राह-तथा 'गोत्रेण' अन्वेयन गोतमः, उभयत्राहमिति गम्यते, शेषप्रश्नत्रयप्रतिवचनमाह - 'गर्दभालयः' गर्दभाल्यभिधाना मम 'आचार्याः' धर्मोपदेशकत्वादिना, विद्यतेऽनया तत्त्वमिति विद्या- श्रुतज्ञानं तथा चर्यत इति चरणं-चारित्रं विद्या च चरणं च विद्याचरणे तयोः पारगाः-पर्यन्तगामिनो विद्याचरणपारगाः, एवं च वदतोऽयमाशयः-यथा गर्दभालिभिर्धर्माचार्यैर्जाविद्या-तान्निवर्त्तितोऽहं, विद्याचरणपारगत्वाच्च तैस्तन्निवृत्तौ मुक्तिलक्षणं फलमुक्तं, ततस्तदर्थं माहनो - ऽस्मि, यथा च तदुपदेशतस्तथा गुरून् प्रतिचरामि, तदुपदेशासेवनाच्च विनीत इति सूत्रार्थः ॥

इत्थं विमृश्य तद्गुणबहुमानाकृष्टचेता अपृष्टोऽपि क्षत्रिय इदमाह-

मू. (५८२) *किरियं अकिरियं विनयं, अन्नाणं च महामुनी!।*
एएहिं चउहिं ठाणेहिं, मेअन्ने किं पभासई ? ॥

वृ. 'क्रिया' अस्तीत्येवंरूपा, लिङ्गव्यत्ययान्नपुंसकनिर्देशः, 'अक्रिया' तद्विपरीता 'विनयः' नमस्कारकरणादिः, लिङ्गव्यत्ययः प्राग्वत्, तथा ज्ञानं-वस्तुतत्त्वावगमस्तदभावोऽज्ञानं, 'च:' समुच्चये, 'महामुने !' सम्यक्प्रव्रज्याप्रतिपत्तिगुरुपरिचर्यादिकरणतः प्रशस्यते ! 'एतैः' क्रियादिभिश्चतुर्भिः तिष्ठन्त्येषु कर्मवशगा जन्तव इति स्थानानि-मिथ्याऽध्यवसायाधारभूतानि तैः, 'मेयन्ने'त्ति, मीयत इति मेयं - ज्ञेयं जीवादिवस्तु तज्जानन्तीति मेयज्ञाः क्रियादिभिश्चतुर्भिः स्थानैः स्वस्वाभिप्रायकल्पितैर्वस्तुतत्त्वपरिच्छेदिन इतियावत्, 'किम्' इति कुत्सितं 'पभासइ' - त्ति प्रकर्षेण भाषन्ते प्रभाषन्ते, विचारक्षमत्वात्, तथाहि-ये तावत्क्रियावादिनस्तेऽस्तिक्रिया-विशिष्टमात्मानं मन्यमाना अपितस्य सदा विभुत्वाविभुत्वकर्तृत्वाकर्तृत्वादिभिर्विप्रतिपद्यन्ते, उक्तं हि वाचकैः-क्रियावादिनो नाम येषामात्मनोऽस्तित्वं प्रत्यविप्रतिपत्तिः, किन्तु स विभुर-भविभुः कर्त्ताऽकर्त्ता क्रियावानितरो मूर्त्तिमानमूर्त्तिरित्येवमाद्याग्रहोपहतप्रीतयस्तेऽस्ति माता पिताऽस्ति न कुशलाकुशलकर्मवैफल्यं न न सन्ति गतय इत्येवंप्रतिज्ञाश्च, इह च विभुत्वं व्यापित्वं, तच्चात्मनो न घटते, शरीर एव तल्लिङ्गभूत चैतन्योपलब्धेः, न च वक्तव्यमात्मनोऽ-व्यापित्वे 'सुखदुःखबुद्धीच्छाद्वेषप्रयत्न धर्माधर्मसंस्कारा नवात्मगुणा' इतिवचनात्तद्गुणयो-र्धर्माधर्मयोरप्यव्यापित्वं, तथा च द्वीपान्तरगतदेवदत्तादृष्टाकृष्टमणिमुक्तादीनां नेहागमनं स्यादिति, विभिन्नदेशस्याप्ययस्कान्तादेरयः प्रभृतिवस्त्वाकर्षणशक्तिदर्शनाद्धर्माधर्मयोरपि शरीरमात्रव्यापित्वेऽपि तद्वद्विप्रकृष्टवस्त्वाकर्षकत्वादिति न तावद्विभुरात्मा युज्यते ।

तथाऽविभुरप्यंगुष्ठपर्याद्यधिष्ठानो यैरिष्यते तेषां सकलशरीरव्यापिचैतन्यासत्त्वं, तदसत्त्वाच्च शेषशरीरावयवेषु शस्त्रादिभेदादौ वेदनानुभवासंभवो, न चैतद् दृष्टमिष्टं वा, एवं सर्वदा कर्तृत्वा-दिकमपि यथा न युज्यते तथा स्वधिया वाच्यं १ । ये त्वक्रियावादिनस्तेऽस्तीतिक्रियाविशिष्ट-मात्मानं नेच्छन्त्येव, अस्तित्वे वा शरीरेण सहैकत्वान्यत्वाभ्यामवक्तव्यमिच्छन्ति, एकत्वे ह्यविनष्टशरीरावस्थितौ न कदाचिन्मरणप्रशस्तिः, आत्मनः शरीरानन्यत्वेनावस्थितत्वात्, तथा

मुक्त्यभावाद्यनेकदोषापत्तिश्च, शरीरान्यत्वे तु शरीरच्छेदादौ तस्य वेदनाऽभावप्रसङ्गः, तस्मादवक्तव्य एवेति, अक्रियावादित्वं चैषां कथञ्चिद्भेदाभेदलक्षणप्रकारान्तराभावेन तदभावस्यैवावधारणात्, येऽप्यनुपलब्धेरन्तराभावः सत्त्वमित्यत्रेति तेषामपि तदस्तित्वाभ्युपगमेऽप्यनुपचरितपरलोकाद्यसम्भवात् तत्त्वतस्तदसत्त्वमेवेत्यक्रियावादित्वम्, उक्तं हि वाचकैः "ये पुनरिहाक्रियावादिनस्तेषामात्मैव नास्ति, न चावक्तव्यः शरीरेण सहैकत्वान्यत्वे प्रति, उत्पत्त्यनन्तरप्रलयस्वाभावको वा, तस्मिन्ननिर्णिक्ते च कर्तृत्वादिविशेषमूढा एवे"ति, अमीषां तु विचाराक्षमत्वमात्माऽस्तित्वस्य प्राक् प्रत्यक्षानुमानलक्षणप्रमाणद्वयसमधिगम्यत्वेन साधनात्, तस्य च शरीरात्कथञ्चिद्भिन्नाभिन्नरूपतया तत्र तत्र वक्तव्ये (व्यत्वे)न । स्थापितत्वात्, क्षणिकपक्षस्य तु सामुच्छेदिकनिह्नववक्तव्यतायामेवोन्मूलितत्वादिति २ ।

विनयवादिनो विनयादेव मुक्तिमिच्छन्ति, यत उक्तं-"वैनयिकवादिनो नाम येषां सुरासुरनृपतपस्विकरितुरगहरिणगोमहिष्यजाविकश्वशृगालजलचरकपोतकाकोलूकचटकप्रभृतिभ्यो नमस्कारकरणात् क्लेशनाशोऽभिप्रेतो, विनयाच्छ्रेयो भवति नान्यथेत्यध्यवसिताः" एतेऽपि न विचारसहिष्णवो, न हि विनयमात्रादिहापि विशिष्टानुष्ठानविकलादभिलषितार्थावाप्तिरवलोक्यते, नापि चैषां विनययार्हत्वं, येन पारलौकिकश्रेयोहेतुता भवेत्, तथाहि-लोकसमयवेदेषु गुणाभ्यधिकस्यैव विनयार्हत्वमिति प्रसिद्धिः, गुणास्तु तत्त्वतो ज्ञानध्यानानुष्ठानात्मका एव, न सुरादीनामज्ञानाश्रवाविरमणादिदोषदूषितानामेतेष्वन्यतरस्यापि गुणस्य सम्भव इति कथं यदृच्छया विधीयमानस्य तस्य श्रेयोहेतुतेति ३ ।

अज्ञानवादिनास्त्वाहुः-यथेदं जगत् कैश्चिद् ब्रह्मादिविवर्त इष्यते, अन्यैः प्रकृतिपुरुषात्मकमपरैर्द्रव्यादिषडेभेदं तदपरैश्चतुरार्यसत्यात्मकमितरैर्विज्ञानमयमन्यैस्तु शून्यमेवेत्यनेकधा भिन्नाः पन्थानः, तथाऽऽत्माऽपि नित्यानित्यादिभेदतोऽनेकधैवोच्यते, तत्को ह्येतद्वेद किं चानेन ज्ञातेन ?, अपवर्गं प्रत्यनुपयोगित्वात् ज्ञानस्य, केवलं कष्टं तप एवानुष्ठेयं, न हि कष्टं विनेष्टसिद्धिः, तथा चाह-'अज्ञानिका नाम येषामियमुपधृतिः, यथेह ज्ञानाधिगमप्रयासोऽपवर्गं प्रति अकिञ्चित्करो, धीरैर्व्रततपोभिरपवर्गोऽवाप्यते' इति ।

विचारासहत्वं चैषां विज्ञानरहितस्य महतोऽपि कष्टस्य तिर्यग्नारकादीनामिवापवर्गं प्रत्यहेतुत्वात्, तदन्तरेण व्रततपोपसर्गादीनामपि स्वरूपापरिज्ञानतः क्वचित्प्रवृत्त्यसम्भवादिति । एषां च क्रियावादिनामुत्तरोत्तरभेदतोऽनेकविधत्वं, उक्तं वाचकैः-"एषां मौलेषु चतुर्षु कल्पेष्ववस्थितेषु तद्भेदाः सुबहवोऽवनिरुहशाखाप्रशाखानिकरवदवगन्तव्याः", तत्र तावच्छतमशीतं क्रियावादिनां, अक्रियावादिनश्च चतुरशीतिसङ्ख्याः, अज्ञानिकाः सप्तषष्टिविधाः, वैनयिकवादिनो द्वात्रिंशत्, एवं त्रिषष्ट्यधिकशतत्रयं, सर्वेऽपि चामी विचाराक्षमत्वात्कुत्सितं प्रभाषन्ते इति स्थितमिति सूत्रार्थः ॥ न चैतत्स्वाभिप्रायेणैवोच्यते, किन्तु-

मू. (५८३) *इह पाउकरे बुद्धे, नायए परिनिव्वुडे ।*
विज्जाचरणसंपन्ने, सच्चे सच्चपरक्कमे ॥

वृ. 'इती'त्येतत् क्रियादिवादिनः किं प्रभाषन्ते ? इत्येवंरूपं 'पाउकरे'त्ति प्रादुरकार्षीत्-प्रकटितवान् 'बुद्धः' अवगततत्त्वः सन् ज्ञात एव ज्ञातकः-जगत्प्रतीतः क्षत्रियो वा, स चेह

प्रस्तावान्महावीर एव, 'परिनिर्वृत्तः' कषायानलविध्यापनात्समन्ताच्छीतीभूतो विद्याचरणाभ्यामर्थात् ज्ञानचारित्राभ्यां संपन्नो-युक्तो विद्याचरणसंपन्नोऽत एव 'सत्यः' सत्यवाक्, तेषां सत्यः-अवितथस्तात्त्विकत्वेन परे-भावशत्रवस्तेषामाक्रमणं आक्रमः-अभिभवो यस्यासौ सत्यपराक्रम इति सूत्रार्थः ॥ तेषां च फलमाह-

मू.(५८४) *पडंति नरए घोरे, जे नरा पावकारिणो।*
दिव्वं च गइं गच्छंति, चरित्ता धम्ममारियं॥

वृ. 'पतन्ति' गच्छन्ति 'नरके' सीमन्तकादौ 'घोरे' नित्यान्धकारादिना भयानके ये नराः उपलक्षणत्वात्स्त्र्यादयो वा पातयति नरकादिषु जन्तुमिति पापं तच्च हिंसाद्यनेकधा, इह त्वसत्प्ररूपणैव, तत्कर्तुम्-अनुष्ठातुं शीलमषामिति पापकारिणः, ये त्वेवंविधा न भवन्ति ते किमित्याह-'दिव्यां च गतिं' देवलोकगतिं, चशब्दः पुनरर्थे, स च पूर्वेभ्यो विशेषद्योतकः, 'गच्छन्ति' यान्ति 'चरित्वा' आसेव्य धर्मः-श्रुतधर्मादिरनेकविधः, इह च सत्प्ररूपणारूपः श्रुतधर्म एव तं, आर्यं-प्राग्वत्, तदयमभिप्रायः-असत्प्ररूपणापरिहारेण सत्प्ररूपणापरणैव च भवता भवितव्यमिति सूत्रार्थः ॥ कथं पुनरमी पापकारिणा इत्याह-

मू.(५८५) *मायावुइयमेयं तु, मुसा भासा निरत्थिया।*
संजममाणोऽवि अहं, वसामि इरियामि य॥

वृ. मायया-शाठ्येन वुइयंति-उक्तं मायोक्तम् 'एतत्' यदनन्तरं क्रियादिवादिभिरुक्तं, 'तुः' एवकारार्थो भिन्नक्रमश्च मायोक्तमेव, अतश्चैतत् 'मृषा' अलीका 'भाषा' उक्तिः 'निरर्थिका' सम्यगभिधेयशून्या, तत एव च 'संजममाणोऽवि'त्ति 'अपिः' एवकारार्थस्ततः संयच्छन्नेव-उपरमन्नेव तदुक्त्याकर्णनादितः 'अहम्' इत्यात्मनिर्देशे विशेषतस्तत्स्थिरीकरणार्थम्, उक्तं हि-"ठियतो ठावए परं"ति, 'वसामि' तिष्ठामि उपाश्रय इति शेषः, 'इरियामि य'त्ति ईरे च-गच्छामि च गोचरचर्यादिष्विति सूत्रार्थः ॥ इदमपि सूत्रं प्रायो न दृश्यते। कुतः पुनस्त्वं तदुक्त्याकर्णनादिभ्यः संयच्छसीत्याह-अनन्तरसूत्राभावे च यदुक्तं चतुर्भिः स्थानैर्मेयज्ञाः किंप्रभाषन्ते इति, तत्कुत इत्याह-

मू.(५८६) *सव्वे ते विइया मज्झं, मिच्छादिट्ठी अनारिया।*
विज्जमाणे परे लोए, सम्मं जाणामि अप्पगं॥

वृ. 'सर्वे' निरवशेषाः 'ते' क्रियादिवादिनः 'विदिताः' ज्ञाता मम, यथाऽमी 'मिच्छदिट्ठि'त्ति मिथ्या-विपरीता परलोकात्माद्यपलापित्वेन दृष्टिः-बुद्धिरेषामिति मिथ्यादृष्टयः तत एव, 'अनार्याः' अनार्यकर्मप्रवृत्ताः, कथं पुनस्त एवंविधास्ते विदिता इत्याह-'विद्यमाने' सति 'परलोके' अन्यजन्मनि 'सम्यग्' अविपरीतं 'जानामि' अवगच्छामि 'अप्पगं'ति आत्मानं, ततः परलोकात्मनोः सम्यग्वेदनात् ममैवंविधत्वेन विदितास्ततोऽहं तदुक्त्याकर्णनादितः संयच्छामि किंप्रभाषकाश्चैत इति सूत्रार्थः ॥ कथं पुनस्त्वमात्मानमन्यजन्मनि जानासीत्याह-

मू.(५८७) *अहमासी महापाणे, जुइमं वरिससओवमे।*
जा सा पाली महापाली, दिव्वा वरिससओवमा॥

वृ. 'अहमासि'त्ति अहमभूवं 'महाप्राणे' महाप्राणनाम्नि ब्रह्मलोकविमाने 'द्युतिमान्' दीप्तिमान् 'वरिससतोवमे'त्ति वर्षशतजीविना उपमा-दृष्टान्तो यस्यासौ वर्षशतोपमो मयूरव्यं-सकादित्वात्समासः, ततोऽयमर्थः-यथेह वर्षशतजीवी इदानीं परिपूर्णायुरुच्यते, एवमहमपि तत्र परिपूर्णायुरभूवं, तथाहि-या सा पालिरिव पालिः-जीवितजलधारणाद् भवस्थितिः, सा चोत्तरत्र महाशब्दोपादानादिह पल्योपमप्रमाणा, 'महापाली' सागरोपमप्रमाणा, तस्या एव महत्त्वात्, दिवि भवा दिव्या वर्षशतेनोपमा यस्याः सा वर्षशतोपमा, यथा हि वर्षशतमिह परमायुः तथा तत्र महापाली, उत्कृष्टतोऽपि हि तत्र सागरोपमैरेवायुरुपनीयते, न तूत्सर्पिण्यादिभिः, अथवा-

"योजनं विस्तृतः पल्यस्तथा योजनमुत्सृतः ।
सप्तरात्रप्ररूढानां, केशाग्राणां स पूरितः ॥१॥
ततो वर्षशते पूर्णे, एकैकं केशमुद्धरेत् ।
क्षीयते येन कालेन, तत्पल्योपममुच्यते ॥२॥"

इति वचनाद्वर्षशतैः केशोद्धारहेतुभिरुपया अर्थात्पल्यविषया यस्या सा वर्षशतोपमा, द्विविधाऽपि स्थितिः, सागरोपमस्यापि पल्योपमनिष्पाद्यत्वात्, तत्र मम महापाली दिव्या भवस्थितिरासीदित्युपस्कारः, अतश्चाहं वर्षशतोपमायुरभूवमिति भावः ।

मू. (५८८) *से चुए बंभलोगाओ, माणुस्सं भवमागए ।*
अप्पणो य परेसिं च, आउं जाणे जहा तहा ॥

वृ. 'से' इत्यथ स्थितिपरिपालनादनन्तरं 'च्युतः' भ्रष्टः 'ब्रह्मलोकात्' पञ्चमकल्पात् 'मानुष्यं' मनुष्यसम्बन्धिनं 'भवं' जन्म 'आगत' आयातः । इत्थमात्मनो जातिस्मरणलक्षणमतिशयमाख्यायातिशयान्तरमाह-आत्मनश्च परेषां वा 'आयुः' जीवितं 'जाने' अवबुध्ये 'यथा' येन प्रकारेण स्थितिमिति गम्यते 'तथा' तेनैव प्रकारेण न त्वन्यथेत्यभिप्रायः, इति सूत्रद्वयार्थः ॥ इत्थं प्रसङ्गतः परितोषतश्चापृष्टमपि स्ववृत्तान्तमावेद्योपदेष्टुमाह-

मू. (५८९) *नाणा रुइं च छंदं च, परिवज्जिज्ज संजओ ।*
अणट्ठा जे स सव्वत्था, इह विज्जामणुसंचरे ॥

वृ. 'नाने' त्यनेकधा 'रुचिं च' प्रक्रमात्क्रियावाद्यादिमतविषयमभिलाषं 'छन्दश्च' स्वमतिकल्पितमभिप्रायम्, इहापि नानेति सम्बन्धादनेकविधं 'परिवर्जयेत्' परित्यजेत् 'संयतः' यतिः । 'अनर्थाः' अनर्थहेतवो ये च 'सर्वार्थाः' अशेषहिंसादयो गम्यमानत्वात्तान् वर्जयेदिति सम्बन्धः, यद्वा 'सव्वत्थे' त्याकारस्यालाक्षणिकत्वासर्वत्र क्षेत्रादावनर्था इति-निष्प्रयोजना ये च व्यापारा इति गम्यते, तान् परिवर्जयेत्, 'इती' त्येवंरूपां 'विद्यां' सम्यग्ज्ञानरूपामन्विति-लक्षीकृत्य 'संचरेः' त्वं सम्यक् सयमाध्वनि याया इति सूत्रार्थः ॥ अन्यच्च-

मू. (५९०) *पडिक्कमामि पसिणाणं, परमंतेहिं वा पुनो ।*
अहो उट्ठिओ अहोरायं, इह विज्जा तवं चरे ॥

वृ. प्रतीपं क्रामामि प्रतिक्रामामि-प्रतिनिवर्ते, केभ्यः ?-'पसिणाणं'ति सुब्व्यत्ययात् 'प्रश्नेभ्यः' शुभाशुभसूचकेभ्योऽङ्गुष्ठप्रश्नादिभ्यः, अन्येभ्यो वा साधिकरणेभ्यः, तथा परे-गृहस्थास्तेषां मन्त्राः परमन्त्राः-तत्कार्यालोचनरूपास्तेभ्यः, 'वा' समुच्चये 'पुनः' विशेषणे,

विशेषेण परमन्त्रेभ्यः प्रतिक्रमामि, अतिसाधद्यत्वात्तेषां, सोपस्कारत्वात्सूत्रस्यामुनाऽभिप्रायेण यः संयमं प्रत्युत्थानवान् सः 'अहो' इति विस्मये 'हत्थिसउ' धर्म प्रत्युत्थानः, कश्चिदेव हि महात्मैवंविधः संभवति 'अहोरात्रम्' अहर्निशम्, 'इति' इत्येतदनन्तरोक्तं 'विज्ज'त्ति विद्वान जानन् 'तवं'ति अवधारणफलत्वाद्वाक्यस्य तप एव न तु प्रश्नादि, 'चरेः' आसेवस्येति सूत्रार्थः ॥

पुनस्तत्स्थिरीकरणार्थमाह-

मू.(५११) जं च मे पुच्छसी काले, सम्म सुद्धेण (बुद्धेण) चेयसा।
ताइं पाउकरे. बुद्धे, तं नाणं जिनसासने ॥

वृ. यच्च 'मे' इति मां 'पृच्छसि' प्रश्नयसि 'काले' प्रस्तावे 'सम्यग्बुद्धेन' अविपरीतबोधवता 'चेतसा' चित्तेन, लक्षणे तृतीया, 'ता' इति सूत्रत्वात्तत् 'पाउकरे'त्ति 'प्रादुष्करोमि' प्रकटीकरोमि प्रतिपादयामीतियावत्, 'बुद्धः' अवगतसकलवस्तुतत्त्वः, कुतः पुनर्बुद्धोऽस्म्यत आह- 'तदि'ति यत्किञ्चिदिह जगति प्रचरति ज्ञानं-यथाविधवस्त्ववबोधरूपं तज्जिनशासनेऽस्तीति गम्यते, ततोऽहं तत्र स्थित इति तत्प्रसादाद्बुद्धोऽस्मीत्यभिप्रायः, इह च यतस्त्वं सम्यग्बुद्धेन चेतसा पृच्छस्यतः प्रतिक्रान्तप्रश्नादिरप्यहं यत्पृच्छसि तत्प्रादुष्करोमीत्यतः पृच्छ यथेच्छमित्यैदम्पर्यार्थः। अथवाऽत एव लक्ष्यते यथा 'अप्पणो य परेसिं च' इत्यादिना तस्यायुर्विज्ञतामवगम्य सञ्जयमुनिनाऽसौ पृष्टः कियन्ममायुरिति, ततोऽसौ प्राह-यच्च त्वं मां कालविषयं पृच्छसि तत्प्रादुष्कृतवान् 'बुद्धः' सर्वज्ञोऽत तज्ज्ञानं जिनशासने व्यवच्छेदफलत्वाज्जिनशासन एव न त्वन्यस्मिन् सुगतादिशासने, अतो जिनशासन एव यत्नो विधेयो येन यथाऽहं जानामि तथा त्वमपि जानीषे, शेषं प्राग्वदिति सूत्रार्थः ॥ पुनरुपदेष्टुमाह-

मू.(५१२) किरियं च रोअए धीरो, अकिरियं परिवज्जए।
दिट्ठि दिट्ठिसंपन्नो, धम्मं चरसु दुच्चरं ॥

वृ. 'क्रियां च' अस्ति जीव इत्यादिरूपां सदनुष्ठानात्मिकां वा 'रोचयत्' तथा तथा भावनातो यथाऽसावात्मने रुचिता जायते तथा विदध्यात् 'धीरः' मिथ्याहृग्भिरक्षोभ्यः, तथा 'अक्रियां' नास्त्यात्मेत्यादिकां मिथ्याहृक्परिकल्पिततत्तदनुष्ठानरूपां वा 'परिवर्जयेत्' परिहरेत्, ततश्च 'दृष्ट्या' सम्यग्दर्शनात्मिकया हेतुभूतया 'दिट्ठिसंपन्नो'त्ति 'धीर्दृष्टिः शेमुषी धिषणा' इति शाब्दिकश्रुतेर्दृष्टिः-बुद्धिः, सा चेह प्रस्तावात्सम्यग्ज्ञानात्मिका तया संपन्नो-युक्तो दृष्टिसंपन्नः, एवं च सम्यग्दर्शनज्ञानान्वितः सन् 'धर्मं' चारित्रधर्मं 'चर' आसेवस्व 'सुदुश्चरम्' अत्यन्तदुरनुष्ठेयमिति सूत्रार्थः ॥ पुनः क्षत्रियमुनिरेव सञ्जयमुनिं महापुरुषौदारणैः स्थिरीकर्त्तुमाह-

मू.(५१३) एयं पुन्नपयं सुच्चा, अत्थधम्मोवसोहियं।
भरहोऽवि भारहं वासं, चिच्चा कामाइं पव्वए ॥

मू.(५१४) सगरोऽवि सागरंतं, भरहवासं नराहिवो।
इस्सरियं केवलं हिच्चा, दयाए परिनिव्वुडे ॥

मू.(५१५) चइत्ता भारहं वासं, चक्कवट्टी महिड्ढिओ।
पव्वज्जमब्भुवगओ, मघवं नाम महाजसो ॥

मू.(५१६) सणंकुमारो मनुस्सिंदो, चक्कवट्टी महिड्ढिओ।

पुत्तं रज्जे ठवित्ता णं, सोऽवि राया तवं चरे॥

मू.(५९७) चइत्ता भारहं वासं, चक्कवट्टी महिड्ढिओ।
संती संतिकरो लोए, पत्तो गइमनुत्तरं॥

मू.(५९८) इक्खागरायवसहो, कुंथूनाम नरेसरो।
विक्खायकित्ती धिइमं, मुक्खं गओ अनुत्तरं॥

मू.(५९९) सागरंतं जहित्ता णं, भरहवासं नरेसरो।
अरो अ अरयं पत्तो, पत्तो गइमनुत्तरं॥

मू.(६००) चइत्ता भारहं वासं, चक्कवट्टी महिड्ढिओ।
चिच्चा य उत्तमे भोए, महापउमो दमं चरे॥

मू.(६०१) एगच्छत्तं पसाहित्ता, महिं माननिसूरणो।
हरिसेनो, मनुस्सिंदो, पत्तो गइमनुत्तरं॥

मू.(६०२) अन्निओ रायसहस्सेहिं, सुपरिच्चाई दमं चरे।
जयनामो जिनक्खायं, पत्तो गइमनुत्तरं॥

मू.(६०३) दसन्नरज्जं मुइयं, चइत्ता णं मुनी चरे!
दसन्नभद्दो निक्खंतो, सक्खं सक्केण चोइओ॥

मू.(६०४) नमी नमेइ अप्पाणं, सक्खं सक्केण चोइओ।
जहित्ता रज्जं वइदेही, सामन्ने पज्जुवट्ठिओ॥ [प्र.]

मू.(६०५) करकंडू कलिंगाणं, पंचालाण य दुम्मुहो।
नमी राया विदेहाणं, गंधाराण य नग्गई॥

मू.(६०६) एए नरिंदवसभा, निक्खंता जिनसासने।
पुत्ते रज्जे ठवित्ता णं, सामन्ने पज्जुवट्ठिआ॥

मू.(६०७) सोवीररायवसभो, चइत्ता न मुनीचरे।
उद्दायनो पव्वइओ, पत्तो गइमनुत्तरं॥

मू.(६०८) तहेव कासिराया वि, सेओ सच्चपरक्कमो।
कामभोगे परिच्चज्ज, पहणे कम्ममहावणं॥

मू.(६०९) तहेव विजओ राया, अनट्टा कित्तिपव्वए।
रज्जं तु गुणसमिद्धं, पयहित्तु महायसो।

मू.(६१०) तहेवुग्गं तवं किच्चा, अव्वक्खित्तेन चेयसा।
महाबलो रायरिसी, अदाय सिरसा सिरं॥

वृ. सूत्राणि सप्तदश। 'एतत्' अनन्तरोक्तं पुण्यहेतुत्वात्पुण्यं तच्च तत् पद्यते-गम्यतेऽनेनार्थ इति पदं च पुण्यपदं, पुण्यस्य वा पदं-स्थानं पुण्यपदं-क्रियादिवादिस्वरूपनानारुचिपरिवर्जनाद्यावेदकं शब्दसंदर्भं 'श्रुत्वा' आकर्ण्य, अर्थ्यत इत्यर्थः-स्वर्गापवर्गादिः धर्मः-तदुपायभूतः श्रुतधर्मादिस्ताभ्यामुपशोभितं-विभूषितमर्थधर्मोपशोभितं 'भरतोऽपि' भरतनामा चक्रवर्त्यपि, अपिशब्द उत्तरापेक्षया समुच्चये 'भारहं'ति प्राकृतत्वाद्भारतं 'वर्षं' क्षेत्रं 'त्यक्त्वा'

हित्वा 'कामाइं'ति चस्य गम्यमानत्वात् 'कामांश्च' विषयान् प्राकृतत्वान्नपुंसकनिर्देशः, पव्वए'त्ति प्राव्राजीत्।

'सगरोऽवी' त्यादि सर्वमपि स्पष्टं, नवरं 'सागरान्तं' समुद्रपर्यन्तं दिक्त्रये, अन्यत्र तु हिमवत्पर्यन्तमित्युपस्कारः, तथा 'एश्वर्यम्' आज्ञैश्वर्यादि 'केवलं' परिपूर्णमनन्यसाधारणं वा 'दयया' संयमेन 'परिनिर्वृतः' इहैव विध्यातकषायानलत्वाच्छीतीभूतो मुक्तो वा। तथा 'अरो य'त्ति अरनामा च तीर्थकृच्चक्रवर्ती 'अरयं'ति रतस्य रजसो वाऽभावरूपमरतमरजो वा, पाठान्तरतोऽरसं वा-शृंगारादिरसाभावं, प्राप्तः सन् 'प्राप्तः' गतो गतिमनुत्तरां-मुक्तिमित्यर्थः॥

तथा त्यक्त्वोत्तमान् भोगानिति, पुनस्त्यक्त्वेत्यभिधानं भिन्नवाक्यत्वादपौनरुक्त्यं, 'महापद्मः' महापद्मनामा 'चरे'त्ति आचरत्॥

तथा एकं छत्रं-नृपतिचिह्नमस्यामित्येकच्छत्रां तां, कोऽर्थः ?-अविद्यमानद्वितीयनृपतिं 'महीं' पृथ्वीं 'प्रसाध्य' वशीकृत्येति सम्बन्धः, 'माणनिसूरणो'त्ति दसारात्यहङ्कारविनाशकः 'मनुष्येन्द्रः' इति चक्री। तथा 'अन्नितो'त्ति 'अन्वितः' युक्तः 'सुपरिच्चाइ'त्ति सुष्ठु -शोभनेन प्रकारेण राज्यादि परित्यजतीत्येवंशीलः सुपरित्यागी दमं जिनाख्यातमिति सम्बन्धः, 'चरि'त्ति अचारीच्चरित्वा च जयनामा चक्रीति शेषः प्राप्तो गतिमनुत्तराम्। तथा दशार्णो नाम देशस्तद्राज्यं-तदाधिपत्यं 'मुदितं' सकलोपद्रवविरहितं प्रमोदवत् त्यक्त्वा 'णः' प्राग्वत् 'चरे'त्ति अचारीत्, अप्रतिबद्धविहारतया विहृतवानित्यर्थः, साक्षाच्छक्रेण 'चोदितः' अधिकविभूतिदर्शनेन धर्मं प्रति प्रेरितः॥

तथा 'निष्क्रान्ताः' प्रव्रजिता निष्क्रम्य च 'श्रामण्ये' श्रमणभावे 'पर्युपस्थिताः' तदनुष्ठानं प्रत्युद्यत अभूवन्निति शेषः॥ तथा सौवीरेषु राजवृषभः-तत्कालभाविनृपतिप्रधानत्वात्सौवीरराजवृषभः 'चेच्च'त्ति त्यक्त्वा राज्यमिति शेषः प्राग्वत् 'मुनिः' त्रैकाल्यावस्थावेदी सन् 'चरे'त्ति अचारीत्, कोऽसौ ?-'उदायनो'त्ति उदायननामा प्रव्रजितः, चरित्वा च किमित्याह-प्राप्तो गतिमनुत्तराम्॥

'तथैव' तेनैव प्रकारेण 'काशिराजः' काशिमण्डलाधिपतिः श्रेयसि-अतिप्रशस्ये सत्ये-संयमे पराक्रमः- सामर्थ्यं यस्यासौ श्रेयः-सत्यपराक्रमः 'पहणे'त्ति प्राहन्-प्रहतवान् कर्म महावनमिवातिगहनतया कर्ममहावनम्॥

तथैव 'विजयः' इति विजयनामा 'अनट्टा किच्चि पव्वए'त्ति, आर्षत्वाद् अनार्तः-आर्तध्यानविकलः कीर्त्यादीनानाथादिदानोत्थया प्रसिद्धयोपलक्षितः सन् यद्वा अनार्त्ता-सकलदोषविगमतोऽबाधिता कीर्त्तिरस्येत्यनार्त्तकीर्त्तिः सन्, पठ्यते च 'आनट्टाकिइपव्वइ'त्ति, आज्ञा-आगमोऽर्थशब्दस्य हेतुवचनस्यापि दर्शनादर्थो-हेतुरस्याः सा तथाविधा आकृतिरर्थान्मुनिवेषात्मिका यत्र तदाज्ञार्थाकृति यथा भवत्येवं प्राव्राजीद्गुणैः-राज्यगुणैः शब्दादिभिर्वा समृद्धं-संपन्नं गुणसमृद्धं, पूर्वत्र तुशब्दस्यापिशब्दार्थत्वाद्यवहितसम्बन्धत्वाच्च गुणसमृद्धमपि।

तथा 'अद्दाय'त्ति आर्षत्वाद् 'आदित' गृहीतवांस्तद्गमनेन स्वीकृतवान् शिरसेव शिरसा शिरःप्रदानेनेव जीवितनिरपेक्षमिति योऽर्थः, 'शिरं'ति शिर इव शिरः सर्वजगदुपरिवर्त्तितया मोक्षः, पठ्यते च-'आदाय सिरसो सिरिं'ति, अत्र च 'आदाय' गृहीत्वा 'शिरः श्रियं' सर्वोत्तमां

केवललक्ष्मीं परिनिर्वृत इति शेषः, इति सप्तदशसूत्रार्थः ॥ इत्थं महापुरुषोदाहरणैर्ज्ञानपूर्वकक्रियामाहात्म्यमभिधायोपदेष्टुमाह-

मू. (६११) *कहं धीरो अहेऊहिं, उम्मत्तो व्व महिं चरे ? ।*
एए विसेसमादाय, सूरा दढपरक्कमा ॥

वृ. 'कथं' केन प्रकारेण 'धीरः' उक्तरूपः 'अहेतुभिः' क्रियावाद्यादिपरिकल्पितकुहेतुभिः 'उन्मत्त इव' ग्रहगृहीत इव तात्त्विकवस्त्वपलपनेनालजालभाषितया 'महीं' पृथ्वीं 'चरेत्' भ्रमेत् ?, नैव चरेदित्यर्थः, किमिति ?, ये 'एते' अनन्तरोदिता भरतादयः 'विशेषं' विशिष्टतां गम्यमानत्वान्मिथ्यादर्शनेभ्यो जिनशासनस्य 'आदाय' गृहीत्वा मनसि संप्रधार्येतियावत् शूरा दृढप्रपराक्रमा एतदेवाश्रितवन्त इति शेषः, अयमभिप्रायः-यथैते महात्मनो विशेषमादाय कुवादिपरिकल्पितक्रियावाद्यादिदर्शनपरिहारतो जिनशासन एव निश्चितमतयोऽभूवंस्तथा भवताऽपि धीरेण सताऽस्मिन्नेव निश्चितं चेतो विधेयमिति सूत्रार्थः ॥ किञ्च-

मू. (६१२) *अच्चंतनियाणखमा, एसा मे भासिया वई ।*
अतरिंसु तरंतेगे, तरिस्संति अणागया ॥

वृ. अत्यन्तम्-अतिशयेन निदानैः-कारणैः, कोऽर्थः ? -हेतुभिर्न तु परप्रत्ययेनैव, क्षमायुक्ताऽत्यन्तनिदानक्षमा, यद्वा निदानं-कर्ममलशोधनं तस्मिन् क्षमा-समर्था 'एषा' अनन्तरोक्ता पाठान्तरतः 'सर्वा' अशेषा सत्या वा 'मे' मया 'भाषिता' उक्ता 'वाग्' वाणी जिनशासनमेवाश्रयणीयमित्येवंरूपा, अन्या अशोभनतया 'अतीर्षुः' तीर्णवन्तः तरन्ति 'एके' अपरे, पाठान्तरतोऽन्ये, सम्प्रत्यपि तत्कालापेक्षया क्षेत्रान्तरापेक्षया वेत्थमभिधानमिति, तथा तरिष्यन्ति 'अनागताः' भाविनो, भवोदधिमिति सर्वत्र शेष इति सूत्रार्थः ॥ यतश्चैवमतः-

मू. (६१३) *कहं धीरे अहेऊहिं, अहावं परियावसे ।*
सव्वसंगविनिम्मुक्को, सिद्धे भवइ नीरए ॥ त्तिबेमि ॥

वृ. कथं धीरोऽहेतुभिः 'आदाय' गृहीत्वा, क्रियादिवादिमतमिति शेषः 'पर्यावसेत्' परीति-सर्वप्रकारमावसेत्-तत्रैव निलीयेत, नैव तत्राभिनिविष्टो भवेदिति भावः, पठ्यते च-'अत्ताणं परियावसि'त्ति आत्मानं पर्यावासयेद्, अहेतुभिः कथमात्मानमहेत्वावासं कुर्यात् ?, नैव कुर्यादित्यर्थः । किं पुनरित्थमकरणे फलमित्याह-सर्वे-निरवशेषाः सजन्ति कर्मणा सम्बध्यन्ते जन्तव एभिरिति सङ्गाः-द्रव्यतो द्रविनादयो भावतस्तु मिथ्यात्वरूपत्वादेत एव क्रियादिवादास्तैर्विनिर्मुक्तो-विरहितः सर्वसङ्गविनिर्मुक्तः सन् सिद्धो भवति नीरजाः, तदनेनाहेतुपरिहारस्य सम्यग्ज्ञानहेतुत्वेन सिद्धत्वं फलमुक्तमिति सूत्रार्थः ॥ इत्थं तमनुशास्य गतो विवक्षितं स्थानं क्षत्रियः, शेषसञ्जयवक्तव्यतां त्वाह निर्युक्तिकृत्-

नि. [४०५] काऊण तवच्चरणं बहूनि वासाणि सो धुयकिलेसो ।
तं ठाणं संपत्तो जं संपत्ता न सोयंति ॥

वृ. सुगमैव, नवरं धुताः-अपनीताः क्लिश्यन्त्येषु सत्सु जन्तव इति क्लेशाः-रागादयो येन स धूतक्लेशो, यत्संप्राप्ता न शोचन्ते, शोकहेतुशरीरमानसदुःखाभावादिति गाथार्थः ॥

'इतिः' परिसमाप्तौ, ब्रवीमीति पूर्ववत्, नयाश्च ॥

अध्ययनं - १८ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
अष्टादशमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं १९ मृगापुत्रीयम्

वृ. व्याख्यातमष्टादशमध्ययनम्, अधुनैकोनविंशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने भोगार्द्धित्याग उक्तः, तस्माच्च श्रामण्यमुपजायते, तच्चाप्रतिकर्मतया प्रशस्यतरं भवतीत्यप्रतिकर्मतोच्यत इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य तु चतुरनुयोगद्वारचर्चा प्राग्वद्यावन्नामनिष्पन्ननिक्षेपे मृगापुत्रीयमिति नामातो मृगायाः पुत्रस्य च निक्षेपमाह निर्युक्तिकृत्-

नि. [४०६] निक्खेवो अ मिआए चउक्कओ दुविहो० ॥
नि. [४०७] जाणग भविय सरीरे० ॥
नि. [४०८] मिअआउनामगोयं वेयंतो भावओ मिओ होइ ।
एमेव य पुत्तस्सवि चउक्कओ होइ निक्खेवो ॥

वृ. गाथात्रयं प्राग्वत्, नवरं मृगाभिलाषन नेयम् ॥ नामनिरुक्तिमाह-

नि. [४०९] मिगदेवीपुत्ताओ बलसिरिनामा समुट्ठियं जम्हा ।
तम्हा मिगपुत्तिज्जं अज्झयणं होइ नायव्वं ॥

वृ. मृगा-नाम्ना देवी-अग्रमहिषी तस्याः पुत्रः-सुतो मृगादेवीपुत्रस्तस्माद्बलश्रीनाम्नः 'समुत्थितं' समुत्पन्नं यस्मात्तस्मान्मृगापुत्रीयं-मृगापुत्रीयनामकं मृगाशब्देन मृगादेव्युक्तेरध्ययनमिदमिति शेषः, भवति 'ज्ञातव्यम्' अवबोद्धव्यमिति गाथार्थः ॥ गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिष्पन्ननिक्षेपस्यावसरः, स च सूत्रे सति भवति, अतः सूत्रानुगमे सूत्रमुच्चारणीयं,

मू. (६१४) सुग्गीवे नयरे रम्मे, काननुज्जानसोहिए ।
राया बलभद्दुत्ति, मिया तस्सग्गमाहिसी ॥

वृ. 'सुग्रीवे' सुग्रीवनाम्नि नगरे 'रम्ये' रमणीये काननैः-बृहद्वृक्षाश्रयैर्वनैरुद्यानैः-आरामैः क्रीडावनैर्वा शोभिते-राजिते क्काननोद्यानशोभिते 'राजा' नृपो बलभद्र इति नाम्नेति शेषः, 'मृगा' मृगानाम्नी 'तस्य' इति बलभद्रस्य राज्ञः 'अग्गमहिसि'त्ति 'अग्रमहिषी' प्रधानपत्नी ॥

मू. (६१५) तेसिं पुत्ते बलसिरी, मियापुत्तत्ति विस्सुए ।
अम्मापिऊहिं दइए, जुवराया दमीसरे ।

वृ. 'तयोः' राज्ञोः पुत्रः 'बलश्रीः' बलश्रीनामा मातापितृविहितनाम्ना लोके च मृगापुत्र इति 'विश्रुतः' विख्यातः, 'अम्मापिऊणं'ति अम्मा(म्बा)पित्रोः 'दयितः' वल्लभः 'युवराजः' कृतयौवराज्याभिषेको दमिनः-उद्धतदमनशीलास्ते च राजानस्तेषामीश्वरः-प्रभुर्दमीश्वरः, यद्वा दमिनः-उपशमिनस्तेषां सहजोपशमभावत ईश्वरो दमीश्वरः, भाविकालापेक्षं चैतत् ।

मू. (६१६) नंदने सो उ पासाए, कीलए सह इत्थिहिं ।
देवो दोगुंदगो चेव, निच्चं मुइयमाणसो ।

वृ. 'नन्दने' लक्षणोपेततया समृद्धिजनके 'सः' मृगापुत्रः 'तुः' वाक्यान्तरोपन्यासार्थः प्रासादे 'क्रीडति' विलसति 'सह' समं 'स्त्रीभिः' प्रमदाभिः, क इव ?-'देवः' सुरः 'दोगुंदगो चेव'त्ति 'चः' पूरणे दोगुन्दग इव, दोगुन्दगाश्च त्रायस्त्रिंशाः, तथा च वृद्धाः-"त्रायस्त्रिंशा देवा नित्यं भोगपरायणा दोगुंदुगा इति भण्यंति", 'नित्यं' सदा 'मुदितमानसः' हृष्टचित्तः ॥

मू. (६१७) *मणिरयणकुट्टिमतले, पासायालोअणे ठिओ।*
आलोएइ नगरस्स, चउक्कतियचच्चरे ॥

वृ. स चैवं क्रीडन् कदाचिन्मणयश्च-विशिष्टमाहात्म्यश्चान्द्रकान्तादयो रत्नानि च-गोमेयकादीनि मणिरत्नानि तैरुपलक्षितं कुट्टिमतलं यस्मिन्नसौ मणिरत्नकुट्टिमतलः, गमकत्वाद्बहुव्रीहिः, तस्मिन्, आलोक्यन्ते दिशोऽस्मिन् स्थितैरित्यालोकनं प्रासादे प्रासादस्य वाऽऽलोकनं प्रासादलोकनं तस्मिन्-सर्वोपरिवर्त्तिचतुरिकारूपे गवाक्षे वा स्थितः-उपविष्टः 'आलोकते' कुतूहलतः पश्यति, कानि ?-'नगरस्य' तस्यैव सुग्रीवनाम्नः सम्बन्धीनि 'चतुष्कत्रिकचत्वराणि' प्रतीतान्येवेति सूत्रचतुष्टयार्थः ॥ ततः किमित्याह-

मू. (६१८) *अह तत्थ अइच्छंतं, पासई समणसंजयं।*
तवनियमसंजमधरं, सीलड्ढं गुणआगरं।

मू. (६१९) *तं पेहई मियापुत्ते, दिट्ठीए अनिमिसाइ उ।*
कहिं मन्नेरिसं रूवं, दिट्ठपुव्वं मए पुरा ?॥

मू. (६२०) *साहुस्स दरिसणे तस्स, अज्झवसाणंमि सोहणे।*
मोहं गयस्स संतस्स, जाईसरणं समुप्पन्न ॥

मू. (६२१) *देवलोगचुओ संतो, मानुसं भवमागओ।*
सन्निनाणसमुप्पन्ने, जाइं सरइ पुराणयं ॥ [प्र.]

मू. (६२२) *जाईसरणे समुप्पन्ने, मियापुत्ते महिड्ढिए।*
सरइ पोराणिअं जाइं, सामन्नं च पुराकयं ॥

वृ. 'अथ' अनन्तरं 'तत्र' इति तेषु चतुष्कत्रिकचत्वरेषु 'अतिच्छंत'न्ति अतिक्रामन्तं पश्यति श्रमणसंयतमिति श्रमणस्य शाक्यादेरपि सम्भवात्तद्व्यवच्छेदार्थं संयतग्रहणं, तपश्च-अनशनादि नियमश्च-द्रव्याद्यभिग्रहात्मकः संयमश्च-उक्तरूपस्तान्, धारयति तपोनियमसंयमधरस्तम्, अत एव शीलम्-अष्टादशशीलाङ्गसहस्ररूपं तेनाढ्यं-परिपूर्णं शीलाढ्यं, तत एव च गुणानां, ज्ञानादीनामाकर इव गुणाकरतं ॥

'तमि'ति श्रमणसंयतं 'पेहइ'त्ति पश्यति 'मृगापुत्रः' युवराजः 'दृष्ट्वा' दृशा 'अनिमिसाइ उ'त्ति तुशब्दस्यैवकारार्थत्वादविद्यमाननिमेषयैव, क्व 'मन्ये' जाने 'ईदृशम्' एवंविधं 'रूपम्' आकारं दृष्टपूर्वम्-अवलोकितं मया 'पुरा' इति पूर्वजन्मनि ?, शेषं प्रतीतमेव, नवरम् 'अध्यवसाने' इत्यन्तःकरणपरिणामे 'शोभने' प्रधाने क्षायोपशमिकभाववर्त्तिनीतियावत् 'मोहं' क्वेदं मया दृष्टं क्वेदमित्यतिचिन्तातश्चित्तसङ्क्षुब्धजमूर्च्छात्मकं 'गतस्य' प्राप्तस्य सतः ॥

तथा 'सरति'त्ति स्मरति पौराणिकीं 'जातिं' जन्म 'श्रामण्यं च' श्रमणभावं 'पुराकृतं' जन्मान्तानुष्ठितमिति सूत्रचतुष्टयार्थः ॥ एतदेवातिस्पष्टताहेतोरनुगमयितुमाह निर्युक्तिकृत्-

नि.[४१०] सुग्गीवे नयरंमि अ राया नामेन आसि बलभद्दो ।
तस्सासि अग्गमहिसी देवी उ मिगावई नामं ॥

नि.[४११] तेसिं दुण्हंवि पुत्तो आसी नामेन बलसिरी धीमं ।
वयरोसभसंघयणो जुवराया चरमभवधारी ॥

नि.[४१२] उन्नंदमाणहिअओ पासाए नंदनंमि सो रम्मे ।
किलई पमदासहिओ देवो दुगुंदगो चेव ।

नि.[४१३] अह अन्नया कयाई पासायतलंमि सो ठिओ संतो ।
आलोएइ पुरवरे रुंदे मग्गे गुणसमग्गे ॥

नि.[४१४] अह पिच्छइ रायपहे वोलंतं समणसंजयं तत्थ ।
तवनियमसंजमधरं सुअसागरपारगं धीरं ॥

नि.[४१५] अह देहइ रायसुओ तं समणं अनमिसाइ दिट्ठीए ।
कहि एरिसयं रूवं दिट्ठं मन्ने मए पुव्वं ? ॥

नि.[४१६] एवमनुचिंतयंतस्स सन्नीनाणं तहिं समुप्पन्नं ।
पुव्वभवे सामन्नं मरणंमि एवं कयं आसि ॥

वृ. गाथासप्तकं स्पष्टमेव, नवरं 'धृतिमान्' चित्तस्वास्थ्यवान् 'वज्रऋषभ'मिति अर्थाद्वज्रऋषभनाराचं संहननं यस्य स तथा 'चरमभवधारी' पर्यन्तजन्मवर्त्ती, तथा 'उन्नंदमाणहियओ'-त्ति, उत्-प्राबल्येन नन्दद्-आनन्दं गच्छत् हृदयं-मनो यस्य स तथा, प्राकृतत्वाच्छतृविषये शानच्, तथा 'रुन्दान्' विस्तीर्णान् 'मार्गान्' विपणिमार्गादीन् गुणैः-ऋजुत्वसमत्वादिभिः समग्राः-परिपूर्णा गुणसमग्रास्तान्, तथा श्रुतसागरपारगं धीरमिति तपोनियमसंयमधरमित्यस्य सूत्रपदस्य हेतुदर्शनद्वारतस्तात्पर्यव्याख्यानम्, अनेनैव च भावभिक्षुत्वमुपदर्शितम्, अत एवान्यस्यैवं विशेषणायोगाच्छ्रमणसंयतमित्याह, सञ्ज्ञिज्ञानं चेह सम्यग्दृशः स्मृतिरूपमति-भेदात्मकमिति गाथासप्तकावयवार्थः ॥ सम्प्रति यदसावुत्पन्नजातिस्मरणः कृतवांस्तदाह-

मू. (६२३) विसएसु अरज्जंतो, रज्जंतो संजमंमि य ।
अम्मापियरं उवागम्म, इमं वयणमब्बवी ॥

वृ. 'विसएहिं'त्ति सुब्व्यत्ययाद्, 'विषयेषु' मनोज्ञशब्दादिषु 'अरजन्' अभिष्वङ्गमकुर्वन् क्व ?-'संयमे' उक्तरूपे 'च:' पुनरर्थः 'अम्मापियरं'ति अम्मा(म्बा)पितरौ 'उपागम्य' उपसृत्य 'इदम्' अनन्तरवक्ष्यमाणं वचनम् 'अब्रवीत्' इत्याह, इति सूत्रार्थः ॥ किं तदब्रवीदित्याह-

मू. (६२४) सुआणि मे पंच महव्वयाणि, नरएसु दुक्खं च तिरिक्खजोणिसु ।
निव्विन्नकामो मि महण्णवाओ, अनुजाणह पव्वइस्सामि अम्मो ! ॥

वृ. 'श्रुतानि' आकर्णितानि, अन्यजन्मनीत्यभिप्रायः, 'मे' मया 'पञ्च' इति पञ्चसङ्ख्यानि 'महाव्रतानि' हिंसाविरमणादीनि, तथा नरकेषु 'दुःखं च' असातमिहैव वक्ष्यमाणं 'तिरिक्ख-जोणिसु'त्ति चशब्दस्याप्रयुज्यमानस्यापि "अरहर्नयमानो गामश्वं पुरुषं पशुम्" इत्यादाविव गम्यमानत्वात् तिर्यग्योनिषु च, सर्वत्र चायं न्यायो द्रष्टव्यः, उपलक्षणं चैतद् देवमनुष्यभवयोः, ततः किमित्याह-'निव्विन्नकामोमि'त्ति 'निर्विन्नकामः' प्रतिनिवृत्ताभिलाषोऽस्म्यहं, कुतः ?-

महार्णव इव महार्णवः-संसारस्तस्माद्, यतश्चैवमतः 'अनुजानीत' अनुमन्यध्वं, मामिति शेषः, 'पव्वइस्सामी'ति प्रव्रजिष्यामि 'अम्मो'त्ति पूज्यतरत्वाद्विशिष्टप्रतिबन्धास्पदत्वाच्च मातुरामन्त्रणं, यो हि भविष्यदुःखं नावैति तत्प्रतिकारहेतुं वा स कदाचिदित्थमेवासीत, अहं तूभयत्रापि विज्ञ इति कथं न दुःखप्रतीकारोपायभूतां महाव्रतात्मिकां प्रव्रज्यां प्रतिपत्स्य इति सूत्रगर्भार्थः ॥ अमुमेवार्थमनुवादतः स्पष्टयितुमाह निर्युक्तिकृत्-

नि.[४१७] सो लद्धबोहिलाभो चलणे जनगाण वंदिउं भणइ।
वीसज्जिउमिच्छामो काहं समणत्तणं ताया ! ॥

वृ.'सः' इति मृगापुत्रो लब्धः प्राप्तो बोधिलाभो-जिनधर्मप्राप्तिरूपो येन स तथा, 'चरणान्' पादान् 'जनकयोः' मात्रापित्रोर्वन्दित्वा भणति, यथा 'विसर्जयितुम्' मुत्कलयितुं वयमात्मानमिति गम्यते 'इच्छामः' अभिलषामः, किमिति ?, यतः 'काहं'ति वचनव्यत्ययात्करिष्यामः 'श्रमणत्वं' प्रव्रज्यां 'तात !' इति पितः !, उपलक्षणत्वान्मातश्चेति गाथार्थः ॥ इदानीं तौ कदाचिद्भोगैरुपनिमन्त्रयेयातामित्यभिप्रायतो यत्तेनोक्तं तत्सूत्रकृदाह-

मू.(६२५) *अम्मताय ! मए भोगा, भुत्ता विसफलोवमा।*
पच्छा कडुयविवागा, अनुबंधदुहावहा।

मू.(६२६) *इमं सरीरं अनिच्चं, असुइं असुइसंभवं।*
असासयावासमिणं, दुक्खकेसाण भायणं॥

मू.(६२७) *असासए सरीरंमि, रइं नोवलभामहं।*
पच्छा पुरा व चइयव्वे, फेणबुब्बुयसंनिभे॥

वृ. सूत्रत्रयं प्रतीतार्थमेव, नवरं विषमिति-विषवृक्षस्तस्य फलं विषफलं तदुपमाः, तदुपमत्वमेव भावयितुमाह-पश्चात्कटुक इव कटुकोऽनिष्टत्वेन विपाको येषां ते तथा, आपात एव मधुरा इति भावः, 'अनुबन्धदुःखावहाः' अनवच्छिन्नदुःखदायिनः, यथा हि विषफलमास्वाद्यमानमादौ मधुरमुत्तरकालं च कटुकविपाकं सातत्येन च दुःखोपनेतृ एवमेतेऽपीति, किञ्च-अमी कामाः स्पर्शप्रधानाः, स्पर्शश्च शरीराश्रयः, तच्चेदं शरीरम् 'अनित्यम्' अशाश्वतम् 'अशुचि' स्वाभाविकशौचरहितम् 'अशुचिसंभवम्' अशुचिरूपशुक्रशोणितोत्पन्नम्, अशाश्वतः-कथञ्चिदवस्थितत्वेऽप्यनित्य आवासः-प्रक्रमाज्जीवस्यावस्थानं यस्मिन्नित्यशाश्वतावासं,

पुनः 'इदमि'त्यभिधानमतीवासारत्वावेशसूचकं, दुःखम्-असातं तद्धेतवः क्लेशाः-ज्वरादयो रोगा दुःखक्लेशा शाकपार्थिवादिवत्समासस्तेषां 'भाजनं' स्थानं, यतश्चैवमतोऽशाश्वते शरीरे 'रतिं' चित्तस्वास्थ्यं 'नोपलभे' न प्राप्नोम्यहं, भोगेषु सत्स्वपीति गम्यते, शरीराश्रयत्वात्तेषामिति भावः, शरीराशाश्वतत्वमेवा-पश्चात्पुरा वा त्यक्तव्ये शरीरे इति प्रक्रमः, तद्धि पश्चादिति भुक्तभोगावस्थायां वार्द्धक्यादौ, पुरा अभुक्तभोगितायां वा बाल्यादौ त्यज्यत इति, यद्वा पश्चादिति-यथास्थित्यायुःक्षयोत्तरकालं पुरा वेत्युपक्रममहेतोर्वर्षशताद्यासंकलितजीवितप्रमाणात्प्रागपि 'त्यक्तव्ये' अवश्यत्याज्ये 'फेनबुद्बुदसंनिभे' क्षणदृष्टनष्टतया, अनेनाशाश्वतत्वमेव भावितमिति न पौनरुक्त्यमिति सूत्रत्रयार्थः ॥

एवं भोगनिमन्त्रणपरिहारमभिधाय प्रस्तुतस्यैव संसारनिर्वेदस्य हेतुमाह-

प्रस्तावान्महावीर एव, 'परिनिर्वृत्तः' कषायानलविध्यापनात्समन्ताच्छीतीभूतो विद्याचरणाभ्यामर्थात् क्षायिकज्ञानचारित्राभ्यां संपन्नो-युक्तो विद्याचरणसंपन्नोऽत एव 'सत्यः' सत्यवाक्, तथा सत्यः-अवितथस्तात्त्विकत्वेन परे- भावशत्रवस्तेषामाक्रमणं आक्रमः-अभिभवो यस्यासौ सत्यपराक्रम इति सूत्रार्थः ॥ तेषां च फलमाह

मू. (४८५) *पतंति नरए घोरे, जे नरा पावकारिणो।*
दिव्वं च गइं गच्छंति, चरित्ता धम्ममारियं ॥

वृ. 'पतन्ति' गच्छन्ति 'नरके' सीमन्तकादौ 'घोरे' नित्यान्धकारादिना भयानके ये नराः उपलक्षणत्वात्स्त्र्यादयो वा पातयति नरकादिषु जन्तुमिति पापं तच्च हिंसाद्यनेकधा, इह त्वसत्प्ररूपणैव, तत्कर्त्तुम्-अनुष्ठातुं शीलमयामिति पापकारिणः, ये त्वेवंविधा न भवन्ति ते किमित्याह-'दिव्यां च गतिं' देवलोकगतिं, चशब्दः पुनरर्थे, स च पूर्वेभ्यो विशेषद्योतकः, 'गच्छन्ति' यान्ति 'चरित्वा' आसेव्य धर्मः-श्रुतधर्मादिरनेकविधः, इह च सत्प्ररूपणारूपः श्रुतधर्म एव तं, आर्यं-प्राग्वत्, तदयमभिप्रायः-असत्प्ररूपणापरिहारेण सत्प्ररूपणापरणैव च भवता भवितव्यमिति सूत्रार्थः ॥ कथं पुनरमी पापकारिणा इत्याह-

मू. (४८५) *मायावुइयमेयं तु, मुसा भासा निरत्थिया।*
संजममानोऽवि अहं, वसामि इरियामि य ॥

वृ. मायया-शाठ्येन उइयंति-उक्तं मायोक्तम् 'एतत्' यदनन्तरं क्रियादिवादिभिरुक्तं, 'तुः' एवकारार्थो भिन्नक्रमश्च मायोक्तमेव, अतश्चैतत् 'मृषा' अलीका 'भाषा' उक्तिः 'निरर्थिका' सम्यगभिधेयशून्या, तत एव च 'संजममानोऽवि'त्ति 'अपिः' एवकारार्थस्ततः संयच्छन्नेव-उपरमन्नेव तदुक्त्याकर्णनादितः 'अहम्' इत्यात्मनिर्देशे विशेषतस्तत्स्थिरीकरणार्थम्, उक्तं हि-"ठियतो ठावए परं"ति, 'वसामि' तिष्ठामि उपाश्रय इति शेषः, 'इरियामि य'त्ति ईरे च-गच्छामि च गोचरचर्यादिष्विति सूत्रार्थः ॥ इदमपि सूत्रं प्रायो न दृश्यते। कुतः पुनस्त्वं तदुक्त्याकर्णनादिभ्यः संयच्छसीत्याह-अनन्तरसूत्राभावे च यदुक्तं चतुर्भिः स्थानैर्मेयज्ञाः किंप्रभाषन्ते इति, तत्कुत इत्याह-

मू. (४८६) *सव्वे ते विइया मज्झं, मिच्छादिट्ठी अनारिया।*
विज्जमाणे परे लोए, सम्मं जाणामि अप्पगं ॥

वृ. 'सर्वे' निरवशेषाः 'ते' क्रियादिवादिनः 'विदिताः' ज्ञाता मम, यथाऽमी 'मिच्छदिट्ठि'त्ति मिथ्या-विपरीता परलोकात्माद्यपलापित्वेन दृष्टिः-बुद्धिरेषामिति मिथ्यादृष्टयः तत एव, 'अनार्याः' अनार्यकर्मप्रवृत्ताः, कथं पुनस्त एवंविधास्ते विदिता इत्याह-'विद्यमाने' सति 'परलोके' अन्यजन्मनि 'सम्यग्' अविपरीतं 'जानामि' अवगच्छामि 'अप्पगं'ति आत्मानं, ततः परलोकात्मनोः सम्यग्वेदनात् ममैवंविधत्वेन विदितास्ततोऽहं तदुक्त्याकर्णनादितः संयच्छामि किंप्रभाषकाश्चैत इति सूत्रार्थः ॥ कथं पुनस्त्वमात्मानमन्यजन्मनि जानासीत्याह-

मू. (४८७) *अहमासी महापाने, जुइमं वरिससओवमे।*
जा सा पाली महापाली, दिव्वा वरिससओवमा ॥

व्यतिरेक उक्तः, तत्र सुखित्वे हेतुः क्षुत्तृष्णाविवर्जितत्वमुक्तम्। 'धर्मं' पापविरतिरूपम् 'अपिः' पूरणे 'कृत्वा' विधाय गच्छन्नुपलक्षणत्वाद्गतश्च 'सः' इति धर्मकर्ता प्रक्रमात्माथेयोपमधर्म-सहितः सुखी भवति, सुखित्वे चाल्पकर्मत्वं हेतुरवेदनत्वं च, अत्र च प्रस्तावात्कर्म पापं वेदना चासातरूपा गृह्यते, अनेन धर्मकर्मकरणाकरणयोर्गुणदोषदर्शनाद्धर्मकरणाभिप्रायः प्रकटितः।

'जहे'त्यादिना च सूत्रद्वयेन तमेव दृढयति, अत्र च यथा सारभाण्डानि-महामूल्यवस्त्रादीनि 'नीनेइ'त्ति निष्काशयति 'असारं' जरद्वस्त्रादि 'अवउज्झइ'त्ति अपोहति-त्यजति, एवं 'लोके' जगति 'पलित्तंमि'त्ति प्रदीप्त इव प्रदीप्ते अत्याकुलीकृते 'आत्मानं' सारभाण्डतुल्यं 'तारयिष्यामि' जरामरणप्रदीप्तलोकपारं नेष्यामि, धर्मकरणेनेति प्रक्रमः, असारं तु कामभोगादि त्यक्ष्यामिति भावः, अनेन धर्मकरणे विलम्बासहिष्णुत्वमुक्तं, युष्माभिरिति द्वित्वेऽपि पूज्यत्वाद् बहुवचनम्, 'अनुमन्निओ'त्ति अनुमतः-अभ्यनुज्ञात इति सूत्रषट्कावयवार्थः॥ एवं च तेनोक्ते-

मू.(६३८) *तं बिंतऽम्मापियरो, सामन्नं पुत्त! दुच्चरं।*
गुणाणं तु सहस्साणि, धारेयव्वाइं भिक्खुणा॥

मू.(६३९) *समया सव्वभूएसुं, सत्तुमित्तेसु वा जगे।*
पाणाइवायविरई, जावज्जीवाय दुक्करं॥

मू.(६४०) *निच्चकालऽप्पमत्तेणं, मुसावायविवज्जणं।*
भासियव्वं हियं सच्चं, निच्चाउत्तेण दुक्करं॥

मू.(६४१) *दंतसोहणमाइस्स, अदत्तस्स विवज्जणं।*
अनवज्जेसणिज्जस्स, गिण्हणा अवि दुक्करं॥

मू.(६४२) *विरई अबंभचेरस्स, कामभोगरसन्नुणा।*
उग्गं महव्वयं बंभं, धारेयव्वं सुदुक्करं॥

मू.(६४३) *धनधन्नपेसवग्गेसु, परिग्गहविवज्जणं।*
सव्वारंभपरिच्चागो, निम्ममत्तं सुदुक्करं॥

मू.(६४४) *चउव्विहेऽवि आहारे, राईभोयणवज्जणा।*
संनिहीसंचओ चेव, वज्जेयव्वो सुदुक्करं॥

मू.(६४५) *छुहा तण्हा य सीउण्हं, दंसमसगा य वेयणा।*
अक्कोसा दुक्खसिज्जा य, तनफासा जल्लमेव य॥

मू.(६४६) *तालणा तज्जणा चेव, वहबंधपरीसहा।*
दुक्खं भिक्खायरिया, जायणा य अलाभया।

मू.(६४७) *कावोया जा इमा वित्ती, केसलोओ अ दारुणो।*
दुक्खं बंभव्वयं घोरं, धारेउं अमहप्पणो॥

मू.(६४८) *सुहोइओ तुमं पुत्ता!, सुकुमालो सुमज्जिओ।*
न हुसी पभू तुमं पुत्ता!, सामन्नमनुपालिया॥

मू.(६४९) *जावज्जीवमविस्सामो, गुणाणं तु महब्भरो।*
गरुओ लोहभारु व्व, जो पुत्ता! होइ दुव्वहो॥

मू.(६५०) आगासे गंगसोउ व्व, पडिसोउव्व दुत्तरो।
बाहाहिं सागरो चेव, तरियव्वो य गुणोयही॥

मू.(६५१) वालुयाकवले चेव, निरस्साए उ संजमे।
असिधारागमनं चेव, दुक्करं चरिउं तवो॥

मू.(६५२) अहिवेगतदिट्ठीए, चरित्ते पुत्त दुच्चरे।
जवा लोहमया चेव, चावेयव्वा सुदुक्करं॥

मू.(६५३) जहा अग्गिसिहा दित्ता, पाउं होइ सुदुक्करं।
तह दुक्करं करेउं जे, तारुन्ने समणत्तणं॥

मू.(६५४) जहा दुक्खं भरेउं जे, होइ वायस्स कुत्थलो।
तहा दुक्खं करेउं जे, कीवेणं समणत्तणं॥

मू.(६५५) जहा तुलाए तोलेउं, दुक्करं मंदरो गिरी।
तहा निहुअनीसंकं, दुक्करं समणत्तणं॥

मू.(६५६) जहा भुयाहिं तरिउं, दुक्करं रयणायरो।
तहा अनुवसंतेणं, दुक्करं दमसायरो॥

मू.(६५७) भुंज माणुस्सए भोए, पंचलक्खणए तुमं।
भुत्तभोगी तओ जाया!, पच्छा धम्मं चरिस्ससि॥

वृ. सूत्रविंशतिः संगमैव, नवरं 'त'मिति बलश्रियं मृगापुत्रापरनामकं युवराजं 'बिंति'त्ति ब्रूतः-अभिधत्तः 'अम्मापियरो'त्ति अम्बापितरौ श्रामण्यं पुत्र! दुश्चरं, यतस्तत्र 'गुणानां' श्रामण्योपकारकाणां शीलाङ्गरूपाणां सहस्राणि 'धारयितव्यानि' आत्मनि स्थापयितव्यानि, प्राक्तुशब्दस्यैवकारार्थस्येह सम्बन्धाद्धारयितव्यान्येव व्रतग्रहण इति गम्यते 'भिक्षुणा' भिक्षणशीलेन सता, पठ्यते च-'भिक्खुणो'त्ति भिक्षोः सम्बन्धिनां गुणानामिति योगः।

तथा 'समता' रागद्वेषाविधानतस्तुल्यता 'सर्वभूतेषु' समस्तजन्तुषु, उदासीनेष्विति गम्यते, 'शत्रुमित्रेषु वा' अपकार्युपकारिषु, 'जगति' लोके, अनेन सामायिकमुक्तं, तथा 'प्राणातिपातविरतिः' प्रथमव्रतरूपा 'जावज्जीव (वा य)'त्ति यावज्जीवं 'दुष्करं' दुरनुचरमेतदिति शेषः।

नित्यकालाप्रमत्तेनेत्यप्रमत्तग्रहणं निद्रादिप्रमादवशगो हि मृषाऽपि भाषेतेति, नित्ययुक्तेनसततोपयुक्तेन अनुपयुक्तस्यान्यथाऽपि भाषणसंभवाद्, एतच्च दुष्करं, यच्चान्वयव्यतिरेकाभ्यामेकस्याप्यर्थस्याभिधानं तत्स्पष्टतार्थमदुष्टमेवेत्येवं सर्वत्र भावनीयम्, अनेन द्वितीयव्रतदुष्करत्वमभिहितम्। 'दंतसोहणमादिस्स'त्ति, मकारोऽलाक्षणिकः, अपिशब्दस्य गम्यमानत्वात्, 'दन्तशोधनादेरपि' अतितुच्छस्यास्तामन्यस्य, तथाऽनवद्यैषणीयस्य दत्तस्यापीति गम्यते 'गिण्हण'त्ति ग्रहणमिति तृतीयव्रतदुष्करत्वोक्तिः।

'कामभोगरसन्नुन'त्ति कामभोगाः-उक्तरूपास्तेषां रसः-आस्वादः कामभोगारसः यद्वा रसाः-शृङ्गारादवस्ततः कामभोगाश्च रसाश्च कामभोगारसास्तज्ज्ञेन, तदज्ञस्य हि तदनवगमात्तद्विषयोऽभिलाष एव न भवेत् तथा च सुकरत्वमपि स्यादित्याशयेनैवमभिधानम्, अनेन चतुर्थव्रतदुष्करत्वमुक्तम्।

परिग्रहः-सत्सु स्वीकारस्तद्विवर्जनं, तथा सर्वे-निरवशेषा ये आरम्भाः-द्रव्योत्पादन-व्यापारास्तत्परित्यागः, अनेन निराकाङ्क्षात्वमुक्तं निर्ममत्वं च, गम्यमानत्वाच्चस्य, सर्वत्र ममेति बुद्धिपरिहारः, अने पञ्चमहाव्रतदुष्करतोक्ता।

संनिधीयते नरकादिष्वनेनात्मेति संनिधिः घृतादेरुचितकालातिक्रमेण स्थापनं स चासौ सञ्चयश्च संनिधिसञ्चयः स चैव वर्जयितव्य इत्येतत्सुदुष्करम्, अनेन षष्ठव्रतदुष्करत्वमुक्तं, दिवागृहीतदिवाभुक्तादिभङ्गचतुष्टयरूपत्वात्तस्य।

'छुहे'त्यादिना परीषहाभिधानम्, अत्र च 'दंशमशकवेदना' तद्भक्षणोत्थदुःखानुभवरूपा 'दुःखशय्या च' विषमोन्नतत्वादिना दुःखहेतुर्वसतिः, 'ताडना' करादिभिराहननं 'तर्जना' अंगुलिभ्रमणभ्रूत्क्षेपादिरूपा वधश्च-लकुटादिप्रहारो बन्धश्च-मयूरबन्धादिस्तानेन परीषहौ वध-बन्धपरीषहौ, 'याञ्चा' प्रार्थना चकारोऽनुक्ताशेषपरीषहसमुच्चयार्थः, दुःखशब्दश्चेह क्षुदुःख-मित्यादि प्रत्येकं योजनीयः, इह च बन्धताडने वधपरीषहेऽन्तर्भवतः, तर्जना आक्रोशे, भिक्षाचर्या च याञ्चयां, भेदोपादानं च व्युत्पत्त्यर्थमिति भावनीयं, कपोताः-पक्षिविशेषास्तषामियं कापोती येयं वृत्तिः-निर्वहणोपायः, यथा हि ते नित्यशङ्किताः कणकीटकादिग्रहणे प्रवर्त्तन्ते, एवं भिक्षुरप्येषणादोषशङ्कयेव भिक्षादौ प्रवर्त्तते, सा च दुरनुचरत्वेन दारयति कातरमनांसीति दारुणेत्युत्तरेण योगः, अभिधेयवशाच्च लिङ्गविपरिणामः, उपलक्षणं चैतत्समस्तो-त्तरगुणानामिति, यच्चेह ब्रह्मव्रतस्य पुनर्दुर्द्धरत्वाभिधानं तदस्यातिदुष्करत्वख्यापनार्थम्।

उपसंहारमाह-सुखं-सातं तस्योचितो-योग्यः सुखोचितः 'सुकुमारः' अकठिनदेहः 'सुमज्जितः' सुष्ठु स्नपितः, सकलनेपथ्योपलक्षणं चैतत्, इह च सुमज्जितत्वं सुकुमारत्वे हेतुः, उभयं चैतत्सुखोचितत्वे, अतश्च 'न हुसि'त्ति नैव असि-भवसि 'प्रभुः' समर्थः 'श्रामण्यम्' अनन्तरोदितगुणरूपम् 'अनुपालेउ'न्ति अनुपालयितुम्, इह च सुखोचितत्वाभिधानमनीदृशो हीदृशं दुःखमपि न दुःखमिति मन्यते।

पुनरप्रभुत्वमेवोदाहरणैः समर्थयितुमाह-'अविश्रामः' यत्रोह्यते न विश्रम्यते' 'गुणानां' यतिगुणानां, 'तुः' पूरणे 'महाभरः' महासमूहो गुरुको लोहभार इव यो दुर्वहः स वोढव्य इति शेषः, त्वं तु सुखोचित्त इत्यतो न प्रभुरसीत्युत्तरत्रापि योजनीयम्॥

आकाशे गङ्गाश्रोतोवद् दुस्तर इति योज्यते, लोकरूढ्या चैतदुक्तं, तथा 'प्रतिश्रोतोवत्' यथा प्रतीपं जलप्रवाहो 'दुस्तरः' दुःखेन तीर्यत इति, बाहुभ्यां 'सागरो चेव'त्ति, सागरवच्च दुस्तरो यः सः 'तरितव्यः' पारगमनायावगाहयितव्यः, कोऽसौ?, गुणाः-ज्ञानादयस्त उदधिरिव गुणोदधिः, कायवांमनोनियन्त्रणा चात्र दुष्करत्वे हेतुः, 'निरास्वादः' नीरसो विषयगृद्धानां वैरस्यहेतुत्वात्॥

'अही'त्यादि, अहिरिवैकोऽन्तो-निश्चयो यस्याः सा तथा, सा चासौ दृष्टिश्चैकान्तदृष्टिस्तया-अनन्याक्षिप्तया, अहिपक्षे दृशा, अन्यत्र तु बुद्ध्योपलक्षितम्, एकान्तदृष्टिकं वा चारित्रं दुश्चरं, विषयेभ्यो मनसो दुर्निवारत्वादिति भावः, 'जवा लोहमया चेव'त्ति एवकारस्योपमार्थत्याद्यवा लोहमया इव चर्वयितव्याः, किमुक्तं भवति?-लोहमययवचर्वणवत्सुदुष्करं चारित्रम्॥

'अग्निशिखा' अग्निज्वाला 'दीसे' त्युज्जवला ज्वालाकरालावा, द्वितीयार्थे चात्र प्रथमा,

ततो यथाऽग्निशिखां दीप्तां पातुं सुदुष्करं, नृभिरिति गम्यते, यदिवा लिङ्गव्यत्ययात् सर्वधात्वर्थत्वाच्च करोतेः 'सुदुष्करा' सुदुःशका यथाऽग्निशिखा दीप्ता पातुं भवतीति योगः, एवमुत्तरत्रापि भावना, 'जे' इति निपातः सर्वत्र पूरणे, कोत्थल इह वस्त्रकम्बलादिमयो गृह्यते, चर्ममयो हि सुखेनैव भ्रियेतेति, 'क्लीबेन' निःसत्त्वेन 'निभृतं निःशङ्क' मित्यत्र निभृतं-निश्चलं विषयाभिलाषादिभिरक्षोभ्यं 'निःशङ्क' शरीरादिनिरपेक्षं शङ्काख्यसम्यक्त्वातिचारविरहितं वा ॥

'अनुपशान्तेन' उत्कटकषायेण, इह च दमसागर इत्यनेन प्राधान्यख्यापनार्थं केवलस्यैवोपशमस्य समुद्रोपमाभिधानं, पूर्वत्र तु गुणोदधिरित्यनेन निःशेषगुणानामिति न पौनरुक्त्यं ॥

यतश्चैवं तारुण्ये दुष्करा प्रव्रज्याऽतो भुङ्क्ष्वेत्यादिना पितरौ कृत्योपदेशं ब्रूतः, भुज्यन्त इति भोगास्तान् 'पञ्चलक्षणकान्' शब्दादिपञ्चकस्वरूपान् 'ततः' इति भोगभुक्तेरनन्तरं 'जाय'त्ति जातपुत्रः 'पश्चादि'ति आर्षत्वात् 'परिस्सहि'त्ति चरिष्यसीति विंशतिसूत्रावयवार्थः ॥

सम्प्रति तद्वचनानन्तरं यन्मृगापुत्र उक्तवांस्तदाह-

मू.(६५८) *तं बिंतऽम्मापियरो, एवमेयं जहाफुडं।*
इहलोगे निप्पवासस्स, नत्थि किंचिवि दुक्करं॥

मू.(६५९) *सारीरमानसा चेव, वेयणा उ अनंतसो।*
मए सोढाओ (इं) भीमाओ (इं), असरइं दुक्खभयाणि य॥

मू.(६६०) *जरामरणकंतारे, चाउरंते भयागरे।*
मया सोढाणि भीमाइं, जम्माइं मरणाणि य॥

मू.(६६१) *जहा इहं अगनी उण्हो, इत्तोऽनंतगुणो तहिं।*
नरएसु वेयणा उण्हा, अस्साया वेइया मए॥

मू.(६६२) *जहा इहं इमं सीयं, इत्तोऽनंतगुणं तहिं।*
नरएसु वेयणा सीया, अस्साया वेइया मए॥

मू.(६६३) *कंदंतो कंदुकुंभीसु, उड्ढपाओ अहोसिरो।*
हुयासने जलंतंमि, पक्कपुव्वो अनंतसो॥

मू.(६६४) *महादवग्गिसंकासे, मरुंमि वइरवालुए।*
कालंबवालुआए उ, दड्ढपुव्वो अनंतसो॥

मू.(६६५) *रसंतो कंदुकुंभीसु, उड्ढं बद्धो अबंधवो।*
करवत्तकरकयाईहिं, छिन्नपुव्वो अनंतसो॥

मू.(६६६) *अइतिक्खकंटगाइन्ने, तुंगे सिंबालिपायवे।*
खेवियं पासबद्धेणं, कड्ढोकड्ढाहि दुक्करं॥

मू.(६६७) *महाजंतेसु उच्छुव्वा, आरसंतो सुभेरवं।*
पीलिओमि सकम्मेहिं, पावकम्मो अनंतसो।१।

मू.(६६८) *कूवंतो कोलसुणएहिं, सामेहिं सबलेहि य।*
पडिओ फालिओ छिन्नो, विप्फुरंतो अनेगसो॥

मू.(६६९) *असीहिं अयसिवन्नेहिं, भल्लीहिं पट्टिसेहि य।*

छिन्नो भिन्नो विभिन्नो य, उववन्नो पावकम्मुणा ॥

मू. (६७०) अवसो लोहरहे जुत्तो, जलंते समिलाजुए ।
चोइओ तुत्तजुत्तेहिं, रुज्झो वा जह पाडिओ ॥

मू. (६७१) हुआसने जलंतंमि, चिआसु महिसो विव ।
दड्ढो एक्को अ अवसो, पावकम्मेहिं पाविओ ॥

मू. (६७२) बला संडासतुंडेहिं, लोहतुंडेहिं पक्खिहिं ।
चिलुत्तो विलवंतोऽहं, ढंकगिद्धेहिंऽनंतसो ॥

मू. (६७३) तण्हाकिलंतो धावंतो पत्तो वेयरणिं नइं ।
जलं पाहंति चिंततो, खुरधाराहिं विवाइओ ॥

मू. (६७४) उण्हाभितत्तो संपत्तो, असिपत्तं महावनं ।
असिपत्तेहिं पडंतेहिं, छिन्नपुव्वो अनेगसो ॥

मू. (६७५) मुग्गरेहिं मुसुंढीहिं, सूलेहिं मुसलेहि य ।
गयासंभग्गगत्तेहिं, पत्तं दुक्खं अनंतसो ॥

मू. (६७६) खुरेहिं तिक्खधाराहिं, छुरियाहिं कप्पणीहि य ।
कप्पिओ फालिओ छिन्नो, उक्कित्तो अ अनेगसो ॥

मू. (६७७) पासेहिं कूडजालेहिं, मिओ वा अवसो अहं ।
वाहिओ बद्धरुद्धो अ, विवसो चेव विवाइओ ॥

मू. (६७८) गलेहिं मगरजालेहिं, वच्छो वा अवसो अहं ।
उल्लिओ फालिओ गहिओ, मारिओ अ अनंतसो ॥

मू. (६७९) विदंसएहिं जालेहिं, लिप्पाहिं सउणो विव ।
गाहिओ लग्गो अ बद्धो अ, मारिओ अ अनंतसो ॥

मू. (६८०) कुहाडपरसुमाईहिं, वड्ढईहिं दुमो विव ।
कुट्टिओ फालिओ छिन्नो, तच्छिओ अ अनंतसो ॥

मू. (६८१) चवेडमुट्ठिमाईहिं, कुमारेहिं अयं पिव ।
ताडिओ कुट्टिओ भिन्नो, चुन्निओ अ अनंतसो ॥

मू. (६८२) तत्ताइं तंबलोहाइं, तउआइं सीसगाणि य ।
पाइओ कलकलंताइं, आरसंतो सुभेरवं ॥

मू. (६८३) तुहप्पियाइं मंसाइं, खंडाइं सोल्लगाणि य ।
खाविओ मि समंसाइं, अग्गिवन्नाइं नेगसो ॥

मू. (६८४) तुहं पिया सुरा सीहू, मेरओ अ महूणि य ।
पज्जिओ मि जलंतीओ, वसाओ रुहिराणि य ॥

मू. (६८५) निच्चं भीएण तत्थेणं, दुहिएणं वहिएण य ।
परमा दुहसंबद्धा, वेयणा वेइया मए ॥

मू. (६८६) तिव्वचंडप्पगाढाओ, घोराओ अइदुस्सहा ।

महब्भयाओ भीमाओ, नरएसुं वेइया मए ॥

मू.(६८७) *जारिसा माणुसे लोए, ताया ! दीसंति वेयणा ।*
इत्तो अनंतगुणिया, नरएसुं दुक्खवेयणा ॥

मू.(६८८) *सव्वभवेसु अस्साया, वेयणा वेइया मए ।*
निमिसंतरमित्तंपि, जं साया नत्थि वेयणा ॥

वृ. सूत्राण्येकत्रिंशम् प्रतीतान्येव, नवरं 'तद्' अनन्तरोक्तं 'बिंति'त्ति वचनव्यत्ययात्तरो ब्रूते अम्बापितरौ मृगापुत्र इति प्रक्रमः, 'एव'मिति यथोक्तं भवद्भ्यः तथा 'एतत्' प्रव्रज्या-दुष्करत्वं 'यथास्फुटं' सत्यतामनतिक्रान्तमवितथमिति-यावत्, तथाऽपीहलोके 'निष्पिपासस्य' निःस्पृहस्य, इहलोकशब्देन च 'तात्स्थ्यात्तद्व्यपदेश' इतिकृत्वा ऐहलौकिकाः स्वजनधनसम्ब-न्धादयो गृह्यन्ते, 'नास्ति' न विद्यते 'किञ्चित्' अतिकष्टमपि शुभानुष्ठानमिति गम्यते, 'अपिः' संभावने 'दुक्करं' दुरनुष्ठेयं, भोगादिस्पृहायामेवास्य दुष्करत्वादिति भावः ॥

निःस्पृहताहेतुमाह-'शारीरे'त्यादिना, तत्राप्याद्यसूत्रद्वयेन सामान्येन संसारस्य दुःखरूपत्व-मुक्तम्, इह च शरीरमानसयोर्भवाः शारीरमानस्यो वेदनाः प्रस्तावादसातरूपाः 'दुक्खभयाणि य'त्ति दुःखोत्पादकानि राजविड्वरादिजनितानि (भयानि) दुःखभयानि, जरामरणाभ्यामति-महनतया कान्तारं जरामरणकान्तारं तस्मिंश्चत्वारो-देवादिभवा अन्ताः अवयवा यस्यासौ चतुरन्तः संसारः तत्र 'सोढानि' तदुत्थवेदनासहनेनानुभूतानि 'भीमानि' अतिदुःखजनकत्वेन रौद्राणि ॥

शारीरमानस्यो वेदना यत्रोत्कृष्टाः सोढा यथेत्यादिभिः सूत्रैस्तदाह-यथा 'इह' मनुष्यलोकेऽ-ग्निरुष्णोऽनुभूयते 'अत' इत्येवमनुभूयमानादनन्तगुणः 'तहिं'ति तेषु, येष्वहमुत्पन्न इति भावः, तत्र च बादराग्नेरभावात्पृथिव्या एव तथाविधः स्पर्श इति गम्यते, ततश्चोष्णानुभवात्मकत्वेन 'असातः' दुःखरूपा वेदिता मया, पठन्ति च-'इत्तोऽनंतगुणा तहिं'ति अत्र चातः-इहत्याग्नेर-नन्तगुणा नरकेषूष्णाश्च वेदना वेदिता मयेति योज्यम् ॥

तथा 'इदं' यदनुभूयते 'इह' मनुष्यलोके 'शीतं' तच्च माघादिसंभवं हिमकणानुषक्त-मात्यन्तिकं परिगृह्यते, इहापि पठन्ति-'एतोऽनंतगुणा तहिं'ति प्राग्वत्, 'कंदुकुम्भीषु' पाक-भाजनविशेषरूपासु लोहादिमयीषु 'हुताशने' अग्नौ देवमायाकृते, महादवाग्निना संकाशः-सदृशोऽतिदाहकतया महादवाग्निसङ्काशस्तस्मिन्, इह चान्यस्य दाहकतरस्यासंभादित्थ-मुपमाभिधानम्, अन्यथेहत्याग्नेरनन्तगुण एव तत्रोष्णपृथिव्यनुभाव उक्तः, 'मरौ' इति मरुवालु-कानिवह इव तात्स्थ्यात्तद्व्यपदेशसंभवादन्तर्भूतेवार्थत्वाच्चात एव वज्रवालुकानदीसम्बन्धि-पुलिनमपि वज्रवालुका तत्र, यद्वा वज्रवद्वालुका यस्मिंस्त (स्मिन् स त) था तस्मिन्नरकप्रदेश इति गम्यते, 'कदम्बवालुकयां च' तथैव कदम्बवालुकानदीपुलिने च महादवाग्निसङ्काश इति योज्यते । 'ऊर्ध्वम्' उपरि वृक्षशाखादौ 'बद्धः' नियन्त्रितो माऽयमितो नङ्क्षीदित्यबान्धव इति च तत्राशरणतामाह, करपत्रं-प्रतीतं क्रकचमपि तद्विशेषं एव 'खेदियं'ति खिन्नं खेदः क्लेशोऽनुभूतः क्षिप्तितं वा पापमिति गम्यते, 'कड्ढोकड्ढाहि'ति कर्षणापकर्षणैः परमाधार्मिक-

कृतैः 'दुष्करम्' इति दुस्सहम् ॥

'उच्छूढ'त्ति वाशब्दः उपमार्थे, ततश्चोक्षुलित 'आरसन्' आक्रन्दन् 'स्वकर्मभिः' हिंसाद्युपार्जितैर्ज्ञानावरणादिभिः 'पापकर्मा' पापानुष्ठानः ॥ 'कूवंतो'त्ति कूजन्, 'कोलसुणएहिं'ति सूकरस्वरूपधारिभिः श्यामैः शबलैश्च परमाधार्मिकविशेषैः 'पातितो' भुवि 'फाडितो' जीर्णवस्त्रवत् 'छिन्नो' वृक्षवदुभयदंष्ट्रादिभिरिति गम्यते 'विस्फुरन्' इतस्ततश्चलन् 'अरसाहिं'ति प्रहरणविशेषैः, पठ्यते च-'असीहिं'ति 'असिभिः' खड्गैः अत एव 'अतसी'त्यतसीपुष्पं तद्वर्णाभिः-कृष्णाभिः 'पट्टिशैश्च' प्रहरणविशेषैः 'छिन्नः' द्विधाकृतः 'भिन्न' विदारितः 'विभिन्नः' सूक्ष्मखण्डीकृतः, दर्शनं पापानुष्ठानपरिहार्यताख्यापनार्थम् ।

'लोहरथे' लोहमयशकटे 'जुत्तो'त्ति युजेरन्तर्भावितण्यर्थत्वाद्योजितः परमाधार्मिकैरिति सर्वत्र गम्यते, 'ज्वलति' दीप्यमाने, कदाचिद्दाहभीत्या ततो नश्येदपीत्याह -समिलोपलक्षितं युगं यस्मिन् स तथा तत्र समिलायुते वा, पाठान्तरतश्च ज्वलत्समिलायुगे, 'चोइओ'त्ति प्रेरितः 'तोत्त्रयाक्रैः' प्राजनकबन्धनविशेषैर्मर्माघट्टनाहननाभ्यामिति गम्यते, 'रोज्झः' पशुविशेषः 'वा' समुच्चये भित्राक्रमः 'यथा' औपम्ये ततो रोज्झवत्पातितो वा लकुटादिपिट्टनेनेति गम्यते, हुताशने ज्वलित, केत्याह-'चितासु' परमाधार्मिकनिर्मितेन्धनसञ्चयरूपासु 'महिसो विव'त्ति, 'पिव मिव विव वा इवार्थे' इति वचनात्, महिष इव 'दग्धः' भस्मसात्कृतः 'पक्वः' भट्टित्रीकृतः 'पावितो'त्ति पापमस्यास्तीति भूम्नि मत्वर्थीयष्ठक् पापिकः 'बलात्' हठात् संदंशः-प्रतीतस्तदाकृतीनि तुण्डानि-मुखानि येषां ते संदंशतुण्डास्तैः, तथा लोहवन्निष्ठुरतया तुण्डानि येषां तैर्लोहतुण्डैः 'पक्खिहिं'ति पक्षिभिर्ढङ्कगृद्धैरिति योगः, एते च वैक्रिया एव, तत्र तिरश्चामभावात्, 'विलुप्तः' विविधं छिन्नः ॥

तस्य चैवं कदर्थ्यमानस्य तुड्डुत्पत्तौ का वार्त्तेत्याह-तृष्णया क्लान्तो-ग्लानिमुपगतस्तृष्णाक्लान्तः 'पाहंति'ति पास्यामीति चिन्तयन् 'खुरधाराहि'न्ति क्षुरधाराभिरतिच्छेदकतया वैतरणीजलोर्म्मिभिरिति शेषः, विपाटितः, पाठान्तरतश्च विपादितः-व्यापादित इत्यर्थः, उष्णेन-वज्रवालुकादिसम्बन्धिना तापेनाभि-आभिमुख्येन तप्त उष्णाभितप्तः संप्राप्तोऽसयः-खड्गास्तद्भेदकतया पत्राणि-पर्णानि यस्मिंस्तदसिपत्रं, 'मुद्गरादिभिः' आयुधविशेषैर्गता-नष्टा आशा-परित्राणोचरमनोरथात्मिका यत्र तद्गताशं यथा भवत्येवं 'भग्गगत्तेहिं'ति भग्नगात्रेण सता प्राप्तं दुःखमिति योगः, कल्पितः वस्त्रवत् खण्डितः कल्पनीभिः पाटीतः द्विधाकृतः ऊर्ध्वं छुरिकाभिश्छिन्नः खण्डितः क्षुरैरिति पश्चानुपूर्व्या सम्बन्धः, इत्थं च 'उक्कंतो य'ति उत्क्रान्तश्चायुःक्षये मृतश्चेत्यर्थः, पाठान्तरतो वोत्कृतः-त्वगपनयनेन प्रत्येकं वा क्षुरादिभिः कल्पितादीनां सम्बन्धः ॥

'पाशैः कूटजालैः' प्रतीतैरेव बन्धनविशेषैः, 'अवशः' परवशः 'वाहितः' विप्रलब्धः, पठ्यते च-'ग्रहितो'त्ति गृहीतो बद्धो बन्धनेन रुद्धो बहिःप्रचारनिषेधनेन, अनयोर्विशेषणसमासः, 'विवाइतो'त्ति विपादितो विनाशित इत्यर्थः, तथा 'गलैः' बडिशैर्मकरैः-मकराकारानुकारिभिः परमाधार्मिकैर्जालैश्च-तद्विरचितैर्वैक्रियैरनयोर्द्वन्द्वः, समूहवाची वा जालशब्दस्तत्पुरुषश्च समासः, तथा 'उल्लिउ'त्ति आर्षत्वाद् उल्लिस्वितो गलैः पाटितो मकरैर्गृहीतश्च जालैः, यद्वा

गृहीतोऽपि मकरजालैरिव मारितश्च सर्वैरपि, विशेषेण दशन्तीति विदंशकाः-श्येनादयस्तैर्जालैः तथाविधबन्धनैः 'लेप्पाहि'त्ति लेपैर्वज्रलेपादिभिः श्लैष्पद्रव्यैः 'सउणोविव'त्ति 'शकुन इव' पक्षीव गृहीतो विदंशकैर्जालैश्च लग्नश्च 'श्लिष्टो' लेपद्रव्यैर्बद्धः, तैर्जालैश्च, मारितश्च सर्वैरपि, 'कुट्टितः' सूक्ष्मखण्डीकृतः पाटितश्छिन्नश्च प्राग्वत्, तक्षितश्च त्वगपनयनतो द्रुम इवेति सर्वत्र योज्यां।

'चवेडमुट्ठिमाईहि'त्ति चपेटामुष्ट्यादिभिः प्रतीतैरेव 'कुमारैः' अयस्कारैः 'अयं पिव'त्ति अय इव धनादिभिरिति गम्यते 'ताडितः' आहतः कुट्टितः' इह छिन्नः 'भिन्नः' खण्डीकृतः 'चूर्णितः' श्लक्ष्णीकृतः प्रक्रमात्परमाधार्मिकैः तप्ततास्रादीनि वैक्रियाणि पृथग्व्यनुभावभूतानि वा 'कलकलंत'त्ति अतितप्ततया कलकलशब्दं कुर्वन्ति ।

तव प्रियाणि मांसानि खण्डरूपाणि 'सोल्लगाणि'त्ति भर्ष्टीकृतानि स्मारयित्वेति शेषः, स्वमांसानि मच्छरीरादेवोत्कृत्योत्कृत्य ढौकितानि 'अग्निवर्णानि' अतितप्ततयाऽग्निच्छायानि सुरादीनि मद्यविशेषणरूपाणि, इहापि स्मारयित्वेति शेषः, 'पज्जितोमि'त्ति पायितोऽस्मि 'जलंतीओ'त्ति ज्वलन्तिरिव ज्वलन्तीरत्युष्णतया वशा रुधिराणि च, ज्वलन्तीति लिङ्गविपरिणामेन सम्बन्धनीयम् ॥

'निच्च' मित्यादि, नरकवक्तव्यतोपसंहर्तृ सूत्रत्रयम्, अत्र च 'भीतेन' उत्पन्नासाध्वसेन तथा 'त्रसी उद्वेगे' 'त्रस्तेन' उद्विग्नेनात एव 'दुःखितेन' संजातविविधदुःखेन 'व्यथितेन च' कम्पमानसकलाङ्गोपाङ्गतया चलितेन, दुःखसंबद्धेति वेदनाविशेषणं सुखसम्बन्धिन्या अपि वेदनायाः सम्भवाद्, 'वेदिते'ति चानुभूता, तीव्रा अनुभागतोऽत एव चण्डाः-उत्कटाः प्रगाढाः-गुरुस्थितिकास्तत एव 'घोराः' रौद्राः 'अतिदुस्सहाः' अत्यन्तदुरध्यासास्तत एव च महद्भयं यकाभ्यस्ता महाभयाः, पठ्यते च-महालयाः-महत्यः, 'भीमाः' श्रूयमाणा अपि भयप्रदाः, एकार्थिकानि वैतान्यत्यन्तभयोत्पादनायोक्तानि, इह च वेदना इति प्रक्रमः ॥ कथं पुनस्तस्यास्तीव्रादिरूपत्वमित्याशङ्क्य 'जारिसे' त्यादिना इहत्यवेदनापेक्षया नरकदुःखवेदनाया अनन्तगुणत्वमाह-'वेयण'त्ति प्रक्रमाद् दुःखवेदना ॥

न केवलं नरक एव दुःखवेदना मयाऽनुभूता किन्तु सर्वास्वपि गतिष्विति पुनर्निगमन-द्वारेणाह-'सव्वे' त्यादिना, इह च 'असाता' दुःखरूपा निमेषः-अक्षिनिमीलनं तस्यान्तरं-व्यवधानं यावता कालेनासौ भूत्वा पुनर्भवति तन्मात्रमपि-तत्परिमाणमपि कालमिति शेषः 'यद्' इति यस्मात् 'साता' सुखरूपा नास्ति वेदना, तत्त्वतो वैषयिकसुखमसुखमेव, ईर्ष्या-द्यनेकदुःखानुविद्धत्वाद्विपाकदारुणत्वाच्च ॥ सर्वस्य चास्य प्रकरणस्यायमाशयः-य एवमहं निमेषान्तरमात्रमपि कालं न सुखं लब्धवान् स कथं तत्त्वतः सुखोचितः सुकुमारो वेति शक्यते वक्तुं ?, येन च नरकेष्वत्युष्णशीतादयो महावेदना अनेकशः सोढास्तस्य महाव्रतपालनं क्षुदादि-सहनं वा कथमिव बाधाविधायि ?, तत्त्वस्तस्य परमानन्दहेतुत्वात्, तत्प्रव्रज्यैव मया प्रतिपत्त-व्येत्येकत्रिंशत्सूत्रावयवार्थः ॥ तत्रैवमुक्त्वोपरते-

मू.(६८१) *तं बितऽम्मापियरो, छंदेणं पुत्त ! पव्वया।*
नवरं पुन सामन्ने, दुक्खं निप्पडिकम्मया ॥

वृ. 'तं' मृगापुत्रं ब्रुतोऽम्बापितरौ छन्दः-अभिप्रायस्तेन स्वकीयेनेति गम्यते, किमुक्तं भवति ?-यथाऽभिरुचितं पुत्र! 'प्रव्रज' प्रव्रजितो भव, 'नवरम्' इति केवलं 'पुनः' त्रिशेषणे 'श्रामण्ये' श्रमणभावे 'दुःखं' दुःखहेतुः 'निष्प्रतिकर्मता' कथञ्चिदोगोत्पत्तौ चिकित्साऽकरणरूपेति सूत्रार्थः ॥ इत्थं जनकाभ्यामुक्ते

मू.(६९०) सो बिंतऽम्मापियरो !, एवमेयं जहाफुडं।
परिकम्मं को कुणई, अरन्ने मिगपक्खिणं ? ॥

मू.(६९१) एगभूओ अरन्ने वा, जहा ऊ चरई मिगो।
एवं धम्मं चरिस्सामि, संजमेण तवेण य ॥

मू.(६९२) जया मिगस्स आयंको, महारण्णंमि जायई।
अच्छंतं रुक्खमूलंमि, को णं ताहे तिगिच्छई ? ॥

मू.(६९३) कोवा से ओसहं देइ, को वा से पुच्छई सुहं।
को से भत्तं व पानं वा, आहरित्तु पणामई ? ॥

मू.(६९४) जया य से सुही होइ, तया गच्छइ गोअरं।
भत्तपाणस्स अट्ठाए, वल्लराणि सराणि य ॥

मू.(६९५) खाइत्ता पाणियं पाउं, वल्लरेहिं सरेहि य।
मिगचारियं चरित्ता णं, गच्छई मिगचारियं ॥

मू.(६९६) एवं समुट्ठिए भिक्खू, एवमेव अनेगए।
मिगचारियं चरित्ता णं, उड्ढं पक्कमई दिसं ॥

मू.(१६७) जहा मिए एग अनेगचारी, अनेगवासे धुवगोअरे अ।
एवं मुनी गोयरियं पविट्ठे, नो हिलए नोवि य खिंसइज्जा ॥

वृ. 'स' इति युवराजः 'बिन्ति' त्ति आर्षत्वाद् ब्रूतेऽम्बापितरौ, यथैतन्निष्प्रतिकर्मतया दुःखरूपत्वं युवाभ्यामुक्तं यथास्फुटमिति प्राग्वत्, परं परिभाव्यतामिदं-परिकर्म रोगोत्पत्तौ चिकित्सारूपं कः करोति ?, न कश्चिदित्यर्थः, क्व ?-अरण्ये, केषां ?-मृगपक्षिणाम्, अथ-चैतेऽपि जीवन्ति विचरन्ति च, ततः किमस्या दुःखरूपत्वमिति भावः, यतश्चैवमतः 'एग'त्यादि सर्वं स्पष्टमेव, नवरम् 'एकभूतः' एकत्वं प्राप्तोऽरण्ये, 'वे'ति वा पूरणे 'जहा उ'त्ति यथैव एवमित्येकभूतः संयमेन तपसा चेति धर्मचरणहेतुः, यदा 'आतङ्कः' आशुघाती रोगो, 'महारण्य' इति महाग्रहणममहति ह्यरण्येऽपि कश्चित्कदाचित्पश्येत् दृष्ट्वा च कृपातश्चिकित्सेदपि, श्रूयते हि केनचिद्विषपजा व्याघ्रस्य चक्षुरुदघाटितमटव्यामिति, वृक्षमूल इति तथाविधावासाभावदर्शनं, 'को णं'ति 'अचां सन्धिलोपौ बहुल' मितिवचनादजलोपे क एनं 'तदा' आतङ्कोत्पत्तिकाले चिकित्सति-औषधाद्युपदेशेन नीरोगं कुरुते ?, न कश्चिदित्यर्थः, चिकित्सके चासति को वेति वाशब्दः समुच्चये औषधं ददातीत्येवमुत्तरोत्तरप्राप्तिरुपदर्शनीया ॥ 'आहारित्तु'त्ति आहृत्य 'प्रणामयेत्' अर्पयेत्, 'अर्पेः पणाम' इति वचनात्।

कथं तर्हि तस्य निर्वहणमित्याह-अदा स सुखी भवति, स्वत एव रोगाभाव इति गम्यते, 'गच्छति'यातिगौरिव परिचितेतरभूभागपरिभावनारहितत्वेन चरणं-भ्रमणमस्मिन्निति गोचरस्तं

भक्तमिव भक्तं तद्भक्ष्यं तृणादि तच्च पानं च भक्तपानं तस्य 'अर्थाय' प्रयोजनाय, गोचरमेव विशेषत आह-'वल्लराणि' गहनानि, उक्तञ्च-"गहणमवाणियदेसं रुक्खे छेत्तं च वल्लरं जाण" 'सरांसि च' जलस्थानानि। स्वादित्वा निजभक्ष्यमिति गम्यते, वल्लरेषु सरःसु वेति सुब्व्यत्ययेन नेयं, तथा मृगाणां चर्या-इतश्चेतश्चोत्प्लवनात्मकं चरणं **मृगचर्यां** तां, '**मितचारिता**' वा परिमितिभक्षणात्मिकां 'चरित्वा' आसेव्य परिमिताहारा एव हि स्वरूपेणैव मृगा भवन्ति, विशेषाभिधायित्वाच्च न पौनरुक्त्यं, ततश्च 'गच्छति' याति मृगाणां चर्या-चेष्टा स्वातन्त्र्यो पवेशनादिका यस्यां सा मृगचर्या-मृगाश्रयभूस्ताम्।

अनेन च सूत्रपञ्चकेन दृष्टांत उक्तः, उत्तरेण सूत्रद्वयेनात्मन्येतदुपसंहारः, इह च 'एव'मिति मृगवत्समुत्थितः-संयमानुष्ठानं प्रत्युद्यतस्तथाविधाऽऽतङ्कोत्पत्तावपि न कश्चित् चिकित्साऽभिमुख इति भावः, 'एवमेव' मृगवदेव 'अनेगय'त्ति अनेकगो यथा ह्यसौ वृक्षमूले नैकस्मिन्नेवास्ते किन्तु कदाचित्क्वचिदेवमेषोऽप्यनियतस्थानस्थतया, पठ्यते च-'अनिएयणे'त्ति 'अनिकेतनः' अगृहः, स चैवं मृगचर्यां चरित्वा मृगवदातङ्कभावे भक्तपानार्थं गोचरं गत्वा तल्लब्धभक्तपानोपष्टम्भतश्च विशिष्टसम्यग्ज्ञानादिभावतः शुक्लध्यानारोहणादपगताशेषकर्मांश ऊर्ध्वं दिशमिति सम्बन्धः प्रकर्षेण क्रामति-गच्छति प्रक्रामति, किमुक्तं भवति ?-सर्वोपरिस्थानस्थितो भवति, निर्वृत इतियावत्, एवं च निर्वृतिरेवेह मृगचर्योपमार्थत उक्ता, तत्र हि मृगोपमा मुनय इत इतश्चाप्रतिबद्धविहारितया विहृत्य गच्छन्तीति। मृगचर्यामेव स्पष्टयितुमाह-यथा मृगः 'एग'त्ति 'एकः' अद्वितीयः 'अनेकचारी' नैकत्रैव भक्तपानार्थं चरतीत्येवंशीलः, 'अनेकवासः' नैकत्र वासः-अवस्थानमस्यास्तीति, 'ध्रुवगोचरश्च' सर्वदा गोचरलब्धमेवाहारमाहारयतीति, 'एवं' मृगवदेकत्वादिविशेषणविशिष्टो मुनिः 'गोचर्यां' भिक्षाटनं प्रविष्टो न 'हीलयेद्' अवजानीयात् कदशनादीति गम्यते, **नापि च** 'खिसएज्ज'त्ति निन्देत्तथाविधाहाराप्राप्तौ स्वं परं वा।

इह च मृगपक्षिणामुभयेषामुपक्षेपे यन्मृगस्यैव पुनः पुनर्दृष्टान्तत्वेन समर्थनं तत्तस्य प्रायः प्रशमप्रधानत्वादिति सम्प्रदाय इति सूत्राष्टकार्थः॥ एवं मृगचर्यास्वरूपमुक्त्वा यत्तेनोक्तं यच्च पितृभ्यां पितृवचनानन्तरं च यदसौ कृतवांस्तदाह-

मू.(६९८) मिगचारियं चरिस्सामि, एवं पुत्ता! जहासुहं।
अम्मापिऊहिंऽणुन्नाओ, जहाइ उवहिं तओ॥

मू.(६९९) मिगचारियं चरिस्सामो, सव्वदुक्खविमुक्खणिं।
तुब्भेहिं अम्ब! ऽणुन्नाओ, गच्छ पुत्त! जहासुहं॥

मू.(७००) एवं सो अम्मापियरं, अनुमानित्ता न बहुविहं।
ममत्तं छिंदई ताहे, महानागुव्व कंचुयं॥

मू.(७०१) इड्ढी वित्तं च मित्तं च, पुत्तदारं च नायओ।
रेणुअं व पडे लग्गं, निद्धुणित्ता न निग्गओ॥

वृ. गाथा चतुष्टयं स्पष्टमेव, नवरं मृगस्येव चर्या-चेष्टा मृगचर्या तां निष्प्रतिकर्मतादिरूपां चरिष्यामीति बलश्रिया युवराजेनोक्ते पितृभ्यामभाणि-एवं यथा भवतोऽभिरुचितं तथा

यथासुखं तेऽस्त्विति शेषः, एवं चानुज्ञातः सन् 'जहाति' त्यजति उपधिम्-उपकरणमाभरणादि द्रव्यतो भावतस्तु छद्मादि येनात्मा नरक उपधीयते, ततश्च प्रव्रजतीत्युक्तं भवति। उक्तमेवार्थं सविस्तरमाह-'सव्वदुक्खविमोक्खणिं' सकलासातविमुक्तिहेतुं 'तुब्भेहिं'ति युवाभ्यामम्ब! उपलक्षत्वात्पितरौ च 'अनुज्ञातः' अनुमतः सन्, तावाहतुः-गच्छ मृगचर्येति प्रक्रमः पुत्र! 'यथासुखं' सुखानतिक्रमेण।

'अनुमन्य' अनुज्ञाप्य 'ममत्वं' प्रतिबन्धं 'छिनत्ति' अपनयति महानाग इव कञ्चुकं, यथाऽसावतिरोपधित्याग उक्तः, बहिरुपधित्यागमाह-'ऋद्धिं' करितुरगादिसम्पदं 'वित्तं' द्रव्यं 'नायओ'त्ति 'ज्ञातीन्' सोदरादीन् 'निद्धूणित्त'त्ति निर्द्धूयैव निर्द्धूय त्यक्त्वेतियावत् 'निर्गतः' निष्क्रान्तो गृहादिति गम्यते, प्रव्रजित इति सोऽर्थः॥ इति सूत्रचतुष्टयार्थः॥

नि.[४१८] नाऊण निच्छयमई एव करेहित्ति तेहिं सो भणिओ।
धन्नोऽसि तुमं पुत्ता! जंसि विरत्तो सुहसएसु॥

नि.[४१९] सीहत्ता निक्खमिउं सीहत्ता चेव विहरसू पुत्ता!।
जह नवरि धम्मकामा विरत्तकामा उ विहरंति॥

नि.[४२०] नाणेन दंसणेन य चरित्ततवनियमसंजमगुणेहिं।
खंतीए मुत्तीए होहि तुमं वड्ढमानो उ॥

नि.[४२१] संवेगजणिअहासो मुक्खगमणबद्धचिंधसन्नाहो।
अम्मापिऊण वयणं सो पंजलिओ पडिच्छीय॥

वृ. गाथाचतुष्टयं पाठसिद्धमेव, नवरमाद्यगाथात्रयेण 'एवं पुत्र! यथासुख' मित्येतत्सूचितार्थाभिधानतो व्याख्यातं, चतुर्थगाथया त्ववशिष्टसूत्रं भावार्थाभिधानतः, 'सुखशतेभ्य' इति बहुत्वोपलक्षणं शतग्रहणं, 'सीहत्ता' इति सिंहतथा 'निष्क्रम्य' प्रव्रज्य सिंहतयैव विहर 'पुत्र!' इति जात!, किमुक्तं भवति?-यथा सिंहः स्वस्थानादिनिरपेक्ष एव निष्क्रामति, निष्क्रम्य च तथैव निरपेक्षवृत्त्या विहरति, एवं त्वमपि विहरेति, 'नवरं'ति परं धर्म एव कामः-अभिलाषो येषां ते धर्मकामाः, 'विरक्तकामे'त्ति प्राग्वत् 'कामविरक्ताः' विषयपराङ्मुखाः, 'चरित्रतपोनियमसंयमगुणैः'रित्यत्र चारित्रान्तर्गतत्वेऽपि तपःप्रभृतीनामुपदेशात्सामान्यविशेषयोश्च कथञ्चिद्भिन्नत्वाच्च न पौनरुक्त्यं, तथा संवेगो-मोक्षाभिलाषस्तेन जनितो हासो-मुखविकाशात्मकोऽस्येति संवेगजनितहासः-मुक्त्युपायोऽयं दीक्षेत्युत्सवमिव तां मन्यमानः प्रहसितमुख इत्यर्थः, पठन्ति च-'संवेगजणियसुद्धो'त्ति स्पष्टमेव, तथा मोक्षो-मुक्तिस्तद्गमनाय बद्धमिति-धृतं चिह्नं-धर्मध्वजादि तदेव सन्नाहो-दुर्वचनशरप्रसरनिवारकः क्षान्त्यादिर्वा येन स तथा, 'पडिच्छीय'त्ति 'प्रत्यैषीत्' प्रतिपन्नवानिति गाथाचतुष्टयार्थः॥ ततोऽसौ कीदृक् सञ्जात इत्याह-

मू.(७०२) पंचमहव्वयजुत्तो पंचसमिओ तिगुत्तिगुत्तो अ।
सब्भितरबाहिरिए, तवोकम्मंमि उज्जुओ॥

मू.(७०३) निम्ममो निरहंकारो, निस्संगो चत्तगारवो।
समो अ सव्वभूएसु, तसेसु थावरेसु अ।

मू.(७०४) लाभालाभे सुहे दुक्खे, जीविए मरणे तहा।

समो निंदापसंसासु, तहा मानावमानओ ॥

मू. (७०५) *गारवेसु कसाएसु, दंडसल्लभएसु अ ।*
नियत्तो हाससोगाओ, अनियाणो अबंधणो ॥

मू. (७०६) *अनिस्सिओ इहं लोए, परलोए अनिस्सिओ ।*
वासीचंदनकप्पो अ, असने अनसने तहा ॥

मू. (७०७) *अप्पसत्थेहिं दारेहिं, सव्वओ पिहियासवो ।*
अज्झप्पज्झाणजोगेहिं, पसत्थदमसासनो ॥

वृ. सूत्रषट्कं निगदसिद्धमेव, नवरं 'सब्भितरबाहिरिए'त्ति सहाभ्यन्तरैः-प्रायश्चित्तादिभिर्बाह्यैश्च-अनशनादिभिर्भेदैर्वर्त्तत इति सबाह्याभ्यन्तरं तस्मिन्, प्रधानत्वाच्च प्रथममभ्यन्तरोपादानं॥ 'निर्ममः' ममत्वबुद्धिपरिहारतः 'निस्सङ्गः' सङ्गहेतुधनादित्यागतः 'समश्च' न रागद्वेषवान्निर्ममत्वादेरेव॥ लाभेत्यिदना समत्वमेव प्रकारान्तरेणाह, अत्र च 'समः' न लाभादौ चित्तोत्कर्षभाग् नाप्यलाभादौ दैन्यवान्, जीविते मरणे समो, नैकत्राप्याकाङ्क्षावान्, 'मानावमानओ'त्ति मानापमानयोः, गौरवादीनि सूत्रे सुब्व्यत्ययेन सप्तम्यन्ततया निर्दिष्टानि पञ्चम्यन्ततया व्याख्येयानि, निर्वृत्त इति च सर्वत्र सम्बन्धनीयम्, 'अबन्धनः' रागद्वेषबन्धनरहितः ।

अत एव 'अनिश्रितः' इहलोके परलोके वाऽनिश्रितो नेहलोकार्थं परलोकार्थं वाऽनुष्ठानवान् 'नो इहलोगट्ठयाए तवमहिट्ठेज्जा नो परलोगट्ठयाए तवमहिट्ठेज्जा' इत्याद्यागमात् पुनरनिश्रिताभिधानं च मन्दमतिविनेयानुग्रहार्थमदुष्टमेव, वासीचन्दनकल्प इत्यनेन समत्वमेव विशेषत आह, वासीचन्दनशब्दाभ्यां च तद्व्यापारकपुरुषावुपलक्षितौ, ततश्च यदि किलैको वास्या तक्ष्णोति, अन्यश्च गोशीर्षादिना चन्दनेनालिम्पति, तथाऽपि रागद्वेषाभावतो द्वयोरपि तुल्यः, कल्पशब्दस्येह सदृशपर्यायत्वात्, 'अनशने' इति च नञाऽभावे कुत्सायां वा, ततश्चाशनस्य-भोजनस्याभावे कुत्सिताशनभावे वा कल्पः, इह चेष्टितोऽधिकाराणां प्रवृत्तिरिति पूर्वत्र समस्तमपि कल्प इत्यनुवर्त्तते, 'अप्रशस्तेभ्यः' प्रशंसाऽनास्पदेभ्यः 'द्वारेभ्यः' कर्मोपार्जनोपायेभ्यो हिंसादिभ्यः 'सर्वतः' सर्वेभ्यो य आश्रवः-कर्मसंलगनात्मकः स पिहितः-तद्द्वारस्थगनतो निरुद्धो येनासौ पिहिताश्रवः, सापेक्षस्यापि गमकत्वात्समासः, यद्वाऽप्रशस्तेभ्यो द्वारेभ्यः सर्वेभ्यो निर्वृत्त इति गम्यते, अत एव पिहिताश्रवः, कैः पुनरयमेवंविधः ?-अध्यात्मेत्यात्मनि ध्यानयोगाः-शुभध्यानव्यापारा अध्यात्मध्यानयोगास्तैः, अध्यात्मग्रहणं तु परस्थानां तेषामकिञ्चित्करत्वाद्, अन्यथाऽतिप्रसङ्गात्, प्रशस्तः प्रशंसास्पदो दमश्च-उपशमः शासनं च-सर्वज्ञागमात्मकं यस्य स प्रशस्तदमशासन इति सूत्रषट्कार्थः । सम्प्रति तत्फलोपदर्शनायाह-

मू. (७०८) *एवं नाणेन चरणेन, दंसणेन तवेन य ।*
भावनाहिं विसुद्धाहिं, सम्मं भावि तु अप्पयं ॥

मू. (७०९) *बहुयाणि उ वासाणि, सामन्नमनुपालिया ।*
मासिएण उ भत्तेणं, सिद्धिं पत्तो अनुत्तरं ॥

वृ. सूत्रद्वयमुत्तानार्थमेव, नवरं 'भावनाभिः' महाव्रतसम्बन्धिनीभिर्वक्ष्यमाणाभिरनित्य-

त्त्वादिविषयाभिर्वा 'विशुद्धाभिः' निदानादिदोषरहिताभिर्भावयित्वा-तन्मयतां नीत्वा 'अप्पयं'ति आत्मानं, 'मासिएण उ भत्तेणं'ति मासे भवं मासिकं तेन तुः पूरणे 'भक्तेन' भोजनेन मासोपवासोपलक्षणकत्वादस्य मासोपवासेनेतियावत् 'सिद्धिं' निष्ठितार्थतां सकलकर्मक्षयेणेति गम्यते, 'अनुत्तरां' सकलसिद्धिप्रधानाम्, अनेनाऽनसिद्धयादिव्यवच्छेदमाहेति सूत्रद्वयार्थः ॥ इड्ढीत्यादिसूत्रकदम्बकस्य तात्पर्यार्थमाह निर्युक्तिकृत्-

नि.[४२२] इड्ढीए निक्खंतो काऊं समणत्तणं परमघोरं।
तत्थ गओ सो धीरो जत्थ गया खीणसंसारा ॥

वृ. सुगमैव, नवरम्, 'ऋद्धया' दीनानाथदानादिकया विभूत्या निष्क्रान्तः सन् 'परमघोरं' कातरजनातिशयदुरनुचरं यत्र गताः क्षीणसंसारा इति मोक्ष इत्यभिप्राय इति गाथाऽवयवार्थः ॥

साम्प्रतं सकलाध्ययनार्थोपसंहारद्वारेणोपदिशन्नाह सूत्रकृत्-

मू.(७१०) *एवं करंति संबुद्धा, पंडिया पवियक्खणा।*
विनियट्टंति भोगेसु, मियापुत्ते जहामिसी ॥

वृ. व्याख्यातप्रायमेव, संगता प्रज्ञा येषां ते संप्रज्ञाः संपन्ना वा ज्ञानादिभिः 'जहामिसि'त्ति मकारोऽलाक्षणिको यथेत्यौपम्याभिधायी 'ऋषिः' मुनिरिति सूत्रावयवार्थः ।

इत्थमन्योक्त्योपदिश्य पुनर्भङ्ग्यन्तरेणोपदिशन्नाह-

मू.(७११) *महप्पभावस्स महाजसस्स, मियाइपुत्तस्स निसम्म भासियं।*
तवप्पहाणं चरियं च उत्तमं, गइप्पहाणं च तिलोअविस्सुतं ॥

मू.(७१२) *वियाणिया दुक्खविवड्ढणं धनं, ममत्तबंधं च महाभयावहं।*
सुहावहं धम्मधुरं अनुत्तरं, धारेह निव्वाणगुणावहं महं ॥ त्तिबेमि ॥

वृ. सूत्रद्वयं निगदसिद्धमेव, नवरं मृगापुत्रस्य 'भाषितं' संसारदुःखरूपतावेदकं यत्तेन पित्रोः पुरत उक्तं, प्रधानं तपो यत्र चरिते तत्प्रधानतपो, व्यत्ययनिर्देशश्च प्राग्वत्, 'चरितं' च चेष्टितं 'गतिप्पहाणं च' इति प्रधानगतिं च मुक्तिमिति योऽर्थः, 'त्रिलोकविश्रुतां' जगत्त्रितयप्रतीताम्, अनेन च फललिप्सवो हि प्रेक्षावन्तः प्रवर्त्तन्त इति काक्वा फलमाह-

एतान्निशमनाश्च ममत्वं बन्ध इव सत्प्रवृत्तिविधातितया मात्वबन्धस्तं च, महाभयावहं ततएव चौरादिभ्यो महाभयावहं ततएव चौरादिभ्यो महाभयावाप्तेः, धर्मो धूरिव महासत्त्वैरुह्यमानतया धर्मधुरा-महावत्रपञ्जकात्मिकां तां, तथा निर्वाणगुणा-अनन्तज्ञानदर्शनवीर्यसुखादयस्तदावहां-तत्प्रापिकां धर्मधुरां धारयतेति सम्बन्धः । इह च निर्वाणगुणावहत्वं सुखावहत्वे हेतुः 'महंति' अपरिमितमाहात्म्यतया महतीं, सूत्रत्वाच्चैवं निर्देश इति सूत्रद्वयार्थः ॥

'इति' परिसमाप्तौ ब्रवीमीति पूर्ववत्, उक्तोऽनुगमः, सम्प्रति नयास्तेऽपि प्राग्वदेव ॥

अध्ययनं १९ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे
एकोनविंशतितमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं २० महानिर्ग्रन्थीयं

वृ. व्याख्यातमेकोनविंशमध्ययम्, अधुना विंशतितमारभ्यते, अस्य चायमभिसम्बन्धः अनन्तराध्ययने निष्पन्नप्रतिक्रमणोक्ता, इयं चानाथत्वपरिभावनेनैव पालयितुं शक्येति महानिर्ग्रन्थहितमभिधातुमनाथतैवानेकधाऽनेनोच्यते इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य च चतुरनुयोगद्वारप्ररूपणा प्राग्वत् यावन्नामनिष्पन्ननिक्षेपे महानिर्ग्रन्थीयमिति नाम, क्षुल्लकप्रतिपक्षश्च महान् इति क्षुल्लकस्य निर्ग्रन्थस्य च निक्षेपमाह निर्युक्तिकृत्-

नि.[४२३] नामं ठवणादविए खित्ते काले अ ठाण पइ भावे ।
एएसि खुड्डगाणं पडिवक्ख महंतगा हुंति ॥

नि.[४२४] निक्खेवो नियंठंमि चउक्कओ दुविह० ॥

नि.[४२५] जाणगसरीरभविए तव्वइरित्ते अ निण्हगाईसु ।
भावे पंचविहे खलु इमेहिं दारेहिं सो नेओ ॥

वृ. अत्र च नामस्थापने सुगमे, द्रव्यक्षुल्लकादीनि क्षुल्लकनिर्ग्रन्थीयाध्ययन एव महत्प्रतिपक्षं व्याख्यानयद्भिर्व्याख्यातानीति न पुनः प्रतन्यन्ते । 'निक्खेवो नियंठंमी'त्यादि प्रतीतार्थं, नवरम् 'एभिः' इति वक्ष्यमाणैः 'द्वारैः' व्याख्यानोपायैः 'सः' इति निर्ग्रन्थो ज्ञेय इति गाथात्रयार्थः ॥ तानि चामूनि द्वाराणि-

नि.[४२६] पन्नवण १ वेय २ रागे ३ चरित्त ५ पडिसेवणा ६ नाणे ७ ।
तित्थ ८ लिंग ९ सरीर १० खित्ते ११ काल १२ गइ १३ ठिइ १४ संजम १५ निगासे १६ ॥

नि.[४२७]जोगु १७ वओग १८ कसाए १९ लेसा २० परिणाम २१ बंधने २२ उदए २३
कम्मोदीरण २४ उवसंपजहण २५ सन्ना २६ य आहारे २७ ॥

नि.[४२८] भावा २८ ऽऽगरिसे २९ कालं ३० तरे ३१ समुग्घाय ३२ खित्त ३३
फुसणा य ३४ । भावे ३५ परिणामे ३६ खलु महानियंठाण अप्पबहू ३७ ॥

वृ. तत्र प्रज्ञापना-स्वरूपनिरूपणं, तच्चैषां क्षुल्लकनिर्ग्रन्थीयाध्ययन एवाभिहितमिति नेहाभिधीयते १ द्वारं।

'वेद'त्ति वेदः-स्त्रीपुनपुंसकभेदः, तत्र पुलाकः पुंनपुंसकवेदयोर्न तु स्त्रीवेदे, तत्र तथाविधलब्धेरभावात्, बकुशः स्त्रीपुंनपुंसकवेदस्तेषु त्रिष्वपि, एवं प्रतिसेवनाकुशीलोऽपि, कषायकुशीलः, सवेदो वा स्यादवेदो वा, यदि सवेदस्त्रिष्वपि वेदेषु, अथावेद उपशान्तवेदः क्षीणवेदो वा, निर्ग्रन्थस्त्ववेद एव, सोऽप्युपशान्तवेदः क्षीणवेदो वा, एवं स्नातकोऽपि, न त्वसावुपशान्तवेदः, क्षीणमोहत्वात्, २ द्वारं।

'राग' इति पुलाकबकुशप्रतिसेवककषायकुशीलाः सरागा एव, कषायोदयवर्त्तित्वात्तेषां, निर्ग्रन्थो वीतरागः, स चोपशान्तकषायवीतरागः क्षीणकषायो वा वीतरागः, एवं स्नातकोऽपि, नवरमयं क्षीणकषायवीतराग एव ३ । द्वारं।

'कप्पो'त्ति 'कल्पः' स्थितास्थितकल्पो जिनकल्पादिर्वा, तत्र एव पुलाकादयः किं स्थितकल्पेऽस्थितकल्पे वा ?, द्वयोरपि स्युः, स्थविरकल्पादिरूपकल्पापेक्षया तु पुलाकः

स्थविरकल्पे जिनकल्पे वा, न तु कल्पातीतः, तथा चागमः- "पुलाए णं भंते ! किं जिनकप्पे होज्जा ? थेरकप्पे होज्जा ? कप्पाईए होज्जा ?, गोयमा ! जिनकप्पे वा होज्जा थेरकप्पे वा होज्जा नो कप्पातीते होज्ज" त्ति, अन्ये त्वाहुः- स्थविरकल्प एवेति, बकुशप्रतिसेवना-कुशीलावपि जिनकल्पे स्थविरकल्पे वा, न तु कल्पातीतौ कषायकुशीलस्त्रिष्वपि स्यात्, निर्ग्रन्थस्नातकौ कल्पातीतावपि ४। द्वारं।

'चरित्त'मिति पुलाकबकुशप्रतिसेवनाकुशीलाः सामायिकच्छेदोपस्थापनीययोः, कषाय-कुशीलश्चैतयोः परिहारविशुद्धसूक्ष्मसंपराययोश्च, निर्ग्रन्थो यथाख्यात एव, एवं स्नातकोऽपि ५। द्वारं।

'पडिसेवण'त्ति, पुलाकः प्रतिसेवको नाप्रतिसेवकः, स हि मूलगुणोत्तरगुणानाम-न्यतमविराधनात एव भवति, बकुशोऽपि प्रतिसेवक एव, नवरमुत्तरगुणविराधनातः, प्रतिसेवना कुशीलः पुलाकवत्, कषायकुशीलनिर्ग्रन्थस्नातका अप्रतिसेवका एव ६ द्वारं।

'नाण'त्ति पुलाकबकुशप्रतिसेवका द्वयो ज्ञानयोस्त्रिषु वा, तत्र द्वयोर्मतिश्रुतयोस्त्रिषु मतिश्रुता-वधिषु, इह च पुलाकस्य श्रुतं नवमपूर्वतृतीयाचारवस्तुन आरभ्य यावन्नय पूर्वाणि, उक्तं हि- "आरतो परओ वा न लद्धी लभइ" कषायकुशीलो द्वयोस्त्रिषु चतुर्षु वा, तत्र द्वयोर्मतिश्रुतयोस्त्रिषु मतिश्रुतावधिषु मतिश्रुतमनःपर्यायेषु (वा चतुर्षु) मतिश्रुतावधिमनःपर्यायेषु, निर्ग्रन्थोऽप्येवमेव, स्नातकस्तु केवलज्ञान एव, श्रुतज्ञाने तु कः कुत्र वर्तते इतल् क्षुल्लकनिर्ग्रन्थीय एवोक्तत्वान्न पुनरुच्यते ७ द्वारं।

'तित्थ'त्ति इह च 'तीर्थं' यत्तीर्थकरेण क्रियते, पुलाको बकुशप्रतिसेवकौ च तीर्थे, कषाय-कुशीलस्तु तीर्थेऽतीर्थे वा, अतीर्थे च भवन् तीर्थकरो वा स्यात् प्रत्येकबुद्धो वा, एवं निर्ग्रन्थ-स्नातकावपि ८। द्वारं।

'लिंग'त्ति लिङ्गं द्विधा-द्रव्यभावभेदात्, तत्रामी द्रव्यतः स्वलिङ्गे अन्यलिङ्गे गृहिलिङ्गे वा स्युः, भावतस्तु स्वलिङ्ग एव ९। द्वारं।

'सरिरे'त्ति पुलाकस्त्रिष्वौदारिकतैजसकार्मणेषु, बकुशप्रतिसेवनाकुशीलौ त्रिषु चतुर्षु वा, वैक्रियस्यापि तयोः संभवात्, कषायकुशीलोऽप्येवं पञ्चसु च, तस्याहारकेऽपि सम्भवात्, निर्ग्रन्थः स्नातकश्च पुलाकवत् १०। द्वारं।

'खेत्त'त्ति 'क्षेत्रं' कर्मभूम्यादि, तत्र जन्म सद्भावं च प्रतीत्य पञ्चाप्यमी कर्मभूमामेव स्युः, यथासम्भवं च संहरण प्रतीत्य कर्मभूमावकर्मभूमौ वा ११। द्वारं।

'कालोत्ति कालतः पञ्चापि पुलाकादयो जन्मतः सद्भावतश्चावसर्पिण्यां सुष्मदुष्मा दुष्मसुषमादुष्माभिधानेषु कालेषु स्युः, उत्सर्पिण्यां दुष्मसुषमासुषमदुष्मयोः, इदं च भरतै-रावतदशके, विदेहपञ्चकेषु चतुर्थकालप्रतिभागे यथासम्भवं संहरणं प्रतीत्य यथोक्तादन्यत्रापि काले स्युः, प्रज्ञप्त्यभिप्रायस्त्वयं-जन्मतः सद्भावतश्च पुलाकोऽवसर्पिण्यां सुष्मदुष्यमदुष्य-मसुषमाकाले च, न तु शेषेषु, उत्सर्पिण्यां जन्मतो दुष्यमायां दुष्मासुषमायां सुषमादुष्यमायां, सद्भावश्च दुष्मासुषमायां सुषमादुष्मायां चेति भरतैरावतयोः, महाविदेहे तु चतुर्थप्रतिभागे पञ्चापि सर्वदैव स्युः, यथासम्भवं संहरणतो न कदाचिन्निषिध्यन्ते, नवरं तत्पुलाकस्य नास्ति,

स्नातकादीनां तु पूर्वसुहृत्तत्वेन तत्संभवः, उक्तं हि-"पुलागलद्धीए वट्टमानो न संकिज्जइ उवसंहरिउं, तहा सिणाइयाणं जो संहरणादिसंभवो सो पुव्वोवसंहरियाणं, जओ केवलियादिणो नोवसंहरिज्जंति" नि १२। द्वारं।

'गति'त्ति 'गतिः' प्रागुक्तैव नवरमिहाराधनाविराधनाकृतो विशेष उच्यते-तत्र पुलाकोऽविराधनाद् इन्द्रेषूत्पद्यते, विराधनातस्त्वन्द्रसामानिकत्रयस्त्रिंशलोकपालानामन्यतमेषु, एवं बकुशप्रतिसेवनाकुशीलावापि, कषायकुशीलः पुनरविराधनया इन्द्रेष्वहमिन्द्रेषु वा जायते, विराधनयेन्द्रादीनामन्यतमेषु, निर्ग्रन्थस्त्वहमिन्द्रेष्वेवोत्पद्यते १३। द्वारं।

'ठिति'त्ति, पुलाकस्य जघन्येन पल्योपमपृथक्त्वं स्थितिरुत्कृष्टतोऽष्टादश सागरोपमाणि, बकुशप्रतिसेवनाकषायकुशीलानामपि जघन्यतः पल्योपमपृथक्त्वमुत्कृष्टतो बकुशप्रतिसेवकयोर्द्वाविंशतिसागरोपमाणि, कषायकुशीलस्य तु त्रयस्त्रिंशत्, निर्ग्रन्थस्याजघन्योत्कृष्टा त्रयस्त्रिंशदेवेति १४। द्वारं।

'संजमे'त्ति पुलाकबकुशप्रतिसेवककषायकुशीलानामसङ्ख्येयानि संयमस्थानानि, निर्ग्रन्थस्नातकयोरजघन्योत्कृष्टमेकमेव संयमस्थानं १५। द्वारं।

'निगासि'त्ति, आर्षत्वात्समा(मो)लोए सन्निकर्षः-स्वस्थानपरस्थानापेक्षया तुल्याधिकहीनत्वचिन्तनं, तत्र च संयमस्थानापेक्षया सर्वस्तोकं निर्ग्रन्थस्य, स्नातकस्य चैकमजघन्योत्कृष्टं संयमस्थानं ततः पुलाकस्यासङ्ख्येयगुणानि, एवं बकुशप्रतिसेवककषायकुशीलानामपि पूर्वपूर्वापेक्ष्याऽसङ्ख्येयगुणत्वं भावनीयम्, अमीषां च पञ्चानामपि प्रत्येकमनन्ताश्चारित्रपर्यायाः, यत उक्तम्-"पुलाकस्स णं भंते! केवतिया चरित्तपज्जवा पन्नत्ता?, गोयमा! अनंता चरित्तपज्जवा पन्नत्ता, एवं जाव सिणायस्सत्ति" तथा च-चारित्रपर्यायापेक्षया स्वस्थानं सन्निकर्षचिन्तायां पुलाकः पुलाकस्य चरित्रपर्यायैः स्याद्धीनस्तुल्योऽधिको वा, तत्र हीनोऽधिको वा भवन्ननन्तासङ्ख्येयासङ्ख्येयभागासङ्ख्यातासङ्ख्यातानन्तगुणलक्षणेन षट्कस्थानके स्यात्, एवं बकुशप्रतिसेवककषायकुशीला अपि स्वस्थानहीनाधिकचिन्तायां षट्स्थानपतिता एव, निर्ग्रन्थस्नातकौ तु स्वस्थानचिन्तायां तुल्यावेव, परस्थानसन्निकर्षचिन्तायां पुलाको बकुशप्रतिसेवकनिर्ग्रन्थस्नातकेभ्यश्चरित्रपर्यायैरनन्तगुणहीनो न तु तुल्योऽधिको वा, कषायकुशीलापेक्षया षट्स्थानपतितः, तथा चागमः-"पुलाए णं भंते! बउसस्स परट्ठाणसन्निगासेणं चरित्तपज्जवेहिं किं हीणे तुल्ले अब्भहिए?, गोयमा! होने नो तुल्ले नो अब्भहीए, अनंतगुणहीने, एवं पडिसेवणाकुसीलस्सवि, कसायकुसीलेण समं छट्ठाणवडिए, जहेव सट्ठाणनियंठस्स, जहा बउसस्स एवं सिणायस्सवि" केचित्तु प्रतिसेवनाकुशीलापेक्षयापि षट्स्थानपतित इत्याहुः, बकुशः पुलाकापेक्षया चरित्रपर्यायैरनन्तगुणाधिकः प्रतिसेवककषायकुशीलौ तु प्रति षट्स्थानपतितः निर्ग्रन्थस्नातकाभ्यामनन्तगुणहीनः, एवं प्रतिसेवककषायकुशीलयोरपि परस्थानसंनिकर्षो वाच्यो नवरं कषायकुशीलः पुलाकापेक्षया षट्स्थानपतितः, निर्ग्रन्थस्नातकौ पुलाकाद्यपेक्षयाऽनन्तगुणाधिकाविति १६। द्वारं।

'जोग'त्ति पुलाकादीनां निर्ग्रन्थावसानानां मनोवाक्कायास्त्रयोऽपि योगाः स्युः, स्नातकः सयोगोऽयोगो वा स्यात् १७। द्वारं।

'उवओग'त्ति, पुलाकादयश्चत्वारो मतिश्रुतावधिमनः पर्यायभेदतश्चतुर्भेदे साकारोपयोगे चक्षुरचक्षुरवधिविकल्पतस्त्रिविधे चानाकारोपयोगे स्युः, स्नातकः केवलज्ञानदर्शनाख्ययोर्द्वयोरेव १८। द्वारं।

'कसाय'त्ति पुलाकबकुशप्रतिसेवकाः संज्वलनकषायेशतुः कषायाः कषायकुशीलश्चतुर्षु संज्वलनक्रोधादिषु त्रिषु द्वयोरेकस्मिन् वा स्यात्, निर्ग्रन्थोऽकषायः स चोपशमतः क्षयतो वा, एवं स्नातको, नवरमसौ क्षीणकषाय एव १९। द्वारं।

'लेस'त्ति पुलाकबकुशप्रतिसेवकाः पीतपद्मशुक्लाभिधानासु तिसृषु लेश्यासु, कषायकुशीलः षट्स्वपि, निर्ग्रन्थः शुक्लेश्यायां, स्नातकस्तस्यामेवातिशुद्धायाम्, २०। द्वारं।

'परिणामे य'त्ति पुलाकबकुशप्रतिसेवककषायकुशीला वर्द्धमाने हीयमानेऽवस्थिते वा परिणामे स्युः, निर्ग्रन्थस्नातकौ वर्द्धमानावस्थितपरिणामावेव, तत्र च पुलाकदयस्त्रयो वर्द्धमाने परिणामे, अवस्थिते तु जघन्येनैकं समयं, समयानन्तरं कषायकुशीलत्वादिगमनने मरणेन वा, नवरं पुलाकस्य मरणं नास्ति, उक्तं च-"पुलाके तत्थ नो मरति"त्ति। उत्कृष्टेनान्तर्मुहूर्त्तम्, एवं हीयमानेऽपि, अवस्थिते तु जघन्येनैकं, समयम् उत्कृष्टेनान्तर्मुहूर्त्तं, तथा चागमः-"नियंठे णं भंते! केवतियं कालं वद्धमाणपरिणामे होज्जा?, गोयमा! जहन्नेणं अंतोमुहुत्तं, उक्कोसेणपि अंतोमुहुत्तं। केवइयं कालं अवट्ठियपरिणामे होज्जा?, गोयमा! जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं'ति। अपरे व्यमुत्कृष्टाऽवस्थितपरिणामे सप्त समयानित्यादुः, स्नातको जघन्येन उत्कृष्टेन च वर्द्धमानपरिणामेऽन्तर्मुहूर्त्तमवस्थितपरिणामे जघन्यतोऽन्तर्मुहूर्त्तमुत्कृष्टेन देशोनां पूर्वकोटीम् २१। द्वारं।

'बंधन'त्ति कर्मबन्धनं, तत्रायुर्वर्जाः, सप्त कर्मप्रकृतीः पुलाकोबध्नाति, बकुशप्रतिसेवकौ तु सप्त अष्टौ वा, आयुषोऽपि तयोर्बन्धसम्भवात्, कषायकुशीलाऽष्टौ सप्त षड् वाऽऽयुर्मोहवर्जाः, निर्ग्रन्थस्त्वेकमेव सातं, स्नातकोऽप्येवमबन्धको वा २२। द्वारं।

'उदय'त्ति कर्मोदयः, पुलाकबकुशप्रतिसेवककषायाकुशीला अष्टविधमपि कर्म वेदयन्ते, निर्ग्रन्थो मोहवर्जाः सप्त, स्नातको वेद्यायुर्नामगोत्राख्याश्चतस्रः २३। द्वारं।

'कम्मोदीरण'त्ति पुलाक आयुर्वेदनीयवरजाः षट् कर्मप्रकृतिरुदीरयति, बकुशप्रतिसेवकावष्टावायुर्वर्जाः, सप्त षड् आयुर्वेदनीयवर्जाः, कषायस्त्वेते एव द्वे अनुदीरको वा २४। द्वारं।

'उवसंपजहण'त्ति उवसंपदनम्-उपसम्पद-अन्यरूपप्रतिपत्तिः, सा च हानं च-स्वरूपपरित्याग उपसम्पद्धानं, तत्र पुलाकः पुलाकतां त्यजंस्तां परित्यजति कषायकुशीलत्वमसंयमं वोपसम्पद्यते, कोऽभिप्रायः?-न रूपान्तरापत्तिं विना पूर्वरूपपरित्यागो नापि तत्परित्यागं विना तदापत्तिः, कथञ्चिन्नित्यानित्यरूपत्वाद्वस्तुनः, एवं सर्वत्र भावनीयं, बकुशोऽपि बकुशतां त्यजन्तां परित्यजति प्रतिसेवकत्वं कषायकुशीलत्वमसंयमं संयमासंयमं वोपसंपद्यते, प्रतिसेवनाकुशीलः प्रतिसेवनाकुशीलत्वं त्यंजस्तत्परित्यजति पुलाकादित्रयं निर्ग्रन्थत्वमसंयमं संयमासंयमं वोपसम्पद्यते, निर्ग्रन्थो निर्ग्रन्थत्वं त्यजंस्तत्परित्यजति कषायकुशलीत्वं स्नातकत्वमसंयमं वोपसम्पद्यते, स्नातकः स्नातकत्वं त्यजंस्तत्परित्यजति सिद्धिगतिमुपसम्पद्यते २५। द्वारं।

'सन्न'त्ति सञ्ज्ञा, तत्र पुलाकनिर्ग्रन्थस्नातका नोसञ्ज्ञोपयुक्ताः, बकुशप्रतिसेवककषाय

यम्, इह चानुशिष्टरभिधेया, अर्थधर्मगतिः प्रयोजनम्, अनयोश्च परस्परमुपायोपेयभावलक्षणः सम्बन्धः सामर्थ्यादुक्त इति सूत्रार्थः ॥

सम्प्रति धर्मकथानुयोगत्वादस्य धर्मकथाकथनव्याजेन प्रतिज्ञातमुपक्रमितुमाह-

मू. (७१४) पभूयरयणो राया, सेणिओ मगहाहिवो ।
विहारजत्तं निज्जाओ, मंडिकुच्छिंसि चेइए ।

मू. (७१५) नानादुमलयाइन्नं, नानापक्खिनिसेवियं ।
नानाकुसुमसंछन्नं उज्जानं नंदनोवमं ॥

मू. (७१६) तत्थ सो पासए साहुं, संजयं सुसमाहियं ।
निसन्नं रुक्खमूलंमि, सुकुमालं सुहोइयं ॥

मू. (७१७) तस्स रूवं तु पासित्ता, राइणो तंमि संजए ।
अच्चंतपरमो आसी, अउलो रूवविम्हो ॥

मू. (७१८) अहो वन्नो अहो रूवं, अहो अज्जस्स सोमया ।
अहो खंती, अहो मुत्ती, अहो भोगे असंगया ॥

मू. (७१९) तस्स पाए उ वंदित्ता, काऊण य पयाहिणं ।
नाइदूरमणासन्ने, पंजली पडिपुच्छई ॥

मू. (७२०) तरुणोऽसि अज्जो ! पव्वइओ, भोगकालंमि संजया ! ।
उवट्ठिओऽसि सामन्ने, एअमट्ठं सुणेमु ता ॥

वृ. सूत्रसप्तकं पाठसिद्धमेव, नवरं प्रभूतानि रत्नानि-मरकतादीनि प्रवरगजाश्वादिरूपाणि वा यस्यासौ प्रभूतरत्नः 'विहारजत्त'त्ति सुब्व्यत्ययाद् विहारयात्रया क्रीडार्थमश्ववाहनिकादिरूपया 'निर्यातः' निर्गतो नगरादिति गम्यते, 'मंडिकुच्छिंसि'त्ति मण्डिकुक्षौ मण्डिकुक्षिनाम्नि 'चैत्ये' इत्युद्याने। तदेव नानेत्यादिना विशिनष्टि-'साहुं संजयं सुसमाहियं'ति, साधुः सर्वोऽपि शिष्ट उच्यते तद्व्यवच्छेदार्थं संयतमित्युक्तं, सोऽपि च बहिःसंयमवान्निह्नवादिरपि स्यादिति सुष्ठु समाहितो-मनःसमाधानवान् सुसमाहितस्तमित्युक्तं, 'सुहोइयं'ति सुखोचितं शुभोचितं वा।

'अत्यन्तपरमः' अतिशयप्रधानः 'अतुलः' अनन्यसदृशो रूपविषयो रूपविस्मयः 'अहो ?' इत्यादिना विस्मयरूपमुक्तम्, इह च 'अहो ?' इत्याश्चर्ये 'वर्णः' सुस्निग्धो गौरतादिः 'रूपम्' आकारः 'सौम्यता' चन्द्रस्येव द्रष्टुरानन्ददायिता 'असङ्गता' निःस्पृहता, पादवन्दनानन्तरं प्रदक्षिणाऽभिधानं पूज्यानामालोक एव प्रणामः क्रियत इति ख्यापनार्थं, तथा चागमः-"आलोए जिनपडिमाणं पणामं करेति"त्ति।

'प्रतिपृच्छति' प्रश्नयति, तरुणोत्यादिना प्रश्नस्वरूपमुक्तम्, इह च यत एव तरुणोऽत एव प्रव्रजितो भोगकाल इत्युच्यते, तारुण्ययस्य भोगकालत्वात्, यद्वा तारुण्येऽपि रोगादिपीडायां न भोगकालः स्यादित्येवमभिधानं, सोऽपि कदाचित्संयमेऽनुद्यत एव स्यात् त्वं पुनरुपस्थितश्च-कृतोद्यमश्च श्रामण्ये, पठन्ति च 'उवहितोऽसि'त्ति, एनम्, 'अर्थं' निमित्तं येनार्थेन त्वमीदृश्याम प्यवस्थायां प्रव्रजितः शृणोमि 'ता' इति तावत्, पश्चात्तु यत्त्वं भणिष्यसि तदपि श्रोष्यामीति

कुशीलाः सञ्ज्ञोपयुक्ता नो,सञ्ज्ञोपयुक्ता, २६। द्वारम्।

'आहार'त्ति पुलाकादयो निर्ग्रन्थावसाना आहारका एव, स्नातकस्तु आहारको ऽनाहारको वा २७। द्वारं।

तथा 'भव'त्ति पुलाकदयश्चत्वारो जघन्यत एकं भवग्रहणमुत्कृष्टतस्तु पुलाकनिर्ग्रन्थयोस्त्रीणि, बकुशप्रतिसेवककषायकुशीलानामष्टौ स्नातकस्याजघन्योत्कृष्टमेकमेव २८। द्वारं।

'आगरिस'त्ति आकर्षणमाकर्षः, स चेह सर्वविरतेर्ग्रहणमोक्षौ, पुलाकादीनां चतुर्णां जघन्येनैकभविक एव एवाकर्षः, उत्कृष्टेन पुलाकस्य त्रयो बकुशप्रतिसेवककषायकुशीलानां शतशो, निर्ग्रन्थस्य द्वौ, स्नातकस्याजघन्योत्कृष्ट एकः, नानाभविकाकषायापेक्षया पुलाकादीनां चतुर्णां जघन्येन द्वौ उत्कृष्टेन पुलाकस्य सप्त, बकुशस्य कुशीलद्वयस्य च सहस्रशो, निर्ग्रन्थस्य पञ्च, स्नातकस्य तु नास्त्येव २९। द्वारं।

'काले'त्ति पुलाको जघन्यत उत्कृष्टतश्चान्तर्मुहूर्तं यावद्भवति, बकुशप्रतिसेवककषायकुशीलास्तु जघन्येनैकसमयमुत्कृष्टेन देशोनां पूर्वकोटिं, निर्ग्रन्थो ऽपि जघन्यत एकं समयमुत्कृष्टेनान्तर्मुहूर्तं, तथा च भगवत्याम्-''निग्गंठे पुच्छा, गोयमा! जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं'' अन्ये तु निर्ग्रन्थो ऽपि जघन्यत उत्कृष्टश्चान्तर्मुहूर्तमेवेति मन्यन्ते, स्नातको जघन्येनान्तर्मुहूर्तमुत्कृष्टतो देशोनां पूर्वकोटिम्, एवमेकजीवापेक्षया, बहुजीवापेक्षया तु पुलाकनिर्ग्रन्थौ जघन्यत एकं समयमुत्कृष्टेनान्तर्मुहूर्तं, बकुशः सर्वाद्धम्, एवं प्रतिसेवककषायकुशीलास्नातका अपि ३०। द्वारम्।

'अंतरे य'त्ति पुलाकादीनां चतुर्णामन्तरं जघन्येनान्तर्मुहूर्तमुत्कृष्टतो ऽनन्तं कालं, स च कालतो ऽनन्ता उत्सर्पिण्यवसर्पिण्यः, क्षेत्रत उपार्द्धपुद्गलपरावर्त्तो देशोनः, स्नातकस्य नास्त्यन्तरम्, इत्थमेकं प्रति, बहूनां तु पुलाकानिर्ग्रन्थानां जघन्येनैकसमय उत्कृष्टेन पुलाकस्य सङ्ख्येयानि वर्षाणि निर्ग्रन्थस्य षण्मासाः, उक्तं हि-'सेढिं नियमा छम्मासाउ पडिवज्जंतिति' शेषाणां नास्त्येव ३१। द्वारं।

'समुग्घाय'त्ति पुलाकस्य वेदनाकषायमारणान्तिकसमुद्घातास्त्रयो, बकुशप्रतिसेवकयोस्त एव वैक्रियतैजसान्विताः पञ्च, कषायकुशीलस्य तु त एवाहारकसहिताः षड्, निर्ग्रन्थस्यैको ऽपि नास्ति, स्नातकस्य केवलिसमुद्घात एकः ३२। द्वारं।

'खेत्त'त्ति पुलाकादयश्चत्वारो लोकस्यासङ्ख्येयभागे नो सङ्ख्येयभागे न सङ्ख्येयेष्वसङ्ख्येयेषु वा भागेषु नापि सर्वलोके,

स्नातको ऽसङ्ख्येयभागे ऽसङ्ख्येयेषु भागेषु सर्वलोके वा, न शेषेषु, तथा च प्रज्ञप्तिः-''सिणाए पुच्छा, गोयमा! नो संखिज्जे भागे हुज्जा असंखिज्जे भागे हुज्जा नो संखेज्जेसु भागेसु होज्जा असंखिज्जेसु भागेसु हुज्जा सव्वलोए वा होज्जति'' चूर्णिकारस्त्वाह-सङ्ख्येयभागादिषु सर्वेषु भवति ३३। द्वारं।

'फुसणा उ'त्ति स्पर्शना च क्षेत्रवद्द्रष्टव्या ३४। द्वारं।

'भावे'त्ति पुलाकादयस्त्रयः क्षायोपशमिके भावे निर्ग्रन्थ औपशमिके क्षायिके वा, स्नातकः क्षायिके, इह तु पुलाकादयो निर्ग्रन्थाः, निर्ग्रन्थत्वं तु चारित्रनिमित्तमिति तद्धेतुभूतस्यैव भावस्य

विवक्षितत्वादित्थमभिधानम्, अन्यथा मनुष्यत्वादेरौदयिकादेरपि भावस्य सम्भवात् ३५।

'परिणाम'त्ति पुलाकाः प्रतिपद्यमानकाः कदाचित्सन्ति कदाचिन्नेति, यदा सन्ति तदा जघन्येनैको द्वौ वा त्रयो वा, उत्कृष्टः शतपृथक्त्वं, पूर्वप्रतिपन्ना अपि यदि स्युस्तदा जघन्येन तथैवोत्कृष्टेन सहस्रपृथक्त्वं, बकुशाः प्रतिपद्यमानका यदा स्युस्तदा जघन्येनोत्कृष्टेन च पुलाकवद्वाच्या, पूर्वप्रतिपन्नकास्तु, जघन्येन कोटिशतपृथक्त्वमुत्कृष्टेनेति तदेव, एवं प्रतिसेवका अपि, कषायकुशीलाः प्रतिपद्यमानका जघन्येन तथैव उत्कृष्टेन सहस्रपृथक्त्वं, पूर्वप्रतिपन्नाः जघन्येनोत्कृष्टेन च कोटिसहस्रपृथक्त्वं, निर्ग्रन्थाः प्रतिपद्यमानका जघन्येन तथैव उत्कृष्टेन द्विषष्ट्यधिकं शतं, तत्राष्टोत्तरं शतं क्षपकाणां चतुष्पञ्चाशदुपशमकानां, पूर्वप्रतिपन्नका अपि यदा स्युस्तदा जघन्येन तथैव उत्कृष्टेन शतपृथक्त्वं, स्नातकाः प्रतिपद्यमानका जघन्येन तथैव उत्कृष्टेनाष्टोत्तरं शतं, पूर्वप्रतिपन्नकास्तु जघन्येनोत्कृष्टेन च कोटिपृथक्त्वम्, इह च जघन्यत उत्कृष्टतस्तु पृथक्त्वमेवोच्यते, तत्र तज्जघन्यं लघुतरमुत्कृष्टं बृहत्तरमिति भावनीयं ३६। द्वारं।

'खलु महानिग्गंथाण अप्पबहुं'ति 'खलुः' वाक्यालङ्कारे महानिर्ग्रन्थानां द्रव्यनिर्ग्रन्थापेक्षयाऽमीषामेव प्रशस्यमुनीनामल्पबहुत्वं वाच्यमिति शेषः, तथा सर्वस्तोका निर्ग्रन्थास्ततः पुलाकाः सङ्ख्येयगुणाः, पुलाकेभ्यः स्नातकाः, स्नातकेभ्यो बकुशाः, बकुशेभ्यः प्रतिसेवकाः, प्रतिसेवकेभ्यः कषायकुशीला इति ३७ द्वारगाथात्रयार्थः॥

साम्प्रतं निर्ग्रन्थनिरुक्तिद्वारेणोपसंहरन्नाह

नि.[४२९] सव्वाज्जगंथमुक्का अब्भंतरबाहिरेण गंथेण।
एसा खलु निज्जुत्ती महानियंठस्स सुत्तस्स॥

वृ. प्राग्वत्। गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीय, तच्चेदम् -

मू.(७१३) *सिद्धाण नमो किच्चा संजयाणं च भावओ।*
अत्थधम्मगइं तच्चं, अणुसिट्ठिं सुणेह मे॥

वृ. सितं-बद्धमिहाष्टविधं कर्म तद् ध्मातं-भस्मसाद्भूतमेषामिति सिद्धाः-ध्यानानलनिर्दग्धाष्टकर्मेन्धनाः, उक्तं हि-"सियं धंतंति सिद्धस्स, सिद्धत्तमुवजायति"त्ति, तेभ्यः, कोऽभिप्रायः?-तीर्थकरसिद्धेभ्य इतरेभ्यश्च 'नमो' नमस्कारं 'कृत्वा'-विधाय 'संयतेभ्यश्च' सकलसावद्यव्यापारोपरतेभ्य आचार्योपाध्यायसर्वसाधुभ्यः इतियावत् 'भावतः' परमार्थतो न तु संवृत्त्यैव, इत्थं पञ्चपरमेष्ठिरूपेष्टदेवतास्तवमभिधायाभिधेयादित्रयमेवाह-अर्थश्च धर्मश्चार्थधर्मौ यदिवाऽर्थ्यते-हितार्थिभिरभिलष्यते इत्यर्थः, स चासौ धर्मश्चार्थधर्मस्ततस्योस्तस्य वा गतिः-गत्यर्थानां ज्ञानार्थतया हिताहितलक्षणा स्वरूपपरिच्छित्तिर्यया यस्यां वा सा ऽर्थधर्मगतिस्तां, पाठान्तरतोऽर्थधर्मवतीं वा 'तच्चं'ति तथ्याम्-अविपरीताम् 'अनुशिष्टिं' हितोपदेशरूपां शिक्षां 'शृणुत' आकर्णयत 'मे' इति मम मया वा कथ्यमानां वेति शेषः, स्थविरवचनमेतत्, अनेन च पूर्वोत्तरकालभाविक्रियाद्वयानुगतैककर्तृप्रतिपादनेनात्मनो नित्यानित्यत्वमाह, एकान्तनित्यत्वे ह्यविचलितरूपत्वान्न पूर्वक्रियाकर्तृत्वस्वरूपपरिहारेणोत्तरक्रियाकर्तृत्वाख्यस्वरूपान्तरसम्भवः, एकान्तानित्यत्वपक्षे तु क्षणध्वंसित्वादुत्तरक्रियाकाल आत्मनोऽसत्त्वमेवेति नैकान्तनित्यानित्यपक्षयोः पूर्वोत्तरक्रियानुगतैककर्तृसम्भव इति भावनी-

भाव इति श्लोकसप्तकार्थः ॥ इत्थं राज्ञोक्ते मुनिराह-

मू. (७२१) *अनाहो मि महाराय !, नाहो मज्झ न विज्जई ।*
अनुकंपगं सुहिं वावि, कंची नाहि तुमे महं ॥

वृ. 'अनाथः' अस्वामिकोऽस्मीत्यहं 'महाराज!' प्रशस्यनृपते!, किमित्येवं ? यतो 'नाथः' योगक्षेमविधाता मम न विद्यते, तथा 'अनुकंपगं'ति आर्षत्वादनुकम्पको यो मामनुकम्पते, 'सुहिं'ति तत एव सुहृद् 'वावि'त्ति प्राग्वदेव 'कंचि'त्ति कश्चिन्न विद्यते, ममेति सम्बन्धः, 'नाहि'त्ति प्रक्रमादनन्तरोक्तमर्थं जानीहि 'तुमि'त्ति त्वं, पठ्यते च-'कंची नाभिसमेमहं' कञ्चिदनुकम्पकं सुहृदं वाऽपि 'नाभिसमेमि' नाभिसंगच्छामि, न केनचिदनुकम्पेन सुहृदा वा सङ्गतोऽहमित्यादिनाऽर्थेन तारुण्येऽपि प्रव्रजित इति भाव इति सूत्रार्थः ॥ एवं च मुनिनोक्ते-

मू. (७२२) *तो सो पहसिओ राया, सेणिओ मगहाहिवो ।*
एवं ते इड्ढिमंतस्स, कहं नाहो न विज्जई ? ॥

मू. (७२३) *होमि नाहो भयंताणं, भोगे भुंजाहि संजया ! ।*
मित्तनाईपरिवुडो, मानुस्सं खु सुदुल्लहं ॥

वृ. सूत्रद्वयं प्रतीतार्थमेव, नवरम् 'एव'मिति दृश्यमानप्रकारेण 'ऋद्धिमतः' विस्मयनीयवर्णादिसम्पत्तिमतः 'कथम्' इति केन प्रकारेण नाथो न विद्यते ?, तत्कालापेक्षया सर्वत्र वर्त्तमाननिर्देशः, "यत्राकृदिस्तत्र गुणा वसन्ति" तथा 'गुणवति धनं ततः श्रीः श्रीमत्याज्ञा ततो राज्य'मिति हि लोकप्रवादः, तथा च न कथञ्चिदनाथत्वं भवतः संभवतीति भावः, यदि चानाथतैव भवतः प्रव्रज्याप्रतिपत्तिहेतुस्ततः 'होमि'त्ति भवाम्यहं 'भदन्तानां' पूज्यानां, ततश्च मयि नाथे मित्राण्यपि ज्ञातयो भोगाश्च तव सुलभा एवेत्यभिप्रायेण भोगेत्वाद्युक्तवान्, मानुष्यं खलु सुदुर्लभमिति च हेत्वभिधानमिति सूत्रद्वयार्थः ॥ मुनिराह-

मू. (७२४) *अप्पणावि अनाहोऽसि, सेनिया ! मगहाहिवा ।*
अप्पाणा अनाहो संतो, कहं नाहो भविस्ससि ? ॥

मू. (७२५) *एवं वुत्तो नरिंदो सो, सुसंभंतो सुविम्हिओ ।*
वयणं अस्सुअपुव्वं, साहुणा विम्हयं निओ ॥

मू. (७२६) *अस्सा हत्थी मनुस्सा मे, पुरं अंतेउरं च मे ।*
भुंजामि मानुसे भोए, आणा इस्सरियं च मे ॥

मू. (७२७) *एरिसे संपयग्गंमि, सव्वकामसमप्पिओ ।*
कहं अनाहो भवई ?, मा हु भंते ! मुसं वए ॥

वृ. 'अप्पणावि' सूत्रं सुगमेव, एवं च मुनिनोक्ते एवं सूत्रत्रयं स्पष्टमेव, नवरमाद्यस्य घटनैवं-स श्रेणिकनामा नरेन्द्रोविस्मयान्वितः प्रागपि रूपादिविषयविस्मयोपेतः सन् 'एवम्' उक्तनीत्या वचनमात्मनाऽप्यनाथस्त्वमित्यादिरूपमश्रुतपूर्वं साधुनोक्तः सुसम्भ्रान्तः-अत्याकुलः सुविस्मितश्च-अतीव विस्मयोपेतो भूत्वोक्तवानिति शेषः, यदुक्तवांस्तदाह-'अस्सा' इत्यादिना सूत्रद्वयेन, अत्र चाश्वा से सन्तीत्यादिक्रिया सर्वत्राध्याहर्त्तव्या, अत एव भुनज्मि 'मानुसि'त्ति मानुष्यकान् भोगान् 'आज्ञा' अस्खलितशासनात्मिका 'ऐश्वर्यं च' द्रव्यादिसमृद्धिः, यद्वा

आज्ञया ऐश्वर्यम्-प्रभुत्वं आज्ञैश्वर्यं, तथा च 'ईदृशे' अनन्तरमुक्तरूपे सम्पदामग्रं सम्पदग्र-समृद्धिप्रकर्षस्तस्मिन् सति, पठ्यते च-'एरिसे संपयायंमि'त्ति तत्र च सम्पदामायो-लाभः सम्पदायस्तस्मिन् 'सव्वकामसमप्पिय'त्ति प्राकृतत्वात् समर्पितसर्वकामे 'कथं' केन प्रकारेण 'अनाथः' अस्वामी 'भवई'त्ति पुरुषव्यत्ययेन भवामि 'मा हु'त्ति हुशब्दस्तस्मादर्थे, यत एवं तस्मान्मा भदन्त ! मृषा 'वए'त्ति वादीः, पठन्ति च-'भंते ! मा हु मुसं वय'त्ति सूत्रत्रयार्थः ॥ यतिस्तमुवाच-

मू. (७२८) न तुमं जाणसि अ नाहस्स, अत्थं पुच्छं च पत्थिवा ।
जहा अनाहो भवई, सनाहो वा नराहिव ! ॥

मू. (७२९) सुणेहि मे महारायं !, अव्वक्खित्तेण चेयसा ।
जहा अनाहो भवई, जहा मेअ पवत्तियं ॥

मू(७३०) कोसंबीनाम नयरी, पुराणपुरभेयिणी ।
तत्थ आसी पिया मज्झं, पभूयधनसंचओ ॥

मू. (७३१) पढमे वए महारायं !, अउला मे अच्छिवेयणा ।
अहुत्था तिउलो दाहो, सव्वगत्तेसु पत्थिवा ! ॥

मू. (७३२) सत्थं जहा परमतिक्खं, सरीरविवरंतरे ।
पविसिज्ज अरी कुद्धो, एवं मे अच्छिवेयणा ॥

मू. (७३३) तिअं मे अंतरिच्छं, च उत्तिमंगु च पीडई ।
इंदासनिसमा घोरा, वेयणा परमदारुणा ॥

मू. (७३४) उवट्ठिया मे आयरिया, विज्जामंतचिगिच्छगा ।
अबीआ सत्थकुसला, मंतमूलविसारया ॥

मू. (७३५) ते मे तिगिच्छं कुव्वंति, चाउप्पायं जहाहियं ।
न य मे दुक्खा विमोयंति, एसा मज्झ अनाहया ॥

मू. (७३६) पिया मे सव्वसारंपि, दिज्जाहि मम कारणा ।
न य दुक्खा विमोयंति, एसा मज्झ अनायहा ॥

मू. (७३७) माया(वि) मे महाराय!, पुत्तसोगदुहट्टिया ।
न य दुक्खा विमोयंति, एसा मज्झ अनायहा ॥

मू. (७३८) भायरा मे महाराय !, सगा जिट्ठकनिट्ठिया ।
न य दुक्खा विमोयंति, एसा मज्झ अनायहा ॥

मू. (७३९) भइणीओ मे महाराय !, सगा जिट्ठकनिट्ठगा ।
न य दुक्खा विमोयंति, एसा मज्झ अनायहा ॥

मू. (७४०) भारिया मे महाराय !, अनुरत्तमनुव्वया ।
अंसुपुन्नेहिं नयनेहिं, उरं मे परिसिंचई ॥

मू. (७४१) अन्नं पानं च न्हाणं च, गंधमल्लविलेवणं ।

मए नायमनायं वा, सा बाला नोवभुंजई ॥

मू. (७४२) *खणंपि मे महाराय !, पासाओवि न फिट्टई ।*
न य दुक्खा विमोयइ, एसा मज्झ अनायहा ॥

मू. (७४३) *तओऽहं एवमाहंसु, दुक्खमा हु पुनो पुनो ।*
वेयणा अनुहविउं जे, संसारंमि अनंतए ॥

मू. (७४४) *सयं च जइ मुंचिज्जा, वेयणा विउला इओ ।*
खंतो दंतो निरारंभो, पव्वईओ अनगारियं ॥

मू. (७४५) *एवं च चिंतइत्ता णं, पासुत्तो मि नंधवे ।*
परियत्तंतीइ राईए, वेयणा मे खयं गया ॥

मू. (७४६) *तओ कल्ले, पभायंमि, आउच्छित्ता न बंधवे ।*
खंतो दंतो निरारंभो, पव्वईओ अनगारियं ॥

मू. (७४७) *तोऽहं नाहो जाओ, अप्पणो अ परस्स य ।*
सव्वेसिं चेव भूयाणं, तसाणं थावराण य ॥

वृ. विंशतिः सूत्राणि प्रायः प्रतीतार्थान्येव, नवरं 'न तुमं जाणे अनाहस्स'त्ति न त्वं 'जानीषे' अवबुध्यसे, अनाथस्येति अनाथशब्दस्यार्थं च-अभिधेयमुत्थां वा-उत्थानं मूलोत्पत्तिं केनाऽभिप्राये भयोक्त इत्येवंरूपां, पठ्यते च-'अत्थं पोत्थं व'त्ति अर्थं प्रोत्था वा-प्रकृष्टोत्थानरूपामत एव यथाऽनाथः सनाथो वा भवति तथा च न जानीषे इति सम्बन्धः ॥ शृणु 'मे' मम कथयत इति शेषः, किं तदित्याह-यथाऽनाथो भवतीत्यनाथशब्दस्याभिधेयः पुरुषो भवति, यथा 'मेय'त्ति मया च प्रवर्त्तितमिति-प्ररूपितमनाथत्वमिति प्रक्रमः, अनेनोत्थानमुक्तम् ॥

'पुराणपुरभेयिणि'त्ति, पुराणपुराणि भिनत्ति-स्वगुणैरसाधारणत्वाद्भेदेन व्यवस्थापयति पुराणपुरभेदिनी, बहुलवचनात्कर्त्तरि ल्युट्, पठ्यते च-'नगराण पुडभेयणुत्ति लिङ्गव्यत्ययान्नगराणां मध्ये पुटभेदनं, पुनरिदमुक्तं भवति-प्रधानगनरी ॥ प्रथमे वयसि, इह प्रक्रमाद्यौवने 'अतुला' अनुपमा अक्षणोर्वेदना-अक्षिरोगजनिता व्यथा, 'अहोत्थ'त्ति अभूत् 'तिउले'त्ति आर्षत्वात् 'तोदकः' व्यथकः 'सर्वगोत्रेषु' सर्वाङ्गेषु, पठ्यते च 'विउलो दाहो सव्वंगेसु य'त्ति गतार्थं, 'सरीरविवरंतरे'त्ति शरीरविवराणि-कर्णरन्ध्रादीनि तेषामन्तरं मध्यं शरीरविवरान्तरं तस्मिन् 'पवेसेज्ज'त्ति 'प्रवेशयेत्' प्रक्षिपेत्, शरीरविवरग्रहणमतिसुकुमारत्वादान्तरत्वचो गाढवेदनोपलक्षणं, पठ्यते च-'सरीरबीयअंतरे आवेलिज्ज'त्ति शरीरबीजं-सप्तधातवस्तदन्तरे-तन्मध्ये 'आपीडयेद्' गाढमवगाहयेत्, 'एव'मित्यापीड्यमानस्य शस्त्रवत् 'मे' ममाक्षिवेदना, कोऽर्थः ?-यथा तदत्यन्तबाधाविधायि तथैषापीति ।

'त्रिक'मिति कटिभागम् 'अन्तरा'मध्ये 'इच्छां वा' अभिमतवस्त्वभिलाषं न केवलं बहिस्त्रिकाद्येवेति भावः 'पीडयति' बाधते, वेदनेति सम्बन्धः, तत्कालापेक्षया च वर्त्तमाननिर्देशः, एवमन्यत्रापि, इन्द्राशनिः-इन्द्रवज्रं तत्समाना-तुल्या अतिदाहोत्पादकत्वादिति भावः 'घोरा' परेषामपि दृश्यमाना भयोत्पादनी 'परमदारुणा' अतीवदुःखोत्पादिका ।

किं न कश्चित्तां प्रतिकृतवानित्याह-'उपस्थिताः' वेदनाप्रतीकारं प्रत्युद्यताः 'मे' मम

'आचार्याः' इति प्राणाचार्य वैद्या इतियावत्, 'विद्यामन्त्रचिकित्सकाः' विद्यामन्त्राभ्यास-उक्तरूपाभ्यां व्याधिप्रतिकर्त्तारः, 'अद्वितीयाः' अनन्यसाधारणतया तथाविधद्वितीयाभावात्, 'सत्थकुसल'त्ति शस्त्रेषु शास्त्रेषु वा कुशलाः शस्त्रकुशला शास्त्रकुशला वा, पठ्यते च 'नानासत्थत्थकुसल'त्ति सुगमं, मन्त्राणि च-उक्तरूपाणि मूलानि च-ओषधयस्तेषु विशारदाः-विज्ञा मन्त्रमूलविशारदाः ।

नैवोपस्थानमात्रेणैव ते स्थिताः किन्तु ते मे चिकित्सां कुर्वन्ति 'चाउप्पयं'ति 'चतुष्पदां' भिषग्भैषजातुरप्रतिचारकात्मकचतुर्भा(त्मकभा)गचतुष्टात्मिकां 'जहाहियं'त्ति 'यथाहितं' हितानतिक्रमेण यथाऽधीतं वा-गुरुसम्प्रदायागतवमनविरेचकादिरूपां, ततः किमित्याह-न चैवं कुर्वन्तोऽपि 'दुःखद' एवंविधरोगजनितादसातात् 'विमोचयन्ति' विशेषेण मुत्कलयन्ति, एषा दुःखाविमोचनात्मिका ममानाथता ॥ अन्यच्च-'सर्वसारमपि' निःशेषप्रधानं वस्तुरूपं 'दिज्जाहि'त्ति दद्यात् न त्वेवमादरवानपि दुःखात् 'विमोचयंति'त्ति वचनव्यत्ययाद्विमोचयति, एवं सर्वत्र ॥

तथा पुत्रविषयः शोकः पुत्रशोकः, हा ! कथमित्थं दुःखी मत्सुतो जात इत्यादिरूपस्ततो दुःखं तेन 'अट्टिय'त्ति आर्त्ता 'अद्दिय'त्ति वा 'अर्दिता' उभयत्र पीडितेत्यर्थः, ततः पुत्रशोकदुःखार्त्ता पुत्रशोकदुःखार्दिता वा ॥ तथा 'सग'त्ति लोकरूढितः सौदर्याः स्वका वा-आत्मया वा ॥ तथा 'भईणि'त्ति भगिन्यः ॥

अपरं च 'भार्या'पत्नी 'अनुरक्ता' अनुरागवती 'अनुव्वय'त्ति अन्विति-कुलानुरूपं व्रतम्-आचारोऽस्या अनुव्रता पतिव्रतेति यावत्, वयोऽनुरूपा वा, पठ्यते च-'अनुत्तरमनुव्वय'त्ति, इह च मकारोऽलाक्षणिकः, अनुत्तरा-अतिप्रधाना 'उर'त्ति 'उरः' वक्षः 'परिषिञ्चति' समन्तात्प्लावयति ॥ स्नात्यनेनेति स्नानं-गन्धोदकादि मया ज्ञातमज्ञातं वेत्यनेन सद्भावसारतामाह, पठ्यते च-'तारिसं' रोगमावन्ने'त्ति 'तादृशम्' उक्तरूपं 'रोगम्' अक्षिरोगादिकम् 'आपन्ने' प्राप्ते मयीति गम्यते, सेति-भार्या बालेव बाला-अभिनवयौवना 'नोपभुंक्ते' नासेवते ॥

'पासाओऽवि न फिट्टइ'त्ति, अपिः चशब्दार्थः, मत्पश्वार्च्च नापयाति, सदा सन्निहितैवास्ते, अनेन तस्या अतिवत्सलत्वमाह ॥ 'ततः' इति रोगाप्रतिकार्यतानन्तरमहम् 'एवं' वक्ष्यमाणप्रकारेण 'आहंसु'त्ति उक्तवान्, यथा 'दुक्खमा हु'त्ति, हु एवकारार्थं, ततो दुःक्षमैव-दुःसहेव पुनः पुनः 'वेदना' उक्तस्वरूपा रोगव्यथा 'अनुभवितुं' वेदयितुं जे इति निपातः पूरणे ॥ यतश्चैवमतः 'सयं च'त्ति चशब्दोऽपिशब्दार्थस्ततः सकृदपि-एकदाऽपि यदि मुच्येऽहमिति गम्यते, कुतः ?-'वेयण'त्ति वेदनायाः 'विउल'त्ति विपुलायाः-विस्तीर्णायाः 'इतः' इत्यनुभूयमानायाः, ततः किमित्याह-'क्षान्तः' क्षमावान् 'दान्तः' इन्द्रियनोइन्द्रियदमेन 'पव्वइए अनगारिय'त्ति, 'प्रव्रजेयं' गृहान्निष्क्रामेयं ततश्च 'अनगारतां' भावभिक्षुतामङ्गीकुर्यामिति शेषः, यद्वा 'प्रव्रजेयं' प्रतिपद्येयमनगारितां येन संसारोच्छित्ततो मूलत एव न वेदनासम्भवः स्यादिति ।

'एवं च चिंतइत्ता णं'ति न केवलमुक्त्वा चिन्तयित्वा चैवं' पासुत्तोमि'त्ति प्रसुप्तोऽस्मि 'परियट्टंतिय'त्ति परिवर्त्तमानायाम्-अतिक्रामत्यां 'ततः' वेदनोपामानन्तरं 'कल्लु'त्ति कल्यो नीरोगः सन् 'प्रभाते' प्रातः, यद्वा 'कल्ल' इति चिन्तादिनापेक्षया द्वितीयदिने प्रकर्षेण व्रजितो-

गतः प्रव्रजितः, कोऽर्थः ?-प्रतिपन्नवाननगारिताम्॥ तत इति प्रव्रज्याप्रतिपत्तेरहं नाथो जातः संवृत्तो, योगक्षेमकरणक्षम इति भावः, 'आत्मनः' स्वस्य 'परस्य वा' अन्यस्य पुरुषादेः सर्वेषां भूतानां-जीवानां त्रसानां स्थावराणां चेति त्रसस्थावरभेदभिन्नानामिति विंशतिसूत्रावयवार्थः॥

किमिति प्रव्रज्याप्रतिपत्त्यनन्तरं नाथस्त्वं जातः पुरा तु न इत्याह-

मू.(७४८) *अप्पा नेई वैयरणी, अप्पा मे कूडसामली।*
अप्पा कामदुहा धेनू, अप्पा मे नंदनं वनं॥

वृ. 'आत्मा' नित्यत्वच्छेदाद्यनलत्वाद्यभ्युपगन्तैव नान्यः कश्चित्, किमित्याह-'नदी' सरित् 'वैतरणी' नरकनद्या नाम, ततो महाऽनर्थहेतुतया नरकनदीव, अत एवात्मैव कूटमिव जन्तुघात-नाहेतुत्वाच्छाल्मली कूटशाल्मली नरकोद्भवा। तथाऽऽत्मैव कामान्-अभिलाषान् दोग्धि-कामितार्थप्रापकतया प्रपूरयति कामदुधा धेनुरिवधेनुः, इयं च रूढित उक्ता, एतदुपमत्वं चाभिलाषितस्वर्गापवर्गावाप्तिहेतुतया, आत्मैव 'मे' मम 'नन्दनं' नन्दननामकं 'वनम्' उद्यानम्, एतदौपम्यं चास्य चित्तप्रल्हत्तिहेतुतया।

मू.(७४९) *अप्पा कत्ता विकत्ता य, दुहाण य सुहाण य।*
अप्पा मित्तममित्तं च, दुप्पट्ठियसुपट्ठिओ॥

वृ. यथा चैतदेवं तथाऽऽह- आत्मैव 'कर्त्ता' विधायको दुःखानां सुखानां चेति योगः, प्रक्रमाच्चात्मन एव 'विकरिता च' विक्षेपकश्चात्मैव तेषामेव, अतश्चात्मैव 'मित्रम्' उपकारितया सुहृत् 'अमित्तं'ति 'अमित्रं च' अपकारितयाऽसुहृत्। कीदृक् सन् ?-'दुप्पट्ठियसुप्पट्ठिओ'त्ति, दुष्टं प्रस्थितः-प्रवृत्तो दुष्प्रस्थितः दुराचारविधातेतियावत् सुष्ठु प्रस्थितः सुप्रस्थितः सदनुष्ठान-कर्त्तेतियावत् योऽर्थः, एतयोर्विशेषणसमासः, दुष्प्रस्थितो ह्यात्मा समस्तदुःखहेतुरिति वैतरण्या-दिरूपः सुप्रस्थितश्च सकलसुखहेतुरिति कामधेन्वादिकल्पः। तथा च प्रव्रज्याऽवस्थायामेव सुप्रस्थितत्वेनात्मनोऽन्येषां च योगकरणसमर्थत्वान्नाथत्वमिति सूत्रद्वयगर्भार्थः॥

पुनरन्यथाऽनाथत्वमाह-

मू.(७५०)इमा हु अन्नावि अनाहया निवा!, तामेगचित्तो निहुओ सुणेहि मे।
नियंठधम्मं लहियाणवी जहा, सीयंति एगे बहुकायरा नरा॥

वृ. 'इयम्' अनन्तरमेव वक्ष्यमाणा 'हुः' पूरणे 'अन्या' अपरा 'अपिः' समुच्चये 'अनाथता' अस्वामिता, यदभावतोऽहं नाथो जात इत्याशयः, 'निव'त्ति नृप 'ता' मित्यनाथताम्, 'एकचित्तः' एकाग्रमनाः 'निभृताः' स्थिरः शृणु, का पुनरसावित्याह- निर्ग्रन्थानां धर्मः-आचारो निर्ग्रन्थ-धर्मस्तं 'लभियाणवि'त्ति लब्ध्वाऽपि 'यथा' इत्युपप्रदर्शने 'सीदन्ति' तदनुष्ठानं प्रति शिथिलीभ-वन्ति 'एके' केचन ईषदपरिसमाप्ताः कातराः-निःसत्त्वाः बहुकातराः 'विभाषा सुपोबहु च पुरस्तात्त्वि'ति प्राग्बहुचप्रत्ययः, ये हि सर्वथा निःसत्त्वास्ते मूलत एव न निर्ग्रन्थमार्गं प्रतिपद्यन्त इत्येवमुच्यते, यदिवा कातरा एव बहवः संभवन्तीति बहुशब्दो विशेषणं 'नराः' पुरुषाः सीदन्तश्च नात्मानमन्यांश्च रक्षयितुं क्षमा इतीयं सीदनलक्षणाऽपराऽनाथतेति भावः॥

मू.(७५१) *जे पव्वइत्ताण महव्वयाइं, सम्मं (च) नो फासयई पमाया।*
अनिग्गहप्पा य रसेसु गिद्धे, न मूलओ छिंदइ बंधनं से॥

वृ. 'जो पव्वइत्ताणे'त्यादि सूत्राणि सीदनस्यैवानेकधा स्वरूपानुवादतः फलदर्शकानि स्पष्टान्यैव नवरं 'नो स्पृशति' इति नासेवते 'प्रमादात्' निद्रादेरनिगृहीतः- अविद्यमानविषय-नियन्त्रण आत्माऽस्येत्यनियन्त्रितात्मा, अत एव 'रसेषु' मधुरादिषु 'गृद्धः' गृद्धिमान् बध्यतेऽनेन कर्मेति बन्धनं रागद्वेषात्मक 'से' इति सः ॥

मू. (७५२) आउत्तया जस्स य नत्थि काइ, इरियाइ भासाइ तहेसणाए ।
आयाणनिक्खेवदुगुंछणाए, न वीरजायं अनुजाइ मग्गं ॥

वृ. 'आयुक्तता' दत्तावधानता 'काचिदि'ति स्वल्पाऽपि 'आयाणनिक्खेदुगुंछणाए'त्ति आदाननिक्षेपयोः - उपकरणग्रहणन्यासयोर्जुगुप्सनायाम्, इह चोच्चारादीनां संयमानुपयोगितया जुगुप्सनीयत्वेनैव परिस्थापना जुगुप्सनोक्ता, स ईदृक् किमि-त्याह-वीरैर्यातो-गतो वीरयातस्तम् 'अनुयाति' अनुगच्छति, नेति सम्बन्धः, अल्पसत्त्वतयेति भावः, क ? 'मार्ग' सम्यग्दर्शनादिकं मुक्तिपथम् ॥

मू. (७५३) चिरंपि से मुंडरई भवित्ता, अथिरव्वए तवनियमेहिं भट्ठे ।
चिरंपि अप्पाण किलेसइत्ता, न पारए होइ हु संपराए ॥

वृ. तथा च 'चिरमपि' प्रभूतकालमपि मुण्ड एव-मुण्डन एव केशापनयनात्मनि शेषानुष्ठान-पराङ्मुखतया रुचिर्यस्यासौ मुण्डरुचिः, अस्थिराणि- गृहीतमुक्ततया चलानि व्रतान्यस्येत्य-स्थिरव्रतः 'तपोनियमेभ्यः' उक्तरूपेभ्यः 'भ्रष्टः' च्युतश्चिरमपि 'अप्पाण'त्ति आत्मानं 'क्लेश-यित्वा' लोचादिना बाधयित्वा, आत्मनैवेति गम्यते, न 'पारगः' पर्यन्तगामी भवति 'हुः' वाक्या-लङ्कारे 'संपराए'त्ति सपरायन्ति- भृशं पर्यटन्त्यस्मिन् जन्तव इति सम्परायः-संसारस्तस्य, सूत्रे च सुब्व्यत्ययात्सप्तमी ॥

मू. (७५४) पुलेव मुट्ठी जह से असारे, अयंतिते कूडकहावणे य ।
राढामणी वेरुलियप्पगासे, अमहग्घए होइ हु जाणएसु ॥

वृ. स चैवंविधः पोल्लेत्यन्तः शुषिरा 'एव' इत्यवधारणे तेन पोल्लैव, न मनागपि निविडा 'मुष्टिः' अंगुलिसन्निवेशविशेषात्मिका 'यथा' इति सादृश्ये, पठ्यते वा-पोल्लारमुट्ठी जह'ति इहापि 'पोल्लर'त्ति शुषिरा, असारत्वं चोभयोरपि सदर्थशून्यतया 'अयंतिय'त्ति 'अयन्त्रितः' अनियमितः कूटकार्षापणवत्, वाशब्दस्येहोपमार्थत्वात्, यथा ह्यसौ न केनचित्कूटतया नियन्त्र्यते, तथैषोऽपि गुरूणामप्यविनीततयोपेक्षणीयत्वात्, 'राढामणि'त्ति काचमणिर्वैडूर्यवत्प्रकाशते-प्रतिभासत इति वेडूर्यप्रकाशः-वैडूर्यमणिसदृशः 'अमहार्घकः' इत्यमहामूल्यो भवति, 'चः' समुच्चये भिन्न-क्रमस्ततोऽमहार्घकश्च 'जाणएसु'त्ति ज्ञेषु मुग्धजनविप्रतारकत्वात्तस्य ॥

मू. (७५५) कुसीललिंगं इह धारइत्ता, इसिज्झयं जीविय बूहइत्ता ।
असंजए संजय लप्पमाणे, विणिघायमागच्छइ से चिरंपि ॥

वृ. 'कुशीललिङ्गं' पार्श्वस्थादिवेषम् 'इह' अस्मिन् जन्मनि धारयित्वा 'ऋषिध्वजं' मुनिचिह्नं रजोहरणादि 'जीविय'त्ति आर्षत्वाज्जीविकायै 'बृंहयित्वा' असंयमजीवितं जीविकां वा-निर्वहणोपायरूपां बृंहयित्वेति-पोषयित्वाऽत एवासंयतः सन् 'संजय लप्पमाणे'त्ति प्राकृतत्वा-त्सोपस्करत्वाच्च संयमतमात्मानं लपन्, पठ्यते च- 'संजयलाभमाणे'त्ति आर्षत्वात् संयत-

लाभः स्वर्गापवर्गप्राप्तिरूपस्तं मन्यमानो ममायं भविष्यतीति गणयन् 'विनिघातं' विविधाभिघातरूपम् 'आगच्छति' आयाति स 'चिरमपि' प्रभूतकालमप्यास्तामल्पं नरकगत्वादाविति भावः ॥

मू. (७५६) विसं तु पीयं जह कालकूडं, हणाइ सत्थ जह कुग्गहीअं।
एसेव धम्मो विसओववन्नो, हणाइ वेयाल इवाविवन्नो ॥

वृ. इहैव हेतुमाह-विषं पिबन्तीति आर्षत्वात्पीतं यथा 'कालकूटं' कालकूटनामकं 'हणाइ'त्ति हन्ति, चस्य च गम्यमानत्वात्, शस्त्रं च, यथा कुत्सितं गृहीतं कुग्गृहीतम् 'एसेव'त्ति एष एवं विषादिवत् 'धम्मो'त्तिधर्मो-यतिधर्मः 'विषयोपपन्नः' शब्दादिविषययुक्तो हन्ति, दुर्गतिपातहेतुत्वेन, द्रव्ययतिमिति शेषः 'वेताल इवाविवन्न'त्ति अविपन्नः अप्राप्तविपत् मन्त्रादिभिरनियन्त्रित इत्यर्थः, पठ्यते च-'वेयाल इवाविबंधणो'त्ति इह च 'अविबन्धनः' अविद्यमानमन्त्रादिनियन्त्रणः, उभयत्र साधकोनीति गम्यते ॥

मू. (७५७) जो लक्खणं सुविण पउंजमाणो, निमित्तकोऊहलसंपगाढे।
कुहेडविज्जासवदारजीवी, न गच्छई सरणं तंमि काले ॥

वृ.यो लक्षणं 'सुविनो'त्ति स्वप्नं चोक्तरूपं 'प्रयुञ्जानः' व्यापारयन् निमित्तं च-भौमादि कौतुकं च-अपत्याद्यर्थं स्नपनादि तयोः संप्रगाढः-अतिशयासक्तो निमित्तकौतुकसंप्रगाढः 'कुहेडविज्ज'त्ति कुहेटकविद्या-अलीकाश्चर्यविधायिमन्त्रतन्त्रज्ञानात्मिकास्ता एव कर्मबन्धहेतुतयाऽऽश्रवद्वाराणि तैर्जीवितुं शीलमस्येति कुहेटकविद्याऽऽश्रवद्वारजीवी 'न गच्छति' न प्राप्नोति 'शरणं' त्राणं दुष्कृतरक्षाक्षमं 'तस्मिन्' फलोपभोगोपलक्षिते 'काले' समये ॥

मू. (७५८) तमंतमेणेव उ से असीले, सया दुही विप्परियासुवेइ।
संधावई नरगतिरिक्खजोणी, मोनं विराहित्तु असाहुरूवे ॥

वृ.अमुमेवार्थं भावयितुमाह-'तमंतमेणेव उ'त्ति अतिमिथ्यात्वोपहततया 'तमस्तमसैव' प्रकृष्टाज्ञानेनैव 'तुः' पूरणे 'सः' द्रव्ययतिः अशीलः सदा दुःखी विराधनाजनितदुःखेनैव 'विप्परियासुवेइ'त्ति विपर्यासं तत्त्वादिषु वैपरीत्यम् 'उपैति' उपगच्छति, ततश्च 'संधावति' सततं गच्छति नरकतिर्यग्योनीः 'मौनं' चारित्रं विराध्य 'असाधुरूपं' तत्त्वतोऽयतिस्वभावः सन्, अनेन विराधनाया अनुबन्धवत्फलमुक्तम् ॥

मू. (७५९) उद्देसियं कीयगडं नियागं न मुच्चई किंचि अनेसणिज्जं।
अग्गीविवा सव्व भक्खी भवित्ता, इओ चुओ गच्छइ कट्टु पावं ॥

वृ. कथं पुनर्मौनं विराध्य कथं वा नारकतिर्यग्गतीः संधावतीत्याह-'उद्देसिय'मित्यादि, क्रयणंक्रीतं तेन कृतं-निर्वर्त्तितं क्रीतकृतं 'नित्यागं' नित्यपिण्डम् 'अग्गीविव'त्ति अग्निरिव प्राकृतत्वादाकारः सर्वम्-अप्राशुकमपि भक्षयतीत्येवंशीलः सर्वभक्षी भूत्वा कृत्वा च पापमिति योगः, 'गच्छति' याति कुगतिमिति शेषः ॥

मू. (७६०) न तं अरीकंठ छित्ता करेइ, जं से करे अप्पणिया दुरप्पा।
से नाहिई मच्चुमुहं तु पत्ते, पच्छानुतावेण दयाविहूणो ॥

वृ.यतश्चैवं दुश्चरितैरेव दुर्गतिप्राप्तिरतः 'न' नैव 'तम्' इति प्रस्तावादनर्थं 'कण्ठछित्ता' प्राणहर्ता

'से' तस्य 'दुरप्प'त्ति प्राकृतत्वात् 'दुरात्मता' दुष्टाचारप्रवृत्तिरूपा, न चैनामाचरन्नपि जन्तुरत्यन्तमूढतया वेत्ति, ततः किमुत्तरकालमपि न वेत्स्यतीत्याह 'सः' दुरात्मताकर्त्ता ज्ञास्यति प्रक्रमाद् दुरात्मतां 'मृत्युमुखं तु' मरणसमयं पुनः प्राप्तः पश्चादनुतापेन-हा दुष्ठु मयाऽनुष्ठितमित्येवंरूपेण, दया-संयमः सत्याद्युपलक्षणमहिंसा वा तद्विहीनः सन्, मरणसमयो हि प्रायोऽतिमन्दधर्मस्यापि धर्माभिप्रायोत्पत्तिरित्येवमभिधानं, यतश्चैवं महाऽनर्थहेतुः पश्चात्तापहेतुश्च दुरात्मता तत आदित एव मूढतामपहाय परिहर्त्तव्येयमिति भावः ॥

मू. (७६१) निरत्थया नग्गरुई उ तस्स, जे उत्तमट्ठे विवयासमेइ।
इमेवि से नत्थि परेवि लोए, दुहओऽवि से झिज्झइ तत्थ लोए ॥

वृ. यस्तु मृत्युमुखप्राप्तोऽपि न तां वेत्स्यति तस्य का वार्तेत्याह-'निरट्ठीए' इत्यादि, निरर्थिका तुशब्दस्यैवकारार्थस्येह सम्बन्धात् 'निरर्थकैव' निष्फलैव नाग्न्ये श्रामण्ये रुचिः इच्छा नाग्न्यरुचिस्तस्य 'जे उत्तमट्ठं'ति सुब्व्यत्ययादपेक्ष्य गम्यमानत्वाद् 'उत्तमार्थेऽपि' पर्यन्तसमयाराधनारूपेऽपि आस्तां पूर्वमित्यपिशब्दार्थः 'विपर्यासं' दुरात्मतायामपि सुन्दरात्मतापरिज्ञानरूपम् 'एति' गच्छति, इतरस्य तु कथञ्चित्स्यादपि किञ्चित्फलमिति भावः, किमेवमुच्यते ?, यतः 'इमेवि'त्ति अयमपि प्रत्यक्षो लोक इति सम्बन्धः, 'से' इति तस्य 'नास्ति' न विद्यते, न केवलमयमेव परोऽपि लोको-जन्मान्तरलक्षणः, तत्रैहलोकाभावः शरीरक्लेशहेतुलोचादिसेवनात् परलोकाभावश्च कुगतिगमनतः शारीरमानसदुःखसम्भवात्, तथा च 'दुहतोऽवि'त्ति द्विधाऽपि ऐहिकपारत्रिकार्थाभावेन 'स झिज्झइ'त्ति, स ऐहिकपारत्रिकार्थसम्पत्तिमतो जनान् विलोक्य धिग् मामपुण्यभाजनमुभयभ्रष्टतयेति चिन्तया क्षीयते, 'तत्र' इत्युभयलोकाभावे सति 'लोके' जगति ॥

मू. (७६२) एमेवऽहाछंदकुसीलरूवे, मग्गं विराहित्तु जिणुत्तमाणं।
कुररी विवा भोगरसानुगिद्धा, निरट्ठसोया परितावमेइ ॥

वृ. यदुक्तं स ज्ञास्यति पश्चादनुतापेनेति, तत्र यथाऽसौ परितप्यते तथा दर्शयन्नुपसंहारमाह-'एवमेव' उक्तरूपेणैव महाव्रतास्पर्शादिना प्रकारेण 'यथाच्छन्दाः' स्वरुचिविरचिताचाराः कुशीलाः-कुत्सितशीलास्तद्रूपः-तत्स्वभावः 'कुररीव' पक्षिणीव 'निरट्ठसोय'त्ति निरर्थो निष्प्रयोजनः शोको यस्याः सा निरर्थशोका 'परितापं' पश्चात्तापरूपम् 'एति' गच्छति, यथा चैषाऽऽमिषगृद्धा पक्ष्यन्तरेभ्यो विपत्प्राप्तौ शोचते न च ततः कश्चिद् विपत्प्रतीकार इति, एवमसावपि भोगरसगृद्ध ऐहिकामुष्मिकानर्थप्राप्तौ, ततोऽस्य स्वपरपरित्राणासमर्थत्वेनानाथत्वमिति भाव इति त्रयोदशसूत्रार्थः ॥ एतत् श्रुत्वा यत्कृत्यं तदुपदेष्टुमाह-

मू. (७६३) सुच्चाण मेहावि सुभासियं, इमं अनुसासनं नाणगुणोववेयं।
मग्गं कुसीलाण जहाय सव्वं, महानियंठाण वए पहेणं ॥

वृ. सुगमं, नवरं 'मेहावि'त्ति मेधाविन्! सुष्ठु-शोभनप्रकारेण भाषितं सुभाषितम् 'इमम्' इत्यनन्तरोक्तम् 'अनुशासनं' विषदनदोषदर्शनेनार्थावृत्त्या शिक्षणं ज्ञानस्य गुणो ज्ञात्वा विरमणात्मकस्तेन, ज्ञानगुणाभ्यां वोपपेतं-युक्तं ज्ञानगुणोपपेतं 'वये'त्ति व्रजेस्त्वं 'पहेणं'ति 'पथा' मार्गेण महानिर्ग्रन्थानामिति सम्बन्धः । ततः किं फलमित्याह-

मू. (७६४) चरित्तमायारगुणन्निए तओ, अनुत्तरं संजम पालिया णं।
निरासवे संखविया न कम्मं, उवेइ ठाणं विपुलुत्तमं धुवं॥

वृ. 'चरित्तमायारगुणन्निए' त्ति मकारोऽलाक्षणिकः, चरित्रस्याचरणम् आचारः -आसेवनं स एव गुणः, यद्वा गुणोज्ञानं ततस्तेन ताभ्यां वाऽन्वितश्चारित्राचारगुणान्वितः 'ततः' महानिर्ग्रन्थमार्गगमनाद्, 'अनुत्तरं' 'संजमपालिया णं'ति 'संयमं' यथाख्यातचारित्रात्मकं 'पालयित्वा' आसेव्य 'निराश्रवः' हिंसाद्याश्रवरहितः सन् क्षपयित्वा यदिवा 'संखविया णं'ति 'सङ्क्षप्य' संक्षयं नीत्वा 'कर्म' ज्ञानावरणीयादि 'उपैति' उपगच्छन्ति 'स्थानं' पदं विपुलं च तदनन्तानामपि तत्रावस्थितेरुत्तमं च प्रधानत्वाद् विपुलोत्तमं 'ध्रुवं' नित्यं मुक्तिपदमितियावदिति सूत्रार्थः॥

मू. (७६५) एवुग्गदंतेऽवि महातवोधने, महामुनी महापइण्णे महायसे।
महानियंठिज्जमिणं महासुअं, से काहए महया वित्थरेणं॥

वृ. 'एवम्' उक्तप्रकारेण 'से काहए'त्ति स श्रेणिकपृष्टो मुनिरकथयत्, शिक्षाणापेक्षया कथयति वेति सम्बन्धः, उग्रः-उत्कटः कर्मशत्रुजये प्रति स एव 'दान्तः' प्राग्वत् उग्रदान्तः अपिः पूरणे 'महाप्रतिज्ञः' अतिदृढव्रताभ्युपगमोऽ एव महायशा महानिर्ग्रन्थेभ्यो हितं महानिर्ग्रन्थीयम्, 'इदम्' अनन्तरोक्तं, शेषं स्पष्टमिति सूत्रार्थः॥ ततश्च-

मू. (७६६) तुट्ठो अ सेणिओ राया, इणमुदाहु कयंजली।
अनाहयं जहाभूयं, सुट्ठु मे उवदंसियं॥

मू. (७६७) तुज्झं सुलद्धं खु मनुस्सजम्मं, लाभा सुलद्धा य तुमे महेसी!।
तुब्भे सणाहा य सबंधवा य, जं भे ठिया मग्गि जिनुत्तमाणं॥

मू. (७६८) तंसि नाहो अनाहाणं, सव्वभूयाण संजया!।
खामेमि ते महाभाग!, इच्छामि अनुसासिउं॥

मू. (७६९) पुच्छिऊण मए तुब्भं, झाणविग्घो य जं कओ।
निमंतिया य भोगेहिं, तं सव्वं मरिसेहि मे॥

वृ. सूत्रचतुष्टयं स्पष्टमेव, नवरं तृप्तश्चेति, 'चः' पुनरर्थे भिन्नक्रमश्च, ततः श्रेणिकः पुनरिदमाह-'यथाभूतं' यथाऽवस्थितम् उपदर्शितं त्वयेति प्रक्रमः, 'सुलद्धं खु'त्ति सुलब्धमेव 'लाभाः' वर्णरूपाद्यवासिरूपा धर्मविशेषोपलम्भात्मका वा सुलब्धा उत्तरोत्तरगुणप्रकर्षहेतुत्वात्, सनाथाश्च सबान्धवाश्च तत्त्वत इति गम्यते, 'यद्' यस्माद् 'भे' इति भवन्तो, जिनोत्तममार्गस्थितत्वं सुलब्धजन्मत्वादौ हेतुः 'तंसि'त्ति पूर्वार्द्धेन पुनरुपबृंहणा कृता, उत्तरार्द्धेन तु क्षमणोपसंपन्नते दर्शिते, इह तु 'ते'त्ति त्वां। 'अनुसासिउं'ति 'अनुशासयितुं' शिक्षयितुमात्मानं भवतेति गम्यते, पुनः क्षमणामेव विशेषत आह-पृष्ट्वा 'कथं त्वं प्रथमवयसि प्रव्रजित' इत्यादि पर्युनुयुज्य निमन्त्रिताश्च भोगैर्यदिति सम्बन्ध इति सूत्रचतुष्टयार्थः॥ सकलाध्ययनार्थोपसंहारमाह-

मू. (७७०) एवं थुणित्ताण स रायसिहो, अनगारसीहं परमाइ भत्तिए।
सओरोहो य सपरियणो सबंधवोय धम्मानुरत्तो विमलेन चेयसा॥

मू. (७७१) ऊससियरोमकूवो, काऊण य पयाहिणं।
अभिवंदिऊण सिरसा, अइयाओ नराहिवो॥

मू. (७७२) इयरोऽवि गुणसमिद्धो तिगुत्तिगुत्तो तिदंडविरओ य।
विहग इव विप्पमुक्को विहरइ वसुहं विगयमोहु ॥

वृ. राजा चासौ सिंहश्चातिपराक्रमवत्तया राजसिंहः, अनगारस्य च सिंहत्वं कर्ममृगान् प्रत्यतिदारुणत्वात् प्रशंसाख्यापकं वा उभयत्र सिंह इति, 'सावरोधः' सान्तःपुरः 'सपरिजनः' सपरिवारः 'विमलेन' विगत मिथ्यात्वमेलेन। उच्छ्वसिताइवोच्छ्वसिताः-उद्भिन्ना रोमकूपा-रोमरन्ध्राणि यस्य, [illegible] 'अतिमात्रे'ति 'अतिमात्रः' गतः स्वस्थानमिति गम्यते, 'इतरः' संयतः सोऽपि हि 'विहग इव' पक्षीव 'विप्रमुक्तः' क्वचिदपि प्रतिबन्धविरहितो विहरतीति वर्त्तमाननिर्देशः प्राग्वत्, 'विगतमोहः' विगतवैचित्त्य, शेषं सुगममिति सूत्रत्रयार्थः ॥

'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयास्तेऽपि प्राग्वदेव ॥

अध्ययनं - २० समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे विंशतितमध्ययनस्य भद्रबाहुस्वामिविरचिता निर्युक्तिः एवं शान्त्याचार्य विरचिता टीका परिसमाप्ता ।

अध्ययनं २१ समुद्रपालितं

वृ. व्याख्यातं महानिर्ग्रन्थीयं नाम विंशतितममध्ययनम्, इदानीमेकविंशमारभ्यते, अस्य चायमभिसम्बन्धः- अनन्तराध्ययनेऽनाथत्वमनेकधोक्तम्, इह तु तदालोचनाद्विविक्तचर्ययैव चरितव्यमित्यभिप्रायेण सैवोच्यत इत्यनेनाभिसम्बन्धेनायातस्याध्ययनस्य प्राग्वदनुयोग-द्वारचतुष्टयं प्ररूप्यं तावद् यावन्नामनिष्पन्ननिक्षेपे समुद्रपालीयमिति नामातः समुद्रपालनि-क्षेपाभिधानायाह निर्युक्तिकृत्-

नि.[४३०] समुद्देण पालिअंमि अ निक्खेवु चउक्कओ दुविह दव्व।

नि.[४३१] समुद्दपालिआऊ वेयंतो भावओ य नायव्वो।
तत्तो समुट्ठिअमिणं समुद्दपालिज्जमज्झयणं ॥

वृ. गाथाद्वयं प्रतीतार्थमेव, नवरं समुद्रपालनिक्षेपप्रस्तावे यत्समुद्रेण पालित इत्युक्तं तत्स-मुद्रपाल इत्यत्र समुद्रेण पाल्यते स्मेति समुद्रपाल इति व्युत्पत्तिख्यापनार्थमिति गाथाद्वयार्थः ॥

गतो नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रालापकानिष्पन्ननिक्षेपावसरः, स च सति सूत्र इति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (७७३) चंपाए पालिए नाम, सावए आसि वाणिए।
महावीरस्स भगवओ, सीसो सो उ महप्पणो ॥

मू. (७७४) निग्गंथे पावयणे, सावए से विकोविए।
पोएण ववहरंते, पिहुंडं नयरमागए ॥

मू. (७७५) पिहुंडे ववहरंतस्स, वाणिओ देइ धूअरं।
तं ससत्तं पइगिज्झ, सदेसमह पत्थिओ ॥

मू. (७७६) अह पालियस्स घरणी, समुद्दंमि पसवई।
अह दारए तहिं जाए, समुद्दपालित्ति नामए ॥

मू. (७७७) खेमेण आगए चंपं, सावए वाणिए घरं।
संवड्ढई घरे तस्स, दारए से सुहोइए॥

मू. (७७८) बावत्तरीकलाओ अ, सिक्खिए नीइकोविए।
जुव्वनेन य अप्फुन्ने, सुरूवे पियदंसणे॥

मू. (७७९) तस्स रूववइं भज्जं, पिया आनेइ रूविणिं।
पासाए कीलए रम्मे, देवो दोगुंदगो जहा॥

मू. (७८०) अह अन्नया कयाई, पासायालोअने ठीओ।
वज्झमंडनसोभागं, वज्झं पासइ वज्झगं॥

मू. (७८१) तं पासिऊण संविग्गो, समुद्दपालो इणमब्बवी।
अहो असुहान कम्माणं, निज्जाणं पावगं इमं॥

मू. (७८२) संबुद्धो सो तहिं भयवं परमं संवेगमागओ।
आपुच्छऽम्मापियरो, पव्वए अनगारियं॥

वृ. सूत्राणि दश। इदमुत्तरं चाध्ययनं क्वचित्सोपस्कारतया व्याख्यास्यते-'चम्पायां' चम्पाऽभिधानायां पुरि पालितो नाम सार्थवाहः 'श्रावकः' श्रमणोपासकः 'आसीत्' अभूद् वणिगेव वणिजः-वनिग्जातिः महावीरस्य भगवतः 'शिष्यः' विनेयः स इति, सतुः विशेषणे 'महात्मनः' प्रशस्यात्मनः। स च कीदृगित्याह-'नैर्ग्रन्थे' निर्ग्रन्थसम्बन्धिनि 'पावयणे'त्ति प्रवचने श्रावकः सः इति पालितो विशेषेण कोविदः-पण्डितो विकोविदः, कोऽर्थः ?-विदित-जीवादिपदार्थः 'पोतेन व्यवहरन्' प्रवहणवाणिज्यं कुर्वन् 'पिहुण्डं' पिहुण्डनामकं नगरम् 'आगतः' प्राप्तः। तत्र च पिहुण्डे व्यवहरते तद्गुणाकृष्टचेताः कश्चिद्वाणिजो 'ददाति' यच्छति 'धूयरं'ति दुहितरम्, उद्ढवांश्च तामसौ, स्थित्वा च तत्र कियन्तमपि कालं तां 'ससत्त्वा' मित्या-पन्नसत्त्वां 'परिगृह्य' आदाय स्वदेशम् 'अथ' अनन्तरं 'प्रस्थितः' चलितः। तत्र चागच्छतोऽथ पालितस्य गृहिणी 'समुद्रे' जलधौ 'प्रसूते' गर्भं विमुञ्चति स्मेति शेषः, 'अथे'त्युपन्यासे 'दारकः' सुतः 'तस्मिन्' इति प्रसवने 'जातः' उत्पन्नः समुद्रपाल इति 'नामतो' नामाश्रित्य।

क्रमेण चागच्छन् 'क्षेमेण' कुशलेनागतश्चम्पायां श्रावको वाणिजः 'घरं'ति चस्य गम्यमान-त्वाद्, गृहं च स्वकीयं, कृतं च तत्र वर्द्धापनकादि, संवर्द्धते च 'गृहे' वेश्मनि, 'तस्य' इति पालिताभिधानवणिजो दारकः सः 'सुखोचितः' सुकुमारः। एवं च प्राप्तः कलाग्रहणयोग्यतां द्विसप्ततिकलाश्च शिक्षितः, शिक्षते वा पाठान्तरतः, जातश्च 'नीतिकोविदः' न्यायाभिज्ञः, 'जोव्वनेन य अप्फुन्ने'त्ति, चस्य भिन्नक्रमत्वाद्यौवनेन 'आपूर्णश्च' परिपूर्णशरीरश्च, पठ्यते च-'जोव्वनेन य संपन्ने'त्ति, तत्र च 'संपन्नः' युक्तोऽत एव 'सुरूपः' सुसंस्थानः 'प्रियदर्शनः' सर्वस्यैवानन्ददाता।

परिणयनयोग्यतां च तस्य विज्ञाय 'रूपवतीं' विशिष्टाकृतिं भार्यां पत्नीं 'पिता' पालितवणिग् 'आनयति' तथाविधकुलादागमयति 'रूपिणीं' रूपिणीनाम्नीं, परिणायितश्च तामसौ, प्रासादे क्रीडति-रमति तया सह 'रम्ये' अभिरतिहेतौ देवो दोगुन्दको यथा। अथान्यदा कदाचित् 'प्रासादालोकने' उक्तरूपे स्थितः सन् वधमर्हति वध्यत्वस्य मण्डनानि-रक्तचन्दनकरवीरादीनि

तैः शोभा-तत्कालोचितपरभागलक्षणा यस्यासौ वध्यमण्डनशोभाकरतं 'वध्यं' वधार्हं कञ्चन तथाविधाकार्यकारिणं पश्यति-बाह्यं-नगरबहिर्वर्त्तिप्रदेशं गच्छतीति बाह्यगस्तं, कोऽर्थः ?-बहिर्निष्क्रामन्तं, यद्वा 'वध्यगम्' इह वध्यशब्देनोपचाराद्वध्यभूमिरुक्ता।

तथाविधं वध्यं दृष्ट्वा संवेगः-संसारवैमुख्यतो मुक्त्यभिलाषस्तद्धेतुत्वात्सोऽपि संवेगस्तं समुद्रपालः 'इदं' वक्ष्यमाणमब्रवीत्, यथा-अहो ! 'अशुभानां कर्मणां' पापानामनुष्ठानानां 'निर्याणम्' अवसानं 'पापकम्' अशुभम् 'इदमं' प्रत्यक्षं यदसौ वराको वधार्थमित्थं नीयत इति भावः। एवं परिभावयन्, 'संबुद्धः' अवगततत्त्वः 'सः' वणिकपुत्रः 'तत्रे'ति तस्मिन्नेव प्रासादालोकने 'भगवान्' माहात्म्यवान्, माहात्म्येऽपि भगवच्छब्दस्य दर्शनात्, परं-प्रकृष्टं संवेगमागतः, ततश्चापृच्छ्य मातापितरौ 'पव्वये'ति 'प्राव्राजीत्' प्रकर्षेण गतवान्, कोऽर्थः ?-प्रतिपन्नवान्, 'अनगारितां' निस्सङ्गतामिति सूत्रदशकार्थः॥ सम्प्रति अनुवादोऽपि स्पष्टताहेतु र्व्याख्याङ्गमिति ख्यापनायैवोक्तमेवार्थमनुवदन् विशेषं च वदन्नाह निर्युक्तिकारः-

नि.[४३२] चंपाए सत्थवाहो नामेणं आसि पालिओ नामं।
वीरवरस्स भगवओ सो सीसो सीणमोहस्स॥

नि.[४३३] अह अन्नया कयाई पोएणं गणिमधरिमभरिएणं।
तो नगरं संपत्तो पीहुंडं नाम नामेणं॥

नि.[४३४] ववहरमाणस्स तहिं पिहुंडे देइ वाणिओ धूअं।
तंपि अ पत्तिं घित्तूण निग्गओ सो सदेसस्स॥

नि.[४३५] अह सा सत्थाहसुआ समुद्दमज्झंमि पसवई पुत्तं।
पिअदंसणसव्वंगं नामेण समुद्दपालित्ति॥

नि.[४३६] खेमेणं संपत्तो सो पालिअ सावगो घरं निययं।
धाईदसद्धपरिवुडो अह वड्ढइ सो उदहिनामो॥

नि.[४३७] बावत्तरिं कलाओ अ सिक्खिओ नीइकोविओ जाहे।
तो जुव्वनमुप्फन्नो जाओ पिअदंसणो अहिअं॥

नि.[४३८] अह तस्स पिआ पत्तिं आणेई रूविणित्ति नामेणं।
चउसट्ठिगुणोवेयं अमरवहूणं सरिसरूवं॥

नि.[४३९] अह रूविनीइ सहिओ कीलइ सो भवनपुंडरीअंमि।
दोगुंदगुव्व देवो किंकरपरिवारिओ निच्चं॥

नि.[४४०] अह अन्नया कयाई ओलोअनसंठिओ सदेवीओ।
वज्झं नीनिज्जंतं अन्निज्जंतं जनसएहिं॥

नि.[४४१] अह भणइ सन्निनाणी भीओ संसारिआण दुक्खाणं।
नीआण पावकम्माण हा जहा पावगं इनमो॥

नि.[४४२] संबद्धो सो भयवं संवेगमनुत्तरं च संपत्तो।
आपुच्छिऊण जएण निक्खंतो खायजसकित्ती॥

वृ. व्याख्यातप्राया एव, नवरं 'वीरवरस्से'ति नामतोऽन्येऽपि वीराः संभवन्ति स तु भगवान्

भावतोऽपि वीर इति प्राधान्यख्यापकं वरग्रहणम्, अनेन भगवत्समकालतामप्यस्स दर्शयति, 'गणिमधरिमधरिएणं'ति गणिमं-पूगफलादि धरिमं-सुवर्णकादि। प्रियदर्शनानि-सकलजनाभिमतावलोकनानि सर्वाण्यङ्गानि-शिरउरःप्रभृतीन्यस्येति प्रियदर्शनसर्वाङ्गस्तम्। 'धाईदसद्धपरिखुडे'त्ति दशार्द्धधात्रीपरिवृतो, दशार्द्धं च पञ्च ताश्च क्षीरमज्जनमण्डन क्रीडनाङ्क धात्र्यः, 'उदधिसमानार्थसमुद्रपदोपलक्षिताभिधानः समुद्रपालनामेति यावत्। 'जोव्वनमप्फुन्न'त्ति मकारोऽलाक्षणिको जातः प्रियदर्शनः 'अधिक'मित्यतिशयेन सविशेषलावण्यहेतुत्वाद् यौवनस्य, चतुःषष्टिगुणा अश्वशिक्षादिकलाष्टकरहिताः कला एव विज्ञानापरनामिका उच्यन्ते, 'भवनपुण्डरीके' भवनप्रधाने, पुण्डरीकशब्दस्येह प्रशंसावचनत्वात्।

वध्यं पश्यतीति शेषः, 'नीनिज्जंत'न्ति नीयमानम् ('अनिज्जंत'न्ति) 'अन्वीयमानम्' अनुगम्यमानं जनशतैरविवेकभिरिति गम्यते, पठन्ति च-'वज्झं नीनीज्जंतं पेच्छइ तो सो जनवएहिं'ति स्पष्टं, सञ्ज्ञी-सम्यग्दृष्टिः स चासौ ज्ञानी च सञ्ज्ञिज्ञानी 'भीतः' त्रस्तः सन् सांसारिकेभ्यो दुःखेभ्य इति, आर्षत्वाच्च सुब्व्यत्ययः, किं भणतीत्याह-'नीचानां' निकृष्टानां 'पापकर्मणां' पापहेत्वनुष्ठानानां चौर्यादीनां 'हा' इति खेदे यथा पापकं फलमिति गम्यते, 'इणमो'त्ति 'इदं' प्रत्यक्षं, किमुक्तं भवति ?-यथाऽस्य चौरस्यामिष्टं फलं पापकर्मणां तथाऽस्माऽशामपीति निर्युक्तिगाथैकादशकार्थः॥ प्रव्रज्य च यदसौ कृतवांस्तदाह सूत्रकृत्

मू. (७८३) जहिज्ज सग्गंथ महाकिलेसं, महंतमोहं कसिणं भयाणगं।
परियायधम्म चऽभिरोअइज्जा, वयाणि सीलाणि परिसहे य॥

मू. (७८४) अहिंसा सच्चं च अतेनगं च, तत्तो अ बंभं अपरिग्गहं च।
पडिवज्जिया पंच महव्वयाणि, चरिज्ज धम्म जिनदेसियं विऊ॥

मू. (७८५) सव्वेहिं भूएहि दयानुकंपी, खंतिक्खमे संजयबंभयारी।
सावज्जजोगे परिवज्जयंतो, चरिज्ज भिक्खू सुसमाहिइंदिए॥

मू. (७८६) कालेन कालं विहरिज्ज रट्ठे, बलाबलं जाणिय अप्पणो अ।
सीहो व सद्देण न संतसिज्जा, वइजोग सुच्चा न असब्भमाहू॥

मू. (७८७) उवेहमाणो उ परिव्वइज्जा, पियमप्पियं सव्व तितिक्खइज्जा।
न सव्व सव्वत्थऽभिरोअइज्जा, न यावि पूयं गरिहं च संजए॥

मू. (७८८) अनेग छंदा मिह मानवेहिं, जे भावओ संपकरेइ भिक्खू।
भयभेरवा तत्थ उइंति भीमा, दिव्वा मनुस्सा अदुवा तिरिच्छा॥

मू. (७८९) परीसहा दुव्विसहा अनेगे, सीयंति जत्था बहुकायरा नरा।
से तत्थ पत्ते न वहिज्ज पंडिए, संगामसीसे इव नागराया॥

मू. (७९०) सीओसिणा दंसमसगा य फासा, आयंका विविहा फुसंति देहं।
अकुक्कुओ तत्थऽहियासइज्जा, रयाइं खेविज्ज पुराकडाइं॥

मू. (७९१) पहाय रागं च तहेव दोसं, मोहं, च भिक्खू सयया वियक्खणे।
मेरुव्व वाएण अकंपमाणे, परीसहे आयगुत्ते सहिज्जा॥

मू. (७९२) अणुन्नए नावणए महेसी, न यावि पूयं गरिहं च संजए।

से उज्जं भावं पडिवज्ज संजए, निव्वाणमग्गं विरए उवेइ ॥

मू. (७९३) *अरइरइसहे पहीणसंथवे, विरए आयहिए पहाणवं।*
परमट्ठपएहिं चिट्ठइ, छिन्नसोए अममे अकिंचने ॥

मू. (७९४) *विवित्तलयणाइं भइज्ज ताई, निरोवलेवाइं असंथडाइं।*
इसीहिं चिन्नाइं महायसेहिं, काएण फासिज्ज परीसहाइं ॥

मू. (७९५) *सन्नाणनाणोवगए महेसी, अनुत्तरं चरियं धम्मसंचयं।*
अनुत्तरेनाणधरे जसंसी, ओभासई सूरिए वंऽतलिक्खे ॥

वृ. त्रयोदश सूत्राणि प्रायः सुगमान्येव, नवरं 'हित्वा' त्यक्त्वा संश्रासौ ग्रन्थस्य सङ्गग्रन्थः, प्राकृतत्वाद्बिन्दुलोपस्तं, पठन्ति च-'जहित्तं संगं चत्ति जहाय संगं च'त्ति वा उभयत्र हित्वा 'सङ्गं' स्वजनादिप्रतिबन्धं 'चः' पूरणे निपातः, महान् क्लेशो यस्माद्यस्मिन् वा तं महाक्लेशं, 'महंतमोहं'ति महान् मोहः-अभिष्वङ्गो यस्मिन् यतो वा तं तथाविधं, 'कसिणं'ति कृत्स्नं कृष्णं वा कृष्णलेश्यापरिणामहेतुत्वेन 'भयानकं' महाक्लेशादिरूपत्वादेव विवेकिनां भयावहं 'परियाय'त्ति प्रक्रमात् प्रव्रज्यापर्यायस्तत्र धर्मः पर्यायधर्मस्तं, चशब्दः पादपूरणे, 'अभिरोय-एज्ज'त्ति आर्षत्वाद् ह्यस्तन्यर्थे सप्तमी, ततः 'अभ्यरोचत' अभिरोचितवान् तदनुष्ठानविषयां प्रीतिं कृतवान्, उपदेशरूपतां च तन्त्रन्यायेन ख्यापयितुमित्थं प्रयोगः, यद्वाऽऽत्मानमेवायमनुशास्ति-यथा हे आत्मन्! सङ्गं त्यक्त्वा प्रव्रज्याधर्ममभिरोचयेद् भवान्, एवमुत्तरक्रियास्वपि यथासम्भवं भावनीयं, प्रव्रज्यापर्यायधर्ममेव विशेषत आह-'व्रतानि' महाव्रतानि 'शीलानि' पिण्डविशुद्ध्याद्युत्तरगुणरूपाणि 'परीषहान्' इति भीमसेनन्यायेन परीषहसहनानि च।

एतदभिरुच्य तदनन्तरं च यत् कृतवांस्तदाह-अहिंसां सत्यमस्तैन्यकं च 'तत्तो अ बंभं अपरिग्गहं च'त्ति ततश्च ब्रह्मचर्यमपरिग्रहं च 'प्रतिपद्य' अङ्गीकृत्य 'अब्बंभपरिग्गहं च' इति तु पाठे परिवर्ज्य चेत्यध्याहार्यं 'पञ्च महाव्रतानि' उक्तरूपाणि 'चरेज्ज'त्ति प्राग्वद्चरत्, नाङ्गीकृत्यैव तिष्ठेदिति भावः, 'धर्मं' श्रुतचारित्ररूपं जिनदेशितं 'विऊ'त्ति विद्वान् जानानः। 'सव्वेहिं भएहिं' सुब्व्यत्ययात् 'सर्वेषु' अशेषेषु प्राणिषु दयया-हितोपदेशादिदानात्मिकया रक्षणरूपया वाऽनुकम्पनशीलो दयानुकम्पी पाठान्तरतो दयानुकम्पो वा, क्षान्त्या न त्वशक्त्या क्षमते-प्रत्यनीकाद्युदीरितदुर्वचनादिकं सहत इति क्षान्तिक्षमः, संयत इति संयतः स चासौ ब्रह्मचारी च संयतब्रह्मचारी च संयतब्रह्मचारी पूर्वं ब्रह्मप्रतिपत्त्या गतत्वेऽपि ब्रह्मचारीत्यभिधानं ब्रह्मचर्यस्य दुरनुचरत्वख्यापनार्थम्, अनेन च मूलगुणरक्षणोपाय उक्तः।

'कालेन कालं'ति रूढितः काले-प्रस्तावे यद्वा कालेन-पादोनपौरुष्यादिना कालमिति-कालोचितं प्रत्युपेक्षणादि कुर्वन्नति शेषः, 'राष्ट्रे' मण्डले 'बलाबलं' सहिष्णुत्वासहिष्णुत्वलक्षणं ज्ञात्वाऽऽत्मनः यथा यथाऽऽत्मनः संयमयोगहानिर्न जायते तथा तथेत्यभिप्रायः, अन्यच्च सिंहवत् 'शब्देन' प्रस्तावाद्भयोत्पादकेन 'न समत्रस्यत्' नैव सत्त्वाच्चलितवान्, सिंहदृष्टान्ताभिधानं च तस्य सात्त्विकत्वेनातिस्थिरत्वात्, अत एव च वाग्योगम् अर्थाद् दुःखोपादकं 'सोच्च'त्ति श्रुत्वा 'न' नैव 'असभ्यम्' अश्लीलरूपम् 'आहु'त्ति उक्तवान्। तर्हि किमयमकरोदित्याह-'उपेक्षमाणः' तमवधीरयन् पर्यव्रजत्, तथा 'प्रियम्' अनुकूलम् 'अप्रियम्'

अननुकूलं 'सव्व तितिक्खएज्ज'त्ति सर्वम् 'अतितिक्षत' सोढवान्, किञ्च-'न सव्व'त्ति सर्वं वस्तु सर्वत्र स्थानेऽभ्य रोचयत, न यथादृष्टाभिलाषुकोऽभूदिति भावः, यदिवा यदेकत्र पुष्टालम्बनतः सेवितं न तत्सर्वम्-अभिमताहारादि सर्वत्राभिलषितवान्, न चापि पूजां गर्हां वाऽभ्यरोचयतेति सम्बन्धः, इह च गर्हातोऽपि कर्मक्षय इति केचिदतस्तन्मतव्यवच्छेदार्थं गर्हाग्रहणं, यद्वा गर्हा-परापवादरूपा।

ननु भिक्षोरपि किमन्यथाभावः संभवति ? येनेत्थमित्थं च तद्गुणाभिधानमित्याह-'अनेग'त्ति वृत्तार्द्धं, तत्र च 'अनेग'त्ति अनेके 'छन्दाः' अभिप्रायाः संभवन्तीति गम्यते, 'मिह'त्ति मकारोऽलाक्षणिकः 'इह' जगति 'माणवेहिं'ति सुब्व्यत्ययान्मानवेषु 'जे' इति याननेकान् छन्दान् 'भावतः' तत्त्ववृत्त्यौदायिकादिभावतो वा सः 'प्रकरोति' भृशं विधत्ते 'भिक्खू'त्ति अपिशब्दस्य गम्यमानत्वाद् भिक्षुरपि अनागारोऽपि सन्, अत इत्थमित्थं च तद्गुणाभिधानमिति भावः। अपरञ्च-'भयभैरवाः' भयोत्पादकत्वेन भीषणाः 'तत्र' इति ब्रह्मप्रतिपत्तौ 'उईंति'त्ति 'उद्यन्ति' उदयं यान्ति, पठ्यते च-'उवेंति'त्ति, उपयन्ति भयभैरवा इत्यनेनापि गते भीमा इति पुनरभिधानमतिरौद्रताख्यापनायोक्तं, 'दिव्या' इत्यादावपुसर्गा इति गम्यते, 'तिचित्ते'त्ति तैरक्षाः॥

तथा 'परिसह'त्ति परीषहाश्च उद्यन्तीति सम्बन्धः, 'सीदन्ति' संयमं प्रति शिथिलीभवन्ति 'जत्थ'त्ति यत्र-येषूपसर्गेषु परीषहेषु च सत्सु 'से' इति सः 'तत्र' तेषु 'पत्ते'त्ति वचनव्यत्ययात्प्राप्तेषु प्राप्तो वा-अनुभवद्वारेणायातो न ('व्यथेत' स्यात्' व्यथाभीतश्चलितो वा सत्त्वाद्, भिक्षुः सन् 'संग्रामशीर्ष इव' युद्धप्रकर्ष इव 'नागराजः' हस्तिराजः। 'स्पर्शाः' तृणस्पर्शादयः 'आतङ्काः' रोगाः 'स्पृशन्ति' उपतापयन्ति 'अकुक्कुय'त्ति आर्षत्वात् कुत्सितं कूजति-पीडितः सन्नाक्रन्दति कुकूजो न तथेत्यकुकूजः, पठ्यते च-'अकक्करे'त्ति कदाचिद्वेदनाऽऽकुलितो न कर्कारायितकारी, अनेन चानन्तरसूत्रोक्त एवार्थो विस्पष्टतार्थमन्वयेनोक्तः, एवंविधश्च स रजांसीव रजांसि-जीवमालिन्यहेतुतया कर्माणि 'खेविज्जे'ति अक्षिपत् परीषहसहनादिभिः क्षितवान्। 'मोह(म्)' इति मिथ्यात्वहास्यादिरूपोऽज्ञानं वा गृह्यते, आत्मना गुप्तः आत्मगुप्तः-कूर्मवत्संकुचितसर्वाङ्गः, अनेन परीषहसहनोपाय उक्तः।

किञ्च-'नयावि पूयं गरिहं च संजये'त्ति न चापि पूजां गर्हां च प्रतीति शेषः 'असज्जत्' सङ्गं विहितवान्, तत्र च अनुन्नतत्वमनवनतत्वं च हेतुभावतः, उन्नतो हि पूजां प्रति अवनतश्च गर्हां प्रति सङ्गं कुर्यात्र त्वन्ययेति भावः, पूर्वत्राभिरुचिनिषध उक्तः, इहं तु सङ्गस्येति पूर्वस्माद्विशेषः, 'स' इति 'सः' एवंगुणः 'ऋजुभावम्' आर्जवं 'प्रतिपद्य' अङ्गीकृत्य संयतो 'निर्वाणमार्गं' सम्यग्दर्शनादिरूपं विरतः सन् 'उपैति' विशेषेण प्राप्नोति, वर्तमाननिर्देश इहोत्तरत्र च प्राग्वत्।

ततः स तदा कीदृशः किं करोतीत्याह-अरतितरती संयमासंयमविषये सहते-न ताभ्यां बाध्यत इत्यरतिरतिसहः, 'पहीणसंथवे'त्ति प्रक्षीणसंस्तवः संस्तवप्रहीणो वा, संस्तवश्च पूर्वपश्चात्संस्तवरूपो वचनसंवासरूपो वा गृहिभिः सह, प्रधानः स च संयमो मुक्तिहेतुत्वात् स यस्यास्त्यसौ प्रधानवान्, परमः-प्रधानोऽर्थः पुरुषार्थो वाऽनयोः कर्मधारयो परमार्थो-मोक्षः स पद्यते गम्यते यैस्तानि परमार्थपदानि-सम्यग्दर्शनादीनि सुब्व्यत्ययात् तपु तिष्ठति अविराधकतयाऽऽस्ते 'छिन्नसोय'त्ति छिन्नशोकः छिन्नानि वा श्रोतांसीव श्रोतांसि-मिथ्यादर्शनादीनी

येनासौ छिन्नश्रोताः अत एवामलोऽकिञ्चनः, इह च संयमविशेषणानामानन्त्यात्तदभिधायिपदानां पुनः पुनर्वचनेऽपि न पौनरुक्त्यं, तथा 'विवक्तशयनानि' स्त्र्यादिविरहितोपाश्रयरूपाणि विविक्तत्वादेव च 'निरोवलेवाइं'ति निरुपलेपानि-अभिष्वङ्गरूपोलेपवर्जितानि भावतो द्रव्यतस्तु तदर्थं नोपलिप्तानि 'असंसृतानि' बीजादिभिरव्याप्तानि, अत एव च निर्दोषतया 'ऋषिभिः' मुनिभिः 'चीर्णानि' आसेवितानि, चीर्णशब्दस्य तु 'सुचीर्णं प्रोषितव्रत' मितिवत्साधुता, 'फासेज्ज'त्ति अस्पृशत्, सोढवानित्यर्थः, पुनः पुनः परीषहस्पर्शनाभिधानमतिशयख्यापनार्थं, ततः स कोदृगभूदित्याह-

'सः' इति समुद्रपालनामा मुनिर्ज्ञानमिह श्रुतज्ञानं तेन ज्ञानम् -अवगमः प्रक्रमाद् यथावत्क्रियाकलापस् तेनोपगतो-युक्तो ज्ञानज्ञानोपगतः, पाठान्तरतः-सन्ति-शोभनानि 'नाणे'त्यनेकरूपाणि ज्ञानानि-सङ्गत्यागपर्यायधर्माभिरुचितत्त्वाद्यवबोधात्मकानि तैरुपगतः सन्नानाज्ञानोपगतः 'धर्मसञ्चयं' क्षात्यादियतिधर्मसमुदयम् 'अनुत्तरेनानधरे'त्ति एकारस्यालाक्षणिकत्वादनुत्तरज्ञानं-केवलाख्यं तद्धारयत्यनुत्तरज्ञानधरः, पठ्यतेच-'गुणोत्तरं नानधरे'त्ति, च गुणोत्तरो-गुणप्रधानो, ज्ञानं प्रस्तावात्केवलज्ञानं तद्धरः, एकारस्यालाक्षणिकत्वाद् गुणोत्तरं यद् ज्ञानं तद्धरो वाऽत एव यशस्वी 'ओभासइ य'त्ति अवभासते प्रकाशते सूर्यवदन्तरिक्षे. यथा नभसि सूर्योऽवभासते तथाऽसावप्युत्पन्नकेवलज्ञान इति त्रयोदशसूत्रार्थः ॥

सम्प्रत्यध्ययनार्थमुपसंहरंस्तस्यैव फलमाह-

मू. (७९६) *दुविहं खवेऊण य पुन्नपावं, निरंजने सव्वओ विप्पमुक्के ।*
तरित्ता समुद्दं व महाभवोहं, समुद्दपाले अपुणागमं गए ॥ त्तिबेमि ॥

वृ. 'द्विविधं' द्विभेदं घातिकर्मभवोपग्राहिभेदेन 'पुण्यपापं' शुभाशुभप्रकृतिरूपं 'निरञ्जनः' कर्मसङ्गरहितः, पठ्यते च-'निरंगने'त्ति अङ्गेर्गत्यर्थत्वात् निरङ्गनः प्रस्तावात्संयमं प्रति निश्चलः शैलेश्यवस्थाप्राप्त इतियावत्, अत एव 'सर्वतः' इति बाह्यादान्तराच्च प्रक्रमादभिष्वङ्गहेतोः 'तीर्त्वा' उल्लङ्घय 'समुद्रमिव' अतिदुस्तरतया महांश्चासौ भवौघश्च देवादिभवसमूहस्तं, शेषं स्पष्टमिति सूत्रार्थः ॥ अमुमेवार्थं स्पष्टयितुमाह निर्युक्तिकृत्-

नि.[४४३] काऊण तवच्चरणं बहूनि वासाणि सो धुयकिलेसो ।
तं ठाणं संपत्तो जं संपत्ता न सोयंति ॥

वृ. सुगमैव । 'इति' परिसमाप्तौ, ब्रवीमिति पूर्ववत् । उक्तोऽनुगमः, सम्प्रति नयास्तेऽपि प्राग्वत् ॥

अध्ययनं - २१ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे
एकविंशतितमध्ययनं सनिर्युक्तिः सटीकं परिसमाप्तम्

अध्ययनं-२२-रथनेमीयं

वृ.व्याख्यातं समुद्रपालीयं नामैकविंशमध्ययनम्, अधुना द्वाविंशमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने विविक्तचर्योक्ता, सा च चरणसहितेन धृतिमता चरण एव शक्यते

कर्तुमतो रथनेमिवक्तव्यतां तत्र च कथञ्चिदुत्पन्नविस्रोतसिकेनापि धृतिश्चाधेयेत्यनेनोच्यत इत्यमुना सम्बन्धेनायातमिदमध्ययनम्, अस्यापि चतुरनुयोगद्वारचर्चा प्राग्वद्विधाय नामनिष्पन्ननिक्षेप एवाभिधेय इति चेतसि व्यवस्थाप्याह निर्युक्तिकृत्

नि.[४४४] रहनेमीनिक्खेवो चउक्कओ दुविह होइ दव्वंमि ।
नि.[४४५] जाणग सरीरं भवियं० ॥
नि.[४४६] रहनेमिनामगोअं वेअंतो भावओ अ रहनेमि ।
तत्तो समुद्दियमिणं रहनेमिज्जंति अज्झयणं ॥

वृ. [illegible]क्षेपं, नवरं रथनेमिनामकोच्चारणमिह विशेषः इत्यवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रालापकनिष्पन्ननिक्षेपावसरः, स च सूत्रे सति भवत्यतः सूत्रानुगमे सूत्रमुच्चारणीयं,

मू.(७९७) *सोरियपुरंमि नयरे, आसि राया महड्ढिए ।*
वसुदेवत्तिनामेणं, रायलक्खणसंजुए ॥
मू.(७९८) *तस्स भज्जा दुवे आसि, रोहिणी देवई तहा ।*
तासिं दुण्हंपि दो पुत्ता, इट्ठा (जे) रामकेसवा ॥
मू.(७९९) *सोरियपुरंमि नयरे, आसि राया महड्ढिए ।*
समुद्दविजये नामं, रायलक्खणसंजुए ॥
मू.(८००) *तस्स भज्जा सिवा नाम, तीसे पुत्तो महायसो ।*
भयवं अरिट्ठनेमित्ति, लोगनाहे दमीसरे ॥
मू.(८०१) *सोऽरिट्ठनेमिनामो अ, लक्खणस्सरसंजुओ ।*
अट्ठसहस्सलक्खणधरो, गोयमो कालगच्छवि ॥
मू.(८०२) *वज्जरिसहसंघयणो, समचउरंसो झसोदरो ।*
तस्स राईमई कन्नं, भज्जं जायइ केसवो ॥
मू.(८०३) *अह सा रायवरकन्ना, सुसीला चारुपेहिणी ।*
सव्वलक्खणसंपन्ना, विज्जुसोआमणिप्पभा ॥
मू.(८०४) *अहाह जणओ तीसे, वासुदेवं महड्ढियं ।*
इहागच्छउ कुमरो, जा से कन्नं ददामहं ॥
मू.(८०५) *सव्वोसहीहिं ण्हविओ, कयकोउयमंगलो ।*
दिव्वजुयलपरिहिओ, आभरणेहिं विभूसिओ ॥
मू.(८०६) *मत्तं च गंधहत्थिं च, वासुदेवस्स जिट्ठयं ।*
आरूढो सोहई अहियं, सिरे चूडामणी जहा ॥
मू.(८०७) *अह ऊसिएण छत्तेण, चामराहि य सोहिओ ।*
दसारचक्केण तओ, सव्वओ परिवारिए ॥
मू.(८०८) *चउरंगिणीए सेनाए, रइयाए जहक्कमं ।*
तुडियाणं सन्निनाएणं, दिव्वेणं गगनं फुसे ॥
मू.(८०९) *एयारिसीइ इड्ढीए, जुइए उत्तमाइ य ।*

नियगाओ भवनाओ, निज्जाओ वण्हिपुंगवो ॥

मू.(८१०) *अह सो तत्थ विज्जंतो, दिस्स पाणे भयद्दुए ।*
वाडेहिं पंजरेहिं च, संनिरुद्धे सुदुक्खिए ॥

मू.(८११) *जीवियंतं तु संपत्ते, मंसट्ठा भक्खियव्वए ।*
पासित्ता से महापन्ने, सारहिं इणमब्बवी ॥

मू.(८१२) *कस्स(अ)ट्ठा इमे पाणा, एए सव्वे सुहेसिणो ।*
वाडेहिं पंजरेहिं च, संनिरुद्धा य अच्छहि ? ॥

वृ. सूत्रषोडशकं प्रायः प्रकटार्थमेव, नवरं राजेव राजा तस्य लक्षणानि-चक्रस्वस्तिकांकुशादीनि त्यागसत्यशौर्यादीनि वा तैः संयुतो - युक्तो राजलक्षणसंयुतोऽत एव राजेत्युक्तं, 'भज्जा दुवे आसि'त्ति भार्ये द्वे अभूतां, 'तासि'न्ति तयो रोहिणीदेवक्योर्द्वौ पुत्रौ 'इष्टौ' वल्लभौ 'रामकेसवौ' बलभद्रवासुदेवायभूताभितिहापि योज्यते, तत्र रोहिण्या रामो देवक्याश्च केशवः, इह च रथनेमिवक्तव्यतायां कस्यायं तीर्थ इति प्रसङ्गेन भगवच्चरितेऽभिधित्सितेऽपि तद्विवाहादिषूपयोगिनः केशवस्य पूर्वोत्पन्नत्वेन प्रथममभिधानं, तत्सहचरितत्वाच्च रामस्येतिभावनीयं, पुनः सौर्यपुराभिधानं च समुद्रविजयवसुदेवयोरेकत्रावस्थितिदर्शनार्थम्, इह च राजलक्षणसंयुत इत्यत्र राजलक्षणानि-छत्रचामरसिंहासनादिन्यपि गृह्यन्ते ।

दमिनः उपशमिनस्तेषामीश्वरः-अत्यन्तोपशमवत्तया नायको दमीश्वरः कौमार एव क्षतमारवीर्यत्वात्तस्य । 'लक्खणसरसंजुतो'त्ति प्राकृतत्वात्स्वरस्य यानि लक्षणानि-सौन्दर्यगाम्भीर्यादीनि तैः संयुतः स्वरलक्षणसंयुतः, लक्षणोपलक्षितो वा स्वरो लक्षणस्वरः प्राग्वन्मध्यपदलोपी समासः, तेन संयुतो लक्षणस्वरसंयुतः, पठन्ति च-'वंजनसरसंजुओ'त्ति व्यञ्जनानि-प्रशस्ततिलकादीनि स्वरो-गाम्भीर्यादिगुणोपेतत्सत्संयुतः 'अष्टसहस्रलक्षणधरः' अष्टोत्तरसहस्रसङ्ख्यशुभसूचककरादिरेखाद्यात्मकचक्रादिलक्षणधारकः 'गौतमः' गौतमसगोत्रः 'कालकच्छविः' कृष्णत्वक्। 'झसोदरे'त्ति झषो-मत्स्यस्तदुदरमिव तदाकारतयोदरं यस्यासौ झषोदरो, मध्यपदलोपी समासः, इतश्च गतेषु द्वारकापुरीं यदुषु निहते जरासिन्धनृपतावधिगतभरताद्धराज्यः केशवो यौवनस्थेऽरिष्टनेमिनि समुद्रविजयादेशतो यदचेष्टत तदाह-'तस्य' अरिष्टनेमिनो राजीमतीं भार्यां गन्तुमिति शेषः, याचते केशवस्तज्जनकमिति प्रक्रमः ।

सा च कीदृशीत्याह-'अथ' इत्युपन्यासे, राजवर इहोग्रसेनस्तस्य कन्या राज्ञो वा-तस्यैव वरकन्या राजवरकन्या सुष्ठु शीलं-स्वभावो यस्याः सा सुशीला चारु प्रेक्षितुं-अवलोकितुं शीलमस्याः चारुप्रेक्षिणी, नाधोदृष्टितादिदोषदुष्ट, 'विज्जुसोयामणिप्पह'त्ति विशेषेण द्योतते-दीप्यत इति विद्युत् सा चासौ सौदामनी च विद्युत्सौदामनी, अथवा विद्यदग्निः सौदामिनी च तडित् अन्ये तु सौदामिनी प्रधानमणिरित्याहुः ।

'अथ' इति याञ्चाऽनन्तरमाह जनकस्तस्याः-राजीमत्या उग्रसेन इत्युक्तं, 'जा से'त्ति सुब्व्यत्याद् येन तस्मै 'ददामि' विवाहविधिनोपढौकयाम्यहम्। एवं च प्रतिपन्नायामुग्रसेनेन राजीमत्याभासन्ने च क्रौष्टिक्यादिष्टे विवाहलग्ने यदभूत्तदाह-सर्वाश्च ता औषधयश्च-जयाविजयर्द्धि-

वृद्धयादयः सर्वौषधयस्ताभिः स्नपितः-अभिषिक्तः, कृतकौतुकमङ्गल इत्यत्र कौतुकानि ललाटस्य मुशलस्पर्शनादीनि मङ्गलानि च-दध्यक्षतदूर्वाचन्दनादीनि 'दिव्वजुयलपरिहिय'त्ति प्राग्वत्परिहितं दिव्ययुगलमिति प्रस्तावाद् दूष्ययुगलं येन स तथा, वासुदेवस्य सम्बन्धिनमिति गम्यते, ज्येष्ठमेव ज्येष्ठकम्-अतिशयप्रशस्यमतिवृद्धं वा गुणैः पट्टहस्तिनमित्यर्थः, शोभत इति वर्त्तमाननिर्देशः प्राग्वत्, 'चूडामणिः' शिरोऽलङ्काररत्नम्।

'अथ' अनन्तरम् 'उच्छ्रितेन' उपरिधृतेन पाठान्तरतश्च-श्वेतोच्छ्रितेन 'चामराहि य'त्ति चामराभ्यां च शोभितः 'दसारचक्केण'त्ति दशार्हचक्रेण यदुसमूहेन 'चतुरङ्गिण्या' हस्त्यश्वरथ-पदातिरूपाङ्गचतुष्टयान्वितया 'रचितया' न्यस्तया 'यथाक्रमं' यथापरिपाटी तूर्याणां-मृदङ्ग-पटहादीनां सन्निनादेनेति-संनद्धत इत्यादिषु समो भृशार्थस्यापि दर्शनादतिगाढध्वनिना 'दिव्येन' इति प्रधानेन देवागमनस्यापि तदा सम्भवाद्देवलोकोद्भवेन वा 'गयणं फुसे'त्ति आर्षत्वाद्, 'गगनस्पृशा' अतिप्रबलतया नभोऽङ्गणव्यापिना, सर्वत्र च लक्षणे तृतीया, 'एतादृश्या' अनन्तराभिहितरूपया 'ऋद्धया' विभूत्या 'द्युत्या' दीप्त्या, उत्तरत्र चशब्दोऽभिन्नक्रमतो द्युत्या चोत्तमयोपलक्षीतः सन्निजकाद्भुवनात् 'निर्यातः' निष्क्रान्तः 'वृष्णिपुङ्गवः' यादवप्रधानो भगवान्-अरिष्टनेमिरितियावत्।

ततश्चासौ क्रमेण गच्छन् प्राप्तो विवाहमण्डपासन्नदेशम्, 'अथ' अनन्तरं स तत्र 'निर्यन्' अधिकं गच्छन् 'दिस्स'त्ति दृष्ट्वा अवलोक्य 'प्राणान्' स 'प्राणिनः' मृगलावकादीन् 'भयद्रुतान्' भयत्रस्तान् वाटैरिति-वाटकैः-वृत्तिवरण्डकादिपरिक्षिप्तप्रदेशरूपैः 'पञ्जरेश्च' बन्धनविशेषैः 'सन्निरुद्धान्' गाढनियन्त्रितान्, पाठान्तरतस्तु-बद्धरुद्धान्, अत एव सुदुःखितान्, तथा जीवितस्यान्तो-जीवितानतो मरणमित्यर्थस्तं संप्राप्तानिव संप्राप्तान्, अतिप्रत्यासन्नत्वात्तस्य, यद्वा जीवितस्यान्तः-पर्यन्तवर्ती भागस्तमुक्तहेतोः संप्राप्तान् 'मांसार्थं' मांसनिमित्तं च भक्षयितव्यान् मांसस्यैवातिगृद्धिहेतुत्वेन तद्भक्षणनिमित्तत्वादेवमुक्तं, यदिवा 'मांसेनैव मांसमुपचीयते' इति प्रवादतो मांसमुपचितं स्यादिति मांसार्थं भक्षयितव्यानविवेकाभिरिति शेषः, 'पासित्त'ति दृष्ट्वा, कोऽर्थः?-उक्तविशेषणविशिष्टान् हृदि निधाय 'सः' इति भगवानरिष्टनेमिर्महती प्रज्ञा-प्रक्रमान्मतिश्रुतावधिज्ञानत्रयात्मिका यस्यासौ महाप्रज्ञः 'सारथिं' प्रवर्त्तयितारं प्रक्रमाद्गन्ध-हस्तिनो हस्तिपकमितियावत्, यद्वाऽत एव तदा रथारोहणमनुमीयत इति रथप्रवर्तयितारम्।

'कस्सट्ठ'त्ति कस्य 'अर्थात्' निमित्तादिमे प्राणाः, एते सर्वे 'इमे' इत्यनेनैव च गते एते इति पुनरभिधानमतिसार्द्रहृदयतया पुनः पुनस्त एव भगवतो हृदि विपरिवर्त्तन्त इति ख्यापनार्थं, यदिवा 'इमे' प्रत्यक्षाः 'एते' समीपतरवर्त्तिनः, उक्तं हि 'इदमः प्रत्यक्षगतं समीपतरवर्त्ति चैतदो रूपम्' पठ्यते च-'बहुपाणे'त्ति प्रतीतं, 'सुखैषीणः' सातामिलाषिणः 'सन्निरुद्धे य'त्ति सन्निरुद्धाः 'च' पूरणे 'अच्छिहि'त्ति आसत इति षोडशसूत्रार्थः॥ एवं च भगवतोक्ते-

मू. (८१३) *अह सारही तओ भणइ, एए भद्दा उ पाणिणो।*
तुज्झं विवाहकज्जंमि, भोआवेउं बहुं जनं॥

वृ. सुगममेव, नवरम् 'अथ' इति भगवद्वचनानन्तरं 'भद्दा उ'त्ति 'भद्रा एव' कल्याणा एव न तु श्वशृगालादय एव कुत्सिताः अनपराधतया वा भद्रा इत्युक्तं भवति, तव 'विवाहकार्ये'

परिणयनरूपप्रयोजने 'गोवावेउं'ति भोजयितुम्, अनेन यदुक्तं 'कस्यार्थादि'ति तत्प्रत्युत्तरमुक्तमिति सूत्रार्थः ॥ इत्थं सारथिनोक्ते यद्भागवान् विहितवांस्तदाह-

मू.(८१४) *सोऊण तस्स वयण, बहुपाणिविनासणं।*
चिंतेइ से महापन्ने, सानुक्कोसे जिएहि उ॥

मू.(८१५) *जइ मज्झ कारणा एए, हम्मंति सुबहू जिया।*
न मे एयं ति निस्सेसं, परलोगे भविस्सई॥

मू.(८१६) *सो कुंडलाण जुयलं, सुत्तगं च महायसो।*
आभरणाणि य सव्वाणि, सारहिस्स पणामई॥

मू.(८१७) *मनपरिणामो अ कओ, देवा य जहोइयं समोईन्ना।*
सव्विड्ढिइ सपरिसा, निक्खमणं तस्स काउं जे॥

मू.(८१८) *देवमनुस्सपरिवुडो, सीयारयणं तओ समारूढो।*
निक्खमिय बारगाओ, रेवययंमि ठिओ भयवं॥

मू.(८१९) *उज्जाने संपत्तो, ओइन्नो उत्तमाउ सीयाओ।*
साहस्सीए परिवुडो अह निक्खमइ उ चित्ताहिं॥

मू.(८२०) *अह सो सुगंधगंधिए तुरियं मउअकुंचिए।*
सयमेव लुंचई केसे, पंचट्ठिहिं समाहिओ॥

वृ. सुगममेव नवरं 'तस्य' इति सारथेः **बहूनां**-प्रभूतानां प्राणानां-प्राणिनां विनाशनं-हननमर्थादिभिधेयं यस्मिंस्तद्बहुप्राणविनाशनं 'सः' भगवान् 'सानुक्रोशः' सकरुणः, केषु ?-'जिएहिउ'त्ति जीवेषु 'तु' पूरणे॥ मम कारणादितिहेतोर्मद्विवाहप्रयोजने भोजनार्थत्वादभीषामित्यभिप्रायः, 'हम्मंति'त्ति हन्यन्ते वर्त्तमानसामीप्ये लट्, ततो हनिष्यन्त इत्यर्थः, पाठान्तरतः 'हम्मिहंति'त्ति स्पष्टं, 'सुबहवः' अतिप्रभूताः 'जिय'त्ति जीवाः, 'एतदि'ति जीवहननं 'तुः' एवकारार्थो नेत्यनेन योज्यते, ततः 'न तु' नैव 'निस्सेसं'त्ति 'निःश्रेयसं' कल्याणं परलोके भविष्यति, पापहेतुत्वादस्येति भावः, भवान्तरेषु परलोकभीरुत्वस्यात्यन्तमभ्यस्ततयैवमभिधानमन्यथा चरमशरीरत्वादतिशयज्ञानित्वाच्च भगवतः कुत एवंविधचिन्तावसरः ?, एवं च विदितभगवदाकूतेन सारथिना मोचितेषु सत्त्वेषु परितोषिताऽसौ यत्कृत्वांस्तदाह-'सो' इत्यादि 'सुत्तगं चे'त्ति कटीसूत्रम्, अपर्यतीति योगः, किमेतदेवेत्याह-आभरणानि च सर्वाणि शेषाणीति गम्यते, ततश्च 'मनःपरिणामश्च' अभिप्रायः कृतो निष्क्रमणं प्रतीति गम्यते, 'देवाः' चतुर्निकाया एव 'यथोचितम्' औचित्यानतिक्रमेण समवतीर्णाः, पाठान्तरतः समवपतिताः, चकाराभ्यां चेह समुच्चयार्थाभ्यामपि तुल्यकालताया ध्वन्यमानत्वात्तदैवेति गम्यते, 'सर्वर्ध्या' समस्तविभूत्या 'सपरिषद्' बाह्यमध्याभ्यन्तरपर्षन्नयोपेताः 'निष्क्रमणम्' इति प्रक्रमान्निष्क्रमणमहिमानं 'तस्य' इति भगवतोऽरिष्टनेमिनः कर्त्तुं 'जे' इति निपातः पूरणे।

'शिबिकारत्नं' देवनिर्मितमुत्तरकुरुनामकमिति गम्यते, 'ततः' तदनन्तरं 'समारूढः' अध्यासीनः 'निष्क्रम्य' निर्गत्य 'द्वारकातः' द्वारकापुर्याः 'रैवतके' उज्जयन्ते 'स्थितः' गमनान्निवृत्तः।

तत्रापि कतरं प्रदेशं प्राप्तः स्थित इत्याह-'उद्यानं' सहस्राम्रवणनामकं संप्राप्तः, तत्र चावतीर्णः

'सीयातो'त्ति शिबिकातः 'साहस्सीय'त्ति सहस्रेण प्रधानपुरुषाणामिति शेषः 'परिवृत्तः' परिवेष्टितः 'अथे' त्यानन्तर्ये 'निष्क्रामति' श्रामण्यं प्रतिपद्यते 'तुः' पूरणे 'चित्ताहिं'ति चित्रासु चित्रानाम्नि नक्षत्रे। कथमित्याह-'सुगन्धिगन्धिकान्' स्वभावत एव सुरभिगन्धीन् 'त्वरितं' शीघ्रं 'मृदुकत्वकुञ्चितान्' कोमलकुटिलान् 'स्वयमेव' आत्मनैव 'लुञ्चति' अपनयति केशान् 'पञ्चाष्टाभिः'-पञ्चमुष्टिभिः 'समाहितः' सन्नधिगतः, सर्वं सावद्यं मनाकरिष्यमिति प्रतिज्ञारोहणोपलक्षणमेतत्।

इह तु वन्दिकाचार्यः सत्त्वमोचनसमयेसारस्वतादिप्रबोधनभवनगमनमहादानानन्तरं निष्क्रमणाय पुरीनिर्गममुपवर्णयांबभूवेति सूत्रसप्तकार्थः॥ एवं च प्रतिपन्नप्रव्रज्ये भगवति-

मू.(८२१) *वासुदेवो अ णं भणइ, लुत्तकेसं जिइंदियं।*
इच्छियमणोरहे तुरियं, पावसू तं दमीसरा!॥

मू.(८२२) *नाणेणं दंसणेणं च, चरित्तेणं तवेण य।*
खंतिए मुत्तीए, वड्ढमानो भवाहि य॥

मू.(८२३) *एवं ते रामकेसवा, दसारा य बहू जना।*
अरिट्ठनेमिं वंदित्ता, अइगया बारगाउरिं॥

वृ. सूत्रत्रयं स्पष्टं, नवरं वासुदेवश्चेति चशब्दाद्बलभद्रसमुद्रविजयादयश्च 'लुत्तकेशम्' अपनीतशिरोरुहं ईप्सितः-अभिलषितः स चासौ मनोरथश्च भगवन्मनोरथविषयत्वान्मुक्तिरूपोऽर्थ ईप्सितमनोरथस्तं 'तुरियं'ति त्वरितं 'पावसु'त्ति प्राप्नुहि, आशीर्वचनत्वादस्य आशिषि 'लिट्लोट्य'वित्याशिषि लोट्॥ 'तम्' इति त्वं 'वर्द्धमानः' इति वृद्धिभाक् 'भवाहि य'त्ति भव, चशब्द आशीर्वादान्तरसमुच्चये। 'एवम्' उक्तप्रकारेण 'वन्दित्वा' स्तुत्वेति योगः, इह चैवंविधाशीर्वचनानामपि गुणोत्कर्षसूचकत्वेन स्तवनरूपत्वमविरुद्धमिति भावनीयं, 'दसारा य'त्ति दशार्हाः, चशब्दो भिन्नक्रमस्ततः 'बहु'त्ति बहवो जनाश्च 'अतिगताः' प्रविष्टा इति सूत्रत्रयार्थः॥ तदा च कीदृशी सती राजीमती किमचेष्टतेत्याह-

मू.(८२४) *सोऊणा रायकन्ना, पव्वज्जं सा जिनस्स उ।*
नीहासा उ नीरानंदा, सोगेण उ समुच्छिया॥

मू.(८२५) *राईमई विचिंतेइ, धिरत्थु मम जीवियं।*
जाऽहं तेणं परिचत्ता, सेयं पव्वइउं मम॥

मू.(८२६) *अह सा भमरसंनिभे, कुच्चफणगप्पसाहिए।*
सयमेव लुंचई केसे, धिइमंती ववस्सया॥

वृ. सूत्रत्रयं स्पष्टं, नवरं निष्क्रान्ता हासान्निर्हासा, चशब्दो भिन्नक्रमस्ततो निरानन्दा च, 'समवसृता' अवष्टब्धा। धिगस्तु मम जीवितमिति स्वजीवितनिन्दोद्भावकं खेदवचो, याऽहं तेन परित्यक्तेति खेदहेतुपदर्शनं, ततश्च 'श्रेयः' अतिशयप्रशस्यं 'प्रव्रजितुं' प्रव्रज्यां प्रतिपत्तुं मम येनान्यजन्मन्यपि नैवं दुःखभागिनी भवेयमिति भावः।

इत्थं चासौ तावदवस्थिता यावदन्यत्र प्रविहृत्य तत्रैव भगवानाजगाम, तत उत्पन्नकेवलस्य भगवतो निशम्य देशनां विशेषत उत्पन्नवैराग्य किं कृतवतीत्याह-'अहे'त्यादि, 'अथ' अनन्तरं

'सा' राजीमती 'भ्रमरसन्निभान्' कृष्णतया आकुञ्चिततया च, कूर्चौ-गृद्धकेशोन्मोचको वंशमयः फणकः-कङ्कतकस्ताभ्यां प्रसाधिताः-संस्कृता ये तान् 'स्वयम्' आत्मनैव 'लुञ्चति' अपनयति, भगवदनुज्ञयेति गम्यते, 'केशान्' कचान् 'थिइमंति'त्ति धृतिमति व्यवसितेति-अध्यवसिता सती, धर्मं विधातुमिति शेष इति सूत्रत्रयार्थः ॥ तत्प्रव्रज्याप्रतिपत्तौ च-

मू.(८२७) *वासुदवो अ णं भणइ, लुत्तकेसिं जिइंदियं।*
संसारसागरं घोरं, तर कन्ने! लहुं लहुं॥

वृ. स्पष्टमेव, नवरं 'तर' इत्युल्लङ्घ्यः आशीर्वचनत्वादयमप्यशिषि लोट्, 'लघु लघु' त्वरितं त्वरितं, संभ्रमे द्विर्वचनमिति सूत्रार्थः ॥ तदुत्तरवक्तव्यतामाह-

मू.(८२८) *सा पव्वइया संती, पव्वावेसी तहिं बहुं।*
सयनं परियणं चेव, सीलवंता बहुस्सुआ॥

मू.(८२९) *गिरिं रेवययं जंती, वासेनोल्ला उ अंतरा।*
वासंती अंधयारंमि, अंतो लयणस्स सा ठिया॥

मू.(८३०) *चीवराणि विसारंती, जहा जायत्ति पासिया।*
रहनेमि भग्गचित्तो, पच्छा दिट्ठो अ तीइवि॥

मू.(८३१) *भीया य सा तहिं दट्ठुं, एगंते संजयं तयं।*
बाहाहिं काउं संगोप्फं, वेवमाणी निसीयई॥

वृ. सूत्रचतुष्टयं स्पष्टमेव, नवरं 'सा' इति राजीमती 'पव्वावेसि'त्ति प्राविव्रजत्-प्रव्राजितवती 'तहिं'ति तस्यां द्वारकापुरि। 'रैवतकम्' उज्जयन्तं 'यान्ती' गच्छन्ति, भगवद्वन्दनार्थमिति गम्यते, 'वर्षेण' वृष्टया 'उल्ल'त्ति आर्द्रा स्तिमितसकलचीवरेतियावत्, 'अन्तरे' त्यन्तराले ऽर्द्धपथ इत्यर्थः, 'वासंति'त्ति वर्षति, नीरद इति गम्यते, 'अन्धकारे' अपगतप्रकाशे, कस्मिन्?-'अन्तः' मध्ये, उक्तं हि-'अन्तःशब्दोऽभिकरणप्रधानं मध्यमाह' लयनमिह गुहा तस्यां 'सा' राजीमती 'स्थिता' इत्यासिता, असंयमभीरुतयेति गम्यते, तत्र च 'चीवराणि' सङ्घाट्यादिवस्त्राणि 'विसारयन्ती' विस्तारयन्ती अत एव 'यथाजाता' अनाच्छादितशरीरतया जन्मावस्थोपमा 'इती' त्येवंरूपा 'पासिय'त्ति दृष्ट्वा(ष्टा), तद्दर्शनाच्च 'रथनेमिः' रथनेमिनामा मुनिः 'भग्नचित्तः' भग्नपरिणामः सन् प्रक्रमात्संयमं प्रति, स हि तामुदाररूपामवलोक्य समुत्पन्नतदभिलाषातिरेकः परवशमनाः समजनि, पश्चाद्दृष्टश्च 'तया' राजीमत्या 'अपि' पुनरर्थे, प्रथमप्रविष्टैर्हि नान्धकारप्रदेशे किञ्चिदवलोक्यते, अन्यथा हि वर्षणसम्भ्रमादन्यान्याश्रयगतासु शेषसाध्वीष्वेकाकिनीप्रविशेदपि न तत्रेयमिति भावः, भीता च मा कदाचिदसौ मम शीलभङ्गं विधास्यतीति, 'तस्मिन्' इति लयने दृष्ट्वा 'एकान्ते' विवेक्ते 'तकम्' इति रथनेमिं, किं कृतवत्यसावित्याह-'बाहाहिं'ति बाहुभ्यां कृत्वा 'संगोपं' परस्परबाहुगुम्फनं स्तनोपरिमर्कटबन्धमितियावत्, 'वेपमाना' शील-भङ्गभयात्कम्पमाना 'निषीदति' उपविशति, तदाश्लेषादिपरिहारार्थमिति भाव इति सूत्र-चतुष्टयार्थः ॥ अत्रान्तरे-

मू.(८३२) *अह सो ऽविरायपुत्तो, समुद्दविजयंगओ।*
भीयं पवेविरं दट्ठुं, इमं वक्कमुदाहरे॥

मू.(८३३) रहनेमी अहं भद्दे !, सुरूवे ! चारुभासिणी !।
ममं भयाहि सुअनु !, न ते पीला भविस्सई ॥

मू.(८३४) एहि ता भुंजिमो भोगे, माणुस्सं खु सुदुल्लहं।
भुत्तभोगा पुनो पच्छा, जिनमग्गं चरिस्सिमो ॥

वृ. अथ च 'सोऽपी'ति स पुनः 'राजपुत्रः' रथनेमिः भीतां प्रवेषितां च प्रकमाद्राजीमतीम् 'उदाहरे'त्ति उदाहरत्-उक्तवान्, किं तदित्याह 'रथनेमिरहमिति, अनेनात्मनि रूपवत्त्याद्यभिमानतः स्वप्रकाशनं तस्याभिलाषोत्पादनार्थं विश्वासविशसनहेत्वन्यशङ्कानिरासार्थं वा स्वनामख्यापनं, 'ममं'ति मां 'भजस्व' सेवस्व सुतनु ! न 'ते' तव 'पीडा' बाधा भविष्यति, सुखहेतुत्वाद्विषयसेवनस्येति भावः, यद्वा ता ससम्भ्रमां दृष्ट्वेमाह-'म म भयाहि'ति मा मा भैषीः सुतनु ! यतो न 'ते' तव पीडा भविष्यति, कस्यचिदिह पीडाहेतोरभावात्, पीडया शङ्कया च भयं स्यादित्येवमुक्तम्, 'एहि' आगच्छ 'ता' इति तस्मात्तावद्भो मानुष्यं 'खु:' इति निश्चितं सुदुर्लभं, तदेतदवाप्तविदमपितावद्भोगलक्षणमस्य फलमुपभुञ्जमहे इत्याशयः, भुक्तभोगाः पुनः 'पश्चाद्' इति वाक्यैक्ये 'जिनमार्गं' जिनोक्तमुक्तिपथं 'चरिस्सामो'त्ति चरिष्यामः, शेषं स्पष्टमिति सूत्रत्रयार्थः ॥ ततो राजीमती किमचेष्टतेत्याह-

मू.(८३५) दट्ठूण रहनेमिं तं, भग्गुज्जोयपराइयं।
राईमई असंभंता, अप्पाणं संवरे तहिं ॥

मू.(८३६) अह सा रायवर, कन्ना, सुट्ठिया नियमव्वए।
जाई कुलं च सीलं च, रक्खमाणी तयं वदे ॥

मू.(८३७) जइऽसि रूवेण वेसमणो, ललिएण नलकूबरो।
तहावि ते न इच्छामि, जइऽसि सक्खं पुरंदरो ॥

मू.(८३८) धिरत्थु ते जसो कामी !, जो तं जीवियकारणा।
वंतं इच्छसि आवेउं, सेयं ते मरणं भवे ॥

मू.(८३९) अहं च भोगरायस्स, तं चऽसि अंधगवण्हिणो।
मा कुले गन्धणा होमो, संजमं निहुओ चर ॥

मू.(८४०) जइ तं काहिसी भावं, जा जा दिच्छसि नारिओ।
वायाविद्धुव्व हडो, अट्ठिअप्पा भविस्ससि ॥

मू.(८४१) गोवालो भंडवालो वा जहा तद्दव्वऽनिस्सरो।
एवं अनीसरो तंपि, सामन्नस्स भविस्सि ॥

मू.(८४२) कोहंमाणं निगिण्हिता मायं लोभं य सव्वसो
इंदियाइं वसेकाउं अप्पाणं उवसंहरं। ॥५॥

वृ. सूत्रसप्तकं पाठसिद्धं, नवरं 'भग्गुज्जोयपराइयं'ति भग्नोद्योगः-अपगतोत्साहः प्रस्तावात्संयमे स चासौ पराजितश्च-अभिभूतः स्त्रीपरीषहेण भग्नोद्योगपराजितस्तम् 'असम्भ्रान्ता' नायं बलादकार्ये प्रवर्त्तयितेत्यभिप्रायेणात्रस्ता 'आत्मानं' स्वं 'संवरे'त्ति समवारीत्-आच्छादितवती चीवरैरिति गम्यते, 'तस्मिन्' इति लयनमध्ये पीडया शङ्कया च भयं स्यादि-

त्येवमुक्तं । 'सुस्थिता' निश्चला 'नियमव्रते' इतीन्द्रियनोइन्द्रियनियमने प्रव्रज्यायां च जातिं कुलं शीलं च 'रक्खमाणी'त्ति रक्षन्ती, शीलध्वंसे हि कदाचिदस्या एवंविधैव जातिः कुलं चेति सम्भावनातस्ते अपि विनाशिते स्यातामित्येवमुक्तं, यद्यपि 'असि' भवसि 'रूपेण' आकारसौन्दर्येण 'वैश्रमणः' धनदः 'ललितेन' सविलासचेष्टितेन 'नलकूबरः' देवविशेषः 'ते' इति त्वां 'साक्षात्' समक्षः 'पुरन्दरः' इन्द्रो रूपाद्यनेकगुणाश्रयो य इति भावः, रूपाद्यभिमानी चायमित्येवमुक्तः ॥

अपरं च- धिगस्तु 'ते' तव पौरुषमिति गम्यते, अयशःकामिन्निव अयशः कामिन् !- अकीर्त्यभिलाषिन्!, दुराचारवाञ्छितया, यद्वा 'ते' तव यशो-महाकुलसंभवोद्भूतं धिगस्त्विति सम्बन्धः 'कामिन्!' भोगाभिलाषिन्! 'जीवितकारणात्' जीवितनिमित्तमाश्रित्य, तदनासेवने हि तथाविधदशावासौ मरणमपि स्यादित्येवंभिधानं, 'वान्तम्' उद्गीर्णं यत् शृगालैरपि परिहृतं तदिच्छस्यापातुं, यथा हि कश्चिद्वान्तमापातुमिच्छत्येवं भवानपि प्रव्रज्याग्रहणतस्त्यक्तान् भोगान् पुनरापातुमिवापातुम्-उपभोक्तुमिच्छति अतः 'श्रेयः' कल्याणं 'ते' तव मरणं भवेत्, न तु जीवितात्, यतो मरणस्यैवाऽपर्यवसेयत्वात्, अनूदितं वैपद्-

"विज्ञाय वस्तु निन्द्यं त्यक्त्वा गृह्णन्ति किं क्वचित्पुरुषाः ? ।
वान्तं पुनरपि भुंक्ते न च सर्वः सारमेयोऽपि ॥"

'अहमि' त्यात्मनिर्देशे 'चः' पूरणे 'भोजराजस्य' उग्रसेनस्य त्वं च 'असि' भवसि अन्धकवृष्णेः, कुले जात इत्युभयत्र शेषः, अतश्च 'मा' इति निषेधे 'कुले' अन्वये 'गंधणे'त्ति गन्धनानां सर्पविशेषाणां 'होमो'त्ति भूव, तच्चेष्टितानुकारितयेति भावः, ते हि वान्तमपि विषं ज्वलद्धिपातभीरुतया पुनरपि पिबन्ति, तथा च वृद्धाः-"सप्पाणं किल दो जाईओ-गंधणा य अगंधणा य, तत्थ गंधणा नाम जे डसिए मंतेहिं आकड्ढिया तं विसं वणमुहातो आवियंति, अगंधणा उण अवि मरणमज्झवसंति न य वंतमाइयंति ।

किं तर्हि कृत्यमित्याह-संयमं निभृतः स्थिरः 'चर' आरोवस्व, यदि त्वं 'भावं' प्रक्रमाद्भोगाभिलाषरूपं या याः 'दिच्छसि'त्ति द्रक्ष्यसि तासु तास्विति गम्यते, ततः किमित्याह-वातेनाविद्धः-समन्तात्ताडितो वाताविद्धो भ्रमति इतियावत्, हठो-वनस्पतिविशेषः स इवास्थितात्मा-चञ्चलचित्ततयाऽस्थिरस्वभावः । 'गोपालः' यो गाः पालयति 'भाण्डपालो वा' यः परकीयानि भाण्डानि भाटकादिना पालयति, पठ्यते च-'दण्डापालो पा' नगररक्षको वा यथा 'तद्द्रव्यस्य' गवादेः सततरक्षणीयस्य 'अनीश्वरः' अप्रभुः, विशिष्टतत्फलोपभोगाभावात्, एवमनीश्वरत्वमपि श्रामण्यस्य भविष्यसि, भोगाभिलाषतस्तत्फलस्यापि विशिष्टस्याभावादिति भाव इति सूत्रसप्तकार्थः ॥ एवं तयोक्तो रथनेमिः किं कृतवानित्याह-

मू. (८४३) तीसे सो वयणं सुच्चा, संजईए सुभासियं ।
अंकुसेण जहा नागो, धम्मे संपडिवाइओ ॥

मू. (८४४) मनगुत्तो, वयगुत्तो, कायगुत्तो जिइंदिओ ।
सामन्नं निच्चलं फासे, जावज्जीवं दढव्वओ ॥

वृ. सूत्रद्वयम् 'तस्याः' राजीमत्याः 'सः' रथनेमिः 'वचनम्' अनन्तरोक्तानुशिष्टिरूपं 'श्रुत्वा'

आकर्ण्य 'संयतायाः' प्रव्रजितायाः सुष्ठु-संवेगजनकत्वेन भाषितम्-उक्तं सुभाषितम् 'अंकुशेन' प्रतीतेन यथा 'नागः' हस्ती पथीति शेषः, एवं 'धर्मे' चारित्रधर्मे 'संपडिवाइओ'त्ति संप्रतियातितः' संस्थितः, तद्वचसैवेति गम्यते। अत्र च वृद्धसंप्रदायः- "नेउरपंडियाक्खानयमं भणिऊण जाव ततो रुट्ठेण राइणा देवी मेंठो हत्थी य तन्निवि छिक्कडगे चडाविया णि, भणिओ य मेंठो-एत्थं वाहेही हत्थि वाहेहि हत्थि, दोहि य पासेहिं वेणुग्गहा ठविया, जाव एगो पाओ आगासे ठविओ, जणो भणइ-किं एस तिरियो जाणइ ?, एयाणि मारेयव्वाणि, तहावि राया रोसं न मुञ्चति ततो अ तिन्नि पाए आगासे ठए, एगेन तिट्ठे, लोगेन अक्कंदो कतो-किमेयं हत्थिरयणं वावाइज्जति ?, रन्ना मिंठो भणिओ-तरसि नियत्तेउं ?, भणइ- जइ दुयग्गाणवि अभयं देसि, दित्रं, ततो अंकुसेण नियत्तिओ हत्थित्ति।"

इह चायमभिप्रायः-यथाऽयमीदृगवस्थो द्विषोऽंकुशवशतः पथि संस्थित एवमयमप्युत्पन्नविश्रोतसिकस्तद्वचनेन अहितप्रवृत्तिनिर्वर्त्तकतयाऽंकुशप्रायेण धर्म इति, ततश्च श्रामण्यं 'निश्चलं' स्थिरं 'फासे'त्ति अस्माक्षीद्-आसेवितवान्, शेषं स्पष्टमिति सूत्रद्वयार्थः ॥

उभयोरप्युत्तरवक्तव्यतामाह-

मू. (८४५) *उग्गं तवं चरित्ता णं, जाया दुन्निवि केवली।*
सव्वं कम्मं खवित्ता णं, सिद्धिं पत्ता अणुत्तरं॥

वृ. उग्रं कर्मरिपुदारणतया 'तपः' अनशनादि 'चरित्ता णं'ति चरित्वा 'जातौ' भूतौ 'द्वावपी'ति रथनेमिराजीमत्यौ 'केवली'ति केवलिनौ 'सर्वं' निरवशेषं 'कर्म' भवोपग्राहि 'खवित्ता णं'ति क्षपयित्वा सिद्धिं प्राप्तावनुत्तरामिति सूत्रार्थः ॥ सम्प्रति निर्युक्तिरनुश्रियते-

नि.[४४७] सोरियपुरंमि नयरे आसी राया समुद्दविजओत्ति।
तस्सासि अग्गमहिसी सिवत्ति देवी अनुज्जंगी॥

नि.[४४८] तेसिं पुत्ता चउरो अरिट्ठनेमि तहेव रहनेमी।
तइओ अ सच्चनेमी चउत्थओ होइ दढनेमी॥

नि.[४४९] जो सो अरिट्ठनेमी बावीसइमो अहेसि सो अरिहा।
रहनेमि सच्चनेमी एए पत्तेयबुद्धा उ॥

नि.[४५०] रहनेमिस्स भगवओ गिहत्थए चउर हुंति वाससया।
संवच्छर छउमत्थो पंचसए केवली हुंति॥

नि.[४५१] नववाससए वासाहिए उ सव्वाउगस्स नायव्वं।
एसो उ चेव कालो रायमईए उ नायव्वो॥

वृ. अत्र च प्रथमगाथया रथनेमेरन्वय उक्तः। 'तेसिं'ति 'तयोः' समुद्रविजयशिवादेव्योः, 'प्रसङ्गतश्चेह शेषपुत्राभिधानम्, 'अहेसि'त्ति अभूत्, ह च यदरिष्टनेमेरर्हत्त्वं रथनेमेश्च प्रत्येकबुद्धत्वमुक्तं तदर्हद्भ्रातृत्वेन स्वगुणप्रकर्षेण च रथनेमेर्माहात्म्यख्यापनार्थम्। चतुर्थगाथया पर्यायपरिमाणाभिधानं, तत्र चत्वारि वर्षशतानि गृहस्थपर्यायः वर्षं छद्मस्थपर्यायः वर्षशतकपञ्चकं केवलिपर्याय इति मिलितानि नव वर्षशतानि वर्षाधिकानि सर्वायुरभिहितम्, एष 'चैवत्ति'ति चतुशब्दौ पूरणे, तत एष् एव च वर्षाधिकवर्षशतनवकलक्षणः, शेषं स्पष्टमिति

गाथापञ्चकार्थः ॥ सम्प्रति प्रतिभग्नपरिणामतया मा भूद्रथनेमौ कस्यांचिदवज्ञेति सूत्रकृदाह-

मू.(८४६) *एवं करेंति संबुद्धा, पंडिया परियक्खणा।*
विनियट्टंति भोगेसुं, जहा सो पुरुसोत्तमो ॥ तिबेमि

वृ. 'एवम्' इति वक्ष्यमाणं 'कुर्वन्ति' विदधति 'संबुद्धाः' बोधिलाभतः 'पण्डिताः' बुद्धिमत्त्वेन 'प्रविचक्षणाः' प्रकर्षेण शास्त्रज्ञतया न त्वनीदृशाः, किमित्याह-अविशेषेण किंचिच्छिद्विश्रोतसिकोत्पत्तावपि तन्निरोधलक्षणेन निवर्त्तन्ते, 'भोगेसु'न्ति भोगेभ्यो यथा सः 'पुरुषोत्तमो' रथनेमिः, अनीदृशा होकदा भग्नपरिणामा न पुनः संयमे प्रवर्त्तितुं क्षमाः, ततो भोगविनिवर्त्तनात् संबुद्धादिविशेषणान्वितत्वेन कथमयमवज्ञास्पदं भवेदिति भावः, उपदेशपरतया वा प्राग्वद्याख्येयमिति सूत्रार्थः ॥ 'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववत्, उक्तोऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वदेव

अध्ययनं - २२ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
द्वाविंशतितमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं २३ केशि गौतमीयं

वृ. व्याख्यातं रथनेमीयनामकं द्वाविंशतितममध्ययनम्, अधुना त्रयोविंशतितमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने कथञ्चिदुत्पन्नविश्रोतसिकेनापि रथनेमिवद् धृतिश्चरणे विधेयेत्यभिहितम्, इह तु परेषामपि चित्तविप्लुतिमुपलभ्य केशिगौतमवत्तदपनयनाय यतितव्यमित्यभिप्रायेण यथा शिष्यसंशयोत्पत्तौ केशिपृष्टेन गौतमेन धर्मस्तदुपयोगि च लिङ्गादि वर्णितं तथाऽनेनाभिधीयत इत्यनेन सम्बन्धेन प्राप्तस्यास्याध्ययनस्य प्राग्वदुपक्रमादि प्रतिपाद्यं यावन्नामनिष्पन्ननिक्षेपे केशिगौतमीयमिति नाम, अतः केशिगौतमशब्दयोर्निक्षेपोऽभिधेयः, तत्र च वर्त्तमानतीर्थाधिप्रथमगणधरतयैतत्तीर्थापेक्षया गौतमस्य ज्येष्ठत्वादादौ तदभिधानस्य तदनु केशिशब्दस्य निक्षेपमाह निर्युक्तिकृत्-

नि.[४५२] निक्खेवो गोअमंमी चउक्कओ दुवि० ॥
नि.[४५३] जाणग सरीरं भवियं० ॥
नि.[४५४] गोयमनामागोयं वेयंतो भावगोयमो होइ।
एमेव य केसिस्सवि निक्खेवो चउक्कओ होइ ॥

वृ. गाथात्रयं प्राग्वत्रवरं गौतमाभिलाप एव विशेषः, 'एवमेव' उक्तप्रकारेणैव 'केशेरपि' केशिशब्दस्यापि निक्षेप(:) चतुष्कको भवति, ज्ञातव्य इति शेषः, गाथात्रयार्थः ॥ नामान्वर्थमाह-

नि.[४५५] गोअम केसीओ आ संवायसमुट्ठियं तु जम्हेयं।
तो केसिगोयमिज्जं अज्झयणं होइ नायव्वं ॥

वृ. गौतमात् केशिनश्च संवादः-परस्परभाषणं वचनैक्यं वा यतस्तयोस्तात्पर्यत एकार्थाभिधायितयै(तै)व ततः संवादात्समुत्थितम्-उत्पन्नं संवादसमुत्थितम्, अनेन भावार्थ उक्तः, तुः अवधारणे, ततो गौतमत्केशिनश्च संवादसमुत्थितमेव यस्मादेतत्-प्रस्तुतं ततः केशिगौत-

मयोर्भवामित्यर्थं 'नामधेयेन नामधेयत्वेऽस्ये'ति वृद्धसञ्ज्ञत्वात्, 'वृद्धाच्छः' इति छप्रत्यये केशिगौतमीयमध्ययनं 'भवति' ज्ञातव्यमिति गाथार्थः ॥ उक्तो नामनिष्पन्ननिक्षेपः, इदानीं सूत्रालापकनिष्पन्ननिक्षेपावसरः, स च सूत्रे सति भवतीति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू.(८४७) *जिने पासित्ति नामेणं, अरहा लोगपूइए।*
संबुद्धप्पा य सव्वन्नू, धम्मतित्थयरे जिने॥

वृ. 'जिनः' परीषहोपसर्गजेता पार्श्व इति नाम्नाऽभूदिति शेषः, स चान्योऽपि संभवत्यत आह-अर्हति देवेन्द्रादिविहितानि वन्दननमस्करणादीन्यर्हन् तीर्थकृदित्यर्थः, अत एव लोकपूजितः संबुद्धः-तत्त्वावगमवानात्माऽस्येति संबुद्धात्मा, 'चः पूरणे, स चानुत्पन्न-केवलोऽपि स्यादित्याह-'सर्वज्ञः' सकलद्रव्यपर्यायवित्, तथा धर्म एव तीर्यते भवाम्भोधि-रनेनेति तीर्थं धर्मतीर्थं तत्करणशीलो धर्मतीर्थंकरः 'जिनः' जितसकलकर्मा, भवोपग्राहि-कर्मणामपि दग्धज्जुसंस्थानतयैव तेन् व्यवस्थापनात्, मुक्त्यवस्थाऽपेक्षया वा, पठ्यते च-'अरिहा लोयविस्सुए। सव्वन्नू सव्वदंसी य, धम्मतित्थस्स देसए॥' स्पष्टमेवेति सूत्रार्थः ॥

ततः किमित्याह-

मू.(८४८) *तस्स लोगपईवस्स, आसि सीसे महायसे।*
केसी कुमारसमणे, विज्जाचरणपारगे।
मू.(८४९) *ओहिनाणसुए बुद्धे, सीससंघसमाउले।*
गामानुगामं रीयंते, सेऽवि सावत्थिमागए॥
मू.(८५०) *तिंदुयं नाम उज्जाणं, तंमि नयरमंडले।*
फासुएसिज्जसंथारे, तत्थ वासमुवागए॥

वृ. 'तस्य' इति पार्श्वनाम्नोऽर्हतो लोके प्रदीप इव प्रदीपस्तद्गतसकलवस्तुप्रकाशकतया लोकप्रदीपस्तस्यासीच्छिष्यो महायशाः 'केशिः' केशिनामा कुमारश्रमणावपरिणीततया श्रमणश्च तपस्वितया कुमारश्रवणो विद्याचरणे-ज्ञानचारित्रे तयोः पारगः-पर्यन्तगामी। विद्याचरणपारगः, 'ओहिनाणसुए'त्ति सुब्व्यत्ययादवधिज्ञानश्रुताभ्यां 'मइपुव्वं जेण सुयं'इत्यागमात्मतिपूर्वकतया श्रुतस्य मत्या च 'बुद्धः' अवगतहेयोपादेयविभागो विशेषाभिधायित्वादस्यापुनरुक्तता, शिष्याणां सङ्घः-समूहस्तेन समाकुलः-आकीर्णः परिबृंहित इतियावत् शिष्यसङ्घसमाकुलो ग्रामानुग्रामं पूर्ववत् 'रीयंते'-त्ति 'रीयमाणः' विहरन् 'श्रावस्तीं' श्रावस्तीनाम्नीं, 'तंमि'त्ति तस्याः श्रावस्त्याः 'नगरमण्डले' पुरपरिक्षेपपरिसरे 'प्रासुके' स्वभाविकागन्तुकसत्त्वरहिते, केत्याह, शय्या-वसतिस्तस्यां संस्तारकः-शिलाफलकादिः शय्यासंस्तारकस्तस्मिन् 'तत्रे'ति तिन्दुकोद्याने वासम्, -अवस्थानम् 'उपागतः' प्राप्तः, शेषं स्पष्टमिति सूत्रत्रयार्थः ।त्

अस्मिंश्चान्तरे यदभूत्तदाह-

मू.(८५१) *अह तेनेव कालेणं, धम्मतित्थयरे जिने।*
भयवं वद्धमाणुत्ति, सव्वलोगंमि विस्सुए॥
मू.(८५२) *तस्स लोगपईवस्स, आसि सीसे महायसे।*
भयवं गोयमे नाम, विज्जाचरणपारगे॥

मू.(८५३) बारसंगविऊ बुद्धे सीससंघसमाउले।
गामानुगामं रीयंते, से ऽवि नगतिलयागए॥

मू.(८५४) कुट्ठगं नाम उज्जाणं, तंमि नयरमंडले।
फासुएसिज्जसंथारे, तत्थ वासमुवागए॥

वृ. स्पष्टमेव, नवरम् 'अथ' इति वक्तव्यान्तरोपन्यासे 'तेनेव कालेणं'ति तस्मिन्नेव काले, सूत्रत्वात्सप्तम्यर्थे तृतीया, वर्द्धमानो नाम्नाऽभूदिति शेषः, 'विश्रुतः' विख्यातः, गौतमो नामेति गोत्रनामतोऽन्यथा हि इन्द्रभूत्यभिधान एवासौ, 'बारसंगविउ'त्ति द्वादशाङ्गवित् 'सेऽवि'त्ति सोऽपि गौतमनामा भगवान् 'तम्मि'त्ति इहापि तस्याः श्रावस्त्या इति सूत्रचतुष्टयार्थः॥

ततः किमजनीत्याह-

मू.(८५५) केसीकुमारसमणे, गोयमे अ महायसे।
उभओऽवि तत्थ विहरींसु, अल्लीणा सुसमाहिया॥

मू.(८५६) उभओ सीससंघाणं, संजयाणं तविस्सणं।
तत्थ चिंता समुप्पन्ना, गुणवंताण ताइणं॥

मू.(८५७) केरिसो वा इमो धम्मो, इमो धम्मो व केरिसो?।
आयारधम्मपणिही, इमा वा सा व केरिसी?॥

मू.(८५८) चाउज्जामो अ जो धम्मो, जो इमो पंचसिक्खिओ।
देसिओ वद्धमाणेणं, पासेण य महामुनी॥

मू.(८५९) अचेलगो अ जो धम्मो, जो इमो संतरुत्तरो।
एगकज्जपवन्नाणं, विसेसे किं नु कारणं?॥

वृ. ततऊ 'उभयोऽवि'त्ति उभावपि केशिगौतमौ 'तत्र' इति श्रावस्त्यां 'विहरिंसु'त्ति वचनव्यत्ययाद् व्यहार्ष्टां, विहृतवन्तावित्यर्थः, 'अल्लीण'त्ति 'आलीनौ' मनोवाक्कायगुप्तावाश्रितौ वा, प्रक्रमात्तस्यामेव पुरि, यद्वा 'अलीनौ' पृथगवस्थानेन परस्परमश्लिष्टौ 'सुसमाहितौ' सुष्ठु ज्ञानादिसमाधिमन्तौ 'उभयोः' द्वयोः तयोरेव केशिगौतमयोः 'शिष्यसङ्घानां' शिष्यसमूहानां 'संयतानां' संयमिनां 'तपस्विनां' विशिष्टतपोऽन्वितानां 'तत्रे'ति तस्यामेव श्रावस्तीपुरि 'चिन्ते'ति वक्ष्यमाणविकल्पा गुणाः-सम्यग्दर्शनादयस्तद्वतां, 'ताइणं'ति प्राग्वत् तायिनां त्रायिणां वा, चिन्तास्वरूपमाह-'कीदृशः?' किंस्वरूपः 'वा' विकल्पे पुनरर्थे वा 'इमो'त्ति अयम्-अस्मत्सम्बन्धी 'धर्मः' महाव्रतात्मकः 'अय'मिति परिदृश्यमानगणभृच्छिष्यसम्बन्धी 'धम्मो व'त्ति वाशब्दो भिन्नक्रमस्ततश्चायं वा धर्मः कीदृशः?, आचरणमाचारो-वेषधारणादिको बाह्यः क्रियाकलाप इत्यर्थः, स एव सुगतिधारणाद्धर्मः, प्राप्यते हि बाह्यक्रियामात्रादपि नवमग्रैवेयकमितिकृत्वा, तस्य प्रणिधिः-व्यवस्थापनमाचारधर्मप्रणिधिः, 'इमावि'त्ति प्राकृतत्वादयं वाऽस्मत्सम्बन्धी 'सा व'त्ति तत एव स वा द्वितीययतिसत्कः, अयं चाशयः- अस्माकममीषां च सर्वज्ञप्रणीत एव धर्मस्ततिकमस्यैतत्साधनानां च भेद इति तदेतदवबोद्धुमिच्छामो वयमिति।

उक्तामेव चिन्तामभिव्यक्तीकर्त्तुमेवाह-'चाउज्जामो य'त्ति चातुर्यामः-महाव्रतचतुष्टयात्मको यो धर्मः 'देशितः' कथितः 'पार्श्वेन' पार्श्वनाम्ना तीर्थकृतेति सम्बन्धः, 'जो इमो'त्ति

चकारस्य प्रश्लेषाद् यश्चायं पञ्च शिक्षाः - प्राणातिपातादिविरमणोपदेशात्मिकाः संजाता यस्मिन्नसौ पञ्चशिक्षितः, तारकादेराकृतिभण्यत्वादितच्, यद्वा पञ्च शिक्षितानि उक्तशिक्षारूपाणि यस्मिन्नसौ पञ्चशिक्षितो वर्द्धमानेन देशित इति योगः, 'महामुनि'त्ति सुव्व्यत्ययान्महा-मुनिनेत्युभयोरपि विशेषणं महामुनीना वा, अनयोर्विशषे किं नु कारणमित्युत्तरेण सम्बन्धः, अनेन धर्मविषयः संशयो व्यक्तीकृतः।

सम्प्रत्याचारधर्मप्रणिधिविषयं तमेवाभिव्यनक्ति-'अचेलकश्च' उक्तन्यायेनाविद्यमान-चेलकः कुत्सितचेलको वा यो धर्मो वर्धमानेन देशित इत्यपेक्ष्यते, तथा 'जो इमो'त्ति पूर्ववद्, यश्चायं सान्तराणि-वर्द्धमानस्वामिसत्कयतिवस्त्रापेक्षया कस्यचित्कदाचिन्मानवर्णविशेषतो विशेषितानि उत्तराणि च-महाध्यनमूल्यतया प्रधानानि प्रक्रमाद्वस्त्राणि यस्मिन्नसौ सान्तरोत्तरो धर्मः पार्श्वेन देशित इतीहापेक्ष्यते, एकं कार्यं-मुक्तिलक्षणं फलं तदर्थं प्रपन्नौ-प्रवृत्ता-वेककार्यप्रपन्नौ तयोः प्रक्रमात्पार्श्ववर्द्धमानयोः, उभावपि हि मुक्त्यर्थमेव प्रवृत्ताविति कृत्वा, 'विशेषे' उक्तरूपे 'किमि'ति संशये 'नु' वितर्के 'कारणं' हेतुः ?, कारणभेदेन हि कार्यभेद-सम्भव इति भावः, शेषं स्पष्टमिति सूत्रपञ्चकार्थः॥

एवं च विनेयचिन्तोत्पत्तौ यत्केशिगौतमावकार्ष्टां तदाह-

मू.(८६०) *अह ते तत्थ सीसाणं, विन्नाय पवियक्खियं।*
समागमे कयमई, उभओ केसिगोयमा॥

मू.(८६१) *गोअमो पडिरूवन्नू, सीससंघसमाउले।*
जिट्ठं कुलमविक्खंतो, तिंदुयं वनमागओ॥

मू.(८६२) *केसी कुमारसमणे, गोअमं दिस्समागयं।*
पडिरूवं पडिवत्तिं, सम्मं संपडिवज्जई॥

मू.(८६३) *पलालं फासुअं तत्थ, पंचमं कुसतिनानि य।*
गोयमस्स निसिज्जाए, खिप्पं संपणामए॥

वृ. 'अथे'त्यनन्तरं 'ते' इति तौ प्रक्रान्तौ 'तत्रे'ति श्रावस्त्यां प्रकर्षेण वितर्कितं-विकल्पितं प्रवितार्कितं 'समागमे' मीलके 'कृतमती' विहिताभिप्रायावभूतामिति शेषः, केसिगोयमे'त्ति केशिगौतमौ, ततश्च 'पडिरूवन्नु'त्ति प्रतिरूपविनयो-यथोचितप्रतिपत्तिरूपस्तं जानातीति प्रतिरूपज्ञः 'ज्येष्ठं' प्रथमभावितया 'कुलं' पार्श्वनाथसन्तानम् 'अपेक्षमाणः' विगणयन् 'प्रति-रूपाम्' उचितां 'प्रतिपत्तिम्' अभ्यागतकर्त्तव्यरूपां 'सम्यग्' अवैपरीत्येन समिति-सांमुख्येन प्रतिपद्यते-अङ्गीकरोति संप्रतिपद्यते।

प्रतिपत्तिमेवाह-'पलालं' प्रतीतं 'प्रासुकं' विगतजीवं 'तत्रे'ति तस्मिन्तिन्दुकोद्याने 'पंचमं'त्ति वचनव्यत्ययात् 'पञ्चमानि' पञ्चसङ्ख्यापूरणानि, कानीत्याह-कुशतृणानि, चशब्दा-दन्यान्यपि साधुयोग्यतृणानि, पञ्चमत्वं चैषां पलालभेदापेक्षया, तस्य हि शाल्यिदसम्बन्धि-भेदापेक्षया चत्वारो भेदाः, यत उक्तम्-

"तिनपनगं पुन भणियं, जिनेहिं कम्मट्ठगंठिमहणेहिं।
साली वीही कोद्दवरालगरो तिनाइं च॥"

गौतमस्य 'निषद्यायै' निषद्यानिमित्तमुपवेशनार्थमित्यर्थः, 'संपणामए'त्ति समर्पयति, शेषं सूत्रसिद्धमेवेति सूत्रचतुष्टयार्थः ॥ तौ च तत्रोपविष्टौ यथा प्रतिभातस्तथाऽऽह-

मू.(८६४) केसी कुमारसमणे, गोयमे य महायसे।
उभओ निसन्ना सोहंति, चंदसूरसमप्पहा ॥

वृ. निगदसिद्धं, नवरं 'सोहंति'त्ति शोभते चन्द्रसूर्यसमा प्रभा-छाया ययोस्तौ तथा चन्द्रसूर्यो पमाचितियावदिति सूत्रार्थः ॥ तत्सङ्गमे च यदभूत्तदाह-

मू.(८६५) समागया बहू तत्थ, पासंडा कोउगासिया।
गिहत्थाण अनेगाओ, साहस्सीओ समागया ॥

मू.(८६६) देवदानवगंधव्वा, जक्खरक्खसकिन्नरा।
अदिस्साण य भूआणं, आसि तत्थ समागमो ॥

वृ. 'समागताः' मिलिताः पाषण्डं-व्रतं तद्योगात् 'पाषण्डाः' शेषव्रतिनः कौतुकं-कुतूहलम् आश्रिताः-प्रतिपन्नाः कौतुकश्रिताः, पठ्यते च- 'कोउगामिग'त्ति, तत्र कौतुकात् मृगा इव मृगा अज्ञत्वात्प्राकृतत्वादामितकौतुका वा, 'साहस्सीओ'त्ति सूत्रत्वात्सहस्राणि । देवा ज्योतिष्कवैमानिकाः दानवाः भवनपतयो गन्धर्वयक्षादयो-व्यन्तरविशेषाः, समागता इति पूर्वेण सम्बन्धः, एते चानन्तरमदृश्यविशेषणाद् दृश्यरूपाः, अदृश्यमानां च भूतानां केलीकिल-व्यन्तरविशेषाणामासीत् 'समागमः' मीलकः, शेषं सुगममिति सूत्रद्वयार्थः ॥

सम्प्रति तयोर्जल्पमाह-

मू.(८६७) पुच्छामि ते महाभाग !, केसी गोयममब्बवी।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥

मू.(८६८) पुच्छ भंते ! जहिच्छं ते, केसिं गोयममब्बवी।
तओ केसी अणुन्नाए, गोअमं इणमब्बवी ॥

वृ. 'पृच्छामि' प्रश्नयामि 'ते' इति त्वां 'महाभाग !' अतिशयाचिन्त्यशक्ते ! 'अब्रवीत्' उक्तवान् 'ततः' तद्वचनानन्तरं केशिं 'ब्रुवन्तम्' अभिदधतं 'तुः' पुनरर्थे भिन्नक्रमश्च केशिं पुनर्ब्रुवन्तमिति योज्यते, 'जहिच्छं'ति इच्छया अनतिक्रमेण यथेच्छं यदवभासत इत्यर्थोऽनुज्ञान इति-अनुमतो गौतमेनेति प्रक्रमः, शेषं प्रतीतमिति सूत्रद्वयार्थः ॥

यच्चासौ गौतमं पृष्टवांस्तत्संग्राहकं निर्युक्तिकृद् द्वारगाथात्रयमाह-

नि.[४५६] सिक्खावए अ लिंगे अ, सत्तूणं च पराजए।
पासावगत्तणे चेव, तंतूद्धरणबंधने ॥

नि.[४५७] अग्गिनिव्वावणे चेव, तहा दुट्ठस्स निग्गहे।
तहा पहपरिब्भाय, महासोअनिवारणे ॥

नि.[४५८] संसारपारगमने, तमस्स अ विघायणे।
ठाणोवसंपया चेव, एवं बारससू कमो ॥

वृ. एतच्च यथाऽवसरं सूत्रव्याख्यान एव व्याख्यास्यते, तत्र प्रथमं 'सिक्खावय'त्ति द्वारम्, अत्र च शिक्षा-अभ्यासस्तत्प्रधानानि व्रतानि प्रतिदिनं यतिभिरभ्यस्यमानतया शिक्षाव्रतानि

शिक्षापदानि वा प्राणिवधविरमणादीनि, सत्सु हि तेषु शेषोऽपि शिक्षा शिष्योपदेशात्मिका संभवतीति। एतदधिकृत्याह सूत्रकृत्-

मू.(८६९) *चाउज्जामो अ जो धम्मो, जो इमो पंचसिक्खओ।*
देसिओ वद्धमाणेणं, पासेण य महामुनी॥

मू.(८७०) *एगकज्जपवन्नाणं, विसेसे किं नु कारणं?।*
धम्मे दुविहे मेहावी, कहं विप्पच्चओ न ते?॥

वृ. 'चतुर्यामः' हिंसाऽनृतस्तेयपरिग्रहोपरमात्मकव्रतचतुष्टयरूपः 'पञ्चशिक्षितः' स एव मैथुनविरमणात्मकपञ्चमव्रतसहितः। इत्थं च 'धर्मे' साधुधर्मे 'द्विविधे' द्विभेदे हे 'मेधाविन्!' विशिष्टावधारणशक्त्यन्वित! कथञ्चित् (कथं विप्र) प्रत्ययः' अनाश्वासो न 'ते' तव?, तुल्ये हि सर्वज्ञत्वे किंकृतोऽसौ मतभेद इत्यभिप्रायः, शेषं प्रकटार्थमेवेति सूत्रद्वयार्थः॥

एवं केशिनोक्ते-

मू.(८७१) *तओ केसिं बुवंतं तु, गोयमो इणमब्बवी।*
पन्ना समिक्खए धम्मं तत्तं तत्तविणिच्छियं॥

मू.(८७२) *पुरिमा उज्जुजडा उ, वक्कजडा य पच्छिमा।*
मज्झिमा उज्जुपन्ना उ, तेन धम्मे दुहा कए॥

मू.(८७३) *पुरिमाणं दुव्विसुज्झो उ, चरिमाणं दुरनुपालओ।*
कप्पो मज्झिमगाणं तु, सुविसुज्झो सुपालओ॥

वृ. 'ततः' तदनन्तरं केशिनि ब्रुवन्ते तुः पूरणेऽवधारणे वा ततो ब्रुवन्तमेव जल्पादनुपरतमेव, अनेनादरातिशयमासन्नलब्धप्रतिभतां च गौतमस्याह। किं तदब्रवीदित्याह-'प्रज्ञा' बुद्धिः 'समीक्षते' सम्यक् पश्यति, किं तदित्याह-'धम्मंतत्तं'ति बिन्दुरलाक्षणिकस्ततः 'धर्मतत्त्वं' धर्मपरमार्थं तत्त्वानां-जीवादीनां विनिश्चयो-विशिष्टनिर्णयात्मको यस्मिंस्तत्तथा, इदमुक्तं भवति-न वाक्यश्रवणमात्रादेव वाक्यार्थनिर्णयो भवति, किन्तु प्रज्ञावशात्, ततः 'पुरिमे'त्ति 'पूर्वे' प्रथमतीर्थकृत्साधवः 'उज्जुजडे'ति ऋजवश्च प्राञ्जलतया जडाश्च तत एव दुष्प्रतिपाद्यतया ऋजुजडाः, तुरिति यस्मात् 'वक्कजड्ढा य'त्ति, वक्राश्च वक्रबोधतया जडाश्च तत एव स्वकानेककुविकल्पो विवक्षितार्थप्रतिपत्त्यक्षमतया वक्रजडाः 'चः' समुच्चये 'पश्चिमाः' पश्चिमतीर्थकृदयतयः 'मध्यमास्तु' मध्यमतीर्थकृत्सम्बन्धितपस्विनः, 'ऋजुप्रज्ञाः' ऋजवश्च ते प्रकर्षेण जानन्तीति प्रज्ञाश्च सुखेनैव विवक्षितमर्थं ग्राहयितुं शक्यन्त इति ऋजुप्रज्ञाः, तेन हेतुना धर्मो द्विभेदः 'कृतः' विहितः, एककार्यप्रतिपन्नत्वेऽपीति प्रक्रमः।

यदि नाम पूर्वादीनामेवंविधत्वं तथाऽपि कथमेतद् द्वैविध्यमित्याह-'पुरिमाणं'ति पूर्वेषां दुःखेन विशोध्यो विशोधयितुं-निर्मलतां नेतुं शक्यो दुर्विशोध्यः, कल्प इति संबध्यते, ते ह्यतिऋजुतया गुरुभिरनुशिष्यमाणा अपि न तदनुशासनं स्वप्रज्ञाऽपराधाद्यथावत्प्रतिपत्तुं क्षमन्त इति तेषामसौ दुर्विशोध्य उच्यते, तुशब्द उत्तरेभ्यो विशेषं द्योतयति, 'चरमाणां' चरमतीर्थकृत्तपस्विनां दुःखेनानुपाल्यत इति दुरनुपालः स एव दुरनुपालकः 'कल्पः' यतिक्रियाकलापः, ते हि वक्रत्वेन कुविकल्पाकुलितचित्ततया कथञ्चिज्जानाना अपि न यथावदनुष्ठातुमीशते,

मध्यमकानां तु सुखेन विशोध्यो-विशोधयितुं शक्यः सुविशोध्यः, 'सुपउल'त्ति चशब्दस्य गम्यमानत्वात्सुपालश्च, को ऽसौ ?-कल्पः इतीहापि योज्यते, ते हि ऋजुप्रज्ञा इति सम्यग्-मार्गानुसारिबोधतया सुखेनैव यथावदगच्छन्ति पालयन्ति च, अतस्ते चतुर्यामोक्तावपि पञ्चममपि याममुक्तहेतोर्ज्ञातुं पालयितुं च क्षमा इति तदपेक्षया पार्श्वेन चतुर्यामः उक्तः, पूर्वपश्चिमाश्चोक्तनीतितो नेत्थमिति ऋषभवर्द्धमानाभ्यां पञ्चमं व्रतमुक्तम्, अयमर्थः-न यादृशाद्वाचकादेकस्य श्रोतुर्विवक्षितार्थप्रतिपत्तिस्तादृशादेवाशेषाणामपि, स्वप्रज्ञाऽपेक्षया हि कोऽपि कीदृशादेव वाचकादेकमप्यर्थं प्रतिपद्यत इति विचित्रप्रज्ञविनेयानुग्रहायोपात्ताद्वाचकभेदादेव धर्मस्य द्वैविध्यं, न तु वस्तुभेदात्, यद्वाचकभेदेऽपि वस्तुतो व्रतपञ्चकस्यैवात्र विवक्षितत्वात्, प्रसङ्गतश्चेहाद्यजिनाभिधानमिति सूत्रत्रयार्थः ॥ इत्थं गौतमेनोक्ते केशिराह-

मू. (८७४) साहु गोयम ! पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा ! ॥

मू. (८७५) अचेलओ अ जो धम्मो, जो इमो संतरुत्तरो ।
देसिओ वद्धमाणेणं, पासेण य महामुनी ॥

मू. (८७६) एगकज्जपवन्नाणं, विसेसे किं नु कारणं ? ।
लिंगे दुविहे मेहावी !, कहं विप्पच्चओ न ते ?

वृ. 'साधु'त्ति साधुः-शोभना गौतम! 'प्रज्ञा' बुद्धिः 'ते' तव, यतः 'छिन्नः' अपनीतस्त्वयेति गम्यते, मम 'संशयः' सन्देहः 'इमो'त्ति अयम्-उक्तरूपः, पठन्ति च-'पन्नाए'त्ति, तत्र च साधु यथा भवत्येवं गौतम! 'प्रज्ञया' बुद्धया छिन्नो मे संशयोऽयं, त्वयेति व्याख्येयं, विनेयापेक्षं चेत्थमभिधानं, न तु तस्य मतिश्रुतावधिज्ञानत्रयसमन्वितस्यैवंविधसंशयसम्भव इति सर्वत्र भावनीयम्। 'अन्योऽपि' वक्ष्यमाणः संशयो मम तं मे कथय गौतम!, तद्विषयमप्यर्थं यथावत्प्रतिपादयेति भावः ।

अत्र च द्वितीयं द्वारं 'लिंग'त्ति, लिङ्ग्यते-गम्यतेऽनेनायं व्रतीति लिङ्गं-वर्षाकल्पादिरूपो वेषः, तदधिकृत्याह-'अचेलओ' इत्यादि, प्राग् व्याख्यातमेव, नवरं 'महामुनि'त्ति महामुने !, पठन्ति च 'महाजस'त्ति महायशाः, लिङ्गे द्विविधे-अचेलकतया विविधवस्त्रधारकतया च द्विभेद सूत्रत्रयार्थः ॥ एवं केशिनाऽभिहिते गौतमवचोऽभिधायकं सूत्रत्रयम्-

मू. (८७७) केसिं एवं बुवाणं तु, गोयमो ईणमब्बवी ।
विन्नाणेण समागम्म, धम्मसाहणमिच्छियं ॥

मू. (८७८) पच्चयत्थं च लोगस्स, नानाविहविकप्पणं ।
जत्तत्थं गहणत्थं च, लोगे लिंगपओअणं ॥

मू. (८७९) अह भवे पइन्ना उ, मुक्खसब्भूयसाहणा ।
नाणं च दंसणं चेव, चरित्तं चेव निच्छए ॥

वृ. अत्र च विशिष्टं ज्ञानं विज्ञानं-तच्च केवलमेव तेन समागम्य यद्यस्योचितं तत्तथैव ज्ञात्वा 'धर्मसाधनं' धर्मोपकरणं वर्षाकल्पादिकम् 'इच्छिय'न्ति 'इष्टम्' अनुमतं पार्श्वनाथ-वर्द्धमानतीर्थकृद्भ्यामिति प्रक्रमः, वर्द्धमानविनेयानां हि रक्तादिवस्त्रानुज्ञाने वक्रजडत्वेन

वस्त्ररञ्जनादिषु प्रवृत्तिरतिदुर्निवारैव स्यादिति न तेन तदनुज्ञानं, पार्श्वशिष्यास्तु न तथेति रक्तादीनामपि (धर्मोपकरणत्वं) तेनानुज्ञातमिति भावः, किञ्च -प्रत्ययार्थं वा-अमी व्रतिन इति प्रतीतिनिमित्तं, कस्य ? -लोकस्य, अन्यथा हि यथाऽभिरुचितं वेषमादाय पूजादिनिमित्तं विडम्बकादयोऽपि वयं व्रतिन इत्यभिदधीरन्, ततो व्रतिष्वपि न लोकस्य व्रतिन इति प्रतीतिः स्यात्, किं तदेवमित्याह-'नानाविधविकल्पनं' प्रक्रमान्नानाप्रकारोपकरणपरिकल्पनं, नानाविधं हि वर्षाकल्पाद्युपकरणं, यथावद्यतिष्वेव संभवतीति कथं न तत्प्रत्ययहेतुः स्यात् ?, तथा यात्रासंयमनिर्वाहस्तदर्थं, विना हि वर्षाकल्पादिकं वृष्ट्यादौ संयमबाधैव स्यात्, ग्रहणंज्ञानं तदर्थं च, कथञ्चिच्चित्तविप्लवोत्पत्तावचि गृह्णातु-यथाऽहं व्रतीत्येतदर्थं, लोके लिङ्गस्य-वेषधारणस्य प्रयोजनमिति-प्रवर्तनं लिङ्गप्रयोजनम् ।

'अथे' त्युपन्यासे 'भवे पइन्ना उ'त्ति तुशब्दस्यैवकारार्थत्वाद्भिन्नक्रमत्वाच्च भवेदेवो प्रतिज्ञानं प्रतिज्ञा-अभ्युपगमः, प्रक्रमात्पार्श्ववर्द्धमानयोः, प्रतिज्ञास्वरूपमाह-'मोक्खसब्भूयसाहण'त्ति मोक्षस्य सद्भूतानि च तानि तात्त्विकत्वात्साधनानि च हेतुत्वान्मोक्षसद्भूतसाधनानि, कानीत्याह-'ज्ञानं च' यथावदवबोधः 'दर्शनं च' तत्त्वरुचिः 'चारित्रं च' सर्वसावद्यविरतिः 'एव' त्यवधारणे, स च लिङ्गस्य मुक्तिसद्भूतसाधनता व्यवच्छिनत्ति, ज्ञानाद्येव मुक्तिसाधनं न तु लिङ्गमिति, श्रूयते हि भरतादीनां लिङ्गं विनाऽपि केवलज्ञानोत्पत्तिः, 'निश्चये' इति निश्चयनये विचार्ये, व्यवहारनये तु लिङ्गस्यापि कथञ्चिन्मुक्तिसद्भूतहेतुतेष्यत एव, तदयमभिप्रायः-निश्चयस्तावल्लिङ्गं प्रत्यादियत एव न, व्यवहार एव तूक्तहेतुभिस्तदिच्छतीति तद्भेदस्य तत्त्वतोऽकिञ्चित्करत्वान्न विदुषां विप्रत्ययहेतुता, शेषं स्पष्टमिति सूत्रत्रयार्थः ॥

मू. (८८०) *साहु गोयम ! पन्ना ते, छिन्नो मे संसओ इमो ।*
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा ! ॥

वृ. प्राग्वत् । अत्र च तृतीयद्वारं शत्रूणां पराजय इति, एतदधिकृत्याह-

मू. (८८१) *अनेगाण सहस्साणं, मज्झे चिट्ठसि गोयमा ! ।*
ते अ ते अभिगच्छंति, कहं ते निज्जिया तुमे ? ॥

मू. (८८२) *एगे जिए जिया पंच, पंच जिए जिया दस ।*
दसहा उ जिणित्ता णं, सव्वसत्तू जिणामहं ॥

मू. (८८३) *सत्तू अ इइ के वुत्ते ?, केसी गोयममब्बवी ।*
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥

मू. (८८४) *एगप्पो अजिए सत्तू, कसाया इंदियाणि य ।*
ते जिणित्तू जहानायं, विहरामि अहं मुनी ॥

वृ. अविद्यमानमेक इति-भावप्रधानत्वान्निर्देशस्यैकत्वं येषु तेऽनेकास्तेषाम् अनेकानांबहूनां सहस्राणां प्रक्रमाच्छत्रुसम्बन्धिनां मध्ये त्वं 'तिष्ठसि' आस्से गौतम !, 'ते च' अनेकसहस्रसङ्ख्याः शत्रवः 'ते' इति सूत्रत्वात्त्वामभिलक्षीकृत्य गच्छन्ति-धावन्ति, अर्थाज्जेतुम्, इत्थं चैतत् केवलानुत्पत्तिदर्शनात्, दृश्यते च तज्जफलमपि तव प्रशमादि, तत् 'कथं' केन प्रकारेण 'ते' इत्युक्तरूपाः शत्रवः 'निर्जिताः' अभिभूतास्त्वया ?, भूयस्त्वादभियोक्तृत्वाच्च

तेषामिति भावः। इत्थं केशिनोक्ते गौतम आह-'एकस्मिन्' सकलभावशत्रुप्रधाने आत्मनि 'जिते' अभिभूते जिताः पञ्च, कथम् ? एकः स एवान्ये च चत्वारः कषायाः, तथा 'पंच जिए'त्ति सूत्रत्वात्पञ्चसु जितेषु जिता दश, अत्रापि पञ्चोक्ता एवापराणि च षष्ठेन्द्रियाणि, ततः 'दशधा' दशप्रकारान्कतरूपान् 'तुः' पुनरर्थे शत्रून् जित्वा 'णं'ति प्राग्वत् 'सर्वशत्रून्' नोकषायादींस्तदुत्तरोत्तरभेदांश्चानेकसहस्रसङ्ख्यान् 'जधामि' अभिभवाभ्यहं, तदनने प्रथमतः प्रधानजयो जयनप्रकारउक्तः, ततश्च 'सत्तू य इइ'त्ति 'चः' पूरणे इति भिन्नक्रमो जातौ चैकवचनं, ततः शत्रुः क उक्त इति केशिगौतममब्रवीत्, ननु यद्यसौ शत्रूनपि न वेत्ति कथं तन्मध्यगतस्त्वं तिष्ठसीत्यादिकमनेन प्रागुक्तम् ?, उच्यते, अज्ञजनप्रतिबोधार्थं सर्वा अपि ज्ञपृच्छा एवैताः, उक्तं हि प्राग् 'ज्ञानत्रयान्वितोऽसाविति कथमस्यैवंविधवस्त्वपरिज्ञानसम्भव' इति, उत्तरार्धं प्राग्वत्।

एक आत्मेति -जीवश्चित्तं वाऽतति- गच्छति तांस्तान् भावान् अर्थान्वेति व्युत्पत्तेः 'अजितः' अवशीकृतः -अनेकानर्थावाप्तिहेतुत्वाच्छत्रुरिव शत्रुस्तथोक्तहेतोरेव 'कषायाः' क्रोधादयः 'इन्द्रियाणि' स्पर्शनादीनि, चशब्दान्नोकषायादयः कषायाद्युत्तरोत्तरभेदाश्च, अजिताः शत्रव इति वचनविपरिणामेन योज्यते। इह च कषायाणां प्रथमत उपादानमिन्द्रियाणामपि कषायावशत एवानर्थहेतुत्वख्यापनार्थं, सम्प्रत्युपसंहरव्याजेन तज्जये फलमाह-'तान्' उक्तरूपान् शत्रून् 'जित्वा' अभिभूय 'यथान्यायं' यथोक्तनीत्यनतिक्रमेण ततो विहरामि-तन्मध्येऽपि तिष्ठन्नप्रतिबद्धविहारितयेति गम्यते, तेषामेव प्रतिबन्धहेतुत्वेन तद्विबन्धकाभावादिति भावः, 'अह' मित्यात्मनिर्देशः 'मुने' इति केश्यामन्त्रणमिति सूत्रचतुष्टयार्थः॥ एवं गौतमेनाभिहिते-

मू.(८८५) *साहु गोयम! पन्ना ते, छिन्नो मे संसओ इमो।*
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा!॥

व्या. प्राग्वत्॥ सम्प्रति 'पासावगत्तणं'ति चतुर्थद्वारमधिकृत्याह-

मू.(८८६) *दीसंति बहवे लोए, पासबद्धा सरीरिणो।*
मुक्कपासो लहुब्भूओ, कहं तं विहरसी मुनी!?॥

मू.(८८७) *ते पासे सव्वसो छित्ता, निहंतूण उवायओ।*
मुक्कपासो लहुब्भूओ, विहरामि अहं मुनी?॥

मू.(८८८) *पासा अ इह के वुत्ता?, केसी गोयममब्बवी।*
केसिं एवं बुवंतं तु, गोयमो इणमब्बवी॥

मू.(८८९) *रागद्दोसादओ तिव्वा, नेहपासा भयंकरा।*
ते छिंदित्तु जहानायं, विहरामि जहक्कमं॥

व्या. सूत्रचतुष्टयं स्पष्टमेव नवरं पाशैर्बद्धा-नियन्त्रिताः पाशबद्धाः 'शरीरिणः' प्राणिनः, 'मुक्तपाशः' त्यक्तपाशोऽत एव लघुभूतो-वायुः, ततो लघुभूत इव लघुभूतः सर्वत्राप्रतिबद्धत्वात्। गौतम आह-'ते' इति तान्-लोकबन्धकान पाशान् 'सदृशो'त्ति सूत्रत्वात्सर्वान् 'छित्त्वा' त्रोटयित्वा 'निहत्थ' पुनर्बन्धाभावलक्षणेनातिशयेन विनाश्य, कथम् - 'उपायतः' सद्भूत-

भावनाऽभ्यासात्। ततः पाशाश्च-पाशशब्दवाच्याः के 'वुत्ते'ति उक्ताः।

रागद्वेषादयः, आदिशब्दान्मोहपरिग्रहः 'तीव्राः' इति गाढाः, तथा 'नेह'त्ति स्नेहाः-पुत्रकलत्रादिसम्बन्धास्ते पाशा इव पारवश्यहेतुतया पाशा इत्युक्ता इति क्रमः, अतिगाढत्वाच्च रागान्तर्गतत्वेऽप्यमीषां पुनरुपादानं, 'भयङ्कराः' अनर्थहेतुतया त्रासोत्पादकाः 'यथाक्रमम्' इति क्रमेणेयतिविहित आचारस्तदनतिक्रमेणेति सूत्रचतुष्टयार्थः॥

मू.(८९०) *साहु गोयम! पन्ना ते, छिन्नो मे संसओ इमो।*
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा!॥

वृ. पूर्ववत्। सम्प्रति 'तन्तूद्धरणबंधणे'त्ति पञ्चमद्वारावसरः, तत्र च तन्यते भवोऽनेनेति तन्तुः-भवतृष्णा स एव बन्धहेतुत्वाद्बन्धनं तस्योद्धरणम्-उन्मूलनं तन्तुबन्धनोद्धरणं, प्राग्वत्परनिपातः॥ तदधिकृत्याह-

मू.(८९१) *अंतो हिअयसंभूया, लया चिट्ठइ गोयमा!।*
फलेइ विसभक्खीणं, सा उ उद्धरिया कहं?॥

मू.(८९२) *तं लयं सव्वसो छित्ता, उद्धरित्ता समूलियं।*
विहरामि जहानायं, मुक्कोमि विसभक्खणं॥

मू.(८९३) *लया य इति का वुत्ता?, केसी गोयममब्बवी।*
केसिमेवं बुवंतं तु, गोयमो इणमब्बवी॥

मू.(८९४) *भवतण्हा लया वुत्ता, भीमा भीमफलोदया।*
तमुच्छित्तु जहानायं, विहरामि महामुनी॥

वृ. हृदयस्यान्तरन्तर्हृदयं-मन इत्यर्थस्तत्र संभूता-उत्पन्ना लता 'तिष्ठति' आस्ते हे गौतम!, 'फलेइ विसभक्खीणं'ति आर्षत्वात्फलति विषयद्भक्ष्यन्त इति विषभक्ष्याणि-पर्यन्तदारुणतया विषोपमानि फलानीति गम्यते, सा पुनः 'उद्धृता' उत्पाटिता त्वयेति गम्यते, 'कथं' केन प्रकारेण, इति केशिप्रश्नः। गौतम आह-'ताम्' इत्युक्तविशेषणां लतां 'सव्वसो'त्ति सर्वतः 'छित्त्वा' खण्डीकृत्य 'उद्धृत्य' उत्पाट्य समूलामेव समूलिकां रागद्वेषलक्षणमूलनिर्मूलनेन यथान्यायं विहरामीति प्राग्वत्, अनेन सर्वच्छेदसमूलोद्धरणं चोद्धरणप्रकार उक्तः, तत्फलमाह-मुक्तोऽस्मि 'विसभक्खणं'ति सुब्व्यत्ययाद् विषभक्षणाद्-विषफलाभ्यवहारोपमात् क्लिष्टकर्मणः।

'लते'त्यादि स्पष्टं, भवः-संसारस्तस्मिन् तृष्णा लोभात्मिका भवतृष्णा लतोक्ता 'भीमा' भयदा स्वरूपतः कार्यतश्च भीमो दुःखहेतुतया फलानामर्थात्क्लिष्टकर्मणामुदयः-परिपाको यस्याः सा तथा, न चेह प्राग् लतामात्रस्यैव प्रश्न इति विशेषणाभिधानमयुक्तं, सविशेषणाया एव तस्याः प्रक्रान्तत्वात्, प्रक्रमापेक्षत्वाच्च प्रश्नस्य, शेषमुपसंहाराभिधायीति सूत्रचतुष्टयार्थः॥

मू.(८९५) *साहु गोयम! पन्ना ते, छिन्नो मे संसओ इमो।*
अन्नोऽवि संसओ मज्झं, तं मे कहसं गोयमा॥

वृ. गतार्थम्। 'अग्निनिर्वापणं चेव'त्ति षष्ठद्वारमङ्गीकृत्याह-

मू.(८९६) *संपज्जलिया घोरा, अग्गी चिट्ठइ गोयमा!।*
जे डहंति सरीरत्था, कहं विज्झाविया तुमे?॥

मू.(८९७) महामेहप्पसूयाओ, गिज्झ वारि जलुत्तमं।
सिंचामि सययं ते उ, सित्ता नो व डहंति मे॥

मू.(८९८) अग्गी अ इइ के वुत्ते ?, केसी गोयममब्बवी।
तओ केसिं, बुवंतं तु, गोयमो ईणमब्बवी॥

मू.(८९९) कसाया अग्गिणो वुत्ता:, सुअसीलतवो जलं।
सुयधाराभिहया संता, भिन्ना हु न डहंति मे॥

वृ. सूत्रचतुष्टयम्। संज्वलनप्रकर्षेण प्रदीपिताः संप्रज्वलिता अत एव 'घोराः' रौद्राः 'अग्गी चिट्ठइ'त्ति आर्षत्वाद्वचनव्यत्ययात्ततोऽग्नयस्तिष्ठन्ति हे गौतम ! ये दहन्तीव दहन्ति परितापकारितया 'शरीरस्थाः' देहस्थाः, न बहिर्वर्त्तिन इत्यर्थः, एते च यद्यप्यात्मस्थास्तथाऽपि शरीरात्मनोरन्योऽन्यानुगमख्यापनायेत्थमुक्ताः, कथं 'विध्यापिताः' निर्वापितास्त्वया ?। गौतम आह-महामेघात् प्रसूतम्-उत्पन्नं महामेघप्रसूत तस्मात्, महाश्रोतस इति गम्यते, 'गिज्झ'त्ति गृहीत्वा वारयति तृष्णादिदोषानिति वारि-पानीयं 'जलोत्तमं' शेषजलापेक्षया प्रधानं तेन 'सिञ्चामि' उक्षामि विध्यापयामीतियावत्, 'सततम्' अनवरतं, 'त उ'त्ति तुशब्दस्य भिन्न(:) क्रमस्तत्स्ता-नग्नीन्, प्रसङ्गतस्तेत्सेचनफलमाह-सिक्तास्तु 'नो वे'ति नैव दहन्ति 'मे'त्ति मां, पठ्यते च-'सययं देहि'त्ति, इह च देहस्थितत्वेनाग्नयोऽपि देहा उक्ताः, उक्तं हि 'तास्थ्यात्तद्व्यपदेश'इति, अन्ये तु पूर्वसूत्रं पठन्ति-'जा डहेति सरीरत्थे'ति, अत्र तु पठन्ति-'सिंचामी सययं तं तु' इति, इह च 'तं' मित्यग्निमन्यत् प्राग्वद्, एकवचनान्तत्वमेव तु सर्वत्र विशेषः।

"अग्गी ये"त्यादि प्राग्वत्, नवरमग्निप्रश्नो महामेघादिप्रश्नोपलक्षणं, 'कषायाः' क्रोधादयः अग्नयः परितापकतया शोषकतया चोक्तास्तीर्थकृदिभिरिति गम्यते, श्रुतं चेहोपचारात्कषायोपशमहेतवः श्रुतान्तर्गतोपदेशाः शीलं च-महाव्रतानि तपश्च-अनशनप्रायश्चित्तादि श्रुतशीलतप इति समाहारः-तत्किमित्याह- जलं-पानीयमुपलक्षणत्वाच्चास्य महामेघस्त्रिजगदानन्दकतया शेषमेघातिशायित्वेन भगवांस्तीर्थकरो महाश्रोताश्च तत उत्पन्न आगमः, उक्तमेवार्थं सविशेषमुपसंहरन्नाह- श्रुतस्य आगमस्योपालक्षणत्वाच्छीलतपसोश्च धारा इव धारा-आक्रोशहननतर्जनधर्मध्वंशेषूत्तरो भावस्यालाभरूपतादिसततपिभावनास्ताभिराभिहताः-ताडिताः श्रुतधाराभिहताः सन्तः प्रक्रमादुक्तरूपा अग्नयः 'भिन्नाः' विदारितास्तदभिधातेन लवमात्रीकृता इतियावत् 'हु:' पूरणे न दहन्ति मामिति सूत्रचतुष्टयार्थः॥

मू.(९००) साहु गोयम ! पन्ना ते, छिन्नो मे संसओ इमो।
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा !॥

वृ. प्राग्वत्। 'दुष्टाश्वनिग्रह' इति सप्तमद्वारमुररीकृत्याह-

मू.(९०१) अयं साहस्सिओ भीमो, दुट्ठस्सो परिधावई।
जंसि गोयम ! आरूढो, कहं तेन न हीरसि ?॥

मू.(९०२) पहावंतं निगिण्हामि, सुयरस्सीसमाहियं।
न मे गच्छइ उम्मग्गं, मग्गं च पडिवज्जइ॥

मू.(९०३) अस्से अ इइ के वुत्ते ?, केसी गोयममब्बवी।

तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥

मू.(१०४) *मनो साहस्सिओ भीमो, दुट्ठस्सो परिधावई ।*
तं सम्मं तु निगिण्हामि, धम्मसिक्खाइ कंथगं ॥

वृ. सूत्रचतुष्टयम्। 'अयं' प्रत्यक्षः, स्वसंवेदनप्रत्यक्षेण अन्तर्मीयत एवासौ इति साहसिको भीमः प्राग्वत्, दुष्टश्चासावश्वश्च दुष्टाश्वः 'परिधावति' समन्तादुन्मार्गगच्छति, यः कीदृगित्याह-यं दुष्टाश्वमभिभवसि, यदिवा 'यंसि'त्ति यस्मिन् हे गौतम! 'आरूढः' चटितः, अनारूढस्य हि न वक्ष्यमाणापायहेतुरसौ स्यादित्येवमभिधानं, ततः कथमीति प्रश्ने 'तेन' इति दुष्टाश्वेन 'न ह्रियसे' प्रस्तावन्नोन्मार्गं नीयसे ?।

गौतम आह-'प्रधावन्तम्' उन्मार्गाभिमुखं गच्छन्तं 'निगृह्णामि' निरुणध्मी, कीदृशं तमित्याह-श्रुतम्, आगमो नियन्त्रकतया रश्मिरिव रश्मिः-ग्रहः श्रुतरश्मिस्तेन समाहितो-बद्धः श्रुतरश्मिसमाहितस्तम्, अतो न 'मे' मम सम्बन्धि दुष्टाश्वः 'गच्छति' याति 'उन्मार्गम्' उत्पथं, ततो न मम तेन हरणमिति भावः, ततश्च किमुदास्त एवेत्याह-'मार्गं च' सत्पथं पुनः 'प्रतिपद्यते' अङ्गीकुरुते। 'अस्से य' इत्यादि सुगमं, नवरं 'मनः' चित्तम्, इह च साहसिक इत्याद्यभिधानं प्रक्रमानुस्मरणार्थं, विशेषमुपदर्शयन्नुपसंहारमाह-तं सम्यग् निगृह्णामि धर्मविषया शिक्षा-उपदेशो धर्मशिक्षा तया, यद्वा शिक्षा-अभ्यासस्ततो 'धर्मशिक्षायै' धर्माभ्यासनिमित्तं कन्थको-जात्याश्वस्ततश्च कन्थकमिव कन्थकं, किमुक्तं भवति ?-दुष्टाश्वोऽपि निग्रहणयोग्यः कन्थकप्राय एवेति सूत्रचतुष्टयार्थः ॥ केशिराह-

मू.(१०५) *साहु गोयम! पन्ना ते, छिन्नो मे संसओ इमो ।*
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा! ॥

वृ. साधुसूत्रं तथैव। तथा 'पथपरिज्ञाते' त्यष्टमं द्वारमाश्रित्याह-

मू.(१०६) *कुप्पहा बहवे लोए, जेसिं नासंति जंतवो ।*
अद्धाणे कह वट्टंतो, तं न नाससि गोयमा! ? ॥

मू.(१०७) *जे अ मग्गेण गच्छंति जे अ उम्मग्गपट्ठिया ।*
ते सव्वे विइया मज्झं, तो न नस्सामहं मुनी! ॥

मू.(१०८) *अग्गे अ इति के वुत्ते ?, केसी गोयममब्बवी ।*
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥

मू.(१०९) *कुप्पवयणपासंडी, सव्वे उम्मग्गपट्ठिया ।*
सम्मग्गं तु जिनक्खायं, एस मग्गे हि उत्तमे ॥

वृ. सूत्राणि चत्वारि। कुत्सिताः पथाः कुपथाः-अशोभनमार्गाः 'बहवः' अनेके 'लोके' जगति 'यैः' कुपथैः 'नश्यन्ति' सन्मार्गाद्भश्यन्ति 'जन्तवः' प्राणिनः, ततश्चाध्वनि प्रस्तावात्सन्मार्गे 'कह'न्ति कथं वर्त्तमानस्त्वं न 'नश्यसि ?' सत्पथाच्यवसे ? हे गौतम !। गौतम आह-'ये' केचित् 'मार्गेणे'ति सन्मार्गेण 'गच्छन्ति' यान्ति ये च 'उन्मार्गप्रस्थिताः' उत्पथ-प्रवृत्ताः, ते 'सर्वे' निरवशेषा विदिताः-प्रतीता मम, न चैते पथापथपरिज्ञामन्तरेण सम्यग् ज्ञायन्त इति सैवानेन भङ्गयन्तरेणोक्ता, विचित्रत्वाच्च ऋषीणां सूत्रकृतेरेवमभिधानं, ततश्च

'तत' इति पथापथपरिज्ञातो न नश्याम्यहं मुने ! ये हि स्वयं कुपथसत्पथस्वरूपानभिज्ञा भवन्ति ते बहुतरकुपथदर्शनासेप्वेव सुपथभ्रान्त्या नश्येयुः, अहं तु न तथेति कथं बहुतरकुपथदर्शनेऽपि नश्येयमिति भावः ? ।

'मग्गे'त्यादि (सूत्रं) सुगमं, नवरं मार्गः-सन्मार्गः कः ?, उपलक्षणत्वात्कुमार्गाश्च के ?, कुप्रवचनेषु-कपिलादिप्ररूपितकुत्सितदर्शनेषु पाषण्डिनो-व्रतिनः कुप्रवचनपाषण्डिनः सर्वे उन्मार्गप्रस्थिताः, बहुविधापायभाजनत्वात्तेषामिति भावः, अनेनापि भङ्ग्या कुप्रवचनानि कुपथा इत्युक्तं भवति, 'सन्मार्गं तु' प्रशस्तमार्गं पुनर्विद्यादिति शेषः 'जिनख्यातं' जिनप्रणीतं मार्गमिति प्रक्रमः, कुतः इत्याह-एष मार्गो 'ह्यी'ति यस्माद् 'उत्तमः' अन्यमार्गेभ्यः प्रधानः, तस्मादयमेव सन्मार्ग इत्यभिप्रायः, उत्तमत्वं चास्य प्रणेतृणां रागादिविकलत्वेनेति भावनीयमिति ।

मू. (११०) साहु गोयम ! पन्ना ते, छिन्नो मे संसओ इहो ।
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा ! ॥

वृ. साधुसूत्रं प्राग्वत् ! सम्प्रति 'महाश्रोतोनिवारणे'त्ति नवमद्वारमुररीकृत्याह-

मू. (१११) महाउदगवेगेणं, वुज्झमाणाण पाणिणं ।
सरणं गई पइट्ठं च, दीवं कं मन्नसी ? मुनी ॥

मू. (११२) अत्थि एगो महादीवो, वारीमज्झे महालओ ।
महाउदगवेगस्स, गई तत्थ न विज्जई ॥

मू. (११३) दीवे अ इइ के वुत्ते ?, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥

मू. (११४) जरामरणवेगेणं, वुज्झमाणाण पाणिणं ।
धम्मो दीवो पइट्ठा य, गई सरणमुत्तमं ॥

वृ. सूत्रचतुष्टयम्, महदुदकं यत्र तत् महोदकं प्रक्रमान्महाश्रोतस्तस्य वेगो-रयो महोदकवेगस्तेन 'उह्यमानानां' नीयमानानां 'पाणिणं'ति प्राणिनां 'शरणं' तन्निवारणक्षममत एव गम्यमानत्वाद् गतिं तत एव च प्रतीत्य-आश्रित्य तिष्ठन्त्यत्र दुःखाभिहताः प्राणिन इति प्रतिष्ठा, 'अन्यत्रापी'ति(वा०) वचनाद् तां च द्वीपं कं मन्यसे ? मुने ! नास्त्येव कश्चन तादृशो द्वीप इति प्रश्नयितुराशयः । गौतम आह अस्ति-विद्यते एको महांश्चासौ प्रशस्यतया द्वीपश्च महाद्वीपः, क्व ?-'वारिमध्ये' जलस्यान्तः समुद्रान्तर्वर्त्यन्तरद्वीप इत्यर्थः ।

कीदृश् ?-'महालओ'त्ति महान्-उच्चैस्त्वेन विस्तीर्णतया च अत एव महोदकवेगस्यक्षुभितपातालकलशवातेरितप्रवृद्धजलमहाश्रोतोवेगस्य 'गतिः' गमनं 'तत्रे'ति महाद्वीपे न विद्यते। 'दीवे' इत्यादि, गतार्थं। जरामरणे एव च निरन्तरप्रवाहप्रवृत्ततया वेगः प्रक्रमादुदकमहाश्रोतसो जरामरणवेगस्तेनोह्यमानानामपरापरपर्यायमयनेन 'प्राणिनां' जीवानां 'धर्मः' श्रुतधर्मादिः द्वीप इव द्वीप उक्त इति प्रक्रमः, स ही भवोदधिमध्यवर्ती मुक्तिपदनिबन्धनतया न जरामरणवेगेन गन्तुं शक्यत इति, तत्र तथाविधजरामरणाभावाद्, अत एव विवेकिनस्तमाश्रित्य तिष्ठन्तीति प्रतिष्ठा, तथा गतिः शरणं चोत्तमं प्राग्वत् ।

इहापि द्वीपमात्रप्रश्नाभिधानेऽपि शेषाभिधानं प्रक्रमोपलक्षणत्वात्तत्प्रश्नस्येति भावनीयमिति

सूत्रचतुष्टयार्थः ॥

मू.(११५) साहु गोयम ! पन्ना ते, छिन्नो मे संसओ इहो ।
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा ! ॥

वृ. साहुसूत्रमुक्तार्थम्। इदानीं संसारपारगमनाख्यं दशमद्वारमाश्रित्याह-

मू.(११६) अन्नवंसि महोहंसि, नावा विपरिधावई ।
जंसि गोयममारूढो, कहं पारं गमिस्ससी ? ॥

मू.(११७) जा उ अस्साविणी नावा, न सा पारस्स गामिणी ।
जा निरस्साविणी नावा, सा उ पारस्स गामिणी ॥

मू.(११८) नावा अ इइ का वुत्ता ?, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥

मू.(११९) सरीरमाहु नावत्ति, जीवो वुच्चइ नाविओ ।
संसारो अन्नवो वुत्तो, जं तरंति महेसिणो ॥

वृ. सूत्रचतुष्टयं, 'अन्नवंसि महोहंसि'त्ति, 'अर्णवे' समुद्रे 'महौघे' बृहज्जलप्रवाहे 'नावा विपरिधावई'त्ति 'नौः' द्रोणी 'विपरिधावति' विशेषेण समन्ताद्गच्छति, 'यां' नावम् 'असि' भवसि, [illegible] 'जः' घटितत्वप्रश्नेति गम्यते, ततः 'कथं' केन प्रकारेण 'पारं' पर्यन्तं प्रक्रमादर्णवस्य 'गमिष्यसि ?' यास्यसि ?, न कथञ्चिदिति प्रष्टुराशयः। गौतम आह-'जा उ'त्ति या 'तुः' पूरणे आश्राविनी-जलसंग्राहिणी पाठान्तरतः साश्राविनी वा-सहाश्राविभिः-जलप्रवेशान्तिवर्तैः प्रक्रमात्सन्धिभिर्वर्त्तत इतिकृत्वा 'नौः' द्रोणी न सा 'पारस्य' प्रस्तावात्समुद्रपर्यन्तस्य 'गामिनी' अवश्ययायिनी, 'जा निरस्साविनी'त्ति उत्तरत्र तुशब्दस्य भिन्नक्रमत्वाद् या पुनर्निष्क्रान्ता आश्राविभ्यः प्राग्वत् सन्धिभ्यो निराश्राविनी नौः सा 'पारस्य' उक्तरूपस्य 'गामिनी' अवश्यं पारप्रापिका, ततोऽहं निराश्राविनीमारूढ उपायतः पारगाम्येव भविष्यामीति भावः।

'नावे'त्यादि प्रतीतार्थं, नवरं नावस्तरणत्वात्तरिता तार्यं च पृष्टमेवात एवोत्तरमाह-शरीरम् 'आहुः' ब्रुवते नौरिति, तस्यैव सम्यग्दर्शनादि त्रयानुष्ठानहेतुतया, भवोदधिनिस्तारकत्वाज्जीवः 'उच्यते' प्रतिपाद्यते तीर्थकृद्भिरिति शेषो नाविकः, स ह्युक्तरूपया नावा भवोदधितरतीति, संसारः 'अर्णवः' समुद्र उक्तः, तस्यैव तत्त्वतस्तार्यत्वात्, 'यं' संसारमर्णवप्रायं तरन्ति 'महेसिणो'त्ति प्राग्वन्महदेषिणो महर्षयो वा, तदा च तथाविधमहर्षीणां प्रत्यक्षत्वात् श्रोतृप्रतीत्यर्थमेतदिति सूत्रचतुष्टयार्थः ॥

मू.(१२०) साहु गोयम ! पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा ।

वृ. साहुसूत्रं प्राग्वत्। अधुना 'तमसश्च विघाटने' त्येकादशद्वारमधिकृत्याह-

मू.(१२१) अंधयारे तमे घोरे, चिट्ठंति पाणिणो बहू ।
को करिस्सइ उज्जोयं ?, सव्वलोगंमि पाणिणं ॥

मू.(१२२) उग्गओ विमलो भानू, सव्वलोगपभंकरो ।

सो करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥

मू. (१२३) भानू अ इति के वुत्ते ?, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥

मू. (१२४) उग्गओ खीणसंसारो, सव्वन्नू जिनभक्खरो ।
सो करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥

वृ. सूत्रचतुष्टयं, अन्धमिवान्धं चक्षुःप्रवृत्तिनिवर्त्तकत्वेनार्थात् जनं करोतीत्यन्धकारस्तस्मिन् 'तमसि' प्रतीते 'घोरे' भयानके तिष्ठन्ति प्राणीनो बहवः, कः करिष्यत्युद्द्योतं 'सर्वलोके' समस्तजगति प्राणिनां ?, न कञ्चित्तादृशं निर्द्धारयाम इति भावः ।

गौतम आह 'उद्गतः' उदितः 'विमलः' निर्मलः 'भानुः' आदित्यः 'सव्वलोगपहंकरे'त्ति सर्वलोकप्रभाकरः-सकलजगत्प्रकाशविधाता, 'भाणू य'त्ति भानुः क उक्तो य उद्योतं करिष्यतीतिप्रक्रमः, 'उद्गतः' उदयं प्राप्तः 'क्षीणसंसारः' अपगतभवभ्रमणः सर्वज्ञः 'जिनभास्करः' अर्हदादित्यः 'उद्द्योतं' समस्तवस्तुप्रकाशनं, तच्च तमोविघट्टनादेवेति तदेवानेन भङ्ग्योक्तं, शेषं स्पष्टमिति सूत्रचतुष्टयार्थः ॥

मू. (१२५) साहु गोयम ! पन्ना ते, छिन्नो मे संसओ इमो ।
अन्नोऽवि संसओ मज्झं, तं मे कहसु गोयमा ।

वृ. साधुसूत्रं तथैव । स्थानमेवोपसंपद्यते-प्राप्यत इति स्थानोपसम्पत्-प्राप्यं स्थानमिति द्वादशं द्वारमङ्गीकृत्याह-

मू. (१२६) सारीरमानसे दुक्खे, बज्झमानान पाणिणं ।
खेमं सिवं अनाबाहं, ठाणं किं मन्नसी ? मुनी ! ॥

मू. (१२७) अत्थि एगं धुवं ठाणं, लोगग्गंमि दुरारुहं ।
जत्थ नत्थि जरा मच्चू, वाहिणो वेयणा तहा ॥

मू. (१२८) ठाणे अ इइ के वुत्ते ?, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥

मू. (१२९) निव्वाणंति, अबाहंति, सिद्धी लोगग्गमेव य ।
खेम सिवं अनाबाहं, जं तरंति महेसिणो ॥

मू. (१३०) तं ठाणं सासयंवासं, लोगग्गंमि दुरारुहं, ।
जं संपत्ता न सोयंति, भवोहंतकरा मुनी ! ॥

वृ. सूत्राणी पञ्च प्रतीतान्येव, नवरं 'सारीरमानसे दुक्खे'त्ति आर्षत्वाच्छरीरमानसैर्दुःखैः 'बज्झमानानं' बाध्यमानानां पीड्यमानानां, पठ्यते च--'पच्चमानानं'ति पच्यमानानामिव पच्यमानानामत्याकुलीक्रियमानतया 'प्राणिनां' जीवानां क्षेमं व्याधिरहिततया शिवं सर्वोपद्रवाभावतः अनाबाधं स्वाभाविकबाधापगमतस्तिष्ठन्त्यस्मिआह-अस्ति 'एकम्' अद्वितीयं 'दुरारुहं'ति दुःखेनारुह्यते-अध्यास्यत इति दुरारोहं, दुरापेणैव सम्यग्दर्शनादित्रयेण तदवाप्यत इतिकृत्वा, वेदनाश्चेह शारीरमानसदुःखानुभवात्मिकाः, ततश्चास्य व्याध्यभावेन क्षेमत्वं जरामरणाभावेन शिवत्वं, वेदनाऽभावेनानाबाधकत्वमुक्तमिति यथायोगं भावनीयं, स्थानं किमुक्तं ?- ध्रुवादि-

विशेषेण विशिष्टमिति प्रक्रमः, निर्वान्ति-कर्मानलविध्यापनाच्छीतीभवन्त्यस्मिन् जन्तव इति निर्वाणं, इतिशब्दः स्वरूपपरामर्शको, यत्रापि नास्ति तत्राप्यध्याहर्त्तव्यः, तत उच्यत इत्यध्याहृत्य निर्वाणमितिशब्देन यदुच्यत इत्यादिभावना विधेया, 'अबाह'न्ति अविद्यमानशारीरमानसपी डमिति प्राग्वत्।

सिद्ध्यति-निष्ठितार्था भवन्त्यस्यां जन्तव इति सिद्धिः 'लोकाग्रं' सर्वजगदुपरिवर्त्ति 'एवे'ति परणे 'चः' समुच्चये क्षेमं शिवमनाबाधमिति च प्राग्वत्, तथा यत् 'तरन्ति' प्लवन्ते गच्छन्तीत्यर्थः, तत्स्थानमुक्तमिति प्रक्रमः, सविशेषणस्य पृष्टत्वात्तदेव विशिनष्टि-'सासयंवासं'ति बिन्दोरलाक्षणिकत्वात् 'शाश्वतवासं' नित्यावस्थिति ध्रुवमितियावत्, लोकाग्रे दुरारोहपुमलक्षण त्वाज्जराद्यभाववत्, प्रसङ्गतस्तन्माहात्म्यमाह-यत्संप्राप्ता न शोचन्ते, कीदृशाः सन्त इत्याह-भवा-नारकादयस्तेषामोघः-पुनः पुनर्भवरूपप्रवाहस्तस्यान्तकराः-पर्यन्तविधायिनो भवौ - घान्तकराः 'मुनि'त्ति मुनय इति सूत्रपञ्चकार्थः ॥

मू. (१३१) *साहु गोयम! पन्ना ते, छिन्नो मे संसओ इमो।*
नमो ते संसयाईय!, सव्वसुत्तमहोयही॥

वृ. नवरं नमोऽस्त्विति शेषः 'ते' तुभ्यमिति 'संशयातीत!' सन्देहातिक्रान्त! सर्वसूत्राणां महोदधिरिव महोदधिः सामास्त्येन तदाधारतया तत्संबोधनं सर्वसूत्रमहोदधे!, अनेनोपबृंहणागर्भं स्तवनमाह। प्रश्नोपसंहारमाह निर्युक्तिकृत्- 'एवं बारससु क्कमो'त्ति, एवमित्युक्तरूपो द्वादशसु प्रतिपादितप्रश्नेषु 'प्रक्रमः' परिपाटी, किमुक्तं भवति? अनेनैव क्रमेणामी केशिना कृताः, तथाहि-धर्मार्थत्वात्सर्वानुष्ठानस्य शिक्षाव्रतरूपत्वाच्चास्य प्रथमतस्तेषां प्रश्नः, ततो लिङ्ग-पाल्यान्येतानीति लिङ्गस्य, सत्यपि च लिङ्गे नात्मादिशत्रुजयं विनाऽसौ सुखेन पालयितुं शक्यत इति शत्रुजयस्य, तेष्वपि कषायः एवोत्कटास्तदात्मकौ च रागद्वेषाविति पाशावकर्तनस्य, तत्रापि लोभ एव दुरन्त इति ततोच्छेदस्य, तदुच्छेदोऽपि न कषायनिर्वापणं विनेत्यग्निनिर्वापणस्य, तद्विध्यापनमपि न मनस्यनिगृहीत इति दुष्टाश्वनिग्रहस्य तन्निग्रहेऽपि च न सम्यक्पथपरिज्ञानं विनाऽभिमतपदप्राप्तिरिति तस्य सम्यक्पथश्च जिनप्रणीतधर्म एवेति तस्यैव सन्मार्गत्वख्यापनाय महाश्रोतोनिवारणस्य ततस्तत्रैव दार्ढ्योत्पादनार्थं संसारपारगमनस्य अथ यद्ययमेव सन्मार्ग-स्तत्किमित्यन्येऽपि न वदन्तीत्याशङ्क्यान्येषामज्ञत्वख्यापनार्थं तमोविघटनस्य, एवमपि किमनेन सन्मार्गेण स्थानमवाप्यमित्याशङ्कासम्भवे स्थानोपसम्पद इति गाथापदतात्पर्यार्थः ॥

पुनस्तद्वक्तव्यतामेव सूत्रकृदाह-

मू. (१३२) *एवं तु संसए छिन्ने, केसी घोरपरक्कमे।*
अभिवंदित्ता सिरसा, गोयमं तु महायसं॥

मू. (१३३) *पंचमहव्वयं धम्मं, पडिवज्जइ भावओ।*
पुरिमस्स पच्छिमंमी, मग्गे तत्थ सुहावहे॥

वृ. 'एवं तु'त्ति अमुनैव प्रकारेण 'संशये' उक्तरूपे 'छिन्ने' अपनीते, उभयत्र जातावेकवचनं, शेषं स्पष्टं, नवरं 'भावतः' इत्यभिप्रायतः, पूर्वं हि चतुर्याम एव धर्मः प्रतिपत्तव्य इत्यभिप्राय आसीत्, अधुना तु पञ्चयाम इति, क्व पुनरयं पञ्चयामो धर्म इत्याह-'पुरिमस्स'त्ति पूर्वस्य,

कोऽर्थः ?- आद्यस्य सोपस्कारत्वात्सूत्रस्य तीर्थकृतोऽभिमते 'पश्चिमे' पश्चिमतीर्थकृत्सम्बन्धितया 'मार्गे' पथि 'तत्रे'ति प्रक्रान्ते तत्र वा तिन्दुकोद्याने 'शुभावहे' कल्याणप्रापके मार्गस्य विशेषणमिति सूत्रद्वयार्थः ॥

सम्प्रत्यध्ययनार्थोपसंहारव्याजेन महापुरुषसङ्कीर्तनफलमाह-

मू.(१३४) केसीगोअमओ निच्चं, तंमि आसि समागमे ।
सुयसीलसमुक्करिसो, महत्थत्थविनिच्छओ ॥

वृ. 'केसिगौतमत' इति केशिगौतमावाश्रित्य 'नित्यं' सदा तत्पुर्यवस्थानापेक्षया 'तस्मिन्' प्रक्रान्तस्थाने आसीत् 'समागमे' मीलके, किमासीदित्याह- श्रुतं- श्रुतज्ञानं शीलं- चारित्रं तयोः समुत्कर्षः- प्रकर्षः श्रुतशीलसमुत्कर्षः, तथा महार्था- महाप्रयोजना मुक्तिसाधकत्वेन येऽर्थाः- शिक्षाव्रतादयस्तेषां विनिश्चयो- विशिष्टो निर्णयो महार्थार्थविनिश्चयः, तच्छ्रव्याणामिति गम्यते, 'केसि'त्ति सुब्लोपात्केशेवां गौतमतः गौतमगणधरापेक्षयाऽपकर्षवत् श्रुतादिमत्त्वादित्थमुक्तम्, इदं तु क्वचिद् दृष्टमिति व्याख्यातमिति सूत्रार्थः ॥ शेषपर्षदो यदभूत्तदाह-

मू.(१३५-१) तोसिआ परिसा सव्वा, सम्मग्गं समुवट्ठिया ।

वृ. 'तोषिता' परितोषं नीता 'परिषत्' सदेवमनुजासुरा सभा 'सर्वा' निरवशेषा 'सन्मार्गं' मुक्तिपथमनुष्ठातुमिति गम्यते, 'समुपस्थिता' पाठान्तरतः 'पर्युपस्थिता' वा उभयत्रोद्यता, अनेकाक्वा पर्षदफलमाह ॥ इत्थं सद्भूतगुणगर्भसच्चरित्रवर्णनद्वारेण तयोः स्तवनमुक्त्वा प्रणिधानमाह-

मू.(१३५-२) संथुआ ते पसीयंतु, भयवं केसी गोयमु ॥ तिबेमि ।

वृ. संथुएत्युत्तरार्द्धं । 'संस्तुतौ' सम्यगभिवन्दितौ 'तौ' उक्तरूपौ 'प्रसीदतां' प्रसादपरौ भवतां भगवत्केशिगौतमाविति सूत्रार्थः ।

'इति' परिसमाप्तौ, ब्रवमीति पूर्ववत् । उक्तोऽनुगमः, सम्प्रति नयास्तेऽपि प्राग्वत् ॥

अध्ययनं - २३- समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे त्रयोविंशतितमध्ययनं भद्रबाहुसूरिरचिता निर्युक्तिः एवं शान्त्याचार्यरचिता टीका परिसमाप्ता

अध्ययनं-२४-प्रवचनमाता

वृ. व्याख्यातं त्रयोविंशतमध्ययनं, सम्प्रति चतुर्विंशमारभ्यते, अस्य चायमभिसम्बन्धः- अनन्तराध्ययने परेषामपि चित्तविप्लुतिमुपलभ्य तदपनयनाय केशिगौतमवद्यतितव्यमित्युक्तम्, इह तु तदपनयनं सम्यग्वाग्योगत एव, स च प्रवचनमातृस्वरूपपरिज्ञानत इति तत्स्वरूपमुच्यत इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य चोपक्रमादिचतुरनुयोगद्वारचर्चा प्राग्वत्सुकरैव यावन्नामनिष्पन्ननिक्षेपे प्रवचनमातृ प्रवचनमातमिति वा द्विपदं नाम, तत्र तावत्प्रवचननिक्षेपाभिधानायाह निर्युक्तिकृत्-

नि.[४५९] निक्खेवु पवयणंमि(य) चउव्विहो दुविहो य होइ दव्वंमि ।
आगमनोआगमओ नोआगमो अ सो तिविहो ॥

नि.[४६०] जाणगसरीरभविए तव्वइरित्ते कुतित्थिमाईसु।
भावे दुवालसंगं गणिपिडगं होइ नायव्वं ॥

नि.[४६१] मायंमि उ निक्खेवो चउव्विहो दुविहो० ॥

नि.[४६२] जाणगसरीरभविए तव्वइरित्ते अ भायणे दव्वं।
भावंमि अ समिईओ मायं खलु पवयणं जत्थ ॥

वृ. निक्खेवेत्यादि गाथाद्वयं. निक्षेपः प्रस्तावे चतुर्विधो नामादिः, तत्र नामस्थापने क्षुण्णे एवेत्यनादृत्य द्रव्यनिक्षेपमाह-द्विविधो भवति 'दव्वे' विचार्ये, निक्षेप इति गम्यते, 'द्वैविध्यमेवाह-आगमतो नोआगमतः, तत्रागमतो ज्ञाता तत्र चानुपयोगवान्, नोआगमतस्तु स त्रिविधः। कथमित्याह-'जाणगसरीरभविए तव्वतिरित्ते य'त्ति, ज्ञशरीरभव्यशरीरे प्रक्रमात्प्रवचने तद्व्यतिरिक्तं 'कुतित्थिमाईसु'त्ति कुतीर्थ्यादिषु प्रवचनमादिशब्दात्सुतीर्थेषु च ऋषभादि-सम्बन्धिषु पुस्तकादिन्यस्तं भाव्यमाणं वा, भावे 'द्वादशाङ्गम्' आचारादिदृष्टिवादपर्यन्तं गणिनः-आचार्यास्तेषां पिटकमिव पिटकं-सर्वस्याऽऽधारो गणिपिटकं 'भवति' ज्ञातव्यं प्रवचनं, नन्येवं दृष्टिवादान्तर्गतत्वात्सकलकुदृष्टीनामपि भावप्रवचनतैव प्राप्ता ?, उच्यते, अस्त्येतत्, किन्त्वेक-पक्षावधारणपरतयाऽसद्दृष्टित्वाद्द्रव्यप्रवचनतैवाऽऽसामिति नोक्तदोषापत्तिः ॥

मातशब्दं निक्षेषुमाह-'माते' मातशब्दे 'तुः' पूरणे निक्षेपश्चतुर्विधो-नामादिः, द्विविधो भवति द्रव्ये-आगमनोआगमतः, तत्रागमतस्तथैव, नोआगमतश्च स त्रिविधो-ज्ञशरीरभव्यशरीरे तद्व्यतिरिक्तं च 'भाजने' कांस्यप्रात्रादौ 'द्रव्यम्' मोदकादि, प्रस्तावाद्यत्र मातम्- अन्तः प्राप्ता-वस्थिति तद्द्रव्यं मातमुच्यते, भावे च 'समितयः' ईर्यासमित्यादयो माता अभिधीयन्ते 'मातम्' अन्तरवस्थितं 'खलु' निश्चितं 'प्रवचनं' द्वादशाङ्गं 'यत्र' इति यासु। तदेवं निर्युक्तिकृता मातशब्दो निक्षिप्तः, यदा तु माय'त्ति पदस्य मातर इति संस्कारस्तदा द्रव्यमातरो जनन्यो भावमातरस्तु समितयः, एताभ्यः प्रवचनप्रसवात्, उक्तं हि-"एया पवयणमाया दुवालसंगं पसूयातो"त्ति, सुज्ञानत्वाच्च एतन्निक्षेप उपेक्षित इति गाथाचतुष्टयार्थः ॥ सम्प्रति नामान्वर्थमाह-

नि.[४६३] अट्ठसुवि समिईसु अ दुवालसंगं समोअरइ जम्हा।
तम्हा पवयणमायाअज्झयणं होइ नायव्वं ॥

वृ. 'अष्टास्वपि' अष्टसङ्ख्यास्वपि समितिषु 'द्वादशाङ्गं' प्रवचनं समवतरति-संभवति यस्मात्, ताश्चेहाभिधीयन्त इति गम्यते, तस्मात्प्रवचनमाता प्रवचनमातरो वोपचारत इदमध्ययनं 'भवति' ज्ञातव्यमिति गाथार्थः ॥ गतो नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रालापकनिष्पन्न-निक्षेपावसरः, स च सूत्रे सति भवतीति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू.(९३६) *अट्ठप्पवयणमायाओ, समिई गुत्ती तहेव य।*
पंचेव य समिईओ, तओ गुत्तीउ आहिया ॥

मू.(९३७) *इरियाभासेसणादाने, उच्चारे समिई इय।*
मणगुत्ती, वयगुत्ती, कायगुत्ती उ अट्ठमा ॥

मू.(९३८) *एयाओ अट्ठ समिईओ, समासेन वियाहिया।*
दुवालसंगं जिनक्खायं, मायं जत्थ उ पवयणं ॥

वृ. सूत्रत्रयं प्रकटार्थमेव, नवरं 'समिति'त्ति समितय:, 'गुप्ति'त्ति गुप्तय:, तत्र च समिति:-सम्यक्-सर्वचित्प्रवचनानुसारितया इति:-आत्मन: चेष्टा समिति: तान्त्रिकी सञ्ज्ञा ईर्यादिचेष्टासु पञ्चसु, गोपनं गुप्ति:-सम्यग्योगनिग्रह: तथैव चेति समुच्चये, उक्तं हि-'सम्यग्योगनिग्रहो गुप्ति'रिति भवन्त्येता: प्रवचनमाता:, अष्टसङ्ख्यत्वं तु कथमासामिति संशये समितिना पञ्चत्वं गुप्तीना च त्रिकत्वमुक्तम् 'आहिया' इति आख्याता:-कथिता:, तीर्थकृदादिभिरिति गम्यते, ता एव नामग्राहमाह-ईरणमीर्या-गतिपरिणामो भाषणं तं करोतीति निक् ततः स्त्रीलिङ्गे भावे युटि एषणा आदानं-ग्रहणं प्रातादे: निक्षेपेपलक्षणमेतत् तत एषां समाहारे ईर्याभाषैषणादानं तस्मिन्, 'उच्चारे समिई इय'त्ति चास्य भिन्नक्रमत्वादुच्चारशब्दस्य चोपलक्षणत्वादुच्चारादिप-रिष्ठापनायां च समिति:, अस्य च प्रत्येकमभिसम्बन्धादीर्यासमितिरित्यादिरभिलापो विधेय:, 'इति' परिसमाप्तौ, एतावत्य एव समितय:, तथा मनसो गुप्तिर्मनोगुप्तिरिति तत्पुरुष:, एवमुत्तरयोरपि, निगमनमाह-

'एता:' इत्यनन्तरोक्ताभिधाना अष्ट समितयो, गुप्तीनामपि 'प्रवचनविधिना मार्गव्य-वस्थापनमुन्मार्गगमननिवारणं गुप्ति'रिति वचनात्कञ्चित्सच्चेष्टात्मकत्वात्समितिशब्दवाच्यत्व-मस्तीत्येवमुपन्यास:, यत्तु भेदेनोपादानं तत्समितिनां प्रवीचाररूपत्वेन गुप्तीनां प्रवीचार-प्रवीचारात्मकत्वेनान्योऽन्यं कथञ्चिद्भेदात्, तथा चागम:-

"समिओ नियमा गुत्तो गुत्तो समियत्तणं भइयव्वो।
कुसलवइमुदीरंतो जं वइगुत्तोऽवि समिओऽवि॥"

'समासेन' सकलागमसंग्रहेण व्याख्याता:, जिनाख्यातं मातम् उत्तरत्र तुशब्दस्यैवकारार्थस्य भिन्नक्रमत्वात् 'मातमेव' अन्तर्भूतमेव 'यत्र' इति यासु 'प्रवचनम्' आगम:, तथाहि-ईर्यासमितौ प्राणातिपातविरमणव्रतमवतरति, तद्वृत्तिकल्पनानि च शेषव्रतानि तत्रैवान्तर्भावमुपयान्ति, तेषु च न तदस्ति यत्र समवतरति, यत उक्तम्-

"पढमंमि सव्वजीवा बीए चरिमे य सव्वदव्वाइं।
सेसा महव्वया खलु तदेक्कदेसेण नायव्वा॥"

इत्यर्थत: सर्वमपि प्रवचनमिह मातमुच्यते, भाषासमितिस्तु सावद्यवचनपरिहारतो निरवद्यवचोभाषणात्मिका तया च वचनपर्याय: सकलोऽप्याक्षिप्त एव, न च तद्बहिर्भूतं द्वादशाङ्ग-मस्ति, एवमेषणासमित्यादिष्वपि स्वधिया भावनीयं, यद्वा सर्वा अप्यमूश्चारित्ररूपा:, ज्ञानदर्शना-विनाभावि च चारित्रं, न चैतत्रयातिरिक्तमन्यदर्थतो द्वादशाङ्गमिति सर्वास्वप्येतासु प्रवचनं मातमुच्यते, अन्यथा वाऽऽगमाविरोधेनाभिधेयमिति सूत्रत्रयार्थ:॥ तत्रेर्यासमितिस्वरूपमाह-

मू.(१३९) *आलंबनेनं कालेणं, मग्गेण जयणाइ य।*
चउकारणपरिसुद्धं, संजए इरियं रिए॥

मू.(१४०) *तत्थ आलंबणं नाणं, दंसणं चरणं तहा।*
काले य दिवसे वुत्ते, मग्गे उप्पहवज्जिए॥

मू.(१४१) *दव्वओ खित्तओ चेव, कालओ भावओ तहा।*
जयणा चउव्विहा वुत्ता, तं मे कित्तयओ सुण॥

मू. (१४२) *दव्वओ चक्खुसा पेहे, जुगमित्तं च खित्तओ।*
कालओ जाव रीइज्जा, उवउत्तो य भावओ॥

मू. (१४३) *इंदियत्थे विवज्जित्ता, सज्झायं चेव पंचहा।*
तम्मुत्ती तप्पुरक्कारे, उवउत्ते रियं रिए॥

वृ. आलम्बनेन कालेन मार्गेण यतनया च चतुष्कारणैः -एभिरेवालम्बनादिभिः परिशुद्धा-निर्दोषा चतुष्कारणपरिशुद्धा तां 'संयतः' यतिः 'इर्यां' गतिं 'रिये'त्ति रीयेत अनुष्ठानविषयतया प्राप्नुयात्, यद्वा सुव्यत्ययाच्चतुष्कारणपरिशुद्धया ईर्यया 'रीयेत' गच्छेत्। आलम्बनादीन्येव व्याख्यातुमाह-'तत्र' तेष्वालम्बनादिषु मध्ये आलम्बनं यदालम्ब्य गमनमनुज्ञायते, निरालम्बनस्य हि नानुज्ञातमेव गमनं, तत्किमित्याह-'ज्ञानं' सूत्रार्थोभयात्मकागमरूपं 'दर्शनं' दर्शनप्रयोजनं (शास्त्रं) 'चरणं' चारित्रं, तथाशब्दोऽनुक्तसमुच्चयार्थः, तेन द्विकादिसंयोगसूचकः, ततोऽयमर्थः-प्रत्येकं ज्ञानादीन्याश्रित्य द्विकादिसंयोगतो वा गमनमनुज्ञातम्, आलम्बनेनेति व्याख्यातं. कालेनेति व्याचष्टे-कालश्च प्रस्तावादीर्यायां दिवस उक्तः, तीर्थकृदादिभिरिति गम्यते, रात्रौ ह्यचक्षुर्विषयत्वेन पुष्टतरालम्बनं विना नानुज्ञातमेव गमनं, मार्गेणेति द्वारं व्याख्यातुमाह-मार्ग इम सामान्येन पन्थाः स उत्पथेन-उन्मार्गेण वर्जितो-रहित उत्पथवर्जित उक्त इति सम्बन्धः, उत्पथे हि व्रजत आत्मसंयमविराधनादयो दोषाः।

यतनेति द्वारपूर्वमाह-'दव्वतो' इत्यादि, सुगममेव, नवरं 'ताम्' इति चतुर्विधयतनां मे 'कीर्तयतः' सम्यक्स्वरूपाभिधानद्वारेण संशब्दयतः 'शृणु' आकर्णय शिष्येति गम्यते। यथाप्रतिज्ञामेवाह-'द्रव्यतः' इति जीवादिकं द्रव्यमाश्रित्येयं यतना-यत् 'चक्षुषा' दृष्ट्या 'प्रेक्षेत' अवलोकयेत्, प्रक्रमाज्जीवादिकं द्रव्यम्, अवलोक्य च संयमात्मविराधनापरिहारेण गच्छेदिति भावः, 'युगमात्रं च' चतुर्हस्तप्रमाणं प्रस्तावात्क्षेत्रं प्रेक्षेत, इयं क्षेत्रतो यतना, कालतो यतना यावत् 'रीयिज्ज'त्ति रीयते यावन्तं कालं पर्यटन्ति तावत्कालमानेति गम्यते, उपयुक्तश्च भावतो दत्तावधानो यद्रीयते, इयं भावमङ्गीकृत्य यतना।

उपयुक्ततत्वमेव स्पष्टयितुमाह-'इन्द्रियार्थान्' शब्दादीन् 'विवर्ज्य' तदनभ्यवसानतः परिहृत्य, स्वाध्यायं चैव 'चः' समुच्चये एवकारोऽपिशब्दार्थः, ततोऽयमर्थः-न केवलमिन्द्रियार्थान् विवर्ज्य किन्तु स्वाध्यायं चापि 'पञ्चधे'ति वाचनादिभेदतः पञ्चप्रकारं, गत्युपयोगोपघातित्वात्, ततश्च तस्यामेवेर्यायां मूर्त्तिः-शरीरमर्थाद्व्याप्रियमाणा यस्यासौ तन्मूर्त्तिः, तथा तामेव पुरस्करोति-तत्रैवोपयुक्ततया प्राधान्येनाङ्गीकुरुत इति तत्पुरस्कारः, अनेन कायमनसोस्तत्परतोक्ता, वचसो हि तत्र व्यापार एव न समस्ति, एवमुपयुक्तः सन्नीर्यां रीयेत यतिरिति शेषः, सर्वत्र च संयमात्मविराधनैव विपक्षे दोष इति सूत्रपञ्चकार्थः॥ सम्प्रति भाषासमितिमाह-

मू. (१४४) *कोहे माने य माया य, लोभे य उवउत्तया।*
हासे भय मोहरिए, विगहासु तहेव य॥

मू. (१४५) *एयाइं अट्ठ ठाणाइं, परिवज्जित्तु संजओ।*
असावज्जं मियं काले, भासं भासिज्ज पन्नवं॥

वृ. क्रोधे माने च मायायां लोभे च 'उपयुक्तता' क्रोधाद्युपयोगपरता तदेका यतनेतियावत्,

हासे 'भय'त्ति भये मौखर्ये विकथासु तथोपयुक्तरीति सम्बन्धः, तत्र क्रोधे यथा कश्चिदतिकुपितः पिता प्राह-न त्वं मम पुत्रः, पार्श्ववर्त्तिनो वा प्रति प्राह-बन्धीत बन्धीतैनमित्यादि, माने यथा कश्चिदभिगानाभ्मातचेता न कश्चिन्मम जात्यादिभस्तुल्य इति वक्ति, मायायां यथा परव्यसनार्थमपरिचितस्थानवर्त्ती सुतादौ भणति-नायं मम पुत्रो न चाहमस्य पितेत्यादि, लोभे यथा कश्चिद्वणिक् परकीयमपि भाण्डादिकमात्मीयमभिधत्ते, हास्ये यथा केलीकिलतया कश्चन तथाविधं कुलीनमप्यकुलीनमित्युल्लपति, भये यथा तथाविधमकार्यमाचर्य स त्वं येन तत्तदाचरितमिति पृष्टः प्राह-नाहं तदाऽस्मिन् देशे एवाभूवमित्यादि, मौखर्ये यथा मुखरतया यत्तत्परपरिवादादि वदन्नास्ते, 'विकथासु' स्त्र्यादिकथासु-'अहो!' कटाक्षविक्षेपास्तस्याः' इत्यादिकमाह, पठ्यते च-

"कोहे य माने य माया य लोभे य तेहव य।
हासभयमोहरीए, विकहा य तहेव य॥"

गतार्थमेव। 'एतानि' अनन्तरमुक्तरूपाण्यष्टौ स्थानानि 'परिवर्ज्य' परिहत्य संयतः किमित्याह-'असावद्यां' निर्दोषां तामपि 'मितां' स्तोकां यावत्युपयुज्यते तावतीमेव 'काले' प्रस्त्वे 'भाषां' वाचं 'भाषेत' वदेत् प्रज्ञा-बुद्धिस्तद्वानिति सूत्रद्वयार्थः॥ एषणासमितिमाह-

मू.(१४६) *गवेसणाए गहणे य, परिभोगेसणा य जा।*
आहारोवहिसिज्जाए, एए तिन्नि विसोहए॥

मू.(१४७) *उग्गमुप्पायणं पढमे, बीए सोहिज्ज एसणं।*
परिभोगंमि चउक्कं, विसोहिज्ज जयं जई॥

वृ. 'गवेषणायाम्' अन्वेषणायां 'ग्रहणे च' स्वीकारे, उभयत्र प्राकृतत्वादेषणेति सम्बध्यते, ततो गवेषणायामेषणा ग्रहणे चैषणा, परिभोग-आसेवनं तद्विषयैषणा परिभोगैषणा च या, 'आहारोवहिसेज्जाए'त्ति वचनव्यत्ययाद् 'आहारोपधिशय्यासु' प्रतीतासु 'एताः' उक्तरूपा एषणाः सूत्रत्वालिङ्गव्यत्ययात्तिस्रः 'विशोधयेत्' निर्दोषा विदध्यात्, पठ्यते च-

"गवेसणाए गहणेणं, परिभोगेसणाणि य।
आहरमुवहिं सेज्जं, एए तिन्नि विसोहिय॥"त्ति,

अस्य च गवेषणादिभिराहारादीनि त्रीणि विशोधयेदिति सङ्क्षेपार्थः। कथं विशोधयेदित्याह-उद्गमश्चोत्पादना चोद्गमोत्पादनमिति समाहारः, तत्किमित्याह-विशोधयेदित्युत्तरेण सम्बन्धः, किमुक्तं भवति?-आधाकर्मादिदोषपरिहारत उद्गमं धात्र्यादिदोषपरित्यागतश्चोत्पादनां शुद्धामादधीत 'पढमे'त्ति प्रथमायां गवेषणैषणायां, 'बीय'त्ति द्वितीयायां ग्रहणैषणायां शोधयेच्छङ्कितादिदोषत्यागतः 'एषणां' ग्रहणकालभाविग्राह्यगतदोषान्वेषणात्मिकां, 'परिभोग' इति परिभोगैषणायां चतुष्कं पिण्डशय्यावस्त्रपात्रात्मकम्, उक्तं हि-पिंडं सेज्जं च वत्थं च, चउत्थं पायमेव य"त्ति, विशोधयेत्, इह चतुष्कशब्देन तद्विषय उपभोग उपलक्षितः, ततस्तं विशोधयेदिति, को ऽर्थः?-उद्गमादिदोषत्यागतः शुद्धमेव चतुष्कं परिभुञ्जीत, यदिवोद्गमादीनां दोषोपलक्षणत्वात् 'उग्गम'त्ति उद्गमदोषान् 'उप्पायणं'ति उत्पादनादोषान् 'एसण'त्ति एषणादोषान् विशोधयेत्, 'चतुष्कं च' संयोजनाप्रमाणाङ्गारधूमकारणात्मकम्, अङ्गार-

भूमयोर्मोहनीयान्तर्गतत्वेनैकतया विवक्षितत्वात् विसोधयतेत् उभयत्र शोधनमपनयनं, 'जयं'ति यतमानः 'यतिः' साधुः, व्याख्यातपूर्वोऽपि च पुनरुक्तया एव 'क्रियाफल' अभिधानमतिशयख्यापनार्थमिति सूत्रद्वयार्थः। इदानीमादाननिक्षेपणसमितिमाह-

मू.(९४८) ओहोवहोवग्गहियं, भंडयं दुविहं मुनी।
गिण्हंतो निक्खिवंतो य, पउंजिज्ज इमं विहिं॥

मू.(९४९) चक्खुसा पडिलेहित्ता, पमज्जिज्ज जयं जई।
आदिए निक्खिविज्जा वा, दुहओऽवि समिए सया॥

वृ. 'ओहोवहोवग्गहियं'ति उपधिशब्दो मध्यनिर्दिष्टत्वात् डमरुकगुणग्रन्थिवदुभयत्र सम्बध्यते, तत ओघोपधिमौपग्रहिकोपधिं च 'भाण्डकम्' उपकरणं रजोहरणदण्डकादि 'द्विविधम्' उक्तभेदतो द्विभेदं मुनिः 'गृह्णन्' आददानः 'निक्षिपंश्च' क्वचित्स्थापयन् 'प्रयुञ्जीत' व्यापारयेत् 'इमं' वक्ष्यमाणं 'विधिं' न्यायं।

तमेवाह-'चक्षुषा' दृष्ट्वा 'पडिलेहित्त'त्ति 'प्रत्युपेक्ष्य' अवलोक्य 'प्रमार्जयेत्' रजोहरणादिना विशोधयेत् यतमानो यतिस्ततः 'आदिए'त्ति 'आददीत' गृह्णीयात् 'निक्षिपेद्वा' स्थापयेत् 'दुहतोऽवि'त्ति द्वावपि प्रक्रमादौधिकोपग्राहिकोपधी, यदिवा 'द्विधाऽपि' द्रव्यतो भावतश्च 'समितः' प्रक्रमादादाननिक्षेपणासमितिमान् सन् 'सदा' सर्वकालमिति सूत्रद्वयार्थः॥

सम्प्रति परिष्ठापनासमितिमाह-

मू.(९५०) उच्चारं पासवणं, खेलं सिंघाण जल्लियं।
आहारं उवहिं देहं, अन्नं वावि तहाविहं॥

मू.(९५१) अनावायमसंलोए अनवाए चेव होइ संलोए।
आवायमसंलोए आवाए चेव संलोए॥

मू.(९५२) अनावायमसंलोए, परस्सऽनुवघाइए।
समे अज्झुसिरे वावि, अचिरकालकयंमि य॥

मू.(९५३) विच्छिन्ने दूरमोगाढे, नासन्ने बिलवज्जिए।
तसपाणबीयरहिए, उच्चाराईणि वोसिरे॥

वृ. 'उच्चारं' पुरीषं 'प्रश्रवणं' मूत्रं 'खेलं' मुखविनिर्गतं श्लेष्माणं 'सिंघाणं'ति नासिकानिष्क्रान्तं तमेव 'जल्लियं'ति आर्षत्वात् जल्लो-मलस्तम् 'आहारम्' अशनादिकम् 'उपधिं' वर्षाकल्पादि 'देहं' शरीरम् 'अन्यद्वा' कारणतो गृहीतं गोमयादि 'अपिः' पूरणे तथाविधं परिष्ठापनार्हं प्रक्रमात्स्थण्डिले व्युत्सृजेदित्युत्तरेण सम्बन्धः।

स्थण्डिलं च दशविशेषणपदविशिष्टमिति मनस्याधाय तद्गताखिलभङ्गोपलक्षणार्थमाद्यविशेषणषदयोर्भङ्गरचनामाह-अविद्यमान आपातः-स्वपरोभयपक्षसमीपागमनरूपोऽस्मिन्नित्यनापातं स्थण्डिलमिति गम्यते, 'असंलोए'त्ति सूत्रत्वादिहोत्तरत्र च लिङ्गव्यत्यये न विद्यते संलोको-दूरस्थितस्यापि स्वपक्षादेरालोको यस्मिंस्तत्तथेति प्रथमो भङ्ग १, 'अनापातं चैव भवति संलोकं' यत्रापातो नास्ति संलोकश्चास्तीति द्वितीयो भङ्गः २, 'आपातमसंलोक'मिति यत्रापातोऽस्ति न च संलोक इति तृतीयो भङ्गः ३, 'आपातं चैव संलोकं' यत्रोभयमपि संभवतीति

चतुर्थो भङ्गः ४, इह चापातसंलोकमिति च अर्शआदेराकृतिगणत्वान्मत्वर्थीयेऽपि द्रष्टव्यं काक्वा दशविशेषणपदज्ञानार्थं, तानि यादृशे स्थण्डिले व्युत्सृजेत्तदाह- अनापाते असंलोके, कस्य पुनरयमापातः संलोकश्चेत्याह-

'परस्य' स्वपक्षादेः, गमकत्वाच्चोभयत्र सापेक्षत्वेऽपि समासः, उपघातः-संयमात्मप्रवचनबाधात्मको विद्यते यत्र तदुपघातिकं न तथाऽनुपघातिकं तस्मिन्, तथा 'समे' निम्नोन्नतत्ववर्जिते 'अशुषिरे वाऽपि' तृणपर्णाद्यनाकीर्णे 'अचिरकालकृते च' दाहादिना स्वल्पकालनिर्वर्तिते, चिरकालकृते हि पुनः संमूर्छन्त्येव पृथ्वीकायादयः, 'विस्तीर्णे' जघन्यतोऽपि हस्तप्रमाणे 'दूरमवगाढे' जघन्यतोऽप्यर्धास्ताच्चतुरङ्गुलमचित्तीभूते 'नासन्ने' ग्रामादेर्दूरवर्तिनि 'बिलवर्जिते' मूषकादिरन्ध्ररहिते त्रसप्राणाश्च-द्वीन्द्रियादयो बीजानि च-शाल्यादीनि, सकलैकेन्द्रियोपलक्षणमेतत्, तैस्तत्रस्थैरागन्तुकैश्च रहितं-वर्जितं त्रसप्राणबीजरहितं तस्मिन्, स्थण्डिल इति शेषः, 'उच्चारादीनि' उक्तरूपाणि 'व्युत्सृजेत्' परिष्ठापयेत्। इह चोच्चारं प्रश्रवणमित्यादावुक्तेऽपि पुनरुच्चारादीनीत्यभिधानं विस्मरणशीलस्मरणार्थमदुष्टमेवेति सूत्रचतुष्टयार्थः ॥

सम्प्रत्युक्तमुपसंहरन् वक्ष्यमाणार्थसम्बन्धाभिधानायाह-

मू. (१५४) एयाओ पंच समिईओ, समासेण वियाहिया।
इत्तो उ तओ गुत्तीओ, वुच्छामि अनुपुव्वसो ॥

वृ. निगदसिद्धं, नवरम् 'एत्तो'त्ति अतश्च समितिप्रतिपादनानन्तरं 'तओ'त्ति तिस्रः 'अनुपुव्वसो'त्ति आर्षत्वादानुपूर्व्या क्रमेणेत्यर्थः ॥ तत्राद्यां मनोगुप्तिमाह-

मू. (१५५) सच्चा तहेव मोसा य, सच्चामोसा तहेव य।
चउत्थी असच्चमोसा य, मनगुत्ती चउव्विहा ॥

मू. (१५६) संरंभसमारंभे, आरंभे य तहेव य।
मनं पवट्टमाणं तु, नियत्तिज्ज जयं जई ॥

वृ. सद्भ्यः-अर्थात्पदार्थेभ्यो हितो-यथावद्विकल्पनेनाप्तः सत्यो मनोयोगस्तद्विषया मनोगुप्तिरप्युपचारात्सत्या, तथैव मृषा च-तद्विपरीतमनोयोगविषया, 'सत्यामृषा' उभयात्मकमनोयोगगोचरा, तथैव चेति समुच्चये, चतुर्थी 'असत्यामृषा' उभयस्वभावविकलमनोदलिकव्यापाररूपमनोयोगगोचरा मनोगुप्तिः, प्रक्रमाच्च सर्वत्रैवं योजना, उपसंहारमाह-मनोगुप्तिः 'चतुर्विधा' उक्तभेदश्चतुर्भेदा, अस्या एव स्वरूपं निरूपयन् काक्वोपदेष्टुमाह-संरम्भः-सङ्कल्पः स च मानसः, तथाऽहं ध्यास्यामि यथाऽसौ मरिष्यतीत्येवंविधः, समारम्भः-परपीडाकरोच्चाटनादिनिबन्धनं ध्यानम्, अनयोः समाहारस्तस्मिन्, आरम्भः- अत्यन्तक्लेशतः परप्राणापहारक्षममसुमध्यानमेव तस्मिन् 'चः' समुच्चये 'तथैव' तेनैवागमप्रतीतेन तत्र मनसोऽसन्निवेशात्मकेन प्रकारेण 'चः' पूरणे 'मनः' चित्तं 'प्रवर्त्तमानं' व्याप्रियमाणं 'तु' विशेषणे 'निवर्त्तयेत्' नियमयेत् 'जयं'ति यतमानः 'यतिः' तपस्वी। विशेषश्चायमिह-शुभसङ्कल्पेषु मनः प्रवर्त्तयेत्, प्रवीचाराप्रवीचाररूपत्वाद्गुप्तेरिति सूत्रद्वयार्थः ॥ वाग्गुप्तिमाह-

मू. (१५७) सच्चा तहेव मोसा य, सच्चामोसा तहेव य।
चउत्थी असच्चमोसा य, वयगुत्ती चउव्विहा ॥

मू. (९५८) *संरंभसमारंभे, आरंभे य तहेव य ।*
वयं पवत्तमाणं तु, नियत्तिज्ज जयं जई ॥

वृ. सूत्रद्वयमनन्तरं व्याख्यातमेव, नवरं मनोगुप्तिस्थाने वाग्गुप्तिरुच्चारयितव्या, तथा सत्या वाक् जीवं जीवमिति प्ररूपयतः असत्या जीवमजीवमिति सत्यामृषा क्वचिद्विवक्षितसमये मनुष्यशतमुत्पन्नमुपलभ्यते इति असत्यामृषा तु विधेहि स्वाध्यायं नैतत्सदृशमन्यत्तपोऽस्तीत्यादि, तथा वाचिकः संरम्भः-परव्यापादनक्षमक्षुद्रविद्यादिपरावर्त्तनासङ्कल्पसूचको ध्वनिरेवोपचारात्सङ्कल्पशब्दवाच्यः सन्, समारम्भः-परपरितापकरमन्त्रादिपरावर्त्तनम् 'आरम्भः' तथाविधसंक्लेशतः प्राणिनां प्राणव्यपरोपक्षणक्षममन्त्रादिजपनमिति सूत्रद्वयार्थः ॥

इदानीं कायगुप्तिमभिधातुमाह-

मू. (९५९) *ठाणं निसीयणे चेव, तहेव य तुयट्टणे ।*
उल्लंघण पल्लंघण, इंदियाण य जुंजणे ॥

मू. (९६०) *संरंभसमारंभे, आरंभे य तहेव य ।*
कायं पवत्तमाणं तु, नियत्तिज्ज जयं जई ॥

वृ. 'स्थाने' ऊर्द्ध्वस्थाने 'निसीयणि'त्ति 'निषदने' उपवेशने, चः तयोरेव विचित्रभेदसमुच्चयार्थः, 'एव' इति पूरणे, तथैव च 'त्वग्वर्त्तने' शयने 'उल्लङ्घने' तथाविधनिमित्तत ऊर्ध्वभूमिकाद्युत्क्रमणे गर्त्ताद्यतिक्रमणे वा 'प्रलङ्घने' सामान्येन गमने, उभयत्र सूत्रत्वात्सुपो लुक्, 'इन्द्रियाणां च' स्पर्शनादीनां 'जुंजणे'त्ति योजनं-शब्दादिविषयेषु व्यापारणं तस्मिन्, सर्वत्र च वर्त्तमान इति शेषः, स्थानादिषु वर्त्तमानः संरम्भः-अभिघातो यष्टिमुष्ट्यादिसंस्थानमेव सङ्कल्पसूचकमुपचारात्सङ्कल्पशब्दवाच्यं सत् समारम्भः-परितापकरो मुष्ट्याद्यभिघातः, ततः संरम्भश्च समारम्भश्च संरम्भसमारम्भं तस्मिन्, 'आरम्भे' प्राणिवधात्मनि कायं प्रवर्त्तमानं निवर्त्तयेत्, शेषं प्राग्वदिति सूत्रद्वयार्थः ॥ सम्प्रति समितिगुप्त्योः परस्परविशेषं स्वयं सूत्रकृदाह-

मू. (९६१) *एयाओ पंच समिईओ, चरणस्स य पवत्तणे ।*
गुत्ती नियत्तणे ऽवुत्ता, असुभत्थेसु य सव्वसो ॥

वृ. 'एताः' अनन्तरोक्ताः पञ्च समितयश्चरणं-चारित्रं सच्चेष्टेतियावत् तस्य प्रवर्त्तने पूर्वत्र चशब्दस्य भिन्नक्रमत्वादवधारणार्थत्वाच्च प्रवर्त्तने एव, किमुक्तं भवति ?-सच्चेष्टासु प्रवृत्तावेव समितयः, तथा 'गुत्ती'त्ति गुप्तयो निवर्त्तनेऽप्युक्ताः 'अशुभार्थेभ्यः' अशोभनमनोयोगादिभ्यः, सूत्रे तु सुब्व्यत्ययेन पञ्चम्यर्थे सप्तमी, 'सव्वसो'त्ति सर्वेभ्योऽपिशब्दाच्चरणप्रवर्त्तने च, उपलक्षणं चैतत् शुभार्थेभ्योऽपि निवृत्तेः, वाक्काययोर्निर्व्यापारतायाऽपि गुप्तिरूपत्वात्, उक्तं हि गन्धहस्तिना-"सम्यगागमानुसारेणारक्तद्विष्टपरिणतिसहचरितमनोव्यापारः कायव्यापारो वाग्व्यापारश्च निर्व्यापारता वा वाक्काययोर्गुप्तिः" इति, तदनेन व्यापाराव्यापारात्मिका गुप्तिरुक्तेति सूत्रार्थः ॥ सम्प्रत्यध्ययनार्थमुपसंहरन्नेतदाचरणफलमाह-

मू. (९६२) *एया पवयणमाया, जे सम्मं आयरे मुनी ।*
सो खिप्पं सव्वसंसारा, विप्पमुच्चइ पंडिए ॥ त्तिबेमि ॥

वृ. स्पष्टमेव । नवरं, 'सम्यक्' अवैपरीत्येन न तु दम्भादिनेति सूत्रार्थः ॥ 'इति' परिसमाप्तौ,

ब्रवीमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वत्॥

अध्ययनं २४-समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे चतुर्विंशमिममध्ययनं सनिर्युक्तिकं सटीकं परिसमाप्तं

अध्ययनं-२५-'यज्ञीयं'

वृ. व्याख्यातं चतुर्विंशमध्ययनम्, अधुना पञ्चविंशमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने प्रवचनमातरोऽभिहिताः, इह तु ता ब्रह्मगुणस्थितस्यैव तत्त्वतो भवन्तीति जयघोषचरितवर्णनाद्वारेण ब्रह्मगुणा उच्यन्त इत्यनेनाभिसम्बन्धेनायातमिदमध्ययनम्, अस्य चानुयोगद्वारचतुष्टयचर्चा प्राग्वद्यावन्नामनिष्पन्ननिक्षेपे यज्ञीयमिति नामातो यज्ञनिक्षेपायाह-

नि.[४६४] निक्खेवो जन्नंमि अ चउक्कओ दुविहो य होइ दव्वंमि।
आगमनोआगमओ नोआगमओ अ सो तिविहो॥

नि.[४६५] जाणगसरीरभविए तव्वइरित्ते अ माहणाईसुं।
तवसंजमेसु जयणा भावे जन्नो मुनेयव्वो॥

नि.[४६६] जयघोसा अनगारा विजयघोसस्स जन्नकिच्चंमि।
तत्तो समुट्ठियंमिणं अज्झयणं जन्नइज्जंति॥

वृ. निक्षेपो यज्ञे चतुष्कको- नामादिः, द्विविधो भवति द्रव्ये-आगमनोआगमतः, तत्रागमतः प्राग्वत्, नोआगमतश्च 'स' इति यज्ञस्त्रिविधः ज्ञशरीरभव्यशरीरे तद्व्यतिरिक्तश्च, 'माहणाइसु'न्ति माहनादीनां प्रक्रमाद् यज्ञ आदि-शब्दात्तथाविधनृपत्यादिपरिग्रहः, तैर्हि प्राणिहिंसोपलक्षित एवायं क्रियते, ततः स भावयज्ञफलाप्रसाधकत्वाद् द्रव्ययज्ञ उच्यते, भावयज्ञमाह-'तपःसंयमेषु' प्रसिद्धेष्वेव 'यतना' सदनुष्ठानादरकरणरूपा भावे यज्ञः 'मुनितव्यः' प्रतिज्ञातव्यः, अहोर्थे चायं कृत्यः, ततः स्वर्गादियज्ञफलप्रसाधकतयैष एव यज्ञः प्रतिज्ञातुमुचितो, न त्वन्यः, तस्य प्रत्युतानर्थहेतुत्वात्, जयघोषादनगाराद्विजयघोषस्य 'यज्ञकृत्ये' यज्ञक्रियायामागतात् जातमिति शेषः, ततश्च यज्ञस्यैव प्राधान्यविवक्षया 'ततः' इति यज्ञात् समुत्थितमिदमध्ययनं यज्ञीयमिति, तस्मादुच्यत इति शेष इति गाथात्रयार्थः॥ एवं तावन्निक्षेप उक्तः, सम्प्रत्यनुगमावसरः, तत्रोपोद्घातनिर्युक्त्यनुगमान्तर्गतं किञ्चिदभिधित्सुराह-

नि.[४६७] वाणारसिनयरीए दो विप्पा आसि कासवसगुत्ता।
धनकनगविउलकोसा छक्कम्मरया चउव्वेया॥

नि.[४६८] दोवि अ जमला भाउअ संपीआ अन्नमन्नमनुरत्ता।
जयघोसविजयघोसा आगमकुसला सदाररया॥

नि.[४६९] अह अन्नया कयाई जयघोसो ण्हाइउं गओ गंगं।
अह पिच्छइ मंडूक्कं सप्पेण तहिं गसिज्जंतं॥

नि.[४७०] सप्पोऽवि अ कुललेणं अक्खित्तो पाडिओ य भूमीए।

सोऽवि अ कुललो सप्पं अक्कमिउं अच्छए तत्थ ॥

नि.[४७१] सप्पोऽवि कुललवसगओ मंडूक्कं खाइ चिच्चिआइयं ।
सोऽवि अ कुललो खायइ सप्पं चंडेहिं गासेहिं ॥

नि.[४७२] तं अन्नमन्नघायं जयघोसो पासिऊण पडिबुद्धो ।
गंगाओ उत्तरिउं समनाणं आगओ वसहिं ॥

नि.[४७३] सो समणो पव्वइओ निग्गंथो सव्वगंथउम्मुक्को ।
वोसिरिऊण असारे केसेहिं समं परिक्लेसे ॥

नि.[४७४] पंचमहव्वयजुत्तो पंचिंदिअसंवुडो गुणसमिद्धो ।
घडनजयनप्पहाणो जाओ समणो समिअपावो ॥

वृ. आसामक्षरार्थः स्पष्ट एव, नवरं 'कासवसगोत्त'त्ति काश्यपकुलोत्पन्नाः काश्यपास्तैः समानं गोत्रं ययोस्तौ काश्यपसगोत्रौ 'छक्कम्मरय'त्ति षट् कर्माणि-यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहात्मकानि तेषु रतौ-आसक्तौ षट्कर्मरतौ, तथा द्वादपि 'यमलौ' युग्मौ उत्पन्नौ 'भाउय'त्ति भ्रातरौ 'संप्रीतौ' विद्यमानसम्यग्बाह्यप्रीती 'अन्योऽन्यमनुरक्तौ' आन्तरप्रीतियोगतः परस्परस्नेहवन्तौ, आगमः-श्रुतिस्मृत्यादिरूपस्तस्मिन् कुशलावागमकुशलौ, अत एव स्वदाररतौ। 'ण्हाइउं'ति स्नातुं। 'कुररेण' मार्जारनाम्ना पक्षिविशेषेण 'उक्खित्तो'त्ति उत्क्षिप्तः, उत्क्षिप्य च कथं नामसौ म्रियतामिति पातितश्च भूमौ 'अक्कमिउं'न्ति आक्रम्य-अवष्टभ्य। सर्पः कुररवशगतः-कुरराधीनतां प्राप्तः 'चिंचियायंतं'ति चिंचिमिति कुर्वन्तं 'चण्डैः' बृहत्खण्डनात्रोटनतोऽत्यन्तरौद्रैः 'ग्रासैः' प्रतीतैः।

'तम्' इत्युक्तरूपमन्योऽन्यघातं-कुररसर्पमण्डूकगतं 'पासिऊणं'ति दृष्ट्वा 'प्रतिबुद्धः' अहो! दुरन्तोऽयं संसार इत्यादिपरिभावनया अवगततत्त्वः 'सः' इति जयघोषः समनाः-सहृदयो विशिष्टाभोगयुक्त इत्यर्थः 'प्रव्रजितः' हेयधर्मेभ्यो 'निर्ग्रन्थः' ग्रन्थरहितः, स च बाह्यग्रन्थरहितोऽपि स्यादत आह-सर्वो-बाह्य आन्तरश्च यो ग्रन्थस्तेनोन्मुक्तः सर्वग्रन्थोन्मुक्तः, वक्ष्यमानश्रमणविशेषणान्येतानि, 'व्युत्सृज्य' त्यक्त्वा 'असारान्' परमार्थालोचनायामप्रधानान् 'केशैः' शिरोरुहैः 'समं' सह परिक्लेशयन्तीति परिक्लेशाः-प्रस्तावात्पुत्रकलत्रादिसम्बन्धास्तान्। घटनं-संयमयोगविषयं चेष्टनं यतनं-तत्रैवोपयुक्ततत्वं कृतरूपाणि येनासौ शमितपापः। भावार्थस्त्वासां सम्प्रदायादवसेयः, स चायम्-

वाणारसीए नयरीए दो विप्पभायरो यमला आसी जयघोसविजयघोसा, अन्नया जयघोसो ण्हाइउं गओ गंगं, तत्थ पेच्छइ सप्पेण मंडूक्कं गसिज्जंतं, सप्पोवि मज्जारेण उच्छित्तो, मज्जारो सप्पं अक्कमिउं ठिओ, तथावि सप्पो मंडूक्कं चिंचियंतं खायति, मज्जारोवि सप्पं चडप्फडंतं खायति, अन्नमन्नं घायं पासित्ता पडिबुद्धो गंगमुत्तरिऊण साहुसगासे समनो जातो त्ति। इति गाथाऽष्टकार्थः। इत्यभिहितं किञ्चिदुपोद्घातनिर्युक्त्यनुगमान्तर्गतं, सम्प्रति सूत्रस्पर्शिकनिर्युक्त्यनुगमावसरः, स च सूत्रे सति भवतीति सूत्रानुगमे सूत्रोच्चारणीयं, तच्चेदम्-

मू.(९६३) *माहणकुलसंभूओ, आसि विप्पो महायसो।*
जायाई जमजन्नंमि, जयघोसत्ति नामओ ॥

मू.(१६४) इंदियग्गामनिग्गाही, मग्गगामी महामुनी।
गामानुगामं रीयंते, पत्तो वाणारसिं पुरिं॥

मू.(१६५) वाणारसीइ बहिया, उज्जानंमि मनोरमे।
फासुएसिज्जसंथारे, तत्थ वासमुवागए॥

वृ. सूत्रत्रयं प्रायः प्रतीतार्थमेव, नवरं ब्राह्मणकुलसंभूत इत्यन्वयाभिधानं, ब्राह्मणकुल संभूतोऽपि जननीजात्यन्यथात्वे ब्राह्मणो न स्यादत आह- विप्रः, 'जायाइ'त्ति अवश्यं यायजीति यायाजी, क्वेत्याह-यमाः प्राणातिपातविरत्यादिरूपाः पञ्च त एव यज्ञो भावपूजात्मकत्वाद्विवक्षितपूजां प्रति यमयज्ञस्तस्मिन्, विषयसप्तमीयं, गार्हस्थ्यापेक्षया चैतद्व्याख्यायते, तत्र च विप्रो विप्राचारनिरतत्वेन, संभवति हि कश्चित्तत्कुलोत्पन्नोऽप्यन्यथेति विशेषणं, तथा यम इव प्राण्युपसंहारकारितया यमः स चासौ यज्ञश्च यमयज्ञः अर्थाद् द्रव्ययज्ञस्तस्मिन्। इन्द्रियग्रामं स्पर्शनादिकसमूहं निगृह्णाति-स्वस्वविषयविनिवर्त्तनेन नियमयतीत्येवंशील इन्द्रियग्रामनिग्राही, अत एव 'मार्गगामी' मुक्तिपथयायी 'रीयंति'त्ति रीयमानो विहरन्।

'वाणारसीय बहिय'त्ति वानारस्या बहिरिति-बहिर्भागे यदुद्यानमुत्पवनं तस्मिन्निति सूत्रत्रयार्थः॥ तदा च तत्पुरियद्वर्त्तते यच्चासौ विधत्ते तदाह-

मू.(१६६) अह तेनेव कालेनं, पुरीए तत्थ माहणे।
विजयघोसत्ति नामेणं, जन्नं जयइ वेयवी॥

मू.(१६७) अह से तत्थ अनगारे, मासक्खमनपारणे।
विजयघोसस्स जन्नंमि, भिक्खमट्ठा उवट्ठिए॥

वृ. 'अथे'ति च वक्तव्यतान्तरोपन्यासे 'तेनेव कालेनं'ति सुब्व्यत्ययात्तस्मिन्नेव काले यत्रासौ वानारसीमाजगाम, 'वेयवी'ति वेदवित्। 'अथे'ति प्रस्तुतोपन्यासे 'स' जयघोषः 'तत्रे'ति यागे 'भिक्खस्सऽट्ठ'त्ति भैक्ष्यस्यार्थे-भैक्ष्यनिमित्तं, शेषं सुगममिति सूत्रद्वयावयवार्थः॥

तत्र च भिक्षार्थमुपस्थिते यदसौ याजकः कृतवांस्तदाह-

मू.(१६८) समुवट्ठियं तहिं संतं, जायगो पडिसेहए।
न हु दाहामि ते भिक्खं, भिक्खू! जायाहि अन्नओ॥

वृ. 'समुपस्थितं' भिक्षार्थमागतं 'याजकः' यष्टा स एव विजयघोषनामा ब्राह्मणः 'प्रतिषेधति' निराकुरुते यथा 'न हु' नैव दास्यामि 'ते' तुभ्यं भिक्षां 'जायाहि'त्ति याचस्व 'अन्यतः' अस्मद्व्यतिरिक्तात्। किमित्येवमत आह-

मू.(१६९) जे य वेयविउ विप्पा, जन्नमट्ठा य जे दिया।
जोइसंगविउ जे य, जे य धम्माण पारगा॥

वृ. 'जे विप्पा' इत्यादि, विप्रा जातितः 'जण्णट्ठा य'त्ति 'यज्ञार्था' यज्ञप्रयोजना ये तत्रैव व्याप्रियन्ते ये 'द्विजाः' संस्कारापेक्षया द्वितीयजन्मानो ज्योतिषं ज्योतिःशास्त्रमङ्गानि च विदन्ति ये ते ज्योतिषाङ्गविदः, अत्र च ज्योतिषस्योपादानं प्राधान्यख्यापकम्, अन्यथा हि शिक्षा १ कल्पो २ व्याकरणं ३ निरुक्तं ४ छन्दोविचितः ५ ज्योतिषमिति ६ षडङ्गानीत्यङ्गग्रहणेनैव तद्गृहीतमिति, धर्माणामुपलक्षणत्वाद् धर्मशास्त्राणां 'पारगाः' पर्यन्तगामिनः,

अशेषविद्यास्थानोपलक्षणमेतत्, ततो ये चतुर्दशविद्यास्थानपारगताः,

मू.(१७०) जे समत्था समुद्धर्त्तुं, परं अप्पाणमेव य।
तेसिमन्नमिणं देयं, भो भिक्खू! सव्वकामियं॥

वृ.अत एव च ये 'समर्थाः' शक्तिमन्तः समुद्धर्त्तुं भवसमुद्रादिति गम्यते, 'तेसिं'ति सुब्व्यत्ययात् 'तेभ्यः' अनन्तरमुक्तरूपेभ्यः द्विजेभ्यः 'सव्वकामिय'न्ति सर्वाणि कामानि अभिलषणीयवस्तूनि यस्मिंस्तत्सर्वकाम्यं, यद्वा सर्वकामैर्निर्वृत्तं तत्प्रयोजनं वा सर्वकामिकं, षड्रसोपेतमित्यर्थः, शेषं स्पष्टमिति सूत्रत्रयार्थः॥

एवमुक्तो मुनिः स कीदृग जातः ? किं वा कृतवान् ? इत्याह-

मू.(१७१) सो तत्थ एव पडिसिद्धो, जायगेण महामुनी।
नवि रुट्ठो नवि तुट्ठो, उत्तमट्ठगवेसओ॥

मू.(१७२) नऽन्नट्ठं पानहेउं वा, नवि निव्वाहणाय वा।
तेसिं विमुक्खणट्ठाए, इमं वयणमब्बवी॥

मू.(१७३) नवि जानसि वेयमुहं, नवि जन्नाण जं मुहं।
नक्खत्ताण मुहं जं च, जं च धम्माण वा मुहं॥

मू.(१७४) जे समत्था समुद्धर्त्तुं, परं अप्पाणमेव य।
न ते तुमं विजाणासि, अह जानासि तो भण॥

वृ. 'सः' इति जयघोषनामा 'तत्रे'ति यज्ञे 'एवे'ति एवम्-उक्तप्रकारेण 'प्रतिषिद्धः' निराकृतः, केन ?-'याजकेन' यज्ञकर्त्रा विजयघोषब्राह्मणेन महामुनिर्नापि 'रुष्टः' इति रोषं गतः

"बहुं परघरे अत्थि विविहं खाइमसाइमं।
न तत्थ पंडिओ कुप्पे, इच्छा दिज्ज परो न वा॥"

इत्याद्यागमपरिभावनातो, नापि 'तुष्टः' परितोषं प्राप्तः, किन्तु समतयैव स्थिति इति भावः, किमित्येवं ?, यत उत्तमार्थो-मोक्षस्तमेव गवेषयते-अन्वेषयते इत्युत्तमार्थगवेषको, मुक्तिं विनाऽन्यत्र निःस्पृह इतियावत्, 'न' नैवान्नम्-ओदनादि तदर्थं, पीयत इति 'कृत्यल्युटो ऽन्यत्रापी'ति वचनात्कर्मणि ल्युटि पानम्-आचाम्लादि तद्धेतुं वा-तन्निमित्तं वा, नापि 'निर्वाहणाय वा' वस्त्राभ्यङ्गतैलादिना यापनार्थं सर्वत्रात्मन इति गम्यते, किमर्थं तर्हि ? इत्याह-

'तेषां' याजकानां 'विमोक्षार्थं' यथा कथं नु नामामी विमुक्तिमाप्नुयुरिति प्रयोजनार्थम् 'इदं' वक्ष्यमाणं वचनमब्रवीत्, किं तदित्याह-'नवि'त्ति नैव जानासि वेदानां मुखं वेदमुखं-यत्तेषु प्रधानं नापि यज्ञानां यन्मुखम्-उपायो नक्षत्राणां मुखं-प्रधानं यच्च, यच्च धर्माणां वा मुखम्-उपायस्तद्, अनेन तस्य वेदयज्ञज्योतिर्धर्मानभिज्ञत्वमुक्तं। सम्प्रति पात्राविज्ञतामाह-'जे' इत्यादि, व्याख्यातप्रायमेव, नवरम्, अथ जानासि ततो भणेत्याक्षेपाभिधानमिति सूत्रचतुष्टयार्थः॥ एवं च तत्राक्षिप्तवति भगवति स किं कृतवानित्याह-

मू.(१७५) तस्सक्खेवपमुक्खं च, अचयंतो तहिं दिओ।
सपरिसो पंजलीहोउं, पुच्छई तं महामुनिं॥

मू.(१७६) वेयाणं च मुहं बूहि, बूहि जन्नाण जं मुहं।

नक्खत्ताण मुहं बूहि, बूहि धम्माण वा मुहं ॥

मू. (१७७) *जे समत्था समुद्धर्तुं, परं अप्पाणमेव य ।*
एयं मे संसयं सव्वं, साहू ! कहय पुच्छिओ ॥

वृ. 'तएये'ति मुनेराक्षेपः- प्रश्नस्तस्य प्रमोक्षः प्रतिवचनं तं 'च:' पूरणे 'अचयंतो'ति अशक्नुवन् दातुमिति गम्यते 'तस्मिन्' इति यज्ञे 'द्विज:' ब्राह्मणः 'सपर्षत्' सभाऽन्वितः प्रकृतोऽञ्जलिः-उभयकरसंपुटात्मको येनासौ प्राञ्जलिर्भूत्वा पृच्छति 'त'मिति प्रक्रान्तं महामुनिम् । कथं पृष्टवानित्याह-'वेयाण' इत्यादि, गतार्थमेव, नवरं 'बूहि' व्यक्तमभिधेहि, पुनः पुनर्बूहीत्यूच्चारणमत्यादरख्यापनार्थं 'एतद्' उक्तरूपं 'मे' मम संशेतेऽस्मिन् मन इति संशयस्तं-संशयविषयं वेदमुखादि साधो ! कथय पृष्ट इत्युपसंहारवचनमिति सूत्रत्रयार्थः ॥

इत्थं पृष्टो मुनिराह-

मू. (१७८) *अग्गिहुत्तमुहा वेया, जन्नट्ठी वेयसा मुहं ।*
नक्खत्ताण मुहं चंदो, धम्माणं कासवो मुहं ॥

मू. (१७९) *जहा चंदं गहाइया, चिट्ठंते पंजलीउडा ।*
वंदमाना नमंसंता, उत्तमं मनहारिणो ॥

मू. (१८०) *अजाणगा जन्नवाई, विज्जामाहणसंपया ।*
गूढा सज्झायतवसा, भासच्छन्ना इवग्गिणो ॥

मू. (१८१) *जो लोए बंभणो वुत्तो, अग्गी वा महिओ जहा ।*
सदा कुसलसंदिट्ठं, तं वयं बूम माहणं ॥

मू. (१८२) *जो न सज्जइ आगंतुं, पव्वयंतो न सोअई ।*
रमए अज्जवयणंमि, तं वयं बूम माहणं ॥

मू. (१८३) *जायरूवं जहामट्ठं, निद्धंतमलपावगं ।*
रागदोसभयाईयं, तं वयं बूम माहणं ॥

मू. (१८४) *तवस्सियं किसं दंतं, अवचियमंससोणिअं ।*
सुव्वयं पत्तनिव्वाणं, तं वयं बूम माहणं ॥

मू. (१८५) *तसे पाने वियानित्ता, संगहेण य थावरे ।*
जो न हिंसइ तिविहेणं, तं वयं बूम माहणं ॥

मू. (१८६) *कोहा वा जइवा हासा, लोहा वा जइवा भया ।*
मुसं न वयई जो उ, तं वयं बूम माहणं ॥

मू. (१८७) *चित्तमंतमचित्तं वा, अप्पं वा जइवा बहुं ।*
न गिण्हइ अदत्तं जो, तं वयं बूम माहणं ॥

मू. (१८८) *दिव्वमानुस्सतेरिच्छं, जो न सेवेइ मेहुणं ।*
मनसा कायवक्केणं, तं वयं बूम माहणं ॥

मू. (१८९) *जहा पोम्मं जले जायं, नोवलिप्पइ वारिणा ।*
एवं अलित्तं कामेहिं, तं वयं बूम माहणं ॥

मू.(९९०) अलोलुयं मुहाजीविं, अनगारं अकिंचनं।
असंसत्तं गिहत्थेहिं, तं वयं बूम माहणं॥

मू.(९९१) पसुबंधा सव्ववेया, जट्ठं च पावकम्मुणा।
न तं तायंति दुस्सीलं, कम्माणि बलवंतिह॥

मू.(९९२) नवि मुंडिएण समणो, न ओंकारेण बंभणो।
न मुनी रन्नवासेणं, कुसचीरेण न तावसो॥

मू.(९९३) समयाए समणो होइ, बंभचेरेण बंभणो।
नाणेण य मुनी होइ, तवेणं होइ तावसो॥

मू.(९९४) कम्मुणा बंभणो होइ, कम्मुणा होइ खत्तिओ।
वइस्सो कम्मुणा होइ, सुद्दा हवइ कम्मुणा॥

मू.(९९५) एए पाउकरे बुद्धे, जेहिं होइ सिणायओ।
सव्वकम्मविनिमुक्कं, तं वयं बूम माहणं॥

मू.(९९६) एवं गुणसमाउत्ता, जे हवंति दिउत्तमा।
ते समत्था उ उद्धत्तुं, परं अप्पाणमेव य॥

वृ. अग्गिहोत्तेत्यादिसूत्राण्यष्टादश प्रायः स्पष्टान्येव, नवरम्, अग्निहोत्रम्-अग्निकारिका, सा चेह-

"कर्मेन्धनं समाश्रित्य, दृढा सद्भावनाहुतिः।
धर्माध्यानाग्निना कार्या, दीक्षितेनाग्निकारिका॥"

इत्यादिरूपा परिगृह्यते, तदेव मुखं-प्रधानं येषां तेऽग्निहोत्रमुखा वेदाः, वेदानां हि दध्यादेरिव नवनीतादि आरण्यकमेव प्रधानम्, उक्तं हि-

"नवनीतं यथा दध्नश्चन्दनं मलयादिव।
औषधिभ्याऽमृतं यद्वद्वेदेभ्यारण्यकं तथा॥"

तत्र च दशप्रकार एव धर्म उक्तः, तथा च तद्वचः-"सत्यं तपः सन्तोषः संयमश्चारित्रमार्जवं क्षमा धृतिः श्रद्धाऽहिंसेत्येतद्दशविधमिह धामे"ति, तत्र च धामशब्देन धर्म एव विवक्षितः, एतदनुवाद्युक्तरूपमेवाग्निहोत्रमिति, तथा यज्ञः प्रस्तावाद्भावयज्ञस्तदर्थी 'वेयसि'त्ति वेदेन हेतुनाऽस्यति-अशुभानि कर्माणि क्षिपतीति निरुक्तविधिना वेदसो-यागः, उक्तं च-निर्घण्टे-"अध्वरो वेषो वेपो मखो वेदा वितथः"इत्यादि, तेषां मुखम्-उपायः, ते हि सत्येव यज्ञार्थिनि प्रवर्त्तन्त इति।

नक्षत्राणां 'मुखं' प्रधानं चन्द्रः, तस्यैव तदधिपतित्वात्। धर्माणां 'काश्यपः' भगवानृषभदेवः 'मुखम्' उपायः कारणात्मकः, तस्यैवादितत्प्ररूपकत्वात्, तथा चारण्यकम्-"ऋषभ एव भगवान् ब्रह्मा, तेन भगवता ब्रह्मणा स्वयमेव चीर्णानि ब्रह्माणि, यदा च तपसा प्रासः पदं यद् ब्रह्मकेवलं तदा च ब्रह्मर्षिणा प्रणीतानि, कानि पुनस्तानि ब्रह्माणि?" इत्यादि, किञ्च-भवतां ब्रह्माण्डपुराणमेव सर्गादिपुराणलक्षणोपेतत्वात्सकलपुराणज्येष्ठम्, उक्तञ्च-

"नवनीतं यथा दध्नश्चन्दनं मलयादिव।

ब्राह्मणं वै पुराणेभ्यस्तथा प्राहुर्मनीषिणः ॥''

तद्वचस्त्विदम् ''इह हि इक्ष्वाकुकुलवंशोद्भवेन नाभिसुतेन मरुदेव्या नन्दनेन महादेवेन ऋषभेण दशप्रकारो धर्मः स्वयमेव चीर्णः, केवलज्ञानलम्भाच्च महर्षिणो ये परमेष्ठिनो वीतरागाः स्नातका निर्ग्रन्था नैष्ठिकास्तेषां प्रवर्त्तित आख्यातः प्रणीतस्तेतायामादा''वित्यादि, काश्यपस्यैव माहात्म्यख्यापनतो धर्ममुखत्वं समर्थयितुमाह-यथा चन्द्रं ग्रहादिकाः, आदिशब्दान्नक्षत्रादिपरिग्रहः, 'पंजलीउड'त्ति प्राग्वत्कृतप्राञ्जलयस्तु 'वन्दमानाः' स्तुवन्तो 'नमस्यन्तो' नमस्कुर्वन्तः 'उत्तमं' प्रधानं 'मनोहारिणः' अतिविनीततया प्रभुचित्ताक्षेपकारिणस्तिष्ठन्तीति सम्बन्धः, तथैनमपि भगवन्तं देवेन्द्रप्रमुखाः समस्तसुरासुरमनुजसमूहा इत्युपस्कारः, पठ्यते च-

''जहा चंदे गहाईए, चिट्ठंती पंजलीउडा।
नमंसमाणा वंदंती, उद्धत्तमणहारिणो ॥''त्ति

अत्र यथा 'चन्द्रे' चन्द्रविषये ग्रहादिकास्तिष्ठन्तीति(न्ति)प्राञ्जलिपुटाः, कोऽर्थः ? तदायत्त्यै(त्ताए)वासते, अन्यच्च-नमस्यन्तः प्रक्रमात्तमेव 'वन्दन्ते' स्तुवन्ति, अनेन तेषां भक्तियुक्ततामाह, 'वंदंतोऽद्धत्त'त्ति सन्धिप्रयोगेण इतिशब्दान्तर्भावादितीत्येवं प्रक्रमात्काश्यपं तिष्ठन्ति प्राञ्जलिपुटास्तं च नमस्यन्तो वन्दन्ते, के इत्याह-'उद्धत्तमनहारिणो'त्ति औद्धत्यम्-अहङ्कारस्तत्प्रधानं मन औद्धत्यमनस्तद्धरणशीलाः औद्धत्यमनोहारिणः अत्यन्तशान्तचित्तवृत्तयो, यतय इत्यर्थः, पूर्वोपरनिपातस्यात्रातन्त्रत्वेन वा मनऔद्धत्यहारिणः, औद्धत्यग्रहणं चास्यैव सकलदोषमूलत्वात्, पठन्ति च-'उद्धत्तुमनगारिणो'त्ति अत्र चोद्धर्त्तुम्-उत्क्षेतुं भवपङ्कमग्नमात्मानमिति गम्यते, अगारिणोगृहिणस्तद्विपरीता अनगारिणो-यतयः, क्रियाकारकयोजना प्राग्वत्, इह च धर्मार्थिनामेव अभ्यर्हितत्वात् काश्यपो धर्ममुखमित्यभिप्रायः।

अनेन प्रश्नचतुष्टयप्रतिवचनमुक्तं, सम्प्रति पञ्चमं प्रश्नमधिकृत्याह-'अजाणग'त्ति अज्ञा न तत्त्ववेदिन इत्युक्तं भवति, के ते ?-यज्ञवादिनो ये भवतः पात्रत्वेनाभिमताः, कासामित्याह-'विज्जामाहणसंपय'त्ति सूत्रत्वात्सुब्व्यत्ययः 'विद्याब्राह्मणसम्पदां' तत्र च विद्यते-ज्ञायत आभिस्तत्त्वमिति विद्या-आरण्यकब्रह्माण्डपुराणात्मिकास्ता एव ब्राह्मणसम्पदो विद्याब्राह्मणसम्पदः, तात्त्विकब्राह्मणानां हि निष्किञ्चनत्वेन विद्याएव सम्पदः, तद्विज्ञत्वे च कथमेते बृहदारण्यकाद्युक्तदशविधधर्मवेदिनो यागमेवं कुर्युः ?, तथा 'मूढाः' मोहवन्तः 'सज्झायतवस्स'त्ति सुब्व्यत्ययात्स्वाध्यायतपःसु तत्त्वतस्तत्स्वरूपापरिज्ञानाद्, अत एव 'भासच्छन्ना इवऽग्गिणो'त्ति इवशब्दस्य भिन्नक्रमत्वाद्भस्मच्छन्ना अग्नेय इव, ते हि बहिरुपशमभाज आभान्ति, अथ चान्तः कषायवत्तया ज्वलिताः, पठ्यते च 'गूढा सज्झायतवस्स'त्ति तत्र च 'गूढाः' बहिः संवृतिमन्तः, केन हेतुना ? 'स्वाध्यायतपसा' वेदाध्ययनोपवासादिनाऽन्तश्च भस्मच्छन्नाग्नितुल्याः, एवं च न तत्त्वतो भवदभिमतब्राह्मणानां ब्राह्मण्यं, तदभावाच्चात्मनः परस्य चोद्धरणेन पात्रत्वं दूरापास्तमेवेति भावः।

कस्तर्हि भवदभिप्रायेण ब्राह्मणो ? यः पात्रमित्याह-'यः' इत्यनिर्दिष्टस्वरूपः 'लोके' जगति ब्राह्मणः 'उक्तः' प्रतिपादितः कुशलैरिति गम्यते, 'अग्गी वा महितो जह'त्ति वेति पूरणे यथेत्यौपम्येऽभिन्नक्रमश्च, ततो यथाऽग्निर्यत्तदोर्नित्याभिसम्बन्धात्तथा 'महितः' पूजितः

सन् 'सदा' सर्वकालम्, उपसंहारमाह-कुशलैः-तत्त्वाभिज्ञैः संदिष्टः-कथितः कुशलसन्दिष्टस्तं 'तम्' इत्युक्तरूपं वयं ब्रूमो ब्राह्मणं, यदेव हि लोके विज्ञोपदिष्टं तदेव वस्त्वभ्युपगमार्हमिति भावः।

इत इत्तरसूत्रैर्यादृशोऽसौ कुशलसन्दिष्टस्तत्स्वरूपमेव क्वचित्कथञ्चिदनुवदन् स्वाभिमतं ब्राह्मणमाह-यो न स्वजनेनाभिष्वङ्गं करोति 'आगन्तुं' प्राप्तुं स्वजनादिस्थानमिति गम्यते, आगतो वा, ततः 'प्रव्रजन्' स्थानान्तरं गच्छन्न शोचते, यथा-कथमहममुना बिना भविष्यामीति, तत एव रमते आर्याणां-तीर्थकृतां वचनमार्यवचनम् आगमस्तस्मिन्, किमुक्तं भवति ?-सर्वत्र निःस्पृहत्वेनागमार्थानुष्ठानपरतया तत्र रतिमान् भवति, यद्वा यो न सजत्यागन्तुं प्रव्रज्यापर्यायाद्-गार्हस्थ्यपर्यायमिति गम्यते, तथा 'प्रव्रजन्' प्रव्रज्यां गृह्णन् न शोचते-न खिद्यते, किन्त्विदमेव मनुजजन्मफलमिति मन्यमानः स रमसैवाभिनिष्क्रामति, शेषं तथैव, व्याख्या द्वयेऽपि च निःस्पृहतैवोच्यते।

तथा 'जातरूपं' स्वर्णं ततो जातरूपमिव जातरूपं, यः कीदृशः सन्?-'महामट्ठं'त्ति मकार-स्यालाक्षणिकत्वान्महानर्थः-प्रयोजनं मुक्तिरूपमस्येति महार्थो, जातरूपस्य त्वर्थो विषय-घातादिः, तथा 'निद्धंतमलपावकं' निर्ध्मातं-भस्मीकृतं ततो निर्ध्मातमिव निर्ध्मातं मल इवात्मनो विशुद्धस्वरूपघातितया पापमेव पापकं येनासौ निर्ध्मातमलपापको, जातरूपं तु प्राकृतत्वात् पावकेन-अग्निना निर्ध्मातो मलः-किट्टात्मकोऽस्येति पावकनिर्ध्मातमलम्, अन्यच्च-रागश्च-प्रतिबन्धात्मको द्वेषश्च-अप्रीतिरूपो भयं च-इहलोकभयादि रागद्वेषभयानि तान्यतीतो-निष्क्रान्तो रागद्वेषभयातीतो रागादिरहित इत्यर्थः, सर्वत्र लिङ्गव्यत्ययः प्राग्वत्, पठ्यते च-'जातरूवं जहामट्ठं'ति 'यथे'त्यौपम्ये आमृष्टं-तेजःप्रकर्षारोपणाय मनःशिलादिना समन्तात्प-रामृष्टम्, अनेन जातरूपस्य बाह्यो गुण उक्तः, पावकनिर्ध्मातमलमिति चान्तरः, ततो जातरूप-वद्बाह्यान्तरगुणान्वितः, अत एव रागोद्यतीतश्च यस्तं वयं ब्रूमो ब्राह्मणम्।

किञ्च-त्रसप्राणिनो विज्ञाय 'सङ्ग्रहेण' सङ्क्षेपेण चशब्दाद्विस्तरेण च, तथा 'स्थावरान्' पृथिव्यादीन्, यदिवा संगृह्णात इति सङ्ग्रहो-वर्षाकल्पादिस्तेन हेतुना, जीवरक्षार्थत्वात्तस्य, च-शब्दो भिन्नक्रमः, तत एव स्थावरांश्च, पठ्यते च-'संगहेण सथावरे'त्ति 'संस्थावरान्' स्थावर-सहितान् यो 'न हिनस्ति' न व्यपरोपयति 'एतान्' अनन्तरमुक्तरूपान् 'तुः' पूरणे, पठ्यते च-'विविधेन' मनोवाक्कायरूपतया योगेनेति गम्यते तं वयं ब्रूमो ब्राह्मणं, तथा चारण्यकेऽप्युक्तम्-

"यदा न कुरुते पापं, सर्वभूतेषु दारुणम्।
कर्मणा मनसा वाचा, ब्रह्म सम्पद्यते तदा॥"

तथा क्रोधादिभ्यो मृषा न वदति यस्तु तं वयं ब्रूमो ब्राह्मणम्, इह च मानस्य क्रोधो मायायाश्च लोभ उपलक्षणं, प्रायस्तत्सहचरितत्वात्तयोः, तथा च तत्राप्यवाचि-

"यदा सर्वानृतं त्यक्तं, मिथ्याभाषा विवर्जिता।
अनवद्यं च भाषेत, ब्रह्म सम्पद्यते तदा॥"

(किञ्च)-

"अश्वमेधसहस्रं च, सत्यं च तुलया धृतम्।
अश्वमेधसहस्राद्धि, सत्यमेव विशिष्यते॥"

इति 'चित्तवत्' द्विपदादि 'अचित्तं च' स्वर्णादि 'अल्पं वा' सङ्ख्यया प्रमाणेन च स्तोकं यदिवा 'बहुं' ताभ्यामेव प्रत्युरं न गृह्णाति 'अदत्तम्' अनिसृष्टं यस्तं वयं ब्रूमो ब्राह्मणं, तथा च तत्राप्युक्तम्-

"परद्रव्यं यदा दृष्ट्वा, आकुले ह्यथवा रहे।
धर्मकामो न गृह्णाति, ब्रह्म सम्पद्यते तदा॥"

अन्यश्च-दिव्यविषयत्वादिव्यं मानुषविषयत्वान्मानुषं तिर्यक्षु भवं तैरश्चमेषां समाहारो दिव्यमानुषतैरश्चं यो न सेवते मैथुनं 'मनसा' चित्तेन कायश्च-शरीरं वाक्यं च-वचनं कायवाक्यं तेन तं वयं ब्रूमो ब्राह्मणं, तथा च तत्राप्युक्तम्-

"दिव्यमानुषतिर्यक्षु, मैथुनं यः परित्यजेत्।
कामरागविरक्तश्च, ब्रह्म सम्पद्यते तदा॥"

अपि च-यथा 'पद्मं' कमलं जले उपलक्षणत्वाज्जलमध्ये 'जातम्' उत्पन्नं तत्परित्यागत उपरिव्यवस्थानतः 'नोपलिप्यते' न श्लिष्यते 'वारिणा' जलेन, 'एव'मिति पद्मवत् 'अलित्त'त्ति अलिप्तः-अश्लिष्टः काम्यमानत्वात् कामैः-मनोज्ञैः शब्दादिभिराबाल्यात् तैरेव वृद्धिं नीयमानतया तन्मध्योत्पन्नोऽपि यस्तं वयं ब्रूमो ब्राह्मणं, तथा च तत्राप्यभिधायि-

"यदा सर्वं परित्यज्य, निस्सङ्गो निष्परिग्रहः।
निश्चिन्तश्च चरेद्धर्मं, ब्रह्म सम्पद्यते तदा॥" इति

इत्थं मूलगुणयोगात्तात्त्विकं ब्राह्मणमभिधायोत्तरगुणयोगतस्तमेवाह-'अलोलुपम्' आहारादिष्वलम्पटं 'मुहाजीवि'त्ति सुब्व्यत्ययात् 'मुधाजीविनम्' अज्ञातोञ्छमात्रवृत्तिं, पठ्यते च-'मुहाजीवि'त्ति अनगारमकिञ्चिनं प्राग्वत् 'असंसक्तम्' असंबद्धं, कैः? -गृहस्थैः, तृतीयार्थे सप्तमी विषयसप्तमी वा, अनेन काक्वा पिण्डविशुद्धिरूपोत्तरगुणयुक्तत्वमुक्तं, 'तम्' उक्तगुणयुक्तमप्येवंविधं सन्तं वयं ब्रूमो ब्राह्मणं, क्वचित् पठ्यते च-

'जहित्ता पुव्वसंजोगं, नाइसंगे य बंधवे।
'जो न सज्जइ भोएहिं, तं वयं बूम बंभणं॥'

अत्र 'पूर्वसंयोगं' मात्रादिसम्बन्धं 'ज्ञातिसंयो-गान्' स्वस्रादिसम्बन्धान्, च-शब्दो भिन्नक्रमस्ततः 'बान्धवांश्च' भ्रात्रादीन्, शेषं स्पष्टम्, अनेन चातिनिःस्पृहताभिधानेनोत्तरगुणा अप्याक्षिप्ता भवन्ति।

स्यादेतद्-वेदाध्ययनं यजनं च भवात्रायकमिति तद्योगादेव पात्रभूतो ब्राह्मणो न तु यथा त्वयोक्त इत्याशङ्क्याह-पशूनां-छागानां बन्धो-विनाशाय नियमनं यैर्हेतुभिस्तेऽमी पशुबन्धाः 'श्वेतं छागमालभेत वायव्यां दिशि भूतिकाम' इत्यादिष्वाम्नायोपलक्षिताः, पाठान्तरतः पशवो बद्धा यैस्ते आहिताग्न्यादेराकृतिगणत्वात् क्तान्तस्य परनिपाते पशुबद्धाः, न तु ये 'आत्मा वारे ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिवाक्योपलक्षिताः 'सर्ववेदाः' ऋग्वेदादयः 'जट्ठं'ति इष्टं यजनं 'वा' समुच्चये 'पापकर्मणा' पापहेतुभूतपशुबन्धाद्यनुष्ठानेन तु हरिकेशीयाध्ययनोक्तविधिनेतिभावः, किमित्याह-'न' नैव 'त'मिति प्रक्रमादेदाध्येतारं यष्टारं वा 'त्रायन्ते' रक्षन्ति भवादिति गम्यते, किंविशिष्टं?-'दुःशीलं' ताभ्यामेव हिंसादिप्रवर्त्तनेन दुराचारं, किमिति?-

यतः 'कर्माणि' ज्ञानावरणादीनी 'बलवन्ति' दुर्गतिनयनं प्रति समर्थानि 'इहे'ति भवदवगमविषये वेदाध्ययने यजने च भवन्तीति गम्यते, पशुबन्धादि प्रवर्तनेन तयोस्तद्बलाधायकत्वादिति भावः, अनेन दुर्गतिहेतुत्वात्स्वर्गहेतुत्वमप्यनयोः प्रत्युक्तम्, उक्तं हि-

"यूपं छित्त्वा पशुं हत्वा, कृत्वा रुधिरकर्दमम्।
यद्येवं प्राप्यते स्वर्गो, नरके केन गम्यते ?॥"

अतो नैतद्योगाद्ब्राह्मणः पात्रभूतो भवति, किन्त्वनन्तराभिहितगुण एवेति भावः। अन्यच्च - नेति निषेधे 'अपिः' पूरणे 'मूण्डितेन' केशापनयनात्मकेन समं मनोऽस्येकेति निरुक्तविधिना श्रमणः -निर्ग्रन्थः 'न' नैव ॐकारो(ऽणो)ऽक्षरत्वात् 'ॐ भूर्भुवः स्व'रित्याद्युच्चारणरूपेण ब्राह्मणः, तथा न मुनिररण्यवासेन, कुशो-दर्भविशेषस्तन्मयं चीवरं कुशचीवरं, बल्कलोपलक्षणमेतत्, तेन तापसः, अनूदितं चैतद्वाचकैः -

"मुण्डनात् श्रमणो नैव, संस्काराद्ब्राह्मणो न वा।
मुनिर्नारण्यवासित्वाद्वल्कलात्र च तापसो॥"

भवतीति सर्वत्र शेषः। कथमसौ तर्हि संभवन्तीत्याह-'समतया' रागद्वेषाभावरूपया श्रमणो भवति, ब्रह्मणश्चरणं ब्रह्मचर्यं, ब्रह्म च द्विधा, यत उक्तम्-

"द्वे ब्रह्मणी वेदितव्ये, शब्दब्रह्मपरं च यत्।
शब्दब्रह्मणि निष्णातः, परं ब्रह्माधिगच्छति॥"

एतानि च परााणि ब्रह्माणि वरिष्ठानि यानि प्रागहिंसादीन्युक्तानीति, एतद्रूपमेवेह ब्रह्मोच्यते, तेन ब्राह्मणो भवति, 'ज्ञानेन' हिताहितावगमरूपेण मुनिर्भवति 'तपसा' बाह्याभ्यन्तरभेदभिन्नेन भवति तापसः, सर्वत्राभिधानान्यथाऽनुपपत्तिरिह हेतुः, ननु चान्वर्थवत्त्वेऽभिधानस्यैष हेतुः, तच्चान्यथाऽपि डित्थादिवत्स्यादत आह-'कर्मणा' क्रियया ब्राह्मणो भवति, उक्तं हि-

"क्षमा दानं दमो ध्यानं, सत्यं शौचं धृतिर्घृ(दया घृ)णा।
ज्ञानविज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम्॥"

तथा 'कर्मणा' क्षतत्राणलक्षणेन भवति क्षत्रियः, वैश्यः 'कर्मणा' कृषिपाशुपाल्यादिना भवति, शूद्रो भवति तु 'कर्मणा' शोचनादिहेतुप्रैषादिसंपादनरूपेण, कर्माभावे हि ब्राह्मणादिव्यपदेशानाऽऽसन्नेवेति, ब्राह्मणप्रक्रमेऽपि यच्छेषाभिधानं तन्मा भूत्रिरनुक्रोशतेति व्याप्तिदर्शनार्थं, किञ्च-भवन्मतेऽप्युक्तम्-

"एकवर्णमिदं सर्वं, पूर्वमासीद्युधिष्ठिर!।
क्रियाकर्मविभागेन, चातुर्वर्ण्यं व्यवस्थितम्॥"

किमिदं स्वमनीषिकयैवोच्यते इत्याह-'एतान्' अनन्तरोक्तानहिंसाद्यर्थान् 'प्रादुरकार्षीत्' प्रकटितवान् 'बुद्धः' अवगततत्त्वः, पठ्यते च-'एए पाउकरा धम्मा' 'एते' उक्तरूपाः 'प्रादुष्कराः' नैर्मल्यकारितयाऽऽत्मनः प्रकाशहेतवः 'धर्माः' अहिंसादयो, यैर्भवति 'स्नातकः' केवली सर्वकर्मभिर्विनिर्मुक्तः, इह च प्रत्यासन्नमुक्तितया सर्वकर्मविनिर्मुक्तः, सुब्व्यत्ययात्प्रथमार्थे द्वितीया, 'त' मित्यभिहितगुणं तत्त्वतः स्नातकं वा वयं ब्रूमो ब्राह्मणम्। सम्प्रत्युपसंहर्तुमाह 'एवम्' उक्तप्रकारेण गुणैः -अहिंसादिभिः समायुक्ताः -समन्विता गुणसमायुक्ता

ये भवन्ति 'द्विजोत्तमाः' ब्राह्मणप्रधानास्ते 'समर्थाः' शक्ताः 'तुः' पूरणे उद्धर्तुं संसारादिति गम्यते अर्थान्मुक्तिपदे व्यवस्थापयितुं 'परम्' आत्मन्यतिरिक्तमात्मानमेव वेत्यष्टादशसूत्रगर्भार्थः ॥ अभिधाय चेदमवस्थितो भगवान्, ततश्च-

मू.(११७) एवं तु संसए छिन्ने, विजयघोसे य बंभणे।
समुदाय तओ तं तु, जयघोसं महामुनिं॥

मू.(११८) तुट्ठे य विजयघोसे, इणमुदाहु कयंजली।
माहणत्तं जहाभूयं, सुट्ठु मे उवदंसियं॥

मू.(११९) तुब्भे जइया जन्नाणं, तुब्भे वेयविदो विऊ।
जोइसंगविऊ तुब्भे, तुब्भे धम्माण पारगा॥

मू.(१०००) तुब्भे समत्था उद्धत्तुं, परं अप्पाणमेव य।
तमनुग्गहं करेहऽम्हं, भिक्खू णं भिक्खुउत्तमा॥

वृ. सूत्रचतुष्टयं प्रतीतार्थम्, 'एवम्' उक्तप्रकारेण 'तुः' वाक्यान्तरोपन्यासे 'संशये' प्रागभिहितरूपे 'छिन्ने' अपनीते 'विजयघोषः' विजयघोषनामा 'चः' पूरणे 'ब्राह्मणः' माहणः पठ्यते च-'माहने' 'समुदाय'त्ति आर्षत्वात् 'समादाय' सम्यग् गृहीत्वाऽवधार्येति योऽर्थः 'तयं'ति तकां प्रक्रमाज्जयघोषवाचं, 'तं तु' त्ति तं च जयघोषं महामुनिं, यथैष मम भ्राता एष एव च महामुनिरिति, किं कृतवानित्याह-'तुट्ठे'इत्यादि, केचित्त्वनन्तरसूत्रे तृतीयपादमेवं पठन्ति-'संजाणंतो तओ तं तु' अत्र च 'संजानन्' स एवायं मम सौदर्य इति प्रत्यभिजानन्, युक्तं चैतद्, यतो वक्ष्यति सूत्रस्पर्शिकनिर्युक्तौ-'संजाणंतो भणई जयघोसं जायगो विजयघोसो'त्ति, तथा 'तुष्टः' परितोषितः 'चः' पूरणे विजयघोषः 'इदं' वक्ष्यमाणम् 'उदाहु'त्ति 'उदाह' ब्रूते, तत्कालापेक्षया वर्त्तमानता, कृताञ्जलिः प्राग्वत्, यदाह तदर्शयति-ब्राह्मणत्वं 'यथाभूतं' यथाऽवस्थितं सु इति-शोभनं यथा भवत्येवं तिष्ठन्तीति सुष्ठु, औणादिकः कुप्रत्ययः, 'मे' मम 'उपदर्शितम्' इति प्रकटितम्।

किञ्च-यूयं 'जइय'त्ति यष्टारो यज्ञानां, यूयं 'वेदविदः' वेदज्ञाः 'विदु'त्ति विद्वांसः, यद्वा हे 'विदः' यथाऽवस्थितवस्तुवेदिनो!, ज्योतिषाङ्गविदो यूयं, यूयं 'धर्माणां' सदाचाराणां पारगाः, भवतामेव तत्त्ववेत्तृत्वेन सर्वशास्त्रावारिभिपारदर्शित्वान्निर्वाहितसदाचारत्वाच्चेत्यभिप्रायः, तथा यूयं समर्था उद्धर्तुं परमात्मानमेव च, युष्माकमेव तात्त्विकगुणसमन्वितत्वात्, 'तत्' तस्माद् 'अनुग्रहं' भिक्षाग्रहणेनोपकारं 'कुरुत' विधत्तास्माकं 'भिक्षो!' तपस्विन्! नमिति वाक्यालङ्कारे 'भिक्षूत्तम' यतिप्रधान!, यदिवा भिक्षूणामुत्तमेति सम्बन्धः 'भिक्षु'त्ति भिक्षो! इति सूत्रचतुष्टयार्थः॥

एवं ब्राह्मणेनोक्ते मुनिराह-

मू.(१००१) न कज्जं मज्झ भिक्खेणं, खिप्पं निक्खमसू दिया।
मा भमिहिसि भयावत्ते, घोरे संसारसागरे॥

मू.(१००२) अवलेवो होइ भोगेसु, अभोगी नोवलिप्पई।
भोगी भमइ संसारे, अभोगी विप्पमुच्चई॥

मू.(१००३) उल्लो सुक्को य दो छूढा, गोलया मट्टियामया।

दो वि आवडिया कुड्डे, जो उल्लो सोऽत्थ लग्गई ॥

मू.(१००४) एवं लग्गंति दुम्मेहा, जे नरा कामलालसा ।
विरत्ता उ न लग्गंति, जहा से सुक्कगोलए ॥

वृ. 'न'त्यादि सूत्रचतुष्टयम्, 'न कार्यं' न प्रयोजनं मम 'भिक्खेणं'ति भिक्षया समुदानेन, किन्तु 'क्षिप्रं' शीघ्रं 'निष्काम' प्रव्रज 'द्विज ! ब्राह्मण !, भवनिष्क्रमणेनैव मम कार्यमिति भावः, किमेवमुपदिश्यते इत्याह-'मा भ्रमीः' मा पर्यटीः, आर्षत्वाच्च सूत्रे लुटः प्रयोगः, यदिवा मा भ्रमीष्यसीत्यपि न दुष्टं, यतो माङि लुङुक्तोऽयं तु मा, गर्भादिइहलोकभयादीनि आवर्ताः यस्मिन्नसौ भयावर्तस्तत्र 'घोरे' रौद्रे, पठ्यते च-'भवावत्ते दीहे'त्ति, अत्र च भवा मनुष्यभवादयः, अन्यत्रापि वत, 'दीर्घे' आयते 'संसारसागरे' भवसमुद्रे, अनेन च विपर्ययदोष उक्तः । एतदेव समर्थयितुमाह-

'उपलेपः' कर्मोपचयरूपो भवति 'भोगेसु' शब्दादिषुभुज्यमानेष्वितिगम्यते, भोगी-शब्दादिभोगवान्न तथाऽभोगी 'न' नैव 'उपलिप्यते' कर्मणोपदिह्यते, ततश्च भोगी भ्रमति संसारे अभोगी विप्रमुच्यते, मुक्तो भवतीत्यर्थः, इह च गृहस्थभावे भोगित्वं निष्क्रमणं तु तदभाव इति गृहिभावस्य सदोषत्वान्निष्क्रमणमेव युक्तमित्युक्तं भवति । यथा भोगेषूपलेपस्तदभावे चान्यथात्वं तथा दृष्टान्तद्वारेण दर्शयितुमाह-'उल्लो'त्ति आर्द्रः शुष्कश्चअनार्द्रो द्वावुभौ 'छूढ'त्ति क्षिप्तौ 'गोलकौ' पिण्डकौ मृत्तिकामयौ, द्वावपि 'आपतितौ' प्राप्तौ 'कुड्ये' भित्तौ, ततः किमित्याह- य आर्द्रः सो 'अत्रे'त्यनयोर्मध्ये 'लगति' श्लिष्यति प्रक्रमात्कुड्ये ।

दार्ष्टान्तिकयोजनामाह-एवं लगन्ति प्रस्तावात्कर्मणा 'दुर्मेधसः' दुर्बुद्धयो ये नराः 'काम-लालसाः' विषयलम्पटाः, विरक्तास्तुशब्दस्य पुनरर्थत्वात्कामभोगपराङ्मुखाः पुनर्न लगन्ति, उत्तरत्र तुशब्दस्य भिन्नक्रमात्त्वेनैवकारार्थतया च नैव कर्मणा संश्लिष्यन्ते यथा शुष्को गोलकः, इह चान्वयानन्तरं व्यतिरेकः सुखेनैव बुध्यत इति तमुक्त्वा प्रथममुत्क्षिप्तस्यापि दृष्टान्तस्य पश्चादभिधानमिति सूत्रचतुष्टयार्थः ॥ यदित्थं प्रज्ञापितोऽसौ कृतवांस्तदाह-

मू.(१००५) एवं से विजयघोसे, जयघोसस्स अंतिए ।
अणगारस्स निक्खंतो, धम्मं सुच्चा अणुत्तरं ॥

वृ. 'एवम्' उक्तप्रकारेण स विजयघोषो ब्राह्मणो जयघोषस्य 'अन्तिके' समीपे 'अनगारस्य' यतेः 'निष्क्रान्तः' प्रव्रजितः 'धर्मम्' अहिंसादि 'श्रुत्वा' आकर्ण्य 'अनुत्तरं' प्रधानं, पठ्यते च-'सोच्चा न केवलं'ति, तत्र च 'केवलं' विशुद्धमिति सूत्रार्थः ॥

सम्प्रत्यध्ययनार्थमुपसंहरन्ननयोर्निष्क्रमणफलमाह-

मू.(१००६) खवित्ता पुव्वकम्माइं, संजमेण तवेण य ।
जयघोसविजयघोसा, सिद्धिं पत्ता अणुत्तरं ॥ त्तिबेमि ॥

वृ. सुगममेव ॥ सकलाध्ययनतात्पर्यार्थमुपदर्शयन् सूत्रस्पर्शिकनिर्युक्तिमाह निर्युक्तिकृत्

नि.[४७५] अह एगइआए पडिमाए सो मुनि विहरमानो ।
वसुहं दुइज्जंतो पत्तो वाणारसिं नयरिं ॥

नि.[४७६] सो उज्जाणनिसन्नो मासक्खमनेण खेइयसरीरो ।

भिक्खट्ठ बंभनिज्जे उवट्ठिओ जन्नवाडंमि ॥

नि.[४७७] अह भणई जयघोसं कीस तुमं आगओ ? इहं मंते ! ।
न हु ते दाहामि इओ जायाहि हु अन्नओ भिक्खं ॥

नि.[४७८] सो एवं पडिसिद्धो जन्नवाडंमि जायगेण तहिं ।
परमत्थदिट्ठसारो तेण य तुट्ठो मणंमि तओ ॥

नि.[४७९] अह भणई अनगारो जं जायग ! आउसो निसामेह ।
वयचरिय भिक्खचरिआ दिट्ठा साहूण चरणंमि ॥

नि.[४८०] रज्जाणि उ अवहाया रायसिरिं अ(त)नुचरंति भिक्खाए ।
समनस्सउ मुक्कस्सा भिक्खा चरणं च करणं च ॥

नि.[४८१] संजाणंतो भणई जयघोसं जायगो विजयघोसो ।
अत्थि उ पभूअमन्नं भुंजउ भयवं ! पगामाए ॥

नि.[४८२] भिक्खेण न मे कज्जं मज्झ करणं तु धम्मचरणेणं ।
पडिवज्ज धम्मचरणं मा संसारंमि हिंडिहिसि ॥

नि.[४८३] सो समणो पव्वइओ धम्मं सोऊण तस्स समणस्स ।
जयघोसविजयघोसा सिद्धिं गया खीणसंसारा ॥

वृ. गाथानवकं व्याख्यातप्रायमेव, नवरम्, 'एगराइयाए' त्ति एकरात्रिक्या 'प्रतिमया' तथाविधाभिग्रहविशेषरूपया न तु द्वादश्या भिक्षुप्रतिमया, तत्र मासक्षपणासम्भवात्, तथा च तत्स्वरूपम्-"एगराईयं भिक्खुपडिमं पडिवन्नस्स अनगारस्स निच्चं वोसट्ठकाए (यस्स) जाव अहियासे० कप्पति से अट्ठमेणं भत्तेणं अपाणएणं बहिया गामस्स जाव रायहाणीए वा ईसिं दोवि पाए साहट्टु वग्घारियपाणिस्स एगपोग्गलदिट्ठिस्स अनिमिसनयनस्स ईसिपब्भारगएणं काएन अहापनिहिएहिं गत्तेहिं सव्विंदिएहिं गुत्तेहिं ठाणं ठाइत्तए" इत्यादि, तत्राष्टममेवोक्तमत्र तु वक्ष्यति-'मासक्षपणेन खेदितशरीर' इति।

'विहरन्' अप्रतिबद्धविहारमाचरन्, अयं च भावत एकस्थानस्थितस्यापि संभवत्यत उच्यते-'वसुधां' पृथ्वीं 'दूइज्जंतो' त्ति परिभ्रमन् तथा 'उद्याननिषन्नः' उद्यानाश्रितः सन् मासक्षपणेन खेदितं-श्रममानीतं शरीरं न पुनर्मनोऽस्येति मासक्षपणखेदितशरीरः 'बंभणिज्जे' त्ति ब्राह्मणानामिज्या-पूजा यस्मिन् स ब्राह्मणेज्यस्तस्मिन् 'इओ' त्ति 'इतः' ब्राह्मणार्थमुपस्कृतादाहारात् 'जायाहि' त्ति याचस्व, 'हु:' अवधारणे भिन्नक्रमश्च, ततश्च 'अन्यत एव' अस्मद्व्यतिरिक्तात् भिक्षां याचस्वेति सम्बन्धः।

'परमट्ठदिट्ठसारे' त्ति प्राकृतत्वाद् दृष्टः-उपलब्धः परमार्थाय-मोक्षाय सारः-प्रस्तावात्क्षान्त्यादिरूपः प्रधानोपायः परमार्थानां वा ज्ञानादीनां सारः-प्रधानं येनासौ दृष्टपरमार्थसारः, त्वं याजक! 'आउसो' त्ति आयुष्मन्! कोमलामन्त्रणमेतत्, 'वयचरिय' त्ति इवशब्दस्य गम्यमानत्वाद् व्रतचर्येव भिक्षायै चर्या-पर्यटनं भिक्षाचर्या 'दृष्टा' विहितत्वेनोपलब्धा तीर्थकरादिभिरिति गम्यते, साधूनां चर्यत इति चरणम्-आचारस्तस्मिन्।

किञ्च-'राज्यानि' सप्ताङ्गानि 'तु:' समुच्चये भिन्नक्रमश्च 'अपहाय' त्यक्त्वा 'राज्यश्रियं'

तु छत्रचामराद्यलङ्काररूपां किंगित्याह 'अनुचरन्ति'पर्यटन्ति साधव इति प्रक्रमः 'भिक्षार्थं'भिक्षार्थं, किमिति ? श्रमणस्य तुरिति यस्मात् 'मुक्तस्य'निःसङ्गस्य, अकारोऽलाक्षणिकः, भिक्षेत्युपलक्षणत्वाद्भिक्षाचार्या 'चरणं च' व्रतादि चरणहेतुत्वेन 'करणं च' पिण्डविशुद्धादिहेतुत्वेन, ततो विहितानुष्ठानरूपत्वाद्राजर्षिभिरपि सेवितत्वाच्च भिक्षाचर्यायास्तद्विधानार्थमहमिहायातो, भवांस्तु ददातु मा वा भिक्षामिति भावः। 'संजानन्' प्रत्यभिजानानः 'पकामाए'त्ति आर्षत्वात्प्रकामम्-अत्यर्थं।

'धर्मचरणेन' धर्मानुष्ठानेन भवतीति गम्यते। 'सः' इति विजयघोषः सह मनसा चित्तेन वर्त्तत इति समनाः, किमुक्तं भवति ?-भावतो न तु बहिर्वृत्त्यैव, तस्य श्रामण्यान्तिक इति गम्यत इति निर्युक्तिगाथानवकार्थः।

'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वदेव ॥

अध्ययनं-२५-समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
पञ्चविंशतितममध्ययनं सनिर्युक्तिकं सटीकं समाप्तम्

अध्ययनं-२६-सामाचारी

वृ. व्याख्यातं यज्ञीयाभिधानं पञ्चविंशमध्ययनम्, अधुना षड्विंशमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने ब्रह्मगुणा उक्ताः, तद्वांश्च यतिरेव भवति, तेन चावश्यं सामाचारी विधेयेति साऽस्मिन्नभिधीयते इत्यभिसम्बन्धागतस्यास्योपक्रमादि प्राग्वत्प्ररूप्यं यावन्नामनिष्पन्ननिक्षेपे सामाचारीति नाम, अतः साम आचार इति च निक्षेपव्यमित्यभिप्रायेणाह निर्युक्तिकृत्-

नि.[४८४] निक्खेवो सामंमि(य)चउव्विहो दुव्विहो होइ दव्वंमि।
आगमनोआगमओ नोआगओ य सो तिविहो ॥

नि.[४८५] जाणगसरीरभविए तव्वइरित्ते अ सक्कराईसुं।
भावंमि दसविहं खलु इच्छामिच्छाइअं होइ ॥

नि.[४८६] इच्छो मिच्छा तहक्कारो, आवस्सिआ अ निसीहिआ।
आपुच्छणा य पडिपुच्छा, छंदणा य निमंतणा ॥

नि.[४८७] उवसंपया य काले सामायारी भवे दसविहा उ।
एएसिं तु पयाणं पत्तेय परूवणं वुच्छं ॥

नि.[४८८] आयारे निक्खेवो चउक्कओ दुव्वि० ॥

नि.[४८९] जाणगसरीरभविए तव्वइरित्ते य नामणाईसुं।
भावंमि दसविहाए सामायारीइ आयरणा ॥

वृ. निक्खेवोइत्यादि गाथाः षट् प्रायः प्रतीतार्थाः, सूत्रव्याख्याने च काश्चिद्व्याख्यास्यन्ते, नवरं 'तद्व्यतिरिक्तं च' ज्ञशरीरभव्यशरीरव्यतिरिक्तं च द्रव्यसाम शर्करादिषु, आदिशब्दाल्क्षीरादिपरिग्रहः, ततश्च शर्करक्षीरदधिगुडादीनां यत्परस्परमविरोधेन व्यवस्थानं, भावे साम दशविधं 'खलुः' अवधारणे दशविधमेवेच्छामिथ्यादिकं सामाचारीस्वरूपमिति गम्यते,

भावसामत्वं चास्य तात्त्विकस्य क्षायोपशमिकादिभावरूपत्वात् परस्परमविरोधेन चावस्थानात्, तथा प्रत्येकप्ररूपणां वक्ष्ये इति प्रतिज्ञामभिधाय यत् प्ररूपणानभिधानं तदावश्यकनिर्युक्तौ कृतत्वात्तद्गाथयोरेव चैककर्तृकत्वेनेह लिखितत्वान्न दुष्टमिति भावनीयं, सूत्रक्रमोल्लङ्घनं तु यथाविषयं सर्वेषां सदाकृत्यत्वेन पूर्वापरभावस्याभावप्रदर्शनार्थं, तथा 'तव्वइरित्ते य नामणाईसु'न्ति सोपस्कारत्वान्नामनधावनादिषु सुकरणि यानि द्रव्याणि तानि तद्व्यतिरिक्तो द्रव्याचार उच्यते, यत उक्तम्-

"नामणधोवणवासणसिक्खावणसुकरणाविरोहीणि।
[illegible] चाणि लोए दव्वायारं वियाणाहि ॥"

भावे दशविधाया इच्छादिभेदेन सामाचार्या आचरणा, अत्र बहुलग्रहणात्स्त्रियां युट्, एवमाप्रच्छनादिष्वपि, भावत्वं तु जीवद्रव्यपर्यायत्वादस्येति गाथापट्कार्थः ॥

सम्प्रत्यध्ययननामान्वर्थमाह-

नि. [४९०] इच्छाइसाममेसुं आयरणं वन्निअं तु जम्हेत्थ।
तम्हा सामाचारी अज्झयणं होइ नायव्वं ॥

वृ. 'इच्छादिसाम'त्ति सुब्व्यत्ययाद् इच्छादिसामसु 'एषु' अनन्तराभिहितेषु 'आचरणम्' एतद्विषयमनुष्ठानं 'वर्णितं' प्ररूपितं 'तुः' पूरणे यस्मादत्राध्ययने तस्मात्सामाचारीति-सामाचारीनामकमिदमिति प्रक्रमे अध्ययनं भवति ज्ञातव्यम्, अयमाशयः-समाचारोऽत्र वर्ण्यते ततः समाचारे भवमिति विवक्षायां शैषिको ऽण् रूढितश्च स्त्रीलिङ्गता, तथा च 'टिड्ढाणञ्' इत्यादिना ङीपि सामाचारीति भवतीति गाथार्थः ॥

गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (१००७) *सामायारिं पवक्खामि, सव्वदुक्खविमुक्खणिं।*
जं चरित्ता न निग्गन्था, तिन्ना संसारसागरं ॥

वृ. समाचरणं-समाचारस्तस्य भावो 'गुणवचनब्राह्मणादिभ्य' इति ष्यञ्, तस्य च षित्करणसामर्थ्यात् स्त्रियामपि वृत्तिरिति 'षिद्गौरादिभ्यश्चे'ति ङीपि सामाचारी तां-यतिजनेतिकर्त्तव्यतारूपामहं प्रवक्ष्यामि 'सर्वदुःखविमोक्षणीम्' अशेषशारीरमानसासातविमुक्तिहेतुम् अत एव यां सामाचारीं 'चरित्वा' आसेव्य 'न' इति वाक्यालङ्कारे 'निर्ग्रन्थाः' यतयस्तीर्णाः संसारसागरं, मुक्तिं प्राप्ता इति भावः, उपलक्षणत्वाच्च तरन्ति तरिष्यन्ति चेति सूत्रार्थः ॥

यथाप्रतिज्ञातमाह-

मू. (१००८) *पढमा आवस्सिया नामं, बिइया य निसीहिया।*
आपुच्छणा य तइया, चउत्थी पडिपुच्छणा ॥

मू. (१००९) *पंचमा छंदणा नामं, इच्छाकारो अ छट्ठओ।*
सत्तमो मिच्छकारो य, तहक्कारो य अट्ठमो ॥

मू. (१०१०) *अब्भुट्ठाणं नवमा, दसमा उवसंपया।*
एसा दसंगा साहूणं, समायारी पवेइया ॥

वृ. सूत्रत्रयं स्पष्टमेव, नवरं व्रतग्रहणादप्यारभ्य कारणं विना गुर्वग्रहे आशातनादोषसम्भवान्न

स्थेयं, किन्तु ततो निर्गन्तव्यं, न च निर्गमनमावश्यकीं विनेति प्रथममावश्यकी, निर्गत्य च यत्रास्पदे स्थेयं तत्र नैषेधिकीपूर्वकमेव प्रवेष्टव्यमिति तदनु नैषेधिकी, तत्रापि तिष्ठतो भिक्षाटनादिविषयाभिप्रायोत्पत्तौ गुरुपृच्छापूर्वकमेव तत्साधनमित्यनन्तरमाप्रच्छना, आप्रच्छनायामपि गुरुनियुक्तेन पुनः प्रवृत्तिकाले क्वचित्प्रष्टव्या एव गुरव इति तत्पृष्ठतः प्रतिप्रच्छना, कृत्वाऽपि गुर्वनुज्ञया भिक्षाटनादिकं नात्मम्भरिणैव भवितव्यमिति तदनु छन्दना प्राग्गृहीतद्रव्यजातेन शेषयतिनिमन्त्रणात्मिका, तस्यामपि प्रयोक्तव्य एवेच्छाकार इति तदनु तस्याभिधानम्, अयं चात्यन्तमवद्यभीरुणैव तत्त्वतो विधीयते, तेन च कथञ्चिदतिचारसम्भवे आत्मा निन्दितव्य इति तदनु मिथ्याकारः, कृतेऽपि च तस्मिन् बृहत्तरदोषसम्भवे गुरूणामालोचना दातव्या, तत्र च यदादिशन्ति गुरवस्तत्तथेति मन्तव्यमिति तथाकारः, तमेवं प्रतिपद्य च सर्वकृत्येषूद्यमवता भाव्यमिति तदनु तद्रूपमभ्युत्थानम्, उद्यमवता च ज्ञानादिनिमित्तं गच्छान्तरसङ्क्रमोऽपि विधेयः तत्र चोपसम्पद् गृहीतव्येत्यनन्तरमुपसम्पदुक्ता,

उपसंहारमाह-'एषा' अनन्तरोक्ता 'दशाङ्गा' इच्छादिदशावया 'साधूनां' यतीनां सामाचारी 'प्रवेदिता' तीर्थकरादिभिरुक्तेति सूत्रत्रयगर्भार्थः ॥

एतामेव प्रत्यवयवं विषयप्रदर्शनपूर्वकं विधेयतयाऽभिधातुमाह-

मू.(१०११) *गमने आवस्सियं कुज्जा, ठाणे कुज्जा निसीहियं।*
आपुच्छणा सयंकरणे, परकरणे पडिपुच्छणा॥

मू.(१०१२) *छंदणा दव्वजाएणं, इच्छकारो अ सारणे।*
मिच्छकारो अ निंदाए, तहकारो पडिस्सुए॥

मू.(१०१३) *अब्भुट्ठाणं गुरुपूया, अच्छणे उवसंपया।*
एवं दुपंचसंजुत्ता, सामायारी पवेइया॥

वृ. 'गमने' तथाविधालम्बनतो बहिर्निःसरणे आवश्यकेषु-अशेषावश्यकर्त्तव्यव्यापारेषु सत्सु भवाऽऽवश्यकी, उक्तं हि-"आवस्सिया उ आवस्सएहिं सव्वेहिं जुत्तजोगस्से"त्यादि, तां 'कुर्याद्' विदध्यात्, स्थीयतेऽस्मिन्निति स्थानम्-उपाश्रयमस्तस्मिन् प्रविशन्निति शेषः, कुर्यात्, कां ?-'नैषेधिकी' निषेधेनं निषेधः-पापानुष्ठानेभ्य आत्मनो व्यावर्त्तनं तस्मिन् भवा नैषेधिकी, निषिद्धात्मन एतत्सम्भवात्, उक्तं हि-"जो होइ निसिद्धप्पा निसीहिया तस्स भावओ होइ" इत्यादि, आङिति-सकलकृत्याधिव्याप्त्या प्रच्छना आप्रच्छना-इदमहं कुर्यां न वेत्येवंरूपा तां स्वयमित्यात्मनः करणं-कस्यचिद्विवक्षितकार्यस्य निर्वर्त्तनं स्वयंकरणं तस्मिन्, तथा 'पर-करणे' अन्यप्रयोजनविधाने प्रतिप्रच्छना, गुरुनियुक्तोऽपि हि पुनः प्रवृत्तिकाले प्रतिपृच्छत्येव गुरुं, स हि कार्यान्तरमप्यादिशेत् सिद्धं वा तदन्यतः स्यादिति, उभयत्र वा स्वकरणपरकरणे उपलक्षणमिति-उच्छ्वासनिःश्वासौ विहाय सर्वकार्येष्वपि स्वपरसम्बन्धिषु गुरवः प्रष्टव्या अतः सर्वविषयमपि प्रथमतः प्रच्छनमापृच्छेत्युच्यते, तथा च निर्युक्तिकृता सामान्येनैवावाचि-

"आपुच्छणा तु कज्जे"त्ति, तथा स्वपरसम्बधिनि सर्वत्रापि कृत्ये गुरुनियुक्तेन, पुनः प्रवृत्तिकाले यद्गुरुप्रच्छनं सा प्रतिपृच्छा, तथा च-"पुव्वनिउत्तेण होइ पडिपुच्छ"त्या-विशेषेणैवोक्तं, 'छन्दना' उक्तरूपा विधेयेति शेषः, एवमुत्तरत्रापि, 'द्रव्यजातेन' तथाविधा-

शानादिद्रव्यविशेषेण प्राग्गृहीतेनेति गम्यते, सूचकत्वात्सूत्रस्य, तथा चाह-''पुव्वगहिएण छंदणं'ति, इच्छास्वकीयोऽभिप्रायस्तया करणं-तत्कार्यनिर्वर्त्तनमिच्छाकारः, 'सारणे' इत्यौचित्यत आत्मनः परस्य वा कृत्यं प्रति प्रवर्त्तने, तत्रात्मसारणे यथेच्छाकारेण युष्मच्चिकीर्षितं कार्यमिदमहं करोमीति, अन्वाह च-''अहगं तुब्भं एयं करेमि कज्जं तु इच्छाकारेणं'ति, अन्यसारणे च मम पात्रलेपनादि सूत्रदानादि वा इच्छाकारेण कुरुतेति, तथा चान्वाह-

''जेइ अब्भत्थिज्ज परं कारणजाए करेज्ज से कोइ।
तत्थवि इच्छाकारो न कप्पइ बलाभिओगो उ॥''

तथा मिथ्येत्यलीकं मिथ्याकरणं मिथ्याकारः-मिथ्येदमिति प्रतिपत्तिः, सा चात्मनो निन्दाजुगुप्सा तस्यां, वितथाचरणे हि धिगिदं मिथ्या मया कृतमिति निन्द्यत एवात्मा विदितजिनवचनैः, तथाकरणं तथाकारः-इदमित्थं चैवेत्युभ्युपगमः, स च किं विषयः इत्याह-प्रतिश्रवणं प्रतिश्रुतं-गुरौ वाचनादिकं यच्छत्येवमेतदित्यभ्युपगमस्तस्मिन्, तथा चान्वाह-

''वायणपडिसुणणाए उवएसे सुत्तअत्थकहणाए।
अवितहमेयंति तहा अविकप्पेणं तहक्कारो॥''

अभीत्याभिमुख्येनोत्थानम्, उद्यमनमभ्युत्थानं तच्च 'गुरुपूय'त्ति सूत्रत्वाद् गुरुपूजायां, सा च गौरवाद्गुणम्-आचार्यग्लानबालादीनां यथोचिताहारभेषजादिसम्पादनम्, इह च सामान्याभिधानेऽप्यभ्युत्थानं निमन्त्रणारूपमेव परिगृह्यते, अत एव निर्युक्तिकृतैतत्स्थाने निमन्त्रणैवाभिहिता 'छंदणा य निमंतणे'ति, तथा 'अच्छणे'त्ति आसने प्रक्रमादाचार्यान्तरादिसन्निधौ अवस्थाने उप-सामीप्येन सम्पादनं-गमनं सम्पदादित्वात्क्विपि उपसंपद्-इयन्तं कालं भवदन्तिके मयाऽऽसितव्यमित्येवंरूपा, इयं च ज्ञानार्थतादिभेदेन त्रिधा, तथा चोक्तम्-''उवसंपया य तिविहा नाणे तह दंसणे चरित्ते य''त्ति 'एवम्' इत्युक्तप्रकारेण 'दुपंचसंजुत्त'त्ति आर्षत्वात् द्विपञ्चकसंयुक्तां दशसंख्यायुक्तामित्यर्थः, सामाचारीं 'प्रवेदयेत्' कथयेत् आर्षत्वाद् गुरुः शिष्यायेति शेषः, अनेन च गुरुणा सदा तदुपदेशपरैणैव भवितव्यमित्यर्थत उक्तं, पठ्यते च-'एसा दसंगा साहूणं, सामायारी पवेइय'त्ति, एतच्च स्पष्टमिति सूत्रत्रयार्थः॥

एतावता दशविधसामाचारीमभिधायौधसामाचारीं विवक्षुरिदमाह-

मू.(१०१४) *पुव्विल्लंमि चउब्भागे, आइच्चंमि समुट्ठिए।*
भंडगं पडिलेहित्ता, वंदित्ता य तओ गुरुं॥

मू.(१०१५) *पुच्छिज्जा पंजलिउडो, किं कायव्वं मए इहं?।*
इच्छं निओइउं भंते!, वेयावच्चे व सज्झाए॥

मू.(१०१६) *वेयावच्चे निउत्तेणं, कायव्वमगिलायओ।*
सज्झाए वा निउत्तेणं, सव्वदुक्खविमुक्खणे॥

वृ. 'पुव्विल्लंमि'त्ति पूर्वस्मिंश्चतुर्भागे आदित्ये 'समुत्थिते' समुद्गते, इह च यथा दशाविकलोऽपि पटः पट एवोच्यते, एवं किञ्चिदूनोऽपि चतुर्भागश्चतुर्भाग उक्तः, ततोऽयमर्थः-बुद्धा नभश्चतुर्धा विभज्यते, तत्र पूर्वदिक्संबुद्धे किञ्चिदूननभश्चतुर्भागे यदादित्यः समुदेति

तदा, पादोनपौरुष्यामित्युक्तं भवति 'भाण्डकं' पतद्ग्रहाद्युपकरणं 'प्रतिलेख्य' सामयिक-परिभाषया चक्षुषा निरीक्ष्योपलक्षणत्वात्प्रमृज्य च 'वस्त्रिकात्व' च भस्मीकृत्य 'ततः' इति प्रतिलेखनानन्तरं 'गुरुम्' आचार्यादिकं, किमित्याह-'पृच्छेत्' पर्यनुयुञ्जीत प्रक्रमाद्गुरुमेव 'पंजलिउड'त्ति प्राग्वत्कृतप्राञ्जलिः, यथा-किं 'कर्त्तव्यम्' अनुष्ठेयं 'मया' त्यात्मनिर्देशः 'इह' अस्मिन् समये इति गम्यते, कदाचिद्गुरवो मन्येरन् स्वाध्यायवैयावृत्तयोरन्यतरस्मिन्नेवास्य नियोगे वाञ्छेत्यतो ब्रूयात्-

'इच्छामि नियोइउं'ति अन्तर्भावितण्यर्थत्वान्नियोजयितुं युष्माभिरात्मानमिति शेषः 'भंते'त्ति भदन्त ! 'वेयावच्चे'त्ति वैयावृत्ये-ग्लानादिव्यापारे वाशब्दो भिन्नक्रमस्ततः 'सज्झाए'त्ति आर्षत्वात्स्वाध्याये वा, इह च पात्रप्रतिलेखनानन्तरं गुरुं पृच्छेदिति यदुक्तं तत्प्रायस्तदैव बहुतर-वैयावृत्त्यविधानसम्भवात्, यद्वा पूर्वस्मिन्नभश्चतुर्भागे आदित्ये समुत्थिते इव समुत्थिते, बहुतर-प्रकाशीभवनात्तस्य, भाण्डमेव भाण्डकं ततस्तदिव धर्मद्रविनोपार्जनाहेतुत्वेन मुखवस्त्रि-कावर्पाकल्पादीह भाण्डकमुच्यते, तत्प्रतिलेख्य वन्दित्वा च ततो गुरुं पृच्छेत्, शेषं प्राग्वत्, उपलक्षणं चैतद्-यतः सकलमपि कृत्यं विधाय पुनरभिवन्दनापूर्वकं प्रष्टव्या एव गुरव इति, एवं च पृष्ट्वा यत्कर्तव्यं तदाह-वैयावृत्ये 'नियुक्तेन' व्यापारितेन कर्त्तव्यं प्रक्रमात् वैयावृत्त्यम्, 'अगिलायउ'त्ति अग्लान्यैव शरीरश्रममविचिन्त्यैवेतियावत्, स्वाध्याये वा नियुक्तेन सर्व-दुःखविमोक्षणे, सकलतपःकर्मप्रधानत्वादस्य, स्वाध्यायोऽग्लान्यैव कर्त्तव्य इति प्रक्रम इति सूत्रत्रयार्थः ॥ इत्थं सकलौधसामाचारीमूलत्वात्प्रतिलेखनायास्तत्कालं सदाविधेयत्वाद्गुरु-पारतन्त्र्यस्य तच्चाभिधायौत्सर्गिकं दिनकृत्यमाह-

मू.(१०१७) *दिवसस्स चउरो भागे, कुज्जा भिक्खू वियक्खणो।*
तओ उत्तरगुणे कुज्जा, दिनभागेसु चउसुवि॥

मू.(१०१८) *पढमं पोरिसिं सज्झायं, बीयं झाणं झियायई।*
तइयाए भिक्खायरियं, पुनो चउत्थीइ सज्झायं॥

वृ. सूत्रद्वयं स्पष्टमेव, नवरं चतुरो भागान् कुर्याद् बुद्धेत्युपस्कारः, 'तत' इति चतुर्भाग-करणादनन्तरमिति गम्यते उत्तरगुणान् मूलगुणापेक्षया स्वाध्यायादींस्तत्कालोचितान् 'कुर्याद्' विदध्यात्, क्व दिनभागे कमुत्तरगुणं कुर्यादित्याह-प्रथमां पौरुषीं 'स्वाध्यायं' वाचनादिकं, सूत्रपौरुषीत्वादस्याः, कुर्यादितीहोत्तरत्र च क्रियान्तराभावेऽनुवर्त्तते, द्वितीयां प्रक्रमात्पौरुषीं ध्यानं 'झियायइ'त्ति ध्यायेत्, ध्यानं चेहार्थपौरुषीत्वादस्या अर्थविषय एव मानसादिव्या पारणमुच्यते, ध्यायेदिति वाऽनेकार्थत्वाद्धातूनां कुर्यात्, इह च प्रतिलेखनाकालस्याल्पत्वेना-विवक्षितत्वादुभयत्र 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया, तृतीयायां भिक्षाचर्यां, पुनश्चतुर्थ्यां स्वाध्यायम्, उपलक्षणत्वात्तृतीयायां भोजनबहिर्गमनादीनि, इतरत्र तु प्रतिलेखनास्थण्डिल-प्रत्युपेक्षणादीनि गृह्यन्ते, इत्थमभिधानं च कालापेक्षयैव कृष्यादेरिव सकलानुष्ठानस्य सफल-त्वादिति सूत्रद्वयार्थः ॥ यदुक्तं प्रथमपौरुषीं स्वाध्यायं कुर्यात्तत्परिज्ञानार्थमाह-

मू.(१०१९) *आसाढे मासे दुपया, पोसे मासे चउप्पया।*
चित्तासोएसु मासेसु, तिपया हवइ पोरिसी॥

मू.(१०२०) *अंगुलं सत्तरत्तेनं, पक्खेणं तु दुअंगुलं।*
वड्ढए हायए वावि, मासेणं चउरंगुलं॥

मू.(१०२१) *आसाढबहुलपक्खे, भद्दवए कत्तिए य पोसे य।*
फग्गुणवइसाहेसु य नायव्वा ओमरत्ता उ॥

वृ. तत्र प्रथमं प्रतीतमेव, द्वितीयमपि तथैव, नवरं सप्तरात्रेणेति, दिनाविनाभावित्वाद्रात्रीणां सप्ताहोरात्रेण वर्द्धते दक्षिणायने हीयत उत्तरायणे, इह च सप्तरात्रेणेत्यत्र सार्द्धनेति विशेषो द्रष्टव्यः, पक्षेण द्रव्यंगुलवृद्धिभिधानात्, अन्यच्च केषुचिन्मासेषु दिनचतुर्दशकेनापि पक्षः संभवति, तत्र च सप्ताहोरात्रेणाप्यंगुलवृद्धिहान्या न कश्चिद्दोषः॥

केषु पुनर्मासेषु दिनचतुर्दशकेनापि पक्षसम्भव इत्याह-'आसाढे'त्यादि, इदमपि सुगममेव, नवरं बहुलपक्ष इति भाद्रपदादिष्वपि प्रत्येकमभिसम्बध्यते, ततः 'आसाढे'त्ति आषाढे बहुलपक्षे भाद्रपदादिषु च बहुलपक्षे 'ओम'त्ति 'अवमा' न्यूना एकेनेति शेषः, 'रत्त'त्ति पदैकदेशेऽपि पदप्रयोगदर्शनादहोरात्राः एवं चैकदिनापहारे दिनचतुर्दशकेनैव कृष्णपक्ष एतेष्विति भावः, इदं च व्यवहारतः पौरुषीमानं, निश्चयतस्तु,

"अयनाईयदिनगणे अट्ठगुणेगट्ठिभाइए लद्धं।
उत्तरदाहिणमाइ उत्तरपयसोज्झपक्खेवो॥"

अत्र चायनम्-उत्तरायणं दक्षिणायनं च तस्यातीतदिनानि-अतिक्रान्तदिवसास्तेषां गणः-समूहोऽयनातीतदिनगणः, स चोत्कृष्टतस्त्र्यशीतं शतं, तच्चाष्टगुणं जातानि चतुर्दश शतानि चतुःषष्ट्यधिकानि, तत्र चैकषष्ट्या भागे हृते लब्धानि चतुर्विंशतिरंगुलानि, तत्रापि द्वादशभिरंगुलैः पदमिति जाते द्वे पदे, एतयोश्च, 'उत्तरदाहिणमाई'त्ति उत्तरायणादौ दक्षिणायनादौ च 'उत्तरपद'त्तिउत्तरपदयोः 'सोज्झ'त्ति शुद्धिः प्रक्षेपशश्च, तत्र हि उत्तरायणप्रथमदिने चत्वारि पदान्यासन् ततस्तन्मध्यात्पदद्वयोत्सारणे जाते कर्कटसंक्रान्तयदिने द्वे पदे, दक्षिणायनाद्यदिने तु द्वे पदे अभूतां, तन्मध्ये च द्वयोः क्षिप्तयोर्जातानि मकरसंक्रान्तौ चत्वारि पदानि, इदं चोत्कृष्ट-जघन्य-दिनयोः पौरुषीमानं, मध्यमदिनेष्वप्यभिहितनीतितः सुधिया भावनीयमिति सूत्रत्रयार्थः॥

इह प्रथमपौरुष्यामुपलक्षणद्वारेण प्रतिलेखनाया अपि विधेयत्वमुक्तं, पादोनैव चासौ तत्कालत्वेन प्राक् प्रदर्शितेति तत्परिज्ञानोपायमाह-

मू.(१०२२) *जिट्ठामूले आसाढसावणे छहि अंगुलेहि पडिलेहा।*
अट्ठहि बिइयतीयंमी तइए दस अट्ठहि चउत्थे॥

वृ. जिट्ठासूत्रम्। ज्येष्ठामूल इति ज्येष्ठे, आषाढश्च श्रावणश्चाषाढश्रावणं तत्र, कोऽर्थः?-ज्येष्ठे श्रावणे च षड्भिरंगुलैः प्रत्यहं प्रागुपदिष्टपौरुषीमाने प्रक्षिप्तैरिति चेहोत्तरत्र(च) गम्यते, प्रतिलेखेति प्रक्रमात्प्रतिलेखनाकालः, एवं तावदेकस्मिन्त्रिके, तथाऽष्टभिरंगुलैरिति सर्वत्रानुवर्त्तते द्वितीयत्रिके भाद्रपदाश्वयुक्कार्त्तिकलक्षणे प्रतिलेखनाकालः, तथा तृतीये प्रक्रमात्त्रिके मार्गशीर्षपौषमाघात्मनि दशभिः प्रतिलेखनाकालः, तथाऽष्टभिश्चतुर्थे प्राग्वत्रिके फाल्गुन-चैत्रवैशाखस्वरूपे प्रतिलेखनाकालः इति सूत्रार्थः॥

इत्थं दिनकृत्यमभिधाय रात्रौ यद्विधेयं तदाह-

मू.(१०२३) *रत्तिंपि चउरो भाए, भिक्खू कुज्जा वियक्खणो।*
तओ उत्तरगुणे कुज्जा राईभो(भा)गेसु चउसुवि॥

मू.(१०२४) *पढम पोरिसि सज्झायं बीयं झाणं झियायई।*
तइयाए निद्दमुक्खं तु चउत्थी भुज्जोवि सज्झायं॥

वृ. सूत्रद्वयं स्पष्टमेव, नवरं रात्रिमपि न केवलं दिनमित्यपिशब्दार्थः, । द्वितीयां पौरुषीं 'ध्यायति ध्यानं' सूक्ष्मसूत्रार्थलक्षणं क्षितिवलयद्वीपसागरभवनादि वा 'झियाए'त्ति 'ध्यायेत्' चिन्तयेत्, तृतीयायां निद्राया मोक्षः-पूर्वनिरुद्धाया मुत्कलना निद्रामोक्षः-स्वाप इत्यर्थस्तं, कुर्यादिति सर्वत्र प्रक्रमाद्योज्यं, वृषभापेक्षं चैतत्, सामस्त्येन तु प्रथमचरमप्रहरजागरणमेव, तथा चागमः-

"सव्वेसि पढमजामे दोन्नि उ वसभाण आदिमा जामा।
तंतितो होइ गुरूणं चउत्थओ होइ सव्वेसिं॥"

शयनविधिश्चायम्-बहुपरिपुन्नाए पोरिसीए गुरुसगासं गंतूणं भणति इच्छामि खमासमणो वंदिउं जावणिज्जाए, निसीहियाए मत्थएण वंदामि, बहुपडिपुन्ना पोरिसी अनुजाणह संथारयं, ताहे पढमं काइयाभूमिं वच्चंति, ताहे जत्थ संथारभूमि तत्थ वच्चंति, ताहे उवहिंमी उवओगं करिता यमज्जेत्ता उ उवहीए दोरयं छोडंति, ताहे संथारपट्टयं उत्तरपट्टयं च पडिलेहित्ता दोवि एगत्थ लाइत्ता ऊरंमि ठवंति, ताहे संथारभूमिं पमज्जंति, ताहे संथारयं अच्छुरंति सउत्तरपट्टयं, तत्थ (य) लग्गा मुहपोत्तियाए उवरिमं कायं पमज्जंतित्ति हिट्ठिल्लं रयहरणेणं, कप्पे य वामपासे ठवेंति, पुनो संथारयं चडेत्ता-जेट्ठज्जाईण पुरओ चिट्ठंताणं-अनुजाणेज्जह, पुणो सामाईयं तिन्नि वारे कड्ढिऊण सुयंति त्ति। सुप्तानां चायं विधिः-

"अनुजाणह संथारं बाहुवहाणेण वामपासेणं।
पायपसारणि कुक्कुडि अतरंतो पमज्जए भूमिं॥१॥
संकोए संडासं उव्वत्तंती य कायपडिलेहा।
दव्वादीउवओगं उस्सासनिरुंभणालोयं॥२॥

इति सूत्रद्वयार्थः॥ सम्प्रति रात्रिभागचतुष्टयपरिज्ञानोपायमुपदर्शयन् समस्तयतिकृत्यमाह-

मू.(१०२५) *जं नेइ जया रत्तिं नक्खत्तं तंमि नहचउब्भाए।*
संपत्ते विरमिज्जा सज्झाय पओसकालंमि॥

मू.(१०२६) *तम्मेव य नक्खत्ते गयणं चउभागसावसेसंमि।*
वेरत्तियंपि कालं पडिलेहित्ता मुनी कुज्जा॥

वृ. यत्'नयति' प्रापयति परिसमाप्तिमिति गम्यते यदा रात्रिं नक्षत्रं तस्मिन्नभश्चतुर्भागे संप्राप्ते 'विरमेत्' निवर्त्तेत 'सज्झाय'त्ति स्वाध्यायात्, 'प्रदोषकाले' रजनीमुखसमये प्रारब्धादिति शेषः, तस्मिन्नेव नक्षत्रे प्रक्रमात्प्राप्ते, क्वेत्याह-'गगण'त्ति गगने, कीदृशि?-चतुर्भागेन गम्येन सावशेषं-सोद्धरितं चतुर्भागसावशेषं तस्मिन् 'वैरात्रिकं' तृतीयम्, अपिशब्दान्निजनिजसमये प्रादोषीकादिकं च कालं 'पडिलेहित्त'त्ति प्रत्युपेक्ष्य प्रतिजागर्य मुनिः 'कुर्यात्, करोतेः सर्वधात्वर्थत्वाद् गृह्णीयात्, इह च काक्वोपलक्षणद्वारेण प्रथमादिषु नभश्चतुर्थभागेषु संप्राप्ते नेतरि

नक्षत्रे रात्रेः प्रथमादयः प्रहरा इत्युक्तं भवतीति सूत्रद्वयार्थः ॥

इत्थं सामान्येन दिनरजनिकृत्यमुपदर्श्य पुनर्विशेषतस्तदेव दर्शयंस्तावद्दिनकृत्यमाह

मू.(१०२७) पुव्विल्लंमि चउब्भागे, पडिलेहित्ता न भंडयं ।
गुरुं वंदित्तु सज्झायं, कुज्जा दुक्खविमुक्खणं ॥

मू.(१०२८) पोरिसीए चउब्भाए, वंदित्ता न तओ गुरुं ।
अपडिक्कमित्तु कालस्स, भायणं पडिलेहिए ॥

मू.(१०२९) मुहपत्तिं पडिलेहित्ता, पडिलेहिज्ज गुच्छयं ।
गुच्छगलइयंगुलिओ, वत्थाइं पडिलेहए ॥

मू.(१०३०) उड्ढं थिरं अतुरियं पुव्विं ता वत्थमेव पडिलेहे ।
तो बिइयं पप्फोडे तइयं च पुनो पमज्जिज्जा ॥

मू.(१०३१) अनच्चावियं अवलियं अनानुबंधिं अमोसलिं चेव ।
छप्पुरिमा नव खोडा पाणीपाणिविसोहणं ॥

मू.(१०३२) आरभडा सम्मद्दा वज्जेयव्वा य मोसली तइया ।
पप्फोडणा चउत्थी विक्खित्ता वेइया छट्ठा ॥

मू.(१०३३) पसिढिलपलंबलोल एगामोसा अनेगरुवधुना ।
कुणति पमाणि पमायं संकिय गननोवगं कुज्जा ॥

मू.(१०३४) अनुनाइरित्तपडिलेहा अविवच्चासा तहेव य ।
पढमं पयं पसत्थं सेसाणि उ अप्पसत्थाणि ॥

मू.(१०३५) पडिलेहणं कुणंतो मिहो कहं कुणइ जनवयकहं वा ।
देइ व पच्चक्खाणं वाएइ सयं पडिच्छइ वा ॥

मू.(१०३६) पुढवी आउक्काए तेऊ वाऊ वणस्सइ तसाणं ।
पडिलेहणापमत्तो छण्हंपि विराहओ होइ ॥

मू.(१०३७) तइयाए पोरिसीए, भत्तं पाणं गवेसए ।
छण्हं अन्नयरागंमि, कारणंमि समुट्ठिए ॥

मू.(१०३८) वेयणवेयावच्चे इरियट्ठाए य संजमट्ठाए ।
तह पाणवत्तियाए छट्ठं पुण धम्मचिंताए ॥

मू.(१०३९) निग्गंथो धिइमंतो निग्गंथीवि न करिज्ज छहिं चेव ।
ठाणेहिं तु इमेहिं अणइक्कमणा य से होइ ॥

मू.(१०४०) आयंके उवसग्गे तितिक्खया बंभचेरगुत्तीसु ।
पाणिदयातवहेउं सरीरवुच्छेयणट्ठाए ॥

मू.(१०४१) अवसेसं भंडगं गिज्झा, चक्खुसा पडिलेहए ।
परमद्धजोअणाओ, विहारं विहरे मुनी ॥

मू.(१०४२) चउत्थीए पोरिसीए निक्खिवित्ता न भायणं ।
सज्झायं च तओ कुज्जा, सव्वभावविभावणं ॥

मू.(१०४३) पोरिसीए चउब्भाए, वंदित्ता न तओ गुरुं।
पडिक्कमित्ता कालस्स, सिज्जं तु पडिलेहए॥

मू.(१०४४/१) पासवणुच्चारभूमिं च, पडिलेहिज्ज जयं जई॥

वृ. पुव्विल्लेत्यादिसूत्राणि सप्तदश सार्द्धानि, तत्र सूत्रद्वयं व्याख्यातप्रायमेव, नवरं 'पूर्वस्मिन्' श्चतुर्भागे' प्रथमपौरुषीलक्षणे प्रक्रमाद् दिनस्य प्रत्युपेक्ष्य 'भाण्डकं' प्राग्वद्वर्षाकल्पादि उपधिमादित्योदयसमय इति शेषः, द्वितीयसूत्रे च पौरुष्याश्चतुर्थभागेऽवशिष्यमाण इति गम्यते, ततोऽयमर्थः-पादोनपौरुष्यां भाजनं प्रतिलेखयेदिति सम्बन्धः, स्वाध्यायदुपरतक्षेत्कालस्य प्रतिक्रम्यैव कृत्यान्तरमारब्धव्यमित्याशङ्क्येतात आह-अप्रतिक्रम्य कालस्य, तत्प्रतिक्रमार्थं कायोत्सर्गविधाय, चतुर्थपौरुषयामपि स्वाध्यायस्य विधास्यमानत्वात्।

प्रतिलेखनाविधिमेवाह-'मुखवस्त्रिकां' प्रतीतामेव 'प्रतिलेख्य' प्रतिलेखयेत् 'गोच्छकं' पात्रकोपरिवर्त्युपकरणं, ततश्च 'गोच्छगलइअंगुलिउ'त्ति प्राकृतत्वादंगुलिभिर्लातो-गृहीतो गोच्छको येन सोऽयमंगुलिलातगोच्छकः 'वस्त्राणि' पटलरूपाणि 'प्रतिलेखयेत्' प्रस्तावात्प्रमार्जयेदित्यर्थः।

इत्थं तथाऽवस्थितान्येव पटलानि गोच्छकेन प्रमृज्य पुनर्यत्कुर्यात्तदाह-'ऊर्ध्वं' कायतो वस्त्रतश्च, तत्र कायत उत्कटुकत्वेन स्थितत्वात्, वस्त्रतश्च तिर्यक्प्रसारितवस्त्रत्वात्, उक्तं हि-उक्कुडतो तिरियं पेहे जा खिलितो' 'स्थिरं' दृढग्रहणेन 'अत्वरितम्' अद्रुतं स्तिमितं यथा भवत्येवं 'पूर्वं' प्रथमं 'ता' इति तावद् 'वस्त्रं' पडलकरूपं, जातावेकवचनं, पटलकप्रक्रमेऽपि सामान्यवाचकवस्त्रशब्दाभिधानं वर्षाकल्पादिप्रत्युपेक्षणायामप्ययमेव विधिरिति ख्यापनार्थम्, एवशब्दो भिन्नक्रमस्ततः 'पडिलेहि'त्ति 'प्रत्युपेक्षेतैव' आरतः परतश्च निरीक्षेतैव न तु प्रस्फोटयेत्, अथवा बिन्दुलोपाद् 'एवम्' अमुना ऊर्ध्वादिप्रकारेण प्रत्युपेक्षेत न त्वन्यथेति भावः, तत्र च यदि जन्तून् पश्यति ततो यतनयाऽन्यत्र संक्रमयमति, तददर्शने च 'तो' इति 'ततः' प्रत्युपेक्षणादनन्तरं द्वितीयमिदं कुर्यात् यदुत परिशुद्धं सत् प्रस्फोटयेत्-तत्प्रस्फोटनां कुर्यादित्यर्थः, तृतीयं च पुनरिदं कुर्यात्-यदुत प्रमृज्यात्, कोऽर्थः ?-प्रत्युपेक्ष्य प्रस्फोट्य च हस्तगतान् प्राणिनः प्रमृज्यादित्यर्थः, कथं पुनः प्रस्फोटयेत्प्रमृज्याद्वेत्याह-'अनर्तितं' प्रस्फोटनं प्रमार्जनं वा कुर्वतो वस्त्रं वर्षुवा यथा नर्तितं न भवति 'अवलितं' यथाऽऽत्मनो वस्य च वलितमिति मोटनं न भवति 'अनानुबंधि'न्ति 'अननुबन्धि' अनुबन्धेन-नैरन्तर्यलक्षणेन युक्तमनुबन्धि न तथा, कोऽर्थः ?-अलक्ष्यमाणविभागं यथा न भवति, 'आमोसलि'न्ति सूत्रत्वादामर्शवत्तिर्यगूर्ध्वमधो वा कुड्यादिपरामर्शवद्यथा न भवति, उक्तं हि-''तिरिउड्ढहघट्टणाऽऽमुसलि''ति, तथा किमित्याह-'छप्पुरिम'त्ति षट् पूर्वाः पूर्वं क्रियमाणतया तिर्यक्कृतवस्त्रप्रस्फोटनात्मका क्रियाविशेषा येषु ते षट्पूर्वाः, 'नवखोड'त्ति खोटकाः समयप्रसिद्धाः स्फोटनात्मकाः कर्त्तव्या इति शेषः 'पाणौ' पानितले 'प्राणिनां' कुन्थ्वादिसत्त्वानां विशोधनं पाठान्तरतश्च-'प्रमार्जनं' प्रस्फोटनं त्रिकत्रिकोत्तरकालं त्रिकत्रकसङ्ख्यं पाणिप्राणिविशोधनं पाणीप्राणिप्रमार्जनं वा कर्तव्यं।

प्रतिलेखनादोषपरिहारार्थमाह-आरभटा विपरीतकरणमुच्यते त्वरितं वाऽन्यान्यवस्त्रग्रहणेनसौ भवि, उक्तं हि-''वितहकरणमारभडा तुरियं वा अन्नमन्नगहणेणं' संमर्दनं समर्दा रूढित्वा-

त्स्त्रीलिङ्गता वस्त्रान्तःकोणसंचलनमुपधेर्या उपरि निषदनम्, उक्तञ्च-"अंतो व होज्ज कोना निसियणतत्थेव सम्मद्दा" वर्जयितव्येति सर्वत्र संबध्यते, 'चः' पूरणे 'मोसलि'त्ति तिर्यगूर्ध्वमधो वा सङ्घट्टना तृतीया, 'प्रस्फोटना' प्रकर्षेण रेणुगुण्डितस्यैव वस्त्रस्य झाटना चतुर्थी, विक्षेपणं विक्षिप्ता पञ्चमीति गम्यते, रूढित्वाच्च स्त्रीलिङ्गता, उक्तं हि 'लिङ्गमशिष्यं लोकाश्रयत्वात्' सा च प्रत्युपेक्षितवस्त्रस्यान्यत्राप्रत्युपेक्षिते क्षेपणं, प्रत्युपेक्षमाणो वा वस्तस्त्रांञ्चलं यदूर्ध्वं क्षिपति, वेदिका 'छट्ठ'त्ति षष्ठी, यत्र सम्प्रदायः- "वेतिया पंचविहा पन्नत्ता, तंजहा-उड्ढवेतिया अहोवेतिया तिरियवेतिया दुहतोवेतिया एगतोवेतिया' तत्थ उड्ढवेतिया उवरिं जुन्नगाणं हत्थे काऊण पडिलेहेइ, अहोवेइया अहो जुन्नगाणं हत्थे काऊण पडिलेहेइ, तिरियवेइया संडाससयाणं मज्झेण हत्थेण घित्तूण पडिलेहेइ, दुहतोवेइया बाहाणं अंतरे दोवि जुन्नगा काऊण पडिलेहेति, एगतो वेइया एगं जुन्नगं बाहाणमंतरे काउण पडिलेहेति।"

एवमेते षड् दोषाः प्रतिलेखनायां परिहर्त्तव्याः। तथा प्रशिथिलं नाम दोषो यदद्दढमनिगृह्यन्तं वा वस्त्रं गृह्यते, प्रलम्बो-यद्विषमग्रहणेन प्रत्युपेक्ष्यमाणवस्त्रकोणानां लम्बनं लोलो-यद्भूमौ करे वा प्रत्युपेक्ष्यमाणवस्त्रस्य लोलनममीषां द्वन्द्वः, एकामर्शनं एकामर्शा प्राग्वत् स्त्रीलिङ्गता, मध्ये गृहीत्वा ग्रहणदेशं यावदुभयतो वस्त्रस्य यदेककालं संघर्षणमाकर्षणम्, उक्तञ्च-

"पसिढिलमधनं अनिगृहियं च विसमगहणं च कोणे वा।
भूमीकरलोलनयाऽऽकड्ढणगहणेगआमोसा॥"

'अनेगरूवधुणे'त्ति अनेकरूपा चासौ सङ्ख्यातिक्रमणतो युगपदनेकवस्त्रग्रहणतो वा धूनना च प्रकम्पनात्मिका अनेकरूपधूनना, पठ्यते च-'अनेगरूवधूय'त्ति तत्र च धुतं-कम्पनमन्यत्प्राग्वत्, तथा यत्करोति प्रमाणे-प्रस्फोटादिसङ्ख्यालक्षणे प्रमादम्-अनवधानं यच्च शङ्कते-प्रमादतः प्रमाणं प्रति शङ्कोत्पत्तौ गणनां करांगुलिरेखास्पर्शनादिनैकद्वित्रिसङ्ख्यात्मिकामुपगच्छति-उपयाति गणनोपगं यथा भवत्येवं गम्यमानत्वात्प्रस्फोटनादि कुर्यात्, सम्भावने लिट्, सोऽपि दोषः, सर्वत्र पूर्वसूत्रादनुवर्त्त्य वर्जनक्रिया योजनीया, उक्तञ्च-

"धुनना तिण्ह परेणं बहूनि वा घेत्तु एक्कओ धुणति।
खोडणपमज्जणासु य संकिय गनने करे पमादी॥"

एवं चानन्तरोक्तदोषैरन्विता सदोषा प्रत्युपेक्षणा, वियुक्ता तु निर्दोषेत्यर्थत उक्तम्। साम्प्रतं त्वेनामेव भङ्गकनिर्दशनद्वारेण साक्षात्सदोषां निर्दोषां च किञ्चिद्विशेषतो वक्तुमाह-'अनूनाइरित्त'त्ति ऊना चासावतिरिक्ता ऊनातिरिक्ता न तथा अनूनातिरिक्ता प्रतिलेखा, इह च न्यूनताधिक्ये स्फोटनाप्रमार्जने वेलां चाश्रित्य वाच्ये, यत उक्तम्-"खोडणपमज्जवेलासु चेव ऊनाहिया मुनेयव्वा" 'अविवच्चास'त्ति विविधो व्यत्यासो-विपर्यासो यस्यां सा विव्यत्यास न तथा अविव्यत्यासा-पुरुषोपधिविपर्यासरहिता कर्त्तव्येति शेषः, अत्र च त्रिभिर्विशेषणपदैरष्टौ भङ्गाः सूचिता भवन्ति, एतेषु च कः शुद्धः को वाऽशुद्धः इत्याह-'प्रथमपदम्' इहैवोपदर्शिताद्यभङ्गरूपं 'प्रशस्तं' निर्दोषतया श्लाघ्यं शुद्धीमितियावत्, शेषाणि तु प्रक्रमात्पदानि द्वितीयादिभङ्गात्मकान्यप्रशस्तानि, तेषु न्यूनताद्यन्तमदोषीम्भवात्, तत् काक्वोपदेष्टुमाह-प्रतिलेखनां कुर्वन् 'मिथःकथां' परस्परसंभाषणात्मिकां करोति, जनपदकथां वा, स्त्र्यादिकथोपलक्षणमेतत्,

ददाति वा प्रत्याख्यानमन्यस्मै, वाचयति-अपरं पाठयति, स्वयं प्रतीच्छति वा आलापादिकं गृह्णाति, य इति गम्यते, स किमित्याह-'पुढवी'त्ति स्पष्टं, नवरं 'पुढवीआउक्काय'त्ति पृथिव्यप्कायथोः 'प्रतिलेखनाप्रमत्तो' मिथः कथादिना तत्रानवहितः सन् पन्नामपि, आस्तामेवैकादीनामित्यपिशब्दार्थः, विराधकश्चैवं-प्रमत्तो हि कुम्भकारशालादौ स्थितो जलभृतघटादिकमपि पलोढयेत्, ततस्तज्जलेन मृदग्निबीजकुन्थ्वादयः प्लाव्यन्ते, प्लावनातश्च विराध्यन्ते, यत्र चाग्निस्तत्रावश्यं वायुरिति तत्राऽपि द्रव्यतो विराधकत्वं, भावतस्तु प्रमत्ततयाऽन्यथाऽपि विराधकत्वमेव, उक्तं हि-

"इय दव्वओ उ छण्हं विराहतो भावतो इहरहावि।
उवउत्तो पुन साहू संपत्तीए वऽवहओ उ॥"

तदनेन जीवरक्षार्थत्वात्प्रतिलेखनायास्तत्काले च प्रमादजनकत्वेन हिंसाहेतुत्वान्मिथः कथादीनां परिहार्यत्वमुक्तम्।

इत्थं प्रथमपौरुषीकृत्यमुक्तं, तदनन्तरं द्वितीयपौरुषीकृत्याभिधानावसरः, तच्च "बीए झाणं झियायई" इति वचनेन ध्यानमुक्तम्, उभयं चैतदशक्यकर्त्तव्यमतस्तृतीयापौरुषीकृत्यमप्येवमुत कारण एवोत्पन्ने? इत्याशङ्क्याह-'तइए'इत्यादि सुगमं, नवरमौत्सर्गिकमेतत्, अन्यथा हि स्थविरकल्पिकानां यथाकालमेव भक्तादिगवेषणं, तथा चाह-'सइकाले चरे भिक्खू'त्ति, षण्णां कारणानाम् 'अन्नयरायंमि'त्ति अन्यतरस्मिन् कारणे 'समुत्थिते' संजाते, न तु कारणोत्पत्तिं विनेति भावः, भोजनोपलक्षणं चेह भक्तपानगवेषणं, गुरुग्लानाद्यर्थमन्यथाऽपि तस्य सम्भवात्, तथा चान्यत्र भोजन एवैतानि कारणान्युक्तानि, तान्येव षट् कारणान्याह-

'वेयण वेयावच्चे'त्ति, सुब्व्यत्ययाद् वेदनाशब्दस्य चोपलक्षणत्वात्क्षुत्पिपासाजनितवेदनोपशमनाय, तथा क्षुत्पिपासाभ्यां(गरिगतो)न गुर्वादिवैयावृत्त्यकरणक्षम इति वैयावृत्त्याय, तथा 'ईर्ये'त्ति ईर्यासमितिः सैव निर्जरार्थिभिरर्थ्यमानतयाऽर्थस्तस्मै, 'चः' समुच्चये, कथं नामासौ भवत्विति?, इतरथा हि क्षुत्पिपसाभ्यां पीडितस्य चक्षुर्भ्यामपश्यतः कथमिवासौ स्यादिति?, तथा संयमार्थाय कथं नामासौ पालयितुं शक्यतामिति?, आकुलितस्य हि ताभ्यां सचित्ताहारे तद्विघात एव स्यात्, तथा 'पानवत्तियाए'त्ति प्राणप्रत्ययं जीवितनिमित्तम्, अविधिना ह्यात्मत्तोऽपि प्राणोपक्रमणे हिंसा स्याद्, अत एवोक्तम्-

'भावियजिनवयनानं ममत्तरहियाण नत्थि हु विसेसो।
अप्पाणंमि परंमि य तो वज्जे पीडमुभओऽवि॥"

षष्ठं पुनरिदं कारणम्-यदुत धर्मचिन्तायै च, भक्तपानं गवेषयेदिति सर्वत्रानुवर्त्तते, अत्र च धर्मचिन्ता-धर्मध्यानचिन्ता श्रुतधर्मचिन्ता वा, इयं ह्युभयरूपाऽपि तदाकुलितचेतसो न स्यात्, आर्त्तध्यानसम्भवात्, इह च यद्यपि वेदनोपशमनादीनां शाब्द्या वृत्त्या तदुपलक्षितभोजनफलत्वेन प्रतीतिस्तथाऽपि तैर्विना तन्निषेधसूचनादार्थ्या वृत्त्या कारणत्वमेवैषामुपदर्शितं भवति, अत एव षष्ठमित्यत्र कारणमेव सम्बन्धितम्, आह-एतत्कारणोत्पतौ किमवश्यं भक्तपानगवेषणं कर्त्तव्यमुतान्यथेत्याह-'निर्ग्रन्थः' यतिः धृतिमान् धर्मचरणं प्रति 'निर्ग्रन्था' तपस्विनी साऽपि न कुर्याद्भक्तपानगवेषणमिति प्रक्रमः, षड्भिश्चैव स्थानैः 'तुः' पुनरर्थे

'एभिः' अनन्तरं वक्ष्यमाणैः, किमित्येवमत आह- 'अनइक्कमणाइ'त्ति सूत्रत्वाद् 'अनतिक्रमणं' संयमयोगानामनुल्लङ्घनं, चशब्दो यस्मादर्थे, यस्मात् 'से'त्ति तस्य निर्ग्रन्थस्य तस्या वा निर्ग्रन्थतायाः (न्थ्याः) 'भवति' जायते, अन्यथा तदतिक्रमणसम्भवात् ।

षट्स्थानान्येवाह- आतङ्को-ज्वरादिरोगस्तस्मिन्, 'उपसर्ग'मिति स्वजनादिः कश्चिदुपसर्ग-मुन्निष्क्रमणार्थं करोति, विमर्शादिहेतोर्वा देवादिः, ततस्तस्मिन् सति, उभयत्र तन्निवारणार्थमिति गम्यते, तथा तितिक्षा-सहनं तया हेतुभूतया, क्व विषये इत्याह- ब्रह्मचर्यगुप्तिषु, ता हि नान्यथा सोढुं शक्याः, तथा 'पाणिदयातवहेउं'ति 'प्राणिदयाहेतोः' वर्षादौ निपतप्यप्कायादिजीवरक्षायै तपः-चतुर्थादिरूपं तद्धेतोश्च, तथा शरीरस्य व्यवच्छेदः-परिहारस्तदर्थं च उचितकाले संलेखना-मनशनं वा कुर्वन्, भक्तपानगवेषणं न कुर्यादिति सर्वत्र योज्यं, कारणत्वाभावना चामीषां प्राग्वत्, तद्गवेषणां च कुर्वन् केन विधिना कियत्क्षेत्रं पर्यटेदित्याह- 'अवशेषं' भिक्षाप्रक्रमा-त्पात्रनिर्योगोद्धरितं, चशब्दस्य गम्यमानत्वादवशेषं च पात्रनिर्योगमेव, यद्वाऽपगतं शेषमपशेषं, कोऽर्थः ? समस्तं, 'भाण्डकम्' उपकरणं 'गिज्झ'त्ति गृहीत्वा चक्षुषा प्रत्युपेक्षेत, उपलक्षण त्वात्प्रतिलेखयेच्च, इह च विशेषत इति गम्यते, सामान्यतो ह्यप्रत्युपेक्षितस्य ग्रहणमपि न युज्यत एव यतीनाम्, उपलक्षणत्वाच्चास्य तदादाय 'परम्' उत्कृष्टम् 'अर्धयोजनात्' अर्धयोजन-माश्रित्य, ल्यब्लोपे पञ्चमी, परतो हि क्षेत्रातीतमशनादि भवेत्, विहरन्त्यस्मिन् प्रदेश इति विहारस्तं 'विहरए'त्ति विहरेत्-विचरेन्मुनिः ।

इत्थं विहर्त्योपाश्रयं चागत्य गुर्वालोचनादिपुरस्सरं भोजनादि कृत्वा यत्कुर्यात्तदाह- चतुर्थ्यां पौरुष्यां निक्षिप्य प्रत्युपेक्षणापूर्वकं बद्धा 'भाजनं' पात्रं स्वाध्यायं ततः कुर्यात् सर्वभावा-जीवादयस्तेषां विभावनं(कं)-प्रकाशकं सर्वभावविभावकं, पठ्यते च-'सव्वदुक्ख-विमोक्खणं'ति प्राग्वत्, पौरुष्याः प्रक्रमाच्चतुर्थ्याः चतुर्भागे-चतुर्थांसे शेष इति गम्यते, वन्दित्वा 'ततः' इति स्वाध्यायकरणादनन्तरं 'गुरुम्' आचार्यादि प्रतिक्रम्य कालस्य 'शय्यां' वसतिं 'तुः' पूरणे प्रतिलेखयेत्, ततश्च 'पासवणुच्चारभूमिं च'त्ति, भूमिशब्दस्य प्रत्येकमभिसम्बन्धात् प्रश्रवणभूमिं उच्चारभूमिं च प्रत्येकं द्वादशस्थण्डिलात्मिकां चशब्दात्कालभूमिं च स्थण्डिलत्र-यात्मिकां प्रतिलेखयेत् 'जयं'ति 'यतम्' आरम्भादुपरतं यथा भवति यतमानो वा यतिः, एवं च सप्तविंशतिस्थण्डिलप्रत्युपेक्षणानन्तरमादित्योऽस्तमेति, तथा चोक्तम्-

"चउभागावसेसाए चरिमाए पडिक्कमित्तु कालस्स ।
उच्चारे पासवणे थंडिलचउवीसइं पेहे ॥१॥
अहियासिया उ अंतो आसन्ने मज्झि दूरि तिन्नि तिन्नि भवे ।
तिन्नेव अनहियासी अंतो छच्छच्च बाहिरतो ॥२॥
एमेव य पासवणे बारस चउवीसइं तु पेहेत्ता ।
कालस्स य तिन्नि भवे अह सूरो अत्थमुवयाइ ॥३॥"

इति सार्द्धसप्तदशसूत्रार्थः ॥ इत्थं विशेषतो दिनकृत्यमभिधाय सम्प्रति तथैव रात्रिकर्त्तव्यमाह-

मू. (१०४४-२) काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमुक्खणं ॥
मू. (१०४५) देसियं च अईयारं, चिंतिज्ज अनुपुव्वसो ।

नाणंमि दंसणे चेव, चरित्तंमि तहेव य ॥

मू.(१०४६) *पारियकाउस्सग्गो, वंदित्ता य तओ गुरुं ।*
देसियं तु अईयारं, आलोइज्ज जहक्कमं ॥

मू.(१०४७) *पडिक्कमित्ताण निस्सल्लो, वंदित्ताण तओ गुरुं ।*
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमुक्खणं ॥

मू.(१०४८) *सिद्धाणं संथवं किच्चा, वंदित्ताण तओ गुरुं ।*
थुइमंगलं च काऊणं, कालं संपडि लेहए ॥

मू.(१०४९) *पढमं पोरिसिं सज्झायं, बीयं झाणं झियायई ।*
तईयाए निद्दमुक्खं तु, चउत्थी भुज्जोवि सज्झायं ॥

मू.(१०५०) *पोरिसीए चउत्थीए, कालं तु पडिलेहए ।*
सज्झायं तु तओ कुज्जा, अबोहंतो असंजए ॥

मू.(१०५१) *पोरिसीए चउब्भाए, वंदित्ताण तओ गुरुं ।*
पडिक्कमित्तु कालस्स, कालं तु पडिलेहए ॥

मू.(१०५२) *आगए कायवुस्सग्गे, सव्वदुक्खविमुक्खणे ।*
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमुक्खणं ॥

मू.(१०५३) *राईयं च अईयारं, चिंतिज्ज अनुपुव्वसो ।*
नाणंमि दंसणंमि, चरित्तंमि तवंमि य ॥

मू.(१०५४) *पारियकाउस्सग्गो, वंदित्ताण तओ गुरुं ।*
राईयं तु अईयारं, आलोइज्ज जहक्कमं ॥

मू.(१०५५) *पडिक्कमित्तु निस्सल्लो, वंदित्ता न तओ गुरुं ।*
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमुक्खणे ॥

मू.(१०५६) *किं तवं पडिवज्जामि ?, एवं तत्थ विचिंतए ।*
काउस्सग्गं तु पारित्ता, करिज्जा जिनसंथवं ॥

मू.(१०५७) *पारियकाउस्सग्गो, वंदित्ताण तओ गुरुं ।*
तवं संपडिवज्जित्ता, करिज्ज सिद्धाण संथवं ॥

वृ. काउस्सग्गमित्यादि सार्द्धानि त्रयोदश सूत्राणि। कायोत्सर्गं 'ततः' प्रश्रवणादिभूमिप्रतिलेखनादनन्तरं कुर्यात्सर्वदुःखविमोक्षणं, तथात्वं चास्य कर्मापचहेतुत्वात्, उक्तं हि-

"काउस्सग्गे जह सुट्ठियस्स भज्जंति अंगमंगाइं ।
तह भिंदंति सुविहिआ अट्ठविहं कम्मसंघायं ॥"

ति तत्र च स्थितो यत्कुर्यात्तदाह-'देसियं'ति प्राकृतत्वाद्वकारस्य लोपे दैवसिकं 'चः' पूरणे 'अतिचारम्' अतिक्रमं 'चिन्तयेत्' ध्यायेत् 'अनुपुव्वसो'त्ति आनुपूर्व्या क्रमेण, प्रभातमुखवस्त्रिकाप्रत्युपेक्षणातो यावदयमेव कायोत्सर्गः उक्तं हि-

"मोसमुहनंतगाई आलोइय देसिए य अइयारे ।
सव्वे समाणयित्ता हियए दोसे ठविज्जाह ॥"

किंविषयमतीचारं चिन्तयेदित्याह-'ज्ञाने' ज्ञानविषयमेवं दर्शने चैव चारित्रे तथैव च ।

पारितः-समापितः कायोत्सर्गो येन स तथा वन्दित्वा प्रस्तावाद् द्वादशावर्त्तवन्दनेन 'तत' इत्यतीचारचिन्तनादनन्तरं 'गुरुम्' आचार्यादि 'देसियं'त्ति प्राग्वद् दैवसिकं 'तुः' पूरणेऽतीचारम् 'आलोचयेत्' प्रकाशयेद् गुरूणामेव 'यथाक्रमम्' आलोचनसेवनान्यतरानुलोम्यक्रमानतिक्रमेण 'प्रतिक्रम्य' प्रतीपमपराधस्थानेभ्यो निवृत्य, प्रतिक्रमणं च मनसा भावशुद्धितो वाचा तत्सूत्रपाठतः कायेनोत्तमाङ्गनमनादितः, 'निःशल्यः' मायादिशल्यरहितः, सूचकत्वात्सूत्रस्य वन्दनकपूर्वं क्षमयित्वा च वन्दित्वा द्वादशावर्त्तवन्दनेन 'ततः' इत्युक्तविधेरनन्तरं 'गुरुम्' आचार्यादिकं 'कायोत्सर्गं' चारित्रदर्शनश्रुतज्ञानशुद्धिनिमित्तव्युत्सर्गत्रयलक्षणं, जातावेकवचनं, 'ततः' गुरुवन्दनादनन्तरं कुर्यात्सर्वदुःखविमोक्षणम्। 'पारिये'त्यादि पूर्वार्द्धं व्याख्यातमेव, स्तुतिमङ्गलं च सिद्धस्तवरूपं कृत्वा पाठान्तरं वा-'सिद्धाणं संथवं किच्च'त्ति सुगमं, 'कालम्' आगमप्रतीतं 'संपडिलेहए'त्ति संप्रत्युपेक्षते, कोऽर्थः ?-प्रतिजागर्त्ति, उपलक्षणत्वाद्, गृह्णाति च, एवद्गतश्च विधिरागमादवसेयः।

'पढम'मित्यादि प्राग्वत्, व्याख्यातमेव, नवरं पुनरभिधानमस्य पुनः पुनरुपदेष्टव्यमेव गुरुभिर्न प्रयासो मन्तव्य इति ख्यापनार्थम्।

कथं पुनश्चतुर्थपौरुष्यां स्वाध्यायं कुर्यादित्याह-पौरुष्यां चतुर्थ्यां 'कालं' वैरात्रिकं 'तुः' पूरणे 'पडिलेहिय'त्ति प्रत्युपेक्ष्य-प्रतिजागर्थ्य प्राग्वद् गृहीत्वा च स्वाध्यायं ततः कुर्यात् 'अबोधयन्' अनुत्थापयन् 'असंयतान्' अगारिणः, तदुत्थापने तत्पास्थानेषु तेषां प्रवर्त्तनसम्भवात्।

पौरुष्याः प्रक्रमाच्चतुर्थ्याश्चतुर्भागेऽवशिष्यमाण इति शेषः, तत्र हि कालवेलायाः सम्भव इति न कालस्य ग्रहणं, वन्दित्वा ततो गुरुं प्रतिक्रम्य 'कालस्य' वैरात्रिकस्य 'कालं' प्राभातिकं, तुशब्दो वक्ष्यमाणविशेषद्योतकः, 'पडिलेहए'त्ति प्रत्युपेक्षेत प्राग्वद् गृह्णीयाच्च, इह च साक्षात्प्रत्युपेक्षणस्यैव पुनः पुनरभिधानं बहुतरविषयत्वात्, अत्र च सम्प्रदायः-

"ताहे गुरू उट्ठित्ता गुणंति जाव चरिमो जामो पत्तो, चरिमे जामे सव्वे उट्ठित्ता वेरत्तियं घेत्तुं सज्झायं करेंति, ताहे गुरू सुवंति, पत्ते पाभाइए काले जो पाभाइयकालं घेच्छति सो कालस्स पडिक्कमिउं पाभाइयं कालं गिण्हइ, सेसा कालवेलाए कालस्स पडिक्कमंति, तओ आवस्सयं करेंति" मध्यमप्रक्रमापेक्षं च कालत्रयग्रहणमुक्तम्, अन्यथा ह्युत्सर्गत उत्कर्षेण चत्वारो जघन्येन त्रयः काला अपवादतश्चोत्कर्षेण द्वौ जघन्येनैकोऽप्यनुज्ञात एव, यत उक्तम्-

"कालचउक्क उक्कासएण जघन्नओ तिन्नि हुंति बोद्धव्वा।
बीयपयंमि दुगं तु मायामयविप्पमुक्काणं॥"

अत्र च तुशब्दादेकस्याप्यनुज्ञा, तथा चूर्णिकार एव अमायाविनो तिन्नि वा अगेण्हंतस्स एक्को भवति" पठन्ति च-

"पढमा पोरिसि सज्झायं, बीए झाणं झियायति।
तितियाए निद्दमोक्खं च, चउभाए चउत्थए॥१॥
कालं तु पडिलेहित्ता, अबोहितो असंजए।
कुज्जा मुनी य सज्झायं, सव्वदुक्खविमुक्खणं॥२॥
पोरसीए चउब्भाए, सेसे वंदित्तु तो गुरुं।

पडिक्कमित्तु कालस्स, कालं तु पडिलेहए ॥३॥

अत्रापि व्याख्या, तथैव, पाठद्वयेऽपि चतुर्थप्रहरविशेषकृत्याभिधानप्रसङ्गेन पुनः प्रहरत्रयकृत्याभिधानमिति मन्तव्यम्। 'आगते' प्राप्ते 'कायव्युत्सर्गे' इत्युपचारात् कायव्युत्सर्ग-समये सर्वदुःखानां विमोक्षणमर्थात् कायोत्सर्गद्वारेण यस्मिन् स तथा तस्मिन्, शेषं प्राग्वत्, यच्चेह सर्वदुःखविमोक्षणविशेषणं पुनः पुनरुच्यते तदस्यात्यन्तनिर्जराहेतुत्वख्यापनार्थं, तथेह कायोत्सर्गग्रहणेन चारित्रदर्शनश्रुतज्ञानविशुद्ध्यर्थं कायोत्सर्गत्रयं गृह्यते, तत्र च तृतीये रात्रिकोऽतीचारश्चिन्त्यते, यत उक्तम्-

"तत्थ पढमो चरित्ते, दंसणसुद्धीय बीयओ होइ।
सुयनाणस्स य तइओ, सयरं निसेइ तत्थ इमं ॥

तइए निसाइयारं" ति रात्रिकोऽतिचारश्च यथा यद्विषयश्च चिन्तनीयस्तथाऽऽह-रात्रौ भवं रात्रिकं 'चः' पूरणे अतीचारं चिन्तयेत् 'अनुपुव्वसो' त्ति आनुपूर्व्या-क्रमेण ज्ञाने दर्शने चारित्रे तपसि तशब्दाद्वीर्ये च, शेषकायोत्सर्गेषु चतुर्विंशतिस्तवः प्रतीतश्चिन्त्यतया साधारणश्चेति नोक्तः। ततश्च पारितेत्यादिसूत्रद्वयं व्याख्यातमेव, कायोत्सर्गस्थितश्च किं कुर्यादित्याह- 'किं' मिति किंरूपं 'तपो' नमस्कारसहितादि प्रतिपद्येऽहम्, एवं तत्र विचिन्तयेत्-वर्द्धमानो हि भगवान् षण्मासं यावन्निरशनो विहृतवान्, तत्किमहमपि निरशनः शक्नोम्येतावत्कालं स्थातुमुत नेति ?, एवं पञ्चमासाद्यपि यावन्नमस्कारसहितं तावत्परिभावयेत्, उक्तं हि-

"चिंते चरमे उ किं तवं काहं ?।
छम्मासामेकदिणादिहाणि जा पोरिसिं नमो वा ॥"

उत्तरार्द्धं स्पष्टम्, एवमुक्तार्थानुवादतः सामाचारीशेषमाह- 'पारिए' त्यादि प्राग्वत्, नवरं 'तपः' यथाशक्ति चिन्तितमुपवासादि 'संप्रतिपद्य' अङ्गीकृत्य कुर्यात् सिद्धानां 'संस्तवं' स्तुतित्रयरूपं, तदनु च यत्र चैत्यानि सन्ति तत्र तद्वन्दनं विधेयं, तथा चाह भाष्यकारः-

"वंदित्तु निवेयंति कालं तो चेइयाइ यदि अत्थि।
तो वंदंती कालं जह य तुलेउं पडिक्कमणं ॥"

इति सार्द्धत्रयोदशसूत्रार्थः ॥ सम्प्रत्यध्ययनार्थमुपसंहरन्नाह-

मू.(१०५८) एसा सामाचारी, समासेण वियाहिया।
जं चरित्ता बहू जीवा, तिन्ना संसारसागरं ॥ त्तिबेमि ॥

वृ. 'एषा' अनन्तरोक्ता सामाचारी दशविधा, ओघरूपा(च) पदविभागात्मिका चेह नोक्ता, धर्मकथाऽनुयोगत्वादस्य, छेदसूत्रान्तर्गतत्वाच्च तस्याः, 'समासेन' सङ्क्षेपेण 'वियाहिय' त्ति व्याख्याता, अत्रैवादरख्यापनार्थमस्याः फलमाह-'यां' सामाचारीं 'चरित्वा' आसेव्य 'बहवः' अनेके जीवास्तीर्णाः संसारसागरं प्राग्वदिति सूत्रार्थः ॥ 'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववत्। उक्तोऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वदेव ॥

अध्ययनं २६ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे षड्विंशतितमध्ययनस्य भद्रबाहुस्वामिविरचिता निर्युक्तिः एवं शान्त्याचार्य विरचिता सटीकं परिसमाप्ता।

अध्ययनं २७ खलुङ्कीयं

वृ. व्याख्यातं षड्विंशमध्ययनं, सम्प्रति सप्तविंशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययने सामाचारी प्रतिपादिता, सा चाशठतयैव, पालयितुं शक्या, तद्विपक्षभूतशठताज्ञान एव च तद्विवेकेनासौ ज्ञायत इत्याशयेन दृष्टान्ततः शठतास्वरूपनिरूपणद्वारेणाशठतैवानेनाभिधीयत इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य चतुरनुयोगद्वारप्ररूपणा प्राग्वद्यावन्नामनिष्पन्ने निक्षेपे खलुङ्कीयमिति नाम, तत्र खलुङ्कः (नाम्नः उत्सुक) निक्षेपायाह निर्युक्तिकृत्-

नि. [४९१] निक्खेवो खलुंकंमि चउव्विहो ॥

नि. [४९२] जाणगसरीरभविए तव्वइरित्ते बइल्लमाईसुं ।
पडिलोमो सव्वत्थेसु भावओ होइ उ खलुंको ॥

वृ. 'निक्खवो' गाथाद्वयं व्याख्यातप्रायमेव, नवरं बलीवर्दादिष्वित्यादिशब्देनाश्वादिपरिग्रहः, निर्द्धारणे चेयं सप्तमी, ततो बलीवर्दादिषु यो गल्यादिरिति गम्यते स द्रव्यतः खलुङ्क इति, 'प्रतिलोमः' प्रतिकूलः सर्वार्थेषु, पाठान्तरतः 'सर्वस्थानेषु' ज्ञानादिषु भावतो भवति खलुङ्क इति गाथाद्वयार्थः ॥ तद्व्यतिरिक्तद्रव्यखलुङ्कस्वरूपमाह-

नि. [४९३] अवदाली उत्तसओ जोत्तजुगभंज तुत्तभंजो अ ।
उप्पहविप्पहगामी एय खलुंका भवे गोणा ॥

नि. [४९४] जं किर दव्वं खुज्जं कक्कडगुरुयं तहा दुरवनामं ।
तं दव्वेसु खलुंकं वंककुडिलवेढमाइद्धं ॥

नि. [४९५] सुचिरंपि वंकडाइं होहिंति अनुज्जइज्जमाणाइं ।
करमंदिदारुआइं गयंकुसा इव बिटाइं ॥

वृ. 'अवदालि'त्ति अवदारयति शकटं स्वस्वामिनं वा विनाशयतीत्येवंशीलोऽवदारी, उत्त्रसको यो यत्किञ्चनावलोक्योत्त्रस्यति, 'जुत्तजुगभंज'त्ति योत्रं-तथाविधसंयमनं युगं-प्रतीतमेव ते भनक्ति-विशायति योत्रयुगभञ्जः, तथा तोत्रं-प्राजनकस्तद्भनक्ति तोत्रभञ्जकश्च, उभयत्र 'कर्मण्यम्' 'उत्पथविपथगामी' उत्पथः-उन्मार्गो विपथो-विरूपमार्गस्ताभ्यां गमनशीलः, 'एते' अवदार्यादयः खलुङ्का 'भवन्ति' भवेयुः 'गोणाः' बलीवर्दाः, उपलक्षणत्वादश्वादयश्च। अमुमेव प्रकारान्तरेणाह-'यदि'ति सामान्यनिर्देशे 'किले'ति परोक्षापवादसूचकः 'द्रव्यं' दार्वादि कुब्जमिव कुब्जं मध्यस्थूलतया कर्कशं च तत्कठिनतया गुरुकं चातिनिचितपुद्गलतया कर्कशगुरुकं, तथाऽत एव दुःखेनावनामयितुं शक्यत इति दुरवनामं, करीरकाष्ठवत्, तद्व्येषु खलुङ्कं वक्रमनृजुत्वात्, कुटिलं विशिष्टकौटिल्ययोगात् 'वेढमाइद्धं'ति मकारोऽलाक्षणिकस्ततश्च वेष्टैः-ग्रन्थिभिराविद्धं-व्याप्तं वेष्टाविद्धम्, तेषां विशेषणसमासः।

इहैव दृष्टान्तमाह-'सुचिरमपि' प्रभूतकालमपि 'वंकडाइ'न्ति वक्राणि, अवधारणाफलत्वाच्च वाक्यस्य वक्राण्येव भविष्यन्ति न कदाचिदृजुभावमनुभविष्यन्ति, 'अनुज्जइज्जमाणाइं'ति एकं स्वरूपतोऽनृजूनि अपरं च तेषां क्वचित्कार्येऽनुपयोगात्केनचिदनृजूक्रियमाणानि, कान्येवंविधानीत्याह-करमर्दी-गुल्मभेदस्तद्दारुकानि, तथा 'गयंकुसा इव बिटाइं'ति

चस्य गम्यमानत्वाद् गजांकुशानीव वक्रतया वृन्तानि च फलबन्धनानि, प्रक्रमात्करमर्द्या एवोक्तरूपाणि। अनेकधा द्रव्यखलुङ्कभिधानं च काक्वाऽनेकविधकुशिष्यदृष्टान्तप्रदर्शनार्थमिति गाथात्रयार्थः ॥

सम्प्रति यदुक्तं 'प्रतिलोमः सर्वार्थेषु भावतो भवति खलुङ्क' इति तदभिव्यक्तीकर्तुमाह-

नि. [४९६] दंसमसगस्समाना जलुयदविच्छुयसमा य जे हुंति।
ते किर होंति खलुंका तिक्खम्मिउचंडमद्दविआ ॥

नि. [४९७] पिसुणा परोवतावी भिन्नरहस्सा परं परिभवंति।
निव्विअनिज्जा य सढा जिनवयणे ते किर खलुंका ॥

वृ. दंशमशकैः 'समाण'त्ति समानाः-तुल्या दंशमशकसमानाः, ते हि जात्यादिभिस्तद्वत्तुदन्तीति, तथा जलौकाकपिच्छुकसमानाश्च प्रस्तावाच्छिक्ष्या ये भवन्ति, दोषग्राहितयाऽप्रस्तुतपृच्छादिनोद्वेजकतया च, पठन्ति च 'जलूकविच्छुगसमा य'त्ति यथा वृश्चिकोऽवष्टब्धो विध्यत्येव कण्टकेन एवं ये शिष्याणां गुरुं वचनकरणैकविधानि 'ते' एतद्विधाः किल भवन्ति खलुङ्का भावत इति गम्यते, तीक्ष्णा-असहिष्णवो मुदवः अलसतया कार्यकारणं प्रत्यदक्षाश्चण्डाः-कोपनतया मार्दवेन चरन्ति मार्दविकाः-शतकृत्वोऽपि गुरुप्रेरिता न सम्यनुष्ठानं प्रति प्रवर्त्तन्ते किन्त्वलसा एव, अमीषां द्वन्द्वः।

अन्यच्च-ये किल 'गुरुप्रत्यनीकाः' आचार्यादिप्रतिकूलाः कूलवालकवत् 'शबलाः' शबलचारित्रयोगात् 'असमाधिकारकाः' गुर्वादीनामसमाधानजनकाः, अत एव पापाः 'अधिकरणकारकात्मानः' कलहकर्तृस्वभावाः सदनुष्ठानं प्रति प्रेर्यमाणा युद्धायैवोपतिष्ठन्ते, 'जिनवचने' सर्वज्ञशासने ते किल खलुङ्का इत्युच्यन्त इति शेषः।

तथा 'पिशुनाः' सूचकाः, अत एव 'परोवयावि'त्ति परोपतापिनः 'भिन्नरहस्याः' विश्वस्तजनकथितरहस्यभेदिनः तथा 'परम्' अन्यं 'परिभवन्ति' येन केनचित्प्रकारेणाभिभवन्ति 'निव्वेयणिज्ज'त्ति निर्वेदनीया निर्वेदं प्राप्य प्रक्रमाद्यतिकृत्येन, पाठान्तरतो निर्गता वचनीयाद्-उपदेशवाक्यात्मकाद् ये ते निर्वचनीयाः, चः समुच्चये भिन्नक्रमश्च, ततः 'शठाश्च' मायाविनः, पठ्यते च-'निव्वया निस्सीलसढ'त्ति सुगममेव, 'जिनवचने' श्रीसर्वज्ञशासने भणिता ये इति शेषः, ते प्रागभिहितस्वरूपाः किल खलुङ्का इति गाथात्रयार्थः ॥ ततः किमित्याह-

नि. [४९९] तम्हा खलुंकभावं चइऊणं पंडिएण पुरिसेणं।
कायव्वा होइ मई उज्जुसभावंमि भावेणं ॥

वृ. तस्मादित्थं दोषवन्तं खलुङ्कभावं त्यक्त्वा 'पण्डितेन' बुद्धिमत्ता पुरुषेण उपलक्षणत्वात् स्त्र्यादिना च कर्त्तव्या भवति 'मतिः' बुद्धिः क्व ?-'ऋजुस्वभावे' आर्जवे भावे 'भावेन' परमार्थेन न तु बहिर्वृत्त्यैवेति गाथार्थः ॥ अवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (१०५९) थेरे गणहरे गग्गे, मुनी आसि विसारए।
आइन्ने गणिभावम्मि, समाहिं पडिसंधए ॥

वृ. धर्मेऽस्थिरान् स्थिरीकरोतीति स्थविरः उक्तं हि-"थिरकरणा पुन थेरो" गणं गुणसमूहं

धारयति-आत्मन्यवस्थापयतीति गणधरः 'गार्ग्यः' गर्गसगोत्रः तथा मुनिति प्रतिजानीते सर्व सावद्यविरतिमिति मुनिः 'आसीत्' अभत् 'विशारदः' कुशलः सर्वशास्त्रेषु संग्रहोपग्रहयोर्वा, 'आकीर्णः' आचार्यगुणैराचारश्रुतसम्पदादिभिर्व्याप्तः परिपूर्ण इतियावत्, 'गणिभावे' आचार्यत्वे स्थित इति गम्यते, 'समाहिं पडिसंधए'त्ति समाधानं समाधिः, स च द्विधा द्रव्यतो भावतश्च, तत्र द्रव्यसमाधिर्यदुपयोगात्स्वास्थ्यं भवति, यथा(वा) पयःशर्करादिद्रव्याणां परस्परमविरोधः, भावसमाधिस्तु ज्ञानादीनि, तदुपयोगादेवानुपमस्वाध्ययोगात्, तत्रेह भावसमाधिगृह्यते, ततः समाधिं 'प्रतिसंधत्ते' कर्मोदयात् त्रुटितमपि संघटयति, तथाविधशिष्याणामिति गम्यते इति सूत्रार्थः ॥ समाधिं च प्रतिसंदधद्यथाऽसौ शिष्येभ्य उपदिशति तथाऽऽह-

मू.(१०६१) वहणे वहमानस्स, कंतारं अइवत्तए।
जोए वहमानस्स, संसारो अइवत्तए॥

वृ. उह्यतेऽनेन वोढव्यमिति वहनं-शकट्यादिस्तस्मिन् योजितस्येति गम्यते, 'वहमानस्य' सम्यक्प्रवर्त्तमानस्योत्तरत्र खलुङ्ग्रहणादिह विनीतगवादेरिति गम्यते, अतिक्रम्यातिक्रमण सम्बन्धे षष्ठी, वाहकाविनाभूतत्वाच्चास्य वाहकस्य च पामरकादेः 'कान्तारम्' अरण्यम् 'अतिवर्त्तते' सुखातिवर्त्तितया स्वयमेवातिक्रमतीति दृष्टान्तः, उपनयमाह-'योगे' संयमव्यापारे 'वहतः' तथैव स्वकर्त्तव्यानुष्ठानस्य इहापि प्राग्वत्कर्मातिक्रमणसाधनतया [illegible] 'संसारः' भवः अतिवर्त्तते' प्राग्वत् स्वयमेवातिक्रामति, इह च योगवहनमशठतेति सैव प्राग्ध्ययनार्थत्वेनोपवर्णिता कलोपदर्शनद्वारेणानेनोक्तेति भावनीयमिति सूत्रार्थः ॥ तदेवं कथममी अशठतामासेव्य पुनर्ज्ञानादिसमाधिमन्तः शिष्याः स्युरिति तस्या गुणमभिधाय तद्गुणज्ञानमिव तद्विपक्षदोषावधारणमपि तदासेवनाङ्गमीति तद्विपक्षभूतशठतादोषा अपि वाच्याः, ते च कुशिष्यस्वरूपाभिधानत एवाभिधातुं शक्यन्ते इति निर्वेदकत्वं स्वयं दोषदुष्टत्वं च तत्स्वरूपवगमयितुं दृष्टान्तोपवर्णनायाह-

मू.(१०६१) खलुंके जो उ जोएइ, विहंमाणे किलिस्सई।
असमाहिं च वेएइ, तुत्तओ य से भज्जई॥
मू.(१०६२) एगं डसइ पुच्छंमि, एगं विंधइऽभिक्खणं।
एगो भंजइ समिलं, एगो उप्पहपट्ठिओ॥
मू.(१०६३) एगो पडइ पासेणं, निवेसइ निविज्जई।
उक्कुदइ उप्फिडई, सढे बालगवी वए॥
मू.(१०६४) माई मुद्धेण पडई, कुद्धे गच्छइ पडिवहं।
मयलक्खेण चिट्ठाई, वेगेण य पहावई॥
मू.(१०६५) छिन्नाले छिंदई सिम्मिं, दुद्दंते भंजई जुगं।
सेवियं सुस्सुयाइत्ता, उज्जुहित्ता पलायई॥

वृ. यद्वा धर्मकथाऽनुयोगत्वादस्य प्रथमसूत्रे गर्गनामाऽऽचार्यः कथञ्चित्कुशिष्यैर्भग्नसमाधिरात्मनः समाधिं प्रति संधत्त इति व्याख्यायते, द्वितीयसूत्रे तु वहने 'वहमाणस्स'त्ति अन्तर्भावितण्यर्थतया वाह्यमानस्य विनीतगवादीन् यथा कान्तारमतिवर्त्तते तथा योग्यान् शिष्यान्

वाहयमानस्य-कृत्येषु प्रवर्त्तयतः संसारोऽतिवर्त्तते, तद्विनीततादर्शनादात्मनो विशेषतः समाधिसम्भवादितिभाव इति सोपस्कारतया व्याख्याते, इत्थमात्मनः समाधिप्रतिसन्धानाय विनीतस्वरूपं परिभाव्य स एवाविनीतस्वरूपं यथा परिभावयति तथाऽऽह- खलुंकेत्यादि-सूत्रद्वादशककम्।

खलुङ्कान् योऽनिर्दिष्टस्वरूपः 'तुः' विशेषणे योजयति-योत्क्रयति वहन इति प्रक्रमः, स किमित्याह- 'विहंमानो'त्ति सूत्रत्वाद् विशेषेण 'घ्नन्' ताडयन् 'क्लाम्यति' श्रमं याति, पाठान्तरतः क्लिश्यति, अत एव 'असमाधिं' चित्तोद्वेगरूपं 'वेदयते' अनुभवति 'तोत्रकः' प्राजनकः, स च 'से' इति तस्य खलुङ्कयोजयितुः 'भज्यते' अतिताडनाद्भङ्गं याति।

ततश्चातिरुष्टः सन् यत् कुरुते तदाह-एकं 'दशति' दशनैर्भक्षयति 'पुच्छे' बालधौ, 'एकम्' अन्यं गलिं 'विध्यति' प्राजनकेन तुदति, उपलक्षणं चैतदश्लीलभाषणादीनाम्, 'अभीक्ष्णं' पुनः पुनः, अथ किमेते कुर्वन्ति ? येन योजयितुरेवं निर्वेदहेतव इत्याह-'एकः' कश्चित् खलुङ्को गौः 'भनक्ति' आमर्दयति, कां ?-'समिलां' युगरन्ध्रकीलिकाम्, 'एकः' अन्यस्तामभंक्त्वाऽपि उत्पथम्-उन्मार्गं प्रस्थित उत्पथस्थितो भवतीति गम्यते।

तथा 'एकः' अपरः पतति 'पार्श्वेन' एकगात्रविभागेन, गम्यमानत्वाद् भूमौ, अन्यस्तु 'निवेसइ'त्ति निवशति-उपविशति, अपरश्च 'निविज्जए'त्ति शेते, परः 'उत्कूर्दते' ऊर्ध्वं गच्छति 'उप्फिडइ'त्ति मण्डूकवत्प्लवते, अन्यः 'शठः' शाठ्यवान्, अन्यः कश्चिद् 'बालगवीं वए'त्ति 'बालगवीम्' अवृद्धां गां 'व्रजेत्' तदभिमुखं धावेदित्यर्थः, यदिवाऽऽर्षत्वाद्बालगवीति व्यालगवो-दुष्टबलीवर्दः 'व्रजेत' गच्छेद् अन्यत इति शेषः।

अन्यश्च 'मायी' मायावान् 'भूम्नां' मस्तकेन पतति, कोऽर्थः ?-अतिनिस्सहमिवात्मानमादर्शयन् भुवि शिरसा लुठति, अपरः 'क्रुद्धः' कुपितः सन् 'गच्छति प्रतिपथं' पश्चाद्वलति, अपरः 'मृतलक्ष्येण' मृतव्याजेन 'तिष्ठति' आस्ते, पठ्यते च-'पलयं(यलं)ते न चिट्ठिय'त्ति प्रव(च)लन् प्रकर्षेण कम्पमानस्तिष्ठति, कम्पान्न निवर्त्तत इत्यर्थः, कथञ्चित्प्रवणीकृतः 'वेगेन च प्रधावति' यथा द्वितीयो गन्तुं न शक्नोति तथा गच्छतीति योऽर्थः। 'छिन्नालः' तथाविधदुष्टजातिः कश्चित् 'छिनत्ति' खण्डयति 'सि(स्वि)ल्लि'त्ति रश्मिं संयमनरज्जुमितयवात्, अपरस्तु दुर्दान्तो भनक्ति युगं, सोऽपि च युगं भंक्त्वा 'सुस्सुयाइत'त्ति सूत्करान् कृत्वा, तथा 'उज्जुहित्त'त्ति प्रेर्य स्वामिनं शकटं चेति गम्यते 'पलायते' अन्यतो धावतीति सूत्रपञ्चकार्थः॥

इत्थं दृष्टान्तमभिधाय दार्ष्टान्तिकयोजनामाह-

मू.(१०६६) *खलुंका जारिसा जुज्जा, दुस्सीसावि हु तारिसा।*
जोइया धम्मजाणंमि, भज्जंता धिइदुब्बला॥

वृ. 'खलुङ्काः' इहोक्तरूपा गावो यादृशाः 'योज्याः' घट्टनीयाः, दुशिष्या अपि 'हुः' अवधारणे भिन्नक्रमश्च, ततस्तादृशादर्शयन्त्येवमेतेऽपि, किमिति ?-यतो 'योजिताः' व्यापारिता धर्मो यानमिव मुक्तिपुरप्रापकतया धर्मयानं तस्मिन् 'भज्यन्ते' न सम्यक् प्रवर्त्तन्ते 'धिइदुब्बल'त्ति प्राकृतत्वाद् दुर्बलधृतयो धर्मानुष्ठानं प्रतीति गम्यत इति सूत्रार्थः॥ धृतिदुर्बलत्वमेव तेषां भावयितुमाह-

मू.(१०६७) इड्ढीगारविए एगे, एगित्थ रसगारवे।
सायागारविए एगे, एगे सुचिरकोहणे॥
मू.(१०६८) भिक्खालसिए एगे, एगे ओमाणभीरुए थद्धे।
एगं च अनुसासंमी, हेऊहिं कारणेहि य॥
मू.(१०६९) सोऽवि अंतरभासिल्लो, दोसमेव पकुव्वई।
आयरियाणं तं वयणं, पडिकूलेइ अभिक्खणं॥
मू.(१०७०) न सा मम वियाणाइ, नवि सा मज्झ दाहिई।
निग्गया होहिई मन्ने, साहू अन्नोऽत्थ वच्चउ॥
मू.(१०७१) पेसिया पलिउंचंति, ते परियंति समंतओ।
रायविट्ठि व मन्नंता, करिंति भिउडिं मुहे॥
मू.(१०७२) वाइया संगहिया चेव, भत्तपानेहिं पोसिया।
जायपक्खा जहा हंसा, पक्कमंति दिसोदिसिं॥

वृ. 'इड्ढीगारविए'त्ति ऋद्धा गौरवं-श्राद्धा ऋद्धिमन्तो मम वश्या: संपद्यते च यथाचिन्तित-मुपकरणमित्याद्यात्मबहुमानरूपमृद्धिगौरवं तदस्यास्तीति ऋद्धिगौरविको न गुरुनियोगे प्रवर्त्तते किमेतैर्ममेति एक: कश्चन, 'एक:' अन्योऽत्रेति दु:शिष्याधिकारे 'रसगारवे'त्ति रसेषु-मधुर-दिषु गौरवं-गार्ध्यं यस्यासौ रसगौरवो बालग्लानादिसमुचिताहारदानतपोऽनुष्ठानादौ न प्रवर्त्तते, 'सायागारविए'त्ति साते सुखे गौरवं-प्रतिबन्ध: सातगौरवं तदस्यास्तीति सातगौरिक एक:, सुखप्रतिबद्धो हि नाप्रतिबद्धविहारादौ प्रवर्त्तितुं क्षम:, एक: 'सुचिरक्रोधन:' प्रभूतकाल-क्रोपनशील:, एकदा कुपित: कुपित एवास्ते, न कृत्येषु प्रवर्त्तते।

भिक्षायामालस्यक:-आलस्यवान् भिक्षाऽऽलस्यिक एको न विहर्त्तुमिच्छति, एकोऽ-पमानभीरु:-भिक्षां भ्रमन्नपि न यस्य तस्यैव वेश्यनि प्रवेष्टुमिच्छति, यदिवा 'ओमाणं'ति प्रवेश: स च स्वपक्षपरपक्षयोस्तद्भीरुर्गृहिप्रतिबन्धेन मा मां प्रविशन्तमवलोक्यान्ये साधव: सौगतादयो वाऽत्र प्रवेक्ष्यन्तीति, 'थद्धो'त्ति स्तब्धोऽहङ्कारवान्, न निजकुग्रहान्नमयितुं शक्य इति प्रक्रम:, एकं च दु:शिष्यम् 'अनुसासंमि'त्ति आर्षत्वादनुशास्ति गुरुरिति गम्यते, यदा त्वाचार्य आत्मन: समाधिं प्रतिसंधत्ते इति व्याख्या तदाऽनुशास्मीति व्याख्येयं, हेतुभि: कारणैश्चोक्तरूपै:।

स चानुशिष्यमाण: किं कुरुते ? इत्याह-सोऽपि दु:शिष्य: 'अंतरभासिल्ल'त्ति अन्तरभाषा-वान्, गुरुवचनापान्तराल एव स्वाभिभतभाषक इत्यर्थ:, 'दोषमेव' अपराधमेव 'प्रादुष्वक-(प्रक)रोति' प्रकर्षेण विधत्ते, न तु शिष्यमानोऽपि तद्विच्छेदमिति भाव:, पाठान्तरश्च दोषमेव प्रभाषते, गुरूणामिति गम्यते, न चैतावता तिष्ठति, किन्त्वाचार्याणामुपलक्षणत्वादुपाध्यायादीनां द्वितीयपक्षे त्वाचार्याणां सतामास्माकमिति गम्यते, तदित्यनुशिष्टयभिधायकं वचनं वच: 'प्रतिकूलयति' विपरीतं करोति युक्त्युपन्यासेन विपरीतचेष्टया वा 'अमीक्ष्णं' पुन: पुन:, न त्वेकदैवेत्यभिप्राय:।

यथा प्रतिकूलयति तथाऽऽह-न सा 'मम'ति मां विजानाति, किमुक्तं भवति ?-गुरुभि:

कदाचित्प्रज्ञापितो यथा-आयुष्मन्! ग्लानप्रतिजागरणं महन्निर्जरास्थानमित्यमुकस्या अपि श्राविकायाः सकाशादमुकमौषधमाहारजातं वाऽऽनीयतां, ततः स तया ज्ञायमानोऽपि प्रतिकूलतया प्राह-न सा श्राविका मां प्रत्यभिजानाति, अप्रत्यभिज्ञानाच्च न वेत्ति, नैव सा मह्यं दास्यति विवक्षितमौषधादीति गम्यते इति हेतुहेतुमद्भावेन व्याख्येयं, स्वतन्त्रतया वा न सा मां विजानाति, नापि सा मह्यं दास्यतीत्याह, यदिवा निर्गता गृहादिदानीं सा भविष्यतीति मन्ये इति वक्ति, अथवा साधुः 'क्षान्त' मदक्षिणिरिन्तः 'अत्र' विवक्षितप्रयोजने व्रजतु, किमहमेवैकः साधुरस्मीत्यभिधत्ते।

अन्यच्च 'प्रेषिताः' क्वचित्तथाविधप्रयोजने प्रस्थापिताः 'पलिउंचंति'त्ति तत्प्रयोजननिष्पादने पृष्टाः सन्तोऽपह्नवते-क्व वयमुक्ताः ?, गता वा तत्र वयं, न त्वसौ दृष्टेति, पठ्यते च-'पोसिया पलिउंचंति' पोषिताः आहारोपकरणादिना श्रुतादिनः च पुष्टिं नीता अपह्नवते-यथा किमस्माकं गुरुभिः कृतमित्यपलपन्ति 'ते' दुःशिष्याः 'परियंति' पर्यटन्ति 'समन्ततः' सर्वासु दिक्षु, न गुरुसन्निधौ कदाचिदासते, मा कदाचिदेषां किञ्चित्कृत्यं भविष्यतीति, कथञ्चित्संनिधाने वा कर्तुं प्रवृत्तौ 'राजवेष्टिमिव' नृपतिहठप्रवर्त्तितकृत्यमिव 'मन्यमानाः' मनस्वयं धारयन्तः कुर्वन्ति 'भ्रकुटीम्' आवेशवशकृतभ्रत्पेक्षपरूपां 'मुखे' वक्त्रे, अत्यन्तदुष्टताख्यापकमेतत् तदन्यवपुर्विकारोपलक्षणं च।

अपरञ्च-'वाचिताः' शास्त्राणि पाठिताः, उपलक्षणत्वात्तदर्थं च ग्राहिताः, किमाचार्यान्तरसत्का एवसन्त उतान्यथेत्याह-'संगृहीताः' परिगृहीताश्चशब्दाद् दीक्षिता उपस्थिताश्च स्वयमिति गम्यते, एवेति पूरणे, 'भक्तपानेन' च सुस्निग्धमधुरादिना, सूत्रे च सुब्व्यत्ययात्तृतीयार्थे सप्तमी, 'पोषिताः' उपचितीकृताः, तथाऽपि 'जातपक्षाः' उत्पन्नपतत्रा यथा हंसाः प्रकर्षेण- अतिविप्रकृष्टदेशान्तरगमनलक्षणेन क्रामन्ति-गच्छन्ति प्रक्रामन्ति 'दिसोदिसिं'ति दिशि दिशि यदृच्छाविहारिणो भवन्तीत्यर्थः।

पूर्वत्रैकस्थानस्थितानामेव पर्यटनमुक्तम्, इह तु देशान्तरगमन इति न पौनरुक्त्यं, प्रागेकप्रक्रमेऽपि यदिह बह्वभिधानं तदीदृशां भूयस्त्वख्यापनार्थमिति सूत्रषट्कार्थः॥ इत्थं खलुङ्कस्येव समिलाभङ्गादिना दुःशिष्यस्य धृतिदुर्बलत्वादिना दुष्टत्वम्, अत एव स्वस्वामिक्लमासमाधिजनकत्वं चोक्तम्, इदानीं तैरेव प्रापितक्लमासमाधिर्यदसावचेष्टत तदाह-

मू.(१०७३) *अह सारही विचिंतेइ, खलुंके हि समागए।*
किं मज्झ दुट्ठसीसेहिं ?, अप्पा मे अवसीअई॥

मू.(१०७४) *जारिसा मम सीसा उ, तारिसा गलिगद्दहा।*
गलिगद्दहे चइत्ताणं, दढं परिगिण्हई तवं॥

वृ. 'अथे'ति क्लमासमाधिसम्भवानन्तरं सारथिरिव सारथिः स्खलितप्रवर्त्तकतयाऽऽचार्यादिः 'विचिन्तयति' ध्यायति, आचार्यसमाधिप्रतिसन्धानपक्षे तु 'अथे'त्यन्तरकोक्तचिन्तानन्तरं 'सारथिः' स एव गर्गाचार्यः खलुङ्कैरिव खलुङ्कैः-दुःशिष्यैः, हेतौ तृतीया, श्रमं-खेदमागतः-प्राप्तः श्रमागतः, ते हि दुष्टगवगवदनेकधा प्रेर्यमाणा अपि सन्मार्गगच्छन्तो गुरुश्रमहेतव एव भवन्ति, यदिवा समागतः खलुङ्कैरिति च सहार्थे तृतीया, यद्विचिन्तयति तदाह-किं ?, न

किञ्चिदित्यर्थः, ममैहिकमामुष्मिकं वा प्रयोजनं सिध्यतीति गम्यते, कैः ?-दुष्टशिष्यैः, प्रक्रमात्प्रेरितैः, किमेवमुच्यते इत्याह-आत्मा 'मे' ममावसीदति, एतत्प्रेरणादिव्यग्रतया तथाविधस्वकृत्यकरणेन, तत एतत्प्रेरणादरमुद्यतविहारेणैव विधृतमिति भावः।

अथैतत्प्रेरणान्तराले स्वकृत्यमपि किं न क्रियते ? इत्याह-यादृशा मम शिष्याः, 'तुः' पूरणे, तादृशागलिगर्दभाः, यदि परमित्युपस्कारः गर्दभग्रहणमतिकुत्साख्यापकं, ते हि स्वरूपतोऽप्यतिप्रेरणयैव प्रवर्त्तन्ते, तत्स्तत्प्रेरणयैव कालोऽतिक्रामति, न तु तदन्तरालसम्भव इति भावः, यतश्चैवं ततो गलिगर्भानिव गलिगर्दमान्-दुःशिष्यांस्त्यक्त्वा 'दृढं' वाढं 'प्रगृह्णामि' पाठान्तरतः 'परिगृह्णाति वा' अङ्गीकुरुते, तदनुशासनरूपपलिमन्थत्यागतः, एकत्र सामान्येन गुरुरन्यत्र तु गर्गनामा, किन्तु 'तपः' अनशनादीति सूत्रद्वयार्थः॥

ततः कीदृशः सन् किमसौ कुरुते ? इत्याह-

मू.(१०७५) मिउमद्दवसंपन्ने, गंभीरे सुसमाहिए।
विहरइ महिं महप्पा, सीईभूएण अप्पणं॥ त्तिबेमि॥

वृ.'मृदुः' बहिर्वृत्त्या विनयवान् 'मार्दवसंपन्नः' अन्तःकरणतोऽपि तादृगेव, कुशिष्यसन्निधौ हि मृदुरपि स्वरूपतोऽमृदुरेवासीत्, उक्तं हि-प्राक्-'अणासवा थूलवया कुसीला, मिउंपि चंडंपकरंति सीसा' इति, अत एव 'गम्भीरः' अलब्धमध्यः 'सुसमाहितः' सुष्ठु चित्तसमाधानवान् 'विहरति' अप्रतिबद्धविहारेण पर्यटति 'महीं' पृथ्वीं महात्मा शीलं-चारित्रं भूतः-प्रायः शीलभूतस्तेनात्मना उपलक्षितः, यतश्चैवं गुरोरपि खलुङ्कत्यागत एव मार्दवादिगुणसंपन्नतेति खलुङ्कतायां इहैवात्मनो गुरूणां च दोषहेतुत्वेन तत्त्यागतोऽशठतैव सेवितव्येत्यध्ययनतात्पर्यार्थः॥

'इति' परिसमाप्तौ, ब्रवीमिति पूर्ववत् उक्तोऽनुगमः, सम्प्रति नयास्तेऽपि प्राग्वदेव॥

अध्ययनं २७ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
सप्तविंशमध्ययनं सनिर्युक्तिः सटीकं परिसमाप्तम्

अध्ययनं २८ मोक्षमार्गगतिः

वृ. व्याख्यातं सप्तविंशमध्ययनम् अधुनाऽष्टाविंशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तराध्ययनेऽशठतयैव सामाचारी परिपालयितुं शक्यत इति तामभिहितवान्, इह तु तद्व्यवस्थितस्य न्यायप्राप्तैव मोक्षमार्गगतिप्राप्तिरिति तदभिधायकमिदमध्ययनमारभ्यते, अस्य चानुयोगद्वारचतुष्टयं प्राग्वत्प्ररूपणं यावन्नामनिष्पन्नेनिक्षेपे अस्य मोक्षमार्गगतिरिति नाम अतो मोक्षस्य मार्गस्य गतेश्च निक्षेपमिधातुमाह निर्युक्तिकृत्-

नि. [५००] निक्खेवो मुक्खंमि(य) चउव्विहो॥
नि. [५०१] जाणगसरीरभविए तव्वतिरित्ते अ नियलमाईसु।
अट्ठविहकम्ममुक्को नायव्वो भावओ मुक्खो॥
नि. [५०२] निक्खेवो मग्गंमि(वि) चउव्विहो॥
नि. [५०३] जाणगसरीरभविए तव्वतिरित्ते अ जलथलाईसुं।

भावंमि नाणदंसणतवचरणगुणा मुनेयव्वा ॥

नि. [५०४] निक्खेवो उ गईए चउव्विहो दुव्वि० ॥

नि. [५०५] जाणगसरीरभविए तव्वइरित्ते अ पुग्गलाईसुं ।
भावे पंचविहा खलु मुक्खगईए अहीगारो ॥

वृ. निक्खेवोत्यादि गाथाः षट् प्रतीतार्थ एव, नवरं 'तव्वइरित्ते य नियलमाईसु' त्ति तद्व्यतिरिक्तश्च निगडादिभ्यः, आदिशब्दात्कारागृहादिपरिग्रहः, सूत्रत्वाच्च पञ्चम्यर्थे सप्तमी, इह च निगडादीनां द्रव्यत्वात्तन्मोक्षोऽपि द्रव्यमोक्ष उक्तः, अष्टविधकर्मणा-ज्ञानावरणादिना मुक्तः-त्यक्त आत्मेति ज्ञातव्यो भावतो मोक्षः, कथञ्चिद्द्रव्यपर्याययोरनन्यत्वख्यापनार्थमित्थमुक्तम्, अन्यथा हि क्षायिकभाव एवात्मनो मुक्तत्वलक्षणो मोक्ष इत्युच्यते, आह-कर्मणोऽपि द्रव्यात्वात्कर्मक्षयलक्षणत्वाच्चास्य कथं न द्रव्यमोक्षता ?, उच्यते, इह द्रव्यविवक्षितत्वात्क्षायिकभावरूपस्यैव चास्याश्रितत्वान्न दोषः, अथवा भावशब्दोऽत्र परमार्थवचनः, तथा च वक्तारो भवन्ति-अयमत्र भावः-अयमत परमार्थ इत्यर्थः, ततश्चास्यैवैकान्तिकात्यन्तिकत्वेन तात्त्विकत्वाद्भावमोक्षत्वम्, इतरस्य तु तद्विपरीतत्वाद् द्रव्यमोक्षत्वमित्यवकाश एव [illegible], 'तव्वइरित्ते य जलथलाईसु' त्ति जलस्थले-प्रतीते आदिशब्दादुभयपरिग्रहस्तेषु प्रक्रमाद्यो मार्गः स तद्व्यतिरिक्तो द्रव्ये मुनितव्य इति संटङ्कः, भावो ज्ञानदर्शनतपश्चरणगुणा जीवपर्यायत्वान्मुक्तिपदावाप्तिनिमित्ततया च मुनितव्यो मार्ग इति प्रक्रमः ।'तव्वइरित्ते य पोग्गलाईसु' त्ति सूत्रत्वात्तद्व्यतिरिक्ता च प्रक्रमाद्द्रव्यगतिः पुद्गलादिषु, आदिशब्दाज्जीवपरिग्रहः, व्यक्तिभेदविवक्षया च बहुवचननिर्देशः, द्रव्यत्वं चास्या द्रव्यप्राधान्यविवक्षया, अन्यथा हि पुद्गलादिपर्यायत्वाद्भतेर्भावरूपतैव, यदिवा द्रव्यस्य गतिः द्रव्यगतिरिति षष्ठीसमासाश्रयणान्न दोषः, भावे 'पञ्चविधा' पञ्चप्रकारा प्रस्तावाद्गतिर्नारकतिर्यङ्नरामरमुक्त्याख्यगम्यभेदेन, मोक्षगत्यासिद्धिगत्या त्वधिकारः, तस्या एवेहाभिधेयत्वादिति गाथाषट्कार्थः ॥

सम्प्रति यथाऽस्य मोक्षमार्गगतिरिति नाम तथा दर्शयितुमाह-

नि. [५०६] मुक्खो मग्गो अ गई वन्निज्जइ जम्ह इत्थ अज्झयणे ।
तं एअं अज्झयणं नायव्वं मुक्खमग्गगई ॥

वृ. मोक्षः प्राप्यतया मार्गस्तत्प्रापणोपायतया चशब्दो भिन्नक्रमः ततः 'गतिश्च' सिद्धिगमनरूपा तदुभयफलतया 'वर्ण्यते' प्ररूप्यते यस्माद् 'अत्रे'ति प्रस्तुतेऽध्ययने 'तत्' तस्मादेतदध्ययनं ज्ञातव्यं 'मोक्षमार्गगतिः' इति मोक्षमार्गगतिनामकम्, अभिधेयेऽभिधानोपचारादिति भाव इति गाथार्थः ॥ उक्तो नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्

मू. (१०७६) मुक्खमग्गगइं तच्चं (तहं), सुणेह जिनभासियं ।
चउकारणसंजुत्तं, नाणदंसणलक्खणं ॥

वृ. मोक्षणं मोक्षः-अष्टविधकर्मोच्छेदस्तस्य मार्गः-उक्तरूपस्तेन गतिः-अनन्तरोक्तां मोक्षमार्गगतिस्तां, कथ्यमानामिति गम्यते, 'तच्चं'ति 'तथ्याम्' अवितथां 'शृणुत' आकर्णयत 'जिनभाषितां' तीर्थकृदभिहितां, चत्वारि कारणानि वक्ष्यमाणलक्षणानि तैः संयुक्ता-समन्विता चतुष्कारणसंयुक्ता तां, नन्वमूनि चत्वारि कारणानि, कर्मक्षयलक्षणस्य मोक्षस्यैव, मतेस्तु

तदनन्तरभावित्वात्स एवे(व ने)ति कथं चतुष्कारणवतीत्वमस्या न विरुध्यते ?, उच्यते, व्यवहारतः कारणकारणस्यापि कारणत्वाभिधानाददोषः, अत एव चानन्तरकारणस्यैव कारणत्वमित्याशङ्काऽपोहार्थं मस्य विशेषणास्योपन्यासः, अन्यथा हि मोक्षमार्गेण गतिरिति विग्रहे गतिं प्रति मार्गस्य कारणत्वं प्रतीयत एव,

तद्रूपाणि चामूनि, चत्वारि कारणानीति, तथा ज्ञानदर्शने लक्षणं-चिह्नं यस्याः सा ज्ञानदर्शनलक्षणाः, यस्य हि तत्सत्ता तस्यावश्यंभाविनी मुक्तिरिति निश्चीयते. अत एव चानयोर्मूलकारणतां दर्शयितुमित्थमुपन्यासः, यद्वा मोक्षे-उक्तलक्षणे मार्गः-शुद्धो 'मृजू शुद्धा'विति धातुपाठात्तस्य गतिः-प्राप्तिस्तां ज्ञानदर्शने-विशेषसामान्योपयोगरूपे लक्षणम्-असाधारणं स्वरूपं यस्याः सा तथा तां, न चेह निर्युक्तिकृता मार्गगत्योरन्यथाव्याख्यानात्तद्विरोधः, अनन्तगमपर्यायत्वात्सूत्रस्य, शिष्यासंमोहाय कस्यचिदेवार्थस्य तेनाभिधानात्, शेषं प्राग्वदिति सूत्रार्थः ॥

यदुक्तं 'मोक्षमार्गगतिं शृणोति'त्ति तत्र मोक्षमार्गं तावदाह-

मू.(१०७७) *नाणं च दंसणं चेव, चरित्तं च तवो तहा ।*
एस मग्गुत्ति पन्नत्तो, जिनेहिं वरदंसिहिं ॥

वृ. ज्ञायते-अवबुध्यतेऽनेन वस्तुतत्त्वमिति ज्ञानं, तच्च सम्यग्ज्ञानमेव ज्ञानावरणक्षयक्षयोपशमसमुत्थं मत्यादिभेदं, दृश्यते तत्त्वमस्मिन्निति दर्शनम्, इदमपि सम्यग्रूपमेव, दर्शनमोहनीयक्षयोपशमोपशमसमुत्पादितमर्हदभिहितजीवादितत्त्वरुचिलक्षणात्मशुभभावरूपम्, 'एव' अवधारणे भिन्नक्रमश्चोत्तरत्र योक्ष्यते, चरन्ति-गच्छन्त्यनेन मुक्तिमिति चरित्रम्, एतदपि सम्यग्रूपमेव चारित्रमोहनीयक्षयादित्रयप्रादुर्भूतसामायिकादिभेदं सदसत्क्रियाप्रवृत्तिनिवृत्तिलक्षणं, तपति पुरोपात्तकर्माणि क्षपणेनेति तपो-बाह्याभ्यन्तरभेदभिन्नं यदर्हद्वचनानुसारि तदेव समीचीनमुपादीयते, इत्थं चैतत् ।

सर्वत्र मोक्षमार्गगतिप्रस्तावाद्विपर्यस्तज्ञानादीनां तत्कारणताऽनुपपत्तेरन्यथाऽतिप्रसङ्गात्तथेति, सर्वत्र चशब्दः समुच्चये, सर्वत्र समुच्चयाभिधानं समुदितानामेव मुक्तिमार्गत्वख्यापकम्, एष एव 'मार्ग' इति मार्गशब्दवाच्यः, अत्यैव मुक्तिप्रापकत्वात्, 'प्रज्ञप्तः' प्रज्ञापितः 'जिनैः' तीर्थकृद्भिः वरं-समस्तवस्तुव्यापितयाऽव्यभिचारितया च द्रष्टुं-प्रेक्षितुं शीलमेषां ते वरदर्शिनस्तैः, इह च चारित्रभेदत्वेऽपि तपसः पृथगुपादानमस्यैव क्षपणं प्रत्यसाधारणहेतुत्वमुपदर्शयितुं, तथा च वक्ष्यति-"तवसा (उ) विसुज्झइ"त्ति सूत्रार्थः ॥

मू.(१०७८) *नाणं स दंसणं चेव, चरित्तं च तवो तहा ।*
एयं मग्गमणुप्पत्ता, जीवा गच्छंति सुग्गइं ॥

वृ. पूर्वार्द्धं व्याख्यातमेव, 'एनम्' इत्यनन्तरमुक्तरूपं 'मार्गं' पन्थानम् 'अनुप्राप्ताः' आश्रिता जीवाः 'गच्छन्ति' यान्ति 'सोग्गइ'न्ति सुगतिं-शोभनगतिं, प्रक्रमान्मुक्तिमेमिति सूत्रार्थः ॥ ज्ञानादीनि मुक्तिमार्ग इत्युक्तमतस्तत्स्वरूपमिहाभिधेयं, तच्च तद्भेदाभिधानेऽभिहितमेव भवतीतिमत्वा 'यथोद्देशस्तथा निर्देश' इति न्यायतो ज्ञानभेदानाह-

मू.(१०७९) *तत्थ पंचविहं नाणं, सुअं आभिनिबोहियं ।*
ओहियनाणं तइयं, मननाणं च केवलं ॥

वृ. 'तत्र' इति तेषु ज्ञानादिषु मध्ये 'पञ्चविधं' पञ्चप्रकारं, किं तत् -ज्ञान, क एते पञ्च प्रकारा इत्याह श्रूयते तदिति श्रुतं-शब्दमात्रं, तच्च द्रव्यश्रुतमेव, यत्पुनः शब्दमाकर्णयतः स्वयं वा वदतः पुस्तकादिन्यस्तानि वा चक्षुरादिभिरक्षराण्युपलभमानस्य शेषेन्द्रियगृहीतं वाऽर्थं विकल्पयतोऽक्षरानुविद्धं विज्ञानमुपजायते तदिह भावश्रुतं श्रुतशब्देनोक्तं;

तथाऽभिमुखो योग्यदेशावस्थितवस्त्वपेक्षया नियतः स्वस्वविषयपरिच्छेदकतयाऽवबोधः-अवगमोऽभिनिबोधः स एवाभिनिबोधिकं, विनयादित्वात्स्वार्थिकष्ठक्, 'ओहि'त्ति अव-शब्दोऽधःशब्दार्थः, ततश्चाध इत्यधस्ताद्धावति अधोऽधो विस्तृतविषयवेदकतयेत्यवधिः, औणादिको डिः, यद्वा 'अवे'त्यध एव धानं धातूनामनेकार्थत्वात्परिच्छेदोऽवधिः, 'उपसर्गे धोः किः'इति किः, अथवाऽवधिः मर्यादा रूपिष्वेषु परिच्छेदकतया प्रवृत्तित्येवंरूपा, तदुपलक्षितं ज्ञानमप्यवधिः, ज्ञायतेऽनेनेति ज्ञातिर्वा ज्ञानं, ततोऽवधिश्चासौ ज्ञानं चावधिज्ञानं,

तृतीयं तृतीयस्थानवर्त्तित्वात्, 'मननाणं'ति मनःशब्देन द्रव्यपर्याययोः कथञ्चिद भेदात् मनोद्रव्यपर्याया गृह्यन्ते, तेषु तत्तत्संज्ञिविकल्पहेतुषु ज्ञानं मनोज्ञानं,

तानेव हि मनःपर्यायज्ञानी साक्षादेव बुध्यते, न तु-बाह्यान्, अनुमानगम्यमानत्वात्तेषाम्, उक्तं हि-"जाणति बज्झेऽनुमानोओ"त्ति, 'चः' समुच्चये भिन्नक्रमस्ततः केवलं च, तत्र केवलम्-एकमकलुषं सकलमसाधारणमनन्तं च ज्ञानमिति प्रक्रमः, उक्तं हि-"केवलमेगं सुद्धं सकलमसाधारणं अनंतं च।"

आह-नन्द्यादिषु मतिज्ञानानन्तरं श्रुतज्ञानमुक्तं तदिह किमर्थमादित एव श्रुतोपादानम् ?, उच्यते, शेषज्ञानानामपि स्वरूपज्ञानस्य प्रायस्तदधीत्वेन प्राधान्यख्यापनार्थमिति सूत्रार्थः ॥

साम्प्रतं ज्ञानशब्दस्य सम्बन्धिशब्दत्वाद्येषां तज्ज्ञानं तान्यभिधातुमाह-

मू. (१०८०) *एयं पंचविहं नाणं, दव्वाण य गुणाण य।*
पज्जवाणं च सव्वेसिं, नाणं नाणीहिं देसियं॥

वृ. 'एतद्' अनन्तरोक्तं पञ्चविधं ज्ञानं द्रवन्ति-गच्छन्ति तांस्तान् पर्यायानिति द्रव्याणि-वक्ष्यमाणलक्षणानि तेषां, 'चः' तद्गतानेकभेदख्यापको, गुणानां-रूपादीनां, चः प्राग्वत्, परीति-सर्वतः, कोऽर्थः ?-द्रव्येषु गुणेषु सर्वेष्ववन्ति-गच्छन्तीति पर्यवास्तेषां च, 'सर्वेषाम्' अशेषाणां, केवलापेक्षया चायं द्रव्यकात्स्न्यें सर्वशब्दः शेषज्ञानापेक्षया तु प्रकारकात्स्न्यें, प्रतिनियतपर्यायग्राहित्वात्तेषां, 'ज्ञानम्' अवबोधं 'ज्ञानिभिः' अतिशयज्ञानोपेतैः केवलि-भिरितियावत् 'देशितं' कथितम्।

अनेन च यदाहुः-ज्ञानं ज्ञानस्वरूपस्यैव ग्राहकं, बाह्याभिमतस्य वस्तुनो ज्ञानातिरिक्त स्यासत्त्वाद्, अत एवोक्तं-'स्वरूपस्य स्वतो गति'रिति, तन्निरस्तम्, अन्तः सुखादिप्रतिभास-वद्बहिः स्थूलप्रतिभासस्यापि स्वसंविदितत्वात्, न च युगपद्वेद्यमानयोरेकस्य तात्त्विकत्वमितरस्य त्वन्यथात्वमिति निमित्तं विना कल्पयितुं शक्यम्, अथैकत्राविद्योपदर्शितत्वं तत्कल्पननिमित्तं, न, यतस्तदितरत्रापि किं न कल्प्यते ?, निमित्तं विना कल्पनाया उभयत्राविशेषात्, तथा च ज्ञान-स्याप्यभावेन सर्वशून्यतापत्तिरित्यलं प्रसङ्गेनेति सूत्रार्थः ॥

अनेन द्रव्यादिविषयत्वं ज्ञानस्योक्तं, तत्र च द्रव्यादीनि किंलक्षणानीत्यत आह-

मू.(१०८१) *गुणाणं आसओ दव्वं, एगदव्वस्सिया गुणा।*
पज्जवाणं तु उभओ अस्सिया भवे॥

वृ. 'गुणानां' वक्ष्यमाणानाम् 'आश्रयः' आधारो यत्रस्थास्त उत्पद्यन्ते चावतिष्ठन्ते प्रलीयन्ते च तद् द्रव्यम्, अनेन रूपादय एव वस्तु न तद्व्यतिरिक्तमन्यदिति तथागतमतमपास्तं, तथाहि-यदुत्पादविनाशयोर्न वस्त्वोत्पादविनाशौ न तत्ततोऽभिन्नं, यथा घटात्पटे, न भवतश्च पर्यायोत्पाद-विनाशयोर्द्रव्यस्योत्पादविनाशौ न चायमसिद्धो हेतुः, स्थासकोशकुशूलाद्यवस्थासु मृदादि द्रव्यस्यानुगामित्वेन दर्शनात्, न चास्य मिथ्यात्वं, कदाचिदन्यथादर्शनासिद्धेः, उक्तं हि-

"यो ह्यन्यरूपसंवेद्यः, संवेद्येतान्यथा पुनः
स मिथ्या न तु तेनैव, यो नित्यवगम्यते॥"

तथैकास्मिन् द्रव्ये स्वाधारभूते आश्रिताः-स्थिता एकद्रव्याश्रिताः, के ते ?-'गुणाः' रूपादयः एतेन च ये द्रव्यमेवेच्छन्ति तद्व्यतिरिक्तांश्च रूपादीनविद्योपदर्शितानाहुस्तन्मतनिषेधः कृतः, संविनिष्ठा हि विषयव्यवस्थितयो, न च रूपाद्युत्कलितरूपं कदाचित्केनचिद् द्रव्य-मवगतमवगम्यते वा, अथ तद्विवर्त्त एव रूपादयो न तु तात्त्विकाः केचन तद्भेदेन सन्ति, नन्वेवं रूपादिविवर्त्तो द्रव्यमित्यपि किं न कल्प्यते ?, अथ तथैव प्रतीतेः, एवं सति प्रतीतिरुभयत्र साधारणेत्युभयमुभयात्मकमस्तु, लक्ष्यतेऽनेनेति लक्षणं 'पर्यवाणां' वक्ष्यमाणरूपाणां 'तुः' विशेषणे 'उभयोः' द्वयोः प्राकृतत्वाद् द्रव्यगुणायोराश्रिताः, 'भवे'त्ति 'भवेयुः' स्युः। अनेन च य एवमाहुः-यदाद्यन्तयोरसत् मध्येऽपि तत्तथैव, यथा मरीचिकादौ जलादि, न सन्ति च कुशूलकपालाद्यवस्थयोर्घटादिपर्यायाः, ततो द्रव्यमेवादिमध्यान्तेषु सत्, पर्यायाः पुनरसत्त्वैरा-काशकेशादिभिः सदृशा अपि भ्रान्तैः सत्यतया लक्ष्यन्ते, यथोक्तम्-

"आदावन्ते च यन्नास्ति, मध्येऽपि हि न तत्तथा।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः॥"

तेऽपाकृताः, तथाहि-आद्यन्तयोरसत्त्वेनमध्येऽप्यसत्त्वं साधयतामिदमाकूतं-यत्क्वचिद-सत्तत्सर्वस्मिन्निसदिति, ततश्च मुद्रव्येऽप्यद्रव्यस्यासत्त्वात्सर्वस्मिन्नप्यसत्त्वप्रसङ्गः, अथेष्टमे-वैतत्, सत्तामात्रस्यैव तत्त्वत इष्टत्वात्, उक्तं हि-"सर्वमेकं सदविशेषात्" नन्वेवमभावे भावभावाद्भावस्यापि सर्वत्राभावप्रसङ्गः, तस्माद्बाधकप्रत्ययोदय एवासत्त्वे निबन्धनमिति न क्वचिदसत्त्व तस्यावश्यंभावः, ततो द्रव्यवत्पर्यायाणामप्यबाधितबोधविषयत्वे सत्त्वमस्तु, तथा गुणेष्वपि नवपुराणादिपर्यायाः प्रत्यक्षप्रतीता एव कियत्कालभाविनः, प्रतिसमयभाविनस्तु पुराणत्वाद्यन्यथानुपपत्तेरनुमानतोऽवसीयन्ते, ततश्च द्रव्यगुणपर्यायात्मकमेकं शबलमणिवच्चि त्रपतङ्गादिवद्वा वस्त्विति स्थितमिति सूत्रार्थः॥ आह-गृहीतो 'गुणानामाश्रयो द्रव्य'मिति द्रव्य-लक्षणं, तच्चैवंलक्षणं द्रव्यं किमेकमेवोत तस्य भेदो अपि सन्तीत्याह-

मू.(१०८२) *धम्मो अधम्मो आगासं, कालो पुग्गलजंतवो।*
एस लोगुत्ति पन्नत्तो, जिनेहिं वरदंसिहिं॥

वृ. 'धर्म' इति धर्मास्तिकायः 'अधर्म' इत्यधर्मास्तिकायः 'आकाश' मित्याकाशस्तिकायः 'कालः' अद्धासमयात्मकः 'पुद्गलजन्तव'इति पुद्गलास्तिकायः जीवास्तिकायः, एतानि

द्रव्याणीति शेषः, प्रसङ्गतो लोकस्वरूपमप्याह-एष इत्यादि, सुगममेव, नवरमेष इति सामान्यतः प्रतीतो लोक इतीत्थेस्वरूपः, कोऽर्थः ?-अनन्तरोक्तद्रव्यषट्कात्मकः, उक्तं हि-

"धर्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत्क्षेत्रम्।
तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम्॥"

इति सूत्रार्थः॥ आह-किमेतेऽपि धर्मादयो भेदवन्त उतान्यथा ?, उभयथाऽपीति ब्रूमः,

मू.(१०८३) *धम्मो अधम्मो आगासं, दव्वं इक्किक्कमाहियं।*
अनंताणि य दव्वाणि, कालो पुग्गलजंतवो॥

वृ. धर्मोऽधर्म आकाशं द्रव्यमिति धर्मादिभिः प्रत्येकं योज्यते 'एकैकं' एकसङ्ख्याया एवैतेषु भावाद् आख्यातं तीर्थकृद्भिरिति गम्यते, तत्किं कालादिद्रव्याण्यप्येवमेवेत्याह-'अनन्तानि' अनन्तसङ्ख्यानि स्वगतभेदानन्त्यात् 'चः' पुनरर्थे उत्तरत्र योक्ष्यते, कानि ?, द्रव्याणि, कतमानि ?-कालः पुद्गलजन्तवश्चोक्तरूपाः, कालस्य चानन्त्यमतीतानागतापेक्षयेति सूत्रार्थः॥

एषां परस्परभेदनिबन्धनं लक्षणभेदमाह-

मू.(१०८४) *गइलक्खणो उ धम्मो, अहम्मो ठाणलक्खणो।*
भायणं सव्वदव्वाणं, नहं ओगाहलक्खणं॥

मू.(१०८५) *वत्तणालक्खणो कालो, जीवो उवओगलक्खणो।*
नाणेणं दंसणेणं च, सुहेण य दुहेण य॥

मू.(१०८६) *नाणं च दंसणं चेव, चरित्तं च तवो तहा।*
वीरियं उवओगे य, एयं जीवस्स लक्खणं॥

मू.(१०८७) *सद्दंधयारउज्जोओ, पभा छाया तवुत्ति वा।*
वन्नरसगंधफासा, पुग्गलाणं तु लक्खणं॥

वृ. गमनं गतिः-देशान्तरप्राप्तिः लक्ष्यतेऽनेनेति लक्षणं, गतिर्लक्षणमस्येति गतिलक्षणः, 'तुः' पूरणे, काऽसौ ? -धर्मास्तिकायः, आह-सिद्धे सति वस्तुनोऽस्तित्वे इदमनेन लक्ष्यत इति वक्तुं युक्तम्, अस्य तु सत्त्वमेवासिद्धम्, अत्रोच्यते, यद्यच्छुद्धपदवाच्यं तत्तदस्ति, यथा स्तम्भादिः, शुद्धपदवाच्यश्च धर्मनामास्तिकायो, न चायमसिद्धो हेतुः, धर्म इत्यस्यैतद्वाचकस्यासमस्तदत्वेन तथाऽभिधेयार्थबाधकप्रमाणाभावात् प्रमाणान्तरबाधितविषयत्वाख्यदोषरहितत्वेन च सिद्धत्वात्, न च स्वपुण्यादिषु सङ्केतितैर्दुःखादिशुद्धपदैरनेकान्तो, वृद्धपरम्परायातसङ्केतविषयाणामेव शुद्धपदानां वाच्यत्वस्येह हेतुत्वेनेष्टत्वात्, निपुणेन प्रतिपत्त्रा भाव्यम्, अन्यथा धूमादेरपि गोपालघटादिष्वन्यथाभावदर्शनादेष प्रसङ्गो दुर्निवारः स्यात्, उक्तं च-

"अत्थित्ति निव्वियप्पो जीवो नियमा उ सद्दतो सिद्धो।
कम्हा ? सुद्धपयत्ता घडखरसिंगानुमाणाओ॥"

इत्याद्यलं प्रसङ्गेन, तथा 'अधर्मः' अधर्मास्तिकायः स्थितिः स्थानं गतिनिवृत्तिरित्यर्थः, तल्लक्षणमस्येति स्थानलक्षणः, स हि स्थितिपरिणतानां जीवपुद्गलानां स्थितिलक्षणकार्यं प्रत्यपेक्षाकारणत्वेन व्याप्रियत इति तेनैव लक्ष्यत इत्युच्यते, अनेनाप्यनुमानमेव सूचितं, तच्चेदम्-यद्यत्कार्यं तत्तदपेक्षाकारणवद्, यथा घटादि, कार्यं चासौ स्थितिः, यच्च तदपेक्षाकारणं तदधर्मा

स्तिकाय इति, अत्र च नैयायिकादिः सौगतो वा वदेत् नास्ति अधर्मास्तिकायः, अनुपलभ्यमानत्वात्, शशविषाणवत्, तत्र यदि नैयायिकादिस्तदाऽसौ वाच्यः-कथं भवतोऽपि दिगादयः सन्ति ?, अथ दिगादिप्रत्ययलक्षणकार्यदर्शनाद्, भवति हि कार्यात्कारणानुमानम्, एवं सति स्थितिलक्षणकार्यदर्शनादयमप्यस्तीति किं न गम्यते ?, अथ तत्र दिगादिप्रत्ययकार्यस्यान्यतोऽसम्भवात्कारणभूतान् दिगादीननुमिमीमह इति मतिः, तदप्याकाशादीनामवगाहदानादिस्वस्वकार्यव्यापृतत्वेन ततोऽसम्भवादधर्मास्तिकायस्यैव स्थितिलक्षणं कार्यमिति किं नानुमीयते ?, अथासौ न कदाचिद् दृष्टः ?, एतद्दिगादिष्वपि समानम्।

अथ सौगतः सोऽप्येवं वक्तव्यः यथा- भवतः कथं बाह्यार्थसंसिद्धिः ?, न हि कदाचिदसौ प्रत्यक्षगोचरः, साकारज्ञानवादिनः सदातदाकारस्यैव संवेदनात्, तथा च तस्याप्यनुपलभ्यमानत्वादभाव एव, अथाकारसंवेदनेऽपि तत्कारणमर्थः परिकल्प्यते, धूमज्ञान इवाग्निः, एवं सति स्थितिदर्शनेऽपि किं न तत्कारणस्याधर्मास्तिकायस्य निश्चयः ?, अथायमप्यभिदधीत-न कदाचिदसौ तत्कारणत्वेनेक्षित इति, ननु बाह्यार्थेऽपि तुल्यमेतत्, न हि सोऽपि तदाकारकारितया कदाचिदवलोकितः, अथ मनस्कारस्य चिद्रूपतायामेव व्यापारो न तु नियता (त)कारणत्वे, अतस्तत्रार्थः कारणं कल्प्यते, एवं तर्हि जीवपुद्गलौ परिणाममात्र एव कारणं, स्थितिपरिणतौ पुनरधर्मास्तिकायोऽपेक्षाकारणत्वेन व्याप्रियत इति किं न कल्प्यते ?, अथासौ सर्वदा सर्वस्य सन्निहित इत्यनियमेन स्थितिकारणं भवेत्, नन्वेवमर्थोऽपि तर्हि स्वपरगतौ विश्रसाप्रयोगावपेक्षत इति नानयोर्विशेषमुत्पश्यामः,

तथा 'भाजनम्' आधारः 'सर्वद्रव्याणां' जीवादीनां 'नभः' आकाशम्, अवगाहः -अवकाशस्तल्लक्षणमस्येत्यवगाहलक्षणं तद्धवगाहितुं प्रवृत्तानामालम्बनीभवति, अनेनावगाहकारणत्वमाकाशस्योक्तं, न चास्य तत्कारणत्वमसिद्धं, यतो यद्यदन्वयव्यतिरेकानुविधायि तत्तत्कार्यं, यथा चक्षुराद्यन्वयव्यतिरेकानुविधायि रूपादिविज्ञानम्, आकाशान्वयव्यतिरेकानुविधायी चावगाहः, तथाहि-शुषिररूपमाकाशं, तत्रैव चावगाहो, न तु तद्विपरिते पुद्गलादौ, अथैवमलोकाकाशेऽपि कथं नावगाहः ?, उच्यते, स्यादेवं यदि कश्चिदवगाहिता भवेत्, तत्र तु धर्मास्तिकायस्य जीवादीनां चासत्त्वेन तस्यैवाभाव इति कस्यासौ समस्तु ?, नन्वेवमपि न तत्सिद्धिः, हेतोरसिद्धत्वात्, तदसिद्धिश्चान्वयाभावात्, सति हि तस्मिन् भवनमन्वयो, न च तत्सत्त्वसिद्धिरस्ति, अन्वयाभावे च व्यतिरेकस्याप्यसिद्धिरिति, ननु कथं न तत्सत्त्वसिद्धिः ?, अथ भित्त्याद्यभाव एवाकाशमिति, एवं सत्याकाशाभाव एव भित्त्यादय इत्यपि किं न भवति ?, अथ तेषां प्रमाणप्रतीतत्वाद्, इहापि किं न प्रमाणप्रतीतिः ?, तथाहि-वियति विहग इत्यादि प्रतीत्यन्यथानुपपत्त्याऽनुमानतस्तत्सिद्धिः, न चेयं प्रतीतिरन्यथाऽपि संभवतीति न ततस्तत्सिद्धिरिति (वक्तुं) युक्तम्, एवं हि भित्त्यादिप्रतीतेरपि भित्त्याद्यभावेऽपि भावकल्पनया तेषामप्यभावप्रसक्तिः,

अथ तत्प्रतीतेः प्रामाण्यनिश्चय इति नान्यथात्वकल्पना, एवं तर्हि वक्तव्यं-कुतोऽस्याः प्रमाणनिश्चयः ?, किं प्रमाणान्तरानुग्रहाद्बाधकाभावाद्वा ?, यदि प्रमाणान्तरानुग्रहात् किं तत्प्रमाणान्तरं ?, य इहाबाधितप्रत्ययः स सर्वः प्रमाणं, यथा सुखादिप्रत्ययः, बाधितप्रत्ययाश्चामी भित्त्या-

दिप्रत्यया इत्यनुमानमिति चेद्यद्येवमिदमप्यापि यो य इह प्रत्ययः स सर्वः सालम्बनो यथेह कुण्डे दधीति प्रत्ययः इत्यत्र अक्षःसमूहविहग इति प्रत्ययः इत्यनुमानमस्त्येव, अथैवमाधारमात्रस्यैव सिद्धिर्नत्वाकाशस्य, कथं न तत्सिद्धिः ?, यदेव ह्याधारमात्रं तदेवाकाशमिति वयं ब्रूमः, अथ बाधकाभावात्, ननु बाधकमपि विपरीतप्रत्ययोत्पत्तिरूपं, तदभावश्चोभयत्र समान इति न भित्त्याद्यभाव एवाकाशं किन्तु शुषिररूपमन्यदेव, ततस्तद्भावित्वादवगाहस्य कथं न तत्कारणत्वसिद्धिराकाशस्य ?, एवं च स्थितमेतद्-अवगाहेन कार्यरूपेण लक्ष्यमाणत्वादवगाहलक्षणं नभः, तथा वर्त्तन्ते-भवन्ति भावास्तेन तेन रूपेण तान् प्रति प्रयोजकत्वं वर्त्तना सा लक्षणं-लिङ्गमस्येति वर्त्तनालक्षणः, कोऽसौ ?-कालः इदमुक्तं भवति-यदमी शीतवातातपादयः ऋतुविभागेन भवन्ति यच्च केचिच्छशधरकरनिकरानुकारिणारतीप्रसवाः अन्ये तु तुहिनशिलाशकलविशदकुन्दमालतीकुसुमवासवाहिनः अपरे च केशरतिलकुरुबकशिरीषाङ्कोल्लप्रसूनजृम्भमाणपरागभाजः तदितरे च करिदशनसकलधवलमल्लिकाबहलपरिमलहारिणः परे च कदम्बकेतकरजःपूरपूरिताम्बराः अपरे तु सप्तच्छदकुसुमरजोधूलिधूसरितविश्वविश्वम्भराः अविशिष्टवस्तवः प्रकाशन्ते क्रमेणैव भुवनभागांस्तदवश्यममीषां नैयत्यहेतुना केनापि भवितव्यं,

स च काल इत्यलं प्रसङ्गेन, सर्वथा वर्त्तनया लक्ष्यमाणत्वादस्ति काल इति स्थितं, तथा 'जीवः' जन्तुरुपयोगो मतिज्ञानादि लक्षणं-रूपं यस्यासौ उपयोगलक्षणो, मतिज्ञानादिको ह्युपयोगस्तद्धर्मः, स च स्वसंविदित एवेति, तदनुभवतो रूपाद्यनुभवादिव घटादिर्जीवो लक्ष्यत इति तल्लक्षणमुच्यते, प्रपञ्चितं चैतदिहैव प्रागन्यत्र चेति न पुनः प्रतन्यते अत एव 'ज्ञानेन' विशेषग्राहिणा 'दर्शनेन च' सामान्यविषयेण 'सुखेन च' आह्लादरूपेण दुःखेन च तद्विपरीतेन प्रक्रमाल्लक्ष्यत इति गम्यते, न हि ज्ञानादीन्यजीवेषु कदाचिदुपलभ्यन्त इतिकृत्वा।

सम्प्रति विनेयानां दृढतरसंस्काराधानाय उक्तलक्षणमनूद्य लक्षणान्तरमाह-'ज्ञानं च' उक्तरूपमेवं दर्शनं चैव चरित्रं च तपस्तथा 'वीर्यं' वीर्यान्तरायक्षयोपशमसमुत्थं सामर्थ्यलक्षणम् 'उपयोगश्च' अवहितत्वं, किमित्याह-'एतत्' ज्ञानादि जीवस्य लक्षणम्, एतेन हि जीवोऽनन्यसाधारणतया लक्ष्यत इति। इत्थं जीवलक्षणमभिधाय पुद्गलानां लक्षणमाह-

'शब्दः' ध्वनिः 'अन्धकारः' तिमिरम्, उभयत्र सूत्रत्वात्सुपो लुक् 'उद्योतः' रत्नादिप्रकाशः 'प्रभा' चन्द्रादिदीधितिः 'छाया' शैत्यगुणः 'आतपः' रविबिम्बजनित उष्णप्रकाशः, इतिशब्द आद्यर्थः, ततश्च सम्बन्धभेदादीनां परिग्रहः, वा समुच्चये, वर्णश्च-नीलादिः रसश्च-तिक्तादिः गन्धश्च-सुरभ्यादिः, स्पर्शश्च-शीतादिरेषां द्वन्द्वः, इतिशब्देन चाद्यार्थेनैषां ग्रहणेऽपि पुनरुपादानं सर्वत्रानुयायिताख्यापनार्थं, 'पुद्गलानां' स्कन्धादीनां 'तुः' पुनरर्थः लक्षणम्, एतैरेव तेषां लक्ष्यत्वात्, आह-पौद्गलिकत्वे शब्दादीनां पुद्गललक्षणत्वं युक्तं तच्च कथम् ?, उच्यते, शब्दस्तावन्मूर्त्तत्वात्पौद्गलिको, मूर्तिभावोऽस्य प्रतिघातविधायित्वादिभ्यः, उक्तं हि-

"प्रतिघातविधायित्वाल्लोष्टवन्मूर्त्तता ध्वनेः।
द्वारवातानुपाताच्च, धूमवच्च परिस्फुटम्॥"

अन्धकारोद्योतप्रभाणां तु पौद्गलिकत्वं चक्षुर्विज्ञानविषयत्वात्, प्रयोगश्चात्र-यत्पौद्गलिकं न भवति तच्चक्षुर्विज्ञानविषयमपि न भवति, यथाऽऽत्मादयः, चक्षुर्विज्ञानविषयाश्चान्धकारादयः,

अथालोकाभावोऽन्धकारं, तथा च निरुपाख्यत्वेन तस्यासत्त्वमुच्यते, न, सतः सर्वथा निरन्वयाभावस्याभावेनाभावरूपत्वेऽपि निरूपाख्यत्वासिद्धेः, तथाहि- घटस्य कपालाख्यापर्यायान्तरोत्पत्तिरेवाभावो न पुनरुच्छेदमात्रम्, एवमलोकस्याप्यन्धकाराख्यापर्यायान्तरोत्पत्तिरेवाभावो न तु तथाविधपरमाणुरूपतयाऽप्यभाव एव, इत्थं चैतत्, परिणामित्वाद्वस्तुनः, परिणामस्य च सत एव वस्तुनः पूर्वरूपपरित्यागेन रूपान्तरोत्पत्तिरूपत्वात् जीवस्य उक्तं हि-

"परिणामो ह्यर्थान्तरगमनं न च सर्वथा व्यवस्थानम्।
न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः॥"

एवं छायाऽऽतपयोरपि पौद्गलिकत्वं वस्तुत्वं च भावनीयं, तथा स्पर्शनग्राह्यत्वाच्चानयोः पौद्गलिकत्वं, तथाहि-छायायाः शैत्यमातपस्य चोष्णत्वं प्रतिप्राणि प्रतीतमेवेति, अतश्च यत्कैश्चिदुच्यते-शब्दोऽम्बरगुण इत्यादि, तदपास्तं भवति- उक्तञ्च-

"अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः।
छायाऽऽतपस्तमः शब्दभावेन परिणामिनः॥"

इत्यादि, वर्णादीनां च पौद्गलिकत्वं सुप्रसिद्धमेवेति सूत्रचतुष्टयार्थः॥ अनेन द्रव्यलक्षणमुक्तं, पर्यायालक्षणमाह-

मू.(१०८८) *एगत्तं च पुहुत्तं च, संखा संठाणमेव य।*
संजोगा य विभागा य, पज्जवाणं तु लक्खणं॥

वृ. एकस्य भावः एकत्वं-भिन्नेष्वपि परमाण्वादिषु यदेकोऽयं घटादिरिति प्रतीतिहेतुः सामान्यपरिणतिरूपं, चशब्द उत्तरापेक्षया समुच्चये, पृथग्भावः, पृथक्त्वम्-अयमस्मात्पृथगिति प्रत्ययोपनिबन्धनं, 'च:' सर्वत्र प्राग्वत्, संख्यानं सङ्ख्या-यत एको द्वौ त्रय इत्यादिका प्रतीतिरुपजायते, संतिष्ठतेऽनेनाकारविशेषेण वस्त्विति संस्थानं-परिमण्डलोऽयमित्यादिबुद्धिनिबन्धनम्, एवेति पूरणे, 'संयोगाः' अयमंगुल्योः संयोग इत्यादिदिव्यपदेशहेतवः, 'विभागाश्च' अयमितो विभक्त इति बुद्धिहेतवः, उभयत्र सम्बन्धिभेदेन भेदमाश्रित्य बहुवचननिर्देशः, चशब्दोऽनुक्तानवपुराणत्वादिपर्यायोपलक्षकः, 'पर्यवाणाम्' उक्तनिरुक्तानां, 'तुः' पूरणे 'लक्षणम्' असाधारणरूपम्, अयमभिप्रायः-यः कश्चिदस्खलितप्रत्ययः स सर्वः सनिबन्धनो, यथा घटादिप्रत्ययः, अस्खलितप्रत्ययाश्चामी एकोऽयमित्यादिप्रत्ययाः, ततोऽवश्यममीषां निबन्धनेन भवितव्यं, तच्च न द्रव्यमेव, तस्य सदाऽवस्थितत्वेन प्रतिनियतकालैकत्वादिप्रत्ययानुत्पत्तिप्रसङ्गात्, ततश्च यदमीषां कालनियमेनोत्पत्तिनिबन्धनं न तत्पर्यवेभ्यस्तत्तत्परिणतिविशेषरूपेभ्योऽन्यत्, गुणानां तु लक्षणानभिधानं रूपादिरूपाणां तेषामतिप्रतीत्वात् प्रायो विप्रतिपत्त्यविषयत्वाच्चेति सूत्रार्थः॥

इत्थं स्वरूपतो विषयतश्च ज्ञानमभिधाय दर्शनमुपदर्शयितुमाह-

मू.(१०८९) *जीवा जीवा य बंधो य, पुन्नं पावाऽऽसवो तहा।*
संवरो निज्जरा मुक्खो, संतेए तहिया नव॥

मू.(१०९०) *तहियाणं तु भावाणं, सब्भावे उवएसणं।*
भावेण सद्दहंतस्स, सम्मत्तं ति विआहियं॥

वृ. 'जीवाः' उक्तलक्षणाः 'अजीवाश्च' धर्मास्तिकायादय उक्तरूपा एव 'बन्धश्च' जीवकर्मणोरत्यन्तसंश्लेषः पुण्यं-शुभप्रकृतिरूपं पापम्-अशुभं मिथ्यात्वादि आश्रवति-आगच्छत्यनेन कर्मेत्याश्रवः-कर्मोपादानहेतुर्हिंसादिः, पुण्यादीनां च कृतद्वन्द्वानामिह निर्देशः, 'तथे'ति समुच्चये, संवरणं संवरः-गुप्त्यादिभिराश्रवनिरोधः निर्जरणं निर्जरा-विपाकात्तपसो वा कर्मपरिशाटः, 'मोक्षः' कृत्स्नकर्मक्षयात्स्वात्मन्यवस्थानं, 'सन्ति' विद्यन्ते 'एते' अनन्तरोक्ताः 'तथ्याः' अवितथा निरुपचरितवृत्तयो, न तु सुगतसाङ्ख्योलूकादिकल्पितपदार्थवद्विचारक्षमाः, यथा चैतदेवं तथा सूत्रकृताम्नि द्वितीयाङ्गे प्रपञ्चितमिति तत एवावधार्यम्, इह तु ग्रन्थगौरवभयान्नोच्यते, 'नवे'ति नवसङ्ख्याः, मध्यमप्रस्थानापेक्षया चैतद्, अन्यथा सङ्ख्यापेक्षया जीवाजीवयोरेव बन्धादीनामन्तर्भावसम्भवात् द्वित्वसङ्ख्यैवाभिधेया स्यात्, तथा च वक्ष्यति-''जीवा चेव अजीवा य, एस लोगे वियाहिए''त्ति, विस्तरतस्तु तदुत्तरोत्तरभेदविवक्षयाऽनन्तमेव स्यात्।

यद्यमी नव तथ्यास्ततः किमित्याह-'तथ्यानां तु भावानाम्' अनन्तरोदितजीवादिस्वरूपाणां 'सद्भावे' सद्भावविषयं, किमुक्तं भवति?-एतदवितथसत्ताभिधायकम् 'उपदेशनं' गुर्वादिसम्बन्धिनमुपदेशं 'भावेन' अन्तःकरणेन 'श्रद्दधतः' तथेति प्रतिपद्यमानस्य सम्यग्भावः सम्यक्त्वं दर्शनमित्यावत् 'तदि'ति भावश्रद्धानं विशेषेणाख्यातं तीर्थकृदादिभिरिति गम्यते, पठन्ति च-'सब्भावो(वेणो)वएसणे। भावेण उ सद्दहणा सम्मत्तं होति आहिअं' 'सद्दहणे'ति सूत्रत्वात् श्रद्धानं सम्यक्त्वं भवत्याख्यातं, तच्च श्रद्दधात्यनेन जीवादितत्त्वमिति श्रद्धानं-सम्यक्त्वमोहनीयकर्माणुक्षयक्षयोप(शमोप) शमसमुत्थात्मपरिणामरूपम् उक्तं हि-''से य समत्ते पसत्थसम्मत्तमोहणीयकम्माणुवेयणोवसमखयसमुत्थे पसमसंवेगाइलिंगे सुहे आयपरिणामे पन्नत्ति''त्ति, अवश्यं हि स कश्चिदात्मनः परिणामोऽस्ति येन सत्यपि जीवादिस्वरूपावबोधे कस्यचिदेव सम्यक् प्रतिपत्तिर्भवति न पुनः सर्वस्य, यथा हि सत्यपि दर्शने कश्चित् शङ्खे श्वेतिमानं प्रतिपद्यते अन्यस्त्वन्यथाभावमिति तत्र कारणविशेषोऽनुमीयते, एवमिहापि, ततश्च जीवादिस्वरूपपरिज्ञानस्य सम्यग्भावहेतुरात्मपरिणामविशेषः सम्यक्त्वं, न तु ज्ञानस्वरूपमेव, अत एव हि ज्ञानादावरणभेदो विषयभेदः, कारणभेदो ज्ञानाकारणत्वं च सम्यक्त्वं श्रुतकेवलिनोक्तं, यत्तु 'तत्त्वार्थश्रद्धानं सम्यग्दर्शनमपायसद्व्यतया सम्यग्दर्शनमपायो मतिज्ञानतृतीयांश' इत्यादि तत्कारणे कार्योपचारं कृत्वाऽऽयुर्घृतमित्यादिवदिति गुरवो व्याचक्षत इति सूत्रद्वयार्थः॥ इत्थं सम्यक्त्वस्वरूपमभिधाय तद्भेदानाह-

मू.(१०११) *निस्सग्गुवएसरुई आणारुइ सुत्तबीयरुइमेव।*
अभिगमवित्थाररुई किरिया संखेवधम्मरुई॥

वृ. 'निसग्गुवएसरुति'त्ति रुचिशब्दः प्रत्येकं योज्यते, ततो निसर्गः-स्वाभावस्तेन रुचिः-तत्त्वाभिलाषरूपोऽस्येति निसर्गरुचिः, उपदेशो-गुर्वादिना कथनं तेन रुचिर्यस्येत्युपदेशरुचिः, आज्ञा-सर्वज्ञवचनात्मिका तया रुचिर्यस्य स तथा, 'सुत्तबीयरुइमेव'त्ति इहापि रुचिशब्दस्य प्रत्येकमभिसम्बन्धात् सूत्रेण-आगमेन रुचिर्यस्य स सूत्ररुचिः, बीजमिव बीजं-यदेकप्यनेकार्थप्रबोधोत्पादकं वचस्तेन रुचिर्यस्य स बीजरुचिः, अनयोः समाहारद्वन्द्वः, एवेति समुच्चये, अभिगमो-ज्ञानं विस्तारो-व्यासस्ताभ्यां, प्रत्येकं रुचिशब्दो योज्यते, ततोऽभिगमरुचि-

विस्तारुची इति, तथा क्रिया-अनुष्ठानं सङ्क्षेपः संग्रहो धर्मः श्रुतधर्मादिस्तेषु रुचिर्यस्येति, प्रत्येकं रुचिशब्दसम्बन्धात् क्रियारुचिर्धर्मरुचिः सङ्क्षेपरुचिश्च भवति विज्ञेय इति शेषः, यच्चेह सम्यक्त्वस्य जीवानन्यत्वेनाभिधानं तद्गुणगुणिनोः कथञ्चिदनन्यत्वख्यापनार्थमिति सूत्रसङ्क्षेपार्थः ॥ व्यासार्थं तु स्वत एवाह सूत्रकृत्-

मू.(१०९२) भूअत्थेणाहिगया जीवाऽजीवा य पुन्न पावं च।
सहसंमुइआ आसवसंवरु रोएइ उ निसग्गो॥

मू.(१०९३) जो जिनदिट्ठे भावे चउव्विहे सद्दहाइ सयमेव।
एमेव नन्नहत्ति य निस्सग्गरुइत्ति नायव्वो॥

मू.(१०९४) एए चेव उ भावे उवइट्ठे जो परेण सद्दहइ।
छउमत्थेण जिने व उवएसरुइत्ति नायव्वो॥

मू.(१०९५) रागो दोसो मोहो अन्नाणं जस्स अवगयं होइ।
आणाए रोयंतो सो खलु आणारुईनाम॥

मू.(१०९६) जो सुत्तमहिज्जंतो सुएण ओगाहई उ संमत्तं।
अंगेन बाहिरेण व सो सुत्तरुइत्ति नायव्वो॥

मू.(१०९७) एगेण अनेगाइं पयाइं जो पसरई उ सम्मत्तं॥
उदयव्व तिलबिंदू सो बीयरुइत्ति नायव्वो॥

मू.(१०९८) सो होइ अभिगमरुई सुअनाणं जस्स अत्थओ दिट्ठं।
इक्कारस अंगाइं पइन्नगं दिट्ठिवाओ य॥

मू.(१०९९) दव्वाण सव्वभावा सव्वपमाणेहिं जस्स उवलद्धा।
सव्वाइं नयविहोहि य वित्थाररुइत्ति नायव्वो॥

मू.(११००) दंसणनाणचरिते तवविनए सच्चसमिइगुत्तीसु।
जो किरिया भावरुई सो खलु किरियारुई नाम॥

मू.(११०१) अनभिग्गहि य कुदिट्ठी संखेवरुईति होइ नायव्वो।
अविसारओ पवयणे अनभिग्गहिओ अ सेसेसु॥

मू.(११०२) जो अत्थिकायधम्मं सुयधम्मं खलु चरित्तधम्मं च।
सद्दहइ जिनाभिहियं सो धम्मरुइत्ति नायव्वो॥॥

वृ. भूतः सद्भूतोऽवितथ इतियावत् तथाविधोऽर्थो-विषयो यस्य तद्भूतार्थं ज्ञानमिति गम्यते तेन, भावप्रधानत्वाद्वा निर्देशः(स्य), भूतार्थत्वेन-सद्भूता अमी अर्था इत्येवंरूपेणाभिगता अधिगता वा परिच्छिन्ना येनेति गम्यते, जीवाजीवाश्चोक्तरूपाः पुण्यं पापं च, कथममी अधिगता इत्याह-'सहसंमुइअ'त्ति सोपस्कारत्वात्सूत्रत्वाच्च सहात्मना या संगता मतिः सं(सहसं)मतिः, कोऽर्थः?-परोपदेशनिरपेक्षतया जातिस्मरणप्रतिभादिरूपया, 'आसवसंवरे य'त्ति आश्रवसंवरौ, चशब्दोऽनुक्तबन्धादिसमुच्चये, ततो बन्धादयश्च, तथा 'रोचते' श्रद्धत्ते, तुशब्दस्यैवकारार्थत्वाद्रोचत एव योऽन्यस्याश्रुतत्वादनन्तरन्यायेनाधिगतान् जीवाजीवादीनेव 'निसर्ग'इति निसर्गरुचिर्विज्ञेय, स इति शेषः। अमुमेवार्थं पुनः स्पष्टतरमेवाह-

यः 'जिनदृष्टान्' तीर्थकरोपलब्धान् 'भावान्' जीवादिप-दार्थान् 'चतुर्विधान्' द्रव्यक्षेत्र-कालभावभेदतो नामादिभेदतो वा चतुष्प्रकारान् 'श्रद्दधाति' तथेति प्रतिपद्यते 'स्वयमेव' परोप-देशं विना, श्रद्धानोल्लेखस्वमाह- 'एमेय'त्ति एवमेतद्यथा जिनैर्दृष्टं जीवादि, 'नान्यथेति' नैतद्विपरीतं, 'च:' समुच्चये, स ईदृग्निसर्गरुचिरिति ज्ञातव्यः, निसर्गेण रुचिरस्येतिकृत्वा, उपदेशरुचिमाह- एतानेवाज्ञान्तरोक्तान् 'भावान्' जीवादीन् पदार्थान् 'उपदिष्टान्' कथितान् 'परेण' अन्येन श्रद्दधाति, कीदृशा परेण ?- छादयतीति छद्मज्ञानादिकर्मचतुष्टयं तत्र तिष्ठति छद्मस्थः- अनुत्पन्न-केवलस्तेन, जयति रागादिनिति जिनः, औणादिको णक् तेन चोत्पन्नकेवलज्ञानेन तीर्थकृदादिना, छद्मस्थस्य तु प्रागुपन्यासस्तत्पूर्वकत्वाज्जिनस्य प्राचुर्येण वा तथाविधोपदेष्टृणां, स ईदृक् किमित्याह-उपदेशरुचिरिति ज्ञातव्यः उपदेशेन रुचिरस्येति हेतोः ।

आज्ञारुचिमाह-'रागः' अभिष्वङ्गः 'द्वेषः' अप्रीतिः 'मोहः' शेषमोहनीयप्रकृतयः 'अज्ञानं' मिथ्याज्ञानरूपं यस्य 'अपगतं' नष्टं भवति, सर्वथा चास्यैतदपगमासम्भवादेशत इति गम्यते, अपगतशब्दश्च लिङ्गविपरिणामतो रागादिभिः प्रत्येकमभिसंबध्यते, एतदपगमाच्च 'आणाए'त्ति अवधारणफलत्वाद्वाक्यस्य आज्ञयैव आचार्यादिसम्बन्धिन्या रोचमानः' क्वचित्कुग्रहाभा वज्जीवादि तथेति प्रतिपद्यमानो माषतुषादिवत स: 'खलु' निश्चितमाज्ञारुचिर्नामेत्यभ्युपगमे, ततश्चाज्ञारुचिरित्यभ्युपगन्तव्यः, आज्ञया रुचिरस्य यतः ।

सूत्ररुचिमाह-यः 'सूत्रम्' आगमम् 'अधीयानः' पठन् 'श्रुतेन' इति सूत्रेणाधीयमानेन 'अवगाहते' प्राप्नोति 'तुः' पूरणे सम्यक्त्वं, कीदृशा श्रुतेन ?-'अङ्गेन' आचारादिना 'बाह्येन' अनङ्गप्रविष्टेनोत्तराध्ययनादिना वा, वा विकल्पे, 'सः' उक्तलक्षणो गोविन्दवाचकवत्, सूत्ररुचिरिति ज्ञातव्यः, सूत्रहेतुकत्वादस्य रुचेः । बीजरुचिमाह-'एकेन' प्रक्रमात्पदेन जीवादिना 'अनेगाइं पयाइं'ति सुब्व्यत्ययाद् 'अनेकेषु' बहुषु 'पदेषु' जीवादिषु यः 'प्रसरति' व्याप्तिमया गच्छति 'तुः' एवकारार्थः, प्रसरत्येव, सम्यक्त्वमित्यनेन रुचिरत्वोपलक्षिता, तदभेदो-पचारादात्माऽपि सम्यक्त्वमुच्यते, उपचारनिमित्तं च रुचिरूपेणैवात्मना प्रसरणं, क्वेव कः पसरति ?-उदक इव तैलबिन्दुः यथोदकैकदेशगतोऽपि तैलबिन्दुः समस्तमुदकमाक्रामति तथा तत्त्वैकदेशोत्पन्नरुचिप्यात्मा तथाविधक्षयोपशमवशादशेषतत्त्वेषु रुचिमान् भवति, स एवंविधो बीजरुचिर्ज्ञातव्यः, यथा हि बीजं क्रमेणानेकबीजानां जनकमेवमस्यापि रुचिर्विषय-भेदतो भिन्नानां रुच्यन्तराणामिति ।

अभिगमरुचिमाह-स भवत्यभिगमरुचिः श्रुतज्ञानं येनार्थ्यत इत्यर्थः-अभिधेयस्तमाश्रित्य 'दृष्टम्' उपलब्धं, किमुक्तं भवति ?-येन श्रुतज्ञानस्यार्थोऽधिगतो भवति, किं पुनस्तत् श्रुतज्ञान-मित्याह-एकादशाङ्गानि आचारादीनि, प्रकीर्णकमिति जातावेकवचनं, ततः 'प्रकीर्णकानि' उत्तराध्ययनादीनि 'दृष्टिवादः' परिकर्मसूत्रादि, अङ्गत्वेऽपि पृथगुपादानमस्य प्राधान्यख्यापनार्थं, चशब्दादुपाङ्गान्यौपपातिकादीनि, अभिगमान्वितत्वादस्य रुचेः ।

विस्ताररुचिमाह- 'द्रव्याणां' धर्मास्तिकायादीनां 'सर्वभावाः' एकत्वपृथक्त्वाद्यशेषपर्यायाः 'सर्वप्रमाणैः' अशेषैः प्रत्यक्षादिभिर्यस्योपलब्धा-यस्य तत्र व्यापारस्तेनैव प्रमाणेन प्रतीताः 'सव्वहि'ति 'सर्वैः' समस्तैः 'नयविधिभिः' नैगमादिभेदैरमुं भावमयममुं वाऽस्य नयभेद इच्छ-

तीति, 'चः' समुच्चये स ईदृग् विस्तारुचिरिति ज्ञातव्यो, विस्तारविषयत्वेन ज्ञानस्य रुचेरपि तद्विषयत्वादस्य ज्ञानपूर्विका हि रुचिः, यत उक्तम्-"सद्दहइ जाणति जतेः" ।

क्रियारुचिमाह-दर्शनं च ज्ञानं च चरित्रं च दर्शनज्ञानचरित्रं तस्मिन् प्रागुक्तरूपे तथा तपो-विनये सत्याः- निरुपचरितास्ताश्च ताः समितिगुप्तयश्च, यदिवा सत्यं च-अविसंवादनयोगा द्यात्मकं समितिगुप्तयश्च सत्यसमितिगुप्तयस्तासु यः क्रियाभावरुचिः, क्रियाभावरुचिः, किमुक्तं भवति ?-दर्शनाद्याचारानुष्ठाने यस्य भावतो रुचिरस्ति सः 'खलु' निश्चितं क्रियारुचिः नामेति प्रकाशं, भण्यत इति शेषः, इह च चारित्रान्तर्गतत्वेऽपि तपः प्रभृतीनां पुनरुपादानं विशेषत एषां मुक्त्यङ्गत्वख्यापनार्थम् ।

सङ्क्षेपरुचिमाह -अनभिगृहीता-अनङ्गीकृता कुदृष्टीः -सौगतमतादिरूपा येन स तथा सङ्क्षेप-रुचिरिति भवति ज्ञातव्यः, 'अविशारदः' अकुशलः प्रवचने' सर्वज्ञशासने 'अनभिग्गहिओ य सेसेसु'त्ति अविद्यमानमभीति--आभिमुख्येन गृहीतं ग्रहणं- ज्ञानमस्येत्यनभिगृहीतः अनभिज्ञ इत्यर्थः, 'चः' समुच्चये, अनभिगृहीतश्च क्वेत्याह-'शेषेषु' कपिलादिप्रणीतप्रवचनेषु, संभवति हि जिनप्रवचनानभिज्ञोऽपि शेषप्रवचनानभिज्ञ इति तद्व्यवच्छेदार्थमेतत्, अयमाशयः -य उक्त-विशेषणः सङ्क्षेपेणैव चिलातीपुत्रवत्प्रशमादिपदत्रयेण तत्त्वरुचिमवाप्नोति स सङ्क्षेपरुचिरुच्यते।

धर्मरुचिमाह-योऽस्तिकायानां धर्मादीनां धर्मो-गत्युपष्टम्भादिरस्तिकायधर्मस्तं जातावे-कवचनं, श्रुतधर्मम्' अङ्गप्रविष्टाद्यागमस्वरूपं 'खलुः' वाक्यालङ्कारे 'चरित्रधर्मं वा' सामायि कादि, वस्य चार्थत्वात्, 'श्रद्दधाति' तथेति प्रतिपद्यते 'जिनाभिहितं' तीर्थकृदुक्तं स धर्मरुचिरिति ज्ञातव्यो, धर्मेषु-पर्यायेषु धर्मे वा-श्रुतधर्मादौ रुचिरस्येतिकृत्वा, शिष्यमतिव्युत्पादनार्थं चेत्थ-मुपाधिभेदेन सम्यक्त्वभेदाभिधानम्, अन्यथा हि निसर्गोपदेशयोरधिगमादौ वा क्वचित्केषां-चिदन्तर्भाव इति भावनीयमिति सूत्रैकादशकार्थः ॥

कैः पुनर्लिङ्गैरिदं दशविधमपि सम्यक्त्वमुत्पन्नमस्तीति श्रद्धेयमित्याह-

मू. (११०३) *परमत्थसंथवो वा सुदिट्ठपरमत्थसेवणा वावि ।*
वावन्नकुदंसणवज्जणा य संमत्तसद्दहणा ॥

वृ. परमाश्च ते तात्त्विकत्वेनार्थाश्चार्यमाणत्वेन परमार्थाः-जीवादयस्तेषु संस्तवो-गुणकीर्त्तनं तत्स्वरूपं पुनः पुनः परिभावनाजनितः परिचयो वा परमार्थसंस्तवो, वाशब्द उत्तरापेक्षय: समुच्चये, तथा सुष्ठु-यथावद्दर्शिततया दृष्टा-ऽवलब्धाः परमार्था-जीवादयो यैस्ते सुदृष्टपरमार्था-आचार्यादयस्तेषां सेवनं-पर्युपासनम्, इहोत्तरत्र च (प्राकृतत्वात्) सूत्रत्वाच्च स्त्रीलिङ्गनिर्देशः, वेत्यनुक्तसमुच्चये, ततो यथाशक्ति तद्वैयावृत्त्यप्रवृत्तिश्च, 'अपिः' पूर्वापेक्षः समुच्चये, 'वावन्नकुदंसण'त्ति दर्शनशब्दः प्रत्येकमभिसंबध्यते ततो व्यापन्नं-विनष्टं दर्शनं येषां ते व्यापन्न-दर्शनाः-यैरवाप्यापि सम्यक्त्वं तथाविधकर्मोदयाद्धान्तं, तथा कुत्सितं दर्शनं येषां ते कुदर्शनाः-शाक्यादयस्तेषां च वर्जनं-परिहारो व्यापन्नकुदर्शनवर्जनं, मा भूदेतपरिहारतः सम्यक्त्वमालि-न्यमिति, 'चः' समुच्चये, सम्यक्त्वं श्रद्धीयतेऽस्तीति प्रतिपद्यतेऽनेनेति सम्यक्त्वश्रद्धानं, प्रत्येकं च परमार्थसंस्तवादिभिरस्य सम्बन्धादेकवचनं, न चाङ्गारमर्दकादेरपि परमार्थसंस्तवादीनां संभवाद्व्यभिचारिता, तात्त्विकानामेवैषामिहाधिकृतत्वात्, तस्य च तथाविधानामेषामसंभवादिति

सूत्रार्थः ॥ इत्थं सम्यक्त्वस्य लिङ्गान्याभिधाय सम्प्रति तस्यैव माहात्म्यमुपदर्शयन्निदमाह-

मू.(११०४) *नत्थि चरित्तं सम्मत्तविहूणं दंसणे उ भइयव्वं।*
सम्मत्तचरित्ताइं जुगवं पुव्वं व सम्मत्तं ॥

मू.(११०५) नादंसणिस्स नाणं नानेन विनः न हुंति चरणगुणा।
अगुणिस्स नत्थि मुक्खो नत्थि अमुक्खस्स निव्वाणं ॥

वृ. 'नास्ति' न विद्यते उपलक्षणत्वान्नासीन्न च भविष्यति, किं तत् ? चारित्रं कीदृक् ? 'सम्यक्त्वविहीनं' दर्शनेन विरहितं, किमुक्तं भवति ?-यावन्न सम्यक्त्वोत्पादो न तावच्चारित्रं, किमेवं दर्शनमपि चारित्रे नियतमित्याह- 'दर्शने तु' सम्यक्त्वे पुनः सति भक्तव्यं भवति वा न वा, प्रक्रमाच्चारित्रम्, अतो न तत्तत्र नियतं, किमित्येवमत आह-सम्यक्त्वचारित्रे 'युगपद्' एककालमुत्पद्येते इति शेषः। 'पुव्वं व'त्ति पूर्वं चारित्रोत्पादात् सम्यक्त्वमुत्पद्यते ततो यदा युगपदुत्पादस्तदा तयोः सहभावः, यदा तु तथाविधक्षयोपशमाभावतो न तथोत्पादस्तदा सत्यपि सम्यक्त्वे न चारित्रमिति तद्दर्शने भाज्यमुच्यते।

अन्यच्च 'नादर्शिनः' दर्शनविरहितस्य 'ज्ञान'मिति सम्यग्ज्ञानं 'ज्ञानेन विना' ज्ञानविरहिताः 'न भवन्ति' न जायन्ते, के ते ?-चरणगुणाः, तत्र च चरणं-व्रतादि गुणाः-पिण्डविशुद्धादयः, 'अगुणिनः' अविद्यमानगुणस्य चरणविनाभावित्वाद्यथोक्तगुणानामविद्यमानचरण च, यदिवा प्राक् चरणान्तर्गता गुणाश्चरणगुणा इति व्याख्याताास्तत इहापि त एव गृह्यन्ते, नास्ति 'मोक्षः' सकलकर्मक्षयलक्षणो, नास्त्यमुक्तस्य कर्मणेति गम्यते 'निर्वाणं' निर्वृत्तिर्मुक्तिपदप्राप्तिरितियावत्, तदत्र पूर्वसूत्रेण मुक्त्यनन्तरहेतोरपि चारित्रस्य सम्यक्त्वभाव एव भवनं तन्माहात्म्यमुक्तम्, अनन्तरसूत्रेण तूत्तरोत्तरव्यतिरेकदर्शनेना शेषगुणानां, व्यतिरेकस्यान्वयाक्षेपकत्वादिति सूत्रद्वयार्थः ॥

अस्य चाष्टविधाचारसंहितस्यैवोत्तरोत्तरगुणप्राप्तिहेतुतेति तानादर्शयितुमाह-

मू.(११०६) *निस्संकिय निक्कंखिय निव्वितिगिच्छं अमूढदिट्ठी य।*
उववूहथिरीकरणं वच्छल्लपभावणेऽट्ठेते ॥

वृ. शङ्कनं शङ्कितं-देशसर्वशङ्कात्मकं तस्याभावो निःशङ्कितं, एवं काङ्क्षणं काङ्क्षितं-युक्तियुक्तत्वादहिंसाद्यभिधायित्वाच्च शाक्योलूकादिदर्शनान्यपि सुन्दराण्येवेत्यन्यान्यदर्शनग्रहात्मकं तदभावो निष्काङ्क्षितं, प्राग्वदुभयत्र बिन्दुलोपः, विचिकित्सा-फलं प्रति सन्देहो यथा-किमियतः क्लेशस्य स्यादुत नेति ?, तन्त्रन्यायेन 'विदः' विज्ञाः ते च तत्त्वतः साधव एव तज्जुगुप्सा वा यथा-किममी यतयो मलदिग्धदेहाः ?, प्रासुकजलस्नाने हि क इव दोषः स्यादित्यादिकानिन्दा तदभावो निर्विचिकित्सं निर्विजुगुप्सं वा, आर्षत्वाच्च सूत्र एवं पाठः, 'अमूढा' ऋद्धिमत्कुतीर्थिकदर्शनेऽप्यनवगीतमेवास्मद्दर्शनमिति मोहविरहिता सा चासौ दृष्टिश्च बुद्धिरूपा अमूढदृष्टिः, स चायं चतुर्विधोऽप्यान्तर आचारः, बाह्यं त्वाह-

'उववूह'त्ति, उपबृंहणमुपबृंहा दर्शनादिगुणान्वितानां सुलब्धजन्मानो यूयं युक्तं च भवादृशामिदमित्यादिवचोभिस्तत्तद्गुणपरिवर्द्धनं सा च स्थिरीकरणं च -अभ्युपगम (त) धर्मानुष्ठानं प्रति विषीदतां स्थैर्यापादनमंपबृंहास्थिरीकरणे, वत्सलभावो वात्सल्यं-साधर्मिकजनस्य

भक्तपानादिनोचितप्रतिपत्तिकरणं तच्च प्रभावना च-तथा तथा स्वतीर्थोन्नतिहेतुचेष्टासु प्रवर्त्तनात्मिका वात्सल्यप्रभावने, उपसंहारमाह-अष्टैते दर्शनाचारा भवन्तीतिवशेषः, एभिरेवाष्टभिराचार्यमाणैरास्योक्तफलसम्पादकतेति भावः, एतच्च ज्ञानाचाराद्युपलक्षकं, यद्वा दर्शनस्यैव यदाचाराभिधानं तदस्यैवोक्तन्यायेन मुक्तिमार्गमूलत्वसमर्थनार्थमिति सूत्रार्थः ॥

इत्थं ज्ञानदर्शनाख्यं मुक्तिमार्गमभिधाय पुनस्तमेव चारित्ररूपमुपदिदर्शयिषुर्भेदकथनत एव तत्स्वरूपमुपदर्शितं भवतीति मन्वान इदमाह-

मू.(११०७) *सामाइयऽत्थ पढमं छेदोवट्ठावणं भवे बितियं।*
परिहारविसुद्धीयं सुहुमं तह संपरायं च ॥

मू.(११०८) *अकसाय अहक्खायं, छउमत्थस्स जिनस्स वा।*
एयं चयरित्तकरं, चारित्तं होइ आहियं ॥

वृ. समिति-साङ्गत्येनैकीभावेन वा आयो-गमनं, कोऽर्थः? प्रवर्त्तनं, समायः स प्रयोजनमस्य सामायिकं, तदस्य प्रयोजन''मिति ठक्, तच्च सकलसावद्यपरिहार एव, तत्रैव सति साङ्गत्येन स्वपरविभागाभावेन च सर्वत्र प्रवृत्तिसम्भवात्, यद्वा समो-रागद्वेषविरहितः स चेह प्रस्तावाच्चित्तपरिणामस्तस्मिन्नायो-गमनं समायः स एव सामायिकं, विनयादेराकृतिगणत्वात्स्वार्थिकः ठक्, इदमपि सर्वसावद्यविरतिरूपमेव, चेति पूरणे, 'प्रथमम्' आद्यम्, एतच्च द्विधा-इत्वरं यावत्कथिकं च, तत्रेत्वरं भरतैरावतयोः पश्चिमचरमतीर्थकृत्तीर्थयोरुपस्थापनायां छेदोपस्थापनीयचारित्रभावेन तत्र तद्यपदेशाभावात्, यावत्कथिकं च तयोरेव मध्यमतीर्थकृत्तीर्थेषु महाविदेहेषु चोपस्थापनाभाव अभावेन तद्यपदेशस्य यावज्जीवमपि सम्भवात्, तथा छेदः-सातिचारस्य यतेर्निरतिचारस्य वा शिक्षकस्य तीर्थान्तरसम्बन्धिनो वा तीर्थान्तरं प्रतिपद्यमानस्य पूर्वपर्यायव्यवच्छेदरूपस्तदुक्तोपस्थापना महाव्रतारोपणरूपा यस्मिंस्तच्छेदोपस्थापनं भवेद्द्वितीयम्, तथा परिहरणं परिहारो विशिष्टतपोरूपस्तेन विशुद्धिरस्मिन्निति परिहारविशुद्धिकं, तच्चैतद्गाथाभ्योऽवसेयम्-

''परिहारियाण उ तवो जहन्न मज्झो तहेव उक्कोसो।
सीउण्हवासकाले भणिओ धीरेहिं पत्तेयं ॥१॥
तत्थ जहन्नो गिम्हे चउत्थ छट्ठं तु होइ मज्झिमओ।
अट्ठममिहमुक्कोसो इत्तो सिसिरे पवक्खामि ॥२॥
सिसिरे उ जहन्नाइं छट्ठाई दसमचरमगो होई।
वासासु अट्ठमाई बारसपज्जंतगा नेओ ॥३॥
पारणए आयामं पंचसु पगहो दोसऽभिग्गहो भिक्खो।
कप्पट्ठिया य पइदिण करेंति एमेव आयामं ॥४॥
एवं छम्मासतवं चरिउं परिहारिया अनुचरंति।
अनुचरगो परिहारगयपयट्ठिए जाव छम्मासा ॥५॥
कप्पट्ठिओऽवि एवं छम्मासतवं करेइ सेसा उ।

अनुपरिहारगभावं चरंति कप्पट्ठियत्तं च ॥६॥
एवेसो अट्ठारसमासपमानो उ वन्निओ कप्पो ।
संखेवओ विसेसो विसेससुत्ताउ नेयव्वो ॥७॥
कप्पसमत्तीय तयं जिनकप्पं वा उवेंति गच्छं वा ।
पडिवज्जमाणगा पुन जिनस्सगासे पवज्जंति ॥८॥
तित्थयरसमीवासेवगस्स पासे नो य अन्नस्स ।
एएसिं जं चरणं परिहारविसुद्धिगं तं तु ॥९॥

'सुहुमं तह संपरायं च'त्ति, 'तथे' त्यानन्तर्ये, छन्दोभङ्गतया चै(भगाच्चैं)वमुपन्यस्तः, सूक्ष्मः किट्टीकरणतः संपर्येति-पर्यटति अनेन संसारमिति संपरायो--लोभाख्यः कषायो यस्मिन्स्तत्सूक्ष्मसम्परायम्, एतच्चोपशमश्रेणिक्षपकश्रेण्योर्लोभाणुवेदनसमये संभवति, यत उक्तम्-

"लोभाणुं वेदंतो जो खलु उवसामओ व खमओ व ।
सो सुहुमसंपरायो अहखया ऊणओ किंचि ॥"

तथा 'अकषायम्' अविद्यमानकषायं क्षपितोपशमितकषायावस्थाभावि, इह चोपशमितकषायावस्थायामकषायत्वं कषायाकार्याभावात्, 'यथाख्यातम्' अर्हत्कथितस्वरूपानतिक्रमवत्, 'छद्मस्थस्य' उपशान्तक्षीणमोहाख्यगुणस्थानद्वयवर्त्तिनः 'जिनस्य वा' केवलिनः सयोग्ययोगिगुणस्थानद्वयस्थायिनः, वी समुच्चये, यथैतत्पञ्चविधमपि चारित्रशब्दवाच्यं तथाऽन्वर्थत आह-'एतद्' अनन्तरोक्तं सामायिकादि चयस्य-राशेः प्रस्तावात्कर्मणां रिक्तं-विरेकोऽभाव इतियावत् तत्करोतीत्येवंशीलं चयरिक्तकरं चारित्रमिति नैरुक्तो विधिः, आह वक्ष्यति "चरित्तेण निगिण्हाति तवेण य वि(परि)सुज्झति"त्ति कथं न तेनास्य विरोधः ?, उच्यते, तपसोऽपि तत्त्वतश्चारित्रान्तर्गतत्वात्, भवति 'आख्यातं' कथितमर्हदादिभिरिति गम्यत इति सूत्रद्वयार्थः ॥ सम्प्रति तपश्चतुर्थं कारणमाह

मू.(१११०) *तवो अ दुविहो वुत्तो, बाहिरऽब्भंतरो तहा ।*
बाहिरो छव्विहो वुत्तो, एवमब्भितरो तवो ॥

वृ. तपश्च द्विविधमुक्तं, 'बाहिर'त्ति बाह्यमाभ्यन्तरं, तथा तत्र बाह्यं षड्विधमुक्तमेवामिति-षड्विधमाभ्यन्तरं तप उक्तमिति सूत्रार्थः, भावार्थस्तु तपोऽध्ययन, एवाभिधास्यते । आह-एषां मुक्तिमार्गत्वे कस्य कतरो व्यापारः ?, उच्यते-

मू.(१११०) *नाणेन जाणइ भावे, संमत्तेण य सद्दहे ।*
चरितेन निगिण्हाइ, तवेण परिसुज्झई ॥

वृ. 'ज्ञानेन' मत्यादिना 'जानाति' अवबुध्यते 'भावान्' जीवादीन् 'दर्शनेन च' उक्तरूपेण 'सद्दहि'त्ति श्रद्धत्ते चारित्रेण-अनन्तराभिहितेन 'निगिण्हाति'त्ति निराश्रवो भवति, पठ्यते च-'न गिण्हति'त्ति, तत्र 'न गृह्णाति' नादत्ते कर्मेति गम्यते 'तपसा परिशुद्धति' पुरोपचितकर्मक्षपणतः शुद्धो भवति, उक्तं हि-"संजमे अनण्हफले तवे वोदाणफले"त्ति, इति सूत्रार्थः ॥

अनेन मार्गस्य फलं मोक्ष उक्तः, सम्प्रति तत्फलभूतां गतिमाह-

मू.(१११११) *खवित्ता पुव्वकम्माइं, संजमेण तवेण य ।*

सव्वदुक्खप्पहीणट्ठा, पक्कमंति महेसिणो ॥ त्तिबेमि

वृ. 'क्षपयित्वा' क्षयं नीत्वा 'पूर्वकर्माणि' पूर्वोपचितज्ञानावरणादीनि संयमः-सम्यक् पापेभ्य उपरमणं चारित्रमित्यर्थस्तेन 'तपसा' उक्तरूपेण चशब्दाज्ज्ञानदर्शनाभ्यां च, नन्वेवमनन्तरं तपस एव कर्मक्षपणहेतुत्वमुक्तम्, इह तु ज्ञानादीनामपीति कथं न विरोध ?, उच्यते, तपसोऽप्येतत्पूर्वकस्यैव क्षपणहेतुत्वमिति ज्ञापनार्थमित्थमभिधानम्, अत एव मोक्षमार्गत्वमपि चतुर्णामप्युपपन्नं भवति, ततश्च 'सव्वदुक्खप्पहीणट्ठा' त्ति प्राकृतशैल्या सर्वदुःखानि प्रहीणानि-हतानि गतानि प्रक्षीणानि वा सर्वदुःखानि यस्मिन् यद्वा सर्वदुःखानां प्रहीणं प्रक्षीणं वा यस्मिंस्तत्तथा तच्च सिद्धिक्षेत्रमेव तदर्थवन्त इवार्थयन्ते सर्वार्थेच्छोपरमेऽपि तद्गामितया ये ते तथाविधाः 'प्रक्रामन्ति' भृशं गच्छन्ति अथवा प्रहीणानि वा सर्वदुःखान्यर्थाश्च-प्रयोजनानि येषां ते तथाविधाः प्रक्रामन्ति सिद्धिमिति शेषः, 'महेसिणो' त्ति महर्षयो महैषिणो वा प्राग्वन्महामुनय इति सूत्रार्थः ॥

'इति' परिसमाप्तौ ब्रवीमीति पूर्ववत्, उक्तोऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वदेव ॥

अध्ययनं २८ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
अष्टाविंशमध्ययनं सनिर्युक्तिकं सटीकं परिसमाप्तम्

अध्ययनं २९ सम्यक्त्वपराक्रमं

वृ. व्याख्यातमष्टाविंशमध्ययनमेकोनत्रिंशमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने ज्ञानादीनि मुक्तिमार्गत्वेनोक्तानि, तानि च संवेगादिमूलान्यकर्मताऽवसानानि च तथा भवन्तीति तानीहोच्यन्ते, यद्वाऽनन्तराध्ययने मोक्षमार्गगतिरुक्ता इह पुनरप्रमाद एव तत्प्रधानो पायो, ज्ञानादीनामपि तत्पूर्वकत्वादिति, स एव वर्ण्यते, अथवाऽनन्तराध्ययने मुक्तिमार्गगतिरुक्ता, सा च वीतरागत्वपूर्विकेति यथा तद् भवति तथाऽनेनाभिधीयते, इत्यनेन सम्बन्धत्रयेणायातमिदमध्ययनम्, अस्य च महापुरुषस्येव चत्वार्यनुयोगद्वाराणि व्यावर्ण्य नामनिष्पन्ननिक्षेपोऽभिधेयः, स च नामपूर्वक इत्येतन्नामनिर्देशायाह निर्युक्तिकृत्-

नि. [५०७] आयाणपएणेयं सम्मत्तपक्कमंति अज्झयणं।
गुत्तं तु अप्पमायं एगे पुण वीयरागसुयं ॥

वृ. आदीयत इत्यादानम्-आदिः प्रथममित्यर्थः, तच्च तत्पदं च-नीराकाङ्क्षतयाऽर्थगमकत्वेन वाक्यमेवादानपदं तेन, उपचारतश्चेह तदभिहितमपि तथोक्तं, तत आदानप्रदाभिहितेन प्रक्रमात्राम्ना 'इद'मिति प्रस्तुतं सम्यक्त्वपराक्रममितिः उपदर्शने, उच्यत इति शेषः 'अध्ययनं' प्रागुक्तनिरुक्तं, वक्ष्यति हि-"इह खलु सम्मत्तपरक्कमे णामऽज्झयणे पन्नत्ते" त्ति, गुणैर्हि निर्वृत्तं गौणं 'तुः' अवधारणे गौणमेव, अप्रमाद इत्युपलक्षणत्वाद् अप्रमादश्रुतम्, एकेपुनर्वीतरागश्रुतं, कोऽर्थः ?-संवेगादयोऽत्र वर्ण्यन्ते, तद्रूप एव च तत्त्वतोऽप्रमाद इति तदभिधायिश्रुतरूपत्वादप्रमादश्रुतमिति ब्रुवते, अन्ये त्वप्रमादोऽपि वीतरागताफल इति तत्प्रधान्याश्रयणतो वीतरागश्रुतमिति गाथार्थः ॥ अत्र चादानपदनाम्नः सूत्रान्तर्गतत्वात्सूत्रस्पर्शिकनिर्युक्तेरेव तत्र व्यापार इति तदुपेक्ष्य वीतरागश्रुतनाम च तस्य केषाञ्चिदेवाभिमतत्वात् 'मध्यग्रहणे आद्यन्तौ

गृहीतलेख भवत' इति न्यायतो वा द्वयमप्यनादृत्याप्रमादश्रुतनिक्षेपमभिधातुमाह-

नि. [५०८] निक्खेवो अपमाए चउवि० ॥

नि. [५०९] जाणगभविय सरीरे तव्वइरित्ते अमित्तभाईसु।
भावे अन्नाणअसंवराईसु होइ नायव्वो ॥

नि. [५१०] निक्खेवो अपमाए चउवि० ॥

नि. [५११] जाणगभवियसरीरे तव्वइरित्ते अ सो उ पंचविहो।
अंडयबोंडयवालय वागय तह कीडए चेव ॥

नि. [५१२] भावसुअं पुन दुविहं सम्मसुअं चेव होइ मिच्छसुयं।
अहियारो सम्मसुए इहमज्झयणंमि नायव्वो ॥

वृ. गाथापञ्चकं प्रायः प्रतीतार्थमेव, नवरम् 'अमित्तमाईसु' त्ति अमित्राः-शत्रवः आदिशब्दा द्यालादिपरिग्रहस्तेषु योऽप्रमादः स तद्व्यतिरिक्तोऽप्रमाद उच्यते, द्रव्यत्वं चास्य तथाविधाप्रमादकार्याप्रसाधकत्वात् द्रव्यविषयत्वाद्वा, 'भाव' इति भावे विचार्ये अज्ञानं-मिथ्याज्ञानमसंवरः अनिरुद्धाश्रवता, आदिशब्दात्कषायापरिग्रहः, एतेषु प्रक्रमादप्रमादः-एतज्जयं प्रति सदा सावधानतारूपो भवति ज्ञातव्यः।

तथा 'सो उ पंचविधो' त्ति, स इति तत्-तद्व्यतिरिक्तसूत्रं 'तुः' पुनरर्थे 'पञ्चविधं' पञ्चप्रकारं, पञ्चविधत्वमेवाह-'अण्डजं' हंसाद्यण्डकेभ्यो यज्जायते यथा क्वचित्पट्टसूत्रं, पौण्डकं-(बोण्डजं) यद्वमनितिन्दुकोद्भवं यथा कर्पाससूत्रं, वालजं यदूरणकादिकेशोत्पन्नं यथोर्णासूत्रं, वाकजं-सनातस्यादिवाकेभ्यो यज्जायते यथा सनसूत्रं, कीटजं च यत्तथाविधकीटेभ्यो लालात्मकं प्रभवति यथा पट्टसूत्रं, तथा 'सम्यक्श्रुतम्' अङ्गप्रविष्टादि 'मिथ्याश्रुतं' कनकसप्तत्यादि, अधिकारः-प्रकृतं सम्यक्श्रुतेन, सुब्व्यत्ययात्तृतीयार्थे सप्तमी, 'इह' अध्ययने 'ज्ञातव्यः' अवबोद्धव्यः, तद्रूपत्वादस्येति गाथापञ्चकार्थः ॥ सम्प्रति गौणतामेवास्य नाम्नो वक्तुमाह-

नि. [५१३] सम्मत्तमप्पमाओ इहमज्झयणंमि वन्निओ जेणं।
तम्हेयं अज्झयणं नायव्वं अप्पमायसुअं ॥

वृ. 'सम्मत्तं' ति सुब्व्यत्ययात्सम्यक्त्वे उपलक्षणत्वाज्ज्ञानादिषु चाप्रमाद उक्तन्यायेन संवेगादिफलोपदर्शनतः काक्वा तदनुष्ठानं प्रत्युद्यमदर्शनेन वा 'इहमज्झयणंमि' त्ति इहाध्ययने वर्णितो येन तस्मादेतदध्ययनं ज्ञातव्यम् 'अप्रमादश्रुतं' अप्रमादश्रुतनामकमिति गाथार्थः ॥

गतो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्

मू. (१११२) सुअं मे आउसंतेणं भगवया एवमक्खायं-इह खलु सम्मत्तपरक्कमे नामऽज्झयणे समणेणं भगवया महावीरेणं महावीरेणं कासवेणं पवेइए जं सम्मं सद्दहइत्ता पत्तियाइत्ता रोयइत्ता फासइत्ता पालइत्ता तीरइत्ता किट्टइत्ता सोहइत्ता आराहइत्ता आणाए अनुपालइत्ता बहवे जीवा सिज्झंति बुज्झंति मुच्चंति परिनिव्वायंति सव्वदुक्खाणमंतं करेंति ॥

वृ. 'श्रुतम्' आकर्णितं 'मे' मया आयुष्मन्निति शिष्यामन्त्रणम्, एतच्च सुधर्मस्वामी जम्बूस्वामिनं प्रत्याह, 'तेने'ति यः सर्वजगत्प्रतीतः, तेनापि कीदृशेत्याह-'भगवता' समग्रैश्वर्यादिमता प्रक्रमान्महावीरेण 'एव'मिति वक्ष्यमाणप्रकारेण 'आख्यातं' कथितं, तमेव प्रकारमाह- 'इह'

अस्मिन् जगति जिनप्रवचने वा 'खलु' निश्चितं सम्यक्त्वमिति गुणगुणिनोरनन्यत्वात्सम्यक्त्वगुणान्वितो जीवस्तस्य सम्यक्त्वे वोक्तरूपे सति पराक्रमः-उत्तरोत्तरगुणप्रतिपत्त्या कर्मारिजयसामर्थ्यलक्षणो वर्ण्यतेऽस्मिन्निति सम्यक्त्वपराक्रमं नामाध्ययनमस्तीति गम्यते, नन्वेवमिदमपि गौणमेव नाम तत्किमिति निर्युक्तिकृताऽऽदानपदेनैतदुक्तम् ?, इतरे तु गौणे इति, सत्यमेतत्, किन्तु नाम्नोऽनेकविधत्वसूचनार्थं निर्युक्तिकृतेत्थमुक्तं न त्वस्य गौणत्वव्यवच्छेदार्थं, तच्च केन प्रणीतमित्याह-'श्रमणेन' श्रामण्यमनुचरता धर्मकायावस्थामास्थितेनेत्यर्थः, भगवता महावीरेण काश्यपेन 'प्रवेदितं' स्वतः प्रवेदितमेव भगवता ममेदमाख्यातमित्युक्तं भवति, अनेन वक्तृद्वारेण प्रस्तुताध्ययनस्य माहात्म्यमाह-

ननु सुधर्मस्वामिनोऽपि श्रुतकेवलित्वात्तद्वारेणाप्यस्य प्रामाण्यं सिध्यत्येव तत्किमेवमुपन्यासः ?, उच्यते, लब्धप्रतिष्ठैरपि गुरूपदिष्टं गुरुमाहात्म्यं च ख्यापयद्भिः सूत्रमर्थश्चाख्येय इति ख्यापनार्थमेवमुपन्यासः, इत्थं वक्तृद्वारेणस्य माहात्म्यमभिधाय संप्रति फलद्वारेणाह-'यदि'ति प्रस्तुताध्ययनं 'सम्यग्' अनैपरीत्येन 'श्रद्धाय' शब्दार्थौ भवरूपं सामान्येन प्रतिपद्य 'प्रतीत्य' उक्तरूपमेव विशेषत इत्थमेवेति निश्चित्य, यद्वा संवेगादिजनितफलानुभवलक्षणेन प्रत्ययेन प्रतीतिपथमवतार्य, 'रोचयित्वा' तदभिहितार्थानुष्ठानविषयं तदध्ययनादिविषयं वाऽभिलाषात्मात्म उत्पाद्य, संभवति हि क्वचिद्गुणत्तयाऽवधारितेऽपि कदाचिदरुचिरित्येवमभिधानं, 'फासित्त'त्ति तदुक्तानुष्ठानतः स्पृष्ट्वा 'पालयित्वा' तद्विहितानुष्ठानस्यातीचाररक्षणेन 'तीरयित्वा' तदुक्तानुष्ठानं पारं नीत्वा 'कीर्त्तयित्वा' स्वाध्यायविधानतः संशुद्ध 'शोधयित्वा' तदुक्तानुष्ठानस्य तत्तद्गुणस्थानावासित उत्तरोत्तरशुद्धिप्रापणेन 'आराध्य' यथावदुत्सर्गापवादकुशलतया यावज्जीवं तदर्थासेवनेन, एतत् सर्वं स्वमनीषिकातोऽपि स्यादत आह-'आज्ञया' गुरुनियोगात्मिकया 'अनुपाल्य' सततमासेव्य, यद्वा 'स्पृष्ट्वा' योगत्रिकेण मनोवाक्कायलक्षणेन, तत्र मनसा-सूत्रार्थौ भयचिन्तनेन वचसा-वचनादिना कायेन-भङ्गकरचनादिना, एवं पालनाराधनयोरपि योगत्रयं वाच्यं, 'पालयित्वा' परावर्त्तनादिनाऽभिरक्ष्य 'तीरयित्वा' अध्ययनादिना परिसमाप्य 'कीर्त्तयित्वा' गुरोर्विनयपूर्वकमिदमित्थं मयाऽधीतमिति निवेद्य 'शोधयित्वा' गुरुवदनुभाषणादिभिः शुद्धं विधाय 'आराध्य' उत्सूत्रप्ररूपणादिपरिहारेणाबाधयित्वा शेषं प्राग्वन्नवरम् आज्ञयेति जिनाज्ञया, उक्तं हि-

"फासिय जोगतिएणं पालियमविराहियं च एमेव।
तीरियमंतं पाविय किट्टिय गुरुकहण जिनमाना॥"

एवं च कृत्वा किमित्याह-'बहवः' अनेक एव 'जीवाः' प्राणिनः 'सिद्धन्ति' इहैवागमसिद्धत्वादिना, 'बुध्यन्ते' घातिकर्मक्षयेण, 'विमुच्यते' भवोपग्राहिकर्मचतुष्टयेन, ततश्च 'परिनिर्वान्ति' कर्मदावानलोपशमेन अत एव 'सर्वदुःखानां शारीरमानसानाम्' अन्तं' पर्यन्तं कुर्वन्ति मुक्तिपदावाप्त्येति सूत्रार्थः॥

सम्प्रति विनेयानुग्रहार्थं सम्बन्धाभिधानपुरस्सरं प्रस्तुताध्ययनार्थमाह-

मू.(११३) तस्स णं अयमट्ठे एवमाहिज्जइ, तंजहा-संवेगे १ निव्वेए २ धम्मसद्धा ३ गुरुसाहम्मियसुस्सूसणया ४ आलोयणा ५ निंदयणा ६ गरिहणया ७ सामाइए ८ चउवीसत्थए

९ वंदणए १० पडिक्कमणे ११ काउस्सग्गे १२ पच्चक्खाणे १३ थयथुइमंगले १४ काल-पडिलेहणया १५ पायच्छित्तकरणे १६ खमावणया १७ सज्झाए १८ वायणया १९ परिपुच्छणया २० परियट्टणया २१ अनुप्पेहा २२ धम्मकहा २३ सुयस्स आराहणया २४ एगग्गमनसंनिवेसणया २५ संजमे २६ तवे २७ वोदाने २८ सुहसाए २९ अप्पडिबद्धया ३० विवित्तसयनासनसेवणया ३१ विनिवट्टणया ३२ संभोगपच्चक्खाणे ३३ उवहिपच्चक्खाणे ३४ आहारपच्चक्खाणे ३५ कसायपच्चक्खाणे ३६, जोगपच्चक्खाणे ३७ सरीरपच्चक्खाणे ३८ सहायपच्चक्खाणे ३९

भत्तपच्चक्खाणे ४० सब्भावपच्चक्खाणे ४१ पडिरू वया ४२ वेयावच्चे ४३ सव्वगुण-संपुन्नया ४४ वीयरागया ४५ खंती ४६ मुत्ती ४७ मद्दवे ४८ अज्जवे ४९ भावसच्चे ५० करणसच्चे ५१ जोगसच्चे ५२ मनगुत्तया ५३ वयगुत्तया ५४ कायगुत्तया ५५ मणसमाधारणया ५६ वयसमा-धारणया ५७ कायसमाधारणया ५८ नाणसंपन्नया ५९ दंसणसंपन्नया ६० चरित्तसंपन्नया ६१ सोइंदियनिग्गहे ६२ चक्खिंदियनिग्गहे ६३ घाणिंदियनिग्गहे ६४ जिब्भिंदियनिग्गहे ६५ फासिंदियनिग्गहे ६६ कोहविजए ६७ माणविजए ६८ मायाविजए ६९ लोभविजए ७० पिज्ज-दोसमिच्छादंसणविजए ७१ सेलेसी ७२ अकम्मया ७३ (द्वाराणि) ॥

वृ. 'तस्ये'ति सम्यक्त्वपराक्रमाध्ययनस्य नमिति सर्वत्र वाक्यालङ्कारे 'अय' मित्यनन्तरमेव वक्ष्यमाण: 'अर्थ:' अभिधेय: 'एवम्' अमुना वक्ष्यमाणप्रकारेण 'आख्यायते' कथ्यते महावी रेणेति गम्यते, तद्यथेति वक्ष्यमाणतदर्थोपन्यासार्थ:, संवेगो १ निर्वेदो २ धर्मश्रद्धा ३ 'गुरुसाह-म्मियसुस्सूसण'त्ति साधर्मिकगुरुशुश्रूषणम् आर्षत्वाच्चेहोत्तरत्र च सूत्रेष्वन्यथा पाठ: ४ आलोचना ५ निन्दा ६ गर्हा ७ सामयिकं ८ चतुर्विंशतिस्तवो ९ वन्दनं १० प्रतिक्रमणं ११ कायोत्सर्ग: १२ प्रत्याख्यानं १३ स्तवस्तुतिमङ्गलं १४ कालप्रत्युपेक्षणा १५ प्रायश्चित्तकरणं १६ क्षमणा १७ स्वाध्यायो १८ याचना १९ प्रतिप्रच्छना २० परावर्त्तना २१ अनुप्रेक्षा २२ धर्मकथा २३ श्रुतस्याराधना २४ एकाग्रमन:संनिवेशना २५ संयम २६ स्तपो २७ व्यवदानं २८ सुखशायो २९ ऽप्रतिबन्धता ३० विवक्तशयनासनसेवना ३१ विनिवर्त्तना ३२ सम्भोगप्रत्याख्यानम् ३३ उपधिप्रत्याख्यानम् ३४ आहारप्रत्याख्यानम् ३५ कषायप्रत्याख्यानम् ३६

योगप्रत्याख्यानं ३७ शरीरप्रत्याख्यानं ३८ सहायप्रत्याख्यानं ३९ भक्तप्रत्याख्यानं ४० सद्भावप्रत्याख्यानं ४१ प्रतिरूपता ४२ वैयावृत्त्यं ४३ सर्वगुणसंपूर्णता ४४ वीतरागता ४५ क्षान्ति: ४६ मुक्ति: ४७ मार्दवं ४८ आर्जवं ४९ भावसत्यं ५० करणसत्यं ५१ योगसत्यं ५२ मनोगुप्तता ५३ वाग्गुप्तता ५४ कायगुप्तता ५५ मन:साधारणा ५६ वाक्साधारणा ५७ कायसाधारणा ५८ ज्ञानसंपन्नता ५९ दर्शनसंपन्नता ६० चारित्रसंपन्नता ६१ श्रोत्रेन्द्रियनिग्रह: ६२ घ्राणेन्द्रियनिग्रह: ६३ चक्षुरिन्द्रियनिग्रह: ६४ जिह्वेन्द्रियनिग्रह: ६५ स्पर्शनेन्द्रियनिग्रह: ६६ क्रोधविजयो ६७ मानविजयो ६८ मायाविजयो ६९ लोभवियज: ७० प्रेमद्वेषमिथ्यादर्शनविजय: ७१ शैलेशी ७२ अकर्मतेति ७३ इत्यक्षरसंस्कार: ॥

***मू. (१११४)** संवेगेणं भंते ! जीवे किं जणयइ ?, संवेगेणं अनुत्तरं धम्मसद्धं जणयइ, अनुत्तराए धम्मसद्धाए, संवेगं हव्वामागच्छइ, अनंताणुबंधिकोहमाणमायालोभे खवेइ, कम्म न बंधइ, तप्पच्चइयं च मिच्छत्तविसोहिं काऊण दंसणाराहए भवइ, दंसणविसोहिए णं विसुद्धाए*

अत्थेगइया तेनेव णं भग्वग्गहणेणं सिज्झंति बुज्झंति विमुच्चंति परिनिव्वायंति सव्वदुक्खाणमंतं करेंति, सोहोए य णं विसुद्धाए तच्चं पुनो भग्वग्गहणं नाइक्कमंति ॥

वृ. सर्वस्य चास्य प्रयासस्य मुक्तिरेव फलं तत्र च प्रवृत्तिरभिलाषपूर्विका तद्दृष्टश्च संवेग इत्यादितस्तमाह-संवेगोमुक्त्यभिलाषस्तेन भदन्त ! इति पूज्याभिमन्त्रणं 'जीवः किं जनयति ?' जन्तुः कतर गुणमुत्पादयतीति योऽर्थः ?, इति शिष्यप्रश्नः, अत्र प्रज्ञापकः प्रतिवचनमाह-संवेगेन 'अनुत्तरां' प्रधानां धर्मः-श्रुतधर्मादिस्तत्र श्रद्धा-तत्करणाभिलाषरूपा धर्मश्रद्धा तां जनयति, तदभावे हि न तत्सम्भवो, भावेऽपि वा देवलोकादिफलैवासाविति नानुत्तरत्वमस्याः, तयाऽपि किमित्याह--अनुत्तरया धर्मश्रद्धया संवेगं तमेवार्थाद्विशिष्टतरं 'हव्वं'ति शीघ्रमागच्छति, तद्व्यतिरेकेण हि विषयाद्यभिलाषतो न तथाऽस्मिन्नागमनम्, अनुत्तरश्रद्धायां त्वन्यत्र निरभिष्वङ्गतया नान्यथात्वसम्भवः, ततोऽपि किमित्याह-'अनन्तानुबन्धि क्रोधमानमायालोभान्' वक्ष्यमाणलक्षणान् क्षपयति, तथा 'कर्म' प्रस्तावादशुभप्रकृतिरूपं 'न बन्धाति' न श्लेषयति, एवमपि को गुणः ?, इत्याह-

स कषायक्षयः प्रत्ययो -निमित्तं यस्याः सा तत्प्रत्यया सैव तत्प्रत्ययिका स्वार्थे कन् प्रत्ययस्तां, 'चः' कर्मबन्धकत्वापेक्षया समुच्चये, मिथ्यात्वस्य 'विसोहि'त्ति विशोधनं विशुद्धिः-सर्वथा क्षयो मिथ्यात्वविशुद्धिस्तां कृत्वा दर्शनस्य-प्रस्तावात्क्षायिकसम्यक्त्वस्याराधको-निरतिचारपालनाकृद्दर्शनाराधको भवति, तथाऽपि किमित्याह-दर्शनविशुद्धा च 'विशुद्धा' अत्यन्तनिर्मलया 'अस्ति' विद्यते 'एगय'त्ति एकक; कश्चित्तथाविधो भवस्तेनैव 'भवग्रहणेन' जन्मोपादानेन सिद्धति, किमुक्तं भवति ?-यस्मिन्नेव जन्मनि दर्शनस्य तथाविधा शुद्धिस्तत्रैव मुक्तिं गच्छति, यथा मरुदेवी स्वामिनी, यस्तु न तेनैव सिद्धति स किमित्याह-शुद्धा प्रक्रमादर्शनस्य विशुद्धा 'तच्चं'ति तृतीयं पुनर्भवग्रहणम्-अन्यजन्मोपादानात्मकं 'नातिक्रामति' नातिवर्त्तते, अवश्यं तृतीयभवग्रहणे सिद्धतीत्यर्थः, उत्कृष्टदर्शनाराधकापेक्षयैतत्,

"उक्कोसदंसणे णं भंते ! जीवे कइहिं भवग्गहणेहिं सिज्झिज्जा ?,
गोयमा ! उक्कोसेणं तेनेव, ततो मुक्के तइयं नाइक्कमति ॥"

मू. (११९५) निव्वेएणं भंते ! जीवे किं जणयइ ?, निव्वेएणं दिव्वमानुस्सतिरिच्छएसु कामभोएसु निव्वेयं हव्वमागच्छइ सव्वविसुएसु विरज्जइ, सव्वविसएसु विरज्जमाणे आरंभपरिच्चायं करेइ, आरंभपरिच्चायं करेमाणे संसारमग्गं वुच्छिंदइ सिद्धिमग्गपडिवन्ने य हवइ ॥

वृ. संवेगाच्चावश्यम्भावी निर्वेद इति तमाह-इतः प्रभृति सर्वत्र सुगमत्वान्न प्रश्नव्याख्या, 'निर्वेदेन' सामान्यतः संसारविषयेण-कदाऽसौ त्यक्ष्यामीत्येवंरूपेण दिव्यमानुषतैरश्चेषु, सूत्रत्वात्कप्रत्ययः, यथासम्भवं देवादिसम्बन्धिषु कामभोगेषूक्तरूपेण निर्वेदं हव्वमागच्छति यथा-अलमेतैरनर्थहेतुभिरिति, तथा च 'सर्वविषयेषु विरज्यते' अशेषशब्दादिविषयं विरागमाप्नोति, विरज्यमानस्तेषु आरम्भः-प्राण्युपमर्दको व्यापारस्तत्त्यागं करोति, विषयार्थत्वात्तत्सर्वारम्भाणां, तत्परित्यागं कुर्वन् 'संसारमार्गं' मिथ्यात्वाविरत्यादिरूपं व्यवच्छिनत्ति, तत्त्यागवत एव तत्त्वत आरम्भपरित्यागसम्भवात्, तद्व्यवच्छित्तौ च सुप्राय एव सिद्धिमार्गः-सम्यग्दर्शनादि-

रिती सिद्धिमार्गप्रतिपन्नश्च भवति ॥

मू.(१११६) धम्मसद्धाए णं भंते! जीवे किं जणयइ?, २ सायासुक्खेसु रज्जमाणे विरज्जइ अगारधम्मं च णं चयइ, अणगारिए णं जीवे सारीरमानसाणं दुक्खाणं छेयणभेयणसंजोगाईणं वुच्छेयं करेइ अव्वाबाहं च णं सुहं निव्वत्तेइ ॥

वृ. सत्यपि निर्वेदे धर्मश्रद्धैव सकलकल्याणनिबन्धनमिति तामाह-'धर्मश्रद्धया' उक्तरूपाया सातं-सातवेदनीयं तज्जनितानि सौख्यानि सातसौख्यानि प्राग्वन्मध्यपदलोपी समासस्तेषु वैषयिकसुखेष्वितियावत् 'रज्यमानः' पूर्वं रागं कुर्वन् 'विरज्यते' विरक्तिं गच्छति, 'अगारधर्मं च' गृहाचारं गार्हस्थ्यमितियावत्, चशब्दश्चेह वाक्यालङ्कारे, 'त्यजति' परिहरति, तदत्यागस्य विषयैकसुखानुरागनिबन्धनत्वात्, ततश्च 'अनगार'त्ति प्राकृतत्वाद् 'अनगारी' यतिः सन् जीवः शारीरमानसानां दुःखानां किंरूपाणामित्याह- 'छेदनभेदनसंयोगादीना'मिति, छेदनं-खड्गादिना द्विधाकरणं भेदनं-कुन्तादिना विदारणम्, आदिशब्दस्येहापि सम्बन्धात्ता-डनादयश्च गृह्यन्ते, ततश्छेदभेदनादीनां शारीरदुःखानां संयोगः-प्रस्तावादनिष्टसम्बन्धः, आदिशब्दादिष्टवियोगादिपरिग्रहः, ततश्च संयोगादीनां मानसदुःखानां विशेषेण-पुनरसम्भवलक्षणेनोच्छेदः-अभावो व्युच्छेदस्तं करोति, तन्निबन्धनकर्मोच्छेदेनेति भावः, अत एव 'अव्याबाधम्' उपरत-सकलपीडं मौक्तमितियावत्, 'चः' पुनरर्थे भिन्नक्रमस्ततः सुखं पुनः 'निर्वर्त्तयति' जनयति, पूर्वं संवेगफलाभिधानप्रसङ्गेन धर्मश्रद्धायाः फलनिरूपणमिह तु ख्यातत्वेनेत्यपौनरुक्त्यमिति भावनीयम् ॥

मू.(१११७) गुरुसाहम्मियसुस्सूसणयाए णं भंते! जीवे किं जणेइ?, २ विनयपडिवत्तिं जणेइ, विनयपडिवन्ने णं जीवे अणच्चासायणसीले नेरइयतिरिक्खजोणियमनुस्सदेवदुग्गईओ निरंभइ, वन्नसंजलणभत्तिबहुमाणयाए मानुस्सदेवसुग्गइओ निबंधइ सिद्धिसुगइं च विसोहेइ पसत्थाइं च णं विनयमूलाइं सव्वकज्जाइं साहइ, अन्ने य बहवे जीवे विनइत्ता हवइ ॥

वृ. धर्मश्रद्धायां चावश्यं गुरवः शुश्रूषितव्या इति गुरुशुश्रूषणमाह-गुरूणां शुश्रूषणं-पर्युपासनं तेन 'विनयप्रतिपत्तीम्' उचितकर्त्तव्यकरणाङ्गीकाररूपां जनयति 'विनयपडिवन्ने य'त्ति प्राग्वत् प्रतिपन्नः-अङ्गीकृतो विनयो येन स तथा 'चः' पुनरर्थे जीवः 'अनच्चासायणासीले'त्ति अतीवाऽऽयं-सम्यक्त्वादिलाभं शातयति-विनाशयतीत्यत्याशातना तस्यां शीलं-तत्करणस्वभावात्मकमस्येत्यत्याशातनाशीलो न तथाऽनत्याशातनाशीलः, कोऽर्थः ?-गुरुपरिवादादिपरिहारकृत्, एवंविधश्च नैरयिकतिर्यग्योनिकमनुष्यदेवदुर्गतीरिति नैरयिकाश्च तिर्यञ्चश्च नैरयिकतिर्यञ्चस्तेषां योनिः स्वार्थिके के नैरयिकतिर्यग्योनिके-प्रतीते 'मनुष्यदेवदुर्गती च' म्लेच्छकिल्बिषित्वादिलक्षणे 'निरुणद्धि' निषेधति, तद्धेतोरत्याशातनाया अभावेन तत्रागमनात्, तथा वर्णः-श्लाघा तेन सज्ज्वलनं-गुणोद्भावनं वर्णसज्ज्वलनं भक्तिः-अञ्जलिप्रग्रहादिका बहुमानम्-आन्तरप्रीतिविशेष एषां द्वन्द्वे भावप्रत्यये च वर्णसज्ज्वलनभक्तिबहुमानता तयाप्रक्रमाद्गुरूणां विनयप्रतिपत्तिरूपया 'माणुस्सदेवसोग्गइओ'त्ति मानुष्यदेवसुगतीः विशिष्टकुलैश्वर्येन्द्रत्वाद्युपलक्षिता निबध्नाति तत्प्रायोग्यकर्मबन्धनेनेति भावः, 'सिद्धिसोग्गइं'त्ति सिद्धिसुगतिं च विशोधयति, तन्मार्गभूतसम्यग्दर्शनज्ञानादिविशोधनेन, 'प्रशस्तानि' च

प्रशंसाग्रदानि 'विनयमूलानि' विनयहेतुकानि सर्वकार्याणीह श्रुतज्ञानादीनि परत्र च मुक्तिं 'साधयति' निष्पादयति, तत्किमेवं स्वार्थसाधक एवासावित्याह-अन्यांश्च बहून् जीवान् 'विनेता' विनयं ग्राहिता, स्वयं सुस्थितस्योपादेयवचनात्, उक्तं हि- "ठिओ उ ठावए परं" ति, तथा च विनयमूलत्वादशेषश्रेयसां तत्प्रापणेन परार्थसाधकोऽप्यसौ भवत्येवेति भावः।

मू.(११९८) आलोयणाए णं भंते! जीवे किं जणेइ ?, २ मायानियाणमिच्छादंसणसल्लाणं मुक्खमग्गविग्घाणं अनंतसंसारबद्धनाणं उद्धरणं करेइ उज्जुभावं च जणेइ, उज्जुभावं पडिवन्ने य णं जीवे अमाई इत्थीवेयं नपुंसगवेयं च न बन्धइ, पुव्वबद्धं च णं निज्जरेइ॥

वृ. गुरुशुश्रूषां कुर्वतोऽप्यतीचारसम्भवे आलोचनात एव विवक्षितफलप्राप्तिरिति तामाह- अडिति- सकलस्वदोषाभिव्याप्त्या लोचना - आत्मदोषाणां गुरुपरतः प्रकाशनाऽऽलोचना तया माया - शाठ्यं निदानं- ममातस्तपःप्रभृत्यादेरिदं स्यादिति प्रार्थनात्मकं मिथ्यादर्शनं - सांशयिकादि एतानि शल्यानीव शल्यानि ततः कर्मधारये मायानिदानमिथ्यादर्शनशल्यानि, यथा हि तोमरादिशल्यानि तत्कालदुःखदानेऽप्यायतौ दुःखदायीनि एवं मायादीन्यपीत्येवमुच्यते तेषां 'मोक्षविघ्नानां' पापानुबन्धकर्मबन्धनिबन्धनत्वेन मुक्तिप्रतिघातानां, अथाऽनन्तसंसारवर्द्धनानि वृद्धिं नयन्तीत्यनन्तसंसारवर्द्धनानि तेषाम् 'उद्धरणम्' अपनयनं करोति, तदुद्धरणतश्च 'ऋजुभावं च' आर्जवं जनयति 'उज्जुभावपडिवन्ने य'त्ति प्रतिपन्नर्जुभावश्च जीवः 'अमायी' मायारहितस्ततः पुंस्त्वनिबन्धनत्वादमायित्वस्य 'इत्थिवेय'त्ति प्राग्वद्विन्दुलोपे स्त्रीवेदं नपुंसकवेदं च न बध्नाति, पूर्वबद्धं च तदेव क्षयं यद्वा सकलमपि कर्म 'निर्जरयति' क्षपयति, तथा च मुक्तिपदमाप्नोतीत्यभिप्रायः, उक्तं हि-

"उद्धियदंडो साहू अचिरेण उवेइ सासयं ठाणं।
सोवि अनुद्धियदंडो संसारपवड्ढओ होति॥"त्ति

मू.(११९९) निंदणयाए णं भंते! जीवे किं जणेइ ?, २ पच्छानुतावं जणइ, पच्छानुतावेणं विरज्जमाणे करणगुणसेढिं पडिवज्जइ, करणगुणसेढिपडिवन्ने य अनगारे मोहनिज्जं कम्मं उग्घाएइ॥

वृ. आलोचना च दुष्कृतनिन्दावत एव सफला भवतीति तामाह-'निंदणयाए'त्ति, आर्षत्वान्निन्दनम्-आत्मनैवात्मदोषपरिभावनं तेन 'पश्चादनुतापं' हा! दुष्टमनुष्ठितमिदं मयेत्यादिरूपं जनयति, ततः पश्चादनुतापेन 'विरज्यमानः' वैराग्यं गच्छन् करणेन-अपूर्वकरणेन गुणहेतुका श्रेणिः करणगुणश्रेणिः सर्वोपरितनस्थितेर्मोहनीयादिकर्मदलिकान्युपादायोदयसमयात्प्रभृति द्वितीयादिसमयेष्वसङ्ख्यातगुणपुद्गलप्रक्षेपरूपाऽऽन्तर्मौहूर्त्तिकी, यत उक्तम्-

"उवरिमठिईइ दलियं हेट्ठिमठाणेसु कुणइ गुणसेढी।
गुणसंकमकरणं पुण असुहाआ सुहंमि पक्खिवइ॥"

उपलक्षणत्वात्स्थितिघातरसघातगुणसंक्रमबन्धाश्च विशिष्टाः, अथवा करणगुणेन- अपूर्वकरणादिमाहात्म्येन श्रेणिः करणगुणश्रेणिः प्रक्रमात्क्षपकश्रेणिरेव गृह्यते, यद्वा करणं-पिण्डविशुद्धादि तदुपलक्षितगुणानां ज्ञानादीनां श्रेणिं उत्तरोत्तरगुणपरम्परास्वरूपां तां प्रतिपद्यते 'करणगुणसेढीपडिवन्ने य'त्ति प्राग्वत्प्रतिपन्नकरणगुणश्रेणिकश्चानगारः 'मोहनीयं' दर्शनमोहनीयादि

कर्म 'उद्घातयति' क्षपयति, तत्क्षपणे च मुक्तिप्राप्तिरित्यर्थत उक्तैव भवति ॥

मू. (११२०) गरिहणाए णं भंते ! जीवे किं जणेइ ?, २ अपुरक्कारं जणेइ, अपुरक्कारगए णं जीवे अप्पसत्थेहिंतो जोगेहिंतो निवत्तइ पसत्थेहि य पडिवज्जइ, पसत्थजोगपडिवन्ने य णं अनगारे अनंतघाई पज्जवे खवेइ ॥

वृ. कश्चिदात्मनोऽत्यन्तदुष्टतां परिभावयन् न निन्दामात्रेण तिष्ठत् किन्तु गर्हामपि कुर्यादिति तामाह-'गरिहणयाए' त्ति गर्हणेन परसमक्षमात्मनो दोषोद्भावनेन 'अपुरक्कारं' ति पुरस्करणं पुरस्कारो-गुणवानयमिति गौरवाध्यारोपो न तथाऽपुरस्कारः अवज्ञास्पदत्वं तं जनयत्यात्मन इति गम्यते, तथा चापुरस्कारं गतः-प्राप्तः अपुरस्कारगतः सर्वत्रावज्ञास्पदीभूतो जीवः कदाचित्कदध्यवसायोत्पत्तावपि तद्भीतित एव 'अप्रशस्तेभ्यः' कर्मबन्धहेतुभ्यो योगेभ्यः 'निवर्त्तते' तान् न प्रतिपद्यते, प्रशस्तयोगांस्तु प्रतिपद्यत इति गम्यते, 'पसत्थजोगपडिवन्ने य' त्ति प्रतिपन्न प्रशस्तयोगोऽनगारोऽनन्तविषयतयाऽनन्ते ज्ञानदर्शने हन्तुं शीलं येषां तेऽनन्तघातिनस्तान् 'पर्यवान्' प्रस्तावात् ज्ञानावरणादिकर्मणस्तद्घातित्वलक्षणान् परिणतिविशेषान् 'क्षपयति' क्षयं नयति, पर्यवाभिधानं च तद्रूपतयैव द्रव्यस्य विनाश इति ख्यापनार्थम्, उपलक्षणं चैतन्मुक्तिप्राप्तेः, तदर्थत्वात्सर्वप्रयासस्य, एवमनुक्ताऽपि सर्वत्र मुक्तिप्राप्तिरेव फलत्वेन द्रष्टव्या ॥

मू. (११२१) सामाइएणं भंते ! जीवे किं जणेइ ?, सावज्जजोगविरइं जणयइ ॥

वृ. आलोचनादीनि च सामायिकवत एव तत्त्वतो भवन्तीति तदुच्यते-'सामायिकेन' उक्तरूपेण सहावद्येन वर्त्तन्त इति सावद्याः-कर्मबन्धहेतवो योगा-व्यापारास्तेभ्यो विरतिः-उपरमः सावद्ययोगविरतिस्तां जनयति, तद्विरतिसहितस्यैव सामायिकसम्भवात्, न चैवं तुल्यकालत्वेनानयोः कार्यकारणभावासम्भव इति वाच्यं, केषुचित्तुल्यकालेष्वपि वृक्षच्छायादिवत्कार्यकारणभावदर्शनाद्, एवं सर्वत्र भावनीयम् ॥

मू. (११२२) चउवीसत्थएणं भंते ! जीवे किं जणेइ ?, दंसणविसोहिं जणइ ॥

वृ. सामायिकं च प्रतिपत्तुकामे तत्प्रणेतारः स्तोतव्याः, ते च तत्त्वतस्तीर्थकृत एवेति तत्सूत्रमाह-'चतुर्विंशतिस्तवेन' एतदवसर्पिणीप्रभवतीर्थकृदुत्कीर्त्तनात्मकेन दर्शनं-सम्यक्त्वं तस्य विशुद्धिः-तदुपघातिकर्मापगमतो निर्मलीभवनं दर्शनविशुद्धिस्तां जनयति ॥

मू. (११२३) वंदणएणं भंते ! जीवे किं जणेइ ?, २ नीयागोयं कम्मं खवेइ उच्चागोयं निबंधइ सोहग्गं च णं अप्पडिहयं आणाफलं निवत्तेइ दाहिणभावं च णं जणेइ ॥

वृ. स्तुत्वाऽपि तीर्थकरान् गुरुवन्दनपूर्विकैव तत्प्रतिपत्तिरिति तदाह-'वन्दनकेन' आचार्यादुचितप्रतीपत्तिरूपेण 'नीचैर्गोत्रम्' अधमकुलोत्पत्तिनिबन्धनं कर्म क्षपयति, 'उच्चैर्गोत्रं' तद्विपरीतरूपं निबध्नाति, 'सौभाग्यं च' सर्वजनस्पृहणीयतारूपम् 'अप्रतिहतं' सर्वत्राप्रतिस्खलितमत एवाज्ञा-जनेन यथोदितवचनप्रतिपत्तिरूपा फलं 'निर्वर्त्तयति' जनयति, तद्वतो हि प्रायः आदेयकर्मणोऽप्युदसम्भवादादेयवाक्यताऽपि संभवतीति, 'दक्षिणभावं च' अनुकूलभावं जनयति लोकस्येति गम्यते, तन्माहात्म्यतोऽपि सर्वः सर्वावस्थास्वनुकूल एव भवति ।

मू. (११२४) पडिक्कमणेणं भंते ! जीवे किं जणेइ ?, २ वयछिद्दाइं पिहेइ, पिहियवयछिद्दे पुन जीवे निरुद्धासवे असबलचरित्ते अट्ठसु पवयणमायासु उवउत्ते अपुहत्ते सुप्पणिहिए विहरइ ॥

वृ.एतद्गुणस्थितेनापि मध्यमतीर्थकृतां तीर्थेषु स्खलितसम्भवे पूर्वपश्चिमयोस्तु तदभावेऽपि प्रतिक्रमितव्यमिति प्रतिक्रमणमाह-'प्रतिक्रमणेन' अपराधेभ्यः प्रतीपनिवर्त्तनात्मकेन व्रतानां-प्राणातिपातनिवृत्त्यादीनां छिद्राणि-अतिचाररूपाणि विवराणि व्रतच्छिद्राणि 'पिदधाति' स्थगयति अपनयतीतियावत्, तथाविधश्च कं गुणमवाप्नोतित्याह-पिहितव्रतच्छिद्रः पुनर्जीवः 'निरुद्धाश्रवः' सर्वथा हिंसाद्याश्रवाणां निरुद्धत्वात्, अत एवासबलं-सबलस्थानैरकर्बुरीकृतं चरित्रं यस्य स तथा, 'अष्टसु प्रवचनमातृषु' उक्तरूपासु 'उपयुक्तः' अवधानवान् तत एवाविद्यमानं पृथक्त्वं-प्रस्तावात्संयमोद्योगेभ्यो वियुक्तस्वरूपं यस्यासौ अपृथक्त्वः-सदा संयमयोगवान् (अ) प्रमत्तो वा पाठान्तरात्, तथा 'सुप्रणिहितः' सुष्ठु संयमे प्रणिधानवान्, पाठान्तरतो वा सुष्ठु प्रणिहितानि-असन्मार्गात् प्रत्याव्य सन्मार्गे व्यवस्थापितानीन्द्रियाण्यनेनेति सुप्रणिहितेन्द्रियः 'विहरति' संयमाध्वनि याति।

मू.(११२५) काउस्सग्गेणं भंते! जीवे किं जणेइ ?, २ तीयपडुप्पन्नं पायच्छित्तं विसोहेइ, विसुद्धपायच्छित्ते य जीवे निव्वुयहियए ओहरियभरुव्व भारवहे धम्मज्झाणोवगए सुहं सुहेणं विहरइ॥

वृ.अत्र चातीचारशुद्धिनिमित्तं कायोत्सर्गः कर्त्तव्य इति तमाह-कायः शरीरं तस्योत्सर्गः-आगमोक्तनीत्या परित्यागः कायोत्सर्गस्तेन, अतीतं चेह चिरकालभावित्वेन प्रत्युत्पन्नमिव प्रत्युत्पन्नं चासन्नकालभावितयाऽतीतप्रत्युत्पन्नं 'प्रायश्चित्तम्' उपचारात्प्रायश्चित्तार्हमतीचारं 'विशोधयति' तदुपार्जितपापापनयतोऽपनयति, विशुद्धप्रायश्चित्तश्च जीवो निर्वृत्तं-स्वस्थीभूतं हृदयम्-अन्तःकरणमस्येति निर्वृत्तहृदयः, क इव ?-'ओहरिय'त्ति अपहृतः अपसारितो भर इति-भारो यस्मात्स तथा, इवेति भिन्नक्रमः, ततो भारं वहतीति मूलविभुजादेराकृतिगणत्वात्कप्रत्यये भारवहो वाहीकादिः स इव, भारप्राया ह्यतीचारास्ततस्तदपनयनेऽपहृतभरभारवाह इव निर्वृत्तहृदयो भवतीति भावार्थः, स च ध्यानं-धर्माद्युपगतः प्राप्तो ध्यानोपगतः पाठान्तरतः प्रशस्तध्यानध्यायी 'सुखंसुखेन' सुखपरम्परयावाप्त्या 'विहरति' इहपरलोकयोरवतिष्ठते, इहैव जीवन् मुक्त्यवाप्तेरिति भावः॥

मू.(११२६) पच्चक्खाणेणं भंते! जीवे किं जणेइ ?, २ आसवदाराइं निरुंभइ पच्चक्खाणेणं इच्छा निरोहं जणयइ इच्छानिरोहं गए णं जीवे सव्व दव्वेसु विनीयतण्हे सीइभूए विहरइ॥

वृ. एवमप्यशुद्धमाने प्रत्याख्यानं विधेयमिति तदाह-'प्रत्याख्यानेन' मूलगुणोत्तरगुणप्रत्याख्यानरूपेणा श्रवद्वाराणि निरुणद्धि, तन्निरोधहेतुत्वात्तस्य, उपलक्षणं चैतत्, पुरोपचितकर्मक्षये मुक्त्यङ्गत्वेनास्यान्यत्रोक्तत्वात्, तथा चाह-

"पच्चक्खाणमिणं सेविऊण भावेण जिनवरुद्दिट्ठं।
पत्ताऽनंता जीवा सासयसोक्खं लहुं मोक्खं॥"

मू.(११२७) थयथुइमंगलेणं भंते! जीवे किं जणेइ ?, २ नाणदंसणचरित्तबोहिलाभं संजणइ, नाणदंसणचरित्तबोहिलाभसंपन्ने णं जीवे अंतकिरियं कप्पविमानोववत्तियं आराहणं आराहेइ॥

वृ. अत्र चोत्तरगुणप्रत्याख्यानान्तर्भूतं नमस्कारसहितादि, तद्ग्रहणानन्तरं च यत्र सन्निहितानि चैत्यानि (तत्र) तद्वन्दनं विधेयमित्युक्तं प्राक्, तच्च न स्तुतिस्तवमङ्गलं विनेति तदाह-तत्र स्तवादेवेन्द्रस्तवादयः स्तुतय-एकादिसप्तश्लोकान्ताः, यत उक्तम्-

"एगदुगतिसिलोगा(थुइओ) अन्तेसिं जाव हुंति सत्तेव।
देविंदत्थवमाई तेन परं थुत्तया होंति॥" त्ति,

ततश्च स्तुतयश्च स्तवाश्च स्तुतिस्तवाः, स्तुतिशब्दस्य क्त्यन्तत्वात्पूर्वनिपातः, सूत्रे तु प्राकृतत्वाद्व्यत्ययनिर्देशः, स्तुतिस्तवा एव मङ्गलं-भावमङ्गलरूपं स्तुतिस्तवमङ्गलं तेन ज्ञानदर्शनचारित्रात्मिका बोधिर्ज्ञानदर्शनचारित्रबोधिस्तस्य लाभो ज्ञानदर्शनचारित्रबोधिलाभः, परिपूर्णजिनधर्मावाप्तिरित्यर्थः, तं जनयति, उक्तञ्च-

"भत्तीए जिनवराणं परमाए खीणपिज्जदोसाणं।
आरोग्गबोहिलाभं समाहिमरणं च पावेंति॥"

ज्ञानदर्शनचारित्रलाभबोधिसंपन्नश्च जीवोऽन्तः पर्यन्तो भवस्य कर्मणां वा तस्य क्रिया-अभिनिर्वर्त्तनमन्तक्रिया, मुक्तिरित्यर्थः, ततश्चान्तक्रियाहेतुत्वादन्तक्रिया ताम्, अन्तक्रियाहेतुत्वं च तद्भवेऽपि स्यादत आह-कल्पा देवलोका विमानानि-ग्रैवेयकानुत्तरविमानरूपाणि तेषूपपत्तिर्यस्यां सा कल्पविमानोपपत्तिका तां, किमुक्तं भवति? अनन्तरजन्मनि कल्पादिषु विशिष्टदेवत्वावाप्तिफलां [illegible] तु मुक्तिप्राप्तिफलाम् 'आराधयति' ज्ञानाराधनात्मिकाम् 'आराधयति' साधयति, इयं चैवंविधाऽऽराधना तपस्विनायामपि तथाविधगुरुकर्मणां तथाविधकर्मवेदनाऽभाववन्तं च जीवमपेक्ष्योक्ता, अन्तक्रियाभाजनं च जीववस्तु चतुर्धा भवति, तथाहि-कश्चित्प्रतिपद्यापि श्रामण्यं पालयन्नपि संयमं तथाविधगुरुकर्मतया तथाविधविशिष्टाध्यवसायासम्भवेन तथाविधकर्मवेदनाया अभावान्ना तद्भव एव मुक्तिभाग् भवति, किन्तु भवान्तरे दीर्घपर्यायावाप्त्या, यथा सनत्कुमारचक्री, तथा च स्थानङ्गम्-

"तत्थ खलु इमे पढमे अंतकिरियावत्थू-महाकम्मे पच्चायाए यावि भवति, समणाउसो! से णं समणे भवेत्ता अगाराओ अनगारं पव्वइओ उवट्ठिए नेयाउयस्स मग्गस्स संजमबहुले समाहिबहुले(संवरबहुले) लूहे तीरट्ठीओ उवहाणवं दुक्खंखवे तवस्सी, तस्स णं तहप्पगारे तवे भवति नो तहप्पगारा वेयणा भवति, से णं तहप्पगारे पुरिसज्जाए दीहदीहेणं परियाएणं सिज्झइ बुज्झइ मुच्चइ परिणिव्वाति सव्वदुक्खाणमंतं करेइ, जहा से सणंकुमारे राया चाउरंत-चक्कवट्टी पढमा अंतकिरियावत्थू १।

अहावरे दोच्चे अंतकिरियावत्थू महाकम्मा पच्चायाए आविभवति समणाउसो! से णं मुंडे भवित्ता अगारातो अनगारियं पव्वयाइ, उवट्ठिए नेयाउयस्स जाव उवहाणवं दुक्खं खवेइ तवस्सी, तस्स णं तहप्पगारे तवे भवति, तहप्पगारा वेयणा भवति, से णं तहप्पगारे पुरिसजाए भवति, निरुद्धेणं परियाएणं सिज्झति जाव सव्वदुक्खाणमंतं करेति जहा से गयसुकुमाले"

अपरः पुनरल्पकर्मा श्रामण्यमवाप्य तथाविधतपसस्तथा वेदनायाश्चाभावात्तदभवभाविना दीर्घपर्यायेण निर्वाणमाप्नोति, यथा भरतश्चक्रवर्त्ती, यथोक्तम्-"अहावरे तच्चे अंतकिरियावत्थू अप्पकम्मे पच्चायाए यावि भवति, समणाउसो! से णं मुंडे भवित्ता अगाराओ अनगारियं

पव्वएत्ति, उवट्ठिए नेआउयस्स मग्गस्स संजमबहुले जाव सव्वदुक्खसंखवे तवस्सी, तस्स णं नो तहप्पगारे तवे भवति नो तहप्पगारा वेयणा भवति, से णं तहप्पगारे पुरिसज्जाए दीहेणं परियाएणं सिज्झति, जहा से भरहे राया चाउरंतचक्कवट्टी ३।"

तदन्यस्त्वल्पकर्मा विरतिमवाप्य तथाविधविशुद्धाध्यवसायवशात्तथाविधतपस्तथाविधवेदना च लब्ध्या झगित्येव मुक्तिमधिगच्छति, यथा मरुदेवी स्वामिनी, तथा च तत्रैवोक्तम्-"अहावरे चउत्थे अंतकिरियावत्थू अप्पकम्मे पच्चायाते यावि भवति, से णं मुंडे भवित्ता अगाराओ अनगारियं पव्वतिए उवट्ठिए नेयाउयस्स मग्गस्स संजमबहुले जाव सव्वदुक्खंखवे तवस्सी, तस्स णं तहप्पगारे तवे भवति तहप्पगारा चेव वेयणा भवति, से णं तहप्पगारे पुरिसजाए निरुद्धेणं परियाएणं सिज्झइ जाव सव्वदुक्खाणं अंतं करेति, जहा से मरुदेवी भगवतित्ति" पठन्ति च 'अनंतकिरियं आराहणं आराहेति'त्ति" अत्र चाविद्यमानाऽन्तक्रिया-कर्मक्षयलक्षणा तद्भव एव यस्यां साऽनन्तक्रिया तां परम्परामुक्तिफलामित्यर्थः ॥

मू. (११२८) *कालपडिलेहणाए णं भंते ! जीवे किं जणेइ ?, २ नाणावरणिज्जं कम्मं खवेइ ॥*

वृ. अर्हद्वन्दनानन्तरं स्वाध्यायो विधेयः, स च काल एव, तत्परिज्ञानं च कालप्रत्युपेक्षणापूर्वकमिति तामाह-कालः-प्रादोषिकादिस्तस्य प्रत्युपेक्षणा-आगमविधिना यथावन्निरूपणा ग्रहणप्रतिजागरणरूपा कालप्रत्युपेक्षणा तया, ज्ञानावरणीयं कर्म क्षपयति, यथावत्प्रवृत्त्या तथाविधशुभभावसम्भवेनेतिभावः ॥

मू. (११२९) *पायच्छित्तकरणेणं भंते ! जीवे किं जणेइ ?, २ पावकम्मविसोहिं जणेइ निरइयारे आवि भवइ सम्मं च णं पायच्छित्तं पडिवज्जमाणे मग्गं च मग्गफलं च विसोहेइ आयारं आयारफलं च आराहेइ ॥*

वृ. कथञ्चिदकालपाठे च प्रायश्चित्तं प्रतिपत्तव्यमिति प्रक्रमायातं तत्करणमाह-तत्र पापं छिनत्ति प्रायश्चित्तं वा विशोधयतीति नैरुक्तविधिना प्रायश्चित्तम्, उक्तं हि-

"पावं छिंदति जम्हा पायच्छित्तंति भन्नए तेणं ।
पाएण वाऽवि चित्तं विसोहए तेन पच्छित्तं ॥"ति,

तच्चालोचनादि तस्य करणं-विधानं प्रायश्चित्तकरणं तेन पापकर्मणां विशुद्धिः-अभावः पापकर्मविशुद्धिस्तां जनयति निरतिचारस्यापि भवति, तेनैव ज्ञानाचाराद्यतीचारविशोधनात्, सम्यक् च प्रायश्चित्तं प्रतिपद्यमानो मार्गः-इह ज्ञानप्राप्तिहेतुः सम्यक्त्वं तं च तत्फलं च ज्ञानं 'विशोधयति' निर्मलीकुरुते, ततश्चाचर्यत इत्याचारः-चारित्रं तच्च तत्फलं च मुक्तिलक्षणमाराधयति, न च ज्ञानदर्शनयोर्युगपद्भावभावित्वाद्धेतुफलभावाभाव इति वाच्यं, यत आगमः

"कारणकज्जविभागो दीवपगासाण जुगवजम्मेवि ।
जुगवुप्पन्नंति तहा हेऊ नाणस्स संमत्तं ॥"

यद्वा मार्ग-चारित्रप्राप्तिनिबन्धनतया दर्शनज्ञानाख्यं तत्फलं च चारित्रं तत आचारं च-ज्ञानाचारादि तत्फलं-मोक्षमायायति, अथवा 'मार्गं च' मुक्तिमार्गं क्षायोपशमिकदर्शनादि तत्फलं च-तमेव प्रकर्षावस्थं क्षायिकदर्शनादि, शेषं प्राग्वत्, विशोधनाऽऽराधनयोश्च सर्वत्र निरति

चारतयैव हेतुरिति भावनीयम् ॥

मू.(११३०) खमावणयाए णं भंते! जीवे किं जणेइ ?, २ पल्हायणभावं जणेइ, पल्हायणभावमुवगए य सव्वपाणभूयजीवसत्तेसु मित्तीभावं उप्पाएइ, मित्तीभावमुवगए य जीवे भावविसोहिं काऊण निब्भए भवइ ॥

वृ.प्रायश्चित्तकरणं च क्षमणावत एव भवत्यतस्तामाह-क्षमणा--दुष्कृतानन्तरं क्षमितव्यमिदं मयेत्यादिरूपा तया 'पल्हाएनंतभावं जणयइ'त्ति प्रह्लादेन-आत्मनो मनःप्रसत्त्यात्मकेनान्तर्भा(भा)वं-विनाशं प्रक्रमादनुशस्य तज्जनितचित्तसंक्लेशस्य च 'जनयति' उत्पादयति प्रह्लादेनान्तर्भावमुपगतश्च, पठन्ति च-'पल्हायणभावं जणयति, पल्हायणभावमुवगए य'त्ति, इह च प्रह्लादनभावः चित्तप्रसत्तिरूपोऽभिप्रायः, सर्वे च ते प्राणाश्चेह द्वित्रिचतुरिन्द्रिया भूताश्च-तरवो जीवाश्च-पञ्चेन्द्रियाः सत्त्वाश्च-शेषजन्तवः सर्वप्राणभूतजीवसत्त्वाः, उक्तं हि-

"प्राणा द्वित्रिचतुष्प्रोक्ता, भूताश्च तरवः स्मृताः ।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा इतीरिताः ॥"

तेषु 'मित्रीभावं' परहितचिन्तालक्षणमुत्पादयति, ततो मैत्रीभावमुपगतश्चापि जीवः 'भाव-विशुद्धिं' रागद्वेषविगमरूपां कृत्वा 'निर्भयः' इहलोकादिभयविकलो भवति, अशेषभय-हेत्वभावादिति भावः ।

मू.(११३१) सज्झाएणं भंते! जीवे किं जणेइ ?, २ नाणावरणिज्जं कम्मं खवेइ ॥

वृ.एवंविधगुणावस्थितेन स्वाध्याये यतितव्यमिति तमाह-स्वाध्यायेन ज्ञानावरणीयमुपलक्षणत्वात् शेषं च कर्म क्षपयति, यत आह-

"कम्ममसंखेज्जभवं खवेइ अनुसमयमेव आउत्तो ।
अन्नयरम्मिवि जोए सज्झायंमि य विसेसेणं ॥"

मू.(११३२) वायणयाए णं भंते! जीवे किं जणेइ ?, २ निज्जरं जणेइ सुअस्स य अनुसज्जणाए अणासायणाए वट्टइ, सुयस्स य अनुसज्जणाए अनासायणाए वट्टमाणे तित्थधम्मं अवलंबइ, तित्थधम्ममवलंबमाणे महानिज्जराए महापज्जवसाने हवइ ॥

वृ. अत्र च प्रथमं वाचनैव विधेयेति तामाह-वक्ति शिष्यस्तं प्रति गुरोः प्रयोजकभावो वाचना पाठनमित्यर्थस्तया 'निर्जरां' कर्मपरिशाटनं जनयति, तथा 'श्रुतस्य' आगमस्य चास्य भिन्नक्रमत्वादनाशातनायां च वर्त्तते, तदकरणे ह्यवज्ञातः श्रुतमाशातितं भवेत्, न तु तत्करण इति, पठन्ति च-'अनुसज्जणाए वट्टइ' तत्रानुषङ्ग(ञ्ज)नमनुवर्त्तनं तत्र वर्त्तते, कोऽर्थः ?-अव्यवच्छेदं करोति, ततः श्रुतस्यानाशातनायामनुषञ्जने वा वर्त्तमानः तीर्थमिह गणधरस्तस्य धर्मः-आचारः श्रुतधर्मप्रदानलक्षणस्तीर्थधर्मः यदिवा तीर्थं-प्रवचनं श्रुतमित्यर्थस्तद्धर्मः-स्वाध्यायस्तमवलम्बमानः-आश्रयन् महती बहुतरकर्मविषयत्वान्निर्जराऽस्येति महानिर्जरो महत्-महाप्रमाणपर्यवसितत्वेन प्रशस्यं वा मुक्त्यावाप्त्या पर्यवसानम्-अन्तः कर्मणो भवस्य वा यस्य, चस्य गम्यमानत्वान्महापर्यवसानश्च भवति, मुक्तिभागू भवतीति हृदयम् ।

मू.(११३३) पडिपुच्छणाए णं भंते! जीवे किं जणेइ ?, २ सुत्तत्थतदुभयाइं विसोहेइ, कंखामोहनिज्जं कम्मं वुच्छिंदेइ ॥

वृ. गृहीतवाचनेनापि संशयाद्युत्पत्तौ मुदा प्रष्टव्यमिति प्रतिप्रच्छनावसर इति तामाह- तत्र प्रथमं कथितस्य सूत्रादेः पुनः प्रच्छनं प्रतिप्रच्छनं तेन सूत्रार्थतदुभयानि विशोधयति, संशयादिमालिन्यापनयनेन विशुद्धानि कुरुते, तथा काङ्क्षा-इदमित्थमित्थं च ममाप्येतुर्मुचित-मित्यादिका वाञ्छा सैव मोहयति 'अन्यत्रापी'ति वचनादनीयरि काङ्क्षामोहनीयं कर्म अनभिग्रहिकमिथ्यात्वरूपं 'व्युच्छिनत्ति' विशेषेणापनयति।

मू.(११३४) परियट्टणयाए णं भंते! जीवे किं जणेइ?, २ वंजणाइं जणेइ वंजणलद्धिं च उप्पाएइ॥

वृ. इत्थं विशोधितस्यापि सूत्रस्य मा भूद्विस्मरणमिति परावर्त्तनाऽवसरः, तत्र च 'परिवट्टणाए'त्ति सूत्रत्वापरावर्त्तना- गुणनं तया व्यज्यते एभिरर्थ इति व्यञ्जनानि अक्षराणि 'जनयति' उत्पादयति, तानि हि विगलितान्यपि गुणयतो झगित्युत्पतन्तीत्युत्पादितान्युच्यन्ते, तथा तथाविध कर्मक्षयोपशमतो व्यञ्जनलब्धिं, चशब्दाद् व्यञ्जनसमुदायात्मकत्वाद्वा पदस्य तल्लब्धिं च पदानुसारितालक्षणमुत्पादयति॥

मू.(११३५) अनुप्पेहाए णं भंते! जीवे किं जणेइ?, २ आउयवज्जाओ सत्त कम्मपयडीओ धणियबंधणबद्धाओ सिढिलबंधणबद्धाओ पकरेइ, दीहकालट्ठिईयाओ हस्सकालट्ठिईयाओ पकरेइ, तिव्वानुभावाओ मंदानुभावाओ पकरेइ, बहुप्पएसग्गाओ अप्पपएसग्गाओ पकरेइ, आउं च णं कम्मं सियं बंधइ सिय नोबंधइ, अस्सायावेयनिज्जं च णं कम्मं नो भुज्जो भुज्जो उवचिनइ, अनाइयं च णं अनवयग्गं दीहमद्धं चाउरंतसंसारकंतारं खिप्पामेव वीइवयइ॥

वृ. सूत्रवदर्थेऽपि संभवति विस्मरणमतः सोऽपि परिभावनीय इत्यनुप्रेक्षा प्रस्तावात्सूत्रानुप्रेक्षा-चिन्तनिका तया प्रकृष्टशुभभावोत्पत्तिनिबन्धनतयाऽऽयुष्कवर्जाः सप्त कर्मप्रकृतिः 'धणियं'ति बाढं बन्धनं श्लेषणं तेन बद्धा निकाचिता इत्यर्थः 'शिथिलबन्धनबद्धाः' किञ्चिन्मुत्कलाः, कोऽर्थः ?-अपवर्त्तनादिकरणयोग्याः प्रकरोति, तपोरूपत्वादस्याः, तपसश्च निकाचितकर्मक्षपणेऽपि क्षमत्वात्, उक्तं हि-"तवसा उ निकाइयाणंपि"त्ति, दीर्घकालस्थितिका ह्रस्वकालस्थितिकाः प्रकरोतीति, शुभाध्यवसायवशात्स्थितिस्व(क)ण्डकापहारेणेति भावः, एतच्चैवं, सर्वकर्मणामपि स्थितेरशुभत्वात्, यत उक्तम्-

"सव्वासिंपि ठितीओ सुभासुभाणंपि होंति असुभाओ।
माणुसतिरिच्छदेवाउयं च मोत्तूण सेसाणं॥"

तीव्रानुभावाश्चतुःस्थानिकरसत्वेन मन्दानुभावाः त्रिस्थानिकरसत्वाद्यापादनेन प्रकरोति, इह चाशुभप्रकृतय एव गृह्यन्ते, शुभभावस्य शुभाशुभतीव्र(व्रमन्दा)नुभावहेतुत्वात्, उक्तं हि-"सुभयपयडीण विसोही(ए)तिव्वमसुभाण संकिलेसेणं।

अत्रं हिऽविसोहीए"त्ति, शुभभावेन तीव्रमित्यनुभागं बन्धातीति प्रक्रमः, क्वचिदिदमपि दृश्यते-"बहुपएसग्गाओ अप्पपएसग्गातो करेति" ननु केनाभिप्रायेणायुष्कवर्जाः सप्तेत्यभिधानं ?, शुभायुष एव सयतस्य सम्भवात्, तस्यैव चानुप्रेक्षा तात्त्विकी, न च शुभभावेन शुभप्रकृतीनां शिथिलतादिकरणं, संक्लेशहेतुकत्वात्तस्य, आहशुभायुर्बन्धोऽप्यस्याः किं न फलमुक्तम् ?, उच्यते, आयुष्कं च कर्म स्याद्बन्धाति, तस्य त्रिभागादिशेषायुष्कतायामेव बन्ध-

सम्भवात्, उक्तं हि-"सिय तिभागे सिय तिभागतिभागे" इत्यादि, ततस्तस्य कादाचित्कत्वेन विवक्षितत्वात्तद्गतश्च कस्यचिन्मुक्तिप्राप्तेस्तद्बन्धानभिधानमिति भावः, अपरं च 'असातवेदनीयं' शारीरादिदुःखहेतुं कर्मचशब्दादन्याश्चाशुभप्रकृतिः 'नो' नैव भूयोभूयः 'उपचिनोति' बध्नाति, भूयोभूयोग्रहणं त्वन्यतमप्रमादतः प्रमत्तसंयतगुणस्थानवर्त्तितायां तद्बन्धस्यापि सम्भवात्, अन्ये त्वेवं पठन्ति-'सायावेयनिज्जं च णं कम्मं भुज्जो भुज्जो उवचिणाति' इह च शुभप्रकृतिसमुच्चयार्थश्चशब्दः, शेषं स्पष्टम्, 'अनादिकम्' आदेरसम्भवात्, 'चः' समुच्चयार्थो योऽस्यते 'अनवयग्ग'न्ति अनवदत्-अनपगच्छत् 'अग्रं' परिमाणं यस्य सदाऽवस्थितानन्तपरिमाणत्वेन सोऽयमनवदग्रोऽनन्त इत्यर्थस्तं, प्रवाहापेक्षं चैतत्, अत एव 'दीहमद्धं'ति मकारोऽलाक्षणिकः 'दीर्घाद्धं' दीर्घकालं दीर्घो वाऽध्वा-तत्परिभ्रमणहेतुः कर्मरूपो मार्गो यस्मिन् स्तत्तथा, चत्वारः चतुर्गतिलक्षणा अन्ताः-अवयवा यस्मिंस्तच्चतुरन्तं संसारकान्तारं क्षिप्रमेव-शीघ्रमेव 'वीतीवयति'त्ति 'व्यतिव्रजति' विशेषेणातिक्रामति, किमुक्तं भवति ?-मुक्तिमवाप्नोति।

मू.(११३६) धम्मकहाए णं भंते ! जीवे किं जणेइ ?, २ निज्जरं जणेइ, धम्मकहाए णं पवयणं पभावेइ, पवयणपभावएणं जीवे आगमिसस्सभद्दत्ताए कम्मं निबंधइ ॥

वृ. एवमभ्यस्तश्रुतेन च धर्मकथाऽपि विधेयेति तामाह-'धर्मकथया' व्याख्यानरूपया निर्जरां जनयति, पाठान्तरश्च प्रवचनं 'प्रभावयति' प्रकाशयति, उक्तं च-

"पावयणी धम्मकही वादी नेमित्तिओ तवस्सी य।
विज्जा सिद्धो य कवी अट्ठेव पभावगा भणिया ॥"

'आगमिसस्सभद्दताए'त्ति सूत्रत्वादागमिष्यदिति-आगामिकालभावि भद्रं-कल्याणं यस्मिंस्तथा तस्य भावस्तत्ता तया, यदिवाऽऽगमिष्यतीत्यागमः-आगामी कालस्तस्मिन् शश्वद्भद्रतया-अनवरतकल्याणतयोपलक्षितं कर्म निबध्नाति, शुभानुबन्धि शुभमुपार्जयतीति भावः।

मू.(११३७) सुयस्स आराहणयाए णं भंते ! जीवे किं जणेइ ?, २ अन्नाणं खवेइ, न य संकिलिस्सइ ॥

वृ. इत्थं च पञ्चविधस्वाध्यायरतेन श्रुतमाराधितं भवतीति तदाराधनोच्यते - श्रुतस्य 'आराधनया' सम्यगासेवनया 'अज्ञानम्' अनवबोधं 'क्षपयति' अपनयति, विशिष्टतत्त्वावबोधाभावात्, 'न च संक्लिश्यते' नैव रागादिजनितसंक्लेशभाग् भवति, तद्वशतो नवनवसंवेगाभावात्,

"जह जह सुयमोगाहइ अइसयरसपसरसंजुयमपुव्वं।
तह तह पल्हाइ मुनी नवनवसंवेगसद्धाए ॥"त्ति,

मू.(११३८) एगग्गमणसंनिवेसणाए णं भंते ! जीवे किं जणेइ ?, २ चित्तनिरोहं करेइ ॥

वृ. श्रुताराधना चैकाग्रमनःसंनिवेशनात एव भवत्यतस्तामाह-एकमग्रं-प्रस्तावाच्छुभमालम्बनमस्येत्येकाग्रं तच्च तन्मनश्च तस्य संनिवेशना -स्थापना, एकाग्रे वा मनःसंनिवेशना तया चित्तस्येतस्तत उन्मार्गप्रस्थितस्य निरोधो -नियन्त्रणा चित्तनिरोधस्तं करोति।

मू.(११३९) संजमेणं भंते ! जीवे किं जणेइ ?, २ अनण्हयत्तं जणेइ ॥

वृ. एवंविधस्यापि संयमादेवेष्टफलावाप्तिरिति तमाह-'संयमेन' पञ्चाश्रवविरमणादिना 'अणण्हयत्त'न्ति 'अनंहस्कत्वम्' अविद्यमानकर्मत्वं जनयति, आश्रवविरमणात्मकत्वादस्य।

मू.(११४०) तवेणं भंते ! जीवे किं जणेइ ?, २ वोदाणं जणेइ ॥

वृ. संयमवतोऽपि न तपो विना कर्मक्षय इति तदाह-'तपसा' वक्ष्यमाणेन 'वोदाणं'ति 'व्यवदानं' पूर्वबद्धकर्मापगमतो विशिष्टां शुद्धिं जनयति।

मू.(११४१) वोयाणेणं भंते ! जीवे किं जणेइ ?, २ अकिरियं जणेइ, अकिरियाए भवित्ता तओ पच्छा सिज्झइ० ॥

वृ. इत्थं व्यवदानस्य तपोऽनन्तरफलत्वात्त(स्य त)दाह-व्यवदानेन 'अक्रियम्' अविद्यमानक्रियं, कोऽर्थः-व्युपरतक्रियाख्यं शुक्लध्यानचतुर्थं भेदं जनयति, 'अक्रियाकः' व्युपरतक्रियाख्यशुक्लध्यानवर्ती भूत्वा 'ततः पश्चात्' तदनन्तरं 'सिध्यति' निष्ठितार्थो भवति 'बुध्यते' ज्ञानदर्शनोपयोगाभ्यां च वस्तुतत्त्वमगवच्छति, न तु नत्रात्मगुणात्यन्तोच्छेदात्मकमुक्तिवादिनामिवाबुद्धिमान् भवति, मुच्यते संसारान्न तु 'दग्धेन्धनः पुनरुपैति भव'मित्यादिवादिपरिकल्पितमुक्तवत्पुनरिहागमनवान् अत एव परिनिर्वातीत्यादि प्राग्वत्, आह-अनन्तरं तपसो व्यवदानं फलमुक्तं, तच्च मुक्त्याख्यफलोपलक्षकमित्यतिदेशेनोक्तमिति किं पुनस्तत्फलत्वेन साक्षादस्याभिधानम् ?, उच्यते सूत्रकृतां वैचित्र्यख्यापनार्थं, ते हि परार्थोद्यतचेतसः परेषां प्रज्ञाप्रकर्षापकर्षावपेक्ष्य क्वचित्साक्षादभिधानोचितानप्यर्थानस्पष्टतया निर्दिष्टवन्तः क्वचित्तु गम्यानपि च साक्षादन्यत्र तूभयथेति।

मू.(११४२) सुहसाएणं भंते ! जीवे किं जणेइ ?, अनुस्सुयत्तं जणेइ, अनुस्सुए णं जीवे अनुकंपए अनुब्भडे विगयसोगे चरित्तमोहणिज्जं कम्मं खवेइ ॥

वृ. व्यवदानं च सत्स्वपि संयमादिषु सुखशायितायामेव भवतीति तामेवाह, तत्र च सुखं शेते, कोऽभिप्रायः ?-प्रवचनशङ्कादीनां परलाभकामभोगशरीरसंबाधनादिमदनस्पृहादीनां च क्रमेणाभावरूपासु चतसृषु सुखशय्यासु स्थितत्वेन मनोविघातानावन्निराकुलतयाऽऽस्त इति सुखशायि तस्य भावः सुखशायिता, प्राकृतत्वात्सूत्रे यलोपः, तयाऽनुत्सुकत्वं कोऽर्थः ?-परलाभदिव्यमानुषकामभोगेषु सर्वदा निःस्पृहत्वं, यदिवा 'सुहसायाए'त्ति प्राकृतत्वात्सुखं-वैषयिकं शातयति-तद्गमनस्पृहानिवारेणनापनयतीति सुखशातस्तस्य भावः सुखशातता तया, पठन्ति च-'सुहसाएणं'ति, तत्र च सुखशायः-सुखेन शयनं तेन, यदिवा सुखशातः-सुखस्य शातनं तेन जीवः 'अनुत्सुकत्वं' विषयसुखं प्रति निःस्पृहत्वं 'जनयति' उत्पादयति, संयमादिष्वेव निष्पन्नमानसत्वात्, अनुत्सुकश्च जीवोऽनुसह कम्पत इत्यनुकम्पकः, सुखोत्सुको हि म्रियमाणमपि प्राणिनमवलोकयन् स्वसुखरसिक एवासीत्, अयं तु तद्विपरीत इति दुःखेन कम्पमानमवलोक्य तद्दुःखदुःखितया स्वयमपि तत्काल एव कम्पत इति, तथा 'अनुद्भटः' अनुल्वणः 'विगतशोकः' नैहिकार्थभ्रंशेऽपि शोचते, मुक्तिपदबद्धस्पृहत्वात्, एवंविधश्च प्रकृष्टशुभाध्यवसायतश्चारित्रमोहनीयं कर्म क्षयपति।

मू.(११४३) अपडिबद्धयाए णं भंते ! जीवे किं जणेइ ?, निस्संगत्तं जणेइ, निस्संगत्तेणं जीवे एगे एगग्गचित्ते दिया य राओ य असज्जमाणे अप्पडिबद्धे आवि विहरइ ॥

वृ. सुखशय्यास्थितस्य चाप्रतिबद्धता भवतीति तामभिधातुमाह- 'अप्रतिबद्धतया' मनसि

निरभिष्वङ्गतया 'निःसङ्गत्वं' बहिःसङ्गाभावं जनयति, निःसङ्गत्वेन जीव एको रागादिविकलतया तत एव 'एकाग्रचित्तः' धर्मैकतानमना एकाग्रताविबन्धकहेत्वभावात्, ततश्च दिवा वा रात्रौ वाऽसजन्, कोऽर्थः ?-सदा बहिः-सङ्गं त्यजन्नप्रतिबद्धश्चापि विहरति, कोऽभिप्रायः ?-विशेषतः प्रतिबन्धविकलो मासकल्पादिनोद्यतविहारेण पर्यटति।

मू. (११४४) विवित्तसयणासणयाए णं भंते ! जीवे किं जणेइ ?, चरित्तगुत्तिं जणेइ, चरित्तगुत्ते णं जीवे विवित्ताहारे दढचरित्ते एगंतरए मुक्खभावपडिवन्ने अट्ठविहं कम्मगंठिं निज्जरेइ ॥

वृ. अप्रतिबद्धता च विविक्तशयनासनतायां संभवत्यतस्तामाह-विविक्तानि-स्त्र्याद्यसंसक्तानि शयनासनान्युपलक्षणत्वादुपाश्रयश्च यस्यासौ विविक्तशयनासनस्तद्भावस्तत्ता तया 'चारित्रगुप्तिं' चरणरक्षां जनयति 'चरित्तगुत्ते'त्ति प्राग्वद्, गुप्तचरित्रश्च जीवो विविक्तो-विकृत्यादिरहित आहारो यस्य स तथा, गुप्तचारित्रो हि सर्वत्र निःस्पृह एव भवति, तथा दृढं-निश्चलं चरित्रमस्येति दृढचरित्रस्तत एवैकान्तेन-निश्चयेन रतः-अभिरतिमानेकान्तरतः संयम इति गम्यते, तथा मोक्षे-मुक्तौ भावने-अन्तःकरणेन प्रतिपन्न-आश्रितः मोक्षभावप्रतिपन्नः मोक्ष एव मया साधयितव्य इत्यभिप्रायवान् अष्टविधकर्मग्रन्थिरिव ग्रन्थिर्दुर्भेदतयाऽष्टविधकर्मग्रन्थिस्तं 'निर्जरयति' क्षपकश्रेणिप्रतिपत्त्या क्षपयति।

मू. (११४५) विणिवट्टणयाए णं भंते ! जीवे किं जणेइ ?, पावकम्माणं अकरणयाए अब्भुट्ठेइ पुव्वबद्धाण य निज्जरयाए पावं नियत्तेइ, तओ पच्छा चाउरंतं संसारकंतारं वीईवयइ ॥

वृ. विविक्तशयनासनतायां च विनिवर्त्तना भवतीति तामाह-'विनिवर्त्तनया' विषयेभ्य आत्मनः परांमुखीकरणरूपया 'पापकर्मणां' सावद्यानुष्ठानानाम् 'अकरणतया' न मया पापानि कर्त्तव्यानीत्येवंरूपया 'अभ्युत्तिष्ठते' धर्मं प्रत्युत्सहते, पूर्वबद्धानां पापकर्मणामिति प्रक्रमः, चशब्दो निर्जरनानन्तरं द्रष्टव्यः ततः पूर्वबद्धानां निर्जरनया चशब्दादभिनवानुपादानेन च 'तदि'ति कर्म 'निवर्त्तयति' विनाशयति, यदिवा पापकर्मणां-ज्ञानावरणादीनाम् 'अकरणयाइ'त्ति आर्षत्वाद् 'अकरणेन' अपूर्वानुपार्जनेनाभ्युत्तिष्ठते मोक्षायेति शेषः, पूर्वबद्धानां च कर्मणां निर्जरनया, अन्यत्प्राग्वत्।

मू. (११४६) संभोगपच्चक्खाणेणं भंते ! जीवे किं जणेइ ?, आलंबणाइं खवेइ, निरालंबणस्स य आययट्ठिया जोगा भवन्ति, सएणं लाभेणं संतुस्सइ परस्स लाभं नो आसाएइ नो तक्केइ नो पीहेइ नो पत्थेइ नो अभिलसइ, परस्स लाभं अणासाएमाणे अतक्केमाणे अपीहमाणे अपत्थेमाणे अणभिलसेमाणे दुच्चं सुहसिज्जं उवसंपज्जित्ता णं विहरइ ॥

वृ. विषयनिवृत्तश्च कश्चित्सम्भोगप्रत्याख्यानवान् संभवत्यतस्तदाह-समिति-संकरेण-स्वपरलाभमीलनात्मकेन भोगः सम्भोगः, एकमण्डलीकभोक्तृत्वमिति योऽर्थः तस्य प्रत्याख्यानं-गीतार्थविहारस्थायां जिनकल्पाद्यभ्युतविहारप्रतिपत्त्या परिहारः सम्भोगप्रत्याख्यानं तेन 'आलम्बनानि' ग्लानादीनि 'क्षपयति' तिरस्करुते, सदोद्यतत्वेन वीर्याचारमेवावलम्बते, निरालम्बनस्य चायतो-मोक्षः संयमो वा स एवार्थः-प्रयोजनं विद्यते येषामित्यायतार्थिकाः 'योगाः' व्यापारा भवन्ति प्रपञ्चतश्च प्रवर्त्तन्ते, तथा 'स्वकीयेन' आत्मीयेन लाभेन 'सन्तुष्यति'

निरभिलाषो भवति, परस्य लाभं नो तर्कयति नो स्पृहयति नो प्रार्थयति तो अभिलषति, तत्र तर्कणं-मनसा यदि मह्यमसौ ददातीति विकल्पनं, स्पृहणं-तच्छ्रद्धालुतयाऽऽत्मन आविष्करणं, प्रार्थनं-वाचा मह्यं देहीति याचनम्, अभिलषणं-तल्लालसतया वाञ्छनम्, एकार्थिकानि वैतानि नोभदेशजविनेयानुग्रहार्थानि, एवंविधश्च संयुगाकाप्नोति तमेवोक्तानुवादेनाह ·

'परस्स लाभं अनासाएमाणे'त्ति, 'अनाशयमानः' आशाविषयमकुर्वाणोऽनास्वादयन् वाऽभुञ्जानोऽतर्कयन्नस्पृहयन्नप्रार्थयमानोऽनभिलषन् 'दोच्चं'ति द्वितीयां सुखशय्याम् 'उपसंपद्य' प्राप्य विहरति, एवंविधरूपत्वात्तस्याः, तथा च स्थानाङ्गम्- "अहावरा दोच्चा सुहसेज्जा -से णं मुंडे भवित्ता अगाराओ अनगारियं पव्वइए समाणे सएणं लाभेणं सन्तूसति परस्स लाभं नो आसाएति नो तक्केइ नो पीहेइ नो पत्थेइ नो अभिलसेति, से णं परस्स लाभं अनासाएमाणे अतक्केमाणे अपीहेमाणे अपत्थेमाणे अनभिलसमाणे नो मणं उच्चावयं नियच्छति नो विनिघायमावज्जइ'त्ति इह च 'अनासाएमाणे' इत्युत्तरत्र वचनात् स्थानाङ्गे च दर्शनात्, पूर्वत्रापि 'नो आसाएइ'इति(बहु)वचनमनुमीयते, तच्च गम्यतया न निर्दिष्टं लेखकदोषेण वा न दृश्यत इति न विद्मः ।

मू.(११४७) उवहिपच्चक्खाणेणं भंते! जीवे किं जणेइ?, अपलिमंथं जणेइ, निरुवहिए णं जीवे निक्कंखे उवहिमंतरेण य न संकिलिस्सइ ॥

वृ. सम्भोगप्रत्याख्यानवतश्चोपधिप्रत्याख्यानमपि संभवतीति तदाह, तत्रोपधिः-उपकरणं तस्य रजोहरणमुखवस्त्रिकाव्यतिरिक्तस्य प्रत्याख्यानं न मयाऽसौ ग्रहीतव्य इत्येवंरूपा निवृत्तिरुपधिप्रत्याख्यानं तेन परिमन्थः-स्वाध्यायादिक्षतिस्तदभावोऽपरिमन्थस्तं जनयति, तथा निष्क्रान्ति उपधेर्निरुपधिको जीवः 'निष्काङ्क्षः' वस्त्राद्यभिलाषरहितः सन्, एतच्च पदं क्वचिदेव दृश्यते, उपधिमन्तरेण चास्य भिन्नक्रमत्वान्न संक्लिश्यति-न च मानसं शारीरं वा क्लेशमाप्नोति, उक्तं हि-"तस्स णं भिक्खुस्स नो एवं भवति-परिजुन्ने मे वत्थे सूइं जाइस्सामि संधिस्सामि उक्कसिस्सामि तुन्निस्सामि वोक्कसिस्सामि" इत्यादि।

मू.(११४८) आहारपच्चक्खाणेणं भंते! जीवे किं जणेइ?, जीवियासंसप्पओगं वुच्छिंदइ, जीवियासंसप्पओगं वुच्छिंदित्ता जीवे आहारमंतरेण न संकिलिस्सइ ॥

वृ. उपधिप्रत्याख्याता चाहारमपि प्रत्याचष्टे, यतो जिनकल्पिकादिरेषणीयालाभे बहून्यपि दिनान्युपाषित एवास्तेऽत आहारप्रत्याख्यानमाह-'आहारप्रत्याख्यानेन' अनेषणीयभक्तपाननिराकरणरूपेण जीविते-प्राणधारणरूपे आशंसा-अभिलाषो जीविताशंसा तस्याः प्रयोगो-व्यापारणं करणं जीविताशंसाप्रयोगस्तं व्यवच्छिनत्ति, आहाराधीनं हि मनुजानां जीवितमतस्तत्प्रत्याख्याने तदाशंसासु व्यवच्छेदो भवति, पठन्ति च-"जीवियासविप्पओगं वोच्छिंदिय'त्ति, तत्र जीविताशया विप्रयोगो-विविधव्यापारस्तं व्यवच्छिनत्ति, जीविताशया ह्याहार एव मुख्यो व्यापारस्ततस्तत्प्रत्याख्याने शेषव्यापारव्यवच्छेदः सुकरएव भवतीति, ततश्च जीविताशंसाप्रयोगं जीविताशाविप्रयोगं वा विच्छिद्य जीवः 'आहारम्' अशनादिकम् 'अन्तरेण' विना न संक्लिश्यति, कोऽर्थः ?-विकृष्टतपोऽनुष्ठानवानपि न बाधामनुभवति।

मू.(११४९) कसायपच्चक्खाणेणं भंते! जीवे किं जणेइ?, वीयरायभावं जणेइ

वीयारायभावं पडिवन्नेऽवि य णं जीवे समसुहदुक्खे भवइ॥

वृ. एतच्च प्रत्याख्यानत्रयमपि कषायाभाव एव फलवदिति तत्प्रत्याख्यानमुच्यते-कषाय-प्रत्याख्यानेन-क्रोधादिविनिवारेण वीतो-विगतो रागो द्वेषविगमाविनाभावित्वात्तद्विगमस्य द्वेषश्चास्येति वीतरागस्तद्भावं जनयति, 'वीतरागभावपडिवन्ने य'त्ति, अपिचेत्यस्य पुनरर्थत्वात्प्रतिपन्नवीतरागभावः पुनर्जीवः समे-रागद्वेषाभावतस्तुल्ये सुखदुःखे यस्य स तथाविधो भवति, रागद्वेषाभ्यां हि तत्र वैषम्यसम्भवः, तदभावे तु समतैवावशिष्यते।

मू.(११५०) जोगपच्चक्खाणेणं भंते!, अजोगयं जणेइ, अजोगी णं जीवे नवं कम्मं न बन्धइ पुव्वबद्धं निज्जरेइ॥

वृ. निष्कषायोऽपि योगप्रत्याख्यानादेव मुक्तिसाधक इति तदुच्यते, तत्र योगा-मनोवाक्काय-व्यापारास्तत्प्रत्याख्यानेन-तन्निरोधलक्षणेन 'अयोगत्वं' वक्ष्यमाणन्यायेनायोगिभावं जनयति, अयोगी जीवः ('नवं' प्रत्यग्रं 'कर्म' सातवेदनीयाद्यपि न बन्धाति तत्कारणयोगाभावत्,) 'पूर्वबद्धम्' इति भवोपग्रहादिकर्मचतुष्टयमन्यस्य तदाऽसंभवात् 'निर्जरयति' क्षपयति।

मू.(११५१) सरीरपच्चक्खाणेणं भंते०, सिद्धाइसयगुणत्तणं निव्वत्तेइ, सिद्धाइसय-गुणसंपन्ने य णं जीवे लोगग्गमावमुवगए परमसुही भवइ॥

वृ. योगप्रत्याख्यानतः शरीरकमपि प्रत्याख्यातमेव भवति, तथाऽपि शरीरादन्योन्याश्रितयोग-योस्तत्प्राधान्यख्यापनार्थं तत्प्रत्याख्यानमेवाह, तत्र शरीरम्-औदारिकादि तत्प्रत्याख्यानेन सिद्धानामतिशयगुणा न कृष्णा न नीला इत्यादयो यस्य स सिद्धातिशयगुणो गमकत्वाद्बहुव्रीहिस्तद्भावस्तत्त्वम्, उक्तं हि "से न किन्हे न नीले न हालिद्दे" इत्यादि 'निर्वर्तयति' जनयति, सिद्धातिशयगुणसंपन्नश्च जीवो लोकाग्रभवत्वात् लोकाग्रं-मुक्तिपदम् 'उपगतः' प्राप्तः 'परमसुखी' अतिशयसुखवान् भवति।

मू.(११५२) सहायपच्चक्खाणेणं भंते०, एगीभावं जणेइ, एगीभावभूए य जीवे एगग्गं भावेमाणे अप्पसद्दे अप्पझंझे अप्पकलहे अप्पतुमंतुमे संजमबहुले संवरबहुले समाहिए आवि भवइ॥

वृ. सम्भोगादिप्रत्याख्यानानि च प्रायः सहायप्रत्याख्यान एव सुकराणि भवन्तीति तदुच्यते-सहायाः-साहय्यकारिणो यतयस्तत्प्रत्याख्यानेन-तथाविधयोग्यताभाविनाऽभिग्रहविशेषरूपेण 'एकभावम्' एकत्वं जनयति 'एकीभावभूतश्च' एकत्वप्राप्तश्च जीवः एकालम्बनत्वं 'भावयन्' अभ्यस्यन् 'अप्पझंझ'त्ति अल्पशब्दोऽभाववचनः, ततश्चाल्पझञ्झः-अविद्यमानवाक्कलहस्तथाऽल्पकषायः-अविद्यमानक्रोधादिः 'अप्पतुमंतुमि'त्ति अल्पम्-अविद्यमानं त्वं त्वमिति स्वल्पापराधिन्यपि त्वमेवं पुराऽपि कृतवान् त्वमेवं सदा करोषीत्यादि पुनः पुनः प्रलपनं यस्य स तथा, संयमबहुलः संवरबहुल इति प्राग्वद्, अत एव 'समाहीए यावि'त्ति 'समाहितः' ज्ञानादि-समाधिमांश्चापि भवति।

मू.(११५३) भत्तपच्चक्खाणेणं भंते०, अणेगाइं भवसयाइं निरुंभइ॥

वृ. एवंविधश्चान्ते भक्तप्रत्याख्याता भवतीति तत्प्रत्याख्यानमाह-'भक्तप्रत्याख्यानेन' आहारपरित्यागरूपेण भक्तपरिज्ञादिना अनेकानि भवशतानि निरुणद्धि, तथाविधदृढाध्यव-

सायत्तया संसाराल्पत्वात् सद् भवतीति भावः ।

मू.(११५४) सब्भावपच्चक्खाणेणं भंते० ?, अनियट्टिं जणयइ, अनियट्टिं पडिवन्ने य अनगारे चत्तारि केवलिकम्मंसे खवेइ, तंजहावेणिज्जं आउयं नामं गोयं, तओ पच्छा सिज्झइ ॥

वृ. साम्प्रतं सकलप्रत्याख्यानप्रधानं **सद्भावप्रत्याख्यानमाह**-तत्र सद्भावेन-सर्वथा पुनःकरणासंभवात्परमार्थेन प्रत्याख्यानं सद्भावप्रत्याख्यानं सर्वसंवररूपा शैलेशीतियावत् तेन, न विद्यते निवृत्तिः-मुक्तिप्राप्य निवर्त्तनं यस्मिंस्तद् अनिवृत्ति शुक्लध्यानं चतुर्थभेदरूपं जनयति, पाठान्तरतश्च 'निवृत्तिं' द्विसमयस्थितिकस्यापि वैद्यकर्मणो बन्धव्यावृत्तिं जनयति, 'अनियट्टिं पडिवन्ने य'त्ति प्रतिपन्नानिवृत्तिः पाठान्तरतः प्रतिपन्नानिवृत्तिश्चानगारः 'चत्वारि' चतुःसङ्ख्यानि केवलिनः 'कम्मंस'त्ति कार्मग्रन्थिकपरिभाषयाऽंशशब्दस्य सत्पर्यायत्वात् सत्कर्माणि केवलिसत्कर्माणि भवोपग्राहीणि क्षपयति, शेषं स्पष्टम् ।

मू.(११५५) पडिरूवयाए णं भंते ?, लाघवियं जणेइ, लहुभूए णं जीवे अप्पमत्ते पागडलिंगे पसत्थलिंगे विसुद्धसंमत्ते सत्तसमिइसमत्ते सव्वपाणभूयजीवसत्तेसु वीससणिज्जरूवे अप्पडिलेहे जिइंदीए विपुलतवसमिइसमन्नागए आवि भवइ ॥

वृ. एतच्च प्रत्याख्यानं प्रायः प्रतिरूपतायामेव भवतीति तामाह-'पडिरूवयाए'त्ति, प्रतिः-सादृश्ये, ततः प्रतीति-स्थविरकल्पिकादसदृशं रूपं-वेषो यस्य स तथा तद्भावस्तत्ता तया-अधिकोपहरणपरिहाररूपया लाघवमस्यास्तीति लाघवी तद्भावो लाघविता तां द्रव्यतः स्वल्पोपकरणत्वेन भावतस्त्वप्रतिबद्धतया जनयति, लघुभूतश्च जीवः 'अप्रमत्तः' प्रमादहेतूनां परिहारत इतरेषां चाङ्गीकरणतः, तथा 'प्रकटलिङ्गः' स्थविरादिकल्परूपेण व्रतीति विज्ञायमानत्वात् 'प्रशस्तलिङ्गः' जीवरक्षणहेतुरजोहरणादिधारकत्वाद् 'विशुद्धसम्यक्त्वः' तथाप्रतिपत्त्या सम्यक्त्वविशोधनात्, तथा सत्त्वं च आपत्स्ववैकल्यकरमध्यवसानकरं च समितयश्च उक्तरूपाः समासाः-परिपूर्णा यस्य स समाससत्त्वसमितिः, सूत्रे निष्ठान्तस्य प्राकृतत्वात्परिनिपातः, तत एव सर्वप्राणभूतजीवसत्त्वेषु विश्वसनीयरूपः, तत्पीडापरिहारित्वात्, 'अपडिलेह'त्ति अल्पार्थे नञ्, ततोऽप्रत्युपेक्षित इत्यल्पोपकरणत्वादल्पप्रत्युपेक्षः, पठ्यते च-'अप्पपडिलेहि'त्ति जितानि-वशीकृतानि यतिरहमितिप्रत्ययात्कथञ्चित्परिणामान्यथात्वेऽपीन्द्रियाणि येन स तथा, विपुलेन-अनेकभेदतया विस्तीर्णेन तपसा समितिभिश्च सर्वविषयानुगतत्वेन विपुलाभिरेव समन्वागतो-युक्तो विपुलतपःसमितिसमन्वागतश्चापि भवति, पूर्वत्र समितीनां परिपूर्णत्वाभिधानेन सामस्त्यमुक्तम्, इह तु तासां सार्वत्रिकत्वमिति न पौनरुक्त्यम् ।

मू.(११५६) वेयावच्चेणं भंते० ?, तित्थयरनामगुत्तं कम्मं निबंधइ ॥

वृ. प्रतिरूपतायामपि वैयावृत्त्यादेव विशिष्टफलावाप्तिरित्येतदनन्तरं वैयावृत्त्यं, तत्र व्यावृतः-कुलादिकार्येषु व्यापारवांस्तद्भावो वैयावृत्त्य तेन तीर्थकरनामगोत्रं कर्म निबध्नाति, उक्तं हि तद्धेतुकीर्त्तनावसरे-'वेयावच्चे समाही य'त्ति ।

मू.(११५७) सव्वगुणसंपन्नयाए णं भंते० ?, अपुनरावत्तिं जणेइ, अपुनरावत्तिं पत्तए णं जीवे सारीरमाणसाणं दुक्खाणं नो भागी भवइ ॥

वृ. वैयावृत्त्यवांश्च सर्वगुणभाजनं भवतीति सर्वगुणसंपन्नतामाह-सर्वगुणा-ज्ञानादयस्तैः

संपन्नो-युक्तस्तद्भावः सर्वगुणसंपन्नता तया 'अपुनरावृत्तिं' पुनरिहागमनाभावो मुक्तिरितियावत्तां जनयति, अपुनरावृत्तिं प्राप्त एव प्राप्तको जीवः शारीरमानसानां दुःखानां 'नो' नैव 'भागी' भाजनं भवति तन्निबन्धनयोर्देहमनसोरभावात्, सिद्धिसुखभाजनमेव भवतीति भावः।

मू. (११५८) वीयरागयाए णं भंते० ?, नेहाणुबंधनाणि तण्हाणुबंधनाणि य वुच्छिंदइ मणुन्नामणोन्नेसु सद्दरूवसफरिसगंधेसु सचित्ताचित्तमीसएसु चेव विरज्जइ॥

वृ. सर्वगुणसंपन्नता च रागद्वेषपरित्यागतो जायत इति वीतरागतामाह-'वीतरागतया' रागद्वेषापगमरूपया बन्धनानि-रागद्वेषपरिणामात्मकानि, तृष्णा-लोभस्तदुपाधी बन्धनानि तानि च व्यवच्छिनत्ति, पाठान्तरतश्च 'स्नेहानुबन्धानि तृष्णानुबन्धानि च' तत्र स्नेहः-पुत्रादिविषयः तृष्णा-द्रव्यादिविषया तदुपाध्यनुबन्धनानि तु-अनुगतान्यनुकूलानि वा बन्धनानि, अतिदुरन्तत्वख्यापनार्थं च रागान्तर्गतत्वेऽपि पृथक् तृष्णास्नेहयोरुपादानं, ततश्च मनोज्ञेषु शब्दरसरूपगन्धेषु (सचित्ताचित्तमिश्रेषु-स्त्यादिद्रव्येषु) चैव विरज्यते, तृष्णास्नेहयोरेव राग-हेतुत्वात्, आहकषायप्रत्याख्यानफलेन वीतरागतोक्तैव तत्किमर्थमस्याः पृथगुपादानम् ?, उच्यते, रागस्यैव सकलानर्थमूलत्वख्यापनार्थं।

मू. (११५९) खंतीए णं भंते० ?, परीसहे जिणेइ॥

वृ. रागद्वेषाभावे च तात्त्विकाः श्रमणगुणाः, तेषु च प्रथमव्रतपरिपालनोपायत्वात्क्षान्तिरेव प्रथमेति तामाह, तत्र क्षान्तिः-क्रोधजयस्तया 'परीषहान्' अर्थाद्बाधादीन् 'जयति' परीषहाध्ययनोक्तन्यायतोऽभिभवति।

मू. (११६०) मुत्तीए णं भंते० ?, अकिंचणं जणेइ, अकिंचणे य जीवे अत्थलोलाणं पुरिसाणं अपत्थणिज्जे भवइ॥

वृ. क्षान्तिस्थितेनापि न मुक्तिं विनाऽशेषव्रतपरिपालनं कर्तुं शक्यमिति तामाह-मुक्तिः-निर्लोभता तया किञ्चनाभावोऽकिञ्चनं, कोऽर्थः ?-निष्परिग्रहत्वं जनयति, अकिञ्चनश्च जीवोऽर्थे लोला-लम्पट अर्थलोलाश्चौरादयस्तेषां न प्रार्थनीयः-प्रस्तावाद्बाधितुमनभिलषणीयो भवति।

मू. (११६१) अज्जवयाए णं भंते०, काउज्जुययं भावुज्जुययं भासुज्जुययं अविसंवायणं जणेइ, अविसंवायणसंपन्नयाए णं जीवे धम्मस्स आराहए भवइ॥

वृ. लोभविनाभाविनी च मायेति तदभावेऽवश्यंभाव्यार्जवमतस्तदाह-'अज्जवयाए'त्ति सूत्रत्वाद् ऋजुः-अवक्रस्तद्भाव आर्जवं तेन-मायापरिहाररूपेण कायेन ऋजुरेव ऋजुकः कार्यजुकस्तद्भावस्तत्ताकुब्जादिवेषभूविकाराद्यकरणतः प्राञ्जलता तां तथा भावः-अभिप्राय-स्तस्मिंस्तेन वा ऋजुकता भावर्जुकता-यदन्यद्विचिन्तयन् लोकपंक्त्यादिनिमित्तम् अन्यद्वाचा कायेन वा समाचरति तत्परिहाररूपा, एवं भाषायामृजुकता भाषर्जुकता-यदुपहासादिहेतोरन्यदेशभाषया भाषणं तत्परित्यागात्मिका, तथा-'अविसंवादनं' परावि प्रतारणं जनयति, तथाविधश्चाविसंवादनसंपन्नतयोपलक्षणत्वात्कायर्जुकतादिसंपन्नतया च जीवो धर्मस्याराधको भवति, विशुद्धाध्यवसायत्वेनान्यजन्मन्यपि तदवाप्तेः।

मू. (११६२) मद्दवयाए णं भंते ?, अनुस्सियत्तं जणेइ, अनुस्सियत्ते णं जीवे मिउमद्दवसंपन्ने अट्ठ मयट्ठाणाइं निट्ठवेइ॥

वृ. एवंगुणस्यापि न विनयं विना समग्रफलावाप्तिः, स च मार्दवादेवेति तदाह- 'मद्दवयाए'त्ति मार्दवेन गम्यमानत्वादभ्यस्यमानेन 'मिउमद्दवसंपन्ने'त्ति मृदुः-द्रव्यतो भावतश्चावनमनशीलस्तस्य मार्दवं यत्सदा मार्दवोपेतस्यैव भवति तेन संपन्नः- तदभ्यासात्सदा मृदुस्वभावो मृदुमार्दवसंपन्नः सन् 'अष्टौ मदस्थानानि' जातिकुलबलरूपतपऐश्वर्यश्रुतलाभावलेपरूपाणि, उक्तं हि-''जातीकुलबलरूवे तवईसरिएसुएलाभे'त्ति, 'निष्ठापयति' विनाशयति, पठन्ति च-''मद्दवयाए णं जीवे अनुस्सियत्तं जनेति, अनुस्सिए णं जीवे मिउमद्दवसंपन्ने अट्ठ मयट्ठानाणि निट्ठवेति' अत्र चानुत्सिक्ततत्वम्-अनुद्धतत्वमन्यत्प्राग्वत्।

मू.(११६३) भावसच्चेणं भंते०, भावविसोहिं जणेइ, भावविसोहीए वट्टमाणे अरहंतपन्नत्तस्स धम्मस्स आराहणयाए अब्भुट्ठेइ, अरहंतपन्नत्तस्स धम्मस्स आराहणयाए अब्भुट्ठित्ता परलोगधम्मस्स आराहए भवइ ॥

वृ. एतदपि तत्त्वतः सत्यव्यवस्थितस्यैव भवति, तत्रापि च भावसत्यं प्रधानमिति तदाह- 'भावसत्येन' शुद्धान्तरात्मतारूपेण पारमार्थिकावितथत्वेन 'भावविशुद्धिं' विशुद्धाध्यवसायात्मिकां जनयति, भावविशुद्धौ वर्त्तमानो जीवोऽर्हत्प्रज्ञप्तस्य धर्मस्य 'आराहणयाए'त्ति 'आराधनया' अनुष्ठानेन 'अभ्युत्तिष्ठते' मुक्त्यर्थमुत्सहते, यदिवाऽऽराधनायै-आवर्जनार्थमभ्युत्तिष्ठति, अर्हत्प्रज्ञप्तस्य धर्मस्याराधनयाऽऽराधनायै वाऽभ्युत्थाय परलोके-भवान्तरूपे धर्मः परलोकधर्मस्तस्य, पाठान्तरतः परलोके वाऽऽराधको भवति, प्रेत्य जिनधर्मावाप्त्या विशिष्टभवान्तरप्राप्त्या वेति भावः।

मू. (११६४) करणसच्चेणं भंते ?, करणसत्तिं जणेइ, करणसच्चे वट्टमाणे जहावाई तहाकारी भवइ ॥

वृ. भावसत्येन करणसत्यं संभवतीति तदाह-करणेसत्यं करणसत्यं-यत्प्रतिलेखनादिक्रियां यथोक्तां सम्यगुपयुक्तः करुते तेन करणशक्तिं तन्माहात्म्यात् पुरुऽनध्यवसितक्रियासामर्थ्यरूपां जनयति, तथा करणसत्ये वर्त्तमानो जीवो यथावादी तथाकारी चापि भवति, स हि सूत्रमधीयानो यथैव क्रियाकालपवदनशीलः करणशीलोऽपि तथैवेति।

मू.(११६५) जोगसच्चेणं भंते ! णं जीवे० ?, जोगविसोहेइ ॥

वृ. एवविधस्यैव योगसत्यमपि भवतीति तदाह-योगा-मनोवाक्कायास्तेषां सत्यम्-अवितथत्वं योगसत्यं तेन योगान् 'विशोधयति' क्लिष्टकर्मबन्धकत्वाभावतो निर्दोषान् करोति।

मू.(११६६) मनगुत्तयाए णं भंते ? एगग्गं जणेइ, एगग्गचित्तेणं मनगुत्ते संजमाराहए भवइ ॥

वृ. एतच्च सत्यं गुप्त्यन्वितस्यैव भवत्यतो यथाक्रमं तदभिधानं, तत्र च 'मनोगुप्ततया' मनोगुप्तिरूपया जीवः 'एकाग्र्यं' प्रस्तावाद्धर्मैकतानिचित्तत्वं जनयति, तथा चैकाग्रचित्तो जीवो गुप्तम्-अशुभाध्यवसायेषु गच्छद्रक्षितुं मनो येनासौ गुप्तमनाः सन्, निष्ठान्तस्य परनिपातः प्राग्वत्, संयमधारको भवति, तत्र मनोनिरोधस्य प्रधानत्वादिति भावः।

मू. (११६७) वयगुत्तयाए णं भंते ?, निव्विकारत्तं जणेइ, निव्विकारेणं जीवे वइगुत्ते जोगे अज्झप्पजोगसाहणजुत्ते यावि भवइ ॥

वृ. 'वाग्गुप्ततया' कुशलवागुदीरणरूपया 'निर्विकारं' विकथाद्यात्मकवाग्विकाराभावं जनयति, ततश्च निर्विकारो जीवो वाग्गुप्त इति, प्रवीचाराप्रवीचारारूपत्वेन द्विविधत्वात्तद्गुप्तेः सर्वथा वाग्निरोधलक्षणवाग्गुप्तिसमन्वितः सन्नध्यात्मं-मनस्तस्य योगा-व्यापारा धर्मध्यानादय-स्तेषां साधनानि-एकाग्रतादीनि तैर्युक्तोऽध्यात्मयोगसाधनयुक्तो भवति, विशिष्टवाग्गुप्तिरहितो हि न चित्तैकाग्र्तादिभाग् भवेदिति भावः, अन्ये तु 'निव्वियारे णं जीवे वयगुत्तयं जणयति' इत्येतावदेव पठन्ति, तच्च स्पष्टमेव।

मू.(११६८) कायगुत्तयाए णं भंते ?, संवरं जणयइ, संवरेणं कायगुत्ते णं पुनो पावासव-निरोहं करेइ॥

वृ. 'कायगुप्तः' शुभयोगप्रवृत्त्यात्मककायगुप्तिमान् 'संवरम्' अशुभयोगनिरोधरूपं जनयति, संवरेण गम्यमानत्वादभ्यस्यमानेन कायगुप्तः पुनः सर्वथा निरुद्धकायिकव्यापारः पापस्य 'पावे कम्मे वेरे' इत्यादिवचनात्कर्मण आश्रवा-उपादानहेतवो हिंसादयः पापाश्रवास्तन्निरोधं करोति, तात्त्विक्या अस्या एतत्फलत्वेन सुप्रतीतत्वात्।

मू.(११६९)मनसमाधारणयाए णं भंते ?, एगग्गं जणेइ, एगग्गं जणइत्ता नाणपज्जवे जणयइ, नाणपज्जजवे जणइत्ता सम्मत्तं विसोहेइ, मिच्छत्तं च निज्जरेइ॥

वृ. इतश्च गुप्तित्रयाद्यथाक्रमं मनःसमाधारणादिसम्भव इति तदाह-तत्र 'मनसमाहारणयाए'त्ति मनसः समिति-सम्यग् आङिति-मर्यादयाऽऽगमाभिहितभावाभिव्याप्त्याऽवधारणा-व्यव-स्थापनं मनःसमाधारणा तया 'एकाग्र्यम्' उक्तरूपं जनयति, एकाग्र्यं जनयित्वा 'ज्ञानपर्यवान्' विशिष्टतरवस्तुतत्त्वावबोधरूपान् जनयति, ज्ञानपर्यवान् जनयित्वा सम्यक्त्वं विशोधयति, विशुद्धत्वं चास्य वस्तुतत्त्वावगमे तद्विषया रुचिरपि शुद्धतरैव संभवतीतिकृत्या, अत एव च मिथ्यात्वं च निर्जरयति।

मू.(११७०) वयसमाहारणयाए णं भंते ?, वयसाहारणं दंसणपज्जवे विसोहेइ, वइसाहारणं दंसणपज्जवे विसोहित्ता सुलहबोहियत्तं च निव्वत्तेइ दुल्लहबोहियत्तं निज्जरेइ॥

वृ. 'वइसमाहारणयाए'त्ति 'वाक्समाधारणया' स्वाध्याय एव वाग्निवेशनात्मिकया वाचा सधारणा वाक्समाधारणा, येन ते वचसोऽपि विषयाः, प्रज्ञापनीया इत्यर्थः, तेषामेवान्य-थात्वसम्भवेन विशेषणसाफल्यात्, इह च तद्विषया दर्शनपर्यवा अप्युपचारतस्तथोक्तास्ततश्च वाक्साधारणाश्च ते दर्शनपर्यवाश्च-सम्यक्त्वभेदरूपा वाक्साधारणदर्शनपर्यवास्तान् विशोधयति, 'दविए दंसणसोधी' इति वचनाद्द्रव्यानुयोगाभ्यासतस्तद्विषयाशङ्कादिमालिन्यापनयनेन विशुद्धान् करोति, वाक्साधारणदर्शनपर्यवान्, विशोध्य सुलभबोधिकत्वं निर्वर्त्तयति, तत एव दुर्लभबोधिकत्वं निर्जरयति।

मू.(११७१)कायसमाधारणयाए णं भंते ?, चरित्तपज्जवे विसोहेइ, विसोहित्ता अहक्खायचरित्तं विसोहेइ त्ता चत्तारि केवलिकम्मंसे खवेइ, तओ पच्छा सिज्झइ॥

वृ. 'कायसमाहारणयाए'त्ति 'कायसमाधारणया' संयमयोगेषु शरीरस्य सम्यग्व्यवस्थापन-रूपया 'चरित्रपर्यवान्' चारित्रभेदान् क्षायोपशमिकानिति गम्यते विशोधयति, तदुन्मार्गप्रवृत्तित एव प्रायस्तेषामतीचारकालुष्यसम्भवात्, चरित्रपर्यवान् विशोध्य यथाख्यातचारित्रं विशोधयति,

सर्वथा ह्यसत उत्पत्त्यसम्भव इति पूर्वमपि कथञ्चित्सदेव यथाख्यातचारित्रं चारित्रमोहोदय मलिनितं तन्निर्जरणेन निर्मलीकुरुते, यथाख्यातचारित्रं विशोध्य चत्वारीत्यादि सर्वं प्राग्वत्।

मू.(११७२) नाणसंपन्नयाए णं भंते ?, सव्वभावाभिगमं जणेइ, नाणसंपन्ने णं जीवे संसारकंतारे न विनस्सई ॥ नाणविनयतवचरित्तजोगे संपाउणइ, ससमयपरसमयविसारए य असंघायनिज्जे भवइ ॥

मू.(११७३) 'जहा सूई ससुत्ता, पडिया न विनस्सई।
तहा जीवे ससुत्ते, संसारे न विनस्सई।

वृ. एवं समाधारणान्नयाद्यथाक्रमं ज्ञानादित्रयस्य शुद्धिरुक्ता, फलं पुनरस्य किमित्याशङ्कायां यथाक्रममेतत्फलमाह-ज्ञानमिह प्रस्तावत् श्रुतज्ञानं तत्संपन्नतया जीवः सर्वभावानाम्-अशेषजीवादिपदार्थानामभिगमो ज्ञानं सर्वभावाभिगमस्तं जनयति, तथा सं(तत्सं)पन्नो जीवः 'चाउरंते'त्ति उक्तनीतितश्चतुरन्तसंसारकान्तारे नैव 'विनश्यति' इतस्ततः पर्यटनेन मुक्तिमार्गाद्विशेषेण दूरीभवति, अमुमेवार्थं दृष्टान्तद्वारेण स्पष्टतरमाह-

यथा 'सूचि' प्रतीता ससूत्रा सुप्रापतया 'न विनश्यति' कचवरादिपतिताऽपि न विशेषेण दूरीभवति तथा जीवः सह सूत्रेण-श्रुतेन वर्त्तत इति ससूत्रः संसारे न विनश्यति, उक्तं च-

"सूई जहा ससुत्ता न नस्सई कयवरंमि पडियावि।
जीवो तहा ससुत्तो न नस्सइ गओवि संसारे॥"

तत एव ज्ञानं च-अवध्यादि विनयश्च-ज्ञानविनयादिः तपश्च-वक्ष्यमाणं चारित्रयोगाः-चारित्रप्रधाना व्यापारा ज्ञानविनयतपश्चारित्रयोगास्तान् प्राप्नोति, तथा स्वसमयपरसमययोः संघातनीवः-प्रमाणपुरुषतया मीलनीयः स्वसमयपरसमयसंघातनीयो भवति, इह च स्वसमय-परसमयशब्दाभ्यां तद्वेदिनः पुरुषा उच्यन्ते, तेष्वेव संशयादिव्यवच्छेदाय मीलनसंभवात्।

मू.(११७४) दंसणसंपन्नयाए णं भंते ?, भवमिच्छत्तछेयणं करेइ परं न विज्झायइ, अनुत्तरेणं नाणदंसणेणं अप्पाणं संजोएमाणे सम्मं भावेमाणे विहरइ ॥

वृ. 'दर्शनसंपन्नतया' क्षायोपशमिकसम्यक्त्वसमन्वितया भवहेतुभूतं मिथ्यात्वं भवमिथ्यात्वं तस्य छेदनं-क्षपणं भवमिथ्यात्वच्छेदनं करोति, कोऽर्थः ?-क्षायिकसम्यक्त्वमवाप्नोति, ततश्च परमिति-उत्तरकालमुत्कृष्टतस्तस्मिन्नेव भवे मध्यमजघन्यापेक्षया तृतीये तुर्ये वा जन्मन्युत्तरश्रेण्यारोहणेन केवलज्ञानावाप्तौ 'न विध्यायति' न ज्ञानदर्शनप्रकाशभावारूपं विध्यानमवाप्नोति, किन्तु 'अनुत्तरेण' क्षायिकत्वात्प्रधानेन ज्ञानं च दर्शनं च ज्ञानदर्शनं तेन 'आत्मानं' स्वं 'संयोजयन्' प्रतिसमयमपरापरेणोपयोगरूपतयोत्पद्यमानेन घटयन् 'संयोजन च भेदेऽपि स्यादत आह-(सम्मं.सम्यक्) 'भावयन्' तेनात्मानमात्मसान्नयन् 'विहरति' भवस्थ-केवलितया मुक्ततया वाऽऽस्ते, पठन्ति च-"अनुत्तरेणं नानदंसणेणं विहरइ"त्ति।

मू.(११७५) चरित्तसंपन्नयाए णं भंते ?, सेलेसीभावं जणेइ, सेलेसिं पडिवन्ने अनगारे चत्तारि कम्मंसे खवेइ, तओ पच्छा सिज्झइ० ॥

वृ. चरित्रसंपन्नतया 'शैलेशीभावं'ति शिलानामिमे शैलाः-पर्वतास्तेषामीशः शैलेशो-मेरुः स इव शैलेशो-मुनिर्निरुद्धयोगतयाऽत्यन्तस्थैर्येण तस्येयमवस्था-शैलेशी तस्या भावः

अशैलेशस्य वा शैलेशीभवनं शैलेशीभावः, इत्यादिरनेकधा व्युत्पत्तिः, उक्तं हि-

"सेलेसो किर मेरू सेलेसी होइ तहाऽचलया।
होउं व असेलेसो सेलीसी होइ थिरयाए ॥१॥
अहवा सेलोव्व इसी सेलेसी होइ सो हु थिरयाते।
रोध असेली होई सेलीएी होआतेएाओ ॥२॥
सीलं व समाहाणं निच्छयतो सव्वसंवरो सो य।
तस्सेसो सीलेसो सेलेसी होइ तयंवत्था ॥३॥"

तमेवंविधं शैलेशीभावं जनयति, तज्जननाच्च शैलेशीप्रतिपन्नो 'विहरति' आस्तेऽन्तर्मुहूर्त्तमिति शेषः, पठन्ति च-'सेलेसी पडिपन्ने अनगारे चत्तारि केवलिकम्मंसे खवेति, ततो पच्छा सिज्झति बुज्झइ' इत्यादि प्राग्वत्।

मू.(११७६) सोइंदियनिग्गहेणं भंते० ?, मणुन्नामणुन्नेसु सद्देसु रागद्दोसनिग्गहं जणेइ तप्पच्चइयं च णं कम्मं न बंधइ पुव्वबद्धं न निज्जरेइ ॥

वृ. चरित्रं चेन्द्रियनिग्रहादेव जायत इति प्रत्येकं तन्निग्रहमाह-श्रोत्रेन्द्रियस्य निग्रहः-स्वविषयाभिमुखनुधावतो नियमनं श्रोत्रेन्द्रियनिग्रहस्तेन 'मनोज्ञामनोज्ञेषु' अभिमतेतरेषु शब्देषु यथाक्रमं रागद्वेषयोर्निग्रहो रागद्वेषनिग्रहस्तं जनयति, तथा च तत्प्रत्यिकं-रागद्वेषनिमित्तं कर्म न बन्धाति पूर्वबद्धं च निर्जरयति, तन्निग्रहे शुभाध्यवसायप्रवृत्तेरिति भावः।

मू.(११७७) एवं चक्खिंदिय०
मू.(११७८) घाणिंदिय० ॥
मू.(११७९) जिब्भिंदिय० ॥
मू.(११८०) फासिंदिय० ॥

वृ. एवं चतक्षुरिन्द्रियनिग्रहेण, घ्राणेन्द्रियनिग्रहेण, जिह्वेन्द्रियनिग्रहेण, स्पर्शनेन्द्रियनिग्रहेण च इदमेव वाच्यं, नवरं चतक्षुरिन्द्रियेष्वित्युपचाराच्चतक्षुरिन्द्रियग्राह्येषु रूपेष्विति योऽर्थः, यथाप्रधानं चात्रेन्द्रियनिर्देशः, प्राधान्यं च पाटवाद्यपेक्षमिति भावनीयम्।

मू.(११८१) कोहविजएणं भंते० ?, खंतिं जणेइ कोहवेयनिज्जं कम्मं न बंधइ पुव्वनिबद्धं च निज्जरेइ ॥

वृ. एतन्निग्रहोऽपि कषायविजयाद्भवत्यतः क्रमेण तद्विजयमाह-तत्र क्रोधस्य विजयो-दुरन्तादिपरिभावेनोदयनिरोधः क्रोधविजयस्तेन क्रोधेन-कोपाध्यवसायेन वेद्यत इति क्रोधवेदनीयं-तद्धेतभूतपुद्गल रूपं कर्म न बन्धाति "जं वेएइ तं बंधइ"त्ति वचनात्, तथा पूर्वबद्धं प्रक्रमात्तदेव निर्जरयति, तत एव विशिष्टजीवविर्योल्लासात्।

मू.(११८२) एवं माणविज० मद्दवं ॥
मू.(११८३) माया० अज्जवं ॥
मू.(११८४) लोभ० संतोसं ॥

वृ. एवं मानविजयेन, मायाविजयेन, लोभविजयेन चाभिधेयम्।

मू.(११८५) पिज्जदोसमिच्छादंसणविजएणं भंते० ? नाणदंसणचरित्ताराहणयाए अब्भु-

ट्ठेइ अट्ठविहस्स कम्मस्स कम्मगंठिविमोयणयाए, तप्पढमयाए जहाणुपुव्वि अट्ठावीसइविहं मोहनिज्जं कम्मं उग्घाएइ, पंचविहं नाणावरनिज्जं नवविहं दंसणावरनिज्जं पंचविहं अंतरायं, एए तिन्नि कम्मंसे जुगवं खवेइ, तओ पच्छा अनुत्तरं अनंतं कसिणं पडिपुन्नं निरावरणं वितिमिरं विसुद्धं, लोगालोगप्पभासगं केवलवरनाणदंसणं समुप्पाडेइ जाव सजोगी हवइ ताव य इरियावहियं कम्मं निबंधइ सुहफरिसं दुसमयट्ठिईयं, तं पढमसमए बद्धं बिइयसमए वेइयं तईयसमए निज्जन्नं, तं बद्धं पुट्ठं उदीरियं वेइयं निज्जन्नि, सेयाले अकम्मं चावि भवइ ॥

वृ. एतज्जयश्च न प्रेमद्वेषमिथ्यादर्शनविजयं विनाऽतः स उच्यते-'पिज्ज'त्ति प्रेम राग इत्यर्थः स च द्वेषश्च-अप्रीतिरूपो मिथ्यादर्शनं च-सांशयिकादि प्रेमद्वेषमिथ्यादर्शनानि तद्विजयेन 'नाणदंसणचरित्ताराहणयाए'त्ति ज्ञानदर्शनचारित्राराधनायाम् 'अभ्युत्तिष्ठते' उद्यच्छति प्रेमादिनिमित्तत्वात्तद्विराधनायाः, ततश्चाष्टविधस्य कर्मणो मध्य इति गम्यते, 'कम्मगंठिविमोयणयाए'त्ति कर्मग्रन्थिः- अतिदुर्भेदघातिकर्मरूपतस्य विमोचना-क्षपणा कर्मग्रन्थिविमोचना तस्यै च, चस्य गम्यमानत्वात्तदर्थं चाभ्युत्तिष्ठते इत्यनुवर्त्त्य योज्यते, पठन्ति च-'अट्ठविहकम्मविमोयणाए'त्ति स्पष्टम्, अभ्युत्थाय च किं करोतीत्याह-'तत्प्रथमतया' तत्पूर्वतया, न हि तेन तत्पुरा क्षपितमासीदिति, आनुपूर्व्या अनतिक्रमेण यथानुपूर्वीम(विअ)ष्टाविंशतिविधं मोहनीयं कर्म 'उद्घातयति' क्षपयति, अत्र चेयं क्षपणानुपूर्वि-प्रथममनन्तानुबन्धिनः क्रोधादीन् युगपदन्तर्मुहूर्तेन क्षपयति, तदनन्तभागं च मिथ्यात्वे प्रक्षिपति, ततस्तेन सहैव मिथ्यात्वं क्षपयति, प्रवर्द्धमानातितीव्रशुभपरिणामत्वात्, अतिसंभृतदवानलः इवार्द्धदग्धेन्धन इन्धनान्तरं, ततो मिथ्यात्वांशं सम्यग्मिथ्यात्वे प्रक्षिप्त तत्क्षपयति, ततोऽपि तदंशसहितं सम्यक्त्वं, तदनु सम्यक्त्वावशिष्टदलिकसहितमप्रत्याख्यानप्रत्यख्यानावरणकषायाष्टकं युगपदेव क्षपितुमारभते, तत्क्षपणं च कुर्वन्नेताः प्रकृतिः क्षपयति, तद्यथा-

"गइआनुपुव्वि दो दो जाईणामं च जाव चउरिंदी।
आयावं उज्जोवं थावरनामं च सुहुमं च ॥१॥
साहारमपज्जत्तं निद्दानिद्दं च पयलपयलं च।
थीणं खवेइ ताहे अवसेसं जं च अट्ठण्हं ॥२॥"

ततोऽपि किञ्चित्सावशेषं नपुंसकवेदमध्ये प्रक्षिप्य तत्समन्वितं क्षपयति, एवं तदुद्धरितसहितं स्त्रीवेदं, तदवशिष्टान्वितं च हास्यादिषट्कं, तदंशसहितं च पुरुषवेदखण्डद्वयं यदि पुरुषः प्रतिपन्नः, अथ स्त्री नपुंसकं वा ततः स्वस्ववेदखण्डद्वयं, ततः क्षिप्यमाणवेदतृतीयखण्डसहितं संज्वलनकोपं क्षपयति, एवं पूर्वपूर्वांशसहितमुत्तरोत्तरं क्षपयति यावत् संज्वलनलोभः, तत्तृतीयखण्डं तु सङ्ख्येयानि खण्डानि कृत्वा पृथक्कालभेदेन क्षपयति, तत्र च तत्क्षपणाकालः प्रत्येकं सर्वत्र चान्तर्मुहूर्त्तमेव, इत्थं चैतदन्तर्मुहूर्त्तस्या सङ्ख्यभेदत्वात्, ततस्तच्चरमखण्डमपि पुनरसङ्ख्येयसूक्ष्मखण्डानि कृत्वा तथैव क्षपयति, एवं च मोहनीयं क्षपयित्वाऽन्तर्मुहूर्त्तं यथाख्यातचारित्रमनुभवंश्छद्मस्थवीतरागतांद्विचरमसमययोः प्रथमसमये निद्राप्रचले नाम प्रकृतीश्च देवगत्याद्याः क्षयपति, यत उक्तम्-

"वीसमिऊण नियंठो दोहि उ समएहिं केवले सेसे।

पढमे निद्दं पयलं नामस्स इमाओ पयडीओ ॥१॥
देवगति आनुपुव्वी विउव्वि संघयण पढमवज्जाइं।
अन्नयरं संठाणं तित्थयराहारणामं च ॥२॥"

चरमसमये तु यत्क्षपयति तत्सूत्रकृदाह-**पञ्चविधं** ज्ञानावरणीयं नवविधं दर्शनावरणीयं **पञ्चविधमन्तरायम्**, 'एए'त्ति लिङ्गव्यत्ययादेतानि 'त्रीण्यपि' वक्ष्यमाणरूपाणि 'कम्मंसे'त्ति सत्कर्माणि 'युगपत्' एककालं क्षपयति, स्थापना चेयम्।

'ततः' इति क्षपणातः 'पश्चाद्' अनन्तरंनास्योत्तरंप्रधानमन्यत् ज्ञानमस्तीत्यनुत्तरम्, 'अनन्तम्' अविनाशितया विषयानन्ततया च 'कृत्स्नं' कृत्स्नवस्तुविषयत्वात्, 'परिपूर्णं' सकलस्वपरपर्यायपरिपूर्णवस्तुप्रकाशकत्वात् 'निरावरणम्' अशेषावरणविगमात् 'वितिमिरं' तत्र सति क्वचिदप्यज्ञानतिमिराभावात् 'विशुद्धं' सकलदोषविगमात् 'लोकालोकप्रभावकं तत्स्वरूपप्रकाशकत्वात्, पाठान्तरतश्च-'लोकालोकस्वभावं' संक्रान्तलोकालोकसकलस्वरूपत्वात् केवलम्असहायं वरं शेषज्ञानापेक्षया ज्ञानं च दर्शनं च ज्ञानदर्शनं ततः केवलवरशब्दाभ्यां विशेषणसमासे केवलवरज्ञानदर्शनं 'समुत्पादयति' जनयत्मात्मन इति गम्यते, स च यावत्, 'सयोगी' मनोवाक्कायव्यापारवान् भवति तावच्च किमित्याह-ईरणमीर्यागतिस्तस्याः पन्था यदाश्रिता सा भवति तस्मिन् भवमध्यात्मादित्वाद्ठक्कि ऐर्यापथिकम्, उपलक्षणं च पथिग्रहणं तिष्ठतोऽपि सयोगस्यैर्यासम्भवात्, संभवन्ति हि सयोगितायां केवलिनोऽपि सूक्ष्मा गात्रसञ्चाराः, यत आह-

"केवली णं भंते! अस्सिं जेसु आगासपएसेसु हत्थं वा पायं वा ओगाहित्ताणं साहरिज्जा पभू णं भंते! केवली तेसु चेवागासपएसेसु पडिसाहरित्तए? नो इणमट्ठे समट्ठे, केवलिस्स णं चलाइं सरीरोवगरणाइं हवंति, चलोवगरणत्ताए केवली नो संचाएति तेसं चेवागासपएसेसं हत्थं वा पायं वा पडिसाहरितए" तदेवं पथिस्थस्तिष्ठच्चैर्यापथिकं कर्म बन्धाति, तच्च कीदृगित्याह-सुखयतीति सुखः स्पर्शः-आत्मप्रदेशैः सह संश्लेषो यस्य तत्सुखस्पर्शं द्वौ समयौ यस्याः सा द्विसमया तथाविधा स्थितिरस्येति द्विसमयस्थितिकं, द्विसमयस्थितिकत्वमेव भावयितुमाहतत् प्रथमसमये बद्धम्-आत्मसात्कृतं स्पर्शाविनाभावित्वाच्चास्य स्पृष्टं च, द्वितीयसमये वेदितम्-अनुभूतमुदयान्यथानुपपत्त्या चास्योदितं च, तृतीयसमये निर्जीर्णं-परिशटितं, तदुत्तरकालस्थितेः कषायहेतुत्वात्, उक्तं हि-"जोगा पयडिपएसं ठितिअनुभागं कसायओ कुणति"त्ति, द्विसमयस्थितिकबन्धस्य तु योगसम्भवेऽवश्यम्भावित्वादिहाभिधानं, तदवश्यम्भाविता तु

"नो कम्मेहि विवरीयं जोगदव्वेहि भवति जीवस्स।
तस्सावत्थाणे ननु सिद्धो दुसमयठितिबंधो ॥" इति

युक्तितोऽवसेया, अतश्च तद्बद्धं-जीवप्रदेशैः श्लिष्टमाकाशेन घटवत् तथा स्पृष्टं मसृणमणिकुड्यपतितस्थूलशिलाशकलचूर्णवत्, अनेन विशेषणद्वयेन तस्य निधत्तनिकाचितावस्थयोरभावमाह, 'उदीरितम्' उदयप्राप्तम् उदीरणायास्तत्रासम्भवात्, 'वेदितं' तत्फलसुखानुभवनेन 'निर्जीर्णं' क्षयमुपागतं 'सेयाले य'त्ति सूत्रत्वाद् 'एष्यत्काले' चतुर्थसमयादावकर्म

चापि भवति, तज्जीवापेक्षया पुनस्तस्य तथाविधपरिणामाभावात्, एतच्चैवंविधविशेषणान्वितं सातकर्मैवासौ बध्नाति, यत उक्तम्-

"अप्पं बायर मउयं बहुं च रुक्खं च सुक्किलं चेव।
मंदं महव्वयंति य सायाबहुलं च तं कम्मं॥"

मू.(११८६) अहाउयं पालइत्ता अंतोमुहुत्तद्धावसेसाए जोगनिरोहं करेमाणे सुहुमकिरियं अप्पडिवाइं सुक्कज्झाणं झायमाणे तप्पढमयाएमणजोगं निरंभइ वयजोगं निरंभइ आणापाननिरोहं करेइ, ईसिपंचहस्सक्खरुच्चारणद्धाए य णं अनगारे समुच्छिन्नकिरियं अनियट्टिसुक्कज्झाणं झियायमानो वेयनिज्जं आउयं नामं गुत्तं च एए चत्तारिवि कम्मंसे जुगवं खवेइ॥

वृ. अयं च देशोनपूर्वकोटीमन्तर्मुहूर्त्तादिप्रमाणं वा कालं विहृत्य यथा शैलेशीमवाप्याकर्मतां लभते तथा दर्शयन् शैलेश्यकर्मताद्वारमर्थतो व्याचिख्यासुराह -'अथे'ति केवलावाप्त्यनन्तरम् 'आयुष्कं' जीवितमन्तर्मुहूर्त्तादिपरिमाणं पालयित्वा, अन्तर्मुहूर्त्तपरिमाणाऽद्धा-कालोऽन्तर्मुहूर्त्ताद्धा साऽवशेषम्-उद्धरितं यस्मिंस्तदन्तर्मुहूर्त्ताद्धावशेषं तथाविधमायुरस्येत्यन्तर्मुहूर्त्ताद्धावशेषायुष्कः सन्, पाठान्तरतश्चान्तर्मुहूर्त्तावशेषायुष्कः, पठन्ति च-'अंतोमुहुत्तअद्धावसेसाए'त्ति प्राकृतत्वादन्तर्मुहूर्त्तशेषाद्धायां 'योगनिरोहं करेमाणे'त्ति योगनिरोधं करिष्यमाणः सूक्ष्मा क्रिया-व्यापारो यस्मिंस्तत्सूक्ष्मक्रियमप्रतिपतनशीलमप्रतिपाति अधःपतनाभावात्, शुक्लं ध्यानं 'समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्त' इति शुक्लध्यानतृतीयभेदं ध्यायन् 'तत्प्रथमतया' तदाद्यतया मनसो योगो मनोयोगः-मनोद्रव्यसाचिव्यजनितो व्यापारस्तं निरुणद्धि, तत्र च पर्याप्तमात्रस्य सञ्ज्ञिनो जघन्ययोगिनो यावन्ति मनोद्रव्याणि तज्जनितश्च यावद्व्यापारस्तदसङ्ख्यगुणविहीनानि मनोद्रव्याणितद्व्यापारं च प्रतिसमयं निरुन्धन्नसंख्येयसमयैस्तत्सर्वनिरोधं करोति, यत उक्तम्-

"पज्जत्तमित्तसन्निस्स जत्तियाइं जहन्नजोगिस्स।
होंति मनोदव्वाइं तव्वावारो य जम्मेत्तो॥१॥
तयसंखगुणविहीणे समए समए निरुंभमानो सो।
मनसो सव्वनिरोहं कुणइ असंखेज्जसमएहिं॥२॥"

तदनन्तरं च वाचो वाचि वा योगो भाषाद्रव्यसाचिव्यजनितो जीवव्यापारस्तन्निरुणद्धि, तत्र च पर्याप्तमात्रद्वीन्द्रियजघन्यवाग्योगपर्यायेभ्योऽसंख्येयगुणविहीनांस्तत्पर्यायान् समये समये निरुन्धन्नसंख्येयसमयैः सर्ववाग्योगं निरुणद्धि, यत उक्तम्-

"पज्जत्तमित्तबेंदिय जहन्नवइजोगपज्जवा जे उ।
तदसंखगुणविहीणं समए समए निरंभंतो॥३॥
सव्ववइजोगरोहं संखाईएहि कुणइ समएहिं।" 'आनापाणुनिरोह'ति आनापानौउच्छ्वासनिःश्वासौ तन्निरोधं करोति, सकलकाययोगनिरोधोपलक्षणं चैतत्, तं च कुर्वन् प्रथमसमयोत्पन्नसूक्ष्मपनकजघन्यकाययोगतोऽसङ्ख्येयगुणहीनं काययोगेनैकैकसमये निरुन्धन् देहत्रिभागं च मुञ्चनसङ्ख्येयसमयैरेव सर्वं निरुणद्धि, यत उक्तं च-

"तत्तो य सुहुमपणयस्स पढमसमओववन्नस्स॥४॥

जो किर जहन्नजोओ तयसंखेज्जगुणहीणमेक्केक्के ।
समए निरंभमानो देहतिभागं च मुंचंतो ॥५॥
रंभइ स कायजोगं संखाईएहिं चेव समएहिं ।
तो कयजोगनिरोहो सेलेसीभावणामेति ॥६॥"

इत्थं योगत्रयनिरोधं विधाय ईषदिति-स्वल्पः प्रयत्नापेक्षया पञ्चानां ह्रस्वाक्षराणाम् अइउऋऌ इत्येवंरूपाणामुच्चरणमुच्चारो-भणनं तस्याद्धा-कालो यावता ते उच्चार्यन्त ईषत्पञ्चाक्षरोच्चारणाद्धा तस्यां च नमिति प्राग्वत्, अनगारः समुच्छिन्ना-उपरता क्रिया-मनोव्यापारादिरूपा यस्मिंस्तत्समुच्छिन्नक्रियं न निवर्त्तते कर्मक्षयात्प्रागित्येवंशीलम् अनिवर्त्ति शुक्लध्यानचतुर्थभेदरूपं 'ध्यानम्' शैलेश्यवस्थामनुभवन्निति भावः, ह्रस्वाक्षरोच्चारणं च न विलम्बितं द्रुतं वा किन्तु मध्यममेव गृह्यते, यत आह-

"हस्सक्खराइं मज्झेण जेन कालेण पंच भन्नंति ।
अच्छइ सेलेसिगतो तत्तियमित्तं तओ कालं ॥"

एवंविधश्च यत्करुते तदाह-'वेदनीयं' सातादि 'आयुष्कं' मनुष्यायुः 'नाम' मनुजगत्यादि 'गोत्रं च' उच्चैर्गोत्रम् 'एए'त्ति एतानि चत्वार्यपि 'कम्मंसि'त्ति सत्कर्माणि युगपत्क्षपयति, एतत्क्षपणान्यायश्च भाष्यगाथाभ्योऽवसेयः, ताश्चेमाः-

"तयसंखेज्जगुणाए गुणसेढीए रइयं पुराकम्मं ।
समए समए खवयं कम्मं सेलेसिकालेणं ॥१॥
सव्वं खवेति तं पुन निल्लेवं किंचि दुचरिमे समए ।
किंचिच्च होइ चरिमे सेलेसीए तयं वोच्छं ॥२॥
मनुयगइजाइतसबायरं च पज्जत्तसंभगमाएज्जं ।
अन्नयरवेयनिज्जं नराउमुच्चं जसो नामं ॥३॥
संभवती जिननामं नरानुपुव्वी य चरिमसमयम्मी ।
सेसा जिनसंतातो दुचरिमसमयंमि निट्ठंति ॥४॥"

मू. (११८७) तओ ओरालियं कम्माइं च सव्वाहिं विप्पजहणाहिं विप्पजहित्ता उज्जुसेढीपत्ते अफुसमाणगई उड्ढं एगसमएणं अविग्गहेणं तत्थ गंता सागारोवउत्ते सिज्झइ०

वृ. 'ततः' इति वेदनीयादिक्षयानन्तरम् 'ओरालियकम्माइं च'त्ति औदारिककार्मणे शरीरे उपलक्षणत्वात्तैजसं च 'सव्वाहिं विप्पजहनाहि'न्ति 'सर्वाभिः' अशेषाभिर्वाशेषेण विविधं वा प्रकर्षतो हानयः-त्यागा विप्रहाणयो, व्यक्त्यपेक्षं बहुवचनं, ताभिः, किमुक्तं भवति ?-सर्वथा परिशाटेन, न तु यथा पूर्वं सङ्घातपरिशाट्याभ्यां देशत्यागतः, 'विप्पजहित्ता'विशेषेण प्रहाय-परिशाट्य, उक्तं हि-

"ओरालियाहिं सव्वाहिं चयइ विप्पजहनाहि जं भणियं ।
निस्सेसतया न जथा देसच्चाएण सो पुव्वं ॥"

चशब्दोऽत्रौदायिकादिभावनिवृत्तिस्यानुक्तामपि समुच्चिनोति, यत उक्तम्-

"तस्सोदइयाभावा भव्वत्तं च विनियत्तए जुगवं ।

सम्मत्तनाणदंसणसुहसिद्धत्ताणि मोत्तूणं ॥"

ऋजु.-अवक्रा श्रेणिः-आकाशप्रदेशपङ्क्तिस्तां प्राप्त ऋजुश्रेणिप्राप्तः अनुश्रेणिगत इतियावत्, 'अफुसमाणगइ'त्ति अस्पृशद्गतिरिति, नायमर्थो यथा नायमाकाशप्रदेशान्न स्पृशति अपि तु यावत्सु जीवोऽवगाढस्तावत एव स्पृशति न तु ततोऽतिरिक्तमेकमपि प्रदेशम्, 'ऊर्द्ध्वम्' उपरि 'एकसमयेन' द्वितीयादिसमयान्तरास्पर्शेन 'अविग्रहेण' वक्रगतिरूपविग्रहाभावेन, अन्वयव्यतिरेकाभ्यामुक्तोऽर्थः स्पष्टतरो भवतीति अनुश्रेणिप्राप्त इत्यनेन गतार्थत्वेऽपि पुनरभिधानं, 'तत्र' इति विवक्षिते मुक्तिपद इतियावत् 'गतं'त्ति गत्वा 'साकारोपयुक्तः' ज्ञानोपयोगवान् सिद्धतीत्यादि यावदन्तं करोतीत्यादि प्राग्वत्, उक्तं हि-

"उजुसेढिं पडिवन्नो समयपएसंतरं अफुसमानो।
एगसमएण सिज्झइ अह सागारोवउत्तो सो ॥" इति,

द्वासप्ततिसूत्रार्थः। इह च चूर्णिकृता-"सेलेसी ए णं भंते! जीवे किं जणइ? अकम्मयं जणति, अकम्मयाए जीवा सिज्झन्ति" इति पाठः, पूर्वत्र च क्वचित्किञ्चित्पाठभेदेनाल्पा एव प्रश्ना आश्रिताः, अस्माभिस्तु भूयसीषु प्रतिषु यथाव्याख्यातपाठदर्शनादित्थमुन्नीतमिति।

मू.(११८८) एसो खलु सम्मत्तपरक्कमस्स अज्झयणस्स अट्ठे समणेणं भगवया महावीरेणं आघविए पन्नविए परूविए दंसिए निदंसिए उवदंसिए त्तिबेमि ॥

वृ. 'एषः' अनन्तरोक्तः 'खलु' निश्चये सम्यक्त्वपराक्रमस्याध्ययनस्य 'अर्थः' अभिधेयः श्रमणेन भगवता महावीरेण 'आघविए'त्ति आर्षत्वाद् 'आख्यातः' सामान्यविशेषपर्यायाभिव्यासिकथनेन 'प्रज्ञापितः' हेतुफलादिप्रकाशनात्मकप्रकर्षज्ञापनेन 'प्ररूपितः' स्वरूपकथनेन 'दर्शितः' नानाविधभेददर्शनेन 'निदर्शितः' दृष्टान्तोपन्यासेन 'उपदर्शितः' उपसंहारद्वारेण, इदमपि चूर्णिमाश्रितमेव।

'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववत्, गतोऽनुगमः, सम्प्रति नयाः, तेऽपि तथैव।

अध्ययनं २९ समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे एकोनत्रिंशमध्ययनस्य भद्रबाहुस्वामिविरचिता निर्युक्तिः एवं शान्त्याचार्य विरचिता सटीकं परिसमाप्ता।

अध्ययनं ३० तपोमार्गगतिः

वृ. व्याख्यातमेकोनत्रिंशमध्ययनम्, अधुना त्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययनेऽप्रमाद उक्तः, इह तु तद्वता तपो विधेयमिति तत्स्वरूपमुच्यते, इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य चतुरनुयोगद्वारप्ररूपणा प्राग्वद्यावन्नामनिष्पन्ननिक्षेपे तपोमार्गगतिरिति त्रिपदं नाम, अत एव तत्पदत्रयनिक्षेपायाह निर्युक्तिकृत्-

नि. [५१४] निक्खेवो (उ) तवंमि चउव्वि० ॥
नि. [५१५] जाणगभविसरीरे तव्वइरित्ते अ पंचतवमाई।
भावंमि होइ दुविहो बज्झो अब्भिंतरो चेव ॥
नि. [५१६] मग्गगईणं दुण्हवि पुव्वुद्दिट्ठो चउक्कनिक्खेवो।

पगयं तु भावमग्गे सिद्धिगईए उ नायव्वं ॥

नि. [५१७] दुविहतवोमग्गगई खत्रिज्जइ जम्हऽइत्थ अज्झयणे ।
तम्हा एअज्झयणं तवमग्गगइत्ति नायव्वं ॥

वृ. गाथाचतुष्टयं प्राग्वत्, नवरं 'पंचतवमाइ'त्ति पञ्चतपः - पञ्चाग्नितपः, यत्र चतसृष्वपि दिक्षु चत्वारोऽग्नयः पञ्चमश्च तपनतप्तस्तल्लोके प्रसिद्धम्, आदिशब्दाल्लोकप्रतीतमन्यदपि बृहत्तपःप्रभृति तपो गृह्यते, द्रव्यत्वं चास्याज्ञानमलमलिनत्वेन तथाविधशुद्धनङ्गत्वात्, तथा भावे प्रक्रमात्तपो बाह्यमभ्यन्तरं चात्रैव वक्ष्यमाणस्वरूपं ॥ तथा 'पुव्वुद्दिट्ठो'त्ति पूर्वत्रमोक्षमार्गगतिनामकेऽध्ययने उद्दिष्टः-कथितः पूर्वोद्दिष्टः 'भावमग्गो'त्ति सुब्व्यत्ययाद्, 'भावमार्गेण' मुक्तिपथेन तपोरूपेण ज्ञानदर्शनचारित्राविनाभावित्वाद् भावतपसः ॥

नामनिरुक्तिमाह-द्विविधं तपो बाह्यमभ्यन्तरं च तदेव मार्गो भावमार्गस्तत्फलभूता च गतिः-सिद्धिगतिर्द्विविधतपोमार्गगतिर्भण्यते यस्मादत्र-अध्ययने तस्मादेतदध्ययनं तपोमार्गगतिरिति ज्ञातव्यम्, अभिधेयेऽभिधानोपचारादिति भावः, इति निर्युक्तिगाथाचतुष्टयार्थः ॥ गतो नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रालापकनिष्पन्ननिक्षेपावसरः, तस्य च सूत्रानुगमाविनाभावित्वात् सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (११८९) *जहा उ पावगं कम्मं, रागद्दोससमज्जियं ।*
खवेइ तवसा भिक्खू, तमेगग्गमणो सुण ॥

वृ. 'यथा' येन प्रकारेण 'तुः' अवधारणे भिन्नक्रमो योक्ष्यते, 'पापकं कर्म' ज्ञानावरणादि रागद्वेषाभ्यां समिति-भृशमर्जितम्-उपात्तं रागद्वेषसमर्जितं क्षपयत्येव 'तपसा' वक्ष्यमाणलक्षणेन भिक्षुः 'तदेकाग्रमनाः' अवहितचित्तः शृण्विति शिष्यमभिमुखीकरोति, मा भूदनभिमुखोपदेशनेनैतद्वैफल्यमिति सूत्रार्थः ॥ इह चानाश्रवेणैव सर्वथा कर्म क्षप्यत इति यथाऽसौ भवति

मू. (११९०) *पाणिजहमुसावाया अदत्तमेहुणपरिग्गहा विरओ ।*
राईभोयणविरओ, जीवो भवइ अनासवो ॥

मू. (११९१) *पंचसमिओ तिगुत्तो, अकसाओ जिइंदिओ ।*
अगारवो अ निस्सल्लो, जीवो भवइ अनासवो ॥

वृ. सूत्रद्वयं प्रायः प्रतीतार्थमेव, नवरं विरत इति प्राणवधादिभिः प्रत्येकमभिसम्बध्यते, तथा भवत्यनाश्रव इति-अविद्यमानकर्मोपादानहेतुः ।

द्वितीयसूत्रेऽप्यनाश्रवः-समित्यादिविपर्ययाणां कर्मोपादानहेतुत्वेनाश्रवरूपत्वात्तेषां चाविद्यमानत्वादिति सूत्रद्वयार्थः ॥ एवंविद्धश्च यादृशं कर्म यथा च क्षपयति आदराधानाय पुनः शिष्याभिमुखीकरणपूर्वकं दृष्टान्तद्वारेण तदाह-

मू. (११९२) *एएसिं तु विवज्जासे, रागद्दोससमज्जियं ।*
खवेइ तं जहा भिक्खू, तं मे एगमना सुण ॥

मू. (११९३) *जहा महातलागस्स, संनिरुद्धे जलागमे ।*
उस्सिंचणाए तवणाए, कमेणं सोसणा भवे ॥

मू. (११९४) *एवं तु संजयस्सावि, पावकम्मनिरासवे ।*

भवकोडीसंचियं कम्मं, तवसा निज्जरिज्जई ॥

वृ. 'एतेषां' तु प्राणिवधविरत्यादीनामनाश्रवहेतूनां 'विवज्जासे'त्ति विपर्यासे प्राणिवधादावसंयमित्वादौ च रागद्वेषाभ्यां समर्जितम् उपार्जितं रागद्वेषपरार्जितं कर्मेति गम्यते तद्यथा क्षपयति तन्मे कथयत इति शेषः, एकम् एकत्र प्रस्तुते वस्तुन्यभिनिविष्टत्वेन मनो यस्यासावेकमनाः शृण्वंति शिष्याभिमुखीकरणम्।

'संनिरुद्धे' पाल्यादिना निषिद्धे 'जलागमे' जलप्रवेशे 'उस्सिंचणाए'त्ति सूत्रत्वाद् 'उत्सेचनेन' अरघट्टघटीनिवहादिभिरुदञ्चनेन 'तवणाए'त्ति प्राग्वत् 'तपनेन' रविकरनिकरसन्तापरूपेण 'क्रमेण' परिपाट्या 'शोषणा' जलाभावरूपा भवेत्।

'पापकर्मनिराश्रवे' पापकर्मणामाश्रवाभावे 'भवकोटीसञ्चितम्' इत्यत्र कोटीग्रहणमतिबहुत्वोपलक्षणं कोटीनियमासम्भवात्, कर्म तपसा 'निर्जीर्यते' आधिक्येन क्षयं नीयते, शेषं स्पष्टमिति सूत्रत्रयार्थः॥ तपसा कर्म निर्जीर्यत इत्युक्तं, तत्र किं ततपः ? इति संशये भेदाभिधानं विनाऽशक्यत्वात्तत्स्वरूपाभिधानस्य तद्भेदानाह -

मू. (११९५) सो तवो दुविहो वुत्तो, बाहिरऽब्भंतरो तहा।
बाहिरो छव्विहो वुत्तो, एवमब्भिंतरो तवो ॥

वृ. 'तद्' अनन्तरप्रक्रान्तं तपो द्विविधमुक्तं 'बाहिरऽब्भंतरो'त्ति 'बाह्यं' बाह्यद्रव्यापेक्षत्वात् प्रायो मुक्त्यबाधिबहिरङ्गत्वाच्च 'अभ्यंतरं' तद्विपरीतं, यदिवा लोकप्रतीतत्वाकुतीर्थिकैश्च स्वाभिप्रायेणासेव्यमानत्वाद्बाह्यं तदितरत्वाभ्यन्तरम्, उक्तञ्च-

"लोके परसमयेषु च यत्प्रथितं तत्तपो भवति बाह्यम्।
आभ्यन्तरमप्रथितं कुशलजनेनैव तु ग्राह्यम्॥"

अन्ये त्वाहुः "प्रायेणान्तःकरणव्यापाररूपमेवाभ्यन्तरं, बाह्यं त्वन्यथे"ति, तथेति समुच्चये, बाह्यं 'षड्विधं' षड्भेदमुक्तमेवंगमि-षड्विधमभ्यन्तरं तप उक्तमिति सम्बन्धः, सर्वत्र सूत्रत्वाल्लिङ्गव्यत्यय इति सूत्रार्थः॥ तत्र यथा बाह्यं षड्विधं तथाऽह-

मू. (११९६) अनसनमूणोअरिया भिक्खायरिया य रसपरिच्चाओ।
कायकिलेसो संलीयणा य बज्झो तवो होइ ॥

वृ. अक्षरार्थः स्पष्ट एव॥ भावार्थं तु प्रतिभेदं सूत्रकार एवाभिधित्सुस्तावदनशनमाह-

मू. (११९७) इत्तरियमरणकाला य, अनसना दुविहा भवे।
इत्तरिया सावकंखा, निरवकंखा उ बिइज्जिया ॥

वृ. 'इत्तरिय'त्ति इत्वरमेवेत्वरकं- स्वल्पकालं नियतकालावधिकमिति योऽर्थः, मरणावसानः कालो यस्य तन्मरणकालं प्राग्वन्मध्यपदलोपी समासः, यावज्जीवमित्यर्थः, तथा मरणं कालः अवसरो यस्य तन्मरणकालं 'च:' समुच्चये, अश्यते- भुज्यत इत्यशनमशेषाहाराभिधानमेतत्, उक्तं हि-

"सव्वोऽवि य आहारो असणं सव्वोऽवि वुच्चए पानं।
सव्वोऽवि खाइमंपि य सव्वोऽवि य साइमं होइ॥"

ततश्चाविद्यमानं देशतः सर्वतो वाऽशनमस्मिन्नित्यनशनं 'द्विविधं' द्विप्रकारं भवेत्, तत्र 'इत्तरिय'त्ति इत्वरकं सहावकाङ्क्षया-घटिकाद्वयाद्युत्तरकालं भोजनाभिलाषरूपया वर्त्तत इति सावकाङ्क्षं निष्क्रान्तमाकाङ्क्षातो निरवकाङ्क्षं, तज्जन्मनि भोजनाशंसाभावात्, तुशब्दस्य भिन्नक्रमत्वाद् द्वितीयं पुनर्मरणकालं, पाठान्तरतश्च निरवकाङ्क्षं द्वितीयम्।

'यथोद्देशं निर्देश'इति न्यायत इत्वरकानशनस्य भेदानाह-

मू.(१११८) *जो सो इत्तरियतवो, सो समासेण छव्विहो।*
सेढितवो पयरतवो, घनो अ तह होइ वग्गो य॥

वृ. यत्तदित्वरकं तपः-इत्वरकानशनरूपमनन्तरमुक्तं तत् 'समासेन' सङ्क्षेपेण षड्विधं, विस्तरेण तु बहुतरभेदमिति भावः॥ षड्विधत्वमेवाह-'सेढितवो' इत्यादि, अत्र च श्रेणिः पंक्तिस्तदुपलक्षितं तपः श्रेणितपः तच्चतुर्थादिक्रमेण क्रियमाणमिह षण्मासान्तं परिगृह्यते, तथा श्रेणिरेव श्रेण्या गुणिता प्रतर उच्यते, तदुपलक्षितं तपः प्रतरतपः, इह चाव्यामोहार्थं चतुर्थषष्ठाष्टमदशमाख्यपदचतुष्टयात्मिका श्रेणिर्विवक्ष्यते, सा च चतुर्भिर्गुणिता षोडशपदात्मकः प्रतरो भवति, अयं चायामतो विस्तरतश्च तुल्य इत्यस्य स्थापनोपाय उच्यते

"एकाद्याद्या व्यवस्थाप्याः पंक्तयोऽत्र यथाक्रमम्।
एकादींश्च निवेश्यान्ते, क्रमात्पंक्तिं प्रपूरयेत्॥"

अस्यार्थः एक आदिर्येषां ते एकादयः-एककद्विकत्रिकचतुष्कास्ते आद्या यासु ता एकाद्याद्याः 'व्यवस्थाप्याः' न्यसनीयाः 'पंक्तयः' श्रेणयः 'यथाक्रमं' क्रमानतिक्रमेण, कोऽर्थः?-प्रथमा एकाद्या एककादारभ्य, द्वितीया द्विकाद्या द्विकादारभ्य, तृतीया त्रिकाद्या त्रिकादारभ्य, चतुर्थी-चतुष्काद्या चतुष्कादारभ्य, आह-एवं सति प्रथमपंक्तिरेव परिपूर्णा भवति द्वितीयाद्यास्तु न पूर्यन्त एव, तत्कथं पूरणीयाः?, उच्यते, एकादींश्च निवेश्य व्यवस्थाप्याः 'अन्ते' इत्यग्रे 'क्रमात्' इति क्रममाश्रित्य 'पंक्तिम्' अपूर्यमाणा श्रेणिं 'पूरयेत्' परिपूर्णां कुर्यात्, तत्र च द्वितीयपंक्तौ द्विकत्रिकचतुष्कानामग्रे एककः, तृतीयपंक्तौ त्रिकचतुष्कयोः पर्यन्ते एककौ द्विकः, चतुर्थपंक्तौ चतुष्कावसाने एककद्विकत्रिकाः स्थाप्यन्ते, चतुर्थषष्ठाष्टमदशमप्रक्रमः, 'घन' इति घनतपः 'चः' पूरणे तथेति समुच्चये भवतीति च क्रिया प्रतितपोभेदं योजनीया, अत्र च षोडशपदात्मकः प्रतरः पदचतुष्टयात्मिकया श्रेण्या गुणितो घनो भवति, आगतं चतुःषष्टिः ६४, स्थापना तु पूर्विकैव नवरं बाहल्यतोऽपि पदचतुष्टयात्मकत्वं विशेषः, एतदुपलक्षितं तपो घनतप उच्यते, 'चः' समुच्चये, 'तथा भवति वर्गश्चे'तीहापि प्रक्रमाद्वर्ग इति वर्गतपः, तत्र च घन एव घनेन गुणितो वर्गो भवति, ततश्चतुःषष्टिश्चतुःषष्ट्यैव गुणिता जातानि षन्नवत्यधिकानि चत्वारि सहस्राणि, एवदुपलक्षितं तपो वर्गतपः।

मू.(१११९) *तत्तो य वग्गवग्गो उ पंचमो छट्ठओ पइण्णतवो।*
मणइच्छियचित्तत्थो नायव्वो होइ इत्तरिओ॥

वृ. 'ततश्च' वर्गतपसोऽनन्तरं 'वर्गवर्ग' इत् वर्गवर्गतपः 'तुः' समुच्चये 'पञ्चमं' पञ्चसङ्ख्यापूरणम्, अत्र च वर्ग एव यदा वर्गेण गुण्यते तदा वर्गवर्गो भवति, तथा च चत्वारि सहस्राणि षन्नवत्यधिकानि तावतैव गुणितानि जातैका कोटिः सप्तषष्टिलक्षाः सप्तसप्ततिसहस्राणि द्वे शते

षोडशाधिके, अङ्कतोऽपि १६७७७२१६, एतदुपलक्षितं तपो वर्गवर्गतप इत्युच्यते, एवं पदचतुष्टमाश्रित्य श्रेण्यादितपोदर्शितम्, एतदनुसारेण पञ्चादिपदेष्वप्येतत्परिभावना कार्या, षष्ठके 'प्रकीर्णतपः' यच्छ्रेण्यादिनियतरचनाविरहितं स्वशक्त्यपेक्षं यथाकथञ्चिद्विधीयते, तच्च नमस्कारसहितादि पूर्वपुरुषाचरितं यवमध्यवज्रमध्यचन्द्रप्रतिमादि च, इत्थं भेदानभिधायोपसंहारमाह 'मणइच्छियचित्तत्थो'त्ति मनसः-चित्तस्य ईप्सित-इष्टश्चित्रः-अनेकप्रकारोऽर्थः-स्वर्गापवर्गादिस्तेजोलेश्यादिर्वा यस्मात्तन्मनईप्सितचित्रार्थं ज्ञातव्यं भवति 'इत्वरकं' प्रक्रमादनशनाख्यं तपः ।

मू. (१२००) *जा सा अनसना मरणे, दुविहा सा वियाहिया ।*
सवीयारमवीयारा, कायचिट्ठं पई भवे ॥

वृ. सम्प्रति मरणकालमनशनं वक्तुमाह-'जा सा अनसना'इति यत्तदनशनं 'मरणे' मरणावसरे द्विविधं तद्विशेषेणाख्यातं कथितं व्याख्यातं तीर्थकृदादिभिरिति गम्यते, तद्विविध्यमेवाह-सह विचारेण-चेष्टात्मकेन वर्त्तते यत्तत्सविचारं तद्विपरीतमविचारं, विचारश्च कायवाङ्मानोभेदात्त्रिविध इति तद्विशेषपरिज्ञानार्थमाह 'कायचेष्टाम्' उद्वर्त्तनपरिवर्त्तनादिककायप्रवीचारं 'प्रति'ति आश्रित्य 'भवेत्' स्यात्, तत्र सविचारं भक्तप्रत्याख्यानमिङ्गिनीमरणं च, तथाहि-भक्तप्रत्याख्याने गच्छमध्यवर्ती गुरुदत्तालोचनो मरणायोद्यतो विधिना संलेखनां विधाय ततस्त्रिविधं चतुर्विधं वाऽऽहारं प्रत्याचष्टे, स च समाश्रितमृदुसंस्तारकः समुत्सृष्टशरीरोद्युपकरणममत्वः स्वयमेवोद्ग्राहितनमस्कारः समीपवर्त्तिसाधुदत्तनमस्कारो वा सत्यां शक्तौ स्वयमुद्वर्त्तते, शक्तिविकलतायां चापरैरपि किञ्चित्कारयति, यत उक्तम्-

"वियडणमब्भुट्ठाणं उचियं संलेहणं च काऊणं ।
पच्चक्खति आहारं तिविहं च चउव्विहं वावि ॥१॥
उव्वत्तति परियत्तति सयमन्नेणावि कारए किंचि ।
जत्थ समत्थो नवरं समाहिजणयं अपडिबद्धो ॥२॥"

इङ्गिनीमरणमप्युक्तन्यायतः प्रतिपद्य शुद्धस्थण्डिलस्थाता एकाक्येव कृतचतुर्विधाहारप्रत्याख्यानस्तत्स्थण्डिलस्यान्तश्छायात उष्णमुष्णाच्च छायां स्वयं संक्रामति, तथा चाह-

"इंगियमरणविहाणं आपव्वज्जं तु वियडणं दाउं ।
संलेहणं च काउं जहासमाही जहाकालं ॥१॥
पच्चक्खति आहारं चउव्विहं नियमओ गुरुसगासे ।
इंगियदेसंमि तहा चेट्ठंपि हु इंगियं कुणइ ॥२॥
उव्वत्तइ परियत्तइ काइयमाईसु होइ उ विभासा ।
किच्चंपि अप्पणुच्चिय जुंजइ नियमेण धीबलिओ ॥३॥"

अविचारं तु पादपोपगमनं, तत्र हि सव्याघाताव्याघातभेदतो द्विभेदेऽपि पादपवन्निश्चेष्टतयैव स्थीयते, तथा च तद्विधिः-

"अभिवंदिऊण देवे जहाविहिं सेसए य गुरुमाई ।
पच्चक्खाइत्तु ततो तयंतिए सव्वमाहारं ॥१॥

समभावंमि ठियप्पा सम्मं सिद्धंतभणितमग्गेणं।
गिरिकंदरं तु गंतुं पायवगमणं अह करेइ ॥२॥
सव्वत्थापडिबद्धो दंडाययमादिठाणमिह ठाउं।
यावज्जीवं चिट्ठइ निच्चिट्ठो पायवसमानो ॥३॥"

मू. (१२०१) *अहवा सपरिकम्मा अपरिकम्मा य आहिया।*
नीहारिमनीहारी आहारच्छेअओ दोसुवि ॥

वृ. पुनर्द्वैविध्यमेव प्रकारान्तरेणाह-'अथवे'त्ति प्रकारान्तरसूचने सह परिकर्मणा स्थाननिषदनत्वग्वर्त्तनादिना विश्रामणादिना च वर्त्तते यत्तत्सपरिकर्म अपरिकर्म च तद्विपरीतम् 'आख्यातं' कथितं, तत्र सपरिकर्म भक्तप्रत्याख्यानमिङ्गिनीमरणं च, एकत्र स्वयमन्येन वा कृतस्य अन्यत्र तु स्वयंविहितस्योद्वर्त्तनादिचेष्टात्मकपरिकर्मणोऽनुज्ञानात्, तथा चाह-

"आयपरपरिक्कम्मं भत्तपरिण्णाए दो अनुन्नाया।
परवज्जिया य इंगिणि यउव्विहाहारविरई य ॥१॥
ठाणनिसियणतुयट्टण इत्तरियाइं जहासमाहीए।
सयमेव य सो कुणई उवसग्गपरिसहऽहियासे ॥१॥"

अपरिकर्म च पादपोपगमनं, निष्प्रतिकर्मतायां एव तत्राभिधानात्, तथा चागमः

"समविसमंमि य पडिओ अच्छइ जह पायवो व्व निक्कंपो।
निच्चलनिप्पडिकम्मो निक्खिवई जं जहिं अंगं ॥२॥
तं चिय होइ तहच्चिय नवरं चलणं परप्पओगाओ।
वायाईहिं तरुस्स व पडिणीयाईहिं तह तस्स ॥३॥"

यद्वा परिकर्म-संलेखना सा यत्रास्ति तत्सपरिकर्म, तद्विपरितं त्वपरिकर्म, तत्र चाव्याघाते त्रयमप्येतत्सूत्रार्थोभयनिष्ठितो निष्पादितशिष्यः संलेखनापूर्वकमेव विधत्ते, अन्यथाऽऽर्त्तध्यानसम्भवात्, उक्तञ्च-

"देहम्मि असंलिहिए सहसा धाऊहि खिज्जमाणेहिं।
जायइ अट्टज्झाणं सरीरिणो चरिमकालंमि ॥४॥"

इति सपरिकर्मोच्यते, यत्पुनर्व्याघाते गिरिभित्तिपतनाभिघातादिरूपे संलेखनामविधायैव भक्तप्रत्याख्यानादि क्रियते तदपरिकर्म, उक्तञ्चागमे-

"अवि धातो या विज्जू गिरिभित्तीकोणगा य वा होज्जा।
संबद्धहत्थपायादयो व वाएण होज्जाहि ॥१॥
एएहिं कारणेहिं बाधाइममरण होइ बोद्धव्वं।
परिकम्ममकाऊणं पच्चक्खाई ततो भत्तं ॥२॥"

तथा निर्हरणं निर्हारो-गिरिकन्दरादिगमनेन ग्रामादेर्बहिर्गमनं तद्विद्यते यत्र तन्निर्हारि तदन्यद-निर्हारि यदुत्थातुकामे व्रजिकादौ विधीयते, एतच्च प्रकाराद्वयमपि पादपोपगमनविषयं, तत्प्रस्ताव एवागमेऽस्याभिधानात्, तथा चागमः-

"पव्वज्जाई काउं नेयव्वं जाव होयवोच्छित्ती।

पंच तुले काऊणं य सो पाओग्गमपरिणतो य ॥३॥
तं दुविहं नायव्वं नीहारिं चेव तहमणीहारिं।
बहिया गामाईणं गिरिकंदरमाइ नीहारिं॥४॥
वइयाइसु जं अंतो उट्ठंउमणाणं ठाइ अनिहारिं।
कम्हा ? पायवगयाणं जं उवमा पायवेणऽत्थं ॥५॥"

आहार: - अशनादिमत्त्वच्छेद:- तन्निराकरणम्, आहारच्छेदश्च द्वयोरपि सपरिकर्मापरिकर्मणो-र्निहार्यनिर्हारिणोश्च **सम** इति शेष:, उभयत्र तद्भावच्छेदस्य तुल्यत्वादिति सूत्रपञ्चकार्थ: ॥

उक्तमनशनमूनोदरतामाह-

मू. (१२०२) ओमोअरणं पंचहा, समासेण वियाहियं।
दव्वओ खित्तकालेणं, भावेणं पज्जवेहि य ॥

वृ. तत्रावमं-न्यूनमुदरं-जठरमस्यासाववमोदरस्तद्भाव: अवमौदर्यं-न्यूनोदरता, पठन्ति च-'ओमोयरण'न्ति तत्र चावमं च तदुदरं चावमोदरं तस्मात्करोत्यर्थे णिचि ल्युटि चावमोदरणम्, अवमोदरकरणमित्यर्थ:, तच्च 'पंचह'न्ति 'पञ्चधा' पञ्चप्रकारं 'समासेन' सङ्क्षेपेण व्याख्यातं, पञ्चधात्वमेवाह-'द्रव्यत' इति द्रव्यात् हेतौ पञ्चमी, क्षेत्रं च कालश्चेति क्षेत्रकालं तेन भावेन च पर्यायैश्चोपाधिभूतै:, सर्वत्र हेतौ तृतीया ॥

मू. (१२०३) जो जस्स उ आहारो, तत्तो ओमं तु जो करे।
जहन्नेणेगसित्थाई, एवं दव्वेण ऊ भवे ॥

वृ. तत्र द्रव्यत आह-यो यस्य 'तु:' पूरणे आहारो-भोजनं तत:-स्वाहारदवमम् ऊनं 'तु:' प्राग्वद् य: कुर्याद् भुञ्जान इति शेष:, अयमत्र भावार्थ: पुरुषस्य हि द्वात्रिंशत्कवलमान आहार: स्त्रियश्चाष्टाविंशतिकवलमान:, यत उक्तं -

"बत्तीसं किरकवला आहारो कुच्छिपूरओ भणिओ।
पुरिसस्स महिलियाए अट्ठावीसं भवे कवला ॥१॥
कवलाण य परिमाणं कुक्कुडिअंडगपमाणमेत्तं तु।
जो वा अविगियवयणो वयणंमि छुहिज्ज वीसत्थो ॥२॥"

ततश्चैतन्मानादूनं यो भुंक्ते यत्तदोर्नित्यमभिसम्बन्धात्तस्य 'एवम्' अमुना प्रकारेण 'द्रव्येण' उपाधिभूतेन भवेदिति सणटङ्क:, अवमौदार्यमिति प्रक्रम:, एतच्च जघन्येनैकसिक्थु-यत्रैकमेव सिक्थु भुज्यते तदादि, आदिशब्दात्सिक्थुद्वयादारभ्य यावदेककवलभोजनम्, एवं चाल्पाहारो-ऽयमवमौदार्यमाश्रित्योच्यते, यत: उपार्द्धादिषु तेषु कवलनवकादिमानमेवैतत्, तथा च सम्प्रदाय:-"अप्पाहारोमोयरिया एक्ककवलाहारोमोयरिया उक्कोसा सेसा अजहन्नुक्कोसा, अवड्ढ-हारोमोयरिया जहन्निया नवकवला उक्कोसेणं बारस सेसा अजहन्नमणुक्कोसा" इत्यादि, एतद्भेदाभिधायिनी चेयं गाथा-

"अप्पाहार १ अवड्ढे २ दुभाग ३ पत्ता ४ तहेव किंचूणा ५।
अट्ठ १ दुवालस २ सोलस ३ चउवीस ४ तहेक्कतीसा य ॥१॥"

मू. (१२०४) गामे नगरे तह रायहानिनिगमे य आगरे पल्ली।

खेडं कव्वडदोणमुहपट्टणमडंबसंवाहे ॥

वृ. क्षेत्रावमौदर्यमाह-प्रसरंति गुणान् गम्यो वाऽष्टादशानां करणमिति ग्रामस्तस्मिन्, नामत्र करोऽस्तीति नकरं तस्मिन्, तथा राजाऽनया धीयत इति राजधानि-राज्ञः पीठिकास्थानमित्यर्थः, निगमयन्ति तस्मिन्नेकविधभाण्डानीति निगमः प्रभूततरवणिजां निवासोऽनयोः समाहारस्तस्मिंश्च, आकुर्वन्ति तस्मिन्नित्याकरो-हिरण्याद्युत्पत्तिस्थानं तस्मिन्, 'पल्लि'त्ति सुव्यत्ययात् पाल्यन्तेऽनया दुष्कृतविधायिनो जना इति पल्ली, नैरुक्ता विधिः, वृक्षगहनाद्याश्रितः प्रान्तजननिवासस्तस्यां, खेट्यन्ते-उत्रास्यन्तेऽस्मिन्नेव स्थितैः शत्रव इति खेटं-पांशुप्राकारपरिक्षिप्तम्, उक्तं हि-"खेडं पुण होइ धूलिपायारं" तस्मिन्, कर्बटं-कर्बटजनावासः, कुनगरमित्यर्थः, द्रोण्योनावो मुखमस्येति द्रोणमुखं-जलस्थलनिर्गमप्रवेशं यथा भृगुकच्छं ताम्रलिप्तिर्वा, पत्तन्ति तस्मिन् समस्तदिग्भ्यो जनाइति पत्तनं, तच्च जलपत्तनं यज्जलमध्यमवर्त्ती, यथा काननद्वी,: स्थलपत्तनं च निर्जलभूभागभावि यथा मथुरा, 'मडंब'त्ति देशीपदं यस्य सर्वदिक्ष्वर्द्धतृतीययोजनान्तरादिभिः [illegible]न्ति, संबाधिता भूरि बाह्यतोऽस्मिन् जना इति संबाधः-प्रभूतचातुर्वर्ण्यनिवासः, कर्बटादीनां चात्र समाहारद्वन्द्वस्तस्मिन्।

मू.(१२०५) आसमपए विहारे संनिवेसे समायघोसे य।
थलिसेणाखंधारे सत्थे संवट्ट कोट्टे य॥

वृ. आ-सम्मात् श्राम्यन्ति-तपः कुर्वन्त्यस्मिन्नित्याश्रमः- तापसावसथादिस्तदुपलक्षितं पदं-स्थानमाश्रमपदं तस्मिन्, विहारो-भिक्षुनिवासो देवगृहं वा तत्प्रधानो ग्रामादिरपि विहारस्तस्मिन्, 'संनिवेशे' यातध्दिसमायातजनावासे, समाजः-पथिकसमूहः घोषो-गोकुलमनयोः समाहारे समाजघोषं तस्मिन्, 'च:' समुच्चये, स्थल्याम्-उच्चभूभागे सेना-चातुरङ्गबलसमूहः स्कन्धावारः स एवाशेषखेडाद्युतलक्षितोऽनयोः समाहारे सेनास्कन्धावारं तस्मिन, 'सार्थे' गणिमधरिमादिभृतवृषभादिसङ्घाते संवर्त्तन्ते-पिण्डीभवन्तस्मिन् भयत्रस्ता जना इति संवर्त्तस्तस्मिन्, कोट्टं-प्राकारोऽनयोः समाहारे संवर्त्तकोट्टं तस्मिन् 'च:' समुच्चये, क्षेत्रप्रस्तावादिह समाजिकादिषु च क्षेत्रमेवोपलक्ष्यते।

मू.(१२०६) वाडेसु य रत्थासु य घरेसु वा एवमित्तियं खित्तं।
कप्पइ उ एवमाई एवं खित्तेण ऊ भवे॥

वृ. 'वाडेसु'त्ति वाटेषु पाटेषु वा वृत्तिवरण्डकादिपरिक्षिप्तगृहसमूहात्मकेषु 'रथ्यासु' सेरिकासु 'गृहेषु' प्रतीतेषु, सर्वत्र वा विकल्पे, 'एव'मित्यनेन हृदयस्थप्रकारेण 'एत्तिय'न्ति 'एतावत् विवक्षातो नियतपरिमाणं क्षेत्रं 'कल्पते' उपयोगं याति पर्याटितुमिति शेषः, 'तुः' पूरणे, एवमादि, आदिशब्दाद्गृहशालादिपरिग्रहः, 'एव' मित्यमुना क्षेत्रप्राधान्यादभिग्रहग्रहणलक्षणेन प्रकारेणेति 'क्षेत्रेण' इति क्षेत्रहेतुकं 'तुः' पूरणे भवेदममौदार्यमिति प्रक्रमः॥

मू.(१२०७) पेडा य अद्धपेडा गोमुत्ति पयंगवीहिया चेव।
संबुक्कावट्टाययगंतुंपच्चागया छट्ठा॥

वृ. पुनरन्यथा क्षेत्रावमौदार्यमाह-'पेड'त्यादि, अत्र च सम्प्रदायः-"पेडा पेडिका इव चउकोणा अद्धपेडा इमीए चेव अद्धसंठिया घरपडिवाडी गोमुत्तिया वंकावलिया पयंगविही अणियया

पर्यंगुट्ठाणसरिसा 'संवुक्कावट्टं'ति शम्बूक: शङ्खस्तस्यावर्त्त: शम्बूकावर्त्तस्तद्वदावर्त्तो यस्यां सा शम्बूकावर्ता, सा च द्विविधाथत: सम्प्रदाय:-''अब्भितरसंवुक्का बाहिरसंवुक्का य, तत्थ अब्भंतरसंवुक्काए संखनाभिखेत्तोवमाए आगिइए अंतो आढवति बाहिरओ संनियट्टइ, इयरीए विवज्जयो,'' 'आयायगंतुंपच्चागय'त्ति, अत्रायतं-दीर्घं प्राञ्जलमित्यर्थ:, तथा च सम्प्राय:-''तत्थ उज्जुयं गंतूण नियट्टइ'' 'छट्ठ'त्ति षष्ठी, नन्वत्र गोचररूपत्वाद्भिक्षाचार्यत्वमेवासां तत्कथमिह क्षेत्रावमौदार्यरूपतोक्ता ?, उच्यते, अवमौदार्यं ममास्त्वित्यभिसम्बन्धिना विधीयमानत्वादवमौदार्यव्यपदेशोऽप्यदुष्ट एव, दृश्यते हि निमित्तभेदादेकत्रापि देवदत्तादौ पितृपुत्राद्यनेकव्यपदेश:, एवं पूर्वत्र ग्रामादिविषयस्योत्तरत्र कालादिविषयस्य च नैयत्यस्याभिग्रहत्वेन भिक्षाचर्यात्वप्रसङ्गे इदमेवोत्तरं वाच्यम् ॥

मू.(११०८) दिवसस्स पोरिसीणं चउण्हंपि उ जतिओ भवे कालो।
एवं चरमानो खलु कालोमाणं मुनेयव्वं ॥

वृ. कालावमौदार्यमाह-'दिवसस्य' अह्न: 'पौरुषीणां' प्रहराणां चतसृणामपि 'तु:' प्राग्वद् यावान् भवेत्कालोऽभिग्रहविषय इति शेष:, 'एव'मित्येवं प्रक्रमात्कालेन 'चरमाण'त्ति तिसुब्व्यत्ययाच्चरत: 'खलु' निश्चितं 'कालोमाण'न्ति कालेभावमत्वं प्रस्तावादुदरस्य कालात्वमत्वं, कोऽर्थ: ?-कालावमौदार्यं मुणितव्यं, कालहेतुत्वादस्येति भाव:, यदिवाऽभेदोपचारेण स एवाभिगृहीतकाले चरत्रवमौदार्यं मुनितव्य: ॥ एतदेव प्रकारान्तरेणाह-

मू.(११०९) अहवा तइयपोरिसीए, ऊणाए घासमेसंतो।
चउभागूणाए वा, एवं कालेण ऊ भवे ॥

वृ. अथवा तृतीयापौरुष्यामूनायां ग्रासम्-आहारमेषयन्-त्रिविधैषणया गवेषयन्, न्यूनत्वमेव विशेषत आह-चतुर्भागोनायां वाशब्दात्पञ्चादिभागोनायां वा तृतीयपौरुष्याम्, 'एवम्' अमुना कालविषयाभिग्रहलक्षणेन प्रकारेण चरन्नित्यनुवर्त्तते, कालने तु भवदेवमौदार्ययोगाद् यतिरप्यवमौदार्यम्, औत्सर्गिकविधिविषयं चैतत्, उत्सर्गतो हि तृतीयपौरुष्यामेव भिक्षाटनमनुज्ञातं, यदुक्तम्-''पंथो भिक्खा य तइयाए'त्ति। भावावमौदार्यमाह-

मू.(१११०) इत्थी वा पुरिसो वा अलंकियो वाऽणलंकियो वावि।
अन्नवरवयत्थो वा, अन्नयरेणं च वत्थेणं ॥

वृ. स्त्री वा पुरुषो वा 'अलकृंतो वा' कटकाद्यलङ्कारविभूषितो वा 'अनलंकृतो वाऽपि' तद्विपरीत:, तथाऽन्यतरच्च तद्वयश्च-बाल्याद्यन्यतरवयस्तत्स्थो वा, अन्यतरेण वा पट्टवाटकमयादिना 'वस्त्रेण' वाससा, लक्षणे तृतीया, सर्वत्र वा विकल्पे ॥

मू.(११११) अन्नेण विसेसेणं वन्नेणं भावमनुमुअंते उ।
एवं चरमाणा खलं भावोमोणं मुनेयव्वं ॥

वृ. 'अन्येन' विशेषान्तरादिभन्नेन 'विशेषेण' कुपितप्रहसितादिनाऽवस्थाभेदेन 'वर्णेन' कृष्णादिना प्रक्रमादन्यतरेणोपलक्षित: 'भावं' पर्यायमुक्तरूपमेवालकृंतत्वादि 'अनुमुयंते उ'त्ति तुशब्दस्यावधारण(गाथं)त्वाद्'अनुन्मुञ्चन्नेव' अत्यजन्नेव यदो दाता दास्यति ततोऽहं ग्रहीष्ये न त्वन्यथेत्युपस्कार:, एवं चरन् 'खलु' निश्चितं 'भावोमोणं' ति भावावमत्वेनापलक्षित:

प्रक्रमादुदरस्य मुणितव्यः, यद्वा सुब्व्यत्ययादेवं भरतः खलु सुब्व्यत्ययाद् भावात्रमत्वेन हेतुना मुणितव्यमात्रमौदार्यमिति प्रक्रमः ॥ पर्यवावमौदार्यमाह-

मू.(१२१२) दव्वे खित्ते काले भावंमि य आहिया उ जे भावा।
एएहिं ओमचरओ पज्जवचरओ भवे भिक्खू ॥

वृ. 'द्रव्ये' अशनादौ 'क्षेत्रे' ग्रामादौ 'काले' पौरुष्यादौ 'भावे च' स्त्रीत्वादौ 'आख्याताः' कथिताः 'तुः' पूरणे ये 'भावाः' पर्याया एकसिक्थोनत्वादयः, एतैः सर्वैरपि द्रव्यादिपर्यायैः 'ओमत्ति' अवममुपलक्षणत्वादवमौदार्यं चरति आसेवते अवमचरकः पर्यवचरको भवेद्भिक्षुः, इह च पर्यवग्रहणेन पर्यवप्राधान्यविवक्षया पर्यवावमौदार्यमुक्तम्, अथवा 'एएहिं अवमचरओ'त्ति 'एतेभ्यः' द्रव्यादिपर्यायेभ्यः 'अवमचरकः' न्यूनत्वासेवकः, किमुक्तं भवति ?- एकसिक्थोनत्वादावपि नवपुराणादिविशेषाभिग्रहवान्, एवं ग्रामपौरुषीस्त्रीत्वादिष्वपि विशिष्टाभिग्रहतः पूर्वस्मान्न्यूनत्वं भावनीयम् ।

आह-क्षेत्रावमौदार्यादिष्वप्यशनादिद्रव्यैर्नैवोदरस्यावमत्वमिति कथं द्रव्यावमौदार्यादिषां विशेषः ?. उच्यते, क्षेत्रादिहेतुकत्वस्यैव तत्र प्राधान्येन विवक्षितत्वात्, तद्विवक्षा च द्रव्यावमौदार्यस्यापि तेषु तद्धेतुकत्वात्, यदिवा यत्रापि द्रव्यतो न्यूनत्वमुदरस्य नास्ति तत्रापि क्षेत्रादिन्यूनतामपेक्ष्य क्षेत्राद्यवमौदार्याणि भण्यन्त इति प्रश्नानवकाश एवेति सूत्रैकादशकगमार्थः ॥

मू.(१२१३) अट्ठविहगोयरग्गं तु, तहा सत्तेव एसणा।
अभिग्गहा य जे अन्ने, भिक्खायरियमाहिया ॥

वृ. 'अट्ठविहगोयरग्गं'ति प्राकृतत्वाद् अष्टविधः-अष्टप्रकारोऽग्रः-प्रधान आधाकर्मादिपरिहारेण स चासौ गौरिवचरणम्-उच्चावचकुलेष्वविशेषेण पर्यटनं गोचरश्चाष्टविधाग्रगोचरः, 'तुः' उत्तरेभदापेक्षया समुच्चये, तथा सप्तैवैषणा अभिगृह्यन्त इत्यभिग्रहाः 'चः' समुच्चये ये अन्ये एतदतिरिक्ताः, ते किमित्याह-'भिक्खायरियमाहिय'त्ति सूत्रत्वेन भिक्षाचर्याविषयत्वात् भिक्षाचर्या वृत्तिसङ्क्षेपापरनामिकाऽऽख्याताः, अत्र चाष्टाग्रगोचरभेदाः पेडादय एव जम्बूकावर्त्ताया द्वैविध्याश्रयणतः तथा ऋज्व्याद्याशापरायाः प्रक्षेपात्, सप्तैषणाश्चेमाः-

"संसट्ठमसंसट्ठा उद्धड तह अप्पलेवडा चेव।
उग्गहिया पग्गहिया उज्झियधम्मा य सत्तमिया ॥"

'अभिग्रहाश्च' द्रव्यक्षेत्रकालभावविषयाः, तत्र द्रव्याभिग्रहाः- कुन्ताग्रादिसंस्थितमण्डकखण्डादि ग्रहीष्य इत्यादयः क्षेत्राभिग्रहाः-देहलीजङ्घयोरन्तर्विधाय यदि दास्यति ततो ग्राह्यमित्यादयः, कालाभिग्रहा-सकलभिक्षाचरनिवर्त्तनावसरे मया पर्यटितव्यमित्यादयः, भावाभिग्रहास्तु-हसन् रुदन् बद्धो वा यदि प्रतिलाभयिष्यति ततोऽहमादास्ये नत्वन्यथेत्येवमादय इति सूत्रभावार्थः ॥ अभिहिता भिक्षाचार्या, रसपरित्यागमाह-

मू.(१२१४) खीरदहिसप्पिमाई, पणीयं पानभोयणं।
परिवज्जणं रसाणं तु, भणियं रसविवज्जणं ॥

वृ. क्षीरं-दुग्धं दधि-तद्विकारः सर्पिः-घृतं तदादि, आदिशब्दाद् गुडपक्वान्नादिपरिग्रहः, 'प्रणीतम्' अतिबृंहकं पीयत इति पानं-खर्जूररसादि भुज्यत इति भोजनं-गलद्बिन्द्वोदनादि

अनयोः समाहारे पानभोजनं सोपस्करत्वादेषां 'परिवर्जनं' परिहरणं रसानां रस्यमानत्वेन 'तुः' पूरणे 'भणितम्' अभिहितं तीर्थकृदादिभिरिति गम्यते, रसवणिवर्जनं नाम बाह्यं तप इति सूत्रार्थः ॥

मू. (१२१५) ठाणा वीरासणाईया, जीवस्स उ सुहावहा ।
उग्गा जहा धरिज्जंति, कायकिलेसं तमाहियं ॥

वृ. स्थीयत एभिरिति स्थानानि कायावस्थितिभेदा वीरासनं-पर्यंकासनसंस्थितस्य तदपनयने तथैवावस्थानं तदादिर्येषां तानि वीरासनादिकानि, आदिशब्दाद्गोदोहिकासनादिपरिग्रहः, सूत्रत्वाल्लिङ्गव्यत्ययात्, लोप्यादुपलक्षणं चैतत्, तथाऽऽह -

"वीरासण उक्कुडुयासणाइ लोयाइओ अ विन्नेओ ।
कायकिलेसो संसारवोसमणिच्चेयहेउत्ति ॥१॥"

'जीवस्य' जन्तोः 'तुः' अवधारणे भिन्नक्रमश्च, ततः सुखावहान्येव मुक्तिसुखप्रापकत्वेन शुभावहान्येव वा 'उग्राणि' दुरनुष्ठेयतयोत्कटानि 'यथा' येन प्रकारेण 'धार्यन्ते' इत्यासेव्यन्ते गम्यमानत्वाद्यतिभिः, 'कायकिलेसं' तमाहिय'न्ति कायस्य क्लेशो-बाधनं कायक्लेशः सः 'आख्यातः' कथितस्तीर्थंकरैरिति शेषः, इह च संसार्यात्मनः कायानुगतत्वेन तत्क्लेशे यद्यप्यवश्यं क्लेशसम्भवस्तथाऽपि भावितात्मनामसौ सन्नप्यसत्सम एवेति तदनभिधानमिति सूत्रार्थः ॥

मू. (१२१६) एगंतमणावाए, इत्थीपसुविवज्जिए ।
सयणासणसेवणया, विवित्तं सयणासणं ॥

वृ. 'एगंत'मिति सुब्व्यत्ययाद् 'एकान्ते' जनसंचारानाकुले 'अनापाते' स्त्र्याद्यापातरहिते 'स्त्री-पशुविवर्जिते' तत्रैव स्थितस्त्र्यादिरहिते शून्यागारादाविति भावः 'सयणासणसेवणय'त्ति सूत्रत्वात् शयनासनसेवनं विविक्तशयनासनं बाह्यं तप उच्यत इति शेषः, उपलक्षणं चैतदेषणीय-फलकादिग्रहणस्य, तथा चानेन विविक्तचर्या नाम संलीनतोक्ता भवति, यतस्तल्लक्षमिदम् -

"आरामुज्जाणाइसु थीपसुपंडगविवज्जिए ठाणं ।
फलगाईण य गहणं तह भणियं एसनिज्जाणं ॥"

शेषसंलीनतोपलक्षणं चासौ, प्राधान्याच्चास्या एव साक्षादभिधानं, प्राधान्यं चेन्द्रियादि संलीनतोपकारित्वादस्याः, इयं चेत्थं चतुर्विधा, यत उक्तम्-

"इंदियकसायजोगे पडुच्च संलीयणा भवे चउहा ।
तह जा विवित्तचरिया पन्नत्ता वीयरागेहिं ॥"

तत्रेन्द्रियसंलनता श्रोत्रादिभिरिन्द्रियैः शब्दादिषु सुन्दरेतरेषु रागद्वेषाकरणं, कषायसंलीनता तदुदयनिरोध उदीर्णविफलीकरणं च, योगसंलीनता च मनोयोगादीनामकुशलानां निरोधः कुशलानामुदीरणमिति सूत्रार्थः ॥ उक्तमेवार्थमुपसंहरन्नुत्तरग्रन्थसम्बन्धाभिधानायाह

मू. (१२१७) एसो बाहिरगतवो, समासेण वियाहिओ ।
अब्भितरं तवं इत्तो, वुच्छामि अनुपुव्वसो ॥

वृ. 'एतत्' अनन्तरोक्तं बाह्यकं तपः समासेन व्याख्यातम्, आह -किं पुनरितो बाह्यात्तपसः फलमवाप्यते ?, उच्यते, निःसङ्गता शरीरलाघवेन्द्रियविजयसंयमरक्षणादिगुणयोगात् शुभ-ध्यानावस्थितस्य कर्मनिर्जरणमिति, अभ्यन्तरतपः 'इतः' बाह्यतपोऽभिधानादनन्तरं 'वक्ष्यामि'

अभिधास्ये 'अनुपूर्व्यसो'ति आनुपूर्व्येति सूत्रार्थः ॥ प्रतिज्ञातमाह-

मू.(१२१८) पायच्छित्तं विनओ, वेयावच्चं तहेव सज्झाओ ।
झाणं च विउस्सग्गो, एसो अब्भितरो तवो ॥

वृ. अक्षरार्थः सुगम एव, भावार्थं तु सूत्रत एवाह सूत्रकृत्-

मू.(१२१९) आलोअणारिहाईयं, पायच्छित्तं तं दसविहं ।
जे भिक्खू वहई सम्मं, पायच्छित्तं तमाहियं ॥

वृ. आलोचनं विकटनं प्रकाशनमाख्यानं प्रादुष्करणमित्यनर्थान्तरं, तदर्हत्यालोचनार्हं-यत् पापमालोचनात एव शुध्यति, उक्तं हि-

"आलोयणमरिहंति आ मज्जा लोयणा गुरुसगासे ।
जं पाव विगडिएणं सुज्झइ पच्छित्तपढमेयं ॥"

आदिशब्दात्प्रतिक्रमणार्हादिपरिग्रहः, इह पुनरुपचारादेवंविधपापविशुद्धयुपायभूतान्या-लोचनादीन्येवालोचनार्हादिशब्देनोक्तानि, उपचारनिमित्तं चात्र विषयविषयिभावः, एवंविधानि हि पापान्यालोचनादीनां विषय आलोचनादीनि च विषयीणीति भावनीयं, तथा चान्यत्र 'आलो-यणपडिक्कमणं'त्यादिनाऽर्हशब्दं विनैव तद्भेदाभिधानं, तदेवंविधमालोचनार्हमादिर्यस्य तदालोचनार्हादिकं, 'शेषाद्विभाषे'ति कप्रत्ययः, 'प्रायश्चित्तम्' उक्तनिरुक्तं 'तुः' अवधारणे भिन्नक्रमश्च, ततः 'दशविधमेव' दशप्रकारमेव, दशविधत्वं चेत्थम्-

"आलोयण पडिक्कमणे मीस विवेगे तहा विउस्सग्गे ।
तव छेय मूल अणवट्ठया य पारंचिए चेव ॥"

'जइ'त्ति आर्षत्वाद् यदि भिक्षुः 'वहति' आसेवते 'सम्यग्' अवैपरीत्येन प्रायश्चित्तं तदाख्या-तम् ॥ विनयमाह-

मू.(१२२०) अब्भुट्ठाणं अंज(णंज)लिकरणं, तहेवासणं दायणं ।
गुरुभत्तिभावसुस्सूसा, विनओ एस वियाहिओ ॥

वृ. अभ्युत्थानमञ्जलिकरणमुभयमपि प्रतीतं 'तथे'ति समुच्चये 'एवे'ति पूरणे 'आसन दायणं'ति सूत्रत्वादासनदानं पीठादिदानमित्यर्थः, गुरूणां-गौरवार्हाणां भक्तिर्गुरुभक्तिः, भावः अना:करणं तेन शुश्रूषा-तदादेशं प्रति श्रोतुमिच्छा पर्युपासना वा भावशुश्रूषा, विनय एव व्याख्यातः ॥ वैयावृत्त्यमाह-

मू.(१२२१) आयरियमाईयंमि, वेयावच्चे य दसविहे ।
आसेवणं जहाथामं, वेयावच्चं तमाहियं ॥

वृ. 'आयरियमाइ'त्ति मकारोऽलाक्षणिकस्ततः 'आचार्यादिके' आचार्य(यादि) विषये व्यापृतभावो वैयावृत्त्यम्-उचिताहारादिसम्पादनम्, उक्तञ्च-

"वेयावच्चं वावडभावो तह धम्मसाहणनिमित्तं ।
अन्नाइयाण विहिणा संपाडणमेस भावत्थो ॥"

तस्मिन् 'दशविधे' दशप्रकारे, दशविधत्वं चाचार्यादिविषयभेदाद्, उक्तं हि-

"आयरिय १ उवज्झाय २ थेर ३ तवस्सी ४ गिलाण ५ सेहाणं ६ ।

साहम्मिय ७ कुल ८ गण ९ संघ १० संगयं तमिह कायव्वं ॥''

'आसेवनम्' एतद्विषयमनुष्ठानं 'यथास्थानं' स्वसामर्थ्यनतिक्रमेण वैयावृत्त्यं तदाख्यातमिति ३ ॥ स्वाध्यायमाह -

मू.(१२२२) वायणा पुच्छणा चेव, तहेव परियट्टणा।
अनुप्पेहा धम्मकहा, सज्झाओ पंचहा भवे ॥

वृ. 'वायणे'त्यादि प्राग्व्याख्यातप्रायमेव ४ ॥ सम्प्रति ध्यानमाह-

मू.(१२२३) अट्टरुद्दाणि वज्जित्ता, झाईज्जा सुसमाहिए।
धम्मसुक्काइं झाणाइं, झाणं तं तु बुहा वए ॥

वृ. ऋतं दुःखम्, उक्तं हि ''ऋतशब्दो दुःखपर्यायवाच्याश्रीयते'' ऋते भवमार्त्तं, तथा रोदयत्यपरानिति रुद्रः-प्राणिवधादिपरिणत आत्मैव तस्येदं कर्मरौद्रम, आर्तं च रौद्रं च आर्तरौद्रे, प्राकृतत्वाच्च बहुवचननिर्देशः, 'वर्जयित्वा' हित्वा ध्यायेत्सुसमाहितः प्राग्वत्, किमित्याह - धर्मः-क्षमादिदशलक्षणस्तस्मादनपेतं धर्म्यं शुक्लं शुचि-निर्मलं सकलमपि ध्यात्वादिमल-विलयनात् यद्वा शुगिति-दुःखमष्टप्रकारं वा कर्म ततः शुचं क्लमयति-निरस्यतीति शुक्ल मनयोर्द्वन्द्वस्ततः धर्म्यशुक्लध्याने स्थिराध्यवसानरूपे, उक्तं हि-''जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं''त्ति, 'ध्यानं' ध्यानाख्यं तपस्तत् तुशब्दस्यैवकारार्थत्वात्तदेव बुधाः 'वदन्ति' ॥ अधुना व्युत्सर्गमाह-

मू.(१२२४) सयनासन ठाणे वा, जे उ भिक्खू न वावरे।
कायस्स विउस्सग्गो, छट्ठो सो परिकित्तिओ ॥

वृ. शय्यत इति शयनं-संस्तारकादौ तिर्यक् शरीरनिवेशनं तत्रासनम् उपवेशनं तस्मिन्, उभयत्र सूत्रत्वात्सुपोर्लुक् 'स्थाने' ऊर्ध्वस्थाने 'वा' विकल्पे प्रत्येकं च योज्यते, स्वशक्त्यपेक्षं स्थित इति गम्यते, यस्तु भिक्षुः 'न वावरे'त्ति 'न व्याप्रियते' न चलनादिक्रियां करुते, यत्तदो नित्याभिसम्बन्धादर्थवशाद् विभक्तिपरिणामतश्च तस्य भिक्षोः 'कायस्य' शरीरस्य 'व्युत्सर्गः' चेष्टां प्रति परित्यागो यः 'छट्ठो सो परिकित्तितो'त्ति सूत्रत्वाल्लिङ्गव्यत्यये षष्ठं 'तत्' प्रक्रमादभ्यन्तरं तपः 'परिकीर्त्तितं' तीर्थंकरादिभिरुक्तं, शेषव्युत्सर्गोपलक्षणं चैतद्, अनेक-विधत्वात्तस्य,

''दव्वे भावे य तहा दुविधुस्सग्गो चउव्विहो दव्वे।
गणदेहोवहिभत्ते भावे कोहा इचातोत्ति ॥''

इति सूत्रषट्कार्थः ॥ सम्प्रत्यध्ययनार्थमुपसंहरन्नस्यैव फलमाह-

मू.(१२२५) एवं तवं तु दुविहं, जं सम्मकआयरे मुनी।
से खिप्पं सव्वसंसारा, विप्पमुच्चइ पंडिए ॥ त्तिबेमि ॥

वृ. 'एतत्' अनन्तरोक्तस्वरूपं 'तवं तु दुविहं'ति तपः द्विविधमपि उक्तभेदतो द्विभेदमपि यः सम्यक् 'आचरेत्' आसेवते मुनिः स क्षिप्रं 'सर्वसंसारात्' चतुर्गतिरूपात् 'विप्रमुच्यते' पृथग् भवति पण्डितः, पठन्ति च-'सो खवेत्तु रयं अरओ, नीरयं तु गइं गए' इह च 'आयरे'त्ति तिव्यत्ययादाचारीत्, अतीतनिर्देशश्च भूतभविष्यतोरप्युपलक्षणं, कालत्रयेऽपि तुल्यमाहात्म्यत्वादस्यैतत्क्षेत्रापेक्षा(क्षया) वेति सूत्रार्थः ॥ 'इति' परिसमाप्तौ, ब्रवीमिति पूर्ववत् ।

इत्यवसितोऽनुगमो, नयाश्च प्राग्वत् ॥

अध्ययनं ३० समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
त्रिंशत्तममध्ययनं सनिर्युक्तिकं सटीकं परिसमाप्तम्

अध्ययनं-३१-चरणविधिः

वृ. व्याख्यातं त्रिंशत्तममध्ययनम्, अधुनैकत्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने तप उक्तम्, इह तु तच्चरणवत एव सम्यग् भवतीति चरणमुच्यते इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य पूर्ववदुपक्रमादिद्वारचतुष्टयप्ररूपणा तावद्यावन्नामनिष्पन्ने निक्षेपे चरणविधिरिति नाम, अतश्चरणविधिशब्दनिक्षेपायाह निर्युक्तिकृत्-

नि. [५१९] निक्खेवो चरणंमि(मी) चउव्विहो दुविहो य होइ दव्वंमि ।
आगमनोआगमओ नोआगमओ य सो तिविहो ॥

नि. [५२०] जाणगसरीरगविए तव्वतिरित्ते य गइभिक्खमाईसुं ।
आचरणे आचरणं भावाचरणं तु नायव्वं ॥

नि. [५२१] निक्खेवो उ विहीए चउव्विहो दुविहो य होइ दव्वंमि ।
आगमनोआगमओ नोआगमओ य सो तिविहो ॥

नि. [५२२] जाणगसरीरभविए तव्वतिरित्ते य इंदियत्थेसुं ।
भावविही पुन दुविहा संजमजोगो तवो चेव ॥

वृ. गाथाचतुष्टयं स्पष्टमेव, नवरं 'तव्वइरित्ते य'त्ति तद्व्यतिरिक्तं च गतिभिक्षादिषु गतिः-गमनं भिक्षा-भक्षणं, पठ्यते च 'चर गतिभक्षणयोः' इति, आदिशब्दादासेवणपरिग्रहः, उक्तं हि-"चरतिरासेवायामपि वर्त्तते" इति, तत एतेषु सत्सु प्रक्रमाद्द्रव्यमेव सुब्व्यत्ययेन गत्यादयो वा भावचरणकार्याकरणत्वेन तद्व्यतिरिक्तद्रव्यचरणं, तथा 'आचरणे' प्रस्तावाज्ज्ञानाद्याचारे 'आचरणम्' अनुष्ठानं सिद्धान्ताभिहितं 'भावे' विचार्ये चरणं 'तुः' विशेषणे ज्ञातव्यमिति ॥

तथा 'इंदियत्थेसु'न्ति इन्द्रियाणि-स्पर्शनादीनि तेषामर्थाः-स्पर्शादयस्तेषु प्रक्रमाद् यः 'विधिः' अनुष्ठानमासेवनमितियावत्, अस्यापि द्रव्यत्वं भावविधिफलासाधकत्वेन द्रव्यप्राधान्यविवक्षया वा, भावविधिः पुनः 'द्विविधः' द्विप्रकारः, द्वैविध्यमाह-'संयमयोगः' संयमव्यापारः 'तपश्चैव' अनशनाद्यनुष्ठानरूपं, चरणासेवनं ह्यत्र भावविधिः, स चैवंविध एवेति गाथाचतुष्टयार्थः ॥ सम्प्रति येनेह प्रकृतं तदुपदर्शयन्नुपदेशमाह

नि. [५२३] एगयं तु भावचरणे भावविहीए अ होइ नायव्वं ।
चइऊण अचरणविहिं चरणविहीए उ जइयव्वं ॥

वृ. निगदसिद्धा, नवरं, भावचरणेन' प्रस्तावाच्चारित्राचारानुष्ठानेन 'अचरणविधिम्' अनाचारानुष्ठानं त्यक्त्वा 'चरणविधौ' उक्तरूपे 'यतितव्यं' यत्नो विधेय इति गाथार्थः ॥

मू.(१२२६) *चउणविहिं पवक्खामि, जीवस्स उ सुहावहं ।*
जं चरित्ता बहू जीवा, तिन्ना संसारसागरं ॥

वृ. चरणस्य विधिः आगमोक्तन्यायः चरणविधिरतं प्रवक्ष्यामि जीवस्य 'नः' अवधारणे भिन्नक्रमस्ततः 'सुहावहं'ति सुखावहमेव शुभावहमेव वा, एष नेतादेवं तथा फलोपदर्शनद्वारेणाह-यं 'चरित्वा' आसेव्य बहवो जीवाः 'तीर्णाः' अतिक्रान्ताः 'संसारसागरं' भवसमुद्रं मुक्तिमवाप्ता इत्यभिप्राय इति सूत्रार्थः ॥

मू.(१२२७) एगओ विरइं कुज्जा, एगओ अपवत्तणं।
असंजमे नियत्तिं च, संजमे य पवत्तणं ॥

वृ. तत्र च 'एकतः' एकस्मात् स्थानाद् विरतिं विरमणमुपरममितियावत् 'कुर्यात्' विदध्यात् 'एकतश्च' एकस्मिंश्च, आद्यादित्वात्सप्तम्यन्तात्तसिः, 'चः' समुच्चये भिन्नक्रमः, प्रवर्त्तनं च कुर्यादिति सम्बन्धः । एतदेव विशेषत आह-'असंयमात्' हिंसादिरूपात् पञ्चम्यर्थे सप्तमी 'निवृत्तिं च' परिहाररूपां 'संयमे' उक्तरूपे चस्य भिन्नक्रमत्वात्प्रवर्त्तनं च कुर्यादित्यनुवर्त्तते, चशब्दादुभयत्र परस्परापेक्षया समुच्चये।

मू.(१२२८) रागद्दोसे य दो पावे, पावकम्मपवत्तणे।
जे भिक्खू रुंभई निच्चं, से न अच्छइ मंडले ॥

वृ. तथा 'रागद्वेषौ' उक्तरूपौ 'चः' पूरणे 'द्वौ' द्विसङ्ख्यौ, एतदभिधानं च प्राकृते द्वित्वबहुत्वयोः संदिग्धत्वाद् उक्तार्थानामप्यपूपौ द्रावानयेत्यादिवल्लोके प्रयोगदर्शनाच्च, 'पापौ' कोपादिपापप्रकृतिरूपत्वात् पापकर्माणि-मिथ्यात्वादीनि प्रवर्त्तयतो-जनयत इति पापकर्मप्रवर्त्तकौ यः 'भिक्षुः' तपस्वी 'रुणद्धि' उदयस्य कथञ्चिदुदितयोर्वा प्रसरस्य निराकरणतस्तिरस्करुते 'नित्यं' सदा सः 'नास्ते' न तिष्ठति मण्डले, पठन्ति च-'से न गच्छइ मंडले'त्ति 'न' नैव 'गच्छति' याति भ्राम्यतीति योऽर्थः, उभयत्र च मण्डलशब्दस्य वृद्धव्याख्या-मण्डलग्रहणाच्चतुरन्तः संसारः परिगृह्यते, मुक्तिपदप्राप्तिस्त्रात्र हेतुः, एवमुत्तरत्र सूत्रेष्वपि नित्यमित्यादि

मू.(१२२९) दंडाणं गारवाणं च, सल्लाणं च तियं तियं।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. दण्ड्यते-चारित्रैश्वर्यापहारतोऽसारीक्रियते एभिरात्मेति दण्डा-दुष्प्राणिहितमानसादिरूपा मनोदण्डादयः, उक्तं हि-

"जह लोए दंडिज्जइ दव्वं हीरइ य वज्झए यावि।
इय दंडंतऽप्पाणं मणमाई दुप्पणिहिएहिं ॥"

तेषां 'त्रिकं' मनोदण्डवाग्दण्डकायदण्डरूपं, तथा गुरुः-लाभाभिमानाध्मातचित्त आत्मैव तद्भावात्तस्य वैतान्यध्यवसानानि गौरवाणि तेषां 'त्रिकं' ऋद्धिगौरवरसगौरवसातगौरवात्मकं, तथा शल्यते-अनेकार्थत्वाद्बाध्यते जन्तुरेभिरिति शल्यानि तेषां च 'त्रिकं' मायाशल्यनिदानशल्यमिथ्यात्वात्मकम्, उभयत्र 'चः' समुच्चये, त्रिकं त्रिकमिति च प्रत्येकं त्रैविध्याभिधानतो व्याख्यातमेव, यो भिक्षुः 'त्यजति' वर्जयति।

मू.(१२३०) दिव्वे य जे उवस्सग्गे, तहा तेरिच्छमानुसे।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. दिव्यांश्चहास्यप्रद्वेषविमर्शपृथग्विमात्राभिर्देवविहितान् उप-सामीप्येन सृज्यन्तेदेवादि-

भिरुत्पाद्यन्त इत्युपसर्गाःरितान्, तथा 'तैरिच्छमाणुसे'त्ति तिरश्चामेते भयप्रद्वेषाहारहेत्वपत्यस्वजन-संरक्षणहेतोस्तैः क्रियमाणत्वात्तैरश्चाः तथा मानुषाणामेते हासप्रद्वेषविमर्शकुशीलप्रतिसेवनात्मकनिमित्ततस्तैर्विधीयमानत्वान्मानुषकाश्च तैरश्चमानुषकास्तान् उपलक्षणत्वात्पूर्वत्र चशब्दस्यानुक्तसमुच्चयार्थत्वाद्वा ऽऽत्मसंवेदनीयांश्च घट्टनप्रपतनस्तम्भनश्लेषणोद्भवान् यो भिक्षुः 'सहते' सम्यगध्यास्ते।

मू.(१२३१) विगहाकसायसन्नाणं, झाणाणं च दुयं तहा।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. विरुद्धा विरूपा वा कथा विकथा, सा च स्त्रीभक्तजनपदनृपतिभेदतश्चतुर्धा, कषायाः क्रोधमानमायालोभाः सञ्ज्ञा-आहारभयमैथुनपरिग्रहाख्याः, एषां कृतद्वन्द्वानां प्रत्येकं चतुष्कमिति शेषः, 'झाणाणं च'त्ति प्राकृतत्वाद् ध्यानयोश्च द्विकमार्तरौद्ररूपं तथा यभिक्षुः 'वर्जयति' परिहरति, चतुर्विधत्वाच्च ध्यानस्यात्र प्रस्तावेऽभिधानम्, ।

मू.(१२३२) वएसु इंदियत्थेसु, समिईसु किरियासु य।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. 'व्रतेषु' हिंसाऽनृतस्तेयाब्रह्मपरिग्रहविरतिलक्षणेषु 'इन्द्रियार्थेषु' शब्दरूपरसगन्धस्पर्शेषु 'समितिषु' समित्यध्ययनाभिहितासु च क्रियासु-कायिक्याधिकरणिकीप्राद्वेषिकीपारितापनिकीप्राणातिपातरूपासु, पठन्ति च 'समीतीसु य तहेव य'त्ति, अत्र च चशब्दात्क्रियासु चेति यो भिक्षुः 'यतते' यत्नं कुरुते यथावत्परिपालनातो व्रतसमितिषु माध्यस्थ्यविधानतश्चेन्द्रियार्थेषु परिहारतश्च क्रियासु।

मू.(१२३३) लेसासु छसु काएसु, छक्के आहारकारणे।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. 'लेश्यासु' वक्ष्यमाणरूपासु 'षट्सु कायेषु' पृथिव्यादिषु वक्ष्यमाणेष्वेव 'षट्के' षट्परिमाणे 'आहारकारणे' वेदनादावुक्तरूपे यो भिक्षुः 'यतते' यथायोगं निरोधोत्पादनरक्षानुरोधविधानेन यत्नं कुरुते।

मू.(१२३४) पिंडुग्गहपडिमासुं, भयट्ठाणेसु सत्तसु।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. 'पिण्डावग्रहप्रतिमासु' आहारग्रहणविषयाभिग्रहरूपासु संसृष्टादिष्वनन्तराध्ययनोक्तासु सप्तस्विति संबध्यते, तथा 'भयस्थानेषु' भयस्य-भयमोहनीयसमुत्थात्मपरिणामस्योत्पत्तिनिमित्ततयाऽऽश्रयेषु इहलोकादिषु प्रागुक्तरूपेषु 'सप्तसु' सप्तसङ्ख्येषु यो भिक्षुः 'यतते' एकत्र तु पालनातोऽन्यत्र तद्वशेन भयाकरणतः।

मू.(१२३५) मएसु बंभगुत्तीसु, भिक्खुधम्मंमि दसविहे।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. मदा-जातिमदादयः प्रागभिहिता अष्टौ तेषु, प्रतीतत्वाच्चेहान्यत्र च सूत्रे सङ्ख्यानभिधानं, ब्रह्म-ब्रह्मचर्यं तस्य गोपनं गुप्तिर्यकाभिस्ता ब्रह्मगुप्तयो गमकत्वाद्बहुव्रीहिस्तासु वसत्यादिषु नवसु, उक्तं च

"वसहिकहनिसिज्जिंदिय कुड्डंतरपुव्वकीलियपणीए।
अतिमायाहारविभूसणा य नव बंभगुत्तीओ ॥"

भिक्षुधर्मे 'दशविधे' क्षान्त्यादिभेदतो दशप्रकारे प्रागुक्त एव यो भिक्षुर्यतते यथावत्परिहारासेवनपरिपालनादिभिः।

मू.(१२३६) उवासगाणं पडिमासु, भिक्खूणं पडिमासु य।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. उपासते-सेवन्ते यतीनित्युपासकाः- श्रावकास्तेषां 'प्रतिमासु' अभिग्रहविशेषरूपास्वेकादशसु दर्शनादिषु, उक्तं हि-

"दंसणवयसामाइय पोसहपडिमाअबंभसचित्ते।
आरंभपेसउद्दिट्ठवज्जए समणभूए य ॥"

'भिक्षूणां' यतीनां 'प्रतिमासु च' मासिक्यादिषु द्वादशसु, यत आगमः-

"मासाई सत्तंता पढमाबितइयसत्तराइदिना।
अहराइएगराई भिक्खुपडिमाण बारसगं ॥"

यो भिक्षुर्यतते यथावत्परिज्ञोपदेशपालनादिभिः।

मू.(१२३७) किरियासु भूयगामेसु, परमाहम्मिएसु य।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. क्रियन्ते मिथ्यात्वादिक्रोडीकृतैर्जन्तुभिरिति क्रियाः-कर्मबन्धनिबन्धनभूताश्चेष्टास्तास्वर्थानर्थादिभेदतस्त्रयोदशसु, तथा चागमः-

"अट्ठाणट्ठाहिंसाऽकम्हा दिट्ठी य मोसऽदिन्ने य।
अज्झत्थमाणमेत्ते मायालोभेरियावहिया ॥"

अभूवन् भवन्ति भविष्यन्ति चेति भूतानि-प्राणिनस्तेषां ग्रामाः-सङ्घाता भूतग्रामास्तेष्वेकेन्द्रियसूक्ष्मेतरादिभेदतश्चतुर्दशसु, उक्तं हि-

"एगिंदिय सुहुमियरा सन्नियरा पणिंदिया सबितिचउ।
पज्जत्तापज्जत्तगभेएणं चोद्दसग्गामा ॥"

धर्मेण चरन्ति धार्मिका ये न तथा तेऽधार्मिकाः परमाश्च ते सकलाधार्मिकप्रधानतयाऽधार्मिकाश्च परमाधार्मिकाः-अत्यन्तसंक्लिष्टचेतसोऽम्बादयस्तेषु, ते च पञ्चदश, यत उक्तम्-

"अंबे १ अंबरिसी २ चेव, सामे ३ सबलेत्ति ४ आवरे।
रुद्दो ५ वरुद्द ६ काले य ७, महाकालेत्ति आवरे ८ ॥१॥
असिपत्ते ९ धनु १० कुंभे ११, वालू १२ वेयरणी इय १३।
खरस्सरे १४ महाघोसे १५, एए पन्नरसाहिया ॥२॥"

तेषु यां भिक्षुर्यतते यथाक्रमं परिहाररक्षापरिज्ञानादिभिः।

मू.(१२३८) गाहासोलसएहिं, तहा अस्संजमंमि अ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. गीयते-शब्द्यते स्वपरसमयस्वरूपमस्यामिति गाथा-सूत्रकृताङ्गस्य षोडशमध्ययनम्,

उक्तं हि 'गाहासोलसमं होइ अज्झयणं' ततश्च गाथाध्ययनं षोडशं येषु तानि गाथाषोडशकानि 'शेषादिभाषे'ति कप्, सुब्व्यत्ययात्तेषु समयादिषु सूत्रकृताध्ययनेषु, उक्तञ्च-

"समओ १ वेतालीयं २ उवसग्गपरिन्न ३ थीपरिन्ना य ४ ।
निरयविभत्ती ५ वीरत्थओ य ६ कुसीलाण परिभासा ७ ॥१॥
वीरिय ८ धम्म ९ समाहि १० मग्ग ११ समोसरण १२ अहतहं १३ गंथो १४ ।
यमदीयं १५ तह गाहा १६ सोलसमं होइ अज्झयणं ॥२॥"

तथा संयमनं संयमो न संयमो ऽसंयमः स च सप्तदशभेदः पृथिव्यादिविषयः, तथात्वं चास्य तत्प्रतिपक्षस्य संयमस्य सप्तदशभेदत्वात्, यदुक्तम्

"पुढविदगअगनिमारुयवनप्फतीबितिचउरपणिंदिअजीवे ।
पेहोपेहपमज्जणपरिट्ठवणमणोवईकाए ॥"

तस्मिंश्च यो भिक्षुर्यतते एकत्र तदुक्तानुष्ठानतो ऽन्यत्र तु परिहारतः ।

मू.(१२३९) बंभंमि नायज्झयणेसु, ठाणेसु य ऽसमाहिए ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. 'ब्रह्मणि' ब्रह्मचर्ये ऽष्टादशभेदभिन्ने, उक्तं हि-

"ओरालियं च दिव्वं मणवयकाएण करणजोएणं ।
अनुमोयणकारावणकरणाण ऽट्ठारसाबंभं ॥२॥"

ज्ञातानि-उदाहरणानि तत्प्रतिपादकान्यध्ययनानि ज्ञाताध्ययनानि तानि चोत्क्षिप्तज्ञातादीन्येकान्नविंशतिस्तेषु, यदुक्तम्-

"उक्खित्तणाए १ संघाडे २, अंडे ३ कुम्मे ४ सेलए ५ ।
तुंबे य ६ रोहिणी ७ मल्ली ८, मायंदी ९ चंदिमा इय १० ॥१॥
दावद्दए ११ उदगणाए १२, मंडुक्को १३ तेयली इय १४ ।
नंदीफले १५ अवरकंका १६, आइन्ने १७ सुंसु १८ पुंडरिए १९ ॥"

'स्थानेषु' आश्रयेषु कारणेष्वितियावत् कस्येत्याह-समाधिः-समाधानं ज्ञानादिषु चित्तैकाग्र्यं न समाधिरसमाधिस्तस्य, तानि च द्रुतं द्रुतं गमनादीनि विशेषतः, तथा च समवायाङ्गम्-"वीसं असमाहिट्ठाणा पन्नत्ता, तंजहा-दवदवचारी यावि भवति १ अपमज्जचारी आवि भवति २ दुप्पमज्जियचारी भावि भवति ३ अतिरित्तसेज्जासणिए ४ रायणियपरिभासी ५ थेरोवघातिए ६ भूतोवघातिए ७ संजलणे ८ कोहणे ९ पिट्ठिमंसिए १० अभिक्खणं ओहारइत्ता भवति ११ नवाणं अहिगरणाणं अनुप्पन्नाणं उप्पाएत्ता भवति १२ पोराणाणं अहिगरणाणं खामियविओसवियाणं पुनोदीरिता भवति १३ ससरक्खपाणीपाए १४ अकालसज्झायकारए यावि भवति १५ सद्दकरे १६ कलहकरे १७ झंझकरे १८ सूरप्पमाणभोई १९ एसणाअसमिई यावि भवति २० ॥" य भिक्षुर्यतते रक्षापरिज्ञानपरिहारादिभिः ।

मू.(१२४०) इक्कवीसाए सबलेसु, बावीसाए परीसहे ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. एकविंशतौ शबलेषु-कर्बुरीकुर्वन्त्यतीचारकलुषीकरणतश्चारित्रमिति शबलाः-

क्रियाविशेषास्तेषु, तथा चाह-

"अवराहंमि पयणुगे जेन य मूलं न वच्चए साहू।
सबलेंति तं चरित्तं तम्हा सबलत्ति णं भणियं ॥

तानि च हस्तकर्मादीन्येकविंशतिः, तथा चागमः-

"तं जह उ हत्थकम्मं कुव्वंते १ मेहुणं च सेवंते २।
राइं च भुजमाणे ३ आहाकम्मं च भुंजए ४ ॥१॥
तत्तो य रायपिंडं ५ कीयं ६ पामिच्च ७ अभिहडं ८ऽच्छेज्जं ९।
भुंजंतु सबले ऊ २ पच्चक्खिताभिक्खभुंजंते १० ॥२॥
छम्मासऽब्भंतरओ गणा गणं संकमं करेंते य ११।
मासब्भंतर तिन्नि य दगलेवा ऊ करेमाणे ॥३॥
मासब्भंतरओ या माइट्ठाणाइं तिन्नि कुणमाणे १२।
पाणातिवायआउट्टि कुव्वन्त १३ मुसं वयंते य १४ ॥४॥
गिण्हंते य अदिन्नं १५ आउट्टियं तह अनंतरहियाए।
पुढवीए ठाणसेज्जाणिसीहियं वावि चेएति १६ ॥५॥
एवं ससिनिद्धाए ससरक्खाए चितमन्तसिललेलू।
कोलावासपइट्ठा कोल धुणा तेसि आवासे १७ ॥६॥
संडसपाणसबीए जाव उ सन्ताएण भवे तहियं।
ठाणादिचेयमाणे सबले आउट्टियाए उ १८ ॥७॥
आउट्टिमूलकन्दे पुप्फे य फले य बीय हरिए य।
भुंजंते सबले ऊ १९ तहेक संवच्छरस्संतो ॥८॥
दस दगलेवे कुव्वंत माइट्ठाणा दस य वरिसंतो २०।
आउट्टियसीओ दगवारधारियहत्थमत्ते य ॥९॥
दव्वीए भायनेण य दिज्जन्तं भत्तपाण घेत्तूणं।
भुंजइ सबलो एसो, इगविसो होइ नायव्वो ॥१०॥

'बावीसपरीसह'त्ति द्वाविंशतौ 'परीषहेषु' परीषहाध्ययनेनाभिहितस्वरूपेषु यो भिक्षुर्यतते परिहारादि(धि)सहनादिभिः।

मू.(१२४१) तेवीसईसुयगडे, रूवाहिएसु सुरेसु य।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. त्रिभिरधिका विंशतिस्त्रयोविंशतिः, 'त्रयस्त्रयश्चे'ति त्रयसादेशः, तत्सङ्ख्याध्ययनयोगात्त्रयोविंशतिसूत्रकृत तस्मिन्, त्रयोविंशतिसूत्रकृताध्ययनानि च पुण्डरीकादीनि सप्त षोडश च समयादीनि, तथा चाह-

"पुंडरीय १ किरियठाणं २ आहारपरिन्ना ३ पच्चक्खाणं ४ च।
अनगार ५ अद्द ६ नालंद ७ सोलसाइं च तेवीसं ८ ॥"

तथा रूपम्-एकस्तेनाधिका: प्रक्रमात्सूत्रकृताध्ययनेभ्यो रूपाधिकाश्चतुर्विंशतिरित्यर्थस्तेषु, केषु ? इत्याह-सुरेषु, पठन्ति च-देवेषु, तत्र च दीव्यन्ति-क्रीडन्तीति देवा-भवनपत्यादयस्तेषु, यदिवा दीव्यन्ते, स्तूयन्ते जगत्त्रयेणापीति देवा:- अर्हन्तस्तेषु ऋषभादितीर्थंकरेषु, उक्तं हि

"भवणवणजोइवेमाणिया य दस अट्ठ पंच एगविहा।
इति चउवीसं देवा केई पुन वेंति अरहंता ॥"

यो भिक्षुर्यतते यथावत्प्ररूपणादिना।

मू.(१२४२) पणवीसा भावनाहिं च, उद्देसेसु दसाइणं।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. 'पणवीसं'त्ति 'पञ्चविंशतौ' पञ्चविंशतिसङ्ख्यासु 'भावणाहिं'ति भाव्यन्त इति भावना:, ताश्चेह महाव्रतविषया ईर्यासमितियत्नादय: परिगृह्यन्ते, सुब्व्यत्ययात्तासु, उक्तं हि-"पणवीसं भावनाओ पन्नत्ताओ, तं०-इरियासमिति १ मनगुत्ती २ वयगुत्ती ३ आलोइऊण पानभोयणं ४ आयाणभंडनिक्खेवणासमिई ५, अनुवीइभासणया १ कोहविवेगे २ लोहविवेगे ३ भयविवेगे ४ हासविवेगे ५, उग्गहमणुन्नवणया १ उग्गहसीमं जाननया २ सयमेव उग्गहं अनुन्नविय परिभुंजणया ४ साहारणभत्तपाणं अनुन्नविय परिभुंजणया ५, इत्थिपसुपंडयसंसत्तसयणासणवज्जणया १ इत्थिकहविवज्जणया २ इत्थीणं इंदियाणि आलोयणवज्जणया ३ पुव्वरय-पुव्वकीलियाणं विसयाणं असरणया ४ पणीयाहारविवज्जणया ५, सोइंदियरागोवरई, एवं पंचवि इंदिया ॥" 'उद्देशेष्वि'त्युपलक्षणत्वादुद्देशनकालेषु दशादीनांदशाश्रुतस्कन्धकल्प-व्यवहाराणां षड्विंशतिसङ्ख्येष्विति शेष:, उक्तं हि-

"दस उद्देसणकाला दसाण कप्पस्स होंति छच्चेव।
दस चेव य ववहारस्स हुंति सव्वेऽपि छव्वीसं ॥"

यो भिक्षुर्यततो सर्वदा परिभावना-प्ररूपणाकालग्रहणादिभि:।

मू.(१२४३) अनगारगुणेहिं च, पगप्पंमि तहेव य।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. अनगार: प्राग्वर्त्तस्य गुणा:-व्रतषट्केन्द्रियनिग्रहादय: सप्तविंशति-सुब्व्यत्ययात्तेषु च,

"वयछक्क ६ मिंदियाणं च निग्गहो ११ भाव १२ करणसच्चं च १३।
खमया १४ विरागयाविय १५ मणमाईणं निरोहो य १८ ॥१॥
कायाण छक्क २४ जोगम्मि जुत्तया २५ वेयणाहियासणया २६।
तह मारणंतियहियासणया २७ एए ऽनगारगुणा ॥२॥"

प्रकृष्ट: कल्पो-यतिव्यवहारो यस्मिन्नसौ प्रकल्प: स चेहाचाराङ्गमेव शस्त्रपरिज्ञाद्यष्टा-विंशत्यध्ययनात्मकं तस्मिन्, उक्तं च-

"सत्थपरिन्ना १ लोगविजओ २ सीओसनिज्ज ३ सम्मत्तं ४।
आवंति ५ धुव ६ विमोहा ७ उवहाणसुयं ८ महपरिन्ना ९ ॥१॥
पिंडसेण १० सेज्जि ११ रिय १२।
भासा १३ वत्थेसणा य १४ पाएसा १५।

उग्गहपडिमा १६ सत्तिक्कसत्तया १७ भावण २४ विमुत्ती २५ ॥१॥"

"उग्घाय २६ मनुग्घायं २७ आरोवण २८ तिविहमो निसीहं तु।

इह अट्ठावीसविहो आयारपकप्पनामो उ॥१॥"

मासिक्याद्यारोपणात्मके वा समवायाङ्गभिहितेऽष्टाविंशतिविधे प्रकल्पे 'तथैव' तेनैव यथावदासेवनाप्ररूपणादिना प्रकारेण 'तुः' समुच्चये भिक्षुर्यतते ॥

मू.(१२४४) पायसुयपसंगेसु(य), मोहट्ठाणेसु चेव य।

जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥

वृ. पापोपादानानि श्रुतानि पापश्रुतानि तेषु प्रसङ्गनानि प्रसङ्गाः-तथाविधासक्तिरूपाः पापश्रुतप्रसङ्गाः, ते चाष्टाङ्गनिमित्तसूत्रादिविषयभेदादेकोनत्रिंशत्तेषु, उक्तं हि-

"अट्ठनिमित्तंगाइं दिव्वुप्पायंतलिक्ख भोमं च।

अंगं सरलक्खण वंजणं च तिविहं पुनोकेक्कं ॥१॥

सुत्तं वित्ती तह वित्तियं च पावसुय अउनतीसविहं।

गंधव्वनट्टवत्थुं आउं धणुवेयसंजुत्तं ॥२॥"

मोहो-मोहनीयं तिष्ठति-कोऽर्थः ?-निमित्ततया वर्त्तते एतेष्विति मोहस्थानानिवारिमध्यावमग्नत्रसप्राणमारणादीनि त्रिंशत्तेषु, उक्तं हि-

"वारिमज्झेऽवगाहित्ता, तसे पाणे य हिंसति १।

छाएण मुहं हत्थेणं, अंतोणाइं गलेरवं २ ॥१॥

सीसावेढेण वेढित्ता, संकिलेसेण मारए।

सीसम्मि जे य आहंतु, दुहमारेण हिंसए ४ ॥२॥

बहुजणस्स नेयारं, दीवं ताणं च पाणियं ५।

साहारणे गिलाणंमि पहूकिच्चं न कुव्वति ६ ॥३॥

साहुं अकम्मधम्मो उ, जो भंसेज्ज उवट्ठियं ७।

नेयाउयस्स मग्गस्स, अवगारंमि वट्टति ॥४॥

जिनानऽनंतनाणीणं, अवन्नं जो पभासए।

आयरियउवज्झाए, खिसए मंदबुद्धिए ९ ॥५॥

तेसिमेव य नाणीणं, सम्मं नो परितप्पई १०।

पुनो पुनो अहिगरणं, उप्पाए ११ तित्थभेयए १२ ॥६॥

जाणं आहम्मिए जोए, पउंजति पुनो पुनो १३।

कामे वमित्ता पत्थेइ, इहऽन्नभविए इ वा १४ ॥७॥

अभिक्खं बहुस्सएऽहंति, जे भासंतऽबहुस्सए १५।

तहा य अतवस्सीवि, जे तवस्सित्तिहं वए १६ ॥८॥

जायतेएण बहुजनं, अन्तोधूमेण हिंसए १७।

अकिच्चमप्पणा काउं, कयमेएण भासते १८ ॥९॥

नियडुवहिपणिहीए पलियंचे सायजोगजुत्ते य १९।

वेइ सव्वं मुसं वयसि २०, अज्झीणं झंझए सया २१ ॥१०॥
अद्धाणंमि पवेसित्ता, जो धणं हरइ पाणिणं २२।
वीसंभेत्ता उवाएणं, दारे तस्सेव लुब्भति २३ ॥११॥
अभिक्खमकुमारे उ, कुमारेऽहन्ति भासए २४।
एवमबंभयारिं बंभयारित्ति भासए २५ ॥१२॥
जेणेवेसरीयं नीए, वित्ते तस्सेव लुब्भए २६।
तप्पहादुद्दिए वावि, अन्तरायं करेति से २७ ॥१३॥
सेणावतिं पसत्थारं, भत्तारं वावि हिंसए।
रट्ठस्स वावि निगमस्स, नायगं सेट्ठिमेव वा २८ ॥१४॥
अपस्समानो पस्सामि, अहं देवत्ति वा वए २९।
अवन्नेणं च देवाणं, महामोहं पकुव्वति ३० ॥१५॥

यो भिक्षुर्यतते तत्परिहारद्वारतः।

मू.(१२४५) सिद्धाइगुणजोगेसु, तित्तीसासायणासु
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥२०॥

वृ. सिद्धाः-सिद्धिपदप्राप्तास्तेषामादौप्रथमकाल एवातिशायिनो वा गुणाः सिद्धादिगुणाः सिद्धातिगुणा वा -संस्थानादिनिषेधरूपा एकत्रिंशत्, उक्तं हि-

"पंडिसेहणसंठाणे वन्न गंधरसफासवेए य।
पनपनदुपणट्ठतिहा इगतीसमकायऽसंगऽरुहा ॥१॥
अहवा कम्मेनव दरिसणंमि चत्तारि आउए पंच आइमे अंते।
सेसे दो दो भेया खीणभिलावेण इगतीसं ॥२॥"

तथा 'जोग'त्ति पदैकदेशेऽपि पदप्रयोगदर्शनाद् योगसंग्रहा यैर्योगाः-शुभमनोवाक्काय-व्यापाराः सम्यग् गृह्यन्ते-स्वीक्रियन्ते ते आलोचनानिरपलापादयो द्वात्रिंशत्, उक्तं हि-

"आलोयणा १ निरवलावे २, आवईसु दढधम्मया ३।
अनस्सिओ वहाणे य ४, सिक्खा ५ निप्पडिकम्मया ६ ॥१॥
अन्नायया ७ अलोभे य ८, तितिक्खा ९ अज्जवे १० सुई ११।
सम्मदिट्ठी १२ समाही य १३, आयारे १४ विनओवए १५ ॥२॥
धिईमई य १६ संवेगो १७, पनिही १८ सुविही १९ संवरे २०।
अत्तदोसोवसंहारे २१, सव्वकामविरत्तया २२ ॥३॥
पच्चक्खाणे २३ विउस्सग्गे २४, अप्पमाए २५ लवालवे २६।
झाणं २७ संवरजोगे २८ य, उदए मारणंतिए २९ ॥४॥
संगाणं च परिन्नाया ३०, पायच्छित्तकरणे इय ३१।
आराहणा य मरणंते ३२, बत्तीसं जोगसंगहा ॥५॥"

ततो द्वन्द्वे सिद्धादिगुणयोगाः सिद्धातिगुणयोगा वा तेषु, 'तित्तीसासायणासु य'त्ति त्रयस्त्रिंशत्संख्यास्वाशातनासु चोक्तशब्दार्थास्वर्हदादिविषयासु प्रतिक्रमणसूत्रप्रतीतासु रत्नाधिकस्य

पुरतः शिक्षकगमनादिकासु वा समवायाङ्गाभिहितासु यो भिक्षुर्यतते यथायोगं सम्यक्श्रद्धानासेवनावर्जनादिनेत्येकोनत्रिंशतिसूत्रार्थः ॥ अध्ययनार्थं निगमयितुमाह-

मू.(१२४६) *इइ एएसु जे भिक्खू, ठाणेसु जयई सया।*
खिप्पं से सव्वसंसारा, विप्पमुच्चइ पंडिए॥ त्तिबेमि॥

वृ. 'इती' त्यनेन प्रकारेण 'एतेषु' अनन्तरोक्तरूपेसु 'स्थानेषु' असंयमादिषु यो भिक्षुः 'यतते' उक्तन्यायेन यत्नवान् भवति सदा क्षिप्रं स सर्वसंसारादिप्रमुच्यते पण्डित इति सूत्रार्थः ॥

'इति' परिसमाप्तौ, ब्रवीमिति पूर्ववत्। अवसितक्षानुयोगे, नयाश्च प्राग्वत् ॥

अध्ययनं ३१ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
एकत्रिंशत्तमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं-३२-प्रमादस्थानं

वृ. व्याख्यातं चरणविधिनामकमेकत्रिंशमध्ययनम्, इदानीं द्वात्रिंशमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने नैकधा चरणमभिहितं, तच्च प्रमादस्थानपरिहारत एवासेवितुं शक्यं, तत्परिहारश्च तत्परिज्ञानपूर्वक इति तदर्थमिदमारभ्यते, इत्यनेन सम्बन्धेनायातमिदमध्ययनम्, अस्य चत्वार्यनुयोगद्वाराणि यावन्नामनिष्पन्ननिक्षेपस्तावत्पूर्ववदेवेति मनास्याधाय नामनिष्पन्न निक्षेपाभिधानायाह निर्युक्तिकृत्-

नि. [५२३] निक्खेवो अपमाए चउव्वि० ॥

नि. [५२४] जाणगसरीरभविए तव्वइरित्ते अ मज्जमाईसु।
निद्दाविकहकसाया विसएसु भावओ पमाओ॥

नि. [५२५] नामं ठवणादविए खित्तद्धा उड्ढ उवरई वसही।
संजमपग्गहजोहे अयलगणणसंधणा भावे॥

वृ. निक्खेवेत्यादिगाथास्तिस्रः सुगमा एव, नवरं 'मज्जमाईसु'त्ति मकारोऽलाक्षणिको मदयतीति मद्यं-काष्ठपिष्टनिष्पन्नमादिशब्दादासवादिपरिग्रहः एतानि, सुब्व्यत्ययाच्च प्रथमार्थे सप्तमी, भावप्रमादहेतुत्वाद्रव्यप्रमादः, 'निद्राविकथाकषायाः' उक्तरूपाः 'विसएसु'त्ति प्राग्वद्विषयाश्च 'भावतः' भावमाश्रित्य प्रमादः। तथा स्थाननिक्षेपे प्रस्तावात्स्थानशब्दो नामादिभिः प्रत्येकं योज्यते, तत्र च द्रव्यस्थाननोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तं यत्सचित्तादिद्रव्याणामाश्रयः, क्षेत्रस्थानं-भरतादिक्षेत्रमूर्ध्वलोकादि वा यत्र क्षेत्रे स्थानं विचार्यते, अद्धाकालः सैव तिष्ठत्यस्मिन्निति स्थानमद्धास्थानं तच्च पृथिव्यादीनां भवस्थित्यादि समयावलिकादि वा, ऊर्ध्वस्थानं-कायोत्सर्गादि उपरतिः-विरतिस्तत्स्थानं यत्रासौ गृह्यते, वसतिः-उपाश्रयस्तत्स्थानं ग्रामारामादि संयमःसामायिकादिस्तस्य स्थानं प्रकर्षापकर्षवदध्यवसायरूपं, यत्र संयमस्यावस्थानं, तच्चासङ्ख्येयभेदभिन्नं, तथाहि-

सामायिकच्छेदोपस्थापनीयपरिहारविशुद्धिकानां प्रत्येकमसङ्ख्येयलोकाशप्रदेशपरिमाणानि संयमस्थानानि, सूक्ष्मसम्परायसंयमस्त्वान्तर्मौहूर्त्तिक इत्यन्तर्मुहूर्त्तसमयपरिमाणानि तत्स्थानानि,

यथाख्यातसंयमस्तु प्रकर्षापकर्षरहित एकरूप एवेत्येकमेव तत्स्थानम्, एवं च सामायिकादीनामसङ्ख्येयभेदत्वात्समुदायात्मकस्य संयमस्थानस्याप्यसङ्ख्येयभेदता, केवलमिह बृहत्तरमसङ्ख्येयं गृह्यते, असङ्ख्यातानामसङ्ख्यातभेदत्वात्, 'प्रग्रहस्थानं' तु प्रकर्षेण गृह्यतेऽस्य वचनमिति प्रग्रहः-उपादेयवाक्योऽधिपतित्वेन स्थापितः, स च लौकिको लोकोत्तरतश्च तस्य स्थानं, तत्र लौकिकं पञ्चधा-राजयुवराजमहत्तरामात्यकुमारभेदात्, लोकोत्तरमपि पञ्चधैव-आचार्योपाध्यायप्रवृत्तिस्थविरगणावच्छेदकभेदात्, 'योधस्थानम्' आलीढादि 'अचलस्थानं' निश्चलस्थितिरूपं, तत्र सादिसपर्यवसितादि परमाण्वादीनां, गणनास्थानम्-एककादि सन्धानस्थानं द्रव्यतः कञ्चुकादिगतं भावस्थानम्- औदयिकादिको भावस्तिष्ठन्त्यत्र जन्तव इतिकृत्वेति गाथात्रयार्थः ॥ सम्प्रति येनात्र प्रकृतं तदुपदर्शयन्नुपदेशसर्वस्वमाह-

नि. [५२६] भावप्पमाय पगयं संखाजुत्ते अ भावठाणंमि।
चइऊणं च (ण इइ) पमायं जइयव्वं अप्पमायंमि ॥

वृ. भावप्रमादेन उक्तरूपेण प्रकृतम्-अधिकारः, तथा 'संख'त्ति सङ्ख्यास्थानं तद्युक्तेन, चस्य भिन्नक्रमत्वाद्भावस्थानेन च, कोऽथः ?-सङ्ख्यास्थानेन च, सर्वत्र सुब्व्यत्ययने सप्तमी, अत्र हि गुरुवृद्धसेवाद्यभिधानतः प्रकामभोजनादिनिषेधतश्च भावप्रमादा निद्रादयोऽर्थात्परिहर्तव्यत्वेनोच्यन्ते, ते चैकादिसङ्ख्यायोगिन औदयिकभावस्वरूपाश्चेति भावः, 'त्यक्त्वा' विहाय 'इति' [illegible] प्रमादं, निक्षिप्यात- 'यतितव्यं' यत्नो विधेयः क्व ?-'अप्रमादे' प्रमादप्रतियोगिनि धर्मे प्रत्युद्यम इति गाथार्थः ॥ अस्यैवार्थस्य दृढीकरणार्थमुत्तमनिदर्शनमाह-

नि. [५२७] वाससहस्सं उग्गं तवमाइगरस्स आयरंतस्स।
जो किर पमायकालो अहोरत्तं तु संकलिअं ॥

नि. [५२८] बारसवासे अहिए तवं चरंतस्स वद्धमाणस्स।
जो किर पमायकालो अंतमुहुत्तं तु संकलिअं ॥

वृ. 'वर्षसहस्र'मिति कालात्यन्तसंयोगे द्वितीया, ततश्च वर्षसहस्रप्रमाणं कालं यावत् 'उग्रम्' उत्कटं 'तपः' अनशनादि 'आदिकरस्य' ऋषभनाम्नो भगवत आचरतो यः किलेति परोक्षसवादसूचकः 'प्रमादकालः' यत्र प्रमादोऽभूत् यत्तदोरभिसम्बन्धातोऽहोरात्रं 'तुः' अवधारणे ततोऽहोरात्रमेव, किमयमेकावस्थाभाविनः प्रमादस्य काल उतान्यथेत्याशङ्क्याह-सङ्कलितः, किमुक्तं भवति ?-अप्रमादगुणस्थानस्यान्तर्मौहूर्तिकत्वेनानेकशोऽपि प्रमादप्राप्तौ तदवस्थितिविषयभूतस्यान्तर्मुहूर्त्तस्यासङ्ख्येयभेदत्वात्तेषामतिसूक्ष्मतया सर्वकालसङ्कलनायामप्यहोरात्रमेवाभूत।

तथा द्वादश वर्षाण्यधिकानि तपश्चरतो वर्द्धमानस्य यः किल प्रमादकालः प्राग्वत्सोऽन्तर्मुहूर्त्तस्य च बृहत्तरत्वमिति भावनीयम्, अन्ये त्वेतदनुपपत्तिभीत्या निद्राप्रमाद एवायं विवक्षित इति व्याचक्षत इति गाथाद्वयार्थः ॥ इत्थमुत्तमनिदर्शनाभ्यामप्रमादानुष्ठाने दार्ढ्यमापाद्य विपर्यये दोषदर्शनद्वारेण पुनस्तदेवापादयितुमिदमाह-

नि. [५२९] जेसिं तु पमाएणं गच्छइ कालो निरत्थओ धम्मे।
ते संसारमनंतं हिंडंति पमायदोसेणं ॥

वृ.'येषां' प्राणिनां 'तु:' पूरणे प्रमादेनोपलक्षितानां 'गच्छति' व्रजति काल: 'निरर्थक:' निष्प्रयोजन: क्व ? -'धर्मे' धर्मविषये धर्मप्रयोजनरहित: इत्यर्थ:, प्रमादतो हि नश्यन्त्येव धर्मप्रयोजनानि, ते किमित्याह-संसारम् 'अनन्तम्' अपर्यवसितं 'हिण्डन्ते' भ्राम्यन्ति 'प्रमाद-दोषेण' हेतुनेति गाथार्थ: ॥ यतश्चैवं ततः किं कर्त्तव्यमित्याह-

नि. [५३०] तम्हा खलुप्पमायं चइऊणं पंडिएण पुरिसेणं ।
दंसणनाणचरिते कायव्वो अप्पमाओ उ ॥

वृ. तस्मात्, 'खलु' निश्चयेन प्रमादं त्यक्त्वा 'पण्डितेन' बुद्धिमता पुरुषेण उपलक्षणत्वात्स्त्रीयादि च, दर्शनं च ज्ञानं च चारित्रं चेति समाहारस्तस्मिन् मुक्तिमार्गतया प्रागभिहिते 'कर्त्तव्य:' विधेय: 'अप्रमाद:' उद्यम: 'तु:' अवधारणार्थ इत्यप्रमाद एव न तु कदाचित्प्रमाद:, तस्यैवं दोषदुष्टत्वादिति गाथार्थ: । इत्यवसितो नामनिष्पन्ननिक्षेप: ।

मू.(१२४७)अच्चंतकालस्स समूलयस्स, सव्वस्स दुक्खस्स उ जो पमोक्खो ।
तं भासओ मे पडिपुन्नचित्ता !, सुणेह एगग्गहियं हियत्थं ॥

वृ.अन्तमतिक्रान्तोऽत्यन्तो, वस्तुनश्च द्वावन्तौ-आरम्भक्षण: समाप्तिक्षणश्च, तथा चान्यैरप्युच्यते-"उभयान्तापरिच्छिन्ना वस्तुसत्ता नित्यते" ति, तत्रेहारम्भक्षणा(०णलक्षणाऽ)न्त: परिगृह्यते, तथा चात्यन्त:-अनादि:, कालो यस्य सोऽयमत्यन्तकालस्तस्य, सह मूलेन-कषायाविरतिरूपेण वर्त्तत इति समूलक: (क:) प्राग्वत्तस्य, उक्तं हि-"मूलं संसारस्स उ हुंति कसाया अविरती य" 'सर्वस्य' निरवशेषस्य, दु:खयतीति दु:खं-संसारस्तस्य, असातं चेह दु:खं गृह्यते, अत्र च पक्षे मूलं रागद्वेषौ, य: प्रकर्षेण मोक्षयति-मोचयतीति प्रमोक्ष-आत्मनो दु:खापगमहेतु:, पूर्वत्र तुशब्दस्यावधारणार्थस्येह सम्बन्धात्प्रमोक्ष एव, तं 'भाष-माणस्य' प्रतिपादयत:, यदिवा प्रमोक्ष:-अपगमस्तं भाषमाणस्येति; कोऽर्थ: ?-यथाऽसौ भवति तथा ब्रुवाणस्य 'मे' मम प्रतिपूर्ण-विषयान्तरागमनेनाखण्डितं चित्तं चिन्ता वा येषां ते प्रतिपूर्णचित्ता: प्रतिपूर्णचिन्ता वा 'शृणुत' आकर्णयत, एकाग्रस्य-एकालम्बनस्यार्थाच्चेतसो भाव एकाग्र्यं-ध्यानं तच्च प्रक्रमाद्धर्म्यादि तस्मै हितमेकाग्र्यहितं, पाठान्तरत-एकान्तहितं वा हित:-तत्त्वतो मोक्ष एव तदर्थमिति सूत्रार्थ: ॥ यथाप्रतिज्ञातमाह-

मू.(१२४८) नाणस्स सव्वस्स पगासणाए, अन्नाणमोहस्स विवज्जणाए ।
रागस्स दोसस्स य संखएणं, एगंतसुक्खं समुवेइ मोक्खं ॥

वृ.'ज्ञानस्य' आभिनिबोधिकादे: 'सर्वस्य' निरवशेषस्य पाठान्तरत: 'सत्यस्य वा' अवित-थस्य 'प्रकाशनया' इति प्रभासनया निर्मलीकरणेनेत्यर्थ:, अनेन ज्ञानात्मको मोक्षहेतुरुक्त:, तथा अज्ञानं-मत्यज्ञानादि मोहो-दर्शनमोहनीयमनयो: समाहारेऽज्ञानमोहं तस्य विवर्जना-परिहारो मिथ्याश्रुतश्रवणकुदृष्टिसङ्गपरित्यागादिना तया, अनेन स एव सम्यग्दर्शनात्मकोऽ-भिहित:, तथा 'रागस्य द्वेषस्य च' उक्तरूपस्य 'संक्षयेण' विनाशेन, एतेन तस्यैव चारित्रात्मक-स्याभिधानं, रागद्वेषयोरेव कषायरूपत्वेन तदुपघातकत्वाभिधानात्, ततश्चायमर्थ:-सम्यग्द-र्शनज्ञानचारित्रै: 'एकान्तसौख्यं' दु:खलेशाकलङ्कितसुखं समुपैति 'मोक्षम्' अपवर्गम्, अयं च दु:खप्रमोक्षाविनाभावित्वत: स एवोपलक्षित इति सूत्रार्थ: ॥

नन्वस्तु ज्ञानादिभिर्दुःखप्रमोक्षः, अमीषां तु कः प्राप्तिहेतुः ?, उच्यते-

मू.(१२४१) तस्सेव मग्गो गुरुविद्धसेवा, विवज्जणा बालजनस्स दूरा।
सज्झायएगंतनिसेवणा य, सुत्तत्थसंचिंतणया धिई य॥

वृ. तस्येति योऽयमनन्तरं मोक्षोपाय उक्तः 'एषः' अनन्तरवक्ष्यमाणः 'मार्गः' पन्थाः प्राप्तिहेतुः, यदुत गुरवो यथावच्छास्त्राभिधायका वृद्धाश्च-श्रुतपर्यायादिवृद्धास्तेषां सेवा-पर्युपासना गुरुवृद्धसेवा, इयं च गुरुकुलवासोपलक्षणं, तत्र च सुप्राप्यान्येव ज्ञानादीनि, यदुक्तम्-

"नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति॥" त्ति,

सत्यपि च गुरुकुलवासे कुसंसर्गतो न स्यादेव तत्प्राप्तिरित्याह-'विवर्जना' विशेषण परिहारः 'बालजनस्य' पार्श्वस्थादेः 'दूरात्' दूरेण, तत्सङ्गस्याल्पीयसोऽपि महादोषनिबन्धत्वेनाभिहित-त्वात्, तत्परिहारेऽपि च न स्वाध्यायतत्परतां विना ज्ञानाद्यवाप्तिरित्याह-स्वाध्याये-उक्तरूपे एकान्तेन-इतरव्यासङ्गपरिहारात्मकेन निवेशना-स्थापना स्वाध्यायैकान्तनिवेशना सा च मनोवाक्कायानामिति [illegible], पठन्ति च-'इज्झायएगंतनिसेवणाए'त्ति, स्वाध्यायस्यैकान्त-निवेषणा-निश्चयेनानुष्ठानं स्वाध्यायैकान्तनिषेवणा, सा तत्रापि 'वृथा श्रुतचिन्तित'-मितिकृत्वाऽनुप्रेक्षैव प्रधानेत्यभिप्रायेणाह-सूत्रस्यार्थः-अभिधेयः सूत्रार्थस्तस्य 'संचिंतणय'त्ति सूत्रत्वात्संचिन्तना सूत्रार्थसंचिन्तना, अस्यामपि न चित्तस्वास्थ्यं विना ज्ञानादिलाभ इत्याह-'धृतिश्च' चित्तस्वास्थ्यमनुद्विग्नत्वमित्यर्थः इति सूत्रार्थः॥

यतश्चैवंविधो ज्ञानादिमार्गस्तत एतान्यभिलषता प्राक् किं विधेयमित्याह-

मू.(१२४०) आहारमिच्छे मियमेसनिज्जं, सहायमिच्छे निउणत्थबुद्धिं।
निकेयमिच्छज्ज विवेगजोगं, समाहिकामे समणे तवस्सी॥

वृ. 'आहारम्' अशनादिकम् 'इच्छेत्' अभिलषेन्मितमेषणीयम्, अपेर्गम्यमानत्वादिच्छेद-प्येवंविधमेव, दानभोजने तु दूरोत्सारिते एव अनेवंविधाहार (स) एव ह्यनन्तरोक्तं गुरुवृद्ध-सेवाज्ञानादिकारणमाराधयितुं क्षमः, तथा 'सहायं' सहचरमिच्छेद्गच्छान्तर्वर्ती सन्निति गम्यते,अ निपुणा कुशला अर्थेषु-जीवादिषु बुद्धिः-मतिस्येति निपुणार्थबुद्धिस्तं, पठ्यते च-'निउणेह-बुद्धि' तत्र निपुणा सुनिरूपिता ईहा-चेष्टा बुद्धिश्च यस्य स तथा, अनीदृशो हि सहायः स्वाच्छ-न्द्योपदेशनादिना ज्ञानादिकारणगुरुवृद्धसेवादिभ्रंशमेव कुर्यादिति, तथा 'निकेतम्' आश्रय-मिच्छेद् विवेकः-पृथग्भावः स्त्र्यादिसंसर्गाभाव इतियावत्तस्मै योग्यम्-उचितं तदापाता-द्यसम्भेव विवेकयोग्यम्, विविक्ताश्रये हि स्त्र्यादिसंसर्गाच्चित्तविप्लवोत्पत्तौ कुतो गुरुवृद्ध-सेवादिज्ञानादिकारणं संभवेत् ?, समाधिं कामयते-अभिलषति समाधिकामः, अत्र च समाधिर्द्रव्यभावभेदाद्विभेदः, तत्र द्रव्यसमाधिः क्षीरशर्करादिद्रव्याणां परस्परमविरोधेनावस्थानं भावसमाधिस्तु ज्ञानादीनां परस्परमबाधयाऽवस्थानं तदनन्यत्वाच्च ज्ञानादीनामयमेवेह गृह्यते, तथा च ज्ञानाद्यवाप्तुकाम इत्युक्तं भवति, श्रमणस्तपस्वीति प्राग्वदिति सूत्रार्थः॥

कालादिदोषत एवंविधसहायाप्राप्तौ यत्कृत्यं तदाह-

मू.(१२४१) न वा लभिज्जा निउणं सहायं, गुणाहियं वा गुणओ समं वा।

एगोवि पावाइ विवज्जयंतो, विहरेज्ज कामेसु असज्जमानो ॥

वृ. 'न' निषेधे वाशब्दश्चेदर्थे ततश्च न चेत् 'लभेत्' प्राप्नुयात् 'निपुणम्' इति निपुणबुद्धिं 'सहायं' गुणैः-ज्ञानादिभिरधिकम्- अगीतं गुणाधिकं वा 'गुणतः' इति ज्ञानादिगुणानाश्रित्य 'समं वा' तुल्यमुभयत्रात्मन इति गम्यते, 'वे'ति विकल्पे, ततः किमित्याह- 'एकोऽपि' असहायोऽपि 'पापानि' पापहेतुभूतान्यनुष्ठानानि 'विवर्जयन्' विशेषेण परिहरन् 'पठ्यते च- 'अनायरंतो'त्ति अनाचरन् 'विहरेत्' संयमाध्वनि यायात् 'कामेषु' विषयेषु 'असज्जन्' प्रतिबन्धमकुर्वन्, तथाविधगीतार्थयतिविषयं चैतद्, अन्यथैकाकिविहारस्यागमे निषिद्धत्वात्, एतदविधाने च 'मध्यग्रहणे आद्यन्तयोरपि ग्रहणं भवती'ति न्यायादाहारवसतिविषयोऽप्यपवाद उक्त एव भवतीति मन्तव्यम् ॥ इत्थं सप्रसङ्गं ज्ञानादीनां दुःखप्रमोक्षोपायत्वमुक्तम्, इदानीं तेषामपि मोहादिक्षयनिबन्धनत्वात्तत्क्षयस्यैव प्राधान्येन दुःखप्रमोक्षहेतुत्वख्यापनार्थं यथा तेषां सम्भवो यथा दुःखहेतुत्वं यथा च दुःखस्य प्रसङ्गस्तेषां चाभावस्तथा वि(ऽभि)धातुमाह-

मू.(१२५२) जहा य अंडप्पभवा बलागा, अंडं बलागप्पभवं जहा य।
एमेव मोहाययणं खु तण्हं, मोहं च तण्हाययणं वदंति ॥

वृ. 'यथा चे'त्ति येनैव प्रकारेणाण्डं-प्रतीतं ततः प्रभव-उत्पत्तिर्यस्याः साऽण्डप्रभवा 'बलाका' पक्षिविशेषः, अण्डं बलाकातः प्रभवतीति बलाकाप्रभवं यथा च, किमुक्तं भवति ?- यथाऽनयोः परस्परमुत्पत्तिस्थानता 'एवमेव' अनेनैव प्रकारेण मोहयति-मूढतां नयत्यात्मानमिति मोहः-अज्ञानं तच्चेह मिथ्यात्वदोषदुष्टं ज्ञानमेव गृह्यते, उक्तं हि-"जह दुव्वयण-मवयण"मित्यादि, आयतनम्-उत्पत्तिस्थानं यस्याः सा मोहायतना तां 'खु:' अवधारणे ततो मोहायतनामेव 'तण्ह'न्ति तृष्णां वदन्तीति सम्बन्धः, यथोक्तमोहाभावे ह्यवश्यम्भावी तृष्णाक्षय इति, मोहं च तृष्णाऽऽयतनं यस्मात्सौ तृष्णायतनस्तं वदन्ति, तृष्णा हि सति मूर्च्छा,

मू.(१२५३) रागो य दोसोवि य कम्मबीयं, कम्मं च मोहप्पभवं वयंति।
कम्मं च जाईमरणस्स मूलं, दुक्खं च जाईमरणं वयंति ॥

वृ. सा चात्यन्तदुस्त्यजेति रागप्रधाना ततस्तया रागउपलक्ष्यते सति च तत्र द्वेषोऽपि संभवतीति सोऽप्यनयैवाक्षिप्यते ततस्तृष्णाग्रहणेन रागद्वेषावुक्तौ, एतयोश्चानन्तानुबन्धिकषायरूपयोः सत्तायामवश्यम्भावी मिथ्यात्वोदयः, अत एवोपशान्तकषायवीतरागस्यापि मिथ्यात्वगमनं, तत्र च सिद्ध एवाज्ञानरूपो मोहः, एतेन च परस्परं हेतुहेतुमद्भावाभिधानेन यथा रागादीनां सम्भवस्तथोक्तं, सम्प्रति यथैतेषां दुःखहेतुत्वं तथा वक्तुमाह-

'रागश्च' मायालोभात्मकः 'द्वेषोऽपि च' क्रोधमानात्मकः कर्मज्ञानावरणादि तस्य बीजं-कारणं कर्मबीजं, कर्म चास्य भिन्नक्रमत्वान्मोहात्प्रभवतीति मोहप्रभवं च-मोहकारणं वदन्ति। 'चः' सर्वत्र समुच्चये 'कर्म च' इति कर्म पुनर्जातयश्च मरणानि च जातिमरणं तस्य 'मूलं' कारणं 'दुःखं' संसारमसातपक्षे तु दुःखयतीति दुःखं, कोऽर्थः ?-दुःखहेतुं, चस्य पुनरर्थस्य भिन्नक्रमत्वात् जातिमरणं पुनर्वदन्ति, तीर्थकरादय इति गम्यते, जातिमरणस्यैवातिशयदुःखोत्पादकत्वात्, उक्तं हि-

"मरणास्स जं दुक्खं, जायमाणस्स जंतुणो।

तेन दुक्खेण संतत्तो, न सरति जातिमप्पणो ॥"

मू.(१२५४)दुक्खं हयं जस्स न होइ मोहो, मोहो हओ जस्स न होइ तण्हा।
तण्हा हया जस्स न होइ लोभो, लोभो हओ जस्स न किंचणाइं॥

वृ. यतश्चैवमतः किं स्थितिमित्याह-'दुःखम्' उक्तरूपं हतमिव हतं, केनेत्याह-यस्य 'न भवति' न विद्यते, कोऽसौ ?-मोहः, अस्यैव तन्मूलकारणत्वात्, ततो हि कर्म कर्मणश्च दुःखमित्यनन्तरमेवोक्तं, हतमिव हतमिति च व्याख्यातं तत्क्षयेऽपि नारकादिगतौ स्वतत्त्वभावनापरस्यापि कियतोऽपि दुःखस्य सम्भवात्, यदि दुःखसहननं मोहाभावाद् असावपि कुत इत्याह-मोहो हतो यस्य न भवति तृष्णा, कोऽर्थः ?-तृष्णाया अभावान्मोहाभावः, तदायत्तत्वेन तस्या अभिधानात्, तृष्णाया अपि कुतो हननमित्याह-तृष्णा हता यस्य न भवति लोभः, किमुक्तं भवति ?-लोभाभावात्तृष्णाऽभावः, तृष्णाग्रहणेनोक्तनीत्या रागद्वेषयोरुक्तत्वात्तयोश्च लोभक्षये सर्वथैवाभावाद्, अत एव प्राधान्याल्लोभस्य रागान्तर्गतत्वेऽपि पृथगुपादानं, दृश्यते हि प्रधानस्य सामान्योक्तावपि विशेषोक्त्यभिधानं, यथा ब्राह्मणा आयाता वशिष्ठोऽप्यायात इति, स तर्हि केन हत इत्याह-लोभो हतो यस्य न किञ्चिद्विद्यते द्रव्यादिकमिति गम्यत इति सूत्रार्थः ॥

सन्त्वेवं दुःखस्य मोहादयो, हेतवो, हननोपायस्तेषां किमयमेवोतान्योऽप्यस्ति ? इत्याशङ्क्य सविस्तरं तदुन्मूलनोपायं विवदिषुः प्रस्तावमारचयति-

मू.(१२५५) रागं च दोसं च तहेव मोहं, उद्धत्तुकामेण समूलजालं।
जे जे उवाया पडिवज्जियव्वा, ते कित्तइस्सामि अहाणुपुव्विं॥

वृ. स्पष्टं, नवरं यदिह रागस्य प्रथममुपादानं पूर्वं तु मोहस्य तत् मोहस्य रागद्वेषयोश्च परस्परायत्तत्वेन पूर्वापरभावस्यानियमात्, तथा 'उद्धर्तुकामेन' इत्युन्मूलयितुमिच्छता सह मूलानामिव मूलानां-तिव्रकषायोदयादीनां मोहप्रकृतीनां जालेन-समूहेन वर्त्तत इति समूलजालस्तम्, एतच्च रागादीनां प्रत्येकं विशेषणम्, 'उपायाः' तदुद्धरणहेतवः 'प्रतिपत्तव्याः' अङ्गीकर्त्तव्याः कर्तुमिति गम्यते, पठ्यते च-'अपाया परिवज्जियव्वा' इति 'अपायाः' तदुद्धरणप्रवृत्तानां विबन्धकारिणोऽर्थाः 'परिवर्जयितव्याः' परिहर्त्तव्या इति सूत्रावयवार्थः ॥ यथाप्रतिज्ञातमेवाह-

मू.(१२५६) रसा पगामं न हु सेवियव्वा, पायं रसा दित्तिकरा नराणं।
दित्तं च कामा समभिद्दवंति, दुमं जहा साउफलं व पक्खी॥

मू.(१२५७) जहा दवग्गी पउरिंधणे वणे, समारुओ नोवसमं उवेइ।
एविंदियग्गीवि पगामभोइणो, न बंभयारिस्स हियाय कस्सई॥

मू.(१२५८) विवित्तसिज्जासणजंतियाणं, ओमासणाणं दमिइंदियाणं।
न रागसत्तू धरिसेइ चित्तं, पराइओ वाहिरिवोसहेहिं॥

मू.(१२५९) जहा बिरालावसहस्स मूले, न मुसगाणं वसही पसत्था।
एमेव इत्थीनिलयस्स मज्झे, न बंभयारिस्स खमो निवासो॥

मू.(१२६०) न रूवलावन्नविलासहासं, न जंपियं इंगियं पेहियं वा।
इत्थीण चित्तंसि निवेसइत्ता, दट्ठुं ववस्से समणे तवस्सी॥

मू.(१२६१) अदंसणं चेव अपत्थणं च, अचिंतनं चेव अकित्तणं च।

इत्थीजनस्सारियइज्जाणजुग्गं, हियं सया बंभवए रयाणं ॥

मू.(१२६२) *कामं तु देवीहिं विभूसियाइं, न चाइया खोभइउं तिगुत्ता ।*
तहावि एगंतहियंति नच्चा, विवित्तवासो मुनिनं पसत्थो ॥

मू.(१२६३)*सुक्खाभिकंखिस्सवि माणवस्स, संसारभीरुस्स ठियस्स धम्मे ।*
नेयारिसं दुत्तमत्थि लोए, जहत्थिओ बालमनोहराओ ॥

मू.(१२६४) *एएय संगा समइक्कमित्ता, सुहुत्तरा चेव हवंति सेसा ।*
जहा महासागरमुत्तरित्ता, नई भवे अवि गंगासमाणा ॥

मू.(१२६५)*कामाणुगिद्धिप्पभवं खु दुक्खं, सव्वस्स लोगस्स सदेवगस्स ।*
जं काइयं माणसियं च किं चि, तस्संतयं गच्छइ वीयरागो ॥

मू.(१२६६) *जहा य किंपागफला मनोरमा, रसेन वन्नेण य भुज्जमाणा ।*
ते खुद्दए जीविय पच्चमाणा, एओवमा कामगुणा विवागे ॥

वृ.रसेत्यादि सूत्रैकादशकम्। 'रसाः' क्षीरादिविकृतयः 'प्रकामम्' अत्यर्थं 'न निषेवितव्याः' नोपभोक्तव्याः, प्रकामग्रहणं तु वातादिक्षोभनिवारणाय रसा अपि निषेवितव्या एव, निष्कारण-निषेवणस्य तु निषेध इति ख्यापनार्थम्, उक्तं च-

"अच्चाहारो न सहे अतिनिद्धेण विसया उदिज्जंति ।
जायामायाहारो तंपि पगामं न भुंजामि ॥"

किमित्येवमुपदिश्यते इत्याह-'प्रायः' बाहुल्येन रसा निषेव्यमाणा इति गम्यते, दर्पणं दर्पः-धातूदेकस्तत्करणशीला दर्पिकरा दर्पकरा वा पाठान्तरतः इह च भावे कप्रत्यय इति दर्पं दर्प उच्यते, दृश्यन्त एव हि कुर्वन्तो दर्पत्वममी प्राणिनामिति, यदिवा दीप्तं दीपनं मोहानलज्वलन-मित्यर्थस्तत्करणशीला दीप्तकराः, केषां ?-नराणामुपलक्षणत्वात्स्त्र्यादीनां च, उदीरयन्ति हि ते उपभुक्तास्तेषां मोहानलमिति, उक्तं हि-

"विगई परिणईधम्मो मोहो जमुदिज्जए उदिन्ने य ।
सुट्ठुवि चित्तजयपरो कहं अकज्जे न वट्टिहिई ? ॥"

एवं च को दोष इत्याह-दर्पं यदिवा दीप्तं नरमिति प्रक्रमः 'चः' पुनरर्थे जातिविवक्षया च बहुवचनप्रक्रमेऽप्येकवचनं, 'कामाः' विषयाः 'समभिद्रवन्ति' अभिभवन्ति, तथाविधस्य स्त्र्याद्यभिलषणीयत्वात्सुखाभिभवनीयत्वाच्चेति भावः, कमिव क इवेत्याह-'द्रुमं' वृक्षं 'यथे' त्यौपम्ये, 'स्वादुफलं' मधुरफालन्वितं 'च' इति भिन्नक्रमः, ततश्च 'पक्खि'त्ति पक्षिण इव, इह च द्रुमोपमः पुरुषादिः स्वादुफलतातुल्यं च दर्पत्वं दीप्तत्वं वा पक्षिसदृशाश्च कामा इति।

अनेन रसप्रकामभोजने दोष उक्तः, सम्प्रति सामान्येनैव प्रकामभोजने दोषमाह-यथा 'दवाग्निः' दावानलः प्रचुरेन्धने 'वने' अरण्ये, एतदुपादानं च वसति (०तिमिति) कश्चिद्विध्याकोऽपि स्यादिति, 'समारुतः' सवायुः 'नोपसम'न्ति न 'उपशमं' विध्यापनाम् 'उपैति' प्राप्नोति, 'एवम्' इति दवाग्निवन्नोपशमभाग् भवति 'इंदियग्गि'त्ति इन्द्रियशब्देनेन्द्रिय-जनितो राग एवोक्तः, तस्यैवानर्थहेतुत्वेनेह चिन्त्यमानत्वात्, सोऽग्निरिव धर्मवनदाहकत्वाद् इन्द्रियाग्निः, सोऽपि 'प्रकामभोजिनः' अतिमात्राहारस्य, प्रकामभोजनस्यैव पवनप्रायत्वेनातीव

तदुदीरकत्वाद् अतश्चायं न ब्रह्मचारिणः 'हिताय' हितनिमित्तं, ब्रह्मचर्यविघातकत्वेन कस्यचिद् अतिसुस्थितस्यापि, तदनेन प्रक्रमाभोजनस्य काक्वा परिहार्यत्वमुक्तम् ॥

इत्थं रागमुद्धर्तुकामेन यत्परिहर्तव्यं तदभिधाय यदतियत्नेन कर्तव्यं तदाह-विविक्ता-स्त्र्यादिविकला शय्या-वसतिस्तस्यास्यामासनम्-अवस्थानं तेन यन्त्रिता-नियन्त्रिता विविक्त-शय्यासनयन्त्रितास्तेषाम् 'अवमाशनानाम्' न्यूनभोजनानां, पठन्ति च-'ओमासणाए'त्ति अवमं-न्यूनमशनम्-आहारो येषां तेऽमि अवमाशनास्तद्भावोऽवमाशनता-अवमौदर्यरूपा तथा दमितानि-वशीकृतानि इन्द्रियाणि यैस्ते तथा तेषां दमितेन्द्रियाणां, पठ्यते च-'ओमासणाईदमिइंदियाणं'ति, अवममशनं यत्र तपसि तदवमशनं तदादिभिस्तपोभेदैर्दमितानीन्द्रियाणियैस्ते तथा तेषां, 'न' नैव रागः शत्रुरिवाभिभवहेतुतया रागशत्रुः 'धर्षयति' पराभवति, किं तत् ?-चित्तं, किन्तु स एवेत्थं पराधृष्यत इति भावः, क इव ?-'पराजितः' पराभूतः 'व्याधिरिव' कुष्ठादिः 'औषधैः' गडूच्यादिभिर्दीहमिति गम्यते, अनेनापि विविक्तशय्यासनादीनां काक्वा विधेयत्वमुक्तम्, इदानीं तु विवक्तशयनासने यत्नाधानाय विपर्यये दोषमाह-यथा बिडालामार्जारा-स्तेषामावसथः-आश्रयो बिडालावसथस्तस्य 'मूले' समीपे न मूषकाणां वसतिः 'प्रशस्ता' शोभना, अवश्यं तत्र तदपायसम्भवात्, एवमेव स्त्रीणां-युवतीनां पण्डकादुपलक्षणमेतत् निलयोनिवासः स्त्रीनिलयस्तस्य 'मध्ये' अन्तर्नब्रह्मचारिणः 'क्षमः' युक्तः, कोऽसौ ?-निवासःवसतिः, तत्र ब्रह्मचर्यबाधासम्भवादिति भावः । विवक्तशय्यावस्थितावपि कदाचित्स्त्रीसंपाते यत्कर्तव्यं तदाह- 'न' नैव रूपं-सुसंस्थानता लावण्यं-नयनमनसामाह्लादको गुणो विलासाविशिष्टनेपथ्यरचनादयो ह्रासः-कपोलविकासादिरेषां समाहारे रूपलावण्य-विलासहासं न जल्पितं-मन्मनोल्लापादि 'इंगिय'त्ति बिन्दुलोपाद् 'इङ्गितम्' अङ्गभङ्गादि 'वीक्षितं' कटाक्षवीक्षितादि 'वा' समुच्चये स्त्रीणां सम्बन्धि 'चित्तंसि'त्ति 'चित्ते' मनसि 'निवेश्य' अहो! सुन्दरमिदं चेति विकल्पतः स्थापयित्वा 'द्रष्टुं' इन्द्रियविषयतयां नेतुं 'व्यव-स्येत्' अध्यवस्येत श्रमणस्तपस्वीति प्राग्वत्, चित्ते निवेश्येत्यनेन च रागाद्यभिसन्धिं विनैत-द्दर्शनमपि न दोषायेति ख्याप्यते, उक्तं हि-'न सक्कं रूवमद्दट्ठुं' इत्यादि, निवेश्येति च समान-कालत्वेऽपि कत्वाप्रत्ययः अक्षिणी निमील्य हसतीत्यादिवत् ।

किमित्येवमुपदिश्यते इत्याह-'अदर्शनम्' इन्द्रियाविषयीकरणं 'चः' समुच्चये 'एवः' अवधारणेऽदर्शनमेव च 'अप्रार्थनं च' अनभिलषणम् 'अचिन्तनं चैव' रूपाद्यपरिभावनम् 'अकीर्त्तनं च' असंशब्दनं, तच्च नामतो गुणतो वा स्त्रीजनस्यार्यध्यानं-धर्म्यादि तस्य योग्यं-तद्धेतुत्वेनोचितमार्यध्यान योग्यं 'हितं' पथ्यं 'सदा' सर्वकालं ब्रह्मव्रते पाठान्तरतो ब्रह्मचर्ये 'रतानाम्' आसक्तानां, ततः स्थितमेतत्-स्त्रीणां रूपादि मनसि निवेश्य द्रष्टुं व्यवस्येत् ॥ ननु 'विकारहेतौ सति विक्रियन्ते, येषां न चेतांसि त एव धीराः' तत्किमिति रागमुद्धर्तुकामेना विविक्तशयनासनतादिधेयेत्युच्यते ? इत्याशङ्क्याह- 'कामं तु'त्ति अनुमतमेवैतद् यदुत 'देवी-हिवि'त्ति 'देवीभिरपि' अप्सरोभिरप्यास्तां मानुषीभिरित्यपिशब्दार्थः 'भूषिताभिः' अलंकृताभिः 'न' नैव 'चाइय'त्ति शक्ताः 'क्षोभयितुं' चालयितुं संयमादिति गम्यते 'तिसृभिः' मनोगुप्त्या-दिगुप्तिभिर्गुप्ताः अर्थान्मुनयः 'तथाऽपि' यदप्येवंविधाश्चालयितुं न शक्यन्ते तदप्येकान्त-

हितमेतदिति ज्ञात्वा, किमुक्तं भवति ?-संभवन्ति हि केचिदभ्यस्तयोगिनोऽपि ये तत्सङ्गतः क्षुभ्यन्ति, येऽपि न क्षुभ्यन्ति तेऽपि स्त्रीसंसक्तवसतिवासं "साहु तवो वणवासो" इत्याद्यवर्णादिदोषभाजो भवेयुरिति परिभाव्य 'विविक्तवासो' विविक्तशय्यासनात्मको मुनीनां प्रशस्त इत्यन्तर्भावितण्यर्थतया 'प्रशंसितः' गणधरादिभिः श्लाघित इत्यर्थः, अतः स एवाश्रयणीय इति भावः ॥ एतत्समर्थनार्थमेव स्त्रीणां दुरतिक्रमत्वमाह-

'मोक्षाभिकाङ्क्षिणोऽपि' मुक्त्यभिलाषिणोऽपि मानवस्य संसारात्- चतुर्गतिरूपाद्भयनशीलो भीरुः संसारभीरुः, अपेरिहापि सम्बन्धात्तस्यापितथास्थितस्यापि 'धर्मे' श्रुतधर्मादौ 'न' नैव 'एतादृशम्' ईदृशं दुस्तरं-दुरतिक्रमम् 'अस्ति' विद्यते 'लोके' जगति तथा 'स्त्रियः' युवतयः 'बालमनोहराः' निर्विवेकचित्तक्षेपिण्यो दुस्तराः, दुस्तरत्वे च बालमनोहरत्वं हेतुः, अतश्चातिदुस्तरत्वादासां परिहार्यत्वेन विविक्तशय्यासनमेव श्रेय इति भावः ॥

ननवेवं स्त्रीसङ्गतिक्रमणार्थोपायगुणान उपदिश्यन्तथा शेषसङ्गतिक्रमणार्थमपि किं न कश्चनोपाय उपदिश्यते ? इत्याह-'यदिवा स्त्रीसङ्गतिक्रमे गुणमाह-एतांश्च 'सङ्गान्' सम्बन्धान् प्रक्रमात्स्त्रीविषयान् 'समतिक्रम्य' उल्लङ्घ्य 'सुखोत्तरश्चैव' अकृच्छ्रोल्लङ्घ्याश्चैव भवन्ति 'शेषाः' द्रव्यादिसङ्गाः सर्वसङ्गानां रागरूपत्वे समानेऽपि स्त्रीसङ्गानामेवैतेषु प्रधानत्वादिति भावः, दृष्टान्तमाह यथा 'महासागरं' स्वयम्भूरमणमुत्तीर्य 'नदी' सरित् 'भवेत्' स्यात्सुखोत्तरैवेति प्रक्रमो वीर्यातिशययोगत इति भावः, 'अवि गंगासमाने'ति गङ्गा किलमहानदी तत्समानाऽपि-तत्सदृशाऽपी, आस्तामितरा क्षुद्रनदीत्यपिशब्दार्थः ॥ यदुक्तं "विवित्तसेज्जासणजत्तियाण"-मित्यत्र विविक्तावसथमर्थतो व्याख्याय "ओमासणाणं दमिइंदियाण" मित्यत्रावमाशनत्वमनन्तरमेव प्रक्रामभोजननिषेधेन समर्थितं, दमितेन्द्रियत्वं तूत्तरत्र वक्ष्यत इत्युभयमुपेक्ष्य 'न रागसत्तू धरिसेइ चित्त" मित्यत्र किमिति रागपराजयं प्रत्येवमुपदिश्यते ? इत्याशङ्क्य रागस्य दुःखहेतुत्वं दर्शयितुमाह-कामाः-विषयास्तेष्वनुगृद्धिः सतताभिकाङ्क्षा अनुभावानुबन्ध इत्यादिष्वनोः सातत्येऽपि दर्शनात्, तस्याः प्रभवो यस्य तत्कामानुगृद्धिप्रभवं 'खु'त्ति खुशब्दस्यावधारणार्थत्वात्कामानुगृद्धिप्रभवमेव, किं तत् ?-'दुःखम्' असातं सर्वस्य लोकस्य-प्राणिगणस्य, कदाचिद्देवानां विशिष्टानुभाववत्तयैवं न स्यादत आह-'सदेवकस्य' देवैः समन्वितस्य, कतरत्तद् दुःखमित्याह-यत् 'कायिकं' रोगादि 'मानसिकं च' इष्टवियोगादिजन्यं 'किञ्चित्' स्वल्पमपि, कदाचिदेतदभावेऽप्येतत्स्याद् अत आहतस्य द्विविधस्यापि दुःखस्यान्तमेव अन्तकं-पर्यन्तं गच्छति 'वीतरागः' विगतकामानुगृद्धिरित्यर्थः ॥

ननु कामाः सुखरूपतयैवानुभूयन्ते तत्कथं कामानुगृद्धिप्रभवं दुःखम् ?, उच्यते, 'यथा च' इति यथैव किम्पाको-वृक्षविशेषस्तत्फलानि, अपेर्गम्यमानत्वात्, 'मनोरमाण्यपि' हृदयङ्गमान्यपि 'रसेन' आस्वादेन 'वर्णेन च' रुचिररक्तादिना चशब्दाद् गन्धादिना च 'भुज्यमानानि' उपभुज्यमानानि 'ते' इति 'तानि' लोकप्रतीतानि क्षोदयितुम्-अध्यवसनादिभिरुपक्रमकारणैर्विनाशयितुं शक्यत इति क्षुद्रं तदेवानुकाम्यतया क्षुद्रकं सोपक्रमित्यर्थस्तस्मिन् जीविते आयुषि पच्यमानानि-विपाकावस्थाप्राप्तानि मरणान्तदुःखदायीनीति शेषः, प्राग्वच्च लिङ्गव्यत्ययः, पठ्यते च 'ते जीवियं खुंदति पच्चमाणे'त्ति तानिकिम्पाकफलानि जीवितम्-

आयुः 'खुंदति' आर्षत्वात्, 'क्षोदयन्ति' विनाशयन्ति विपच्यमानानि, 'एतद्रूपमाः' किम्पाकफलतुल्याः कामगुणाः 'विपाके' फलप्रदानकाले, किमुक्तं भवति ?- यथा किम्पाकफलान्युपभुज्यमानानि मनोरमाणि विपाकावस्थायां तु सोपक्रमायुषां मरणहेतुतयाऽतिदारुणानि, एवं कामगुणा अपि उपभुज्यमाना मनोरमा विपाकावस्थायां तु नरकादिदुर्गतिदुःखदायितयाऽत्यन्तदारुणा एव, ततः सुखरूपतया प्रतिभासनं सुखहेतुत्वेऽनैकान्तिकमेव, किम्पाकफलानां मनोरमत्वेन सुखप्रतिभासेऽप्यन्यथाभावादिति सूत्रैकादशकार्थः ॥

इत्थं बहुतरगुणस्थानानुयायित्वेन रागस्य प्राधान्यत्केवलस्यैवोद्धरणोपायमभिधाय सम्प्रति तस्यैव द्वेषसहितस्य तमभिधित्सुर्दमितेन्द्रियत्वं च सिंहावलोकितन्यायाश्रयणेन व्याचिख्यासुरिदमाह-

मू.(१२६७) जे इंदियाणं विसया मणुन्ना, न तेसु भावं निसिरे कयाई।
न यामणुन्नेसु मनंपि कुज्जा, समाहिकामे समणे तवस्सी ॥

वृ. ये 'इन्द्रियाणां' चक्षुरादीनां 'विषयाः' रूपादयः 'मनोज्ञाः' मनोरमाः न 'तेषु' विषयेषु 'भावम्' अभिसन्धिम्, अपेर्गम्यमानत्वाद्भावमपि प्रस्तावादिन्द्रियाणि प्रवर्त्तयितुं, किं पुनस्तत्प्रवर्त्तनमित्यपिशब्दार्थः, 'निसृजेत्' कुर्यात् 'कदाचित्' कस्मिंश्चित्काले, 'न च' नैव 'अमनोज्ञेषु' अमनोरमेषु 'मनोऽपि' चित्तमपि, अत्रापीन्द्रियाणि प्रवर्त्तयितुम् अपिशब्दार्थश्च प्राग्वत् 'कुर्यात्' विदध्यात्, अनेन वाक्यद्वयेनापीन्द्रियदम उक्तः, समाधिः-चित्तैकाग्र्यं स च रागद्वेषाभाव एवेति स एवानेनोपलक्ष्यते, ततस्तत्कामो-रागद्वोषोद्धरणाभिलाषी श्रमणस्तपस्वीति च प्राग्वत्, नन्वेवमुभयोद्धरणहेतुत्वेनेन्द्रियदमस्य किमिति रागोद्धरणहेतुष्वभिधानम्, ?, उच्यते, हेतुप्रक्रमात्, न चोभयोद्धरणहेतुतयैकोद्धरणहेतुता विरुध्ये, यदिवा तत्रापि रागस्य द्वेषोपलक्षणत्वादुभयोद्धरणोपायतैव विवक्षिता, किन्तु एव दर्पतो द्वेषसम्भवादवमाशनत्वस्याप्यसौ भावनीयेत्यलं प्रसङ्गेनेति सूत्रार्थः ॥

इत्थं रागद्वेषोद्धरणैषिणो विषयेभ्यो निवर्त्तनमिन्द्रियाणामुपदिष्टम्, अधुना त्वेतेषु तत्प्रवर्तने रागद्वेषानुद्धरणे च यो दोषस्तं प्रत्येकमिन्द्रियाणि तत्प्रसङ्गतो मनश्चाश्रित्य दर्शयितुमाह-

मू.(१२६८) चक्खुस्स रूवं गहणं वयंति, तं रागहेउं तु मणुन्नमाहु।
तं दोसहेउं अमणुन्नमाहु, समो अ जो तेसु स वीयरागो ॥
मू.(१२६९) रूवस्स चक्खुं गहणं वयंति, चक्खुस्स रूवं गहणं वयंति।
रागस्स हेउं समणुन्नमाहु, दोसस्स हेउं अमणुन्नमाहु ॥
मू.(१२७०) रूवेसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ सो विनासं।
रागाउरे से जहवा पयंगे, आलोअलोले समुवेइ मच्चुं ॥
मू.(१२७१) जे यावि दोसं समुवेइ तिव्वं, तंसि क्खणे से उ उवेइ दुक्खं।
दुद्दंतदोसेण सएण जंतू, न किंचि रूवं अवरज्झई से ॥
मू.(१२७२) एगंतरत्तो रुइरंसि रूवे, अतालिसे से कुणई पओसं।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पई तेण मुनी विरागे ॥
मू.(१२७३) रूवानुगासानुगए य जीवे, चराचरेहिं सयणेगरूवे।

चित्तेहिं ते परियावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥

मू. (१२७४) रूवानुवाएण परिग्गहेण, उप्पायणे रक्खणसंनिओगे ।
वए विओगे य कहं सुहं से, संभोगकाले य अतित्तलाभे ? ॥

मू. (१२७५) रूवे अतित्ते अ परिग्गहंमि, सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥

मू. (१२७६) तण्हाभिभूयस्स अदत्तहारिणो, रूवे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा न विमुच्चइ से ॥

मू. (१२७७) मोसस्स पच्छा य परत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, रूवे अतित्तो दुहिओ अनिस्सो ॥

मू. (१२७८) रूवाणुरत्तस्स नरस्स एवं, कत्तो सुहं हुज्ज कयाइ किंचि ? ॥
तत्थोवभोगेऽवि किलेसदुक्खं, निव्वत्तई जस्स कएण दुक्खं ॥

मू. (१२७९) एमेव रूवंमि गओ पओसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो अ चिणाइ कम्मं, जं से पुनो होइ दुहं विवागे ॥

मू. (१२८०) रूवे विरत्तो मनुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पई भवमज्झेऽवि संतो, जलेण वा पुक्खरिणीपलासं ॥

मू. (१२८१) सोयस्स सद्दं गहणं वयंति, तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो अ जो तेसु स वीयरागो ॥

मू. (१२८२) सद्दस्स सोयं गहणं वयंति, तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो अ जो तेसु स वीयरागो ॥

मू. (१२८३) सद्देसु जो गेहिमुवेइ तिव्वं, अकालियं पावइ सो विनासं ।
रागाउरे हरिणमिउव्व मुद्धे, सद्दे अतित्ते समुवेइ मच्चुं ॥

मू. (१२८४) जे यावि दोसं समुवेइ तिव्वं, तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, न किंचि सद्दं अवरज्झई से ॥

मू. (१२८५) एगंतरत्ते रुइरंसि सद्दे० ॥

मू. (१२८६) सद्दाणुगासाणु० ॥

मू. (१२८७) सद्दाणुवाएण परिग्गहेण० ॥

मू. (१२८८) सद्दे अतित्ते० ॥

मू. (१२८९) तण्हाभिभूयस्स० ॥

मू. (१२९०) मोसस्स पच्छा य ॥

मू. (१२९१) सद्दाणु० ॥

मू. (१२९२) एगेव सद्दंमि० ॥

मू. (१२९३) सद्दे विरत्तो० ॥

मू. (१२९४) घाणस्स गंधं गहणं वयंति० ॥

मू. (१२९५) गंधस्स घाणं ॥

मू.(१२९६)गंधेसु जो गेहिं० रागाउरे ओसहिगंधगिद्धे, सप्पे बिलाओ विव निक्खमंते ॥
मू.(१२९७) जे यावि दोसं० ॥
मू.(१२९८) एगंतरत्तो रुइरंमि गंधे० ॥
मू.(१२९९) गंधानु० ॥
मू.(१३००) गंधाणुवा० ॥
मू.(१३०१) गंधे अतित्ते० ॥
मू.(१३०२) तण्हा० ॥
मू.(१३०३) मोसस्स० ॥
मू.(१३०४) गंधानु० ॥
मू.(१३०५) एमेव गंधंमि० ॥
मू.(१३०६) गंधे विरत्तो० ॥
मू.(१३०७) जिब्भाए रसं गहणं० ॥
मू.(१३०८) रसस्स जीहं गहणं वयंति० ॥
मू.(१३०९)रसेसु जो गेहि० रागाउरे बडिसविभिन्नकाए, मच्छे जहा आमिसभोगगिद्धे ॥
मू.(१३१०-१३११)जेयावि दोसं समुवेइ-यावत्-पोक्खरिणीपलासं
(जहा १२८४-१२९३)
मू.(१३१२) कायस्स फासं गहणं वयंति० ॥
मू.(१३१३) फासस्स कायं गहणं० ॥
मू.(१३१४) फासेसु जो गेहिमु० ।
रागाउरे सीयजलावसन्ने, गाहग्गहीए महिसे व रन्ने, ३ ॥
मू.(१३१५-१३३२)एवं फासाभिलापे गाथा जे यावि० यावत् पलासं
(जहा १२८४-१२९३)
मू.(१३३३) मनस्स भावं गहणं० ॥
मू.(१३३४) भावस्स मणं ग० ॥
मू.(१३३५) भावेसु जो गेहिं० ।
रागाउरे कामगुणेसु गिद्धे, करेणुमग्गावहिए व नागे ॥
मू.(१३३६-१३४५) एवं भावाभिलापे गाथा जे यावि दोसं-
यावत् पोक्खरिणीपलासं (जहा १२८४-१२९३)

वृ. 'चक्खुसे'त्यादि सूत्राण्यष्टसप्ततिः । तत्रापि चक्षुराश्रित्य त्रयोदश । 'चक्षुषः' चक्षुरिन्द्रियस्य रूप्यत इति रूपं-वर्णः संस्थानं वा, गृह्यतेऽनेनेति ग्रहणं, कोऽर्थ?-आक्षेपकं, विशिष्टेन हि रूपेण चक्षुराक्षिप्यते तद् 'वदन्ति' अभिदधति तीर्थकृदादय इति गम्यते, ततः किमित्याह-'तद्' इति रूपं रागः-अभिष्वङ्गस्तद्धेतुः-तदुत्पादकं 'तुः' पूरणे मनोज्ञमाहुः, तथा 'तद्' इति रूपमेव दोषस्तद्धेतुममनोज्ञमाहुः, ततस्तयोश्चक्षुःप्रवर्त्तने रागद्वेषसम्भवात्तदुद्धरणाशक्तिलक्षणो दोष इति भावः, आह-एवं न कश्चित् सति रूपे वीतरागः स्यादत आह-

'समस्तु' अरक्तद्विष्टतया तुल्यः पुनर्यः 'तयोः' मनोज्ञेतररूपयोः स 'वीतराग' इति तथाविधरागाभावतो वीतरागस्तदविनाभावित्वाद् द्वेषस्य तथैव वीतद्वेषश्च, इदमाकूतम्-यस्यैव रागद्वेषौ स्तस्तस्यैव तदुदीरकत्वेनानयोस्तज्जनकत्वमुच्यते न तु यः सम एव, तथा च न तावच्चक्षुस्तयोः प्रवर्त्तयेत्, कथञ्चित्प्रवर्त्तने वा समतामेवालम्बेतेत्युक्तं भवति, ननु यद्येवं रूपमेव रागद्वेषजनकं ततस्तदुद्धरणार्थिनस्तद्गतैव चिन्ताऽस्तु, रूपे चक्षुर्न प्रवर्त्तयेदित्येवं तु न युक्तैव चक्षुषश्चिन्ता इत्याशङ्क्याह-रूपस्य चक्षुः गृह्णातीति ग्रहणं, बहुलवचनात्कर्त्तरि ल्युट्, तद्वदन्ति, तथा चक्षुषो रूपं गृह्णत इति प्राग्वल्लयुटि ग्रहणं-ग्राह्यं तद्वदन्ति, अनने रूपचक्षुषोर्ग्राह्यग्राहकभाव उक्तः, तथा च न ग्राहकं विना ग्राह्यत्वं नापि ग्राह्यं विना ग्राहकत्वमित्यनयोः परस्परमुपकार्योपकारकभाव उक्तो भवति, एतेन त्वनयो रागद्वेषजननें सहकारिभावः ख्याप्यते, तथा च यथा रूपं रागद्वेषकारणं तथा चक्षुरपि, अत एवाह-

रागस्य हेतुं-कारणं प्रक्रमाच्चक्षुः सह मनोज्ञेन ग्राह्येण रूपेण वर्त्तते इति समनोज्ञं, मनोज्ञरूपविषयमित्युक्तं भवति, 'आहुः' ब्रुवते, यत्र तु 'हेउं तमणुन्न'मिति पाठस्तत्र 'तं'ति तच्चक्षुर्मनोज्ञं मनोज्ञरूपविषयत्वेन ततो दोषो-द्वेषः, उक्तं हि-"इष्या रागो द्वेषः" इत्यादि, तस्य हेतुममनोज्ञम्-अमनोज्ञरूपं, पाठान्तरतश्च हेतुं तदमनोज्ञमाहुः, उभयप्रक्रमेऽपि चक्षुष एव विशेष्यत्वेनोपदर्शनं, रूपस्य पूर्वसूत्रेणैव, एवं च रूपचक्षुषोः सहितयोरेव रागद्वेषजनकत्वाद्युक्तमुक्तं तावुद्धर्त्तुंकामो रूपे चक्षुर्न प्रवर्त्तयेत्, यदा तु पाश्चात्यपादत्रयं पूर्ववत्पठ्यते तदा पूर्वसूत्रे चक्षुषो रूपं ग्रहणं-ग्राह्यमिति व्याख्येयं, ततश्चेहापि ग्राह्यग्राहकभाव उक्तः, तत्र चोक्त एवाभिप्रायः, तथा यदि चक्षू रागद्वेषकारणं न कश्चिद्वीतरागः स्यादत आहसमश्चेत्यादि, शेषं सुगमम्।

आह-अस्त्वयं रागद्वेषोद्धरणोपायः, एतदनुद्धरणे च को दोषः ? येन तदुद्धरणार्थमित्थमुपदिश्यत इत्याह-'रूपेषु यो 'गृद्धिं' गार्ध्यं रागमित्यर्थः, उक्तं हि वाचकैः-

"इच्छा मूर्च्छा कामः स्नेहो गार्ध्यं ममत्वमभिनन्दः।
अभिलाष इत्यनेकानि रागपर्यायवचनानि॥"

'उपैति' गच्छति 'तीव्राम्' उत्कटां गृद्धेर्विशेषणं, स किमित्याह-अकाले भवम् आकालिकं-यथास्थित्यायुरुपररमादवांगेव प्राप्नोति स 'विनाशं' घातं, पाठान्तरतः 'क्लेशं वा' मरणान्तबाधात्मकं, रागेणातुरो-विह्वलो रागातुरः सन् 'से' इति स लोकप्रतीतः 'यथा वा' इति वाशब्दस्यैवकारार्थत्वाद् 'यथैव' येनैव प्रकारेण 'पतङ्गः' शलभः आलोकः अतिस्निग्धदीपशिखादिदर्शनं तस्मिन् लोलोलम्पट आलोकलोलः समुपैति 'मृत्युं' प्राणत्यागं, तस्यापि गृद्धाऽऽलोकलोलत्वं राग एवेति भावः।

'यश्च' इति यस्तु, अपीति च तस्मिन्नित्यनेन योक्ष्यते 'दोषं' द्वेषं 'समुवेंति'त्ति वचनव्यत्ययात् 'समुपैति' समुपगच्छति रूपेष्वितिप्रक्रमः 'नित्यं' सदा न तु कदाचित्, स किमित्याह-तस्मिन्नपि 'क्षणे' प्रस्तावे यस्मिन् द्वेष उत्पन्नः 'स' इति सः 'तुः' पूरणे उपैति 'दुःखं' शारीरादि, द्विष्टो हि किमिदमनिष्टं मया दृष्टमिति मनसा व्याकुलीभवति परितप्यते च देहेन, न तु यथा रागमुपगच्छंस्तत्काले मनोज्ञविषयावलोकनजनितं सुखमभिमन्यते उत्तरकालमेव तु दुःखमिति, पठन्ति च

'समुवेंति सव्वं'ति स्पष्टं, यदि रूपदर्शनाद् द्वेषमुपगच्छन् दुःखमुपैति ततस्तथाविध-रूपदोषेणैवास्य दुःखावासिरिति प्राप्तमित्याशङ्क्याह-दुष्टं दमनं दुर्दान्त तच्च प्रक्रमाच्चक्षुषस्तदेव दोषो दुर्दान्तदोषस्तेन 'स्वकेन' आत्मीयेन 'जन्तुः' प्राणी, न 'किञ्चित्' स्वल्पमपि रूपं प्रक्रमादमनोज्ञम् 'अपराध्यति' दुष्यति 'से' तस्य, यदि हि रूपमेवापराध्येन्न कस्यचिद्देषाभावः स्यात्, तथा च मुक्त्यभावादयो दोषा इति भावः । इत्थं रागद्वेषयोर्द्वयोरप्यनर्थहेतुत्वमुक्तमिदानीं तु द्वेषस्यापि रागहेतुकत्वात्स एव महाऽनर्थमूलमिति दर्शयंस्तस्य विशेषतः परिहर्त्तव्यतां ख्यापयितुमाह-'एकान्तरक्तो' यो न कथञ्चिद्विरागं याति 'रुचिरे' मनोरमे रूपे, किमित्याह-

"अतालिसो'त्ति मागधदेशीभाषया 'अतादृशे' अन्यादृशे, तथा च तल्लक्षणं 'रशयोर्लसौ मागधिकायां'मिति, 'से' इति करोति 'प्रदोषं' द्वेषं सुन्दरीनन्द इव सुरसुन्दरीरागतः, सुन्दर्यां यथा च दुःखस्य 'संपीडनं' सङ्घातं, यद्वा समिति-भृशं पीडा-दुःखकृताबाधा संपीडा तामुपैति 'बालः' अज्ञः उक्तमेवार्थं व्यतिरेकमुखेनाह-न लिप्यत इव लिप्यते, श्लिष्यत इत्यर्थः, 'तेन' द्वेषकृतदुःखेन मुनिः 'विरागः' रागविरहितः, तस्यैव तन्मूलत्वादिति भावः ॥

सम्प्रति रागस्यैव पापकर्मोपचयलक्षणमहाऽनर्थहेतुतां ख्यापयितुं हिंसाद्याश्रवनिमित्ततां पुनरीह च तद्द्वारेण दुःखजनकत्वं च सूत्रपञ्चकेनाह-रूपं प्रस्तावान्मनोज्ञमभिमुखं गच्छति रूपाभिगमः स चासावाशा च रूपानुगाशा, रूपविषयोऽभिलाष इति योऽर्थः, तदनुगतश्च जीवः, पठन्ति च-'रूवाणुवायाणुगए य जीवे'त्ति तत्र रूपाणां-मनोज्ञानामुपायैः-उपार्जनहेतुभिरनुगतो-युक्त उपायानुगतः स च प्राणी जीवान् 'चराचरान्' त्रसस्थावरान् 'हिनस्ति' विनाशयति 'अनेकरूपान्' जात्यादिभेदतोऽनेकविधान्, कांश्चित्तु 'चित्रैः' अनेकप्रकारैः स्वकायपरकायशस्त्रादिभिरुपायैरिति गम्यते सुब्व्यत्ययाद् यथासम्भवं चित्तेषु वा तानिति-चराचरजीवान् परीति-सर्वतस्तापयति-दुःखयति परितापयति बाल इव बालः-विवेकविकलतयाऽपरांश्च पीडयति एकदेशदुःखोत्पादनेनात्मार्थं गुरुः-स्वप्रयोजननिष्ठः 'क्लिष्टः' रागबाधितः ॥

अन्यच्च-रूपानुपातो रूपविषयोऽनुपातः अनुगमनमनुराग इतियावत् तस्मिंश्च सति 'परिग्रहणे' मूर्छात्मकेन हेतुना 'उत्पादने' उपार्जने रक्षणं च-अपायविनिवारणं सन्नियोगश्च-स्वपरप्रयोजनेषु सम्यग्व्यापारणं रक्षणसन्नियोगं तस्मिन् 'वये'त्ति 'व्यये' विनाशे 'वियोगे' विरहे सतोऽप्यनेककारणजनिते, सर्वत्र रूपस्येतिप्रक्रमः, क्व सुखं ?, न क्वचित्, किन्तु सर्वत्र दुःखमेवेति भावः, 'से' इति तस्य जन्तोः, इयमत्र भावना-रूपमूर्छितो हि रूपवत्करितुरङ्गमकलत्रादीनामुत्पादनरक्षणार्थं तेषु तेषु क्लेशहेतुषूपायेषु जन्तुः प्रवर्त्तते, तथा नियोज्यापि तथाविधप्रयोजनोत्पत्तौ रूपवत्कलत्रादि तदपायशङ्क्या पुनः पुनः परितप्यत एवेति सिद्धिमेवास्योत्पादनरक्षणसंनियोगेषु दुःखम्, एवं व्ययवियोगयोरपि भावनीयम्, अन्ये तु पठन्ति-'रूवानुरागेण परिग्गहेणं'ति, तत्र रूपानुरागेण हेतुना यः परिग्रहस्तेन, शेषं प्राग्वत्, स्यादेतत्मा भूदुत्पादनादिषु रूपस्य सुखं, सम्भोगकाले तु भविष्यतीत्याशङ्क्याह-'सम्भोगकाले च' उपभोगप्रस्तावे च 'अतित्तलाभे'त्ति तर्पणं तृप्तं तृप्तिरितियावत्तस्य लाभः-प्राप्तिस्तृप्तलाभो न तथाऽतृप्तलाभः, किमुक्तं भवति ?-बहुशोऽपि रूपदर्शने रागिणां न तृप्तिरस्ति, यतोऽन्यैरप्युक्तम्-

"न जातु कामः कामानामुपभोगेन शाम्यति।

हविषा कृष्णवर्त्मेव, भूय एवाभिवर्द्धते ॥"

तथा 'यथाऽभ्यासं किलवर्द्धन्ते विषया: कौशलानि चेन्द्रियाणा" मिति, तस्मिन् सति कुत्र सुखमिति सम्बन्ध:, उत्तरोत्तरेच्छया हि परितप्यत एव जन्तुरिति, पठन्ति च -' अतितिलाभे'त्ति तृप्तिप्राप्त्यभावे। आह- एवं परिग्रहाद् दु:खमनुभवतस्तद्भीरुतया ततो निवृत्तिर्दोषान्तरानारम्भणं वा किमस्य संभवतीत्याशङ्क्याह-रूपेऽतृप्तश्च परिग्रहे च-तद्विषयमूर्छात्मके सक्त:-सामान्ये-नैवासक्तिमान् उपसक्तश्च-गाढमासक्तस्तत: सक्तश्च पूर्वमुपसक्तश्च पश्चात् सक्तोपसक्त: 'नोपैति' नोपगच्छति 'तुष्टिं' परितोषं सन्तोषमितियावत्, तथा चातुष्टिरेव दोषोऽतुष्टिदोषस्तेन दु:खीयदि ममेदमिदं च रूपवद्वस्तु स्यादित्याकाङ्क्षातोऽतिशयदु:खवान्, स किं कुरुत इत्याह 'परस्य' अन्यस्य सम्बन्धि रूपवद्वस्त्विति गम्यते 'लोभाविल:' लोभकलुष:, यद्वा परेषां स्वं परस्वं प्रक्रमाद् यद्रूपवद्वस्तु तस्मिन् लोभो गार्ध्यं तेनाविल: परस्वलोभाविल: 'आदत्ते' गृह्णाति 'अदत्तम्' अनिसृष्ट परकीयमेव रूपवद्वस्त्विति गम्यते, अनेन रागस्यातिदुष्टतां ख्यापयितुं परिग्रहदोष-दर्शनेऽपि विशेषतस्तत्रासक्तिदोषान्तरारम्भणं चाभिहितं ॥

तत्किमस्यैतावानेव दोष उतान्योऽपि ? इत्याशङ्क्यायोक्तदोषानुवादेन दोषान्तरमप्याह-'तृष्णाभिभूतस्य' लोभाभिभूतस्य तत एवादत्तं हरति-गृह्णातीत्येवंशीलोऽदत्तहारी तस्य, तथा रूपे-रूपविषयो य: परिग्रहस्तस्मिन्निति योग:, चस्य भिन्नक्रमत्वादतृप्तस्य च तत्रासन्तुष्टस्य मायाप्रधानं मोसंति-मृषाऽलीकभाषणं मायामृषा 'वर्द्धते' वृद्धिं याति, कुत: पुनरिदमित्थम्

'लोभदोषात्' लोभापराधात्, लुब्धो हि परस्वमादत्ते आदाय च तद्गोपनपरो मायामृषा वक्ति, तदनेन लोभ एव सर्वाश्रवाणामति मुख्यो हेतुरित्युक्तं, तथा रागप्रक्रमेऽपि सर्वत्र लोभाभिधानं रागेऽपि लोभांशस्यैवातिदुष्टतावेदनार्थं, तत्रापि को दोष: ? इत्याह-'तत्रापि' मृषाभाषणेऽपि 'दु:खात्' असातात् 'न विमुच्यते' न विमुक्तिमाप्नोति स:; किन्तु: ?, दु:खभाजनमेव भवतीति भावार्थ:॥ दु:खाविमुक्तिमेव भावयति-'मोसस्से'त्ति मृषा, कोऽथ: ?-अनृतभाषणस्य पश्चाच्च पुरस्ताच्च 'प्रयोगकाले च' तद्भाषणप्रस्तावे च दु:खी सन् तत्र पश्चादिदमिदं च न मया सुसंस्थापितमुक्तमिति पश्चात्तापत: पुरस्ताच्च कथमयं मया वञ्चनीय इति चिन्ताव्याकुलत्वेन प्रयोगकाले च नासौ ममालीकभाषितां लक्षयिष्यतीति क्षोभत: तथा दुष्टोऽन्त:-पर्यवसानं तज्जन्मन्येकविडम्बनातो विनाशेन अन्यजन्मनि च नरकादिप्राप्त्या यस्यासौ दुरन्तो भवति जन्तुरिति गम्यते, तदेवं मृषाद्वारेणादत्तादानस्य दु:खहेतुत्वमुक्तं, यदा च 'मोसस्से'त्ति 'मोषस्य' स्तेयस्येति व्याख्या तदा साक्षादेव तस्य दु:खहेतुत्वाभिधानम्,

उपसंहारमाह-'एवम्' अमुनोक्तप्रकारेणादत्तानि 'समाददान:' गृह्णन् रूपेऽतृप्त: सन् दु:खितो भवति, कीदृश: सन् ? इत्याह-'अनिश्र:' दोषवत्तया सर्वजनोपेक्षणीय इति कस्य-चित्सम्बन्धिनाऽवष्टम्भेन रहित:, मैथुनरूपाश्रवोपलक्षणं चैतदिति, प्रसिद्धत्वाच्च रागिणां तस्य साक्षादनभिधानं, यद्वा रूपसम्भोगोऽपि मिथुनकर्मकत्वाद्देवानामिव मैथुनमेव, तथा च रागिवचनम्-

"आलोए चिय सा तेण पिययमा नेहनिब्भरमनेणं।
आभासियव्व अवगूहियव्व रमियव्व पीयव्व ॥" त्ति,

स च प्रकान्त:, एवमुत्तरत्रापि स्त्रीगतशब्दादिसम्भोगानां मैथुनत्वं सम्भावनीयम्। उक्तमो-

अथ निगमयितुमाह-रूपानुरक्तस्य नरस्य 'एवम्' अनन्तरसूत्रकदम्बकोक्तप्रकारेण कुतः सुखं भवेत् ? कदाचित्किञ्चित्, सर्वदा दुःखमेवेति भावः, किमित्येवं ?, यतः 'तत्र' रूपानुरागे 'उपभोगेऽपि' उपभोगावस्थायामपि 'क्लेशदुःखम्' अतृप्तिलाभतालक्षणबाधाजनितमसातम् उपभोगमेव विशिनष्टि-निर्वर्तयति' उत्पादयति यस्य-इत्युपभोगस्य कृते यदर्थं 'न' इति वाक्यालङ्कारे 'दुःखं' कृच्छ्रमात्मन इति गम्यते, उपभोगार्थं हि जन्तुः क्लिश्यति-तत्र सुखं स्यादिति यदा च तदाऽपि दुःखं तदा कुतोऽन्यदा सुखसम्भवः ? इति भावः ।

इत्थं रागस्यानर्थहेतुतामभिधाय द्वेषस्यापि तामतिदेष्टुमाह-'एवमेव' यथाऽनुरक्तस्यैव रूपे गतः प्रदोषं द्वेषम् 'उपैति' प्राप्नोति इहैवेति शेषः 'दुःखौघपरम्पराः' उत्तरोत्तरदुःखसमूहरूपाः, तथा प्रदुष्टं-प्रकर्षेण द्विष्टं चित्तं यस्य तथाविधः, यस्य भिन्नक्रमत्वात् 'चिनोति वा' बध्नाति कर्म, तत् शुभमपि संभवत्यत आह-यत् 'से' तस्य पुनर्भवति 'दुःखं' दुःखहेतुः 'विपाके' अनुभवकाले इह परत्र चेति भावः, पुनर्ग्रहणमैहिकदुःखापेक्षम्, अशुभकर्मोपचयश्च हिंसाद्याश्रवाविनाभावीति तद्धेतुत्वमनेनाक्षिप्यते ।

इत्थं रागद्वेषयोरुद्धरणार्हतां ख्यापयितुं तदनुद्धरणे दोषमभिधाय तदुद्धरणे गुणमाह-रूपे विरक्त उपलक्षणत्वादद्विष्टश्च 'मनुजः' मनुष्यः 'विशोकः' शोकरहितः संस्तन्निबन्धनयो रागद्वेषयोरभावात् 'एतेन' अनन्तरमुपदर्शितेन 'दुक्खोहपरंपरेण'ति दुःखानाम्-असातानामोघाः-सङ्घातास्तेषां परम्परा-सन्ततिर्दुःखौघपरम्परा तया 'न लिप्यते' न स्पृश्यते भवमध्येऽपि 'सन्' भवन्, संसारवर्त्त्यपीत्यर्थः ॥ दृष्टान्तमाह-जलेनेव वाशब्दस्योपमार्थत्वात् 'पुष्करिणीपलास' पद्मिनीपत्रं जलमध्येऽपि सदिति शेषः ।

इत्थं चक्षुराश्रित्य त्रयोदश सूत्राणि व्याख्यातानि, एतदनुसारेणैव शेषेन्द्रियाणां मनसश्च स्वविषयप्रवृत्तौ रागद्वेषानुद्धरणदोषाभिधायकानि त्रयोदश सूत्राणि व्याख्येयानि, नवरं 'श्रोत्रस्ये'ति श्रोत्रेन्द्रियस्य शब्द्यत इति शब्दो-ध्वनिस्तं 'मनोज्ञं' काकलीगीतादि 'अमनोज्ञं' खरकर्कशादि, तथा 'हरिणमियव्व मुद्धे'त्ति, मृगः सर्वोऽपि पशुरुच्यते, यदुक्तम्-"मृगशीर्ष् हस्तिजातौ, मृगः पशुकुरङ्गयोः" इति, हरिणस्तु कुरङ्ग एवेति तेन विशेष्यते, हरिणश्चासौ मृगश्च हरिणमृगः 'मुग्धः' अनभिज्ञः सन् 'शब्दे' गौरिगीतात्मकेऽतृप्तः-तदाकृष्टचित्ततया तत्रातृप्तिमान् ।

'घ्राणस्य' इति घ्राणेन्द्रियस्य गन्ध्यते-घ्रायत इति गन्धस्तं 'मनोज्ञं' सुरभिम् 'अमनोज्ञम्' असुरभिं, तथौषधयो-नागदमन्यादिकास्तासां गन्धस्तत्र गृद्धो-गृद्धिमानौषधिगन्धगृद्धः सन् 'सप्पबिलाओ विव'त्ति इवशब्दस्य भिन्नक्रमत्वात्सर्प इव बिलान्निष्क्रमन्, स ह्यत्यन्तप्रिय-(तप्रि)यतया तद्गन्धं सोढुमशक्नुवन् बिलान्निष्क्रामति ३ ।

'जिह्वया:' जिह्वेन्द्रियस्य रस्यते-आस्वाद्यत इति रसस्तं 'मनोज्ञं' मधुरादि 'अमनोज्ञं' कटुकादि तथा बडिशं-प्रान्तन्यस्तामिषो लोहकीलकस्तेन विभिन्नकायो-विदारितशरीरो बडिशविभिन्नकायः 'मत्स्यः' मीनो यथाऽऽमिषस्य-मांसादेर्भोगः-अभ्यवहारस्तत्र गृद्ध आमिषभोगगृद्धः ४ । काय इहस्पर्शनेन्द्रियं सर्वशरीरगतत्वख्यापनार्थं चास्यैवमुक्तं, तस्य स्पृश्यत इति स्पर्शस्तं 'मनोज्ञं' मृदुप्रभृति 'अमनोज्ञं' कर्कशादि शीतं-शीतस्पर्शवज्जलं-पानीयं तत्रावसन्नः-अवमग्नः शीतजलासन्नो ग्राहैः-जलचरविशेषैर्गृहीतः-क्रोडीकृतो ग्राह-

गृहीतो महिष इवारण्ये, वसति हि कदाचित्केनचिदन्मोच्येतापीत्यरण्यग्रहणम् ५।

'मनस' ...केनचिद् भाव:... अभिप्राय. न नोइन्द्रियमिति गृह्यते 'ग्रहणं' ग्राह्यं वदन्तीन्द्रियाविषयत्वात्तस्य, 'मनोज्ञं' मनोज्ञरूपादिविषयम् 'अमनोज्ञं' तद्विपरीतविषयम्, एवमुत्तरग्रन्थोऽपि भावविषयरूपाद्यपेक्षया व्याख्येय:, यद्वा स्वप्नाकामदशादिषुभावोपस्थापितो रूपादिरपि भाव उक्त:, स मनसो ग्राह्य:, स्वप्नकामदशादिषु हि मनस एव केवलस्य व्यापार इति, 'कामगुणेषु' मनोज्ञरूपादिषु 'गृद्ध:' आसक्त: 'करेणुमग्गावहिए व नागे' इति इवार्थस्य क्रमेण भिन्नक्रमत्वात् करेण्वाकरिण्या मार्गेण-निजपथेनापहृत:...आकृष्ट: करेणुमार्गापहृत: 'नाग इव' हस्तीव, स हि मदान्धोऽप्यदूरवर्त्तिनीकरेणुमुपदर्श्य तद्रूपादिमोहितस्तन्मार्गानुगामितया च गृह्यते संग्रामादिषु च प्रवेश्यते तथा च विनाशमाप्नोतीति दृष्टान्तत्वेनोक्त:, आह-

एव चक्षुरादीन्द्रियवशादेव गजस्य प्रवृत्तिरिति कथमस्यात्र दृष्टान्तत्वेनाभीधानम् ?, उच्यते, एवमेतत्, मन:प्राधान्यविवक्षया त्वेतन्नेयं, यदिवा तथाविधकामदशायां चक्षुरादीन्द्रियव्यापाराभावे मनस: प्रवृत्तिरिति न दोष:, इह चानानुपूर्व्यपि निर्देशाङ्गमितीन्द्रियाणामित्थमुपन्यास इत्यष्टसप्ततिसूत्रावयवार्थ: ॥ उक्तमेवार्थं सङ्क्षेपत उपसंहारव्याजेनाह -

मू. (१३४६)एविंदियत्था य मनस्स अत्था, दुक्खस्स हेउं मनुयस्स रागिणो।
ते चेव थेवंपि कयाइ दुक्खं, न वीयरागस्स करिंति किंचि ॥

वृ. 'एवम्' उक्तन्यायेन 'इन्द्रियार्था:' चक्षुरादिविषया रूपादय: चशब्दो भिन्नक्रमस्ततो मनसोऽर्थाश्च-उक्तरूपा उपलक्षणत्वादिन्द्रियमनांसि च दु:खस्य 'हेउं'त्ति हेतवो मनुजस्य रागिण:, उपलक्षणत्वाद् द्वेषिणश्च, विपर्यये गुणमाह- 'ते चेव' इन्द्रियमनोऽर्था: 'स्तोकमपि' स्वल्पमपि कदाचिद् दु:खं 'न' चैव वीतरागस्य उपलक्षणत्वाद्वीतद्वेषस्य कुर्वन्ति 'किञ्चिदि'ति शारीरं मानसं चेति सूत्रार्थ: ॥

ननु कश्चन कामभोगेषु सत्सु(न) वीतराग: संभवति, तत्कथमस्य दु:खाभाव ?, उच्यते

मू. (१३४७) न कामभोगा समयं उविंति, न यावि भोगा विगइं उविंति।
जे तप्पओसी य परिग्गही य, सो तेसु मोहा विगइं उवेइ ॥

वृ. 'न' नैव 'कामभोगा:' उक्तरूपा: 'समतां' रागद्वेषाभावरूपाम् 'उपयान्ति' उपगच्छन्ति हेतुत्वेनेति गम्यते, तद्धेतुत्वे हि तेषां न कश्चिद्रागद्वेषवान् भवेत्, न चापि 'भोगा:' भुज्यमानतया सामान्येन शब्दादय: 'विकृतिं' क्रोधादिरूपाम्, इहापि हेतुत्वेनोपयन्तीत्यन्यथा न कश्चन रागद्वेषरहित: स्यात्, को ऽनयोस्तर्हि हेतु: ?, इत्याह-य: 'तत्प्रदोषी च' तेषु-विषयेषु प्रद्वेषवान् 'परिग्रही च' परिग्रहबुद्धिमान्, तेष्वेव रागीत्युक्तं भवति, स 'तेषु' विषयेषु 'मोहात्' रागद्वेषात्मकात् मोहनीयात् विकृतिमुपैति, रागद्वेषरहितस्तु समतामित्यर्थादुक्तम्, उक्तं हि पूर्वं-'सतोरेव रागद्वेषयोरुदीरकत्वेन शब्दादयो हेतव' इति, आह-"समो य जो तेसु स वीयरागो" इत्यनेन गतार्थमेतत्, सत्यं, तस्यैव त्वयं प्रपञ्च:, उक्तं हि 'त एव विधय: सुसंगृहीता भवन्ती येषां लक्षणं प्रपञ्चश्चोच्यते' इति सूत्रार्थ: ॥ किंस्वरूपा: पुनरसौ विकृतिर्यां रागद्वेषाशादुपैतीत्याह-

मू. (१३४८) कोहं च मानं च तहेव मायं, लोभं दुगुंछं अरइं रइं च।
हासं भयं सोगपुमित्थिवेयं, नपुंसवेयं विविहे य भावे ॥

मू. (१३४९) आवज्जई एवमणेगरूवे, एवंविहे कामगुणेसु रत्तो।
अन्ने य एयप्पभवे विसेसे, कारुन्नदीणे हिरिमे वइस्सो॥

वृ. क्रोधं च मानं च तथैव मायां लोभं-चतुष्टमप्युक्तरूपं 'जुगुप्सां' चिकित्साम् 'अरतिं' अस्वास्थ्यं 'रतिं च' विषयासक्तिरूपां 'हासं च' वक्रविकाललक्षणं 'भयं' साध्वसं शोकपुंस्त्रीवेदमिति समाहारनिर्देशः ततः शोकं-प्रीयविप्रयोगजं मनोदुःखात्मकं पुंवेदं-स्त्रीविषयाभिलाषं स्त्रीवेदं-पुरुषाभिष्वङ्गं 'नपुंसकवेयं'ति नपुंसकवेदम्-उभयाभिलाषं 'विविधांश्च' नानाविधान् 'भावान्' हर्षविषादादीनाभिप्रायान् आपद्यते' प्राप्नोति, 'एवम्' अमुना रागद्वेषवत्तालक्षणेन प्रकारेण 'अनेकरूपान्' बहुभेदाननन्तानुबन्ध्यादिभेदेन तारतम्यभेदेन च 'एवंविधान्' उक्तप्रकारान् विकारानिति गम्यते, 'कामगुणेषु' शब्दादिषु 'सक्तः' अभिष्वङ्गवान् उपलक्षणत्वाद् द्विष्टश्च, अन्यांश्च 'एतदीनः कारुण्यदीनो मध्यमपदलोपी समासोऽत्यन्तदीन इत्यर्थः, 'हिरिमे'त्ति 'ह्रीमान्' लज्जावान्, कोपाद्यापन्नो ही प्रीतिविनाशादिकमिहैवानुभवन् परत्र च तद्विपाकमतिकटुकं विभावयन् प्रायोऽतिदैन्यं लज्जां च भजते, तथा 'वइस्स'त्ति आर्षत्वात् 'द्वेष्यः' तत्तद्दोषदुष्टत्वात्सर्वस्याप्रीतिभाजनमिति सूत्रद्वयार्थः॥

यतश्चैवं रागद्वेषावेव दुःखमूलभतः प्रकारान्तरेणापि तयोरुद्धरणोपायाभिधानार्थं तद्विपर्यये दोषदर्शनार्थं चेदमाह-

मू. (१३५०) कप्पं च इच्छेज्ज सहायलिच्छू, पच्छानुतावेण तवप्पभावं।
एवं विकारे अमियप्पयारे, आवज्जई इंदियचोरवस्से॥

वृ. कल्पते-स्वाध्यायादिक्रियासु समर्थो भवतीति कल्पो-योग्यस्तम्, अपेर्गम्यमानत्वात्कल्पमपि, किं पुनरकल्पं ?, शिष्यादीति गम्यते, 'नेच्छेत्' नाभिलषेत् 'सहायलिच्छू'त्ति बिन्दोरलाक्षणिकत्वात्, 'सहाये(यं')लिप्सुः ममासौ शरीरसंबाधनादि साहाय्यं करिष्यतीत्यभिलाषुकः सन्, तथा पश्चादिति-प्रस्तावाद्व्रतस्य तपसो वाऽङ्गीकारादुत्तरकालमनुतापः-किमेतावन्मया कष्टमङ्गीकृतमिति चित्तबाधात्मको यस्य स तथाविधः चशब्दादन्यादृशश्च सम्भूतयतिवद् भवान्तरे भोगस्पृहयालुः, तपःप्रभावं प्रक्रमाच्चेच्छेद, यथा-न शक्यमङ्गीकृतं त्यक्तुं परं यद्यस्य व्रतस्य तपसो वा फलमस्ति तत एतस्मादिहैवामषौष्ध्यादिलब्धिरस्तु, तदन्यादृशापेक्षया तु भवान्तरे शक्रचक्रिविभूत्यादि भूयादिति किमेव निषिध्यते ? इत्याह-'एवम्' अमुना प्रकारेण 'विकारान्' दोषान् 'अमितप्रकारान्' अपरिमितभेदान् 'आपद्यते' प्राप्नोति इन्द्रियाणि चौरा इव धर्मसर्वस्वापहरणाद् इन्द्रियचौरास्तद्वश्यः-तदायत्तः, उक्तविशेषणविशिष्टस्य हि कल्प्यतपःप्रभाववाञ्छारूपेण स्पर्शनादीन्द्रियवश्यताद्दवश्यसंभाविनी ततश्चोत्तरोत्तरविशेषानभिलषतः संयमं प्रति चित्तविप्लुत्यवधावनादिदोषा अपि संभवन्त्येवेति, एवं च ब्रुवतोऽयमाशयः-तदनुग्रहबुद्धा कल्प पुष्टालम्बने च तपःप्रभावं च वाञ्छतोऽपि न दोषः, अथवा कल्पमुक्तरूपं नेच्छेत्सहायलिप्सुं यदि कथञ्चनामी मम धर्मसहाया भवन्तीत्येवमभिलाषुकमप्यास्तामन्यमिति भावः, जिनकल्पिकापेक्षं चैतत्, एतेन च रागस्य हेतुद्वयपरिहरणमुद्धरणोपाय उक्तः, उपलक्षणं चैतदीदृशामन्येषामपि रागहेतूनां च परिहारस्य, ततः सिद्धं द्वयोरप्युद्धरणोपायानां तद्विपर्यये च दोषाणामभिसन्धानमिति सूत्रार्थः॥ अनन्तरं रागद्वेषोद्ध-

रणोपायविपर्यये यो दोष उक्तस्तमेव दोषान्तरहेतुनाऽभिधानद्वारेण समर्थयितुमाह

मू.(१३५१) तओसि जायंति पओअणाइं, निमज्जिउं मोहमहन्नवंमि।
सुहेसिणो दुक्खविनोय (मुक्ख) नट्ठा, तप्पच्चयं उज्जमए अरागी॥

वृ. 'ततः' इति विकारापत्तेरनन्तरं 'से' तस्य 'जायन्ते' उत्पद्यन्ते 'प्रयोजनानि' विषयसेवन-प्राणिहिंसादीनि 'निमज्जितु'मित्यन्तर्भावितण्यर्थत्वान्निमज्जयितुमिव निमज्जयितुं प्रक्रमात्तमेव जन्तुं मोहो महार्णव इवातिदुस्तरतया मोहमहार्णवस्तस्मिन्, किमुक्तं भवति ?-यैर्मोहमहार्णवनिमग्न इव जन्तुः क्रियते स ह्युत्पन्नविकारतया मूढ एवासीत् विषयासेवनादिभिश्च प्रयोजनैः, सुतरां मुह्यतीति, कीदृशस्य पुनरस्य किमर्थं चैवंविधप्रयोजनानि जायन्ते ? इत्याह-'सुखैषिणः' सुखाभिलषणशीलस्य 'दुःखविनोदार्थं' दुःखपरिहारार्थं पाठान्तरतो दुःखविमोनाय वा, सुखैषितायां हि दुःखपरिहाराय विषयसेवनादिप्रयोजनसम्भव इति भावः, कदाचिदेवंविध-प्रयोजनोत्पत्तावपि तत्रायमुदासीन एव स्याद् ?, अत्रोच्यते-'तत्प्रत्ययम्' उक्तरूपप्रयोजननि-मित्तं पाठान्तरतस्तत्प्रत्ययादुत्पन्नेति चशब्दस्यैवकारार्थत्वात्तत्प्रत्ययादुत्पन्नेत्येव, कोऽर्थः ?-तत्र वृत्ता-वुत्सहत एव, 'रागी' रागवानुपलक्षणत्वाद् द्वेषी च सन्, रागद्वेषयोरेव सकलानर्थस्य परम्परा-कारणत्वादिति सूत्रार्थः॥ किमिति रागद्वेषवतः सकलाऽप्यनर्थपरम्परोच्यते ? इत्याशङ्क्याह-

मू.(१३५२) विरज्जमाणस्स य इंदियत्था, सद्दाइया तावइयप्पगारा।
न तस्स सव्वेपि मणुन्नयं वा, निव्वत्तयंती अमणुन्नयं वा॥

वृ.विरज्यमानस्येति उपलक्षणत्वादद्विषतश्च 'चः' पुनरर्थे ततो विरज्यमानस्याद्विषतश्च पुनः 'इन्द्रियार्थाः' शब्दादिकाः पाठान्तरतो वर्णादिका वा तावन्त इति यावन्तो लोके प्रतीताः प्रकाराः खरमधुरादिभेदा येषां ते तावत्प्रकाराः, बहुप्रभेदा इत्यर्थः, न 'तस्य' इति मनुजस्य 'सर्वेऽपि' समस्ता अपि मनोज्ञतां वा 'निर्वर्त्तयन्ति' जनयन्त्यमनोज्ञतां वा(निर्वर्त्तयन्ति)किन्तु ?, रागद्वेषवत एव, स्वरूपेण हि रूपादयो न मनोज्ञतामनोज्ञतां वा कर्त्तुमात्मनः क्षमाः किन्तु रक्ततर-प्रतिपत्रध्यवसायवशाद्, उच्यते चान्यैरपि-

"परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ।
कृणपं कामिनी भक्ष्यमिति तिस्रो विकल्पनाः॥"

ततो वीतरागस्य तन्निर्वर्त्तनहेत्वभावात्कथममी मनोज्ञतामनोज्ञतां वा निर्वर्त्तयेयुः ?, तदभावे च कथं विषयसेवनाक्रोशदानादिप्रयोजनोत्पत्तिः ? इति, पूर्वं सति मनोज्ञत्वेऽमनोज्ञत्वे च समस्य रूपादीनामकिञ्चित्करत्वमुक्तम्, इह तु मनोज्ञत्वामनोज्ञत्वे अपि तादृशस्य न भवत एवेत्युच्यत इति पूर्वस्याद्विशेष इति सूत्रार्थः॥ तदेवं "जे जे उपाया पडिवज्जियव्व"त्ति प्रतिज्ञातरागद्वेषयोर्मोहस्य च परस्परायतनत्वेऽपि रागद्वेषयोरतिदुष्टत्वात्साक्षात् मोहस्य च तदायतनत्वात्तद्वारेणोद्धरणोपायान् प्रतिपत्तव्यान्निरूपप्य यदा तु "जे जे अवाया परिवज्जि-यव्व"त्ति(पाठः) तदा रसनिषेवणादीनपायानुक्तन्यायतोऽभिधायोपसंहरन्नाह-

मू.(१३५३) एवं ससंकप्पविकप्पणासुं, संजायइ समयमुवट्ठियस्स।
अत्थे य संकप्पयओ तओ से, पहीयए कामगुणेसु तण्हा॥

वृ. 'एवम्' उक्तप्रकारेण स्वस्य आत्मनः संकल्पाः-प्रक्रमाद्रागद्वेषमोहरूपाध्य-

वसायास्तेषां विकल्पना: सकलदोषमूलत्वादिपरिभावना: स्वसङ्कल्पविकल्पनास्तासूपस्थितस्य-उद्यतस्येति सम्बन्ध:, किमित्याह- 'संजायते' समुत्पद्यते 'समयं'ति आर्षत्वात् 'समता' माध्यस्थमर्थान् इन्द्रियार्थान् कर्णादीन्द्रियभिन्नकरणत्वात्सङ्कल्पयतश्च- यथा नैवैते ऽपायहेतव: किन्तु ? रागादय एवेत्युक्तनीत्या चिन्तयतो यदिवा समता-परस्परमध्यवसायतुल्यता सा चानिवृत्तिबादरसम्परायगुणस्थान एव, एतत्प्रतिपत्तृणां हि बहूनामप्येकरूप एवाध्यवसाय इत्यनयैतदुपलक्ष्यते, तथा 'अर्थान्' जीवादीन् 'संकल्पयतश्च' शुभध्यानविषयतयाऽध्यवस्यत: 'तत:' इति समतायाः 'से' तस्य जन्तो: (साधो:) 'प्रहीयते' प्रकर्षेण हानिं याति, काऽसौ ?- 'कामगुणेषु' रूपादिषु 'तृष्णा' अभिलाषो लोभ इतियावत्, समतायां हि द्विविधायामपि प्राप्तायामुत्तरोत्तरगुणस्थानावाप्त्या क्षीयत एव लोभ इति। अथवा 'एवम्' उक्तप्रकारेण 'समकम्' एककालम् 'उपस्थितस्य' उद्यतस्य रागाद्युद्धरणोपायेष्विति प्रक्रम:, यदिवा 'समयम्' एतदभिधायकं सिद्धान्तं प्रतीति शेष: 'उपस्थितस्य' तदुक्तार्थानुष्ठानोद्यतस्येत्यर्थ:, किमित्याह- स्वसङ्कल्पानाम् आत्मसम्बन्धिनां रागाद्यध्यवसायानां विकल्पना-विशेषेण छेदनं स्वसङ्कल्पविकल्पना, दृश्यते हि छेदवाच्यपि कल्पशब्द:, यथोक्तम्-

"सामर्थ्ये वर्णनायां च, छेदने करणे तथा।
औपम्ये चाधिवासे च, कल्पशब्दं विदुर्बुधा: ॥"

'आसु'ति 'आशु' शीघ्रं 'संजायते' भवति, पठन्ति च-'ससंकप्पविकप्पणासो'त्ति, तथा 'अत्थे असंकप्पयतो'त्ति, तत्र, च स्वस्य-आत्मन: सङ्कल्प:-अध्यवसायस्तस्य विकल्परागादयो भेदास्तेषां नाश:-अभाव: स्वसङ्कल्पविकल्पनाश:, तथा को गुण: ? इत्याह-'अर्थान्' रूपादीन् 'असङ्कल्पयत:' रागादिविषयतयाऽनध्यवस्यत: 'तत:' इति स्वसङ्कल्पविकल्पनात: स्वसंकल्पविकल्पनाशाद्वा 'से' तस्य प्रहीयते कामगुणेषु तृष्णेति सूत्रार्थ: ॥

तत: स कीदृश: सन् किं विधत्ते ? इत्याह-

मू.(१३५४) सो वीयरागो कयसव्वकिच्चो, खवेइ नाणावरणं खणेणं।
तहेव जं दरिसणमावरेइ, जं चंतरायं पकरेइ कम्मं ॥

वृ. 'स:' इति हीनतृष्ण: 'वीतराग:' विगतरागद्वेषो भवति, तृष्णा हि लोभस्तत्क्षये च क्षीणकषायगुणस्थानावाप्तिरिति, तथा कृतसर्वकृत्य इव कृतसर्वकृत्य: प्राप्तप्रायत्वादनने मुक्ते: 'क्षपयति' क्षयं नयति 'ज्ञानावरणं' वक्ष्यमाणस्वरूपं 'क्षणेन' समयेन तथैव यद् 'दर्शनं' चक्षुर्दर्शनादि 'आवृणोति' स्थगयति दर्शनावरणमित्यर्थ:, यच्च 'अन्तरायं' दानादिलब्धिविघ्नं प्रकरोति 'कर्म' अन्तरायनामकमित्युक्तं भवति, स हि क्षपितमोहनीयस्तीर्णमहासागर इव श्रमोपेतो विश्राम्यान्तर्मुहूर्तं तद्विचरसमये निद्राप्रचले देवगत्यादिनामप्रकृतीश्च क्षपयति, चरमसमये च ज्ञानावरणादित्रयमिति सूत्रार्थ: ॥ तत्क्षयाच्च कं गुणमवाप्नोति ? इत्याह-

मू.(१३५५) सव्वं तओ जाणइ पासई य, अमोहणो होइ निरंतराए।
अणासवे झाणसमाहिजुत्तो, आउक्खए मुक्खमुवेइ सुद्धे ॥

वृ.'सर्वं' निरवशेषं 'तत:' ज्ञानावरणादिक्षयात् 'जानाति' विशेषरूपतयाऽवगच्छति पश्यति च सामान्यरूपतया 'च:' समुच्चयार्थ:, तत एतेन भेदविषयत्वात्समुच्चयस्य पृथगुपयोगत्व-

मनयोः सूच्यते, ततश्च यदुक्तं युगपदुपयोगवादिनः

"मनपज्जवणाणंतो नाणस्स य दंसणस्स य विसेसो ।
केवलनाणं पुन दंसणंति नाणंति य समाणं ॥ त्ति,

तन्निराकृतं भवति, तथा प्रज्ञप्त्यामभिहितम्- "जं समयं जाणंति नो तं समयं पासंति, तथा केवली णं भंते ! इम रयणप्पमं पुढविं आगरेहिं हेऊहिं पमाणेहिं संठाणेहिं परिवारेहिं जं समयं जाणइ नो तं समयं पासति ?, हंता गोयमा ! केवली न" मित्यादि, न चात्र केवलिशब्देन छद्मस्थ एव श्रुतकेवल्यादिर्विवक्षित इति वाच्यं, यत इहाद्यसूत्रे स्नातक एव प्रस्तुतः, स च धाति-कर्मक्षयादेव भवतीति न तस्य छद्मस्थता संभवेत्, द्वितीयसूत्रे तु परमाणुदर्शनमेव प्रक्रान्तं, तस्य च केवलं विना परमावधेस्ततो वा किञ्चिन्न्यूनस्यैव सम्भवस्तत्र च तौ व्यवच्छेदितावितिकेवलमेवावशिष्यते, उक्तं च पूज्यैः-

"ते दोऽवि विसेसेउं अन्नो छउमत्थकेवली को सो ? ।
जो पासइ परमाणुं गहणमिहं जस्स होज्जाहि ॥"

न चैवमप्यस्मिन् विशेषवति सूत्रे परवक्तव्यतैवेयमित्युपगन्तुमुचितम्, उक्तं हि-

"[illegible] परमयमेगंतरोवओगोत्ति ।
न पुन उभओवओगा परवत्तव्वत्ति का बुद्धी ? ॥"

इत्यादि कृतं प्रसङ्गेन प्रकृतमुच्यते-तथा चामोहनः-मोहरहितो भवति, तथा निष्क्रान्तोऽन्तरायो(यात्) निरन्तरायोऽनाश्रवः प्राग्वत्, ध्यानं- शुक्लध्यानं तेन समाधिः-परमस्वाथ्यं तेन युक्तः-सहितो ध्यानसमाधियुक्तः आयुष उपलक्षणत्वान्नामगोत्रवेद्यानां च क्षय आयुः-क्षयस्तस्मिन् सति मोक्षम् 'उपैति' प्राप्नोति 'शुद्धः' विगतकर्ममल इति सूत्रार्थः ॥

मू. (१३५६) सो तस्स सव्वस्स दुहस्स मुक्खो, जं बाहई सययं जंतुमेयं ।
दीहामयविप्पमुक्को पसत्थो, तो होइ अच्चंतसुही कयत्थो ॥

वृ. 'सः' इति मोक्षप्राप्तो जन्तुः 'तस्मात्' इति जातिजरामरणरूपत्वेन प्रतिपादितात् 'सर्वस्मात्' निरवशेषाद् दुःखात् सर्वत्र सुब्व्यत्ययेन षष्ठी 'मुक्तः' पृथग्भूतः, यत् कीदृशमित्याह-'यद्' दुःखं 'बाधते' पीडयति 'सततम्' अनवरतं 'जन्तुं' प्राणिनम् 'एनं' प्रत्यक्षमनुभवोपदर्शनमेतत्, दीर्घाणि यानि स्थितितः प्रक्रमात्कर्माणि तान्यामया इव-रोगा इव विविध-बाधाविधायितया दीर्घामयास्तेभ्यो विप्रमुक्तो दीर्घामयविप्रमुक्तः अत एव 'प्रशस्तः' प्रशंसार्हः, ततः किमित्याह-'तो' इति 'ततः' दीर्घामयविप्रमोक्षाद् 'भवति' जायतेऽत्यन्तम्-अतिक्रान्त-पर्यन्तं सुखं-शर्म तदस्यास्तीत्यत्यन्तसुखी तत एव च 'कृतार्थः' कृतसकलकृत्य इति सूत्रार्थः ॥

मू. (१३५७) अनाइकालप्पभवस्स एसो, सव्वस्स दुक्खस्स पमुक्खमग्गो ।
वियाहिओ जं समुविच्च सत्ता, कमेण अच्चंतसुही भवंति ॥ तिबेमि ॥

वृ. 'अनादिकालप्रभवस्य' अनादिकालोत्पन्नस्य 'एषः' अनन्तरोक्तः सर्वस्य दुःखस्य 'प्रमोक्षमार्गः' प्रमोक्षोपायः, पाठान्तरतश्च संसारचक्रस्य विमोक्षामार्गो, व्याख्यातः, यः कीदृशः ? इत्याह-'यं' दुःखप्रमोक्षमार्गं 'समुपेत्य' सम्यक् प्रतिपद्य 'सत्त्वाः' प्राणिनः 'क्रमेण' उत्तरोत्तर-गुणप्रतिपत्तिरूपेणात्यन्तसुखिनो भवन्तीति सूत्रार्थः ॥

इति परिसमाप्तौ, ब्रवीमिति पूर्ववत्। अवसितोऽनुगमो, नयाश्च प्राग्वत्॥

अध्ययनं ३२ समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
द्वात्रिंशमध्ययनं सनिर्युक्तिः सटीकं परिसमाप्तम्

अध्ययनं-३३-कर्मप्रकृतिः

वृ. व्याख्यातं प्रमादस्थानाख्यं द्वात्रिंशमध्ययनमिदानीं त्रयस्त्रिंशमारभ्यते, अस्य चायमभिसम्बन्धः- इहानन्तराध्ययने प्रमादस्थानान्युक्तानि, तैश्च 'मिथ्यात्वाविरतिप्रमादकषाययोगा बन्धहेतवः' इतिवचनात्कर्म बध्यते, तस्य च काः प्रकृतयः ? कियती वा स्थितिः ? इत्यादिसन्देहापनोदायेदमारभ्यते, अस्य च चतुरनुयोगद्वारचर्चा प्राग्वद्यावन्नामनिष्पन्ननिक्षेपे कर्मप्रकृतिरिति नाम, अतः कर्मणः प्रकृतेश्च निक्षेपाभिधानायाह निर्युक्तिकृत्-

नि. [५३१] कम्मंमि अ निक्खेवो चउव्विहो० ॥

नि. [५३२] जाणगभवियसरीरे तव्वइरित्ते च तं भवे दुविहं।
कम्मे नोकम्मे या कम्मंमि अ अनुदओ भणिओ॥

नि. [५३३] नोकम्मदव्वकम्मं नायव्वं लेप्पकम्ममाईअं।
भावे उदओ भणिओ कम्मट्ठविहस्स नायव्वो॥

नि. [५३४] निक्खेवो पयडीए चउव्वि०॥

नि. [५३५] जाणगभवियसरीरे तव्वइरित्ते च तं भवे दुविहं।
कम्मे नोकम्मे या कम्मंमि अ अनुदओ भणिओ॥

नि. [५३६] नोकम्मे दव्वाइं गहणपाउग्गमुक्कगाइं च।
भावे उदओ भणिओ मूलपयडि उत्तराणं च॥

वृ. कम्मंमीत्यादि गाथाः षट् सुगमाः नवरं 'कर्मणि' ज्ञानावरणादिके उदयो-विपाकस्तद्भावोऽनुदयो भणितः, किमुक्तं भवति ?-अनुदयावस्थं कर्मैव कर्मकार्याकरणात् तद्व्यतिरिक्तं द्रव्यकर्म, नोकर्मद्रव्यकर्म ज्ञातव्यं लेप्यकर्मादिकम्, आदिशब्दात्काष्ठकर्मादिपरिग्रहः, नोकर्मता चास्य ज्ञानावरणादिकर्माभावरूपत्वात्, द्रव्यकर्मता च द्रव्यस्याप्रतिमादेः क्रियमाणत्वात्, 'भावे' विचार्ये प्रक्रमात्कर्म 'उदयः' विपाकः 'भणितः' उक्तः, अयं च कस्य सम्बन्धी ज्ञायताम् ? इत्याह-'कम्मट्ठविहस्स'त्ति प्राग्वदष्टविधकर्मणो ज्ञातव्यो, ज्ञानावरणाद्यष्टविधकर्मोदयावस्थं भावकर्म, तस्यैव कर्मकार्यकरणादिति भावः।

प्रकृतिनिक्षेपे कर्मणि-मूलप्रकृत्यादिरूपेऽनुदयस्तद्व्यतिरिक्ता द्रव्यप्रकृतिः, नोकर्मणि द्रव्याणि ग्रहणप्रायोग्यानि यान्यद्यापि तावन्न गृह्यन्ते ग्रहणयोग्यता चास्ति येषाम्, आर्षत्वात्सुपो लुक्, तथा मुक्तान्येव मुक्तकानि-यानि कर्मतया परिणमय्य प्रोज्झितानि यथाक्रमं पुरस्कृतपश्चात्कृतपर्यायत्वाद्, 'भाव' इति भावे विचार्ये 'उदयः' विपाकः 'भणितः' उक्तः प्रकृतिरिति प्रक्रमः, कासामित्याह-'मूलपगडि उत्तराणं च' त्ति मूलप्रकृतीनामुत्तरप्रकृतीनां चेहैव वक्ष्यमाणानामिति॥ इत्यवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं।

मू. (१३५८) *अट्ठ कम्माइं वुच्चंति, आनुपुव्वि जहक्कमं ।*
जेहिं बद्धे अयं जीवे, संसारे परिवत्तए ॥

वृ. 'अष्ट' इत्यष्टसङ्ख्यानि क्रियन्ते मिथ्यात्वादिहेतुभिर्जीवेनेति कर्माणि 'वक्ष्यामि' प्रतिपादयिष्ये 'आनुपुव्वि'न्ती प्राग्वत्सुब्व्यत्ययादानुपूर्व्या, इयं च पश्चानुपूर्व्यादिरपि संभवत्यत आह-'यथाक्रमं' क्रमानतिक्रमेण पूर्वानुपूर्व्येतियावत्, पठन्ति च 'सुणेह मे' इति प्राग्वत्, यानि कीदृशीत्याह-'यैः' कर्मभिः 'बद्धः' श्लिष्टः 'अय'मिति प्रतिप्राणिस्वसंवेद्यो जीवः संसारे परिवर्तते ऽनन्तादिविविधपर्यायानुभवनतोऽन्यथा च अन्यथा च भवति परिभ्रमति वा पाठान्तरत इति सूत्रार्थः ॥ यथाप्रतिज्ञातमाह-

मू. (१३५९) *नाणस्सावरनिज्जं, दंसणावरणं तहा ।*
वेयनिज्जं तहा मोहं, आउकम्मं तहेव य ॥
मू. (१३६०) *नामकम्मं च गोयं च, अंतरायं तहेव य ।*
एवमेयाइं कम्माइं, अट्ठेव य समासओ ॥

वृ. ज्ञायतेऽनेनेति ज्ञानम्-अवबोधस्तस्य आव्रियते-सदप्याच्छाद्यतेऽनेन पटेनेव विवस्वत्प्रकाश इत्यावरणीयं 'कृत्यल्युटो बहुल' मिति वचनात्करणेऽनीयः, दृश्यतेऽनेनेति दर्शनं-सामान्यावबोधस्तदाव्रियते वस्तुनि प्रतीहारेणेव नृपतिदर्शनमनेनेति दर्शनावरणं, तथा वेद्यते सुखदुःखतयाऽनुभूयते लिह्यमानमधुलिप्तासिधारावदिति वेदनीयं, तथा मोहयति जानानमपि मद्यपानवद्विचेतनाजननेनेति मोहस्तम्, आयाति-आगच्छति स्वकृतकर्मवाशान्नरकादिकुगतेर्निष्क्रमितुमनसोऽप्यात्मनो निगडवत्प्रतिबन्धकतामित्यायुः तदेव कर्म आयुःकर्म तथैव च ।

नमयतिगत्यादिविविधभावानुभवनं प्रत्यात्मानं प्रवणयति चित्रकर इव करितुरगादिभावं प्रति रेखाकृतिमिति नामकर्म, 'चः' समुच्चये, गीयते-शब्द्यते उच्चावचैः शब्दैः कुलालादिव मृद्द्रव्यमत आत्मेति गोत्रं तच्च अन्तरा-दातृप्रतिग्राहकयोरन्तर्भाण्डागारिकवद्विघ्नहेतुतयाऽयते-गच्छतीत्यन्तरायं तथैव च सर्वत्रासदपि कर्मेति संबध्यते, उपसंहारमाह-'एवम्' अमुना प्रकारेणैतानि कर्माण्यष्टैव 'तुः' पूरणे 'समासातः' सङ्क्षेपेण, विस्तरतस्तु यावन्तो जन्तुभेदास्तावन्त्यपि तावन्तीत्यनन्तान्येवेति भावः ॥

अत्र च ज्ञानदर्शनस्वतत्त्वोऽयमात्मेत्यन्तरङ्गत्वात्तयोरादितस्तदावरणोपादानं, समानेऽपि च तयोरन्तरङ्गत्वे ज्ञानोपयोग एव सर्वलब्धीनामवाप्तिः, यदुक्तम्-"सव्वाओ लद्धीओ सागारोवओगाउत्तस्स" त्ति, अतो ज्ञानस्य प्राधान्यमिति तदावरणस्य प्रथमस्तदनु दर्शनावरणस्य ततः केवलिनोऽप्येकविधबन्धकस्य सातबन्धोऽस्तीति व्यापित्वाद्वेदनीयस्य ततोऽपि प्रायः संसारिणामिष्टानिष्टविषयसम्बन्धात्सुखदुःखे इष्टानिष्टता च रागद्वेषाभ्यां तद्रूपं च प्रायो मोहनीयमिति तस्य ततश्चैतत्प्रकर्षापकर्षभावित्वादायुर्निबन्धनानांबह्वारम्भपरिग्रहत्वाल्पारम्भपरिग्रहत्वादीनां तदुद्भवं चायुष्कमिति तस्य तदुदयश्च प्रायो गत्यादिनामोदयाविनाभावीति ततो नाम्नः ततोऽपि च नरकादिनामोदयसहभाव्येव गोत्रकर्मोदय इति गोत्रस्य ततश्चोच्चनीचभेदभिन्नात्प्रायो दानादिलब्धिभावाभावौ तयोश्चान्तरायक्षयोदयावन्तरङ्गहेतू इति तदनन्तरमन्तरायस्येति सूत्रद्वयार्थः ॥ इत्थं कर्मणो मूलप्रकृतीरभिधायोत्तरप्रकृतीराह-

मू.(१३६१) *नाणावरणं पंचविहं, सुअं आभिनिबोहियं।*
ओहिं नाणं तईयं, मननाणं च केवलं॥

वृ. नाणावरणेत्यादि सूत्रादि द्वादश, ज्ञानावरणं 'पञ्चविधं' पञ्चप्रकारं, तच्च कथं पञ्चविधमित्याशङ्कायामावर्यभेदादेवेहावरणस्य भेद इत्यभिप्रायेणावार्यस्य ज्ञानस्यैव भेदानाह- श्रुतमाभिनिबोधिकमवधिज्ञानं तृतीयं मनोज्ञानं च केवलम्, एतत्स्वरूपं मोक्षमार्गाध्ययन एवोक्तम्-

मू.(१३६२) *निद्दा तहेव पयला निद्दानिद्दा य पयलपयला य।*
तत्तो य थीणगिद्धी पंचमा होइ नायव्वा॥

वृ. निद्राणं निद्रा, सा चेह सुखप्रतिबोधोच्यते, यदुक्तम्-''सुहपडिबोहो निद्द''त्ति, 'तथैवे'ति तेनैव निद्रावत्किञ्चिच्छुभरूपतात्मकेन प्रकारेण प्रचलत्यस्यामासीनोऽपीति प्रचला, उक्तं हि-''पयला होति ठियस्स उ''त्ति, 'निद्रानिद्रा च' अतिशयनिद्रा दुःखप्रतिबोधात्मिकाऽतिशयख्यापनार्थत्वाद् द्विरुच्चारणस्य, यदुक्तम्-''दुहपडिबोहो य निद्दनिद्द''त्ति, एवं 'प्रचलाप्रचला' प्रचलाऽतिशायिनी, सा हि चंक्रम्यमाणस्यापि भवति, यथोक्तम्-''पयलापयला उ चंकमओ''त्ति, चशब्दावुभयत्र तुल्यताख्यापकौ, द्वे अपि ह्यशुभतया तुल्ये एवैते, तत उपरीति शेषस्तच्च प्रकृष्टतराशुभानुभावतस्ताभ्य उपरिवर्त्तीति रूपाणि संहतीनचिन्तितार्थः स्त्यानगृद्धिर्वा यस्यां सा स्त्यानर्द्धिः स्त्यानगृद्धिर्वा, प्राच्यश्चः समुच्चयार्थं इह योज्यते, एतदुदये च वासुदेवबलार्द्धबलः प्रबलरागद्वेषोदयवांश्च जन्तुर्जायते, अत एव परिचिन्तितार्थसाधन्यसावुच्यते, यदुक्तम्-''थीणद्धी पुन दिनचिंतियस्स अत्थस्स साहणी पायं''त्ति, 'तुः' पूरणे पञ्चमी भवति ज्ञातव्या।

मू.(१३६३) *चक्खुमचक्खुओहिस्स दंसणे केवले य आवरणे।*
एवं तु नवविगप्पं नायव्वं दंसणावरणं॥

वृ. 'चक्खूमचक्खूओहिस्स'त्ति मकारोऽलाक्षणिकः, ततश्चक्षुश्चाचक्षुश्चावधिश्च चक्षुरचक्षुरवधीति समाहारस्तस्य दर्शन इति च प्रत्येकं दर्शनशब्दो योज्यते ततश्चक्षुर्दर्शने-चक्षुषा रूपसामान्यग्रहणे अचक्षूंषि-चक्षुःसदृशानि शेषेन्द्रियमनांसि तद्दर्शने-तेषां स्वस्वविषयसामान्यपरिच्छेदे अवधिदर्शने-अविधना रूपिद्रव्याणां सामान्यग्रहणे, तथा 'केवले य'त्ति, प्रक्रमात्केवलदर्शने-सर्वद्रव्यपर्यायाणां सामान्यावबोधे, आवरणमेतच्चक्षुर्दर्शनादिविषयभेदाच्चतुर्विधमत आह-'एवम्' इत्यनेन निद्रापञ्चविधत्वचक्षुर्दर्शनावरणादिचतुर्विधत्वात्मकेन प्रकारेण 'तुः' पूरणे नव विकल्पा-भेदा यस्य तत्तथाविधं ज्ञातव्यं दर्शनावरणम्।

मू.(१३६४) *वेयणियंपि हु(य) दुविहं सायमसायं च आहियं।*
सायस्स उ बहू भेया, एमेवासायस्सवि॥

वृ. 'वेदनीयं' वेदनीयकर्म 'अपि च' इति पूरणे 'द्विविधं' द्विभेदं स्वाद्यते-आल्हादकत्वेनास्वाद्यत इति नैरुक्तविधिना 'सातं' सुखं शारीरं मानसं च इहोपचारात्तन्निबन्धनं कर्मैवमुक्तम्, 'असातं च' तद्विपरीतम्, 'आख्यातं' कथितं तीर्थकृद्भिरिति गम्यते, 'सायस्स उ'त्ति 'तुः' अपिशब्दार्थः ततः सातस्यापि बहवो भेदाः, न केवलं ज्ञानदर्शनावरणयोरित्यपिशब्दार्थः, ते च तद्धेतुभूतभूतानुकम्पादिबहुभेदत्वाद्, एवमेवेति बहव एव भेदा असातस्यापि दुःखशोकतापादितद्धेतुबहुविधत्वादेवेति गर्भार्थः॥

मू.(१३६५) *मोहनियंपि य दुविहं, दंसणे चरणे तहा।*
दंसणे तिविहं वुत्तं, चरणे उ दुविहं भवे॥

वृ. मोहनीयमपि द्विविधं, न केवलं वेदनीयं, विषयतश्चैतद्विधेति द्वैविध्यमाह-'दर्शने' तत्त्वरुचिरूपे 'चरणे' चारित्रे तथा, किमुक्तं भवति?-दर्शनमोहनीयं चारित्रमोहनीयं च, तत्र 'दर्शने' दर्शनविषयं प्रक्रमान्मोहनीयं त्रिविधमुक्तं भवति, 'चरणे' चरणविषयं मोहनीयं द्विविधं भवेत्।

मू.(१३६६) *सम्मत्तं चेव मिच्छत्तं, सम्मामिच्छत्तमेव य।*
एयाओ तिन्नि पयडीओ, मोहनिज्जस्स दंसणे॥

वृ. यथा दर्शनमोहनीयत्रैविध्यं तथाऽऽह-सम्यग्भावः सम्यक्त्वं-शुद्धदलिकरूपं यदुदयेऽपि तत्त्वरुचिः स्यात् 'चैवे'ति पूरणे मिथ्याभावः मिथ्यात्वम्-अशुद्धदलिकरूपं यतस्तत्त्वेऽतत्त्वमतत्त्वेऽपि तत्त्वमिति बुद्धिरुत्पद्यते, सम्यग्मिथ्यात्वमेव च-शुद्धाशुद्धदलिकरूपं यत उभयस्वभावता जन्तोर्भवति, इह च सम्यक्त्वादयो जीवधर्मास्तद्धेतुत्वाच्च दलिकेष्वेतद्व्यपदेशः, एतास्तिस्रः प्रकृतयो मोहनीयस्स 'दर्शने' दर्शनविषयस्य ६।

मू.(१३६७) *चरित्तमोहणं कम्मं, दुविहं तु वियाहियं।*
कसायमोहनिज्जं च, नोकसायं तहेव य॥

वृ. चरित्रे मुह्यतेऽनेनेति मोहनं चरित्रमोहनं कर्म यतः श्रद्दधानोऽपि यदि कथञ्चनाहमेनं प्रतिपद्य इति जानन्नपि तत्फलादि न तत्प्रतिपद्यते, उत्तरत्रतुशब्दस्य भिन्नक्रमत्वात्तत्पुनर्द्विविधं व्याख्यातं श्रुतधरैरिति शेषः, पठन्ति च 'चरित्तमोहनिज्जं दुविहं वोच्छामि अनुपुव्वसो'त्ति स्पष्टमेव, कथं तद् द्विविधमित्याह-कषायाः-क्रोधादयस्तद्रूपेण वेद्यते-अनुभूयते यत्तत्कषायवेदनीयं 'चः' समुच्चये 'नोकषायम्' इति प्रस्तावान्नोकषायवेदनीयं नोकषायाः-कषायसहवर्त्तिनो हास्यादयस्तद्रूपेण यद्वेद्यते 'तथे'ति समुच्चये।

मू.(१३६८) *सोलसविहभेएणं, कम्मं तु कसायजं।*
सत्तविह नवविहं वा, कम्मं नोकसायजं॥

वृ. अनयोरपि भेदानाह-षोडशविधः-षोडशप्रकारो यो भेदो-नानात्वं तेन, लक्षणे तृतीया, यद्वा षोडशविधं भेदेन-भिद्यमानतया चिन्त्यमानं, प्राकृतत्वादनुस्वारलोपः, कर्म क्रियमाणत्वात्, 'तुः' पुनरर्थे भिन्नक्रमश्च, कषायेभ्यो जायत इति कषायजं "जं वेयति तं बंधति" इतिवचनात् कषायवेदनीयमित्यर्थः, षोडशविधत्वं चास्य क्रोधमानमायालोभानां चतुर्णामपि प्रत्येकमनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनभेदतश्चतुर्विधत्वात् 'सत्तविह'त्ति प्राग्वद्विन्दुलोपात्सप्तविधं वा कर्म नोकषायेभ्यो जायत इति 'नोकषायजं' नोकषायवेदनीयमित्यर्थः, तत्र सप्तविधं हास्यरत्यरतिभयशोकजुगुप्साः षड् वेदश्च सामान्यविवक्षयैक एवेति, यदा तु वेदः स्त्रीपुंनपुंसकभेदेन त्रिधेति विवक्ष्यते तदा षड्वेदलयो मीलिता नव भवन्तीति नवविधमिति।

मू.(१३६९) *नेरइयतिरिक्खाउ, मनुस्साउं तहेव उ।*
देवाउयं चउत्थं तु, आउकम्मं चउव्विहं॥

वृ. 'नेरइयतिरिक्खाउ'त्ति आयुःशब्दः प्रत्येकं योज्यते, ततश्च निष्क्रान्ता अयात्-इष्टफलदैवात्तत्रोत्पन्नानां सद्वेदनाऽभावेनेति निरयास्तेषु भवा नैरयिकास्तेषामायुः नैरयिकायुर्येन

तेषु म्रियन्ते, तथा तिरोऽञ्चन्तीति गच्छन्तीति तिर्यञ्चः, व्युत्पत्तिनिमित्तं चैतत् प्रवृत्तिनिमित्तं तु तिर्यग्गतिनाम, एते चैकेन्द्रियादयः, तत एषामायुस्तिर्यगायुर्येनैतेषु स्थितिर्भवति, तथा मनोरपत्यानि मनुष्याः 'मनोर्जातावण्यतौ सुक्चे'ति यत्प्रत्ययः सुगागमस्तेषामायुर्मनुष्यायुः 'तथैव' तद्भावावस्थितिहेतुतयैव देवा-उक्तनिरुक्तास्तेषामायुर्देवायुर्येन तेष्ववस्थीयते चतुर्थं 'तुः' पूरणे, एवं चायुःकर्म चतुर्विधम् ९।

मू.(१३७०) नामकम्मं दुविहं, सुहमसुहं च आहियं।
सुहस्स उ बहू भेया, एमेव य असुहस्सवि॥

वृ. नामकर्म द्विविधं, कथमित्याह-शोभते सर्वावस्थास्वनेनात्मेति शुभम् अशुभं च तद्विपरीतमाख्यातं 'सुहस्स'त्ति शुभस्यापि बहवो भेदा एवमेवाशुभस्यापि, तदपि बहुभेदमिति भावार्थः। तत्रोत्तरोत्तरभेदतः शुभनाम्नोऽनन्तभेदत्वेऽपि विमध्यमविवक्षातः सप्तत्रिंशद्भेदाः, तद्यथा-मनुष्यगति १ देवगति २ पञ्चेन्द्रियजाति ३ औदारिक ४ वैक्रिय ५ आहारक ६ तैजस ७ कार्मण ८ शरीराणि पञ्च समुचतुरस्रसंस्थानं ९ वज्रर्षभनाराचसंहननम् १० औदारिक ११ वैक्रिय १२ आहारक १३ अङ्गोपाङ्गानि त्रीणि प्रशस्तवर्ण १४ गन्ध १५ रशस १६ स्पर्शाश्चत्वारः १७ मनुष्यानुपूर्वी १८ देवानुपूर्वी १९ चेत्यानुपूर्वीद्वयमगुरुलघु २० पराघातम् २१ उच्छ्वास २२ आतप २३ उद्द्योत २४ प्रशस्तविहायोगति २५ तथा त्रस २६ बादरं २७ पर्याप्तं २८ प्रत्येकं २९ स्थिरं ३० शुभं ३१ सुभगं ३२ सुस्वरम् ३३ आदेयं ३४ यशःकीर्त्तिश्चेति ३५ निर्माणं ३६ तीर्थकरनाम चेति ३७ एताश्च सर्वा अपि शुभानुभावात् शुभं, तथाऽशुभनाम्नोऽपि विमध्यमविवक्षया चतुस्त्रिंशद्भेदाः, तद्यथा-नरकगति १ तिर्यग्गति २ एकेन्द्रियजाति ३ द्वीन्द्रियजाति ४ त्रीन्द्रियजाति ५ चतुरिन्द्रियजाति ६ ऋषभनाराचं ७ नाराचं ८ अर्धनाराचं ९ कीलिका १० सेवार्त्तं ११ न्यग्रोधमण्डलं १२ साति १३ वामनं १४ कुब्जं १५ हुण्डम् १६ अप्रशस्तवर्ण १७ गन्ध १८ रस १९ स्पर्शचतुष्टयं २० नरकानुपूर्वी २१ तिर्यगानुपूर्वी २२ उपघातम् २३ अप्रशस्तविहायोगति २४ स्थावरं २५ सूक्ष्मम् २६ साधारणम् २७ अपर्याप्तम् २८ अस्थिरम् २९ अशुभं ३० दुर्भगं ३१ दुःस्वरम् ३२ अनादेयं ३३ अयशःकीर्त्तिश्चेति ३४ एतानि चाशुभनारकत्वादिनिबन्धनत्वेनाशुभानि, अत्र च बन्धनसङ्घाते शरीरेभ्यो वर्णाद्यवान्तरभेदाश्च वर्णादिभ्यः पृथग् न विवक्ष्यन्त इति नोक्तसङ्ख्यातिक्रमः।

मू.(१३७१) गोयं कम्मं दुविहं, उच्चं नीयं च आहियं।
उच्चं अट्ठविहं होइ, एवं नियंपि आहियं॥

वृ. गोत्रं कर्म द्विविधमुच्चमिक्ष्वाकुजाताद्युच्चैर्व्यपदेशनिबन्धनं, नीचं च तद्विपरीतमाख्यातं, तत्रोच्चमित्युच्चैर्गोत्रमष्टविधं भवति, 'एवम्' इत्यष्टविधतयैव 'नीचमपि' नीचैर्गोत्रमप्याख्यातम्, अष्टविधत्वं चानयोर्बन्धहेत्वष्टविधत्वात्, अष्टौ हि जात्यमदादय उच्चैर्गोत्रस्य बन्धहेतवः, तावन्त एव च जातिमदादयो नीचैर्गोत्रस्य तथा च प्रज्ञापना-"उच्चागोयकम्मसरीर पुच्छा, गोयमा! जाइअमएणं कुलअमएणं बलअमएणं तवअमएणं इस्सरियअमएणं सुयअमएणं लाभअमएणं उच्चागोयकम्मसरीपयोगव होति, नीयागोयकम्मसरीरपुच्छा, गोयमा! जाइमएणं कुलमएणं" इत्याद्यालापकविपर्ययणाष्टौ यावत् "नीयागोयकम्मसरीरयोगवं हवति"त्ति।

मू. (१३७२) दाने लाभे य भोगे य, उवभोगे वीरिए तहा।
पंचविहमंतरायं, समासेन वियाहियं॥

वृ. दीयत इति दानं तस्मिन्, तथा लभ्यत इति लाभस्तस्मिंश्च, भुज्यते -सकृदपयुज्यत इति भोगः -सकद्भोग्यः पुष्पाहारादिविषयस्तत्र च, तथा उपेतिअभ्यधिकं पुनः पुनरुपभुज्यमानतया भुज्यत इत्युपभोगः -पुनः पुनरुपभोग्यभक्तादि-गीतादिविषयः, उक्तं हि-

"संति भुज्जइत्ति भोगो सो पुण आहारपुप्फमाईओ।
उवभोगो उ पुणो पुण उवभुज्जइ व भवणवणियाई॥"

तस्मिन्, विशेषण ईर्य्यते -चेष्ट्यतेऽनेनेति वीर्यं तस्मिन्, 'तथा' समुच्चये सर्वत्रान्तरायमिति प्रक्रमः, ततश्च विषयभेदात्पञ्चविधमन्तरायं समासेन व्याख्यातं, तत्र दानान्तरायं यत्सति विशिष्टे ग्रहीतरि देये च वस्तुनि तत्फलमवगच्छतोऽपि दाने प्रवृत्तिमुपहन्ति, यत्पुनर्विशिष्टेऽपि दातरि यावन्निपुणेऽपि याचितरि उपलब्धिउपघातकृत् तल्लाभान्तरायं, भोगान्तरायं तु सति विभवादौ सम्बद्यमाने च आहारमाल्यादौ यद्वशात्र बुङ्क्ते, उपभोगान्तरायं तु यस्योदयात्सदपि वस्त्रालङ्कारादिनोपभुङ्क्ते, वीर्यान्तरायं यद्वशाद्बलवान्नीरुग्वयःस्थःअथ च तृणकुड्डी करणेऽप्यसमर्थ इति सूत्रद्वादशकार्थः १२॥

इत्थं प्रकृतयोऽभिहिताः, सम्प्रत्येतन्निगमनायोत्तरग्रन्थसम्बन्धनाय चाह-

मू. (१३७३) एयाओ मूलपयडीओ, उत्तराओ अ आहिया।
पएसग्गं खित्तकाले य, भावं चादुत्तरं सुण॥

वृ. 'एताः' अनन्तरोक्ता ज्ञानावरणादिरूपा मूलप्रकृतयः, तथा 'उत्तराः' इत्युत्तरप्रकृतयश्च श्रुतावरणाद्याः, चशब्दः श्रुतादीनामप्यक्षरानक्षरादिभेदतो बहुविधत्वदनुक्तबहुभेदसूचकः 'आख्याताः' कथिताः प्रदेशाः परमाणवस्तेषामग्रंपरिमाणं प्रदेशाग्रं 'खेत्तकाले य'त्ति क्षेत्रकालौ च तत्र क्षियन्ति-निवसन्ति तस्मिन्निति क्षेत्रम् -आकाशं कालश्चबद्धस्य कर्मणो जीवप्रदेशाविचटनात्मकः स्थितिकालः 'भावं च' अनुभागलक्षणं कर्मणः पर्यायं चतुःस्थानिकत्रिस्थानिकादिरसमितियावद् 'अतः उत्तर'मिति अतः-प्रकृत्यभिधानादूर्ध्वं भृणु कथ्यमानमिति

मू. (१३७४) सव्वेसिं चेव कम्माणं, पएसग्गमनंतगं।
गंठियसत्ताईयं, अंतो सिद्धाण आहियं॥

वृ. 'सर्वेषां' समस्तानां 'चः' पूरणे 'एवः' अपिशब्दार्थे सर्वेषामपि न तु केषाञ्चिदेव 'कर्मणां' ज्ञानावरणादीनां 'प्रदेशाग्रां' परमाणुपरिमाणम् अनन्तमेवानन्तकमनन्तपरमाणुनिष्पन्नत्वात्तद्गणितानां, तच्चानन्तकं ग्रन्थिरिव ग्रन्थिः -घनो रागद्वेषपरिणामस्तं गच्छन्ति ग्रन्थिगास्ते च ते सत्त्वाश्च ग्रन्थिगसत्त्वाः -ये ग्रन्थिप्रदेशं गत्वाऽपि तद्भेदाविधानेन न कदाचिदुपरिष्टाद्गन्तारः ते चाभव्या एवात्र गृह्यन्ते तानतीतं-तेभ्योऽनन्तगुणत्वेनातिक्रान्तं ग्रन्थिगसत्त्वातीतं, तथा 'अन्तः' मध्ये 'सिद्धानां' सिद्धिपदप्राप्तानाम् 'आख्यातं' कथितं गणधरादिभिरिति गम्यते, सिद्धेभ्यो हि कर्मपरमाणवोऽनन्तभाग एव, तदपेक्षया सिद्धानामनन्तगुणत्वाद्, अतः सङ्ख्यामपेक्ष्य सिद्धान्तर्वर्त्ति तदनन्तकमुच्यते, एकसमये ग्राह्यकर्मपरमाण्वपेक्षं चैतत्, उक्तं हि-"ते य कम्मपोग्गला भवसिद्धिएहिं अनंतगुणा सिद्धाणमणंतभागमित्ता एगेगंमि समए गहणमिति"त्ति,

पठन्ति च 'गंठि(प)सत्ताऽणाइ'त्ति अत्र व्याख्यानिकव्याख्या ग्रन्थिप्रसक्तानांघनरागद्वेष परिणामग्रन्थि कर्कशघनरूढग्रन्थिसमं तथाविधपरिणामाभावतोऽभिन्दानानां सत्त्वानां यो बन्धः सोऽनाद्यनन्तः - आद्यन्तविकलो ज्ञेयः, सिद्धानां पुनः भविष्य - त्सिद्धीनां बन्धोऽनादिरपि 'अन्त' इति सान्तस्तथाविधपरिणामतो व्याख्यातो भगवद्भिरिति सूत्रार्थ ॥ सम्प्रति क्षेत्रमाह-

मू. (१३७५) *सव्वजीवाण कम्मं तु, संगहे छद्दिसागयं।*
सव्वेसुवि पएसेसु, सव्वं सव्वेण बद्धगं॥

वृ. सर्वे-एकेन्द्रियाद्यशेषभेदास्ते च ते जीवाश्च तेषां 'कर्म' ज्ञानावरणादि 'तुः' पूरणे सङ्ग्रहः - सङ्ग्रहणक्रिया तत्र योग्यं भवतीतिशेषः, यदिवा सर्व्वजीवा 'णं'ति वाक्यभूषायां कर्म्म 'संगहे'त्ति संगृह्णन्ति, कीदृशं सदित्याह-'छद्दिसागय'न्ति षण्णां दिशानां समाहारः षड्दिशं तत्र गतं - स्थितं षड्दिशागतम्, अत्र चतस्रो दिशः पूर्वादय ऊर्द्ध्वाधोदिगूद्वयं चेति षड् भवन्ति, इतं चात्मावष्टब्धाकाशप्रदेशापेक्षयोच्यते, यत्र ह्याकाशे जीवोऽवगाढस्तत्रैव ये कर्म पुद्गलास्ते रागादिस्नेहगुणयोगादात्मनि लगन्ति न क्षेत्रान्तरावगाढाः, भिन्नदेशस्य तद्भावपरिणामाभावात्, यथा ह्यग्निः स्वदेशस्थितान् प्रायोग्यपुद्गलानात्मभावेन परिणमयति एवं जीवोऽपीति, अल्पत्वाच्चेह विदिशामविवक्षितत्वेन षड्दिशागतमित्यभिधानं, यतो विदिग्व्यवस्थितमपि कर्मात्मना गृह्यते, उक्तं हि गन्धहस्तिना- "सर्वासु दिक्ष्वात्मावधिकासु व्यवस्थितान् पुद्गलानादत्ते" इति, तथा 'क्षेत्रप्रस्तावे यद्विदिग्निरूपणं तच्चासामाकाशादभेदज्ञापनार्थं तद्भेदेन तासामप्रतीतेः, तथा च यत्कैश्चिद्दिशां द्रव्यान्तरत्वमुक्तं तदपास्तं भवति, तथा षड्दिग्गतमपि द्वीन्द्रियादीनेवाधिकृत्य नियमेन व्याख्येयमेकेन्द्रियाणामन्यथाऽपि सम्भवात्, तथा चागमः-

"जीवे णं भंते ! तेयाकम्मापोग्गलाणं गहणं करेमाणे किं तिदिसिं करेति चउद्दिसिं करेइ पंचदिसिं करेइ छद्दिसिं करेइ ?, गोयमा ! सिय तिदिसिं सिय चउद्दिसिं सिय पंचदिसिं सिय छद्दिसिं करेति, एगिंदिया णं भंते ! तेयाकम्मपोग्गलाणं गहणं करेमाणे किं तिदिसिं जावछद्दिसिं करेति ?, गोयमा ! सिय तिदिसिं सिय चउद्दिसिं सिय पंचदिसिं सिय छद्दिसिं करेइ, बेंदियतेंदियचउरिंदियपंचिंदिया नियमा छद्दिसिं" ति, तच्च षड्दिग्गतं सर्वेष्वपि न तु कतिपयेषु प्रदेशेष्वपि, अर्थादाकाशस्योक्तन्यायादात्मावष्टब्धेषु कर्म सर्वजीवानां सङ्ग्रहे योग्यं भवति, ते वा तत्संगृह्णन्ति, तत्स्थकर्मपुद्गलान् प्रत्यात्मनो ग्रहणहेत्वविशेषात्, तथा 'सर्वं' समस्तं ज्ञानावरणादि न त्वन्यतरदेव, आत्मा हि सर्वप्रकृतिप्रायोग्यान् पुदगलान् सामान्येनादाय तानेवाध्यवसायविशेषात् पृथक् पृथग् ज्ञानावरणादिरूपत्वेन परिणमयति, तच्चैवंविधं कर्म संगृहीतं सत् किं कैश्चिदेवात्मप्रदेशैर्बद्धं भवति यद्वा सर्वेणात्मना ? इत्याह-

'सर्वेण' समस्तेना प्रक्रमादात्मना न तु कियद्भिरेव तत्प्रदेशैः बद्धं-क्षीरोदकवदात्मप्रदेशैः श्लिष्टं तदेव बद्धकम्, अन्योऽन्यसम्बद्धतया हि शृङ्खलावयवानामिव परस्परोपकारित्वादात्मनः प्रदेशानां सहैव योगोपयोगौ भवतो, न त्वेकैकशः, तन्निमित्तकश्च कर्मबन्ध इति सोऽपि सर्वेणैवात्मना, ग्रहणपूर्वकत्वाच्च बन्धस्य तदप्येवमेव, यद्वा तद् गृहीतं सत् केन सह कियत्कथं वा बद्धं भवति ? इत्याह- "सव्वेसुवि पएसेसु" सुव्व्यत्ययात्सर्वैरपि प्रदेशैः प्रक्रमादात्मनः 'सर्वं' सर्वप्रकृतिरूपं 'सर्वेण' गम्यमानत्वात्प्रकृतिस्थित्यादिना प्रकारेण बद्धकमिति सूत्रार्थः ॥

मू. (१३७६) उदहीसरिनामाणं, तीसइं कोडिकोडीओ ।
उक्कोसिया होइ ठिई, अंतमुहुत्तं जहन्निया ॥
मू. (१३७७) आवरणिज्जाण दुण्हंपि, वेयणिज्जे तहेव य ।
अंतराए य कम्मंमि, ठिई एसा वियाहिया ॥
मू. (१३७८) जयहीसरिसनामाणं, सत्तरिं कोडिकोडिओ ।
मोहनिज्जस्स उक्कोसा, अंतमुहुत्तं जहन्निया ॥
मू. (१३७९) तित्तीससागरोवमा, उक्कोसेमं वियाहिया ।
ठिई उ आउकम्मस्स, अंतमुहुत्तं जहन्निया ॥
मू. (१३८०) उदहीसरिसनामाणं, वीसइं कोडिकोडिओ ।
नामओगाण उक्कोसा, अंतमुहुत्तं जहन्निया ॥

वृ. उदधिः -समुद्रस्तेन सदृक् -सदृशं नाम-अभिधानमेषामुधिसदृग्नामानि-सागरोपमाणि तेषां त्रिंशत्कोटीकोट्यः 'उक्कोसिय'त्ति उत्कृष्टा भवति 'स्थितिः' अवस्थानं, तहा मुहूर्त्तस्यान्तरं अन्तर्मुहूर्त्तं, मुहूर्त्तमपि न्यूनमित्यर्थः, जघन्यैव जघन्यका प्रक्रमात्स्थितिः ।

केषामित्याह 'आवरणीययोः' अन्यत्रैतद्यपदेशाश्रवणाज्ज्ञानदर्शनविषययोः, ततो ज्ञानावरणीयदर्शनावरणीयोर्द्वयोरपि, वेदनीये तथैव च अन्तराये च कर्मणि स्थितिरेवं व्याख्याता, इह च षष्ठीप्रक्रमेऽपि वेदनीय इत्यादौ सप्तम्यभिधानमनयोरर्थस्य तत्त्वतोऽभिन्नत्वात्,

"राजा भर्त्ता मनुष्यस्य, तेन राज्ञः स उच्यते ।
वृक्षस्तिष्ठति शाखासु, ता वा तत्रेति तस्य ताः ॥"

तथा इति वेदनीयस्यापि जघन्यस्थितिरन्तर्मुहूर्त्तमानैव सूत्रकारेणोक्ता, अन्ये तु 'जघन्या (अपरा) द्वादशमुहूर्ता वेदनीयस्ते'ति द्वादशमुहूर्त्तमानामेवैतामिच्छन्ति, तदभिप्रायं न विद्मः । उदधिसदृशनाम्नां सप्ततिकोटीकोट्य मोहनीस्योयत्कृष्टा अन्तर्मुहूर्त्तं जघन्यका । त्रयस्त्रिंशत्सागरोपमाणि आर्षत्वाच्च सुपो लुक्, उत्कृष्टेन व्याख्यात्ता स्थितिः 'तुः' पूरणे आयुःकर्मणोऽन्तर्मुहूर्त्तं जघन्यका । उदधिसदृशनाम्नां विंशतिकोटीकोट्य नामगोत्रयोरुत्कृष्टा अष्ट मुहूर्त्ता जघन्यका इति सूत्रपञ्चकार्थः ।

इत्थमुत्कृष्टा जघन्या च स्थितिर्मूलप्रकृतिविषया सूत्रकारेणाभिहिता, विनेयानुग्रहार्थं तूत्तरप्रकृतिविषया प्रदर्श्यते-तत्रोत्कृष्टा स्त्रीवेदसातवेदनीयमनुजगत्यानुपूर्वीणां चतसृणामुत्तरप्रकृतीनां पञ्चदश सागरोपमकोटीकोट्यः, कषायषोडशकस्य चत्वारिंशन्नपुंसकारतिशोकभयजुगुप्सानां पञ्चानां विंशतिः, पुंवेदहास्यरतिदेवगत्यानुपूर्वीद्वयाद्यसंहननसंस्थानप्रशस्तविहायोगतिस्थिरशुभसुभगसुखदादेययशःकीर्त्युच्चैर्गोत्राणां पञ्चदशानां दश न्यग्रोधसंस्थानद्वितीयसंहननयोर्द्वादश सातिसंस्थाननाराचसंहननयोश्चतुर्दश कुब्जार्द्धनाराचयोः षोडश वामनसंस्थानकीलिकासंहननद्वित्रिचतुरिन्द्रियजातिसूक्ष्मापर्याप्तकसाधारणानामष्टानामष्टादश तिर्यग्मनुष्यायुषोः पल्योपमत्रयं, अवशिष्टानां तु मूलप्रकृतिवदुत्कृष्टा स्थितिः,

जघन्या तु निद्रापञ्चकासातावेदनीयानां षण्णां सागरोपमसप्तभागास्त्रयः पल्योपमासङ्ख्येयभागन्यूनाः सातस्य तु द्वादश मुहूर्त्ताः मिथ्यात्वस्य पल्योपमासङ्ख्येयभागोनं सागरोपमं आद्य-

कषायद्वादशकस्य चत्वारः सागरोपमसप्तभागास्तावतैव न्यूनाः, क्रोधस्य संज्वलनस्य मासद्वयं मानस्य मासो मासार्द्धं मायायाः पुंवेदस्य ह्यष्टौ वर्षाणि लोभस्यैकं सागरोपमकोटीकोटिर्नरगतिजाति पञ्चौदारिकशरीरतदङ्गोपाङ्गतैजसकार्मणसंस्थानषट्कसंहननषट्कवर्णचतुष्क-तिर्यग्मनुष्यानुपूर्व्यगुरुलघूपघातपराघातोच्छ्वासातपोद्योतप्रशस्ताप्रशस्तविहायोगतियशःकीर्त्तिवर्जत्रसादिविंशतिनिर्माणनीचैर्गोत्राणां षट्षष्टयुत्तरप्रकृतीनां सागरोपमसप्तभागौ द्वौ पल्योपमासङ्ख्येयभागन्यूनौ वैक्रियषट्कस्य सागरोपमसहस्रभागौ द्वौ पल्योपमासङ्ख्येय-भागन्यूनौ आहारकतदङ्गोपाङ्गतीर्थकरनाम्नमन्तःसागरोपमकोटीकोटी, ननूत्कृष्टाऽपि एतावत्ये-वासां तिसृणां स्थितिरभिहिता, सत्य, तथाऽपि ततः सङ्ख्येयगुणहीनत्वेनास्या जघन्यत्वमिति सम्प्रदायः, कृतं प्रसङ्गेन प्रकृतं प्रस्तुम इति, तत्र यदुक्तं प्रदेशाग्रं क्षेत्रकालौ च भावं चो(चात उ)त्तरं शृण्विति तत्र प्रदेशाग्रं क्षेत्रकालौ चाभिहितौ, सम्प्रति भावमभिधातुमाह-

मू.(१३८१) सिद्धाननंतभागो, अनुभागा हवंति उ।
सव्वेसुवि पएसग्गं, सव्वजीवेसु (स) इच्छियं॥

वृ. 'सिद्धानाम्' मुक्तानामनन्तभागवर्त्तित्वादनन्तभागः 'अनुभागाः' रसविशेषा भवन्ति 'तुः' पूरणे' अयं चानन्तभागोऽनन्तसङ्ख्य एवेति, अनेनैषामानन्त्यमेवेत्थं विशिष्टमुक्तं, सम्प्रति प्रदेशपरिमाणमाह-सर्वेष्वपि प्रक्रमादनुभागेषु प्रदिश्यन्त इति प्रदेशा-बुद्धा विभज्यमानास्तदविभागैकदेशास्तेषामग्रं प्रदेशाग्रं 'सव्वजीवेसुनिज्झि(इच्छि)यं'ति 'सर्वजीवेभ्यः भव्याभव्येभ्योऽतिक्रान्तं ततोऽपि तेषाममन्तगुणत्वेनादिकत्वादिति सूत्रार्थः।

एवं प्रकृतिप्रदर्शनेन प्रकृतिबन्धप्रदेशाग्राभिधानेन च प्रदेशबन्धं कालोक्त्या च स्थितिबन्धं अनेन चानुभागमभिधाय यदर्थमेते प्ररूपितास्तदुपदर्शयन्नुपसंहारव्याजेनोपदेष्टुमाह-

मू.(१३८२) तम्हा एएसि कम्माणं, अनुभागे वियाणिया।
एएसिं संवरे चेव, खवणे य जए बुहे॥ त्तिबेमि॥

वृ. 'तम्ह'त्ति यस्मादेवंविधाः प्रकृतिबन्धादयस्तस्मात् 'एतेषाम्' अनन्तरमुक्तानां 'कर्मणां' ज्ञानावरणादीनामनुभागानुपलक्षणत्वात्प्रकृतिबन्धादीश्च 'विज्ञाय' विशेषेण-कटुकविपाकत्वलक्षणेन भवहेतुत्वलक्षणेन वाऽवबुध्य, अनुभागानामेव च साक्षादुपादानमेषामेवाशुभानां प्रायो भवनिर्वेदहेतुत्वात्, 'एषाम्' इति कर्मणां 'संवरे' अनुपात्तानामुपादाननिरोधे 'चः' समुच्चये 'एवे' त्यवधारणे भिन्नक्रमस्ततः 'क्षपणे च' उपात्तानां निर्जरणे 'जेए'त्ति 'यतेतैव' यत्नं कुर्यादेव, कोऽसौ ?-'बुधः' तत्त्वावगमवानिति सूत्रार्थः॥ अमुमेवार्थमनुवादद्वारेण व्यक्तीकर्त्तुमाह निर्युक्तिकृत्-

नि. [५३७] पगइठिई अनुभागं पएसकम्मं च सुट्ठु नाऊणं।
एएसिं संवेरे खलु खवणे उ सयावि जइअव्वं॥

वृ. स्पष्टैव। 'इति' परिसमाप्तौ ब्रवीमीति पूर्ववत्। इत्यवसितोऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वत्॥

अध्ययनं-३३-समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे
त्रयस्त्रिंशमध्ययनं सनिर्युक्तिः सटीकं समाप्तम्

अध्ययनं-३४-"लेश्या"

वृ. व्याख्यातं कर्मप्रकृतिनामकं त्रयस्त्रिंशमध्ययनं, सम्प्रति चतुस्त्रिंशमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने कर्मप्रकृतय उक्ताः, तत्स्थितिश्च लेश्यावशत इत्यतस्तदभिधानार्थमिदमारभ्यते, अस्य चैवमभिसम्बन्धागतस्योपक्रमादिद्वारप्ररूपणा प्राग्वत्सुकरैव यावन्नामनिष्पन्ननिक्षेपः, तत्र चास्य लेश्याऽध्ययनमिति नामातो लेश्याध्ययनशब्दयोर्निक्षेपमाह

नि. [५३८] लेसाणं निक्खेवो चउक्कओ दुविह होइ नायव्वो।

नि. [५३९] जाणगभवियसरीरा तव्वइरित्ता य सा पुणो दुविहा।
कम्मा नोकम्मे या नोकम्मे हुंति दुविहा उ॥

नि. [५४०] जीवाणमजीवाण य दुविहा जीवाण होइ नायव्वा।
भवमभवसिद्धिआणं दुविहाणवि होइ सत्तविहा॥

नि. [५४१] अजीवकम्मनो दव्वलेसा सा दसविहा उ नायव्वा।
चंदाण य सूराण य गहगणनक्खत्ततारागं॥

नि. [५४२] आभरणच्छायणादंसगाण मणिकागिणीण जा लेसा।
अजीवदव्वलेसा नायव्वा दसविहा एसा॥

नि. [५४३] जा दव्वकम्मलेसा सा नियमा छव्विहा उ नायव्वा।
किण्हा नीला काऊ तऊ पम्हा य सुक्का य॥

नि. [५४४] दुविहा उ भावलेसा विसुद्धलेसा तहेव अविसुद्धा।
दुविहा विसुद्धलेसा उवसमखइआ कसायाणं॥

नि. [५४५] अविसुद्धभावलेसा सा दुविहा नियमसो उ नायव्वा।
पिज्जंमि अ दोसंमि अ अहिगारो कम्मलेसाए॥

नि. [५४६] नोकम्मदव्वलेसा पओगसा वीससा उ नायव्वा।
भावे उदओ भणिओ छण्हं लेसाण जीवेसु॥

नि. [५४७] अज्झयणे निक्खेवो चउक्कओ दुविह होइ नायव्वो।

नि. [५४८] जाणगभवियसरीरं तव्वइरित्तं च पोत्थगाईसुं।
अज्झप्पस्साणयणं नायव्वं भावमज्झयणं॥

वृ. लेसाणमित्यादि गाथा एकादश, तत्र 'लेसाणं'ति सूत्रत्वाल्लेश्यायां, कोऽर्थः?-लेश्याशब्दस्य निक्षेपश्चतुर्विधो नामादि, 'दुविहो' इत्यादि प्राग्वद् यावत् 'सा पुणो दुविह'त्ति, 'सा' व्यतिरिक्तलेश्या पुनर्द्विविधा, द्वैविध्यमेवाह-कर्मणि नोकर्मणि च, तत्र कर्मण्यल्पवक्तव्यैवेति तामुपेक्ष्य नोकर्मविषयामाह-'नोकर्मणि' कर्माभावरूपे भवति द्विविधा 'तुः' अवधारणार्थ इति द्विधैव। कथमित्याह-'जीवानाम्' उपयोगलक्षणानाम् 'अजीवानां च' तद्विपरीतानाम्, उभयत्र लेश्यति प्रक्रमः, अत्र च नोकर्मत्वमुभयोरपि कर्माभावरूपत्वात्सम्बन्धिभेदाच्च द्विभेदत्वं, तत्रापि द्विविधा जीवानां भवति ज्ञातव्या, 'भवमभवसिद्धियाणं'ति मस्यालाक्षणिकत्वात् सिद्धिशब्दस्य च प्रत्येकमभिसम्बन्धाद् भविष्यतीति भवा-भाविनीत्यर्थः तादृशी सिद्धिर्येषां ते भवसिद्धिका-भव्यास्तेषाम् 'अभवसिद्धिकानां' तद्विपरीतानां द्विविधानामप्युक्त-

भेदेन प्रक्रमा-ज्जीवानां भवति 'सप्तविधा' सप्तप्रकारा इहापि लेश्येति प्रक्रमः,

अत्र च जयसिंहसूरिः कृष्णादयः षट् सप्तमी संयोगजा इयं च शरीरच्छायात्मका परिगृह्यते, अन्ये त्वौदारिकौदारिकमिश्रमित्यादिभेदतः सप्तविधत्वेन जीवशरीरस्य तच्छायामेव कृष्णादि वर्णरूपां नोकर्मणि सप्तविधां जीवद्रव्यलेश्यां मन्यन्ते, तथा 'अजीवकम्मणो दव्वलेस'त्ति अजीवानां 'कम्मणो'त्ति आर्षत्वान्नोकर्मणि द्रव्यलेश्या अजीवनोकर्मद्रव्यलेश्या, तुशब्दस्येह सम्बन्धात्सा पुनर्दशविधा ज्ञातव्या, चन्द्राणां सूर्याणां च ग्रहा-मङ्गलादयस्तद्गणश्च नक्षत्राणि च-कृत्तिकादीनि तारारूपाश्च प्रकीर्णज्योतींषि ग्रहगणनक्षत्रतारास्तेषाम्, आभरणानि च-एकावलिप्रभृतीनि आच्छादनानि च-सुवर्णचरितादीनि आदर्शा एवादर्शका-दर्पणास्ते चाभरणाच्छादनादर्शकास्तेषां, तथा मणिश्च-मरकतादिः काकिणिः-चक्रवर्तिरत्नं मणिकाकिण्यौ तयोर्या लेश्यति-श्लेषयतीवात्मनि जननयनानीति लेश्या अतीव चक्षुराक्षेपिका स्निग्धदीप्तरूपा छाया अजीवद्रव्यलेश्या प्रक्रमान्नोकर्मणि ज्ञातव्या दशविधैषा, अत्र च चन्द्रादिशब्दैस्तद्विमानानि 'तास्थ्यात्तद्व्यपदेश' इति न्यायेनोच्यन्ते, तेषां च पृथ्वीकायरूपत्वेऽपि स्वकायपरकायशस्त्रोपनिपातसम्भवात् तत्प्रदेशानां केषाञ्चिदचेतनत्वेनाजीवद्रव्यलेश्यात्वं द्रष्टव्यम्, उपलक्षणं चात्र दशविधत्वमेवंविधद्रव्याणां रजतरूप्यताम्रादीनां बहुरत्वेन [illegible] सम्भवात्, इत्थं नोकर्मद्रव्यलेश्यामभिधाय कर्मद्रव्यलेश्यामाह-या कर्मद्रव्यलेश्याऽग्रेतनतुशब्दसम्बन्धात्सा पुनः 'नियमात्' अवश्यम्भावात् षड्विधा 'ज्ञातव्या' अवबोद्धव्या, कथमित्याह-कृष्णा नीला 'काउ'त्ति कापोता 'तेउ' तैजसी पद्मा च शुक्ला चेति, इह च कर्मद्रव्यलेश्येति सामान्याभिधानेऽपि शरीरनामकर्मद्रव्याण्येव कर्मद्रव्यलेश्या, यदुक्तं प्रज्ञापनावृत्तिकृता-"योगपरिणामो लेश्या, कथं पुनर्योगपरिणामो लेश्या ?, यस्मात्सयोगिकेवली शुक्ललेश्यापरिणामेन विहृत्यान्तर्मुहूर्ते शेषे योगनिरोधं करोति, ततोऽयोगित्वमलेश्यत्वं च प्राप्नोति, अतोऽवगम्यते-योगपरिणामो लेश्यति, स पुनर्योगः शरीरनामकर्मपरिणतिविशेषः, यस्मादुक्तं-"कर्म हि कार्मणस्य कार्यमन्येषां च शरीराणा"मिति, तस्मादौदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः, तथौदारिकवैक्रियाहारकशरीरव्यापारहृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारो यः स वाग्योगः, तथैवौदारिकादिशरीरव्यापारहृतमनोद्रव्यसमूहसाचिव्याज्जीवव्यापारो यः स मनोयोग इति, ततो यथैव कायादिकरणयुक्तस्यात्मनो वीर्यपरिणतिर्योग उच्यते तथैव लेश्याऽपी"ति गुरवस्तु व्याचक्षते-कर्मनिस्यन्दो लेश्या, यतः कर्मस्थितिहेतवो लेश्याः, यथोक्तम्

"ताः कृष्णनीलकापोततेजसीपद्मशुक्लनामानः ।
श्लेष इव वर्णबन्धस्य कर्मबन्धस्थितिविधात्र्यः ॥"इति,

योगपरिणामत्वे तु लेश्यानां "योगा पयडिपएसं ठिईअनुभागं कसायओ कुणति"त्ति वचनात्प्रकृतिप्रदेशबन्धहेतुत्वमेव स्यात् न तु कर्मस्थितिहेतुत्वं, कर्मनिस्यन्दरूपत्वे तु यावत्कषायोदयस्तावत्तन्निस्यन्दस्यापि सद्भावात्कर्मस्थितिहेतुत्वमपि युज्यत एव, अत एवोपशान्तक्षीणमोहयोः कर्मबन्धसद्भावेऽपि न स्थितिसम्भवो, यदुक्तम्-

"तं पढमसमये बद्धं बीयसमये वेइयं ततियसमए निज्जिन्नं"ति, आह-यदि कर्मनिस्यन्दो

लेश्या तदा समुच्छिन्नक्रियं शुक्लध्यानं ध्यायतः कर्मचतुष्टयसद्भावे तन्निस्यन्दसम्भवेन कथं न लेश्यासद्भावः ?, उच्यते, नायं नियमो यदुत निस्यन्दवतो निस्यन्देन सदा भाव्यं, कदाचिन्निस्यन्दवत्स्वपि वस्तुषु तथाविधात्मस्थायां तदभावदर्शनात्, यच्चोक्तम्-अयोगिनो योगपरिणामाभावे लेश्यापरिणामाभाव इति निश्चिनुमः-योगपरिणाम एव लेश्येति, तदप्यसाधकं, यतो रश्म्यादयः सूर्याद्यभावे न भवन्ति, न च ते तद्रूपा एव, यत उक्तम्-

"यच्च चन्द्रप्रभाद्यत्र, ज्ञातं तज्ज्ञातमात्रकम्।
प्रभा पुद्गलरूपा यत्तद्धर्मो नोपपद्यते ॥"

अन्ये त्वाहुः-कार्मणशरीरवत्पृथगेव कर्माष्टकात्कर्मवर्गणानिष्पन्नानि कर्मलेश्याद्रव्याणीति, तत्त्वं पुनः केवलिनो विदन्ति। इत्युक्ता द्रव्यलेश्या, भावलेश्यामाह-द्विविधा च भावलेश्या 'विशुद्धलेश्या' अकुलषद्रव्यसंपर्कजात्मपरिणामरूपा तथैव 'अविशुद्धा' इत्यविशुद्धलेश्या, तत्र द्विविधा विशुद्धलेश्या 'उवसमखइय'त्ति सूत्रत्वादुपशमक्षयदजा, केषां पुनरुपशमक्षयौ ? यतो जायत इयमित्याह-कषायाणाम्, अयमर्थः-कषायोपशमजा कषायक्षयजा च, एकान्त विशुद्धि चाऽऽश्रित्यैवमभिधानम्, अन्यथा हि क्षायोपशमिक्यपि शुक्ला तेजःपद्मे च विशुद्धलेश्ये संभवत् एवेति।

अविशुद्धभावलेश्या सेति या प्रागुपक्षिप्ता 'द्विविधा' द्विभेदा 'नियमसा उ'त्ति, आर्षत्वात् 'नियमेन' अवश्यम्भावेन ज्ञातव्या 'पेज्जंमि य'त्ति 'दोसंमिय'त्ति प्रेमणि च-रागे दोषे च द्वये, किमुक्तं भवति ?-रागविषया द्वेषविषया च, इयं चार्तात्कृष्णनीलकापोतरूपा, तदेवमस्या नामादिभेदतोऽनेकविधत्वे इह कयाऽधिकृतमित्याह-अधिकारः कर्मलेश्या, कोऽर्थः ? कर्मद्रव्यलेश्यया, प्रायस्तस्या एवात्र वर्णादिरूपेण विचारणात्।

इत्थं नामादिभेदेन लेश्योक्ता, तत्र च वैचित्र्यात्सूत्रकृतेर्नोकर्मद्रव्यलेश्यायां भावलेश्यायां च यत्प्राग् नोक्तं सम्प्रति तदाह-'नोकर्मद्रव्यलेश्या' शरीरभरणादिच्छया 'पओगस्स'त्ति प्रयोगः-जीवव्यापारः स च शरीरादिषु तैलाभ्यञ्जनमनःशिलाघर्षणादिस्तेन 'वीससा य'त्ति विस्रसा-जीवव्यापारनिरपेक्षाऽभ्रेन्द्रधनुरादीनां तथावृत्तिस्तया च ज्ञातव्या, 'भाव' इति भावलेश्या 'उदयः' विपाकः, इह तूपचारादुदयजनितपरिणामो भणितः षण्णां लेश्यानां जीवेषु। 'अज्झयणे' त्यादिगाथाद्वयमध्ययननिक्षेपाभिधायि विनयश्रुत एव व्याख्यातप्रायमिति।

नि. [५४९] एयासिं लेसाणं नाऊण सुहासुहं तु परिणामं।
चइऊण अप्पसत्थं पसत्थलेसासु जइअव्वं ॥

वृ. 'एतासाम्' अनन्तरमुक्तस्वरूपाणां लेश्यानां 'ज्ञात्वा' एतदध्ययनानुसारतोऽवबुध्य शुभाशुभं 'तुः' पुनरर्थे ततः शुभाशुभं पुनः परिणामं, किमित्याह-'त्यक्त्वा' अपहाय 'अप्पसत्थं'ति 'अप्रशस्ता' अशुभपरिणामा कृष्णादिलेश्य इति योऽर्थः प्रशस्तलेश्यासु-शुभपरिणामरूपासु पीताद्यासु यतितव्यं, यथा ता भवन्ति तथा यत्नो विधेय इति गाथार्थः ॥

इत्यवसितो नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं, तच्चेदम्-

मू. (१३८३) *लेसज्झयणं पवक्खामि, आनुपुव्विं जहक्कमं।*
छण्हंपि कम्मलेसाणं, अनुभावे सुणेहि मे ॥

वृ. लेश्याभिधायकमध्ययनं लेश्याऽध्ययनं तत् 'प्रवक्ष्यामि' प्रकर्षेण-तासामेव नाम-वर्णादिनिरूपणात्मकेनाभिधास्ये, आनुपूर्व्या यथाक्रममिति च प्राग्वत्, तत्र च 'षण्णामपि' षट्सङ्ख्यानामपि वक्ष्यमाणभेदेन 'कर्मलेश्यानां' कर्मणि शतिविधातृतनद्विणिपुण्यलक्षणानाम् 'अनुभवान्' रसविशेषान् शृणुत मम कथयत इति शेष इति सूत्रार्थः ॥ एतदनुभावाश्च नामादि-प्ररूपणातः कथिता एव भवन्तीति तत्प्ररूपणाय विनेयाभिमुखीकरणकारि द्वारसूत्रमाह-

मू.(१३८४) *नामाइं वन्नरसगंधफासपरिणामलक्खणं ठाणं।*
ठिइं गइं च आउं, लेसाणं तु सुनेह मे॥ दारगाहा॥

वृ. 'नामानि' अभिधानानि वर्णश्च-कृष्णादी रसश्च-तिक्तादिर्गन्धश्च-सुरभ्यादिः स्पर्शश्च-कर्कशादि परिणामश्च जघन्यादिः लक्षणं च-पञ्चाश्रवासेवनादि, एषां समाहारे वर्णगन्धरस-स्पर्शपरिणामलक्षणं तत्, 'स्थानम्' उत्कर्षापकर्षरूपं 'स्थितिम्' अवस्थानकालं 'गतिं च' नरकादिकां यतो याऽवाप्यते 'आयुः' जीवितं च यावति च तत्रावशिष्यमाणे आगामि-भवलेश्यापरिणामस्तदिह गृह्यते, लेश्यानां 'तुः' पूरणे 'सुणेह मे' त्ति प्राग्वदिति सूत्रार्थः ॥

अत्र च 'यथोद्देशं निर्देश' इति न्यायतो नामान्याह-

मू.(१३८५) *किण्हा नीला य काऊ य, तेऊ पम्हा तहेव य।*
सुक्का लेसा य छट्ठा उ, नामाइं तु जहक्कमं॥

वृ. किण्हासूत्रं स्पष्टमेव ॥ प्रत्येकमासां वर्णानाह-

मू.(१३८६) *जीमूयनिद्धसंकासा, गवलरिट्ठगसंनिभा।*
खंजंजननयननिभा, किण्हलेसा उ वण्णओ॥

वृ. 'जीमूयनिद्धसंकास'त्ति प्राकृतत्वात् स्निग्धश्चासौ सजलत्वेन जीमूतश्च-मेघः स्निग्धजी-मूतस्तद्वत्सम्यक् काशतेयर्णतः प्रकाशत इति स्निग्धजीमूतसङ्काशा तत्सदृशीतियावत्, तथा गवलं-महिषभृङ्गं रिष्ठो-द्रोणकाकः स एव रिष्ठकः यद्वा रिष्टको नाम फलविशेषस्तत्संनिभा-तच्छाया, 'खंजण'त्ति खञ्जनं-स्नेहाभ्यक्तशकटाक्षघर्षणोद्भूतमञ्जनं च-कज्जलं नयनं-लोचनम् इह चोपचारात्तदेकदेशस्तन्मध्यवर्त्ती कृष्णसारस्तन्निभा-तत्समा कृष्णलेश्या 'तुः' विशेषणे स च शेषलेश्याभ्यो वर्णकृतं विशेषं द्योतयति, यद्वा 'तुः' अवधारणे भिन्नक्रमश्च ततः 'वर्णत एव' वर्णमेवाश्रित्य न तु रसादीन्, एवमुत्तरत्रापि।

मू.(१३८७) *नीलासोगसंकासा, चासपिच्छसमप्पभा।*
वेरुलियनिद्धसंकासा, नीललेसा उ वन्नओ॥

वृ. नीलश्चासावशोकश्च-वृक्षविशेषो नीलाशोकस्तत्सङ्काशा, रक्ताशोकव्यवच्छेदार्थं च नीलविशेषणं, चासः-पक्षिविशेषस्तस्य पिच्छं-पतत्रं तत्समप्रभा-तत्तुल्यद्युतिः, स्निग्धो-दीप्तो वैडूर्यो-मणिविशेषस्तत्सङ्काशा तत्सदृशी पदविपर्ययः प्राग्वत् नीललेश्या तु वर्णतो नीलेति तात्पर्यम्।

मू.(१३८८) *अयसीपुप्फसंकासा, कोइलच्छदसंनिभा।*
पारेवयगीवनिभा, काउलेसा उ वन्नओ॥

वृ. अतसी-धान्यविशेषस्तत्पुष्पसङ्काशा, कोकिलच्छदः-तैलकण्टकः, तथा च वृद्ध-

सम्प्रदायः "वन्ताहिगारे जो एत्थ कोइलच्छदो सो तेलकंटतो भन्नइ"त्ति, क्वचित्तु पठ्यते च-'कोइलच्छवि'त्ति, तत्र कौकिलः अन्यपुष्टस्तस्य छविस्तत्संनिभा, पारापतः पक्षिविशेषस्तस्य ग्रीवा-कन्धरा तन्निभा कापोतलेश्या तु वर्णतः, किञ्चित्कृष्णा किञ्चिच्च लोहितेति भावः, तथा च प्रज्ञापना- "काऊलेसा काललोहितेन वन्नेणं साहिज्जइ"त्ति,

मू.(१३८९) हिंगुलुयधाउसंकासा, तरुणाइच्चसंनिभा।
सुयतुंडपईवनिभा, तेउलेसा उ वन्नओ॥

वृ. हिङ्गुलुकः प्रतीतो धातुः-पाषाणधात्वादिस्तत्सङ्काशा, तरुण इहाभिनवोदितः आदित्यः- सूर्यस्तत्संनिभा, शुकः-प्रसिद्धस्तस्य तुण्डं-मुखं शुकतुण्डं तच्च प्रदीपश्च तन्निभा वा, पठन्ति च-'सुयतुंडालत्तदीवाभा' अन्ये तु 'सुयतुंडग्गसंकासा' इत्यमपि स्पष्टं, तेजोलेश्या तु वर्णतो रक्तेति भावार्थः।

मू.(१३९०) हरियालभेयसंकासा, हलिद्दाभेदसंनिभा।
सणासणकुसुमनिभा, पम्हलेसा उ वन्नओ॥

मू.(१३९१) संखंककुंदसंकासा, खीरधारासमप्पभा।
रययहारसंकासा, सुक्कलेसा उ वन्नओ॥

वृ. हरितालो-धातुविशेषस्तस्य भेदो-द्विधाभावस्तत्सङ्काशा, भिन्नस्य हि वर्णप्रकर्षो भवतीतिभेदग्रहणं, हरिद्देह पिण्डहरिद्रा तस्या भेदस्तत्संनिभा, सणोधान्यविशेषोऽसनो बीयकस्तयोः कुसुमं तन्निभा पद्मलेश्या तु वर्णतःपीतेति गर्भार्थः। शङ्खः-प्रतीतोऽङ्को-मणिविशेषः कुन्दः-कुन्दकुसुमं तत्सङ्काशा, क्षीरं-दुग्धं तूलकं-तूलं पाठान्तरतः पूरो वा क्षीरप्रवाहः, अन्ये तु 'धारि'त्ति पठन्ति, तद्ग्रहणं तु भाजनस्थस्य हि तद्वशादन्यथात्वमपि संभवतीति तत्समप्रभा, रजतं-रूप्यं हारो-मुक्ताकलापस्तत्सङ्काशा शुक्ललेश्या तु वर्णतः शुक्लेति हृदयमिति सूत्रषट्कार्थः॥ इत्युक्तो वर्णः सम्प्रति रसमाह-

मू.(१३९२) जह कडुयतुंबरसो निंबरसो कडुयरोहिणिरसो वा।
इत्तोवि अनंतगुणो रसो उ कण्हाइ नायव्वो॥

वृ. 'यथे'ति सादृश्ये ततश्च यादक् कटुकतुम्बकस्य रस-आस्वादः कटुकतुम्बकरसः 'निम्बरसः' प्रतीतः कटुका चासौ रोहिणी च-त्वग्विशेषः कटुकरोहिणी कटुकत्वाव्यभिचारित्वेऽपि तद्विशेषणमतिशयख्यापकं तद्रसो वा, औषधीविशेषो वा कटुकेह गृह्यते, 'यथे'ति सर्वत्रापेक्षते, इतोऽपि कटुकतुम्बकरसादेरनन्तेन अनन्तराशिना गुणनं गुणो यस्यासावनन्तगुणो 'रसस्तु' आस्वादः 'कृष्णायाः' कृष्णलेश्यायाः 'ज्ञातव्यः' अवबोद्धव्योऽतिकटुक इति तात्पर्यम्।

मू.(१३९३) जह तिकडुयस्स य रसो तिक्खो जह हत्थिपिप्पलीए वा।
इत्तोवि अनंतगुणो रसो उ नीलाइ नायव्वो॥

वृ. 'यथा' यादृशः 'त्रिकटुकस्य' प्रसिद्धस्य रसस्तीक्ष्णः-कटुर्यथा 'हस्तिपिप्पल्या वा' गजपिप्पल्या वाऽतोऽप्यनन्तगुणो रसस्तु नीलाया ज्ञातव्योऽतिशयतीक्ष्ण इति हृदयम्।

मू.(१३९४) जह तरुणअंबयरसो तुवरकवित्थस्स वावि जारिसओ।
इत्तोवि अनंतगुणो रसो उ काऊइ नायव्वो॥

वृ. यथा तरुणम्-अपरिपक्वं तच्च तदाम्रकं च-आम्रफलं तद्रसः, तुवरं-सकषायं पाठान्तरतः, आर्द्रत्वाद्, उभयत्र चार्षादपक्वं तच्च तत्कपित्थं च-कपित्थफलं तस्य 'वा' विकल्पे 'अपि' पूरणे यादृशको रस इति प्रक्रमः अतोऽप्यनन्तगुणो रसस्तु 'काऊए'त्ति कापोतायां ज्ञातव्योऽतिशयकषाय इत्याशयः।

मू.(१३९५) *जह परिणयंबगरसो पक्ककवित्थस्स वावि जारिसओ।*
इत्तोवि अनंतगुणो रसो उ तेऊइ नायव्वो॥

वृ. यथा परिणतं परिपक्वं यदाम्रकं तद्रसः पक्वकपित्थस्य वाऽपि यादृशको रसोऽतोऽप्यनन्तगुणो रसस्तु 'तेऊए'त्ति तेजोलेश्यायां ज्ञातव्यः आम्लः किञ्चिन्मधुरश्चेत्यैदम्पर्यं।

मू.(१३९६) *वरवारुणीइ व रसो विविहाण व आसवाण जारिसओ।*
महुमेरगस्स व रसो इत्तो पम्हाइ परएणं॥

वृ. वरवारुणी-प्रधानसुरा तस्या वा रसो यादृशक इति योगः 'विविधानां वा' नानाप्रकाराणाम् 'आसवानां' पुष्पप्रसवमद्यानां वा यादृशको रस इति सम्बन्धः, 'महुमेरयस्स व रसो'त्ति मधुमद्यविशेषो मैरेयं-सरकस्तयोः समाहारे मधुमैरेयं तस्य वा रसो यादृशकोऽतो वरवारुण्यादि रसात्पद्मायाः प्रक्रमाद्रसः 'परकेणं'ति अनन्तानन्तगुणत्वात्तदतिक्रमेण वर्त्तक इति गम्यते, अयं च किञ्चिदम्लकषायो माधुर्यवांश्चेति भावनीयं, पाठान्तरतोऽप्यनन्तगुणो रसस्तु पद्मायां ज्ञातव्यः।

मू.(१३९७) *खज्जूरमुद्दियरसो खीररसो खंडसक्कररसो वा।*
इत्तो उ अनंतगुणो रसो उ सुक्काइ नायव्वो॥

वृ. खर्जूरं च-पिण्डखर्जूरादि मृद्वीका च-द्राक्षा एतद्रसः तथा 'क्षीररसः' प्रतीतः खण्ड च-इक्षुविकारः शर्करा च-काशादिप्रभवा तद्रसो वा यादृश इति शेषः, अतोऽप्यनन्तगुणो रसस्तु शुक्लायां ज्ञातव्योऽत्यन्तरमधुर इति गर्भ इति सूत्रषट्कार्थः॥ उक्तो रसः, सम्प्रति गन्धमाह-

मू.(१३९८) *जह गोमडस्स गंधो सुणगमडस्स व जहा अहिमडस्स।*
इत्तो वि अनंतगुणो लेसाणं अप्पसत्थाणं॥

वृ. यथा गवां मृतकं-मृतकशरीरं तस्य गन्धः श्वमृतकस्य वा तथा यथाऽहिः-सर्पस्तन्मृतकस्य गन्ध इति सम्बन्धः, सूत्रत्वान्मृतकशब्दे कलोपः 'अतोऽपि' एतत्प्रकारादपि गन्धादनन्तगुणोऽतिदुर्गन्धतया लेश्यानाम् 'अप्रशस्तानाम' अशुभानां कोऽर्थः ?-कृष्णनीलकापोतानां, गन्ध इति प्रक्रमः, इह च लेश्यानामप्रशस्तत्वं गन्धस्याशुभत्वे हेतुरिति तद्विशेषादनुक्तोऽप्यस्य विशेषोऽवगम्यत इति नोक्तः।

मू.(१३९९) *जह सुरहिकुसुमगंधो गंधवासाण पिस्समाणाणं।*
इत्तोवि अनंतगुणो पसत्थलेसाण तिण्हंपि॥

वृ. यथा सुरभिकुसुमानां-जातिकेतक्यादिसम्बन्धिनां सुगन्धपुष्पाणां गन्धः-परिमलः सुरभिकुसुमगन्धः, तथा गन्धाश्च-कोष्टपुटपाकनिष्पन्ना वासाश्च-इतरे गन्धवासाः, इह चैतदङ्गान्येवोपचारादेवमुक्तानि, तेषां, पाठान्तरतश्च गन्धानां च, 'पिष्यमाणानां' संचूर्ण्यमानानां यथा गन्ध इति प्रक्रमः, तथा चातिप्रबलतरोऽसौ प्रादुर्भवतीत्येवमभिधानम्, 'अतोऽपि' एतत्प्रका-

रादपि गन्धाद् अनन्तगुणः अतिशयसुगन्धितयः प्रशस्तलेश्याना 'तिसृणामपि' तेजसीपद्म शुक्लानां गन्ध इति प्रक्रमः, इहापि प्रशस्तत्वविसेषाद्गन्धविशेषोऽनुमीयत इति नोक्त इति

मू.(१४००) जह करगयस्स फासो गोजिब्भाए व सागपत्ताणं।
इत्तोवि अनंतगुणो लेसाणं अप्पसत्थाणं॥

वृ. यथा 'करगयस्स'त्ति क्रकचस्य करपत्रस्य स्पर्शो गोजिह्वा गोजिह्वा तस्या वा यथा वा शाको-वृक्षविशेषस्तत्पत्राणां स्पर्श इति प्रक्रमः, 'अतोऽपि' एतत्प्रकारादपि स्पर्शादनन्तगुणः अत्यतिशायितया यथाक्रमं लेश्यानामप्रशस्तानामाद्यानां तिसृणां प्रक्रमात्स्पर्शोऽतिकर्कश-इति हृदयम्।

मू.(१४०१) जह बूरस्सवि फासो नवनीयस्स व सिरीसकुसुमाणं।
इत्तोवि अनंतगुणो पसत्थलेसाण तिण्हंपि॥

वृ. यथा 'बूरस्य वा' प्रतीतस्य स्पर्शः 'नवनीतस्य' म्रक्षणस्य, यथा वा शिरीषो-वृक्ष-विशेषस्तत्कुसुमानामुभयत्र यथा स्पर्श इति प्रक्रमः, 'अतोऽपि' एतत्प्रकारादपि स्पर्शाद् 'अनन्तगुणः' अतिसुकुमारतया यथाक्रमं प्रशस्तलेश्यानां 'तिसृणामपि' उक्तरूपाणां स्पर्श इति प्रक्रमः, इह च यदनेकदृष्टान्तोपादानं तत्तानादेशविनेयानुग्रहार्थं, क्वचिद्धि किञ्चित्प्रतीत मिति, यद्वा निगदितोदाहरणेषु वर्णादितारतम्यसम्भवाल्लेश्यानां स्वस्थानेऽपि वर्णादि-वैचित्र्यज्ञापनार्थमिति सूत्रद्वयार्थः॥ परिणामद्वारमाह-

मू.(१४०२) तिविहो व नवविहो वा सत्तावीसइविहिक्कसी वा।
दुसओ तेयालो वा लेसाणं होइ परिणामो॥

वृ. त्रिविधो नवविधो वा 'सत्तावीसइ विहेक्कसीओ व'त्ति विधशब्दो वाशब्दश्चोभयत्र संबध्यते, ततश्च सप्तविंशतिविध एकाशीतिविधो वा 'दुसओ तेआलो व'त्ति अत्रापि विधशब्दस्य सम्बन्धात् त्रिचत्वारिंशद्विशतविधो वा लेश्यानां भवति परिणामः-ततद्रूपगमनात्मकः, इह च 'त्रिविधः' जघन्यमध्यमोत्कृष्टभेदेन 'नवविधः' यदैषामपि जघन्यादीनां स्वस्थानतार-तम्यचिन्तायां प्रत्येकं जघन्यादित्रयेण गुणना एवं पुनस्त्रिकगुणनया सप्तविंशतिविधत्वमेका-शीतिविधत्वं त्रिचत्वारिंशद्विशतविधत्वं च भावनीयम्। आह-एवं तारतम्यचिन्तायां कः सङ्ख्यानियमः? उच्यते, एवमेतत्, उपलक्षणं चैतत्, तथा च प्रज्ञापना-"कण्हलेसा णं भंते! कतिविधपरिणामं परिणमति?, गोयमा! तिविहं वा नवविहं वा सत्तावीसइविहं वा एक्कासीइविहं वावि तेयालदुसयविहं वा बहुं वा बहुविहं वा परिणामं परिणमति, एवं जाव सुक्कलेसा" इति सूत्रार्थः॥ उक्तः परिणामः, सम्प्रति लक्षणमाह, तत्र च-

मू.(१४०३) पंचासवप्पमत्तो तीहिं अगुत्तो छसू अविरओ य।
तिव्वारंभपरिणओ खुद्दो साहस्सिओ नरो॥

वृ. पञ्चाश्रवा-हिंसादयस्तैः प्रमत्तः-प्रमादवान् पञ्चाश्रवप्रमत्तः पाठान्तरतः पञ्चाश्रवप्रवृत्तो वाऽतस्तैभिः प्रस्तावान्मनोवाक्कायैः 'अगुप्तः' अनियन्त्रितो मनोगुप्त्यादिरहित इत्यर्थः, तथा 'षट्सु' पृथ्वीकायादिषु 'अविरतः' अनिवृत्तस्तदुपमर्दकत्वादेरिति गम्यते, अयं चातीव्रार-म्भोऽपि स्यादत आह-तीव्र-उत्कटः स्वरूपतोऽध्यवसायतो वाऽऽरम्भः-सावद्यव्या-

पारास्तत्परिणतः-तत्प्रवृत्त्या तदात्मतां गतः, तथा 'क्षुद्रः' सर्वस्यैवाहितैषी कार्पण्ययुक्तो वा, सहसा-अपर्यालोच्य गुणदोषान् प्रवर्त्तत इति साहसिकः, चौर्यादिकृदिति योऽर्थः, 'नरः' पुरुष उपलक्षणत्वात्स्त्र्यादिर्वा।

मू.(१४०४) निद्धंधसपरिणामो, निस्संसो अजिइंदिओ।
एयजोगसमाउत्तो, काऊलेसं तु परिणमे॥

वृ. 'निद्धंधस'त्ति अत्यन्तमैहिकामुष्मिकापायशङ्काविकलोऽत्यन्तं जन्तुबाधानपेक्षो वा परिणामोऽध्यवसायो वा यस्य स तथा 'निस्संसो'त्ति 'नृशंसः' निस्त्रिंशो जीवान् विहिंसन् मनागपि न शङ्कते, निःशंसो वा-परप्रशंसारहितः। 'अजितेन्द्रियः' अनिगृहीतेन्द्रियः, अनेय तु पूर्वसूत्रोत्तरार्द्धस्थान इदमधीयते तच्चेहेति, उपसंहारमाह-एते च तेऽनन्तरोक्ता योगाश्च-मनोवाक्कायव्यापारा एतद्योगाः-पञ्चाश्रवप्रमत्तत्वादयस्तैः समिति-भृशमाडित्यभिव्याप्त्या युक्तः अन्वितः एतद्योगसमायुक्तः कृष्णलेश्यां 'तुः' अवधारणे कृष्णलेश्यामेव 'परिणमेत्' तद्द्रव्यसाचिव्येन तथाविधद्रव्यसम्पर्कात्स्फटिकवत्तदुपरञ्जनात्तद्रूपतां भजेत्, उक्तं हि-

"कृष्णादिद्रव्यसाचिव्यात्परिणामो य आत्मनः।
स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रयुज्यते॥"

एतेन पञ्चाश्रवप्रमत्तत्वादीनां भावकृष्णलेश्यायाः सद्भावोपदर्शनादमीषां लक्षणत्वमुक्तं, यो हि यत्सद्भाव एव भवति स तस्य लक्षणं यथौष्ण्यमग्नेः, एवमुत्तरत्रापि लक्षणत्वभावना कार्या।

मू.(१४०५) इस्साअमरिसअतवो, अविज्जमाया अहीरिया।
गेही पओसे य सढे, रसलोलुए सायगवेसए य॥

वृ. नीललेश्यालक्षणमाह-ईर्ष्या च परगुणासहनममर्षश्च-अत्यन्ताभिनिवेशोऽतपश्च-तपोविपर्ययोऽमीषां समाहारनिर्देशः, 'अविज्ज'त्ति 'अविद्या' कुसास्त्ररूपा माया-वञ्चनात्मिका 'अहीकता च' असमाचारविषया निर्लज्जता 'गृद्धिः' अभिकाङ्क्षा विषयेष्विति गम्यते 'प्रदोषश्च' प्रद्वेषो मतुब्लोपादभेदोपचाराद्वा सर्वत्र तद्वान् जन्तुरुच्यतेऽत एव शठः अलीकभाषणात् प्रमत्तः प्रकर्षेण जात्यादिमदासेवनात्, पाठान्तरतः शठश्च मत्तः, तथा रसेषु लोलुपो-लम्पटो रसलोलुपः, सातं-सुखं तद्गवेषकश्च-कथं मम सुखं स्यादिति बुद्धिमान्,

मू.(१४०६) आरंभा अविरओ, खुद्दो साहस्सिओ नरो।
एयजोगसमाउत्तो, नीललेसं तु परिणमे॥

वृ. 'आरम्भात्' प्राण्युपमर्दात् 'अविरतः' अनिवृत्तः क्षुद्रः साहसिको नरः, एतद्योगसमायुक्तो नीललेश्यां परिणमेत्, 'तुः' प्राग्वत्पुनरर्थो वा ४।

मू.(१४०७) वंके वंकसमायारे, नियडिल्ले अणुज्जुए।
पलिउंचग ओवहिए, मिच्छदिट्ठी अणारिए॥

वृ. 'वक्रः' वचसा 'वक्रसमाचारः' क्रियया 'निकृतिमान्' मनसा 'अनृजुकः' कथंचिद-जूकर्त्तुमशक्यतया 'पलिउंचग'त्ति प्रतिकुञ्चकः-स्वदोषप्रच्छादकतया उपधिः-छद्म तेन चरत्यौपधिकः, सर्वत्र व्याजतः प्रवृत्तेः, एकार्थिकानि वैतानि नानादेशजविनेयानुग्रहायोपात्तानि,

मिथ्यादृष्टिरनार्यश्च प्राग्वत्,

मू.(१४०८) उप्फालगदुट्ठवाई य, तेणे अविय मच्छरी।
एयजोगसमाउत्तो, काउलेसं तु परिणमे॥

वृ.'उप्फालग'त्ति उत्प्रासकं यथा पर उत्प्रास्यते दुष्टं च रागादिदोषवद्यथा भवत्येवं वदनशील उत्प्रासकदुष्टवादी 'चः' समुच्चये 'स्तेनः' चौरः 'च' प्राग्वत् 'अपि च' इति पूरणे 'मत्सरः' परसम्पदसहनं सति वा वित्ते त्यागाभावः, तथा चाहुः शाब्दिकाः -''परसम्पदामसहनं वित्ता-त्यागश्च मत्सरो ज्ञेयः'' इति, तद्वान् मत्सरी, एतद्योगसमायुक्तः कापोतलेश्यां 'तु' इति पुनः परिणमेत्॥

मू.(१४०९) नीयावित्ती अचवले, अमाई अकुऊहले।
विणीयविणए दंते, जोगवं उवहाणवं॥

वृ. 'नीयावित्ति'त्ति नीचैर्वृत्तिः-कायमनोवाग्भिरनुत्सिक्तः 'अचपलः' चापलानुपेतः 'अमायी' शाठ्यनन्वितः 'अकुतूहलः' कुहकादिष्वकौतुकवानत एव 'विनीतविनयः' स्वभ्यस्तगुर्वाद्युचितप्रतिपत्तिः, तथा 'दान्तः' इन्द्रियदमेन योगः-स्वाद्यायादिव्यापारस्तद्वान्, 'उपधानवान्' विहितशास्त्रोपचारः,।

मू.(१४१०) पियधम्मे दढधम्मे, वज्जभीरू हिएसए।
एयजोगसमाउत्तो, तेउलेसं तु परिणमे॥

वृ.'प्रियधर्मा' अभिरुचितधर्मानुष्ठानः 'दृढधर्मा' अङ्गीकृतव्रतादिनिर्वाहकः, किमित्येवम्?, यतः 'वज्ज'त्ति वर्ज्यं प्राकृतत्वादकारलोपे अवद्यं चोभयत्र पापं तद्भीरुः 'हितैषकः' मुक्तिगवेषकः, पाठान्तरतो हिताशयो वा-परोपकारचेताः, पठ्यते च-'अनासवे'त्ति तत्र च न विद्यन्ते आश्रवा-हिंसादयो यस्यासावनाश्रवः, एतद्योगसमायुक्तस्तेजोलेश्यां तु परिणमेत्॥

मू.(१४११) पयणुकोहमानो य, मायालोभे य पयणुए।
पसंतचित्ते दंतप्पा, जोगवं उवहाणवं॥

वृ.प्रतनू-अतीवाल्पौ क्रोधमानौ यस्य स तथा, चः पूरणे, माया लोभश्च उक्तरूपः प्रतनुको यस्येति शेषः, अत एव प्रशान्तं-प्रकर्षेणोपशमवच्चित्तमस्येति प्रशान्तचितः, दान्तः - अहितप्रवृत्तिनिवारणतो वशीकृत आत्मा येन स तथा, योगावानुपधानवानिति च प्राग्वत्,।

मू.(१४१२) तहा य पयणुवाई य, उवसंते जिइंदिए।
एयजोगसमाउत्तो, पम्हलेसं तु परिणमे॥

वृ.तथा 'प्रतनुवादी' स्वल्पभाषकश्चशब्दो भिन्नक्रमो योक्ष्यते, 'उपशान्तः' अनुद्भटतयोपशान्ताकृतिः 'जितेन्द्रियश्च' वशीकृताक्षः, एतद्योगसमायुक्तः पद्मलेश्यां तु परिणमेत्॥

मू.(१४१३) अट्टरुद्दाणि वज्जित्ता, धम्मसुक्काणि साहए।
पसंतचित्ते दंतप्पा, समिए गुत्ते य गुत्तेसु॥

वृ.'आर्त्तरौद्रे' उक्तरूपे ध्याने 'वर्जयित्वा' परिहृत्य 'धर्मशुक्ले' प्रागुक्ते एव शुभध्याने 'साधयेत' सततभ्यासतो निष्पादयेत्, यः कीदृशः सन्? इत्याह-प्रशान्तचित्तो दान्तात्मेति च प्राग्वत्, पाठान्तरतश्च ध्यायति यो विनीतविनयो दान्तः 'समितः' समितिमान् 'गुप्तश्च' निरुद्धसमस्तव्यापारः 'गुप्तिभिः' मनोगुप्त्यादिभिः, तृतीयार्थे सप्तमी,

मू.(१४१४) सरागे वीयरागे वा, उवसंते जिइंदिए।
एयजोगसमाउत्तो, सुक्कलेसं तु परिणमे ॥

वृ.स च 'सरागः' अक्षीणानुपशान्तकषायतया वीतरागो वा ततोऽन्य उपशान्तः पाठान्तरतः 'शुद्धयोगो वा' निर्दोषव्यापारः जितेन्द्रियः प्रत्यक्षः, स एतद्योगसमायुक्तः शुक्ललेश्यां तु परिणमति, इह च शुभलेश्यासु केषाञ्चिद्विशेषणानां पुनरुपादानेऽपि लेश्यान्तरविषयत्वादपौनरुक्त्यं, पूर्वपूर्वापेक्षयोत्तरोत्तरेषां विशुद्धितः प्रकृष्टत्वं च भावनीयं, विशिष्टलेश्या वाऽपेक्ष्यैवं लक्षणाभिधानमिति न देवादिभिर्व्यभिचार आशङ्कनीय इति द्वादशसूत्रार्थः ॥

मू.(१४१५) असंखिज्जाणोसप्पिणीण उस्सप्पिणीण जे समया।
संखाईया लोगा लेसाण हवंति ठाणाइं ॥

वृ. 'असङ्ख्येयानां' सङ्ख्यातीतानाम् अवसर्पन्ति-प्रतिसमयं कालप्रमाणं जन्तूनां वा शरीरायुःप्रमाणादिकमपेक्ष्यह्रासमनुभवन्त्यवश्यमित्यवसर्पिण्यो-दशसागरोपमकोटीकोटिपरिमाणास्तासां तथा तत्परिमाणानामेव उत्सर्पन्ति-उक्तन्यायतो वृद्धिमनुभवन्त्यवश्यमित्युत्सर्पिण्यस्तासां ये 'समयाः' परमनिरुद्धकाललक्षणाः, कियन्त इत्याह- सङ्ख्यातीताः पाठान्तरतोऽसङ्ख्येया वा लोका असङ्ख्येयलोकप्रमितत्वेन यथा दशप्रस्थप्रमितत्वेन व्रीहयो दशप्रस्थाः, ततोऽयमर्थः-असङ्ख्येयलोकाकाशप्रदेशपरिमाणानि लेश्यानां भवन्ति स्थानानि प्रकर्षापकर्षकृतानि, अशुभानां संक्लेशरूपाणि शुभानां च विशुद्धिरूपाणि तत्परिमाणानीति शेषः, यद्वा असङ्ख्येयोत्सर्पिण्यवसर्पिणीनां ये समया गम्यमानत्वात्तावन्ति लेश्यानां भवन्ति स्थानानीति कालतोऽसङ्ख्याता लोका इति च क्षेत्रतः स्थानमानमेवोक्तमिति सूत्रार्थः ॥

मू.(१४१६) मुहुत्तद्धं तु जहन्ना तित्तीसा सागरा मुहुत्तऽहिया।
उक्कोसा होइ ठिई नायव्वा किण्हलेसाए ॥

मू.(१४१७) मुहुत्तद्धं तु जहन्ना दसउदहिपलियमसंखभागमब्भहिया।
उक्कोसा होइ ठिई नायव्वा नीललेसाए ॥

मू.(१४१८) मुहुत्तद्धं तु जहन्ना तिन्नुदही पलियमसंखभागमब्भहिया।
उक्कोसा होइ ठिई नायव्वा काउलेसाए ॥

मू.(१४१९) मुहुत्तद्धं तु जहन्ना दोण्हु पलियमसंखभागमब्भहिया।
उक्कोसा होइ ठिई नायव्वा तेउलेसाए ॥

मू.(१४२०) मुहुत्तद्धं तु जहन्ना दसउदही होइ मुहुत्तब्भहिया।
उक्कोसा होइ ठिई नायव्वा पम्हलेसाए ॥

मू.(१४२१) मुहुत्तद्धं तु जहन्ना तित्तीसं सागरा मुहुत्तहिया।
उक्कोसा होइ ठिई नायव्वा सुक्कलेसाए ॥

वृ. मुहूर्तस्यार्द्धं मुहूर्तार्द्धं:, तत्कालात्यन्तसंयोगे द्वितीया, इह च समप्रविभागस्याविवक्षितत्वादन्तर्मुहूर्तमित्युक्तं भवति, 'तुः' अवधारणे ततो मुहूर्तार्द्धमेव जघन्या 'तेत्तीस'त्ति त्रयस्त्रिंशत् 'सागराइं'ति पदैकदेशऽपि पदप्रयोगदर्शनात्सागरोपमाणि 'मुहुत्तऽहिय'त्ति इहोत्तरत्र च मुहूर्तशब्देन मुहूर्तैकदेश एवोक्तः, समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते यथा

ग्रामो दग्धः पत्रे दग्ध इति, ततश्चान्तर्मुहूर्त्ताधिकान्युत्कृष्टा भवति स्थितिर्ज्ञातव्या कृष्णलेश्यायाः, इह चान्तर्मुहूर्त्तस्यासङ्ख्येयभेदत्वादन्तर्मुहूर्त्तशब्देन पूर्वोत्तरभवसम्बन्ध्यन्तर्मुहूर्त्तद्वयमुक्तं द्रष्टव्यमेवमुत्तरत्रापि।

मुहूर्त्तार्द्धस्तु जघन्या 'देशे'ति दग्धशङ्कटानि उदधय इत्युक्तन्यायेनोदधयुग्मानि कोऽर्थः?-सागरोपमाणि 'पलिय'त्ति तथैव पल्योपमं तस्यासङ्ख्यभागस्तेनाधिकानि पल्योपमासङ्ख्येयभागाधिकान्युत्कृष्टा भवति स्थितिर्ज्ञातव्या नीललेश्यायाः, नन्वस्या धूम्रप्रभोपरितनप्रस्तट एव सम्भवः तत्र च 'अंतोमुहुत्तंमि गए'' त्यादिवक्ष्यमाणन्यायतः पूर्वोत्तरभवान्तर्मुहूर्त्तद्वयपल्योपमासङ्ख्येयभागाभ्यधिकदशसागरोपमपरिमाणैवासौ किं नोक्ता?, उच्यते, उक्तैव, पल्योपमासङ्ख्येयभाग एव तस्याप्यन्तर्मुहूर्त्तद्वयस्यान्तर्भावात्, तदसङ्ख्येय-भागानां चासङ्ख्येयभेदत्वादिहैतावत्परिमाणस्यैवास्य विवक्षितत्वान्न विरोधः, एवमुत्तरत्रापि भावनीयम्।

अक्षरसंस्कारस्तूत्तरेषु कृत एव, नवरं त्रय उदधयः सागरोपमाणि द्वावुदधी-द्वे सागरोपमे, दशोदधयो-दश सागरोपमाणि, 'तेत्तीसं'ति त्रयस्त्रिंशत्सागरोपमाणि, पठन्ति च सर्वत्र 'मुहुत्तद्धा उ'त्ति, तत्र मुहूर्त्त(र्त्तार्ध) शब्देन प्राग्वदन्तर्मुहूर्त्तस्योक्तत्वादन्तर्मुहूर्त्तकालमिति सूत्रपट्कार्थः॥ सम्प्रति प्रकृतमुपसंहरन्नुत्तरग्रन्थसम्बन्धमाह-

मू.(१४२२) एसा खलु लेसाणं ओहेण ठिई उ वन्निया होइ।
चउसुवि गईसु इत्तो लेसाण ठिई उ वुच्छामि॥

वृ. स्पष्टमेव, नवरम् 'ओघेन' इति सामान्येन गतिभेदाविवक्षयेतियावत्, 'चतसृष्वपि गतिषु' नरकगत्यादिषु प्रत्येकमिति शेषः, 'अतः' इत्योघस्थितिवर्णनानन्तरमिति सूत्रार्थः॥

मू.(१४२३) दसवाससहस्साइं काउइ ठिई जहन्निया होइ।
तिण्णुदही पलिय असंखेज्जभागं च उक्कोसा॥

मू.(१४२४) तिण्णुदहीपलिओवमअसंखभागो जहन्ननीलठिई।
दसउदहीपलिओवमअसंखभागं च उक्कोसा॥

मू.(१४२५) दसउदहीपलिओवमअसंखभागं जहन्निया होइ।
तित्तीससागराइं उक्कोसा होइ किण्हाए॥

मू.(१४२६) एसा नेरइयाणं लेसाण ठिई उ वन्निया होइ।
तेन परं वुच्छामि तिरियमनुस्साण देवाणं॥

मू.(१४२७) अंतोमुहुत्तमद्धं लेसाण ठिई तहिं तहिं जा उ।
तिरियाण नराणं वा वज्जित्ता केवलं लेसं॥

मू.(१४२८) मुहुत्तद्धं तु जहन्ना उक्कोसा होइ पुव्वकोडी उ।
नवहिं वरिसेहिं ऊणा नायव्वा सुक्कलेसाए॥

मू.(१४२९) एसा तिरियनराणं लेसाण ठिई उ वन्निया होइ।
तेन परं वुच्छामि लेसाण ठिई उ देवाणं॥

मू.(१४३०) दसवाससहस्साइं किण्हाए ठिई जहन्निया होइ।
पलियमसंखिज्जइमो उक्कोसो होइ किण्हाए॥

मू.(१४३१) जा किण्हाई ठिई खलु उक्कोसा सा उ समयमब्भहिया।
जहन्नेणं नीलाए पलियमसंखं च उक्कोसा॥

मू.(१४३२) जा नीलाइ ठिई खलु उक्कोसा सा उ समयमब्भहिया।
जहन्नेणं काऊएपलियमसंखं च उक्कोसा॥

मू.(१४३३) तेन परं वुच्छामी तेऊलेसा जहा सुरगणाणं।
[illegible]

मू.(१४३४) पलिओवमं जहन्ना उक्कोसा सागरा उ दुण्हऽहिया।
पलियमसंखिज्जेणं होई भागेण तेऊए॥

मू.(१४३५) दसवाससहस्साइं तेऊइ ठिई जहन्निया होइ।
दुन्नुदही पलिओवमअसंखभागं च उक्कोसा॥

मू.(१४३६) जा तेऊइ ठिई खलु उक्कोसा उ समयमब्भहिया।
जहन्नेण पम्हाए दस मुहुत्तऽहियाइं उक्कोसा॥

मू.(१४३७) जा पम्हाइ ठिई खलु उक्कोसा उ समयमब्भहिया।
जहन्नेण सुक्काए तित्तीसमुहुत्तमब्भहिया॥

वृ.दशवर्षसहस्राणि कापोताया: स्थितिर्जघन्यका भवति, त्रय उदधय: 'पलियमसंखेज्जभागं च'त्ति सूत्रत्वात् पल्योपमासङ्ख्येयभागं चोत्कृष्टा, पठन्ति च-'उक्कोसा तिन्नुदही पलियमसंखेज्जभागऽहिय'त्ति स्पष्टम्, इयं च जघन्या रत्नप्रभायां, तस्यां हि जघन्यतोऽपि दशवर्षसहस्राण्यायुरिति, उत्कृष्टा च वालुकाप्रभायां, तत्राप्युपरितनप्रस्तटनारकाणामेव, तेषामेतावत्स्थितिकानामसाविति भावनीयम्,।

त्रय उदधय: पल्योपमाङ्ख्येयभागश्च मकारस्यालाक्षणिकत्वात् चस्य गम्यमानत्वाज्जघन्या नीलाया: स्थितिर्दशोदधय: पल्योपमासङ्ख्येयभागश्चोत्कृष्टा, इहापि जघन्या वालुकाप्रभायामेतावत्स्थितिकानामेव, उत्कृष्टा च धूमप्रभायामुपरितनप्रस्तटनारकाणां, तत्रापि येषामेतावतो स्थितिरिति मन्तव्या, इहोत्तरत्र च पाठान्तरं दृश्यते, तत्र च जघन्यस्थिति: समयाधिकत्वमुक्तं तच्च न बुध्यत इति न तद्व्याख्या, दशोदधय: पल्योमासङ्ख्येयभागो जघन्यिका भवति प्रक्रमात्स्थिति: कृष्णाया इति सम्बन्ध:, अस्याश्च धूमप्रभायामेतावत्स्थितिकेष्वेव नारकेषु सम्भव:, त्रयस्त्रिंशत्सागरोपमाणि उत्कृष्टा भवति कृष्णाया:, स्थितिरितीहापि प्रक्रम:, इयं च महातम:प्रभायां, तत्रैवैतावत्प्रमाणस्यायुष: सम्भवात्, इह च नारकाणामुत्तरत्र च देवानां द्रव्यलेश्यास्थितिरेवैवं चिन्त्यते, तद्भावलेश्यानां परिवर्त्तमानतयाऽन्यथाऽपि स्थिते: सम्भवात्, उक्तं हि-

"देवाण नारयाण य दव्वलेसा भवंति एयाओ।
भावपरावत्तीए सुरणेरइयाण छल्लेसा॥"

पूर्वोक्तं निगमयन्नुत्तरं च ग्रन्थं प्रस्तावयन्निदमाह-'एषा' अनन्तरोक्ता निरये भवा नैरयिकास्तेषां सम्बन्धिनीनां लेश्यानां 'स्थिति:' अवस्थिति: 'तु:' पूरणे 'वर्णिता' आख्याता भवति, 'तेन'त्ति सूत्रत्वात्तत: 'परम्' इत्यग्रतो वक्ष्यामि प्रक्रमाल्लेश्यानां स्थितिं तिर्यग्मनुष्याणां तथा देवानाम्॥ यथाप्रतिज्ञातमेवाह-'अंतोमुहुत्तमद्ध'त्ति 'अन्तर्मुहूर्त्ताद्धाम्' अन्तर्मुहूर्त्तकालं

लेश्यानां स्थितिर्जघन्योत्कृष्टा चेति शेषः, कतराऽसौ ? इत्याह 'यस्मिन्'इति पृथिवीकायादौ संमूर्छिममनुष्यादौ च याः कृष्णाद्याः 'तुः' पूरणे तिरश्चां मनुष्याणां मध्ये संभवन्ति तासाम्, एता हि क्वचित्काश्चित्संभवन्ति, यत आगमः-

"पुढविकाइयाणं भंते! कइलेसातो पन्नत्ताओ?, गोयमा! चत्तारि लेसाओ, तंजहा- कण्हलेसा जाव तेउलेसा, आउवणप्फइखाइयाणवि एवं चेव, तेउवाउबेइंदियतेइंदियचउरिंदियाण जहा नेरइयाणं पंचेंदियतिरिक्खजोणियाणं पुच्छा, गोयमा! छल्लेस्साओ कण्हलेसा जाव सुक्कलेसा मानुस्साणं पुच्छा, गोयमा! छ एयाओ चेव, संमुच्छिममणुस्साणं पुच्छा, गोयमा! जहा नेरइयाणं॥ नन्वेवं शुक्ललेश्याया अप्यन्तुर्मुहूर्त्तमेव स्थितिः प्राप्तेत्याशङ्क्याह- वर्जयित्वा केवलां शुद्धां लेश्यां शुक्ललेश्यामितियावत्।

अस्याश्च यावती स्थितिस्तामाह-'मुहुत्तद्धं तु'त्ति प्राग्वदन्तर्मुहूर्त्तमेव जघन्या उत्कृष्टा भवति पूर्वकोटी 'तुः' विशेषणे, स च जघन्यस्थित्यपेक्षयाऽस्या उक्तमेव विशेषं द्योतयति, नवभिर्वर्षैर्न्यूना ज्ञातव्या शुक्लेश्यायाः स्थितिरिति प्रक्रमः, इह च यद्यपि कश्चित्पूर्वकोट्यायुरष्टवार्षिक एव व्रतपरिणाममाप्नोति तथाऽपि नैतावद्वयःस्थस्य वर्षपर्यायादर्वाक् शुक्ललेश्यायाः सम्भव इति नवभिर्वर्षैर्न्यूना पूर्वकोटिरुच्यते। 'एसा'सूत्रं स्पष्टमेव। प्रतिज्ञातानुरूपमाह-दशवर्षसहस्राणि कृष्णायाः स्थितिर्जघन्यका भवति, भवनपतिव्यन्तरेषु चास्याः सम्भवस्तेषामेव जघन्यतोऽप्येतावत्स्थितिकत्वात्, उक्तं च-"दस भवनवणयराणं वाससहस्सा ठिई जहन्नेणं"ति, 'पलियमसंखेज्जइमो'त्ति पल्योपमासङ्ख्येयतमः प्रस्तावाद् भाग उत्कृष्टा भवति कृष्णायाः स्थितिरिति प्रक्रम, एवंविधविमध्यममायुषामेव भवनपतिव्यन्तराणामियं द्रष्टव्या।

सम्प्रति नीलायाः स्थितिमाह-या कृष्णायाः स्थितिः 'खलुः' वाक्यालङ्कारे 'उत्कृष्टा' अनन्तरमुक्तरूपा 'सा उ'त्ति सैव 'समयमब्भहिय'त्ति समयाभ्यधिका जघन्येन नीलायाः, 'पलियमसंखिज्ज'त्ति प्राग्वत्पल्योपमासङ्ख्येयश्च भाग उत्कृष्टा स्थितिर्नवरमुक्तहेतोरेव वृहत्तरोऽयमसङ्ख्येयभागो गृह्यते। या नीलायाः स्थितिः खलूत्कृष्टा 'सा उ'त्ति सैव समयाभ्यधिका जघन्येन कापोतायाः पल्योपमासङ्ख्येयश्च भाग उत्कृष्टा स्थितिः, एतावदायुषामेव भवनपतिव्यन्तराणामिमे मन्तव्ये, इहाप्युक्तहेतोरेव पूर्वस्माद्बृहत्तरोऽसङ्ख्यातभागः परिगृह्यते।

इत्थं निकायद्वयभाविनीमाद्यलेश्यात्रयस्थितिमुपदर्श्य समस्तनिकायभाविनीं तेजोलेश्यास्थितिमभिधातुं प्रतिज्ञासूत्रमाह-'तेण'त्ति ततः परं प्रवक्ष्यामि तेजोलेश्यां, 'यथे'ति येनावस्थानप्रकारेण सुरगणानां भवति तथेत्युपस्कारः, किमन्यतरनिकायानामेवामीषामुतान्यथेत्याह-भवनपतिवाणमंतरज्योतिर्वैमानिकानां चतुर्निकायानामिति योऽर्थः, 'चः' पूरणे, प्रतिज्ञातमेवाह-पल्योपमं जघन्या उत्कृष्टा 'सागर'त्ति सागरोपमे 'तुः' प्राग्वत् 'द्वे' द्विसङ्ख्ये अधिके-अर्गल, कियतेत्याह-पल्योपमासङ्ख्येयेनेति योगः, भवति तैजस्याः स्थितिरिति प्रक्रमः, इयं च सामान्योपक्रमेऽपि वैमानिकनिकायविषयतयैव नेया, तत्र च सौधर्मेशानदेवानां जघन्यत उत्कृष्टतश्चैतावदायुषः सम्भवात्, उपलक्षणं चैतच्छेषनिकायतेजोलेश्यास्थितेः, ततश्च भवनपतिव्यन्तराणां जघन्यतो दशवर्षसहस्राणि, उत्कृष्टतस्तु भवनपतीनां सागरोपममधिकं, व्यन्तराणां च पल्योपमं, ज्योतिष्काणां तु जघन्यतः पल्योपमाष्टभागः, उत्कृष्टस्तु वर्षलक्षाधिकं

पल्योपमम्, एतावन्मात्राया एवैषां जघन्यत उत्कृष्टतश्चायुःस्थितेः सम्भवात्।

'दसवास सहस्साइं' इत्यादि स्पष्टमेव, नवरमनेन निकायभेदमनङ्गीकृत्यैव लेश्यास्थितिरुक्ता, इह च दशवर्षसहस्राणि जघन्या तेजस्याः स्थितिरभिहिता, प्रक्रमानुरूप्येण तु योत्कृष्टा कापोतायाः स्थितिरसावेवास्याः समयाधिका प्राप्नोति, अधीयेत च केचनानन्तरसूत्रत्रयस्थाने- 'जा काऊइ ठिई खलु उक्कोसे'त्यादि तदत्र तत्त्वं न विद्मः।

पद्मायाः स्थितिमाह-पद्मायाः स्थितिमाह-या तेजस्याः स्थितिः खलूत्कृष्टा 'सा उ'त्ति सैव समयाभ्यधिका जघन्येय पद्मायाः स्थितिरिति प्रक्रमः, 'दस तु' इति दशैव प्रस्तावात्सागरोपमाणि मुहूर्त्ताधिकान्युत्कृष्टा, इयं च जघन्या सनत्कुमारे उत्कृष्टा च ब्रह्मलोके, तयोरेवैतदायुष्कसम्भवात्, आह-यदीहान्तर्मुहूर्त्तमधिकमुच्यते ततः पूर्वत्रापि किं न तदधिकमुच्यते? देवभवलेश्याया एव तत्र विवक्षितत्वात्, प्रतिज्ञातं हि 'तेन परं वोच्छामि लेसाण ठिई तु देवाणं'ति, एवं सतीहान्तर्मुहूर्त्ताधिकत्वं विरुध्यते, न अभिप्रायापरिज्ञानात्, अत्र हि प्रागुत्तरभवलेश्याऽपि "अंतोमुहुत्तंमि गए"त्ति वचनादेवभवसम्बन्धिन्येवेति प्रदर्शनार्थमित्थमुक्तमिति न विरोध इति भावनीयम्। शुक्ललेश्यास्थितिमाह- या पद्मायाः स्थितिः खलूत्कृष्टा 'सा उ'त्ति सैव समयाभ्यधिका जघन्येय शुक्लायाः स्थितिरिति प्रक्रमः, त्रयस्त्रिंशत् 'मुहुत्तमब्भय'त्ति प्राग्वन्मुहूर्त्ताभ्यधिकानि सागरोपमाण्युत्कृष्टेति गम्यते, अस्याश्च लान्तकाभिधानषष्ठदेवलोकात्प्रभृति यावत्सर्वार्थसिद्धस्तावत्सम्भवः, अत्रैवैतादायुषः सद्भाव इतिकृत्वेति पञ्चदशसूत्रार्थः॥

उक्तं स्थितिद्वारं, साम्प्रतं गतिद्वारमाह-

मू.(१४३८) कण्हा नीला काऊ तिन्निवि एयाओ अहम्मलेसाओ।
एयाहि तिहिवि जीवो दुग्गइं उववज्जई॥

वृ. कृष्णा नीला कापोतास्तिस्रोऽप्येता अधर्मलेश्याः, पापोपादानहेतुत्वात्, पाठान्तरतोऽधर्मलेश्या वा, तिसृणामप्यविशुद्धत्वेनाप्रशस्तत्वात्, यद्येवं ततः किमित्याह-'एताभिः' अनन्तरोक्ताभिः 'तिसृभिरपि' कृष्णादिलेश्याभिः 'जीवः' जन्तुः 'दुर्गतिं' नरकतिर्यग्गतिरूपाम् 'उपपद्यते' प्राप्नोति, सुब्व्यत्ययाद्वा दुर्गतौ 'उपपद्यते' जायते, संक्लिष्टत्वेन तत्प्रायोग्यायुष एव तद्बतां बन्धसम्भवादिति भावः।

मू.(१४३९) तेऊ पम्हा सुक्का तिन्निवि एयाउ धम्मलेसाउ।
एयाहि तिहिवि जीवो सुग्गइं उववज्जई॥

वृ. तथा तैजसी पद्मा शुक्लास्तिस्रोऽप्येताः 'धर्मलेश्याः' प्रधानलेश्याः, विशुद्धत्वेनासां धर्महेतुत्वात्, तथा चागमः-"तओ लेसाओ अविसुद्धाओ तओ विसुद्धाओ ततो पसत्थाओ तओ अपसत्थाओ तओ संकिलिट्ठाओ तओ असंकिलिट्ठाओ तओ दुग्गतिगामियाओ तओ सुगतिगामियाओ।" अत एव 'एताभिस्तिसृभिः' तैजस्यादिलेश्याभिर्जीवः 'सोगतिं'ति 'सुगतिं' देवमनुष्यगतिलक्षणां मुक्तिं वोपपद्यते, यद्वा प्राग्वत्सुगतौ 'उत्पद्यते' जायते, तथाविधायुर्बन्धतः सकलकर्मापगमतश्चेति सूत्रद्वयभावार्थः।

उक्तं गतिद्वारं, साम्प्रतमायुर्द्वारावसरः, तत्र च यस्या लेश्याया यदायुषो मानं तत्स्थितिद्वार एवार्थतोऽभिहितम्, इह त्विदमुच्यते- अवश्यं हि जन्तुर्यल्लेश्येयेपूत्पद्यते तल्लेश्य एव म्रियते,

यत आगमः- "जल्लेसाइं दव्वाइं परियाइत्ता कालं करेइ तल्लेसेसु उववज्जइ"त्ति, तथैवेह वक्ष्यति "अंतोमुहुत्तंमि गए" इत्यादि तत्र जन्मान्तरभाविलेश्यायाः किं प्रथमसमये परभवायुष उदय आहोस्विच्चरमसमयेऽन्यथा वेति संशयापनोदनायाह-

मू. (१४४०) *लेसाहिं सव्वाहिं पढमे समयंमि परिणयाहिं तु ।*
न हु कस्सइ उववत्ति परे भवे अत्थि जीवस्स ॥

मू. (१४४१) *लेसाहिं सव्वाहिं चरमे समयंमि परिणयाहिं तु ।*
न हु कस्सइ उववत्ती परे भवे अत्थि जीवस्स ॥

मू. (१४४२) *अंतमुहुत्तंमि गए अंतमुहुत्तंमि सेसए चेव ।*
लेसाहिं परिणयाहिं जीवा गच्छंति परलोयं ॥

वृ. 'लेश्याभिः' उक्तरूपाभिः' 'सर्वाभिः' इति षड्भिरपि प्रथमे समये तत्प्रतिपत्ति-कालापेक्षया 'परिणताभिः' प्रस्तावादात्मरूपतामापन्नाभिः, लक्षणे तृतीया, 'तुः' पूरणे 'न हु' नैव कस्यापि 'उववत्ति'त्ति 'उत्पत्तिः' उत्पादः, पठ्यते च 'नवि कस्सवि उववाओ'त्ति सुगमं, 'परे' अन्यस्मिन् 'भवे' जन्मनि 'भवति' विद्यते 'जीवस्य' जन्तोः । तथा लेश्याभिः सर्वाभिः 'चरमे समये' इत्यन्तसमये परिणताभिस्तु 'नहु' नैव कस्याप्युत्पत्तिः परे भवे भवति जीवस्य । कदा तर्हि ? इत्याह--

अन्तर्मुहूर्ते 'गत एव' अतिक्रान्त एव तथाऽन्तर्मुहूर्ते शेषके चैव--अवतिष्ठमान एव लेश्याभिः परिणताभिरुपलक्षिता जीवाः गच्छन्ति 'परलोकं' भवान्तरम्, इदं चैवम्भूतिकाले भाविभव-लेश्याया उत्पत्तिकाले वाऽतीतभवलेश्याया अन्तर्मुहूर्त्तमवश्यम्भावात्, न त्विह विपरीतमव-धार्यते--अन्तर्मुहूर्त्त एव गत इत्यन्तमुहूर्त्त, एव शेषक इति च, देवनारकाणां स्वस्वलेश्यायाः प्रागुत्तरभवान्तर्मुहूर्त्तद्वयसहितनिजायुःकालं यावदवस्थितत्वात्, उक्तं हि प्रज्ञापनायाम्- "जल्लेसाइं दव्वाइं आयत्तित्ता कालं करेति तल्लेसेसु उववज्जइ"त्ति, तथा 'कण्हलेसे नेरतिए कण्हलेसेसु नेरइएसु उववज्जति कण्हलेसेसु उव्वट्टइ, जल्लेसे उववज्जइ तल्लेसे उव्वट्टति, एवं नीललेसेवि काउलेसेवि, एवं असुरकुमारा जाव वेमाणिय"त्ति, अनेनान्तर्मुहूर्त्तावशेष आयुषि परभवलेश्यापरिणाम इत्युक्तं भवतीति सूत्रत्रयार्थः ॥

इत्थं लेश्यानां नामाद्यभिधाय साम्प्रतमध्ययनार्थमुपसंजिहीर्षुरुपदेशमाह

मू. (१४४३) *तम्हा एयासि लेसाणं, अनुभावं वियाणिया ।*
अप्पसत्थाउ वज्जित्ता, पसत्थाओ अहिट्ठए मुनि ॥ त्तिबेमि ॥

वृ. 'तम्ह'त्ति यस्मादेता अप्रशस्ता दुर्गतिहेतवः प्रशस्ताश्च सुगतिहेतवस्तस्मात् 'एतासाम्' अनन्तरमुक्तानां लेश्यानाम् 'अनुभागम्' उक्तंरूपं 'विज्ञाय' विशेषेणावबुध्य अप्रशस्ताः कृष्णाद्यास्तिस्रो वर्जयित्वा 'प्रशस्ताः' तैजस्याद्यास्तिस्रः 'अधितिष्ठेत्' भावप्रतिपत्त्याऽऽ-श्रयेन्मुनिरिति शेष इति सूत्रार्थः । 'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववत्, नयाश्च प्राग्वत् ॥

अध्ययनं-३४-समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता उत्तराध्ययनसूत्रे चतुस्त्रिंशत्तम् अध्ययनस्य भद्रबाहुसूरि विरचिता एवं शान्त्याचार्य विरचिता टीका परिसमाप्ता ।

अध्ययनं-३५-अनगारमार्गगतिः

वृ. व्याख्यातं लेश्याध्ययननामकं चतुस्त्रिंशमध्ययनम्, अधुना पञ्चत्रिंशमारभ्यते, अस्य चायमभिसम्बन्धः-अनन्तराध्ययने लेश्या अभिहिताः, तदभिधाने चायमाशयः अशुभानुभावलेश्यात्यागतः शुभानुभावा एव लेश्या अधिष्ठातव्याः, एतच्च भिक्षुगुणव्यवस्थितेन सम्यग्विधातुं शक्यं, तच्चावस्थानं च तत्परिज्ञानत इति तदर्थमिदमारभ्यते, एतत्सम्बन्धागतस्य चास्यानुयोगद्वारचतुष्टयं प्राग्वद्वर्णनीयं यावन्नामनिष्पन्ननिक्षेपे अनगारमार्गगतिरिति नाम, अतोऽनगारमार्गगतीनां त्रयाणामपि पदानां निक्षेपायाह निर्युक्तिकृत्

नि. [५४९] अनगारे निक्खेवो चउव्विहो दुविह होइ नायव्वो ।

नि. [५५०] जाणगभवियसरीरे तव्वइरित्ते अ निण्हगाईसु ।
भावे सम्मद्दिट्ठी अगारवासा विनिम्मुक्को ॥

नि. [५५१] मग्गगईणं दुण्हवि पुव्वुद्दिट्ठो चउक्कनिक्खेवो ।
अहिगारो भावमग्गे सिद्धिगईए उ नायव्वो ॥

वृ. गाथात्रयं स्पष्टमेव, नवरं तद्व्यतिरिक्तश्च निह्नवादिषु, आदिशब्दात्रन्येष्वपि चरित्रपरिणामं विना गृहाभाववत्सु, निर्द्धारणे सप्तमी, ततश्च यस्तेषु मध्ये ऽनगारत्वेन लोके रूढ इत्युपस्कारः, स तद्व्यतिरिक्तो द्रव्यानगारो, भावे 'सम्यग्दृष्टिः' सम्यग्दर्शनवान्निश्चयतो यत्सम्यक्त्वं तन्मौनमिति चरित्री अगारवासेनागारपाशेन वा प्राकृतत्वात्तृतीयार्थे पञ्चमी विशेषेण तत्प्रतिबन्धपरित्यागरूपेण निर्मुक्तः-त्यक्तो विनिर्मुक्तोऽनगार इति प्रक्रमः, तथा मार्गगत्योर्द्वयोरपि, पूर्वत्रमोक्षमार्गगतिसामन्यध्ययने उद्दिष्टः-कथितः पूर्वोद्दिष्टः, इत्थमेषां चतुर्विधत्वेन केनेह प्रकृतमित्याह-अधिकारः 'भावमग्गि'त्ति सुब्व्यत्ययाद् 'भावमार्गेण' सम्यग्दर्शनज्ञानचारित्रलक्षणेन सिद्धिगत्या चार्थाद्भावगत्या उपलक्षणत्वाद्भावानगारेण च ज्ञातव्य इति गाथात्रयावयवार्थः ।

गतो नामनिष्पन्नो निक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं तच्चेदम्-

मू. (१४४४) *सुणेह मे एगमना, मग्गं सव्वसु (बुद्धेहिं) देसियं ।*
जमायरंतो भिक्खू, दुक्खाणंतकरो भवे ॥

वृ. 'शृणुत' आकर्णयत 'मे' मम कथयत इति शेषः, एकाग्रमनसः, कोऽर्थ ?-अनन्यगतचित्ताः सन्तः शिष्या इति शेष, किं तत् ? इत्याह-'मार्गम्' उक्तरूपं प्रक्रमान्मुक्तेर्बुधैः-अवगतयथास्थितवस्तुतत्त्वैरुत्पन्नकेवलैरर्हद्भिः श्रुतकेवलिभिर्गणधरादिभिर्वेत्युक्तं भवति, देशितं-प्रतिपादितमर्थतः सूत्रतश्च, तमेव विशेषयितुमाह-'यम्' इति मार्गम् 'आचरन्' आसेवमानः 'भिक्षुः' अनगारः 'दुःखानां' शारीरमानसानामन्तः-पर्यन्तस्तत्करणशीलोऽन्तकरः 'भवेत्' स्यात्, सकलकर्मनिर्मूलनत इति भावः, तदनेनासेव्यासेवकसम्बन्धेनानगारसम्बन्धित्वं मार्गस्य तत्फलं च मुक्तिगतिरिति दर्शितं, ततश्चानगारमार्गं तद्गतिं च शृणुतेत्यु(र्थत) उक्तं भवतीति सूत्रार्थः ॥ यथाप्रतिज्ञातमेवाह-

मू. (१४४५) *गिहवासं परिचज्जा, पव्वज्जामस्सिए मुनी ।*
इमे संगे वियाणिज्जा, जेहि सज्जंति मानवा ॥

मू.(१४४६) तहेव हिंसं अलियं, चोज्जं अब्बभसेवणं।
इच्छकामं च लोभं च, संजओ परिवज्जए॥

मू.(१४४७) मनोहरं चित्तघरं, मल्लधूवनवासियं।
सकवाडं पंडरुल्लोयं, मनसावि न पत्थए॥

मू.(१४४८) इंदियाणि उ भिक्खुस्स, तारिसंमि उवस्सए।
दुक्कराइं [तु धारेउं] निवारेउं, कामरागविवड्ढणे॥

मू.(१४४९) सुसाणे सुन्नगारे वा, रुक्खमूले व इक्कओ।
पइरिक्के परकडे वा, वासं तत्थऽभिरोयए॥

मू.(१४५०) फासुयंमि अनाबाहे, इत्थीहिं अनभिदुए।
तत्थ संकप्पए वासं, भिक्खू परमसंजए॥

मू.(१४५१) न सयं गिहाइं कुव्विज्जा, नेव अन्नेहिं कारए।
गिहकम्मसमारंभे, भूयाणं दिस्सए वहो॥

मू.(१४५२) तसाणं थावराणं च, सुहुमाणं बायराण य।
तम्हा गिहसमारंभं, संजओ परिवज्जए॥

मू.(१४५३) तहेव भत्तपानेसु, पयणे पयावणेसु य।
पाणभूयदयट्ठाए, न पए न पयावए॥

मू.(१४५४) जलधन्ननिस्सिया जीवा, पुढवीकट्ठनिस्सिया।
हम्मंति भत्तपानेसु, तम्हा भिक्खू न पयावए॥

मू.(१४५५) विसप्पे सव्वओ धारे, बहुपाणविनासणे।
नत्थि जोइसमे सत्थे, तम्हा जोई न दीवए॥

मू.(१४५६) हिरन्नं च जायरूवं च, मनसावि न पत्थए।
समलिट्ठुकंचणे भिक्खू, विरए कयविक्कए॥

मू.(१४५७) किणंतो कइओ होइ, विक्किणंतो अ वाणिओ।
कयविक्कयंमि वट्टंतो, भिक्खू हवइ तारिसो॥

मू.(१४५८) भिक्खियव्वं न केयव्वं, भिक्खुणा भिक्खवित्तिणा।
कयविक्कओ महादोसो, भिक्खवित्ती सुहावहा॥

मू.(१४५९) समुयाणं उंछमेसिज्जा, जहासुत्तमणिंदियं।
लाभालाभंमि संतुट्ठे, पिंडवायं मुनी॥

मू.(१४६०) अलोलो न रसे गिद्धो, जिब्भादंतो अमुच्छिओ।
न रसट्ठाए भुंजिज्जा, जवणट्ठाए महामुनी॥

मू.(१४६१) अच्चणं रयणं चेव, वंदनं पूअणं तहा।
इड्ढीसक्कारसम्माणं, मनसावि न पत्थए॥

मू.(१४६२) सुक्कं झाणं झियाइज्जा, अनियाणे अकिंचणे।
वोसट्ठकाए विहरिज्जा, जाव कालस्स पज्जओ॥

मू. (१४६३) *निज्जूहिऊणं आहारं, कालधम्मे उवट्ठिए।*
चइऊण मानुसं बुंदिं, पहू दुक्खा विमुच्चई॥

मू. (१४६४) *निम्ममो निरहंकारो, वीयरागो अनासवो।*
संपत्तो केवलं नाणं, सासयं परिनिव्वुडे॥ तिबेमि॥

वृ. 'गृहवासं' गृहावस्थानं यदिवा गृहमेव वा पारवश्यहेतुतया पाशो गृहपाशस्तं 'परित्यज्य' परिहृत्य 'प्रव्रज्यां' सर्वसङ्गपरित्यागलक्षणां भागवतीं दीक्षाम् 'आश्रितः' प्रतिपन्नो मुनिः 'इमान्' प्रतिप्राणि प्रतीततया प्रत्यक्षान् 'सङ्गान्' पुत्रकलत्रादीनितत्प्रतिबन्धान् वा 'शिथिलयेत्' भवहेतवोऽमीति विशेषणावबुध्येत, निश्चयतो निष्फलस्यासत्त्वाज्ज्ञानस्य च विरतिफलत्वात्तत्प्रत्याचक्षीतेत्युक्तं भवति, सङ्गशब्दव्युत्पत्तिमाह-'जेहिं'ति सुब्व्यत्ययात् येषु 'सज्यन्ते प्रतिबध्यन्ते, अथवा यैः सङ्गैः 'सज्यन्ते' संबध्यन्ते ज्ञानावरणादिकर्मणेति गम्यते, के ते ?- 'मानवाः' मनुष्या उपलक्षणत्वादन्येऽपि जन्तवः।

'तथा' इति समुच्चये 'एवे'ति पूरणे 'हिंसां' प्राणव्यपरोपणम् 'अलीकम्' अनृतभाषणं 'चौर्यम्' अदत्तादानम् 'अब्रह्मसेवनं' मैथुनाचरणमिच्छारूपः काम इच्छाकामस्तं वा-अप्राप्तवस्तुकाङ्क्षारूपं 'लोहं च' लब्धवस्तुविषयगृद्धात्मकम्, अनेनोभयेनापि परिग्रह उक्तस्ततः परिग्रहं च 'संयतः' यतिः 'परिवर्जयेत्' परिहरेत्। अनेन मूलगुणा उक्ताः, एतद्व्यवस्थितस्यापि च शरीरिणोऽवश्यमाश्रयाहाराभ्यां प्रयोजनं, तयोश्च तदतीचारहेतुत्वमपि कदाचित्स्यादिति मन्वानस्तत्परिहाराय सूत्रषट्केन तावदाश्रयचिन्तां प्रति यतते- 'मनोहरं' चित्ताक्षेपकं, किं तत् ?-चित्रप्रधानं गृहं चित्रगृहं, तदपि कीदृशं ?-माल्यैः ग्रन्थितपुष्पैर्धूपनैश्च-कालागुरुतुरुष्कादिसम्बन्धिभिर्वासितं-सुरभीकृतं माल्यधूपनवासितं, सह कपाटेन प्रतीतेन वर्त्तत इति सकपाटं तदपि 'पाण्डुरोल्लोचं' श्वेतवस्त्रविभूषितं मनसाऽप्यास्तां वचसा 'न प्रार्थयेत्' नाभिलषेत्, किं पुनस्तत्र तिष्ठेदिति भावः।

किं पुनरेवमुपदिश्यते ? इत्याह-'इन्द्रियाणि' चक्षुरादीनि 'तुः' इति यस्मात् 'भिक्षोः' अनगारस्य 'तादृशे' तथाभूते 'उपाश्रये' आश्रये दुःखेन क्रियन्तेकरोतेः सर्वधात्वर्थत्वाच्छक्यन्ते दुष्कराणि-दुःशकानीत्यर्थः 'तुः' एवकारार्थो दुष्कराण्येव 'धारयितुम्' उन्मार्गप्रवृत्तिनिषेधतो मार्ग एव व्यवस्थापयितुं, पठ्यते-दुष्कराणि 'निवारेतुं'ति, तत्रापि 'निवारयितुम्' इति नियन्त्रितुं स्वस्वविषयप्रवृत्तेरिति गम्यते, कीदृशि ?- काम्यमानत्वात्कामा मनोज्ञा इन्द्रियविषयास्तेषु रागः-अभिष्वङ्गस्तस्य विवर्द्धने विशेषेण वृद्धिहेतौ कामरागविवर्द्धने, तथा च तथाविधचित्तव्याक्षेपसम्भवात्कस्यचिन्मूलगुणस्य कथञ्चिदतीचारसम्भवो दोष इत्येवमुपदिश्यत इति भावः।

एवं तर्हि क्व कीदृशि स्थातव्यमित्याह- 'श्मशाने' प्रेतभूमौ 'शून्यागारे' उद्वसितगृहे 'वा' विकल्पे 'वृक्षमूले वा' पादपसमीपे 'एकदा' इत्येकस्मिंस्तथाविधाकाले, पठ्यते च-'एकतो'त्ति 'एकाकः' रागद्वेषवियुतोऽसहायो वा तथाविधयोग्यतया 'परकृते' परसम्बन्धिनि तथाविधप्रतिबन्धेनास्वीकृते पाठान्तरतः 'पतिरिक्के' देशीभाषया 'एकान्ते' स्याद्यसङ्कुले 'परकृते' परैः-अन्यैर्निष्पादिते स्वार्थमिति गम्यते 'वा' समुच्चये 'वासम्' अवस्थानं 'तत्र' श्मशानादौ 'अभिरोचयेत्' प्रतिभासयेदर्थादात्मने भिक्षुरित्युत्तरेण योगः।

'प्रासुके' अचित्तीभूतभूभागरूपे, तथाऽविद्यमाना बाधाऽऽत्मनः परेषां वाऽऽगन्तुकसत्त्वानां गृहस्थानां च यस्मिंस्तत्तथा 'स्त्रीभिः' अङ्गनाभिरुपलक्षणत्वात्पण्डकादिभिश्च 'अनभिद्रुते' अनुपद्रुते तदुपद्रवविरहित इत्यर्थः, एतानि हि मुक्तिपथप्रतिपन्थित्वेन तत्प्रवृत्तानामुपद्रवहेतुभूतानीत्येवमभिधानं 'तत्रे'ति प्रागुक्तविशेषणे श्मशानादौ सम्यक्कल्पयेत्-कुर्यात्सङ्कल्पयेत्, कं ?-वासं, भिक्षणशीलो भिक्षुः, स च शाक्यादिरपि स्यादत आह-परमः-प्रधानः स चेह मोक्षस्तदर्थं सम्यग् यतते परमसंयतः, जिनमार्गप्रपन्न इत्युक्तं भवति, तस्यैव मुक्तिमार्गं प्रति वस्तुतः सम्यगयत्नसम्भवात्, प्राग्वासं तत्राभिरोचयेदित्युक्ते रुचिमात्रेणैव कश्चित्तुष्येदिति तत्र सङ्कल्पयेद्वासमित्यभिधानम्। ननु किमिह परकृत इति विशेषणमुक्तमित्याशङ्क्याह-

न 'स्वयम्' आत्मना 'गृहाणि' उपाश्ररूपाणि 'कुर्वीत' विदधीत नैव 'अन्यैः' गृहस्थादिभिः 'कारयेत्' विधापयेदुपलक्षणत्वान्नापि कुर्वन्तमनुमन्येत, किमिति ?, यतो गृहनिष्पत्त्यर्थं कर्म गृहकर्म-इष्टकामृदानयनादि तदेव समारम्भः-प्राणिनां परितापकरत्वात्, उक्तं हि-"परितावकरो भवे समारंभो"त्ति, यद्वा तस्य समारम्भः-प्रवर्त्तनं गृहकर्मसमारम्भस्तस्मिन् 'भूतानाम्' एकेन्द्रियादिप्राणिनां 'दृश्यते' प्रत्यक्षत एवोपलभ्यते, कोऽसौ ?-'वधः' विनाशः।

भूतानां वध इत्युक्तं तन्न मा भूत्केषाञ्चिदेवासावित्यशङ्क्याह-'त्रसानां' द्वीन्द्रियादीनां 'स्थावराणां' पृथिव्याद्येकेन्द्रियाणां 'चः' समुच्चये तेषामपि 'सूक्ष्माणाम्' अतिश्लक्ष्णानां शरीरापेक्षया न जीवप्रदेशापेक्षया, तस्यामूर्त्ततयैवंप्रागव्यवहारायोगात्, 'बादराणां च' एवमेव स्थूलानां, यद्वा सूक्ष्मनामकर्मोदयात्सूक्ष्माणां तेषामपि प्रमादतो भावहिंसासम्भवाद्बादरनामकर्मोदयाच्च बादराणाम्, । उपसंहर्त्तुमाह-'तम्हे'त्ति यस्मादेवं भूतवधस्तस्माद्गृहसमारम्भं 'संयतः' सम्यग्हिंसादिभ्य उपरतोऽनगार इत्यर्थः 'परिवर्जयेत्' परिहरेत्, इत्थमाश्रयचिन्तां विधायाहारचिन्तामाह-'तथैव' तेनैव प्रकारेण भक्तानि च-शाल्योदनादीनि पीयन्त इति पानानि-पयःप्रभृतीनि तानि च भक्तपानानि तेषु, पचनानि च-स्वयं विक्लेदापादनक्वथनानि पाचनानि च-तान्येवान्यैः पचनपाचनानि तेषु च भूतवधो दृश्यत इति प्रक्रमः, ततः किमित्याह-प्राणाद्वीन्द्रियादयो भूतानि-पृथिव्यादीनि तेषां दया-रक्षणं प्राणभूतदया तदर्थं-तद्धेतोः, किमुक्तं भवति ?-पचनपाचनप्रवृत्तानां यः संभवी जीवोपघातः स मा भूदिति न पचेत्स्वतो भक्तादीति प्रक्रमो नापि पाचयेत्तदेवान्यैः।

अमुमेवार्थं स्पष्टतरमाह- जलं च-पानीयं धान्यं च-शाल्यादि तन्निश्रिताः-तत्रान्यत्र चोत्पन्ना ये तन्निश्रया स्थिता घृतरकभुजगेलिकापिपीलिकाप्रभृतय उपलक्षणत्वात्तद्रूपाश्च 'जीवाः' प्राणिनः, एवं पृथ्वीकाष्ठनिश्रिता एकेन्द्रियादयो हन्यन्ते भक्तपानेषु प्रक्रमात्पच्यमानादिषु, यत एवं तस्माद्भिक्षुर्न पाचयेत्, अवेर्गस्यमानत्वात्पाचयेदपि न किं पुनः स्वयं पचेत्, अनुमतिनिषेधोपलक्षणं चैतत्।

अमरं च विसर्पतीति विसर्पं-स्वल्पमपि बहु भवति, यत उक्तम्-"अणं थोवं वणं थोवं अग्गी थोवं"मित्यादि, सर्वतः-सर्वासु दिक्षु धारेव धारा-जीवविनाशिका शक्तिरस्येति सर्वतोधारं सर्वदिगवस्थितजन्तूपघातकत्वात्, उक्तं च-"पाईणं पडीणं वावी"त्यादि,

अत एव 'बहुप्राणविनाशनम्' अनेकजीवजीवितव्यपरोपकं 'नास्ति' न विद्यते 'ज्योतिः-

समम्' अग्नितुल्यं शस्यन्ते हिंस्यन्तेऽनेन प्राणिन इति शस्त्र- प्रहरणमन्यदिति गम्यते तस्यावि-सर्पत्वादसर्वतोधारत्वादल्पजन्तूपघातकत्वाच्चेति भाव:, सर्वत्र लिङ्गव्यत्यय: प्राग्वत्, यस्मादेवं तस्मात् 'ज्योति:' वैश्वानरं 'न दीपयेत्' न ज्वालयेत्, अनेन च पचनस्याग्निज्वलनाविनाभावि-त्वात्तत्परिहार एव समर्थित:, इत्थं च विशेषप्रक्रमे च सामान्याभिधानं प्रसङ्गत: शीताप-नोदादिप्रयोजनेऽपि तदारम्भनिषेधार्थम्, आधाकर्मादिका वा विशुद्धकोटिरनेनैवार्थत: परिहार्योक्ता, तदपरिहारे ह्यवश्यम्भावी पचनानुमत्यादिप्रसङ्ग इति।

नन्वेवं जीववधनिमित्तत्वमेव पचनादेर्निषेधनिबन्धनं, तच्च नास्ति क्रयविक्रययोरिति युक्त-मेवाभ्यां निर्वहण(मेव)मपि कस्यचिदाशङ्का स्यादतस्तदपनोदाय हिरण्यादिपरिग्रहपूर्वकत्वा-त्तयोस्तन्निषेधपूर्वकं सूत्रत्रयेण तत्परिहारमाह-'हिरण्यं' कनकं 'जातरूपं' रूप्यं चकारोऽ-नुक्ताशेषधनधान्यादिसमुच्चये 'मनसाऽपि' चित्तेनाप्यास्तां वाचा 'न प्रार्थयेत्' ममामुकं स्या-दिति, अपेर्गम्यमानत्वात्प्रार्थयेदपि न, किं पुन: परिगृह्णीयात्?, कीदृश: सन्?-समे-प्रतिबन्धा-भावतस्तुल्ये लेष्टुकाञ्चने-मृत्पिण्डखण्डकनके अस्येति समलेष्टुकाञ्चन:, एवंविधश्च सन् भिक्षु: 'विरत:' निवृत्त: स्यादिति शेष:, कुत: ?-क्रयो मूल्येनान्यसम्बन्धिनस्तथाविधवस्तुन: स्वीकारो विक्रयश्च-तस्यैवात्मीयस्य तथाविधवस्तुजातेनान्यस्य दानं, क्रयश्च विक्रयश्च क्रयवि-क्रयमिति समाहार स्तस्मात्, पञ्चम्यर्थे सप्तमी, विषयसप्तमी वा, तत्र च-क्रयविक्रयविषये, 'विरत:' इति विरतिमानित्यर्थ:। किमित्येवम्? अत आह-

क्रीणान:-परकीयं वस्तु मूल्येनाददान: क्रयोऽस्यास्तीति क्रयिको भवति-तथाविधेतर-लोकसदृश एव भवति, विक्रीणानश्च-स्वकीयं वस्तु तथैव परस्य ददद्वणिग् भवति, वाणिज्य-प्रवृत्तत्वादिति भाव:, अत एव च 'क्रयविक्रये' उक्तरूपे 'वर्त्तमान:' प्रवर्त्तमानो भिक्षुर्भवति न तादृशो, गम्यमानत्वाद्यादृश: सूत्राभिहितो भावभिक्षुरिति भाव:।

तत: किमित्याह-'भिक्षितव्यं' याचितव्यं तथाविधं वस्त्विति गम्यते, 'न' नैव 'क्रेतव्यं' मूल्येन ग्रहीतव्यं, केन?-भिक्षुणा, कीदृशा?-भिक्षयैव वृत्ति:-वर्त्तनं निर्वहणं यस्यासौ भिक्षावृत्तिस्तेन, उक्तं हि-"सव्वं से जाइयं होइ नत्थि किंचि अजाइयं"ति, क्रयविक्रयवद्-भिक्षाऽपि सदोषैव भविष्यतीति मन्दधीर्मन्यते, तत आह-क्रयश्च विक्रयश्च क्रयविक्रयं व्यव-च्छेदफलत्वादस्य तदेव महादोषमुक्तन्यायत:, लिङ्गव्यत्ययश्च प्राग्वत्, भिक्षया वृत्तिर्भिक्षावृत्ति: शुभं-इहलोकपरलोकयो: कल्याणं सुखं वा तदावहति-समन्तात्प्रापयतीति शुभावहा सुखावहा वा, अनेन क्रीतदोषपरिहार उक्त:, स चाशेषविशुद्धकोटिगतदोषपरिहारोपलक्षणम्।

भिक्षितव्यमित्युक्तं, तच्च दानश्राद्धादिवेश्मनि क्वचिदेकत्रैव स्यादत आह-'समुदानं' भैक्षं न त्वेकभिक्षामेव तच्चोञ्छमिव उञ्छम्-अन्यान्यवेश्मत: स्वल्पं स्वल्पमामीलनात्, मधुकरवृत्त्या हि भ्रमत ईदृगेव भवतीत्येवमुक्तम्, 'एषयेत्' गवेषयेत्, एतच्चोत्सूत्रमपि स्यादित्याह-सूत्रम् आगमस्तदनतिक्रमेण यथासूत्रम्-आगमाभिहितोद्गमैषणाद्यबाधात इत्युक्तं भवति, तत एव 'अनिन्दितं' शिष्टनिन्द्येन स्वपरप्रशंसादिहेतुनाऽनुत्पादितं जात्यादिजुगुप्सितजनसम्बन्धि वा न भवति, तथा लाभश्चालाभश्च लाभालाभं तस्मिन् संतुष्ट:-ओदनादे: प्राप्तावप्राप्तौ च सन्तोषवान् न तु वाञ्छाविधुरितचित्त इति भाव:, इह च लाभेऽपि

वाच्छोत्तरोत्तरस्तुतिविषयत्वेन भावनीया, पिण्ड्यत इति पिण्डो भिक्षा तस्य पातः पतनं प्रक्रमात्तत्रेऽस्मिन्निति पिण्डपातं भिक्षाऽटनं तत् 'चरेत्' आसेवेत 'मुनिः' इति तपस्वी, पाठान्तरतश्च पिण्डस्य पातः पिण्डपातस्तं गवेषयेत्, उभयत्र च वाक्यान्तरविषयत्वादयौनरुक्त्यम्।

इत्थं च पिण्डपातान्वेषी यथा भुञ्जीत तथाऽऽह- 'अलोलः' न सरसास्वे प्राप्ते लाम्पट्यवान्, न 'रसे' मिष्टादिपुरादौ 'गृद्धः' प्राप्तावपि काङ्क्षावान् कथं भूतोऽसौ ?, यतः 'जिह्वादंते'त्ति प्राकृतत्वाद्दान्ता वशीकृता जिह्वा-रसना येनासौ दान्तजिह्वोऽत एव 'अमूर्छितः' संनिधेरकरणेन तत्काले वाऽभिष्वङ्गाभावेन, उक्तं हि-"नो वामाओ हणुयातो दाहिणं, दाहिणाओ वा वामं चालेइ" एवंविदश्च सन् 'न' नैव 'रसट्ठाए'त्ति रसार्थं सरसमिदमहमास्वादयामीति धातुविशेषो वा रसः स चाशेषधातूपलक्षणं ततस्तदुपचयः स्यादित्येतदर्थं 'न भुंजीत' नाभ्यवहरेत्, किमर्थं तर्हीत्याह-यापना-निर्वाहः स चार्थात्संयमस्य तदर्थं 'महामुनिः' प्रधानतपस्वी, अनेन पिण्डविशुद्धिरुक्ता। तदेवमादौ मूलगुणान् विधेयतयाऽभिधाय तत्परिपालनार्थमाश्रयाहारचिन्ताद्वारेणोत्तरगुणांश्च सम्प्रति तदवस्थित एवात्मन्युत्पन्नबहुमानः कश्चिदर्चनादि प्रार्थयेदिति तन्निषेधार्थमाह-'अर्चनां' पुष्पादिभिः पूजां 'रचनां' निषद्यादिविषयां स्वस्तिकादिन्यासात्मिकां वा 'चः' समुच्चये 'एवः' अवधारणे नेत्यनेन संभन्त्स्यते 'वन्दनं' नमस्तुभ्यमित्यादि वाचाऽभिष्टवनं 'पूजनं' विशिष्टवस्त्रादिभिः प्रतिलाभनं 'तथे'ति समुच्चये, ऋद्धिश्च श्रावकोपकरणादिसम्पदामर्षौषध्यादिरूपा वा सत्कारश्च अर्थप्रदानादिः सन्मानश्च-अभ्युत्थानादिः ऋद्धिसत्कारसन्मानं तन्मनसाऽप्यास्तां वाचा नैव 'प्रार्थयेत्' ममेदं स्यादित्यभिलषेत्।

किं पुनः कुर्यादित्याह-'शुक्लध्यानम्' उक्तरूपं यथा भवत्येवं 'ध्यायेत्' चिन्तयेत् 'अनिदानः' अविद्यमाननिदानोऽकिञ्चनः प्राग्वत्, व्युत्सृष्ट इव व्युत्सृष्टः कायः शरीरं येन स तथा विदरेदप्रतिबद्धविहारितयेति गम्यते 'यावदि'ति मर्यादायां 'कालस्य' इति मृत्योः 'पर्ययति' 'पर्यायः' परिपाटी प्रस्तावः इतियावत्, यावन्मरणसमयः क्रमप्राप्तो भवतीति।

एवंविधानगारगुणस्थश्च यावदायुर्धृत्वा मृत्युसमये यत्कृत्वायत्फलमवाप्नोति तदाह-'निज्जूहिऊण'त्ति परित्यज्य 'आहारम्' अशनादि, तत्परित्यागश्च संलेखनाक्रमेणैव, झगिति तत्करणे बहुतरदोषसम्भवात्, तथा चागमः-

"देहम्मि असंलिहिए सहसा झाऊहि खिज्जमाणाहिं।
जायइ अट्टज्झाणं सरीरिणो चरमकालंमि॥

कदा ?-'कालधर्मे' आयुःक्षयलक्षणे मृत्युस्वभावे 'उपस्थिते' प्रत्यासन्नीभूते, तथा 'त्यक्त्वा' अपहाय 'मानुसं'ति मानुषीं-मनुष्यसम्बन्धिनीं 'बुन्दिं' शरीरं 'प्रभुः' वीर्यान्तरायक्षयतो विशिष्टसामर्थ्यवान् 'दुक्खे'त्ति 'दुःखैः' शारीरमानसैः 'विमुच्यते' विशेषेण त्यज्यते, तन्निबन्धनकर्मापगमत इति भावः।

कीदृशः सन् ? इत्याह-'निर्ममः' अपगतममीकारः 'निरहङ्कारः' अहममुकजातीय इत्याद्यहङ्काररहितः, ईदृशः कुतः ?, यतो वीतरागः प्राग्वद् विगतरागद्वेषः, तथा 'अनाश्रवः' कर्माश्रवरहितो मिथ्यात्वादितद्धेत्वभावात् संप्राप्तः 'केवलज्ञानम्' उक्तरूपं 'शाश्वतं' कदाचिदप्यव्यवच्छेदात् 'परिनिर्वृतः' अस्वास्थ्यहेतुकर्माभावतः सर्वथा स्वस्थीभूत इति विंशतिसूत्र-

भावार्थः । 'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववत् । गतोऽनुगमो, नयाश्च प्राग्वत् ॥

अध्ययनं-३५-समाप्तम्

मुनि दीपरत्नसागरेण संशोधितं सम्पादितं उत्तराध्ययनसूत्रे
पञ्चत्रिंशत्तमध्ययनं सनिर्युक्तिकं सटीकं समाप्तम्

अध्ययनं-३६-जीवाजीवविभक्तिः

वृ. व्याख्यातमनगारमार्गगतिनामकं पञ्चत्रिंशमध्ययनम्, अधुना षट्त्रिंशमारभ्यते, अस्य चायमभिसम्बन्धः- अनन्तराध्ययने हिंसापरिवर्जनादयो भिक्षुगुणा उक्ताः, ते च जीवाजीवस्वरूपपरिज्ञानत एवासेवितुं शक्यन्त इति तज्ज्ञापनार्थमिदमारभ्यते, अस्य चोपक्रमादीनि चत्वार्यनुयोगद्वाराणि, तत्र च भाष्यगाथाः-

भा. [१] "तस्स अनुओगदारा चत्तारि उवक्कमे य निक्खेवे ।
अनुगम नए य तहा उवक्कमो छव्विहो तत्थ ॥

भा. [२] अवहऽनुपुव्वोणामप्पमाणवत्तव्वया य बोद्धव्वा ।
अत्थहिगारे तत्तो छट्ठे य तहा समायारो ॥

भा. [३] सव्वे जहक्कमेणं वन्नेऊणं इमो समोयारो ।
अनुपुव्वीए उ तहिं उक्कित्तणपुव्वी ओतरए ॥

भा. [४] सा इह पुव्वानुपुव्वी यच्छनुपुव्वी तहा अनानुपुव्वी ।
छत्तीसइयं इमं पच्छ पुन पढमे ॥

भा. [५] अननुपुव्वीए ऊ एगाएगुत्तराय सेढीए ।
छत्तीसगच्छगाए गुणिया अन्नोन्नदुरुवूणा ॥

भा. [६] नामे छव्विहनामे तत्थवि भावे खओवसमियम्मि ।
जम्हा वट्टइ भावे सव्वसुयं खओवसमियंमि ॥

भा. [७] ओरयति पमाने पुन भावपमाणं मि तंपि तिविहं तु ।
गुणणयसंखपमाणं ओयरति गुणपमाणंमि ॥

भा. [८] तत्थवि नाणे तहियंपि आगम लोउत्तरे अनंगे य ।
कालियसुए य तत्तो अहवावी आगमातियंमि ॥

भा. [९] अत्तअनंतरपारंपरे य उभयंमि तं समोयरई ।
न नएसु समोयरई समोयरइ उ संखपरिमाने ॥

भा. [१०] तत्थवि य कालियसुए अक्खरपायाइएसु ओयरई ।
वत्तव्वय ओसन्नं ससमयवत्तव्व ओयरति ॥

भा. [११] अत्थहिगारो इत्थं जीवाजीवेहि होइ नायव्वो ।
एमेव समोयरई जं जत्थ समोयरइ दारं ॥

भा. [१२] निक्खेवावसरो पुन अह अनुपत्तो य तत्थ निक्खेवे ।
निक्खेवो नासोत्ति य ठवणत्ति व होंति एगट्ठा ॥

भा. [१३] सो तिह जोहे नामे सोगालीवे य होइ बोद्धव्वो ।
तत्थोहो अविसेसो अज्झयणस्सवि य सो चउहा ॥
भा. [१४] वत्तंउ तहा विहिणा खयणंतरमित्थ नामणिप्फन्नो ।
तत्थ य नामं अस्स उ जोवाजीवाण य विभत्ती ॥"

अत्र च जीवाजीवविभक्तिरिति पदत्रयं वर्त्तत इत्येतन्निक्षेपायाह निर्युक्तिकृत्-

नि. [५५२] निक्खेवो जीवंमि अ चउव्विहो दुविह होइ नायव्वो ।
नि. [५५३] जाणगभवियसरीरे तव्वइरित्ते अ जीवदव्वं तु ।
भावंमि दसविहो खलु परिणामो जीवदव्वस्स ॥
नि. [५५४] निक्खेवो अ(ऽ)जीवंमि चउव्विहो दुविह होइ नायव्वो ।
नि. [५५५] जाणगभवियसरीरे तव्वइरित्ते अजीवदव्वं तु ।
भावंमि दसविहो खलु परिणामो अ(ऽ)जीवदव्वस्स ॥
नि. [५५६] निक्खेवो विभत्तीए चउव्विहो दुविह होइ दव्वंमि ।
नि. [५५७] जाणगभवियसरीरे तव्वइरित्ते य से भवे दुविहा ।
जीवाणमजीवाण य जीवविभत्ती तहिं दुविहा ॥
नि. [५५८] सिद्धाणमसिद्धाण य अज्जीवाणं तु होइ दुविहा उ ।
रूवीणमरूवीण य विभासियव्वा जहा सुत्ते ॥
नि. [५५९] भावंमि विभत्तीखलु नायव्वा छव्विहंमि भावंमि ।
अहिगारो इत्थं पुण दव्वविभत्तीइ अज्झयणे ॥

वृ. निक्खेवेत्यादि गाथा अष्ट व्याख्यातप्राया एव, नवरं तद्व्यतिरिक्तश्च 'जीवद्रव्यं' द्रव्यजीव उच्यत इति प्रक्रमः 'तुः' विशेषद्योतकः, स चायं विशेषः-यथा न कदाचित्तत्पर्यायवियुक्तं द्रव्यं तथाऽपि च यदा तद्वियुक्ततया विवक्ष्यते तदा तद्द्रव्यप्राधान्यतो द्रव्यजीवः, भावे तु दशविधः 'खलुः' अवधारणे दशविध एव परिणामः कर्मक्षयोपशमोदयापेक्षपरिणतिरूपो जीवद्रव्यस्य सम्बन्धी जीवादनन्यत्वेन जीवतया विवक्षितो जीव इति प्रक्रमः, तत्र च क्षायोपशमिकाः षट् षडिन्द्रियाणि षष्ठं मनः औदयिकाः क्रोधादयश्चत्वारो मीलिता दश भवन्ति ।

एवमजीवनिक्षेपेऽपि यदा पुद्गलद्रव्यमजीवरूपं सकलगुणपर्यायविकलतया कल्प्यते तदा तद्व्यतिरिक्तो द्रव्याजीवः, भावे चाजीवद्रव्यस्यपुद्गलस्य दशविधः परिणामोऽजीव इति प्रक्रमः, स च शब्दादयः पञ्च शुभाशुभतया भेदेन विवक्षिताः, तथा च सम्प्रदायः-शब्दस्पर्शरसरूपगन्धाः शुभाश्चाशुभाश्चे'ति । तथा विभक्तिनिक्षेपे सति विभक्तिर्भवेत् 'द्विविधा' द्विप्रकारा, द्वैविध्यं चास्याः सम्बन्धिभेदादेवेति तमाह-जीवानामजीवानां च, कोऽर्थः ?-जीवविभक्तिः-जीवानां विभागेनावस्थापनम्, एवमजीवविभक्तिश्च, उत्तरत्राप्येवमेव सम्बन्धिभेदाद्भेदो व्याख्येयः, 'तहिं'ति वचनव्यत्ययात् 'तयोः' जीवाजीवविभक्त्योर्मध्ये द्विविधा सिद्धानामसिद्धानां च, 'अज्जीवाणं तु'त्ति 'तुः' अपिशब्दार्थस्ततोऽजीवानामपि भवति 'दुविहा उ'त्ति, 'तुः' अवधारणे ततो द्विविधैव रूपिणामरूपिणां च 'विभाषितव्या' विशेषेण व्यक्तं वक्तव्या यथा 'सूत्रे' प्रक्रान्ताध्ययनरूपे, इह तु प्रक्रमायाताऽपि पौनरुक्त्यप्राप्तेरसौ न

प्रतिपाद्यत इति भावः,

'भावे' भावनिक्षेपे विभक्तिः 'खलु' निश्चितं ज्ञात्वा 'षड्विधे भावे' षट्प्रकारौदयिकादिभावविषया, आह- एवमनेकविधायां विभक्ताविह कयाऽधिकारः ?, उच्यते, 'अधिकारः' अधिकृतम् 'अत्रे'ति प्रस्तुते पुनःशब्दो वाक्यान्तरोपन्यासे 'द्रव्यविभक्त्या' जीवाजीवद्रव्यविभागावस्थापनरूपया, तस्या एवात्र प्रदर्श्यमानत्वादिति भाव इति निर्युक्तिगाथाऽष्टकावयवार्थः। इत्यवसितो नामनिष्पन्ननिक्षेपः, सम्प्रति सूत्रानुगमे सूत्रमुच्चारणीयं,

मू. (१४६५) जीवाजीवविभत्तिं मे, सुणेहेगमणा इओ।
जं जाणिऊण भिक्खू, सम्मं जयइ संजमे॥

वृ. जीवाश्च-उपयोगलक्षणा अजीवाश्च-तद्विपरीता जीवाजीवास्तेषां विभजनं विभक्तिः-तत्तद्भेदादिदर्शनतोऽन्येभ्यो विभागेनावस्थापनं जीवाजीवविभक्तिस्तां 'मे' मम कथयत इति गम्यते 'शृणुत' आकर्णयत शिष्या इति शेषः, पठन्ति च 'सुनेह मि'त्ति, कथम्भूताः सन्त ?-एकं-दर्शनान्तरोक्तजीवाजीवविभक्तावगतत्वेन मनः-चित्तं येषां ते एकमनसः, इहैव श्रद्धानवन्त इत्युक्तं भवति, 'इतः' इत्यस्मादनन्तराध्ययनादेतद्विषयात् श्रवणाद्वाऽनन्तरं यां जीवाजीवविभक्तिं ज्ञात्वा 'भिक्षुः' अनगारः पाठान्तरतः श्रमणो वा सम्यगिति प्रशंसार्थो निपातः, ततश्च सम्यक्प्रशस्तं यथा भवत्येवं 'यतते' यत्नवान् भवति, क्व ? संयमे-उक्तरूपसंयमविषय इति सूत्रार्थः॥ आह-जीवाजीवविभक्तिज्ञानमिव लोकालोकविभक्तिज्ञानमपि संयमयतनायां विषयतयोपयुज्यत एवेत्याह-

मू. (१४६६) जीवा चेव अजीवा य, एस लोए वियाहिए।
अजीवदेसमागासे अलोए से वियाहिया॥

वृ. 'जीवाश्चैवाजीवाश्च' वक्ष्यमाणाः, कोऽर्थः ?-जीवाजीवरूपः 'एष'इति प्रतिप्राणि प्रत्यक्षः प्रतीतो लोको विशेषेणाख्यातः-कथितो व्याख्यातस्तीर्थकृदादिभिरिति गम्यते, जीवाजीवानामेव यथायोगमाधाराधेयतया व्यवस्थितानां लोकत्वाद्, 'अजीव'त्ति, अनेनाजीवसमुदाय उपलक्ष्यते, स च धर्माधर्माकाशपुद्गलात्मकस्तस्य देश इत्यंशोऽजीवदेश आकाशमलोकः स व्याख्यातो,

"धर्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत्क्षेत्रम्।
तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम्॥"

इति भावार्थः॥ इह च जीवाजीवानां विभक्तिः प्ररूपणाद्वारेणैवेति तां विधित्सुर्यथाऽसौ भवति तथाऽऽह-

मू. (१४६७) दव्वओ खित्तओ चेव, कालओ भावओ तहा।
परूवणा तेसिं भवे, जीवाणमजीवाण य॥

वृ. 'द्रव्यतः' द्रव्यमाश्रित्य इदमियद्भेदं द्रव्यमिति, 'क्षेत्रतश्चैव' इदमियति क्षेत्र इति, 'कालतः' इदमेवंविधकाल स्थितीति, 'भावतः' इमेऽस्य पर्याया इति 'तथे'ति समुच्चये 'प्ररूपणा' यथास्वं भेदाद्यभिधानद्वारेण स्वरूपपोदर्शनं 'तेषाम्' इति विभजनीयत्वेन प्रक्रान्तानां 'भवेत्' स्याज्जीवानामजीवानां चेति सूत्रार्थः॥

तत्र स्वल्पवक्तव्यत्वाद्द्रव्यतोऽजीवप्ररूपणामाह--

मू. (१४६८) *रूविणो चेवऽरूवी य, अजीवा दुविहा भवे।*
अरूवी दसहा वुत्ता, रूवीणोऽवि चउव्विहा॥

मू. (१४६९) *धम्मत्थिकाए तद्देसे, तप्पएसे य आहिए।*
अधम्मे तस्स देसे य, तप्पएसे य आहिए॥

मू. (१४७०) *आगासे तस्स देसे य, तप्पएसे य आहिए।*
अद्धासमए चेव, अरूवी दसहा भवे॥

वृ. रूपस्पर्शाद्याश्रया मूर्त्तिस्तद्देशास्तेषु वाऽस्तीति रूपिणः 'चः' समुच्चये 'एवे'ति पूरणे 'रूवी य'त्ति अकारप्रश्लेषात्प्राग्वद्बहुवचनव्यत्ययाद्वाऽरूपिणश्च, नैषामुक्तरूपं रूपमस्तीति-कृत्वा, अजीवाः 'द्विविधाः उक्तभेदतो द्विविधाः 'भवे'त्ति भवेयुः, तत्रापि 'अरूवि'त्ति अरूपिणः 'दशधा' दशप्रकाराः 'उक्ताः' प्रतिपादितास्तीर्थकृदादिभिरिति शेषः, पञ्चान्निर्दिष्ट-त्वेऽपि चोक्तन्यायतोऽनन्तरत्वाद्वाऽमीषां प्रथमत उपादानं, रूपिणः 'अपिः' पुनरर्थस्तताश्च रूपिणः पुनः 'चतुर्विधाः' चतुष्प्रकारा उभयत्राजीवा इति प्रक्रमः।

तत्रारूपिणो दशविधामाह--धारयति गतिपरिणतजीवपुद्गलांस्तत्स्वभाव इति धर्मः अस्तय-श्चेह प्रदेशास्तेषां चीयत इति कायः--सङ्घातोऽस्तिकायस्ततो धर्मश्चासावस्तिकायश्च धर्मास्ति-कायः--सकलदेशप्रदेशानुगतसमानपरिणतिमद्विशिष्टं द्रव्यं, तस्य--धर्मास्तिकायस्य दिश्यते-प्रदेशापेक्षया समानपरिणतरूपत्वेऽपि देशापेक्षायां असमानपरिणतिमाश्रित्य विशिष्टरूपतया विवक्ष्यते--उपदिश्यत इति देशः--त्रिभागचतुर्भागादिस्तद्देशः, तथा तस्येति--धर्मास्तिकायस्यैव प्रकर्षेणान्त्यत्वात्प्रदेशान्तरभावतः क्वचिदप्यनुगतरूपाभावलक्षणेन दिश्यते--प्राग्वदुपदिश्यत इति प्रदेशो--निरंशो भागस्तत्प्रदेशः 'आख्यातः' कथितः, न धारयति--गतिपरिणतावपि जीवपुद्गलांस्तत्स्वभावतया नावस्थापयति स्तित्युपष्टम्भकत्वात्तस्येत्यधर्मः पदेऽपि पदैकदेशदर्शनादधर्मास्तिकायः 'तस्य' इत्यधर्मास्तिकायस्य 'देशश्च' उक्तरूपः 'तत्प्रदेशश्च' तथाविध एवाख्यातः, तथा आङिति मर्यादया--स्वस्वभावपरित्यागरूपया काशन्ते--स्वरूपेणैव प्रतिभासन्ते तस्मिन् पदार्था इत्याकाशं, ।

यदा त्वभिविधावाङ् तदा आङिति--सर्वभावाभिव्याप्त्या काशत इत्याकाशं तदेवास्तिकाय आकाशास्तिकायस्तस्य देशस्तत्प्रदेशश्च प्राग्वत् 'आख्यातः' कथितः, तथाऽद्धा--कालस्तद्रूपः समयोऽद्धासमयो निर्विभागत्वाच्चास्य न देशप्रदेशसम्भवः, आवलिकादयस्तु पूर्वसमय-निरोधेनैवोत्तरसमयसद्भाव इति तत्त्वतः समुदयसमित्याद्यसम्भवेन व्यवहारार्थमेव कल्पिता इतीह नोक्ताः, उपसंहारमाह--अरूपिणः 'दशविधा' इति दशप्रकारा भवेयुः पूर्वत्रिकत्रये एकस्यास्य प्रक्षेपात्, एषां च यथाक्रमं गतिस्थित्यवगाहोपष्टम्भकत्वं वर्त्तना च लक्षणमवगन्तव्यं, तथा चाऽऽर्षम्--

"जीवानां पुद्गलानां च, गतिस्थित्युपकारिणौ।
धर्माधर्मौ स्थितौ व्योम, त्ववगाहनलक्षणम्॥
कालस्तु वर्त्तनालिङ्गः" इत्यादीति सूत्रत्रयार्थः॥ सम्प्रत्येतानेव क्षेत्रत आह--

मू.(१४७१) *धम्माधम्मे य दोऽवेए, लोगमित्ता वियाहिया।*
लोगालोगे य आगासे, समए समयखित्तिए॥

वृ. 'धर्माधर्मौ' धर्मास्तिकायाधर्मास्तिकायौ 'च:' पूरणे द्वावप्येतौ 'लोकमात्रौ' लोकपरिमाणौ व्याख्यातौ, ननु धर्माधर्मावित्युक्ते द्वाविति गतार्थमेव द्वित्वसङ्ख्याया द्विवचनेनैवाभिधानात्, सत्यं, किन्तु गतार्थानामपि दृश्यते एव लोके प्रयोग:, तथा चाह जिनेन्द्रबुद्धि: "यदि गतार्थानामप्रयोग एव स्यात् पचति देवदत्त इत्यत्र पचतीत्येतद्गततिङैवैकत्वस्योक्तत्वाद् देवदत्त इति सुप एकवचनस्याप्राप्तिरेव स्यादिति, लोकमात्रत्वं चानयोरेतदवष्टब्धाकाशस्यैव लोकत्वात्, अलोकव्यापित्वे त्वनयो र्जीवपुद्गलयोरपि तत्र प्रचारप्रसङ्गेन तस्यापि लोकत्वापत्ते:, उक्तं च-

"धर्माधर्मविभुत्वात्सर्वत्र जीवपुद्गलविचारात्।
नो लोक: कश्चित्स्यान्न च संमतमेतदार्याणाम्॥"

तथा चैतौ लोक एव नालोक इत्यर्थादुक्तं भवति, तथा 'लोगालोगे य आगासे'त्ति लोकेऽलोके चाऽऽकाशं, सर्वगतत्वात्तस्य, 'समय:' इत्यद्धासमय: समयोपलक्षितं क्षेत्रं समयक्षेत्रम्-अर्द्धतृतीयद्वीपसमुद्रास्तद्विषयभूतमस्यास्तीति समयक्षेत्रिक:, तत्परतस्तस्यासम्भवात्, समयमूलत्वादावलिकादिकल्पनाया: तेऽप्येतावत्क्षेत्रवर्त्तिन एव, तथा चोक्तम्-

"समयावलिकापक्षमासर्त्वयनसञ्ज्ञिता:।
नृलोक एव कालस्य, वृत्तिर्नान्यत्र कुत्रचित्॥"

इति सूत्रार्थ:॥ एतानेव कालत आह-

मू.(१४७२) *धम्माधम्मागासा, तिन्निवि एए अणाइया।*
अपज्जवसिया चेव, सव्वद्धं तु वियाहिया॥

मू.(१४७३) *समएवि संतइं पप्प, एवमेव वियाहिए।*
आएसं पप्प साईए, सपज्जवसिएवि य॥

वृ. धर्मश्चाधर्मश्चाकाशं च धर्माधर्माकाशानि त्रीण्यप्येतानि न विद्यते आदिरेषामित्यनादिकानि, इत्यत: कालात्प्रभृत्यमूनि प्रवृत्तानीत्यसम्भवात्, न पर्यवसितान्यपर्यवसितान्यनन्तानीतियावत्, न हि कुतश्चित्कालात्परत एतानि न भविष्यन्तीति सम्भव:, चैवौ प्राग्वत्, तथा च 'सर्वाद्धा' सर्वकालं, कालात्यन्तसंयोगे द्वितीया, 'तु:' अवधारणेऽत: सर्वदा स्वस्वरूपापरित्यागतो नित्यानीतियावद् 'व्याख्यातानि' कथितानि, सर्वत्र लिङ्गव्यत्यय: प्राग्वत, समयोऽपि 'सन्ततिम्' अपरापरोत्पत्तिरूपप्रवाहात्मिकां 'प्राप्य' आश्रित्य 'एवमेव' अनाद्यपर्यवसितत्वलक्षणेनैव प्रकारेण 'व्याख्यात:' प्ररूपित:, पठन्ति च-'एमेव संतइं पप्प समएवि'त्ति स्पष्टम्, 'आदेशं' विशेषं प्रतिनियतव्यक्त्यात्मकं 'प्राप्य' अङ्गीकृत्य सादिक: सपर्यवसित:, 'अपि:' समुच्चये 'च:' पुनरर्थे भिन्नक्रमश्च देशं पुन: प्राप्येति योज्य:, विशेषापेक्षया ह्युत्पद्यते भूत्वाऽयं भवति भूत्वा च न भवतीति सादिसनिधन उच्यत इति सूत्रद्वयार्थ:॥

इत्थमजीवानामरूपिणां द्रव्यक्षेत्रकालै: प्ररूपणा कृता, सम्प्रति भावप्ररूपणावसर:, तत्र चामूर्त्तत्वेन नामीषां पर्याया रूपिपर्याया इव वर्णादय: प्ररूप्यमाणा अपि संवित्तिमानेतुं शक्या:

अनुमानतरित्यतरथाऽपि द्रव्यस्य पर्यायविकलस्यासम्भवाद्गम्यन्त एवेति तत्प्ररूपणामनादृत्य द्रव्यतो रूपिणः प्ररूपयितुमाह-

मू. (१४७४) खंधा य खंधदेसा य, तप्पएसा तहेव य।
परमाणुणो अ बोद्धव्वा, रूविनो अ चउव्विहा॥

वृ. स्कन्दन्ति-शुष्यन्ति क्षीयन्ते च-पोष्यन्ते च पुद्गलानां विचटनेन चटनेन चेति स्कन्धाः 'चः' समुच्चये स्कन्धानां देशा-भागाः स्कन्धदेशाः चः प्राग्वत्, तेषां-स्कन्धानां प्रदेशा-निरंशा भागास्तत्प्रदेशाः 'तथैव चे'ति समुच्चये परमाश्च तेऽणवश्च परमाणवः-निर्विभाग-द्रव्यरूपाः 'चः' समुच्चये 'बोद्धव्याः' अवगन्तव्या रूपिणः 'चः' पुनरर्थे ततो रूपिणः पुनः 'चतुर्विधाः' चतुष्प्रकाराः॥ इह च देशप्रदेशानां स्कन्धेष्वन्तर्भावात् स्कन्धाः परमाणवश्चेति समासतो द्वावेव रूपिद्रव्यभेदौ, तयोश्च किं लक्षणमित्याह-'एकत्वेन' समानपरिमितिरूपेण 'पृथक्त्वेन' परमाण्वन्तरैरसङ्घातरूपेण लक्ष्यन्त इति शेषः, के एवम्? इत्याह-स्कन्धः चस्य भिन्नक्रमत्वात्परमाणवश्च, स्कन्धा हि संहतानेकपरमाणुरूपाः, परमाणवश्च परमाण्वन्तरै रसंहतिभाजः॥

अथवा उक्तन्यायतो द्वैविध्ये कथममी स्कन्धाः परमाणवश्च जायन्ते? इत्याह-'एगत्तेण' सूत्रार्द्धम्, एकत्वेन द्वयोश्च त्रयाणां यावदनन्तानामनन्तानन्तानां च पृथग्भूतपरमाणूनामन्योऽन्यसङ्घाततो द्विप्रदेशिकत्वाद्यात्मकसमानपरिणतिरूपैकभावेन, तथा 'पृथक्त्वेन च, तदैकत्वेन कैश्चिदणुभिः संहन्यमानतयैकपरिणतिरूपेण पृथक्त्वेन च तत्समय एव केषाञ्चिदणूनां विचटनाद्भेदात्मकेन 'स्कन्धाः' द्विप्रदेशादय उत्पद्यन्त इति शेषः चशब्दस्य प्राग्वत्सम्बन्धात्परमाणवश्च, एकत्वेनेति तृतीया, तत एकत्वेन-असहायत्वेन लक्षितं यत्पृथक्त्वंस्कन्धेभ्यो विचटनात्मकं तेनोत्पद्यन्ते, एकत्वविशेषणं च यत्ससहायानां द्व्यणुकादीनां व्यास्तत्वं यच्चैकत्वपरिणतावपि देशादीनां बुद्धिपरिकल्पितं स्कन्धेभ्यः पृथक्त्वं न ततः परमाणव उत्पद्यन्त इत्याचष्टे, तथा चाह वाचकः-"संघातात् भेदात् सङ्घातभेदादिति, एभ्यस्त्रिभ्यः कारणेभ्यः स्कन्धा उत्पद्यन्ते, तथा भेदादेव परमाणु"रिति॥ एतानेव क्षेत्रत आह-

मू. (१४७५) एगत्तेण पुहत्तेणं, खंधा य परमाणु।
लोएगदेसे लोए अ, भइअव्वा ते उ खित्तओ॥
(एत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं)

वृ. लोकस्य-चतुर्दशरज्ज्वात्मकस्यैकदेशः-एकद्यादिसङ्ख्यातासङ्ख्यातप्रदेशात्मकः प्रतिनियतो भागो लोकैकदेशस्तस्मिन् लोके च 'भक्तव्याः' भजनया दर्शनीयाः 'ते' इति स्कन्धाः परमाणवश्च 'तुः' पूरणे 'क्षेत्रमाश्रित्य, अत्र चाविशेषोक्तावपि परमाणूनामेकप्रदेश एवावस्थानात्स्कन्धविषयैव भजना द्रष्टव्या, ते हि विचित्रत्वात्परिणतेर्बहुतरप्रदेशोपचिता अपि केचिदेकप्रदेशे तिष्ठन्ति, यदुक्तम्-"एगेणवि से पुन्ने दोहिवि पुण्णे सयंपि माइज्जे"त्यादि, अन्ये तु सङ्ख्येयेषु च प्रदेशेषु यावत्सकललोकेऽपि तथाविधाचित्तमहास्कन्धवद्भवेयुरिति भजनीया उच्यन्ते, 'अतः' इति क्षेत्रप्ररूपणातोऽनन्तरमिति गम्यते 'कालविभागं तु' कालभेदं पुनः 'तेषां' स्कन्दादीनां वक्ष्ये 'चतुर्विधं' साद्यनादिसपर्यवसितापर्यवसितभेदेनानन्तरमेव

वक्ष्यमाणेनेति सूत्रार्थः। इदं च सूत्रं षट्पादं गाथेत्युच्यते, तथा च तल्लक्षणं-

"विषमाक्षरपादं वा पादैरसमं दशधर्मवत्।
तन्वेऽस्मिन् यदसिद्धं गाथेति तत्पण्डितैर्ज्ञेयम्॥" इति,

अत्र च दश धर्मवदित्यनेन,

"दश धर्मं न जानन्ति, धृतराष्ट्र! निबोधत॥
मत्तः प्रमत्त उन्मत्तः, श्रान्तः क्रुद्धो बुभुक्षितः॥
त्वरमाणश्च भीरुश्च, लुब्धः कामी च ते दश॥"

इति गृह्यत इति, प्रत्यन्तरेषु त्वन्तपादद्वयं न दृश्यत एव॥ यथाप्रतिज्ञातमाह-

मू.(१४७६) *संतइं पप्प तेऽणाई, अप्पज्जवसिआवि अ।*
ठिइं पडुच्च साईआ, सप्पज्जवसिआवि अ॥

मू.(१४७७) *असंखकालमुक्कोसं, इक्कं समयं जहन्नयं।*
अजीवाण य रूवीणं, ठिई एसा विआहिआ॥

मू.(१४७८) *अनंतकालमुक्कोसं, इक्कं समयं जहन्नयं।*
अजीवाण य रूवीणं, अंतरेयं विआहिअं॥

वृ. 'सन्ततिम्' उक्तरूपां 'प्राप्य' आश्रित्य 'ते' इति स्कन्धाः परमाणवश्च 'अणाइ'त्ति अनादयोऽपर्यवसिता अपि च, न हि ते कदाचित्प्रवाहतो न भूता न वा न भविष्यन्तीति, 'स्थितिं' प्रतिनियतक्षेत्रावस्थानरूपां 'प्रतीत्य' अङ्गीकृत्य सादिकाः सपर्यवसिता अपि च, तदपेक्षया हि प्रथमतस्तथाऽस्थित्वैवावतिष्ठन्ते अवस्थाय च न पुनर्न तिष्ठन्तीत्यभिप्रायः॥

सादिसपर्यवसितत्वेऽपि कियत्कालमेषामवस्थितिः? इत्याह-'असङ्ख्यकालम्' आगमप्रतीतमुत्कृष्टा, समयमेकं जघन्यका, अजीवानां रूपिणां पुद्गलानामिति योऽर्थः, स्थितिरेषा व्याख्याता, जघन्यत एकसमया उत्कृष्टतस्त्वसङ्ख्येयकालम्, असङ्ख्येयकालात्परतोऽवश्यमेव विचटनात्।

इत्थं कालद्वारमाश्रित्य स्थितिरूक्ता, सम्प्रत्येतदन्तर्गतमेवान्तरमाह-'अनन्तकालं' समयप्रसिद्धमुत्कृष्टमेकं समयं जघन्यकमजीवानां रूपिणाम् 'अंतरेय'न्ति अन्तरं विवक्षितक्षेत्रावस्थितेः प्रच्युतानां पुनस्तत्प्राप्तेर्व्यवधानमेतद्-उक्तरूपं व्याख्यातं, तेषां हि विवक्षितक्षेत्रावस्थितिप्रच्युतानां कदाचित्समयावलिकादिसङ्ख्यातकालतोऽसंख्यातकालद्वा, पल्योपमादेर्यावदनन्तकालादपि सम्भवतीति सूत्रत्रयार्थः॥ एतानेव भावतो विधातुमाह-

मू.(१४७९) *वण्णओ गंधओ चेव, रसओ फासओ तहा।*
संठाणओ य विन्नेओ, परिणामो तेसिं पंचहा॥

मू.(१४८०) *वण्णओ परिणया जे उ, पंचहा ते पकित्तिया।*
किण्हा नीला य लोहिया, हालिद्दा सुक्किला तहा॥

मू.(१४८१) *गंधओ परिणया जे य, दुविहा ते वियाहिया।*
सुब्भिगंधपरिणामा, दुब्भिगंधा तहेव य॥

मू.(१४८२) *रसओ परिणया जे उ, पंचहा ते पकित्तिया।*

तित्त कडुपकसाया, अंबिला महुरा तहा ॥

मू.(१४८३) फासओ परिणया जे उ, अट्ठहा ते पकित्तिया ।
कक्खडा मउया चेव, गुरुया लहुया तहा ॥

मू.(१४८४) सीया उण्हा य निद्धा य, तहा लुक्खा य आहिया ।
इति फासपरिणया एए, पुग्गला समुदाहिया ॥

मू.(१४८५) संठाणपरिणया जे उ, पंचहा ते पकित्तिया ।
परिमंडला य वट्टा य, तंसा चउरंसमायया ॥

मू.(१४८६) वण्णओ जे भवे नीले, भवइ से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥

मू.(१४८७) वन्नओ जे भवे नीले, भवए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥

मू.(१४८८) वन्नओ लोहिए जे उ, भइए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥

मू.(१४८९) वन्नओ पीअए जे उ, भइए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥

मू.(१४९०) वण्णओ सुक्किले जे उ, भइए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥

मू.(१४९१) गंधओ जे भवे सुब्भी, भइए से उ वन्नओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥

मू.(१४९२) गंधओ जे भवे दुब्भी, भइए से उ वन्नओ ।
रसओ फासओ चेव, भइए संठाणओवि य ॥

मू.(१४९३) रसओ तित्तओ जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि अ ॥

मू.(१४९४) रसओ कडुए जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि अ ॥

मू.(१४९५) रसओ कसाए जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि अ ॥

मू.(१४९६) रसओ अंबिले जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि अ ॥

मू.(१४९७) रसओ महुरए जे उ, भइए से उ वन्नओ ।
गंधओ फासओ चेव, भइए संठाणओवि अ ॥

मू.(१४९८) फासओ कक्खडे जे उ, भइए से उ वन्नओ ।
गंधओ रसओ चेव, भइए संठाणओवि अ ॥

मू.(१४९९) फासओ मउए जे उ, भइए से उ वन्नओ ।

गंधओ रसओ चेव, भइए संठाणओवि अ ॥

मू.(१४००) फासओ गुरुए जे उ, भइए से उ वन्नओ।
गंधओ रसओ चेव, भइए संठाणओवि अ ॥

मू.(१४०१) फासओ लहुए जे उ, भइए से उ वन्नओ।
गंधओ रसओ चेव, भइए संठाणओवि अ ॥

मू.(१४०२) फासओ कक्खडे जे उ, भइए से उ वन्नओ।
गंधओ रसओ चेव, भइए संठाणओवि अ ॥

मू.(१४०३) फासओ उण्हए जे उ, भइए से उ वन्नओ।
गंधओ रसओ चेव, भइए संठाणओवि अ ॥

मू.(१४०४) फासओ निद्धए जे उ, भइए से उ वन्नओ।
गंधओ रसओ चेव, भइए संठाणओवि अ ॥

मू.(१४०५) फासओ लुक्खए जे उ, भइए से उ वन्नओ।
गंधओ रसओ चेव, भइए संठाणओवि अ ॥

मू.(१४०६) परिमंडलसंठाणे, भइए से उ वन्नओ।
गंधओ रसओ चेव, भइए फासओवि अ ॥

मू.(१४०७) संठाणओ भवे वट्टे, भइए से उ वण्णओ।
गंधओ रसओ चेव, भइए फासओवि अ ॥

मू.(१४०८) संठाणओ भवे तंसे, भइए से उ वण्णओ।
गंधओ रसओ चेव, भइए फासओवि अ ॥

मू.(१४०९) संठाणओ य चउरंसे, भइए से उ वण्णओ।
गंधओ रसओ चेव, भइए फासओवि अ ॥

मू.(१४१०) जे आयतसंठाणे, भइए से उ वण्णओ।
गंधओ रसओ चेव, भइए फासओवि य ॥

वृ. वर्णतो गन्धतश्चैव रसतः स्पर्शतस्तथा संस्थानतश्च, अयमर्थः-वर्णादिन्यपञ्चाश्रित्य 'विज्ञेयः' ज्ञातव्यः 'परिणामः' स्वरूपावस्थितानामेव वर्णाद्यन्यथाऽन्यथाभवनरूपः 'तेषाम्' इति परमाणूनां स्कन्धानां च 'पञ्चधा' पञ्चप्रकारः, भेदहेतोर्वर्णाद्युपधेः पञ्चविधत्वादिति भावः। प्रत्येकमेषामेवोत्तरभेदानाह-'वर्णतः परिणताः' वर्णपरिणामभाज इत्यर्थः 'ये' अण्वादयः 'तुः' पूरणे पञ्चधा ते 'प्रकीर्त्तिताः' प्रकर्षेण सन्देहापनेतृत्वलक्षणेन संशब्दिताः, तानेवाह-कृष्णाः काज्जलादिवत्, नीलाः नील्यादिवत् लोहिता हिङ्गुलुकादिवत् हारिद्राः हरिद्रादिवत् शुक्लाः शङ्खादिवत् 'तथे'ति समुच्चये।

'गन्धतो' इत्यादीनि स्पष्टान्येव नवरं 'सुब्भि' (गन्ध)त्ति सुरभिगन्धो यस्मिन् स तथाविधः परिणामो येषां तेऽमी सुरभिगन्धपरिणामाः श्रीखण्डादिवत्, 'दुब्भी'त्ति दुरभिर्गन्धो येषां ते दुरभिगन्धा स्नशुनादिवत्, तिक्ताश्च कोसातक्यादिवत् कटुकाश्च सुण्ठ्यादिवत् कषायाश्च अपक्वकपित्थादिवत्तिक्तकटुकषायाः अम्लाः आम्लवेतसादिवत् मधुराः शर्कादिवत् कर्कशाः

पाषाणादिवत् मृदवः हंसरूतादिवत् गुरवः हीरकादिवत् लघवः अर्कतूलादिवत् शीताः मृणालादिवत् उष्णाः वह्न्यादिवत् स्निग्धाः घृतादिवत् रूक्षाः भूत्यादिवत्,

उपसंहारमाह- 'इती'त्यमुना प्रकारेण स्पर्शपरिणताः 'एते' स्कन्धादयः पूरणगलनधर्माणः पुद्गलाः 'समुदाहृताः' सम्यक्प्रतिपादितास्तीर्थकृदादिभिः। संतिष्ठन्त एभिः स्कन्धादय इति संस्थानानि तद्रूपेण परिणताः परिमण्डलादयः प्राग्वद्व्यावर्णितस्वरूपा एव ७।

सम्प्रत्येषामेव परस्परसंवेधमाह- वर्णतः 'यः' स्कन्धादिर्भवेत्कृष्णः 'भइए'त्ति भाज्यः 'से उ'त्ति स पुनः 'गन्धतः' गन्धमाश्रित्य सुरभिगन्धो दुर्गन्धो वा स्यात् न तु नियतगन्ध एवेति भावः, एवं रसतः स्पर्शतश्चैव भाज्यः संस्थानतोऽपि च, अन्यतररसादियोग्य एवासौ भवेदिति हृदयम्, अत्र च गन्धौ द्वौ रसाः पञ्च स्पर्शा अष्टौ संस्थानानि पञ्च, एते च मीलिता विंशतिरित्येक एव कृष्णवर्ण एतावतो भङ्गान् लभते २०, एवं नीलोऽपि २०, लोहितोऽपि २०, पीतक इति-हारिद्रः सोऽपि २०, 'सुक्किल'त्ति शुक्लोऽप्येतावत एव भङ्गान् लभत इति २०, एवं पञ्चभिरपि वर्णैर्लब्धं शतम् १००।

गन्धतो यः स्कन्धादिर्भवेत् 'सुब्भि'त्ति सुरभिर्भाज्यः स तु वर्णतोऽन्यतरकृष्णादिवर्णवान् स्यादितिभावः, एवं रसतः स्पर्शतश्चैव भाज्यः संस्थानतोऽपि च, इह च रसादयोऽष्टादश ते च पञ्चभिर्वर्णैर्मीलितैस्त्रयोविंशतिर्भवन्ति २३, एवं च दुर्गन्धविषय अप्येतावन्त एव २३, ततश्च गन्धद्वयेन लब्धा भङ्गानां षट्चत्वारिंशत् ४६। १४। रसतस्तिक्तको यस्तु स्कन्धादिर्भाज्यः स तु वर्णतो गन्धतः स्पर्शतश्चैव भाज्यः संस्थानतोऽपि च, इह चोक्तन्यायतो विंशतिर्भङ्गास्तिक्तको-नात्राप्यन्ते २०, एवं कटुकेन २० कषायेण २० आम्लेन २० मधुरेण २० चैतावन्त एवात्राप्यन्ते, एवं च रसपञ्चकसंयोगे लब्धं शतम् १००।

स्पर्शतः कर्कशो यस्तु स्कन्धादिर्भाज्यः स तु वर्णतो गन्धतो रसतश्चैव भाज्यः संस्थानतोऽपि च, इह चोक्तन्यायतो वर्णादयः सप्तदशेति तद्योगतस्तावत एव भङ्गानवाप्नोति १७। एवं मृदुः १७ गुरुः १७ लघुः १७ स्निग्धः १७ रूक्षः १७ शीत १७ उष्णश्च १७ एतावत एव भङ्गानवाप्नोति, एवन्मीलने च जातं षट्त्रिंशं शतम् १३६। १७।

परिमण्डलसंस्थाने यो वर्त्तत इति शेषः, भाज्यः स तु सामान्यप्रक्रमेऽपि स्कन्धः, परमाणूनां संस्थानासम्भवात्, वर्णतो गन्धतो रसतश्चैव भाज्यः स्पर्शतोऽपि च, अत्र च वर्णादय उक्तनीत्या विंशतिस्ततस्तद्योगात्परिमण्डलेन विंशतिरेव भङ्गा लभ्यन्ते २०, एवं वृत्तेन २० त्र्यस्रेण २० चतुरस्रेण २० आयतेन च २० प्रत्येकमेतावन्त एव भङ्गा प्राप्यन्त इति संस्थानपञ्चकभङ्गसंयोगे लब्धं शतम् १००, एवं वर्णरसगन्धस्पर्शसंस्थानानां सकलभङ्गसङ्कलनातो जातानि द्व्यशीत्य-धिकानि चत्वारि शतानि, अङ्कतोऽपि ४८२, सर्वत्र च जातोवेकवचनं। ३२।

परिस्थूरन्यायतश्चैतदुच्यते, अन्यथा प्रत्येकमप्येषां तारतम्यतोऽनन्तत्वादनन्ता एव भङ्गा संभवन्ति, इत्थं चैतत्परिणामवैचित्र्यं केवलागमप्रमाणावसेयमेवेति न स्वमतिकल्पितहेतु-भिश्चित्तमाकुलकर्त्तव्यमिति द्वात्रिंशत्सूत्रावयवार्थः॥

मू.(१५११)- एसा अजीवविभत्ती, समासेन वियाहिया।

इतो जीवविभत्तिं, वुच्छामि अनुपुव्वसो ॥

वृ. 'एषा' अनन्तरोक्ताऽजीवविभक्तिर्व्याख्याताऽनन्तरं जीवविभक्तिं वक्ष्यामि 'अनुपुव्वसो'त्ति आनुपूर्व्येति सूत्रार्थः ॥ यथाप्रतिज्ञातमाह-

मू.(१५१२) *संसारत्था य सिद्धा य, दुविहा जीवा वियाहिया।*
सिद्धा नेगविहा वुत्ता, तं मे कित्तयओ सुण ॥

वृ. संसरन्त्युपलक्षणत्वादवतिष्ठन्ते च जन्तवोऽस्मिन्निति संसारो गतिचतुष्टयात्मकस्तत्र तिष्ठन्तीति संसारस्थाः-नरकादिगतिवर्त्तिनस्ते च सिद्धाश्च प्रागुक्तव्युत्पत्तयः, 'द्विविधाः' उपदर्शितभेदतो द्विभेदा जीवा व्याख्याताः, तत्र सिद्धाः 'अनेकविधाः' अनेकप्रकारा उक्तास्तमिति सूत्रत्वात्तान्, पठन्ति च-'दुविहा जीवा भवन्ति तत्थाणेगविहा सिद्धि ते'त्ति, 'मे' मम कीर्त्तयतः 'सुण'त्ति शृणुत, अल्पवक्तव्यत्वाच्च पञ्चान्निर्देशेऽपि प्रथमतः सिद्धभेदाभिधानप्रतिज्ञानमदुष्टमिति सूत्रार्थः ॥ अनेकविधत्वमेवैषामुपाधिभेदत आह-

मू.(१५१३) *इत्थीपुरिससिद्धा य, तहेव य नपुंसगा।*
सलिंगो अन्नलिंगो य, गिहिलिंगो तहेव य ॥

मू.(१५१४) *उक्कोसोगाहणाए य, जहन्नमज्झिमाइ य।*
उड्ढं अहे य तिरियं च, समुद्दंमि जलंमि य ॥

वृ. 'इत्थीपुरिससिद्ध'त्ति सिद्धशब्दः प्रत्येकमभिसम्बध्यते ततः स्त्रियश्च ते पूर्वपर्यायापेक्षया सिद्धाश्च स्त्रीसिद्धा एवं पुरुषसिद्धाश्च, तथैव च 'नपुंसग'त्ति, इहोत्तरत्र च प्रक्रमेण सिद्धशब्दयोगान्नपुंसकसिद्धाः स्वलिङ्गसिद्धाः स्वलिङ्गं च मुक्तिपथप्रस्थितानां भावतोऽनगारत्वादनगारलिङ्गमेव रजोहरणमुखवस्त्रिकादिरूपम्, अन्यद्-एतदपेक्षया भिन्नं तच्च तल्लिङ्गं चान्यलिङ्गं तस्मिंश्च शाक्यादिसम्बन्धिनि सिद्धाः, 'गृहिलिङ्गे' गृहस्थवेषे सिद्धा मरुदेवीस्वामिनीवत्, 'तथैवे' त्युक्तसमुच्चये चकारस्तु तीर्थातीर्थसिद्धाद्यनुक्तभेदसंसूचकः, इह च ये स्त्रीनिर्वाणं प्रति विप्रतिपद्यन्ते त एवं वाच्याः-

इह खलु यस्य यत्रासम्भवो न तस्य तत्र कारणावैकल्यं, यथा सिद्धशिलायां शाल्यङ्कुरस्य, अस्ति च तथाविधस्त्रीषु मुक्तेः कारणावैकल्यं, न चायमसिद्धो हेतुर्यतोऽस्यासिद्धत्वं किं स्त्रीणां पुरुषेभ्योऽपकृष्यमाणत्वेनाहोस्वित्निर्वाणस्थानाद्यप्रसिद्धत्वेन निर्वाणसाधकप्रमाणाभावेन वा ?, तत्र यदि तावत् पुरुषेभ्योऽपकृष्यमाणत्वेन तदा तत् किं सम्यग्दर्शनादिरत्नत्रयाभावेन विशिष्टसामर्थ्यासत्त्वेन पुरुषानभिवन्द्यत्वेन स्मारणाद्यकर्तृत्वेनामहर्द्धिकत्वेन मायादिप्रकर्षवत्त्वेन वेति विकल्पाः, तत्र न तावत्सम्यग्दर्शनादिरत्नत्रयस्याभावेन यतस्तस्यासौ किमविशिष्टस्य प्रकर्षपर्यन्तप्राप्तस्य वा ?, यद्यविशिष्टस्य तदा किमियं चारित्रस्यासम्भवेनोत ज्ञानदर्शननयोस्त्रयाणां वा ?, यदि चारित्रस्यासम्भवेन तदा सोऽपि किं सचेलत्वेन स्त्रीत्वस्य चारित्रविरोधित्वेन मन्दत्वेन मन्दसत्त्वतया वा ?, यदि सचेलत्वेन तदा चेलस्यापि चारित्राभावहेतुत्वं परिभोगमात्रेण परिग्रहरूपत्वेन वा ?, यदि परिभोगमात्रेण तदा तत्परिभोगोऽपि तासां तत्परित्यागाशक्तत्वेन गुरूपदिष्टत्वेन वा ?, न तावत्तत्परित्यागाशक्तत्वेन यतः-"प्राणेभ्यो नापरं प्रियम्" अथ च तानपि त्यजन्त्य एता दृश्यन्ते, अथ गुरूपदिष्टत्वेन तथा सति गुरूणामपि चारित्रोपकारित्वेन

तासां तदुपदेशः अन्यथा वा ?, यदि चारित्रोपकारित्वेन किं न पुरुषाणामपि ?, अथाचेला एवैता बलादपि पुरुषैः परिभुज्यन्त इति तद्विना तासां चारित्रवाद्यासम्भवो न पुरुषाणामिति न तेषां तदुपदेशः, उक्तं च- "वस्त्रं विना न चरणं तासामित्यर्हतोच्यत।

विनाऽपि पुंसामिति न्यवार्यते"ति, एवं सति न चेलाच्चारित्राभावस्तदुपकारित्वात्तस्य, तथाहि-यद्यस्योपकारि न तत्तस्याभावहेतुः, यथा घटस्य मृत्पिण्डादि, उपकारि चोक्तनीत्या चारित्रस्य चेलम्, अथान्यथेति पक्षः, अयमपि न क्षमो, यतोऽसौ चेलस्य चारित्रं प्रत्यौदासीन्येन बाधकतया वा ?, न चेदमस्मिन्नुभयमप्यस्ति, पुरुषाभिभवरक्षकत्वेन तस्य तासु तदुपकारितया अनन्तरमेवोक्तत्वात्, नापि चेलस्य परिग्रहरूपत्वेन चारित्राभावहेतुत्वं, यतो मूर्छैव परिग्रह इतीहैव परीषहाध्ययने निर्णीतं, यदी च चेलस्य परिग्रहरूपता तदा तथाविधरोगोपसर्गादिषु पुरुषाणामपि चेलसम्भवे चारित्राभावेन मुक्त्यभावः स्यात्, उक्तं च-

"अर्शोभगन्दरादिषु गृहीतचोरो यतिर्न मुच्येत। उपसर्गे वा चौरे" इत्यादि,

किञ्च-चेलस्य परिग्रहरूपत्वे-"आमे तालपलंबे भिन्ने अभिन्ने वा नो कप्पइ निग्गंथीणं परिग्गहित्तए वा" इत्यादि निर्ग्रन्थ्या व्यपदेशश्चागमे न श्रूयते, अतो न सचेलत्वेन चारित्रासम्भवः, नापि स्त्रीत्वस्य चारित्रविरोधित्वेन यतो यदि स्त्रीत्वस्य चारित्रविरोधः स्यात्तदाऽविशेषेणैव तासां प्रव्राजनं निषेध्येत, न तु विशेषेण, यथोच्यते-"गब्भिणी बालवच्छा य, पव्वावेउं न कप्पइ"त्ति, नापि मन्दत्वतया, यतः सत्त्वमिह व्रततपोधारणविषयमेषितव्यम्, अन्यस्यानुपयोगित्वात्, तच्च तास्वप्यनल्पं सुदुर्धरशीलवतीषु संभवति, उक्तं च-

"ब्राह्मीसुन्दर्यार्यराजीमतीचन्दनागणधराद्याः।
अपि देवमनुजमहिता विख्याताः शीलसत्त्वाभ्याम्॥"

अतो न चारित्रासम्भवेन विशिष्टरत्नत्रयस्याभावः, इत्थं च चारित्रसम्भवे सिद्ध एव ज्ञानदर्शनसम्भवः, तत्पूर्वकत्वात्तस्य, उक्तं हि-"पूर्वद्वयलाभः पुनरुत्तरलाभे भवति सिद्धः" इति, तदभावपक्षोऽपिनाश्रयणीयः, त्रयाभावपक्षस्त्वेवं त्रितयसिद्धावनवसर एव, दृश्यन्ते च सम्प्रत्यपि त्रितयमभ्यस्यन्त्यस्ताः, उक्तं च-"जानीते जिनवचनं श्रद्धत्ते चरिति चार्यिकाऽशबलम्"इति, अथ प्रकर्षपर्यन्तप्राप्तस्याभावः, एवं तर्हि तस्याप्यभावः किं कारणाभावेन विरोधिसम्भवेन वा ?, न तावत्कारणाभावेन, अविशिष्टरत्नत्रयाभ्यासस्यैव तन्निबन्धत्वेनागमेऽभिधानात्, तस्य च स्त्रीष्वनन्तरमेव समर्थितत्वात्, नापि विरोधिसम्भवेन, तस्यास्मादृशामत्यन्तपरोक्षत्वेन केनचिद्विरोधानिर्णयादिति न रत्नत्रयाभावेन स्त्रीणां पुरुषेभ्योऽपकृष्यमाणत्वम्, अथ विशिष्टसामर्थ्यासत्त्वेन, इदमपि कथमिति वाच्यं ?, किं तावद् असप्तमनरकपृथ्वीगमनत्वेनाहोस्विद्दृढादिलब्धिरहितत्वेनाल्पश्रुतत्वेनानुपस्थाप्यतापराङ्कितकशून्यत्वेन वा ?, तत्र न तावदसप्तमनरकपृथ्वीगमनत्वेन, यतोऽत्र किं सप्तमनरकपृथ्वीगमनाभावो यत्रैव जन्मनि तासां मुक्तिगामित्वं तत्रैवोच्येत सामान्येन वा ?, तत्र तद्याद्यो विकल्पस्तदा पुरुषाणामपि यत्र जन्मनि मुक्तिगामिता न तत्रैव सप्तमपृथ्वीगमनमिति तेषामपि मुक्त्यभावप्रसङ्गः, अथ सामान्येन,

अत्र चायमाशयो यथा "छट्ठिं च इत्थियाओ मच्छा मणुया य सत्तमीं पुढवीं" इत्यागमनवचनात्पुरुषाणामेव सप्तमनरकपृथ्वीगमनयोग्य-कर्मोपार्जनसामर्थ्यं न स्त्रीणामित्यधोगतौ

पुरुषतुल्यसामर्थ्याभावादूर्ध्वगतावपि तासां तदभावोऽनुमीयते ततस्तासां पुरुषेभ्योऽपकृष्यमाणतेति, तदप्ययुक्तं, यतो येषामधोगतौ तुल्यसामर्थ्याभावस्तेषामूर्ध्वगतावप्यनेन भाव्यमिति न नियमोऽस्ति, तथाहि-

"समुच्छिमभुयगखगनउप्पयसप्पित्थिजलचरेहिंतो।
सनरेहिंतो सत्तसु कमोववज्जंति नरएसु॥"

इति वचनाद्भुजगचतुष्पत्सर्पखगजलचरनराणामधोगतावतुल्यं सामर्थ्यमूर्ध्वगतौ तु

"सन्नितिरिक्खेहिंतो सहस्सारंतिएसु देवेसु।
उप्पज्जंति परेसुवि सव्वेसुवि माणुसेहिंतो॥"

इति वचनादेषामासहस्रारान्तोत्पपातात्तुल्यमेव सामर्थ्यम्, उक्तं च-

"विषमगतयोऽप्यधस्तादुपरिष्टात्तुल्यमासहस्रारम्।
गच्छन्ति च तिर्यञ्चस्तदधोगत्यूनताऽहेतुः॥"

अतो नासप्तमनरकपृथ्वीगमनत्वेन विशिष्टसामर्थ्यासत्त्वम्, अथ वादादिलब्धिरहितत्वेन, तदप्यचारु, यतो यदि वादादिलब्धिमत्त्वेन विशिष्टसामर्थ्यं व्याप्तमुपलब्धं भवेत्ततस्तन्निवृत्तौ तस्य निवृत्तिः स्यात्, न चैवम्, अनयोर्व्याप्यव्यापकभावस्य क्वचिदनिश्चयात्, अल्पश्रुतत्वं तु मुक्त्यवाप्त्याऽनुभूतविशिष्टसामर्थ्यैर्मा षतुषादिभिरनैकान्तिकमित्युद्घोष्यमेव, यदप्यनुपस्थाप्यतापाराञ्चितकशून्यत्वेनेत्युच्यते, तदप्ययुक्तं, यतो न तन्निषेधाद्विशिष्टसामर्थ्याभावः प्रतीयते, योग्यतापेक्षो हि चित्रः शास्त्रे विशुद्ध्यपदेशः, यदुक्तम्-

"संवरनिर्जरारूपो बहुप्रकारस्तपोविधिः शास्त्रे।
रोगचिकित्साविदिरिव कस्यापि कथञ्चिदुपकारे॥"

यच्च पुरुषानभिवन्द्यत्वं हेतुरुक्तः तदपि सामान्येन गुणाधिकपुरुषापेक्षं वा?, यदि सामान्येन तदाऽसिद्धतादोषः, तीर्थकरजनन्यादयो हि शक्रादिभिरपि प्रणताः किमङ्ग शेषपुरुषैः?, गुणाधिकपुरुषापेक्षं चेद्गणधरा अपि तीर्थकृद्भिर्नाभिवन्द्यत इति तेषामप्यपकृष्यमाणत्वम्, अथ तीर्थशब्दस्याद्यगणधराभिधायित्वात्तीर्थप्रणामपूर्वकत्वाच्चार्हद्देशनाया असिद्धमेव तदनभिवन्द्यत्वं गणधराणाम्, एवं तर्हि चातुर्वर्णसङ्घस्यापि तदभिधेयत्वात्तदन्तर्भावाच्च स्त्रीणामर्हद्भिरपि वन्द्यत्वे कथं पुरुषानभिवन्द्यत्वेन तासां तेभ्योऽपकृष्यमाणत्वम्?, अथ स्मारणाद्यकर्तृत्वेन, एवं सति समानेऽपि रत्नत्रये शिष्याचार्ययोराचार्यस्यैव मुक्तिः स्यान्न शिष्यस्य, स्मारणाद्यकर्तृत्वेन तस्य ततोऽपकृष्यमाणत्वात्, न चैतदागमिकं, चण्डरुद्राद्याचार्यशिष्याणामागमे निःश्रेयसश्रवणात्, अथामहर्द्धिकत्वेन स्त्रीणां पुरुषेभ्योऽपकृष्यमाणत्वं, तथा सति प्रष्टव्योऽसि-किमाध्यात्मिकीमृद्धिमाश्रित्य बाह्यां वा?, तत्र न तावदाध्यात्मिकीमुक्तन्यायतो रत्नत्रयस्य तासां समर्थितत्वात्, नापि बाह्यम्, एवं हि महत्या तीर्थकरादिलक्ष्म्याश्चेतरक्ष(रेऽक्ष)त्रियादयो न भाजनमिति तेषामप्यमहर्द्धिकत्वेनापकृष्यमाणत्वान्मुक्तिकारणवैकल्यप्रसङ्गः, यदपि मायादिप्रकर्षवत्त्वेनेत्युच्यते, तदप्यसत्, तस्योभयोरपि तुल्यत्वेन दर्शनादागमे च श्रवणात्, श्रूयते हि चरमशरीरिणामपि नारदादीनां मायादिप्रकर्षवत्त्वम्,

अतो न तासां पुरुषेभ्योऽपकृष्यमाणत्वेन कारणावैकल्यस्य हेतोरसिद्धता, यदपि निर्वाण-

स्थानाद्यप्रसिद्धत्वेनेत्युक्तं, तदप्यसाधकं, यतो न निर्वाणस्थानादिप्रसिद्धिः कारणावैकल्यस्य कारणं व्यापकं वा येन हेतुनिवृत्तौ तस्य निवृत्तिः, अथाऽऽह यदि स्त्रीणां मुक्तिकारणावैकल्यमभविष्यत् मुक्तिरप्युदपरस्यत्, तथा च तत्स्थानादिप्रसिद्धिरपीति, नैवं, तत्स्थानादिप्रसिद्धिं प्रति मुक्तेरव्यभिचारित्वाभावात्, अन्यथा हि पुरुषाणामपि येषां मुक्तिस्थानाद्यप्रसिद्धितेषां तदभावप्रसङ्गः, अथैतत्साधकप्रमाणाभावेन प्रकृतहेतोरसिद्धता, तत्रापि तत्साधकप्रमाणस्य किं प्रत्यक्षस्यानुमानस्यागमस्य वा ?, तत्र यदि प्रत्यक्षस्य तदा किं स्वसम्बन्धिनः सर्वसम्बन्धिनो वा ?, स्वसम्बन्धिनोऽपि किं बाह्यं यद्यथोदितप्रत्युपेक्षणादिरूपं कारणावैकल्यं तद्विषयस्य यदिवाऽऽन्तरं यच्चारित्रादिपरिणामात्मकं तद्गोचरस्य ?, न तावदाद्यस्य, स्त्रीष्वपि यथोदितप्रत्युपेक्षणादेरक्षूणविधानस्येक्षणात्, अथ द्वितीयस्य तदा तदभावस्यावांग्दृशां पुरुषेष्वपि समानत्वात्तेषामपि कारणावैकल्यस्यासिद्धिप्रसङ्गः, सर्वसम्बन्धिनस्तु प्रत्यक्षस्यासर्वविदा सत्त्वेनासत्त्वेन (वा) क्वचिन्निश्चेतुमशक्यत्वात्, तदभावेन प्रकृतहेतोरसिद्धतेत्यनुद्घोष्यमेव, अथानुमानस्य, तदप्यसत्, तदभावस्य पुरुषेष्वपि समानत्वात्, न ह्यवांग्दृशां स्त्रीषु पुरुषेषु वा तत्त्वतस्तद्व्यभिचारि लिङ्गमस्ति येनानुमानं स्यात्, अथास्त्येव पुरुषेष्वनुमानं, तथाहि-

यदुत्कर्षापकर्षाभ्यां यस्यापकर्षोत्कर्षौ तस्यात्यन्तापकर्षे तदत्यन्तोत्कर्षवद्दृष्टं, यथाऽभ्रपटलापगमे सवितृप्रकाशः, रागाद्युत्कर्षापकर्षाभ्यामपकर्षोत्कर्षवच्च चारित्रादि, न च रागाद्यपचयप्रकर्षस्यासम्भवो यतो यत्प्रकृष्यमाणहानिकं तत्क्वचित्सम्भविहानिप्रकर्षनिष्ठमपि दृष्टं, यथा हेमनि कालिकाकिट्टादि, प्रकृष्यमाणहानयश्च रागादयः, तथैव तेषां प्राणिषु प्रतीतत्वात्, नन्वेतत्स्त्रीष्वपि समानमिति, नाप्यागमस्य, तस्य प्रस्तुतस्यापि साक्षात्स्त्रीनिर्वाणाभिधायित्वेनार्थतस्तत्कारणावैकल्यसाधकत्वात्, न च स्त्रीशब्दस्यान्यार्थत्वं परिकल्पनीयं, तद्धि लोकरूढितः आगमपरिभाषातो वा भवेत् ?, न तावल्लोकरूढितः, लोके हि यस्मिन्नर्थे यः शब्दोऽन्वयव्यतिरेकाभ्यां वाचकत्वेन दृश्यते स तस्यार्थो, यथा गवादिशब्दानां सास्नादिमदादयो, न च स्त्रीशब्दस्य स्तनादिमदाकारमर्थमन्तरेणान्यस्यान्वयव्यतिरेकाभ्यां वाच्यत्वेन प्रतीतिरस्ति, उक्तं च

"स्तनजघनादिव्यङ्ग्ये स्त्रीशब्दोऽर्थे न तं विहायैषः ।
दृष्टः क्वचिदन्यत्र त्वग्निर्माणवकवद्गौणः ॥"

इति, नाप्यागमपरिभाषातो यतो नागमे क्वचित्स्त्रीशब्दस्य परिभाषितोऽर्थो यथा व्याकरणे 'वृद्धिरादैजि'ति वृद्धिशब्दस्यादैचौ, दृश्यते चागमेऽपि लोकरूढ एवार्थे स्त्रीशब्दः "इत्थीओ जंति छड्डि" इत्यादौ, न च तत्राप्यर्थान्तरपरिकल्पना, बाधकं विना तदनुपपत्तेः, उक्तं च

"परिभाषितो न शास्त्रे मनुजीवशब्दोऽथ लौकिकोऽधिगतः ।
अस्ति च न तत्र बाधा स्त्रीनिर्वाणं ततो न कुतः ? ॥"

अथ दृष्ट एवागमे पुरुषाभिलाषात्मनि वेदाख्ये भावे स्त्रीशब्दः, इदमपि कुतो निश्चितं ?, किं तावत्स्त्रीशब्द इतिशब्दश्रवणमात्रात्स्त्रीत्वस्य पल्यशतपृथक्त्वावस्थानाभिधानतो वा ?, न तावत्स्त्रीवेद इति श्रवणमात्रत इति युक्तं, यदीह स्त्री सा चौ वेदश्च स्त्रीवेद इति समानाधिकरणसमासो भवेत्तदा स्त्रीशब्दस्यार्थान्तरे वृत्तिर्भवेत्, तत्सद्भावश्च बाधकाभावेन वा कल्प्येत समासान्तराभावेन वा ?, न तावद् बाधकाभावेन, तत्र हि स्त्रीशब्दस्य पुरुषाभिलाषात्मको

भाव एवार्थो भवेत्, तथा च स्त्रीनिर्वाणसूत्रे-किं स एव साक्षादर्थस्तदुपलक्षितं वा शरीरं ?, यदि स एव तदा किं तदैव तद् भावो विवक्ष्यते भूतपूर्वगत्या वा ?, तत्र यदि तदैव तदा निर्वाणावस्थायामपि वेदसम्भवो, न चैतदागमिकम्, अथ भूतपूर्वगत्या तदा देवादी नामपि निर्वाण प्राप्तिः तथा च "सुरणासुरएसु चतारि होंति" इत्याद्यागम विरोधः, तेष्वपि भूतपूर्व गत्या चतुर्दशगुणस्थानसम्भवात्, अथ तदुपलक्षितं [वा]पुरुषशरीरं तदाऽसौ तदुपलक्षणं तत्र नियतवृत्तिरनियतवृत्तिर्वा ?, यदि नियतवृत्तिस्तदाऽऽगमविरोधः, परिवर्त्तमानतयैव पुरुषशरीरे वेदोदयस्य तत्राभिधानात्, न चानुभवोऽप्येवमस्ति, अथानियतवृत्तिः कथमसौ तदुपलक्षणम् ?, अथैवंरूपमपि गृहादिषु काकाद्युपलक्षणमीक्ष्यत इत्यत्रापि तथोच्यते, एवं सति स्त्रीशरीरेऽपि कदाचित्पुरुषवेदस्योदयसम्भवात् स्त्रीणामपि निर्वाणापत्तिः, यथा हि पुरुषाणां भावतः स्त्रीत्वमेवं स्त्रीणामपि भावतः पुरुषत्वसम्भवोऽस्ति, भाव एव च मुख्यं मुक्तिकारणं, तथा च यद्यपकृष्टेनापि स्त्रीत्वेन पुरुषाणां निर्वाणमेवमुत्कृष्टेन भावपुरुषत्वेन स्त्रीणामपि किं न निर्वाणम् ? इति, न च समासान्तरासम्भवेन स्त्रीवेद इत्यत्र समानाधिकरणसमासकल्पनं, स्त्रिया वेदः स्त्रीवेद इति षष्ठीसमासस्यापि सम्भवात्, न चास्य स्त्रीशरीरपुरुषाभिलाषात्मकवेदयोः सम्बन्धाभावेनायुक्तत्वमिति वाच्यं, यतस्तयोः सम्बन्धाभावः किं भिन्नकर्मोदयरूपत्वेन पुरुषवत्स्त्रिया अपि स्त्रियां प्रवृत्तिदर्शनेन वा ?, न तावद्भिन्नकर्मोदयरूपत्वेन, भिन्नकर्मोदयरूपाणामपि पञ्चेन्द्रिय जात्यादीनां देवगत्यादीनां च सदा सम्बन्धदर्शनात्, नापि पुरुषवत्स्त्रिया अपि स्त्रियां प्रवृत्तिदर्शनेन, इयं हि पुरुषाप्राप्तौ स्ववेदोदयादपि संभवत्येव, उक्तश्च-"सा खकवेदात्तिर्यग्वदलाभे मत्तकामिन्याः" इति,

अथ स्त्रीत्वस्य पल्यशतपृथक्त्वावस्थानाभिधानादेवमुच्यते, इदमपि न सुन्दरं तत्र स्त्रीत्वानुबन्धस्य विवक्षितत्वात् संभवति हि स्त्र्याकरविच्छेदेऽपि तत्कारण कर्मोदया विच्छेदः तदविच्छेदाच्च पुंस्त्वाद्यव्यवधानेन पुनः स्त्रीशरीरग्रहणमिति, किञ्च-"मणुयगईए चउदस गुणठ्ठाणाणि होंति" तथा 'पंचिंदिएसु गुणठाणाणि हुंति चउदस' तथा 'चउदस तसेसु गुणठाणाणि हुंति' तथा 'भवसिद्धिगा व सव्वट्ठाणेसु होंति" इत्यादि स्त्रीशब्दरहितमपि प्रवचनं स्त्रीनिर्वाणे प्रमाणमस्ति, स्त्रीणामपि पुंवन्मनुष्यगत्यादिधर्मयोगात्, अथ सामान्यविषयत्वान्नेदं स्त्रीविशेषे प्रमाणम्, एवं सति पुरुषाणामपि विशेषरूपताऽस्ति न वा ?, न तावन्नास्ति, मनुष्यगतिविशेषरूपत्वात्तेषाम्, अथास्ति विशेषरूपता, तथा सति तेष्वपि कथमेतत्प्रमाणं ?, यथा च तेषु प्रमाणं तथा किं न स्त्रीष्वपीति ?, अथ पुरुषेष्वेव तदर्थवदिति स्त्रीषु तस्याप्रवृत्तिः, एवं सति किं न विपर्ययकल्पनापि ?, न चैवमपर्याप्तकमनुष्यादीनां देवनारकतिरश्चां च निर्वाणप्रसङ्गः, तेषामेतद्वाक्याविषयत्वात्, एतदविषयत्वं चापवादविषयत्वात्, उक्तं हि-"अपवादविषयं परिहृत्य उत्सर्गः प्रवर्त्तते" इति, अपवादश्च-"मिच्छादिट्ठी अपज्जत्तगे" तथा 'सुरनारएसु होंति चत्तारि तिरिएसु जाण पंचेव" इत्यादिरागमः, आह च-

"मनुजगतौ सन्ति गुणाश्चतुर्दशेत्याद्यपि प्रमाणं स्यात्।
पुंवत्स्त्रीणां सिद्धौ नापर्याप्तादि वद्बाधा॥"

इति कृतं विस्तरेण। सम्प्रति सिद्धानेवावगाहनातः क्षेत्रतश्चाह-उत्कृष्टा-सर्वमहती चासौ

अवगाहन्तेऽस्यां जन्तव इत्यवगाहना च- शरीरमुत्कृष्टावगाहना पञ्चधनुःशतप्रमाणा तस्यां सिद्धाः 'च:' समुच्चये 'जहन्न मज्झिमाइ य'त्ति अवगाहनायामिति प्रक्रमात्प्रत्येकं योज्यते ततः 'जघन्यावगाहनायां' द्विहस्तमानशरीररूपायां सिद्धाः 'मध्यमावगाहनायां च' उक्तरूपोत्कृष्ट-जघन्यावगाहनान्तरालवर्त्तिन्यां सिद्धाः 'ऊर्ध्वलोके मेरुचूलिकादौ सिद्धाः, संभवति हि तत्रापि केषाञ्चित्सिद्धप्रतिमावन्दनाद्यर्थमुपगतानां चारणश्रमणादीनां मुक्त्यवाप्तिः, 'अधश्च' अधोलोके ऽर्थादधोलौकिकग्रामरूपेऽपि सिद्धाः, 'तिरियं च'त्ति 'तिर्यग्लोके च' अर्द्धतृतीयद्वीप-समुद्ररूपे तत्रापि केचित् 'समुद्रे' जलधौ सिद्धाः 'जले च' नद्यादिसम्बन्धिनि सिद्धाः, भूभूधर-गह्वरशेषास्पदोपलक्षणमेतत्, अर्द्धतृतीयद्वीपसमुद्रेषु हि न क्वचिन्मुक्त्यवाप्तिनिषेध इति सूत्रार्थः ॥

इत्थं स्त्रीसिद्धादीनभिदधता स्त्रीत्वादिषु सिद्धसम्भव उक्तः, सम्प्रति तत्रापि क्व कियन्तः सिध्यन्ति ? इत्याशङ्क्याह-

मू.(१५१५) दस य नपुंसएसुं, वीसं इत्थियासु य।
पुरिसेसु य अट्ठसयं, समएणेगेन सिज्झई ॥

मू.(१५१६) चत्तारि य गिहिलिंगे, अन्नलिंगे, दसेव य।
सलिंगेण य अट्ठसयं, समएनेगेण सिज्झई ॥

मू.(१५१७) उक्कोसोगाहनाए उ, सिज्झंते जुगवं दुवे।
चत्तारि जहन्नाए, जहमज्झुत्तरं सयं ॥

मू.(१५१८) चउरुड्ढलोए य दुवे समुद्दे, तओ जले वीसमहे तहेव।
सयं च अट्ठुत्तर तिरियलोए, समएणेगेन उ सिज्झई धुवं ॥

वृ. 'दश' दशसङ्ख्याश्चशब्द उत्तरापेक्षया समुच्चये 'नपुंसकेषु' वर्द्धितचर्चितादिषु विंशतिः 'इत्थीयासु य'त्ति स्त्रीषु च पुरुषेषु चाष्टभिरधिकं शतमष्टशतं 'समयेन' अविभागकालरूपेण 'एकेन' एकसङ्ख्येन, प्रकृत्यादित्वात्तृतीया, 'सिद्धति' निष्ठितार्थं भवति, चत्वारो गृहिलिङ्गेऽन्यलिङ्गे दशैव च, स्वलिङ्गेन चाष्टशतं समयेनैकेन सिध्यति। 'उत्कृष्टावगाहनायां तु' उक्तरूपायां सिध्यतः 'युगपत्' एककालं 'द्वौ' द्विसङ्ख्यौ 'चत्वारः' चतुःसङ्ख्याः 'जहन्नाए'त्ति जघन्यावगाहनायां 'जवमज्झ'त्ति यवमध्यमिव यवमध्या-मध्यमावगाहना तस्याम् 'अष्टोत्तरं शतम्' अष्टोत्तरशतसङ्ख्याः, यवमध्यत्वं चैषां मध्यमावगाहनायामुत्कृष्टजघन्यावगाहनयोर्मध्य-वर्त्तित्वात्, तदपेक्षया च बहुतरसङ्ख्यात्वेन स्थूलतयैव भासमानत्वादिति भावनीयमिति।

चत्वार ऊर्द्धलोके च द्वौ समुद्रे त्रयो जले विंशतिः 'अधः' इत्यधोलोके 'तथैव' तेनैव प्रकारेण शतं च 'अष्टोत्तरम्' अष्टाधिकं तिर्यग्लोके समयेनैकेन तु सिद्धति, तुशब्दश्चशब्दश्च क्वचित्पूरणे क्वचिच्च पुनर्थे व्याख्येयः। एतत्सूत्रस्थाने चान्ये सूत्रद्वयमित्थं पठन्ति-

"चउरो उड्ढलोगंमि, वीसपहुत्तं अहे भवे।
सयं अट्ठोत्तरं तिरिए, एगसमएण सिज्झई ॥
दुवे समुद्दे सिज्झंती, सेसजलेसु ततो जना।
एसा ठ सिज्झणा भणिया, पुव्वभावं पडुच्च उ ॥"

एतच्च व्याख्यातप्रायमेवेति सूत्रचतुष्टयार्थः ॥ इत्थं पूर्वभावप्रज्ञापनीयनयापेक्षयाऽनेकधा

सिद्धानभिधाय सम्प्रति प्रत्युत्पन्नभावप्रज्ञापनीयनयापेक्षया तेषामेव प्रतिघातादिप्रतिपादनायाह-

मू.(१५१९) *कहिं पडिहया सिद्धा ?, कहिं सिद्धा पइट्ठिया ?।*
कहिं बुंदिं चइत्ता णं, कत्थ गंतूण सिज्झई ?॥

मू.(१५२०) *अलोए पडिहया सिद्धा, लोयग्गे य पइट्ठिया।*
इहं बुंदिं चइत्ता णं, तत्थ गंतूण सिज्झई॥

वृ. 'क्व'त्ति कस्मिन् 'प्रतिहताः' स्खलिताः कोऽर्थः ? -निरुद्धगतयः, सिद्धाः, तथा 'क्व' कस्मिन् सिद्धाः 'प्रतिष्ठिताः' साद्यपर्यवसितं कालं स्थिताः, अन्यच्च- क्व 'बुंदिं' शरीरं त्यक्त्वा कुत्र गत्वा 'सिज्झइ'त्ति वचनव्यत्ययात् 'सिद्धन्ति' निष्ठितार्था भवन्ति। एतत्प्रतिवचनमाह-'अलोके' केवलाकाशलक्षणे 'प्रतिहताः' स्खलितास्तत्र धर्मास्तिकायस्याभावेन तेषां गतेरसम्भवात्, उक्तं च

"ततोऽप्यूर्ध्वं गतिस्तेषां, कस्मान्नास्तीति चेन्मतिः।
धर्मास्तिकायस्याभावात्, स हि हेतुर्गतेः परः॥"

तथा 'लोकाग्रे च' लोकस्योपरि विभागे 'प्रतिष्ठिताः' सदाऽवस्थिताः, आह-ऊर्ध्वं गमनाभावेऽप्यधस्तिर्यग्वा गमनसम्भवेन कथं तेषां तत्र प्रतिस्थानम् ?, उच्यते, क्षीणकर्मत्वात्तेषां, कर्माधीनत्वाच्चाधस्तिर्यग्गमनयोः, तदुक्तम्-

"अधस्तिर्यगथोर्द्ध्वं च, जीवानां कर्मजा गतिः।
ऊर्द्ध्वमेव तु तद्धर्म्यात्, भवति क्षीणकर्मणाम्॥"

'इहे' त्यनन्तरप्ररूपिते तिर्यगूर्ध्वलोकादौ 'बुन्दिं' शरीरं त्यक्त्वा 'तत्र' इति लोकाग्रे गत्वा 'सिज्झति'त्ति सिध्यति, गत्वेति च मुखं व्यादाय स्वपितीत्यादिवत्क्त्वाप्रत्ययः, पूर्वापरकालविभागस्येहासम्भवात्; यत्रैव हि समये भवक्षयस्तस्मिन्नेव मोक्षस्तत्र गतिश्चेति, आह च वाचकः-

"द्रव्यस्य कर्मणो यद्वदुत्पत्त्यारम्भवीतयः।
समं तथैव सिद्धस्य, गतिमोक्षभवक्षयाः॥"

इति सूत्रद्वयार्थः। लोकाग्रे गत्वा सिद्धन्तीत्युक्तं, लोकाग्रं चेषत्प्राग्भाराया उपरीति यावति प्रदेशेऽसौ यत्संस्थाना यत्प्रमाणा यद्वर्णा च तदभिधानायाह-

मू.(१५२१) *बारसहिं जोयणेहिं, सव्वट्ठस्सुवरिं भवे।*
ईसीपब्भारनामा उ, पुढवी छत्तसंठिया॥

मू.(१५२२) *पणयाल सयसहस्सा, जोअणाणं तु आयया।*
तावइयं चेव वित्थिन्ना, तिगुणो सादिय (तस्सेव) परिरओ॥

मू.(१५२३) *अट्ठजोयणबाहल्ला, सा मज्झंमि वियाहिया।*
परिहायंती चरिमंते, मच्छीपत्ताउ तनुयरी॥

मू.(१५२४) *अज्जुनसुवन्नगमई, सा पुढवी निम्मला सहावेणं।*
उत्ताणयछत्तयसंठिया य भणिया जिनवरेहिं।

मू.(१५२५/१) *संखंककुंदसंकासा, पंडुरा निम्मला सुभा॥*

वृ. द्वादशभिर्योजनैः प्रकृत्यादित्वात्तृतीया 'सर्वार्थस्य' सर्वार्थनाम्नो विमानस्य 'उपरि'

ऊर्ध्वं 'भवेत्' स्यात् ईषत्प्राग्भारेति नाम यस्याः सा ईषत्प्राग्भारनामा, 'अनो बहुव्रीहे' रिति निषेधान्नान्तत्वेऽपि डाप् न भवति, ईषदादिनामोपलक्षणं चैतत्, अनेकनामधेयाभिधेयत्वात्तस्याः, उक्तं हि- "ईसीइति वा ईसीपब्भाराइ वा तनुइ वा तनुतणुतीति वा सिद्धीति वा सिद्धालएति वा मुत्ती ति वा मुत्तालएति वा लोयग्गेइ वा लोयग्गथूभियाइइ वा लोयपरिवुज्झणाति वा सव्वपाणभूयजीवसत्तसुहावहाति वे"त्यादि, 'पृथ्वी' भूमिश्छत्रम् आतपत्रं तत्संस्थितमिव संस्थितं-संस्थानमस्या इति छत्रसंस्थिता, इह च विशेषानभिधानेऽप्युत्तानमेवेदं गृह्यते, आह यतो भगवान् भद्रबाहुः-"उत्तानयछत्तयसंठियाउ भणियाउ जिनवरेहिंति"।

पञ्चचत्वारिंशच्छतसहस्रान् योजनानां 'तुः' पूरणे 'आयता' दीर्घा 'तावइयं चेव'त्ति तावतश्चैव प्रक्रमाच्छतसहस्रान् 'विस्तीर्णा' विस्तरतोऽपि, पञ्चचत्वारिंशच्छतसहस्रप्रमाणेति भावः त्रिगुणः 'तस्सेव'त्ति प्राग्वत् 'तस्माद्' उक्तरूपादायामात् 'परिरयः' परिधिः, इह च त्रिगुण इत्यभिधानेऽपि विशेषाधिक्यं द्रष्टव्यं "सव्वं वट्टं तिगुणं सविसेस"मिति वचनात्, अन्यथा हि पञ्चत्रिंशल्लक्षाधिकयोजनकोटिरेवैतत्परिमानं स्यात्, तथा च सूत्रान्तरविरोधो, यतस्तत्रोक्तम्-

"एगा जोयणकोडी बायालीसं भवे सयसहस्सं।
तीसं चेव सहस्सा दो चेव सया अउणपन्ना॥"

इति, पठन्ति च-'तिउणसाहियपरिरयं'ति। अष्टौ-अष्टसङ्ख्यानि योजनानि बाहल्यं-स्थौल्यमस्या इत्यष्टयोजनबाहल्या 'से' तीषत्प्राग्भारा, किं सर्वत्राप्येवम्? इत्याह-'मध्ये' मध्यप्रदेशे व्याख्याता, किमित्येवम्? अत आह-परि-समन्ताद्धीयमाना परिहीयमाना 'चरमंते'त्ति चरमान्तेषु' सकलदिग्भावर्तिषु पर्यन्तप्रदेशेषु मक्षिकायाः पत्रं-पक्षो मक्षिकापत्रम्, अपिशब्दस्य गम्यमानत्वात्तस्मादपि तनुतरी अतिपरिकृशेतियावत्, ह्रानिश्चात्र विशेषानभिधानेऽपि प्रतियोजनमङ्गुलपृथक्त्वं द्रष्टव्या, तथा चान्यत्रावाचि "सतूण जोयणं तु परिहायइ अंगुलपहुत्तं"ति।

(केचित्पठन्ति-) "अज्जुनसुवन्नगमई सा पुढवी निम्मला सहावेनं।
उत्ताणगछत्तगसंठिया य भनिया जिनवरेहिं॥"

तत्र चार्जुनं-शुक्लं तच्च तत्सुवर्णकं चार्जुनसुवर्णकं तेन निर्वृत्ताऽर्जुनसुवर्णकमयी 'सा' इतीषत्प्राग्भारा 'निर्मला' स्वच्छा, किमुपाधिवशतः? इत्याह-'स्वभावेन' स्वरूपेण उत्तानकम्-ऊर्द्ध्वमुखं यच्छत्रमेव छत्रकं तत्संस्थिता च 'भणिता' उक्ता जिनवरैः, प्राक् सामान्यतश्छत्रसंस्थितेत्युक्तमिह तूत्तानत्वं तद्विशेष उच्यत इति न पौनरुक्त्यम्।

शङ्खाङ्ककुन्दानि-प्रतीतानि तत्सङ्काशा-वर्णतस्तादृशी अत एव 'पंडुरे'ति 'पाण्डुरा' श्वेता 'निर्मला' निष्कलङ्का 'शुभा' अत्यन्तकल्याणावहा 'सुखा वा' सुखहेतुत्वेनेति सार्द्धसूत्रत्रयार्थः॥

मू.(१५२५/२) सीआए जोअने तत्तो, लोयंतो उ वियाहिओ॥

वृ. 'सीतायाः' सीताभिधानायाः पृथिव्या उपरीति शेषः, योजने 'ततः' इति तस्या उक्तरूपायाः 'लोकान्तः' लोकपर्यन्तः 'तुः' पूरणे व्याख्यात इति सूत्रार्द्धार्थः॥ ननु यदि योजने लोकान्तस्तर्हि क्व तत्र सर्वत्र सिद्धास्तिष्ठन्त्युतान्यथा? इत्याह-

मू.(१५२६) जोअणस्स उ जो तत्थ, कोसो उवरिमो भवे।
तस्स कोसस्स छब्भाए, सिद्धाणोगाहणा भवे॥

वृ. योजनस्य 'तृ:' वाक्यालङ्कारोपन्यासे य: 'तंत्रे' त्येवं व्यवस्थिते सुव्व्यत्ययेन वा 'तत्थ'त्ति 'तस्य' इषत्प्राग्भारोपरिवर्त्तिन: पठन्ति च 'तस्स'त्ति, 'क्रोश:' गव्यूतम् 'उवरिम'त्ति उपरिवर्त्ती भवेत् 'तस्ये'ति प्रक्रान्तस्य क्रोशस्य 'षड्भागे' सत्रिभागत्रयस्त्रिंशदधिकधनु:-शतत्रितयरूपे सिद्धानाम् ' अवगाहना' अवस्थितिर्भवेदिति सूत्रार्थ: ॥ अवगाहना च ततश्चलन-सम्भवेऽपि परमाण्वादीनामिवैकादिप्रदेशेषु भवेदत आह--तत्थ सूत्रम्। केचिदनन्तरसूत्रोत्तरा-र्द्धमधीयते-'कोसस्सवि य जो तत्थ, छब्भागो उवरिमो भवे'त्ति स्पष्टं। तत्र च किम् ? इत्याह-

मू. (१५२७) तत्थ सिद्धा महाभागा, लोगग्गंमि पइट्ठिया।
भवप्पवंचउम्मुक्का, सिद्धिं वरगइं गया।

वृ. 'तत्र' त्यनन्तरमुपदर्शितरूपे 'सिद्धा:' उक्तरूपा: 'महाभागा:' अतिशयाचिन्त्यशक्तयो लोकाग्रे 'प्रतिष्ठिता:' सदावस्थिता:, एतच्च कुत: ? इत्याह-भवा-नरकादयस्तेषां प्रपञ्चो-विस्तरस्तेनोन्मुक्ता:-त्यक्ता: सन्त: 'सिद्धिं' सिद्धिनाम्नीं वरां चेतरगत्यपेक्षया गतिश्च गम्यमान-तया वरगतिस्तां गता:-प्राप्ता:, अयमाशय:-भवप्रपञ्च एव-चलने हेतु: स च सिद्धानां नास्तीति कुतस्तेषां तत्सम्भव: ? इति सूत्रार्थ: ॥ तत्र गतीनां कस्य कियत्यवगाहना ? इत्याह

मू. (१५२८) उस्सेहो जस्स जो होइ, भवंमि चरमंमि उ।
तिभागहीना तत्तो य, सिद्धाणोगाहणा भवे ॥

वृ. 'उत्सेध:' उच्छ्राय: प्रक्रमाच्छरीरस्य 'जस्स'त्ति 'येषां' सिद्धानां 'य:' इति यत्परिमानो भवति 'भवे' जन्मनि 'चरमे' पर्यन्तवर्त्तिनि 'तु' विशेषणे इदमपि प्राग्भावप्रज्ञापनीयनयापेक्षयेति विशेषयति, 'त्रिभागहीना' त्रिभागोना 'ततश्चे'ति तत: पुनश्चरमभवोत्सेधात्सिद्धानां यत्तदोर्नित्या-भिसम्बन्धात्तेषामवगाहन्तेऽस्यामिति अवगाहना-स्वप्रदेशसन्निचित:, निश्चयाभिप्रायेण सर्वस्य स्वनिष्ठत्वात्, इयं च शरीरविवरापूरणत एतावतीत्यवगन्तव्यम्, उक्तं हि-"देहतिभागो झुसिरं तत्पूरणतो तिभागहीण"त्ति, इति सूत्रार्थ: ॥ एतानेव कालत: प्ररूपयितुमाह-

मू. (१५२९) एगत्तेण साइया, अपज्जवसियावि य।
पुहुत्तेण अनाइया, अपज्जवसियावि य ॥

वृ. 'एकत्वेन' असहायत्वेन विवक्षिता: सादिका अपर्यवसिता अपि च, यत्र हि काले ते सिद्धन्ति स तेषामादिरस्ति न तु कदाचिन्मुक्तेर्भ्रंस्यन्तीति न पर्यवसानसम्भव: 'पृथक्त्वेन' महत्त्वेन बहुत्वेन सामस्त्यापेक्षयेतियावत्, किमित्याह- अनादिका अपर्यवसिता अपि च, न हि कदाचित्ते नाभूवन् न भविष्यन्ति चेति सूत्रार्थ: ॥ सम्प्रत्येषामेवोपाधिनिरपेक्षं स्वरूपमाह-

मू. (१५३०) अरूविणो जीवघना, नाणदंसणसन्निया।
अउलं सुहसंपत्ता, उवमा जस्स नत्थि उ ॥

वृ. रूपिण:-उक्तन्यायेन रूपरसगन्धस्पर्शवन्त: तद्विपरीता अरूपिणस्तेषां रूपाद्यभावात्, उक्तं ह्यागमे-"से न किण्हे न नीले" इत्यादि, जीवाश्च ते सततोपयुक्ततया घनाश्च-शुषिरपूरणतो निरन्तरनिचितप्रदेशतया जीवघना गमक त्वादिशेषणस्य परनिपात: ज्ञानदर्शने उक्तरूपे ते एव सञ्ज्ञा-सम्यग्बोधरूपा सञ्ज्ञातैषामिति तारकादेराकृतिगणत्वादितच्चि ज्ञानदर्शनसञ्ज्ञिता:-ज्ञानदर्शनोपयोगवन्तो न विद्यते तुलेव तुला-इयत्ता परिच्छेदहेतुरस्येति अतुलम्, अपरिमितत्वात्,

"सिद्धस्स सुहो रासी सव्वद्धापिंडितो जइ हवेज्जा ।
सो ऽनंतवग्गभइतो सव्वागासे न माइज्जा ॥"

इति, सुखं-शर्म सामस्त्येकीभावेन दुःखलेशाकलङ्कितत्वलक्षणेन प्राप्ताः, सुखमेव पुनर्विशिनष्टि-उपमा यस्य 'नास्ति तु' न विद्यत एव, यदुक्तम्-

"लोके तत्सदृशो हर्षः, कृत्स्नेऽपत्यो न विद्यते ।
उपमीयेत तद्येन, तस्मान्निरुपमं स्मृतम् ॥"

न च विषयाभावात्तत्रास्य सुखशब्दाभिधेयाभाव एवेत्याशङ्कनीयं, चतुरर्थत्वात्तस्य,

लोके चतुर्ष्वर्थेषु, सुखशब्दः प्रयुज्यते ।
विषये वेदनाऽभावे, विपाके मोक्ष एव च ॥१॥
सुखो वह्निः सुखो वायुर्विषयेष्विह कथ्यते ।
दुःखोभावे च पुरुषः, सुखितोऽस्मीति मन्यते ॥२॥
पुण्यकर्मविपाकाच्च, सुखमिष्टेन्द्रियार्थजम् ।
कर्मक्लेशविमोक्षाच्च, मोक्षे सुखमनुत्तमम् ॥३॥"

ततश्च मोक्षस्यैव तत्र सुखशब्दाभिधेयत्वादसम्भव एवाशङ्कायाः, इह च जीवधना इत्यनेन सौमताभिमतमभावरूपत्वं मुक्तेः उत्तरविशेषणद्वयेन च 'सुखदुःखबुद्धीच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा नवात्मगुणास्तेषामत्यन्तोच्छित्तिर्निः श्रेयस'मिति वचनादचेतनत्वासुखित्वे च सिद्धस्य नैयायिकाद्यभिमते निराकुरुते, अभावरूपत्वे हि मुक्तेरर्थक्रियासामर्थ्यलक्षणत्वाद्वस्तुनोऽन्यक्षणस्य क्षणान्तराजनना दवस्तुत्वं, तदवस्तुत्वे चावस्तुनो जन्यत्वायोगानत्पूर्वस्यापि क्षणस्य एवं पूर्वपूर्वक्षणानामपि सौगतस्याभावरूपतैव प्राप्तेति पूर्वसन्तानमिच्छतो मुक्तेरपि भावरूपता बलादायाति, तथा सर्वथाऽऽत्मगुणोच्छित्तिरूपतायां निः श्रेयसस्यात्मनोऽप्यभावप्रसक्तिः, सर्वथा गुणाभावे हि गुणिनोऽप्यभाव एव, अंशेपरूपाद्यभाव इव घटादेरिति सूक्ष्मधिया भावनीयमिति। उक्तग्रन्थेनावगतमपि विप्रतिपत्तिनिराकरणार्थं पुनः क्षेत्रं स्वरूपं च तेषामाह-

मू.(१४३१) *लोएगदेसे ते सव्वे, नाणदंसणसन्निया ।*
संसारपारनिच्छिन्ना, सिद्धिं वरगइं गया ॥

वृ. लोकैकदेशे पाठान्तरतो लोकाग्रदेशे वोक्तरूपे 'ते' इति सिद्धाः, अनेन 'मुक्ताः सर्वत्र तिष्ठन्ति, व्योमवत्सापवर्जिताः' इत्यपास्तं भवति, सर्वगतत्वं ह्यात्मनामेतद् भवेत्, तथात्वे च सर्वत्र सर्वदा वेदनादिप्रसङ्गः, तथा 'सर्वेनिरवशेषा ज्ञानदर्शनसञ्ज्ञिताः संसारस्य पारः-पर्यन्तस्तं निस्तीर्णाः-पुनरागमनाभावलक्षणेनाधिक्येनातिक्रान्ताः सिद्धिं वरगतिं गताः इति प्राग्वत्, इह चाद्येन विशेषणेन मा भूत्केषाञ्चिज्ज्ञानसञ्ज्ञा परेषां दर्शनसञ्ज्ञैव केवला, किन्तूभे अपि सर्वेषामिति, द्वितीयेन-

"ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदम् ।
गत्वाऽऽगच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥"

इति मते तेषामनिष्ठितार्थदोषप्रसङ्गेन पुनरावृत्तिरिति, तृतीयेन तु क्षीणकर्मत्वेन स्ववशत्वादिविशेषणवत्त्वेऽप्येषा स्ववशस्यानभिसन्धिः कृतकृत्यस्य च यथास्वभावेनास्योपयोग इष्टः,

'तथागतिः स्यात्स्वभावेने'ति वचनादुत्पत्तिसमये सत्क्रियत्वमप्यस्तीति ख्याप्यते, इदं च सूत्रं यत्र दृश्यते तत्रेत्थं नेयं, प्रत्यन्तरेषु च न दृश्यत एवेति सूत्रार्थः ॥ इत्थं यदुक्तं "संसारत्था स सिद्धा य, दुविहा जीवा वियाहिय" त्ति तत्र सिद्धा उक्ताः, साम्प्रतं संसारिण आह--

मू.(१५३२) *संसारत्था उ जे जीवा, दुविहा ते वियाहिया ।*
तसा य थावरा चेव, थावरा तिविहा तहिं ॥

वृ. संसारस्था इति प्राग्वत्तुशब्दः सिद्धेभ्यः सङ्ख्याकृतविशेषद्योतको ये जीवा द्विविधास्ते व्याख्याताः, द्वैविध्यमेवाह-त्रसाश्च स्थावराश्चैव, स्थावराः 'त्रिविधाः' त्रित्रिप्रकाराः 'तस्मिन्' इति द्वैविध्ये सति, अल्पवक्तव्यत्वाच्च पञ्चान्निर्देशेऽपि प्रथमतः स्थावराभिधानमिति सूत्रार्थः ॥

मू.(१५३३) *पुढवी आउजीवा य, तहेव य वणस्सई ।*
इच्चेए थावरा तिविहा, तेसिं भए सुनेह मे ॥

वृ. 'पुढवीआउजीवा य'त्ति जीवशब्दः प्रत्येकमभिसंबध्यते ततः पृथिव्येव जीवाः पृथिवीजीवाः आपो-जलं ता एव जीवा अब्जीवाश्च, तथैव च 'वणस्सइ'त्ति प्रक्रमाद्वनस्पतिजीवाः ननु पृथिव्यादीनि जीवशरीराण्येतान्येव जीवाः, क्षान्तिप्रभृतिलक्षणानि ह्यमूनि जीवाः पुनरुपयोगलक्षणास्तत्कथं पृथिव्यादीन्येव जीवा इत्युक्तम् ?, उच्यते, जीवशरीरयोरन्योऽन्यानुगत्वेन विभागाभावादेवमुक्तं, न चैतदनार्षं, यत उक्तम्-"अन्नोऽन्नानुगयाणं इमं च तं चत्ति विभयणमजुत्तं" इत्यादि 'इति' इत्युक्तप्रकारेण 'एते' पृथिव्यादयः स्थावरास्त्रिविधाः । उत्तरग्रन्थसम्बन्धनार्थमाह-'तेषाम्' इति पृथिव्यादीनां 'भेदान्' विकल्पान् 'शृणुत' आकर्णयत 'मे' मम कथयत इति शेष इति सूत्रार्थः ॥

मू.(१५३४) *दुविहा पुढविजीवा उ, सुहुमा बायरा तहा ।*
पज्जत्तमापज्जत्ता, एवमेव दुहा पुनो ॥

मू.(१५३५) *बायरा जे उ पज्जत्ता, दुविहा ते वियाहिया ।*
सण्हा खरा य बोद्धव्वा, सण्हा सत्तविहा तहिं ॥

मू.(१५३६) *किण्हा नीला य रुहिरा य, हालिद्दा सुक्किला तहा ।*
पंडुपणगमट्टिया, खरा छत्तीसईविहा ॥

मू.(१५३७) *पुढवी य सक्करा वालुया य उवले सला य लोणूसे ।*
अयतउयतंबसीसगरुप्पसुवन्ने य वइरे य ॥

मू.(१५३८) *हरियाले हिंगुलुए मणोसिलासासगंजनपवाले ।*
अब्भपडलऽब्भवालुय बायरकाए मणिविहाणा ॥

मू.(१५३९) *गोमिज्जए य रुयगे अंके फलिहे य लोहियक्खे य ।*
मरगयमसारगल्ले भुयमोयग इंदनीले य ॥

मू.(१५४०) *चंदनगेरुयहंसगब्भ पुलए सोगंधिए य बोद्धव्वे ।*
चंदप्पभवेरुलिए जलकंते सूरकंते य ॥

वृ. 'द्विविधाः' द्विभेदाः पृथिवीजीवाः 'तुः' प्राग्वत् 'सूक्ष्माः' सूक्ष्मनामकर्मोदयाद् 'बादराः' बादरनामकर्मोदयात्, तथा 'पज्जत्तमपज्जत्त'त्ति तत्र 'पर्याप्ताः' आहारशरीरेन्द्रियोच्छ्वा-

सवाङ्मनोऽभिनिर्वृत्तिहेतुस्तथाविधदलिकं पर्याप्तिः, यत उक्तम्

"आहारसरीरिंदियउस्सासवओमनोऽभिनिवत्ती।
होइ जओ दलियाओ करणं पइ सा उ पज्जत्ती॥"

साऽस्त्येषामित्यर्शआदेराकृतिगणत्वादचि पर्याप्तास्तद्विपरीताश्चापर्याप्ताः, 'एवं' इत्यनेन पर्याप्तापर्याप्तभेदेन 'एते' सूक्ष्मा बादराश्च, पठन्ति च-'एगमेगे'त्ति एकैके द्विविधाः पुनः प्रत्येकमिति भावः। पुनरेतेषां प्रत्येकोत्तरभेदानाह-

'बायरा जे'त्ति बादरा ये पुनः पर्याप्ता द्विविधास्ते व्याख्याताः, कथम? इत्याह-'श्लक्ष्णा' इह चूर्णितलोष्टकल्पा मृदुः पृथिवी तदात्मका जीवा अप्युपचारतः श्लक्ष्णा एवमुत्तरत्रापि, 'खराः' कठिनाः 'च' समुच्चये 'बोद्धव्याः' अवगन्तव्याः, श्लक्ष्णाः सप्तविधाः 'तस्मिन्' इत्युक्तरूपभेदद्वये। यथा चामी सप्तविधास्तथाऽऽह-कृष्णा नीलाश्च 'रुधिराश्च' इति लोहिता रक्ता इतियावत् 'हारिद्राः' पीताः शुक्लाः 'तथे'ति समुच्चये 'पंडु'त्ति पाण्डवः-आपाण्डुः-आ-ईषच्छुभ्रत्वभाज इतियावत्, इत्थं वर्णभेदेन षड्विधत्वम्, इह च पाण्डुग्रहणं कृष्णादिवर्णानामपि स्वस्थानभेदेन भेदाद्भेदान्तरसम्भवसूचकं, पनकः अत्यन्तसूक्ष्मरजोरूपः स एव मृत्तिका पनकमृत्तिका, पनकस्य च नभसि विवर्त्तमानस्य लोके पृथिवीत्वेनारूढत्वात्पूर्वभेदसङ्ग्रहेऽपि भेदेनोपादानं, तत एव च मृत्तिकेति पृथ्वीपर्यायाभिधानमपि, अन्ये त्वाहुः पनकमृत्तिका मरुषु पर्पटिकेति रूढा, यस्याश्चरणाभिधाते झगित्युज्जृम्भणं, खरपृथिवीभेददर्शनोपक्रममाह-'खराः' प्रक्रमाद्बादरपृथिवीजीवाः 'षट्त्रिंशद्विधाः' षट्त्रिंशद्भेदाः।

तानेवाह 'पृथिवी'ति शुद्धा सत्य शुद्धावच्छुद्धपृथिवी शर्करादिरूपा या न भवति, चशब्द उत्तरभेदापेक्षया समुच्चये, 'शर्करा' लघूपलसकलरूपा, 'वालुका च' प्रतीता, 'उपलः' गण्डशैलादिः, 'शिला च' दृषत् 'लोणूसे अयतंबतउयसीसगरूप्यसुवन्ने य'त्ति लवणं च-समुद्रलवणादि ऊषश्च-क्षारमृत्तिका लवणोषौ अयस्ताम्रत्रपुकसीसकरूप्यसुवर्णानि च प्रतीतानि, नवरमेषा सम्बन्धतो धातव एवैवमुक्ताः, सदा तेषु तत्सत्तादर्शनार्थं चैवमभिधानं, तेषु ह्युपलादीनि प्रागपि सन्त्येव, केवलं मलविगमादाविर्भवन्ति, 'वज्रश्च' हीरकः।

हरितालो हिङ्गुलको मनःशिलेति च प्रतीता एव, 'सासगंजणपवाले'त्ति, सासकश्चधातुविशेषोऽञ्जनं-समीरकं प्रवालकं च-विद्रुमः सासकाञ्जनप्रवालानि, 'अब्भपडलऽब्भवालुय'त्ति अभ्रपटलंप्रसिद्धम् अभ्रवालुका-अभ्रपटलमिश्रा वालुका 'बादरकाये' इति बादरपृथ्वीकायेऽमी भेदा इति शेषः 'मणिविहाने'त्ति चस्य गम्यमानत्वात् 'मणिविधानानि च' मणिभेदाः कानि पुनस्तानि? इत्याह-गोमेज्जकश्च रुचकोऽङ्कः स्फटिकश्च लोहिताक्षश्च 'मरगय'त्ति मरकतो मसारगल्लः 'भुयमोयग'त्ति भुजमोचक इन्द्रनीलश्च ६।

'चंदनगेरुयहंसगब्भ'त्ति चन्दनो गेरुको हंसगर्भः पुलकः सौगन्धिकश्च बोद्धव्यः 'चंदप्पह'त्ति चन्द्रप्रभो वैडूर्यो जलकान्तः सूरकान्तश्च। इह च पृथिव्यादयश्चतुर्दश हरितालादयोऽष्टौ गोमेज्जकादयश्च क्वचित्कस्यचित्कथञ्चिदन्तर्भावाच्चतुर्दशेत्यमी मीलिताः षट्त्रिंशद् भवन्तीति सूत्रसप्तकार्थः। सम्प्रति प्रकृतोपसंहारपूर्वकं सूक्ष्मपृथिवीकायप्ररूपणामाह

मू. (१५४१) *एए खरपुढवीए भेया छत्तीसमाहिया।*

एगविहमनाणत्ता, सुहुमा तत्थ वियाहिया ॥

वृ. एते स्वरपृथिव्यास्तदविभागाच्च तत्स्थजीवानां भेदाः षट्त्रिंशदाख्याताः, 'एगविह-मनाणत्त'त्ति आपत्वादेकविधाः, किमित्येवंविधाः ?-यतोऽविद्यमानं नानात्वं-नानाभावो भेदो येषां तेऽमी अनानात्वाः सूक्ष्माः 'तत्रे'ति तेषु सूक्ष्मबादरपृथिवीजीवेषु मध्ये व्याख्याता इति सूत्रार्थः ॥ एतानेव क्षेत्रत आह-

मू.(१५४२/१) सुहुमा य सव्वलोगंमि, लोगदेसे य बायरा।

वृ. सूक्ष्माः 'सर्वलोके' चतुर्दशरज्ज्वात्मके तत्र सर्वदा तेषां भावात्, लोकस्य देशो विभागो लोकदेशस्तस्मिन् 'चः' पुनरर्थे बादरास्तेषां क्वचित्कदाचिदसत्त्वेन सकललोकाप्यसम्भवात् ॥

अधुनैतत्कालतोऽभिधित्सुः प्रस्तावनामाह-

मू.(१५४२/२) एत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥

वृ. प्राग्वर्दित सूत्रार्थः ॥ यथाप्रतिज्ञातमाह-

मू.(१५४३) संतइं पप्पऽणाईया, अपज्जवसिया वि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥

मू.(१५४४) बावीससहस्साइं, वासानुक्कोसिया भवे।
आउठिई पुढवीणं, अंतोमुहुत्तं जहन्निया ॥

मू.(१५४५) असंखकालमुक्कोसा, अंतोमुहुत्तं जहन्नयं।
कायठिई पुढवीणं, तं कायं तु अमुंचओ ॥

मू.(१५४६) अनंतकालमुक्कोसं, अंतोमुहुत्त जहन्नयं।
विजढंमि सए काए, पुढविजीवाण अंतरं ॥

वृ. 'सन्ततिं' प्रवाहं प्राप्यानादिका अपर्यवसिता अपि च, तेषां प्रवाहतः कदाचिद-प्यभावासम्भवात् 'स्थितिं' भवस्थितिरूपां 'श्रतीत्य' आश्रित्य सादिकाः सपर्यवसिता अपि च, द्विविधाया अपि तस्या नियतकालत्वात्। यथा चैततथाऽऽह द्वाविंशतिसहस्राणि वर्षाणाम् 'उक्कोसिय'त्ति उत्कृष्टा भवेत्, काऽसौ ? इत्याह-आयुः-जीवितं तस्य स्थितिः-अवस्थान-मायुःस्थितिः 'पृथिवीना'मिति पृथिवीजीवानामन्तर्मुहूर्तं जघन्यिका, असङ्ख्यकालमुत्कृष्टा अन्तर्मुहूर्तं जघन्यिका, काऽसौ ? -काय इति-पृथिवीकायस्तस्मिन् स्थितिः-ततोऽनुद्वर्त्तनेना-वस्थानं कायस्थितिः 'पृथिवीनां' पृथ्वीजीवानां 'तम्' इति पृथ्वीरूपं 'कायं' निकायं 'तुः' अवधारणे भिन्नक्रमश्च ततः 'अमुंचतो'त्ति 'अमुञ्चतामेव' अत्यजताम्, इत्थं द्विविधाया अपि स्थितेर्नैयत्यदर्शनेन सादिसपर्यवसितत्वमेषां, सामर्थ्यकालस्य प्रक्रान्तत्वादन्तरकालमाह-अनंतकालमुत्कृष्टमन्तर्मुहूर्तं जघन्यकं 'विजढंमि'त्ति त्येक्ते 'स्वके' स्वकीये 'काये' निकाये पृथ्वीजीवानामन्तरं, किमुक्तं भवति ?-यत्पृथिवीकायादुद्वर्त्तनं या च पुनस्तत्रैवोत्पत्तिर-नयोर्व्यवधानमिति सूत्रचतुष्टयार्थः ॥ एतानेव भावत आह-

मू.(१५४७) एएसिं वण्णओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥

वृ. नवरं वर्णादीनां भावरूपत्वात्तेषां च संङ्ख्याभेदेनाभिधीयमानत्वादस्य भावाभिधायिता,

उपलक्षणं चेह सहस्र इति, वर्णादितारतम्यस्य बहुतरभेदत्वेनासङ्ख्यभेदतायाः अपि सम्भवादिति सूत्रार्थः ॥ इत्थं पृथ्वीजीवानभिधायाब्जीवानाह-

मू.(१५४८) दुविहा आउजीवा उ, सुहुमा बायरा तहा।
पज्जत्तमपज्जत्ता, एवमेव दुहा पुनो ॥

मू.(१५४९) बायरा जे उ पज्जत्ता, पंचहा ते पकित्तिया।
सुद्धोदए य उस्से, हरयनु महिया हिमे ॥

मू.(१५५०) एगविहमनाणत्ता, सुहुमा तत्थ वियाहिया।
सुहुमा सव्वलोगंमि, लोगदेसे य बायरा ॥

मू.(१५५१) संतइं पप्पणाईया, अपज्जवसियावि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥

मू.(१५५२) सत्तेव सहस्साइं, वासानुक्कोसिया भवे।
आउठिई आऊणं, अंतोमुहुत्त जहन्नयं ॥

मू.(१५५३) असंखकालमुक्कोसा, अंतोमुहुत्तं जहन्नयं।
कायठिई आऊणं, तं कायं तु अमुंचओ ॥

मू.(१५५४) अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं।
विजढंमि सए काए आउजीवाण अंतरं ॥

मू.(१५५५) एएसिं वन्नओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥

वृ. सूत्राष्टकं व्याख्यातप्रायमेव नवरं 'सुद्धोदकं' मेघमुक्तं समुद्रादिसम्बन्धि च जलम् 'ओसे'त्ति अवश्यायः शरदादिषु प्राभातिकसूक्ष्मवर्षः 'हरतनु' प्रातः सस्नेहपृथिव्युद्भव-स्तृणाग्रजलबिन्दुः 'महिका' गर्भमासेषु गर्भसूक्ष्मवर्षा 'हिमं' प्रतीतमेव, सप्तैव सहस्राणि वर्षाणामुत्कृष्टिका भवेत्, काऽसौ ? आयुःस्थितिः 'अपाम्' इत्यस्जीवानामिति सूत्राष्टकार्थः ॥

मू.(१५५६) दुविहा वणस्सईजीवा, सुहुमा बायरा तहा।
पज्जत्तमपज्जत्ता, एवमेव दुहा पुनो ॥

मू.(१५५७) बायरा जे उ पज्जत्ता, दुविहा ते वियाहिया।
साहारणसरीरा य, पत्तेगा य तहेव य ॥

मू.(१५५८) पत्तेयसरीरा उ, नेगहा ते पकित्तिया।
रुक्खा गुच्छा य गुम्मा य, लया वल्ली तणा तहा ॥

मू.(१५५९) वलय पव्वया कुहणा, जलरूहा ओसही तिणा।
हरियकाया उ बोद्धव्वा, पत्तेया इति आहिया ॥

मू.(१५६०) साहारणसरीरा उ, नेगहा ते पकित्तिया।
आलुए मूलए चेव, सिंगबेरे तहेव य ॥

मू.(१५६१) हिरिली सिरिली सिस्सिरीली, जावई केयकंदली।
पलंडुलसणकंदे य, कंदली य कुहव्वये ॥

मू.(१५६२) लोहिणीहूयथीहू य, तुहगा य तहेव य।
कण्हे य वज्जकंदे य, कंदे सूरणए तह॥
मू.(१५६३) अस्सकन्नी य बोद्धव्वा, सीहकन्नी तहेव य।
मुसुंढी य हलिद्दा य, नेगहा एवमायओ॥
मू.(१५६४) एगविहमनाणत्ता०॥
मू.(१५६५) संतइं पप्पऽनाईआ०॥
मू.(१५६६) दस चेव सहस्साइं, वासानुक्कोसिया भवे।
वणस्सइणं आउं तु, अंतोमुहुत्त जहन्नयं॥
मू.(१५६७) अनंतकालमुक्कोसा, अंतोमुहुत्तं जहन्नयं।
कायठिई पनगाणं, तं कायं तु अमुंचओ॥
मू.(१५६८) अनंतकालमुक्कोसा, अंतोमुहुत्त जहन्नयं।
विजढंमि सए काए, पनगजीवाण अंतरं॥
मू.(१५६९) एएसिं वन्नओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो॥

वृ. सूत्राणि चतुर्दश, प्रायो व्याख्यातान्येव, नवरं साधारणम्- अनन्तजीवानामपि समानमेकं शरीरं येषां तेऽमी साधारणशरीराः, उक्तंचाणं चैतदाहारानाभोगप्रत्ययौदारिकतैजसकार्मणयोगित्वेन साधारणत्वात्,

"साहारणमाहारो साहारणमाणपाणगहणं च।
साहारणजीवाणं साहरणलक्खणं एयं॥"

'पत्तेगा य'त्ति 'प्रत्येकशरीराश्च' एकमेकं प्रति प्रत्येकम्-एकैकशो विभिन्नं शरीरमेषामिति प्रत्येकशरीराः, तेषा हि यदेकस्य शरीरं न तदन्यस्येति, यदुक्तम्-

"जह सगलसरिसवाणं सिलेसमिस्साण वट्टिया वत्ती।
पत्तेयसरीराणं तह होंति सरीरसंघाया॥१॥
जह वा तिलसक्कुलिया बहुएहिं तिलेहिं मेलिया संती।
पत्तेयसरीराणं तह होंति सरीरसंघाया॥२॥"

प्रक्रमाज्जीवा ये इति शेषः अनेकधा ते प्रकीर्त्तिताः, पठन्ति च-'बारसविहभेएणं पत्तेया उ वियाहिय'त्ति, 'वृक्षाः' चूतादयः 'गुच्छाः' वृन्ताकीप्रभृतयः 'गुल्माश्च' नवमालिकादयः 'लताः' चम्पकलतादयः 'वल्लयः' त्रपुष्यादयः 'तृणानि' जुञ्जुकार्जुनादीनि 'लतावलयानि' नालिकेरीकदल्यादीनि भण्यन्ते, तेषां च शाखान्तराभावेन लतारूपता त्वचो वलयाकारत्वेन च वलयता, पर्वाणि-सन्धयस्तेभ्यो जाताः पर्वजाः पाठान्तरतः पर्वगा वा इक्ष्वादयः 'कुहणाः' भूमिस्फोटकविशेषाः सर्पच्छत्रकादयो, जले रुहन्तीति जलरुहाः-पद्मादयः औषधयः-फलपाकान्तास्तद्रूपाणि तृणानि औषधितृणानि-शाल्यादीनि हरितानि-तन्दुलेयकादीनि तान्येव कायाः-शरीराण्येषामिति हरितकायाः, चशब्द एषामेव स्वगतानेकभेदसंसूचकः।

'साधारणशरीरास्त्विति तुशब्दस्यापिशब्दार्थत्वात् साधारणशरीरा अपि न केवलं प्रत्येकशरीरा इत्यपिशब्दार्थः, आलूकमूलकादयः हरिद्रापर्यन्ताः प्रायः कन्दविशेषास्तत्तद्देश-

प्रसिद्धाः 'एकमादयः' इत्येवंप्रकारा येषामिदं साधारणशरीरलक्षणमस्ति, तद्यथा--

"चक्कागं भज्जमाणस्स, गंठी चुन्नघनो भवे।
पुढवीसरिसेण भेएण, अनंतजीवं वियाणाहि ॥१॥
गूढछिरागं पत्तं सच्छीरं जं च होइ निच्छीरं।
जंपि य पणट्ठसंधि, अनंतजीवं वियाणाहि ॥२॥" इत्यादि

पनका- अश्निजीवाः, इह च तदुपलक्षिताः सामान्येन वनस्पतयो गृह्यन्ते, तथा चान्ये पठन्ति- 'वणप्फईण आउं तु'त्ति, प्रत्येकशरीरापेक्षया चोत्कृष्टं दशवर्षसहस्रमानमायुरुक्तं, साधारणानां जघन्यत उत्कृष्टतश्चान्तर्मुहूर्तायुष्कमानं, उक्तं च-"निओयस्स णं भंते ! केवइयं कालं ठिइपन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं" कायस्थितः पनकानाम्, इहापि सामान्येन वनस्पतिजीवानाम, अत एवासौ सामान्येन वनस्पतिजीवान्निगोदान् वाऽपेक्ष्योत्कृष्टतोऽनन्तकालमुच्यते, निरपेक्षां तु प्रत्येकवनस्पतीनां तथा निगोदानां बादराणां सूक्ष्माणां चासङ्ख्येयकालोऽवस्थितिः, यदुक्तम्-"पत्तेयसरीरबादरवनप्फईकाइयाणं भंते ! केवइयं कालं कायठिई पन्नत्ता ?, जहन्नेणं अंतोमुहुत्तं उक्कोसेण सत्तरिसागरोवमकोडाकोडीओ निओए णं भंते ! निओदेत्ति कालओ केच्चिरं होइ ?, जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतकालं अनंताओ ओसप्पिणीओ खेत्तओ अड्ढाइज्जा पोग्गलपरियट्टा वा। बायरनिओयपुच्छा, जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सत्तरिसागरोवमकोडाकोडीओ।

सुहुमनिगोयपुच्छा, जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखेज्जं कालं"ति। तथाऽसङ्ख्यकालमुत्कृष्टं पनकजीवानामन्तरं, तत उद्धृत्य हि पृथिव्यादिषूत्पत्तव्यं, तेषु चासङ्ख्येयकालैव कायस्थितिरिहापि तथाऽभिधानादिति चतुर्दशसूत्रार्थः ॥

प्रकृतमुपसंहरन्नुत्तरग्रन्थं च सम्बन्धयितुमिदमाह--

मू. (१५७०) इच्चेए थावरा तिविहा, समासेन वियाहिया।
इत्तो उ तसे तिविहे, वुच्छामि अनुपुव्वसो ॥

वृ. 'इति' इत्येवंप्रकाराः 'एते' पृथिव्यादयः स्थानशीलाः स्थावराः 'त्रिविधाः' त्रिप्रकाराः, त्रयाणामप्यमीषां स्वयमवस्थितिस्वभावत्वात्, 'समासेन' सङ्क्षेपेण व्याख्याताः, विस्तरतो ह्यमीषां बहुतरा भेदाः। 'अतः' स्थावरविभक्तेरनन्तरं 'तुः' पुनरर्थः त्रसांस्त्रिविधान् वक्ष्यामि 'अनुपुव्वसो'त्ति आनुपूर्व्येति सूत्रार्थः ॥

मू. (१५७१) तेऊ वाऊ य बोद्धव्वा, ओराला य तसा तहा।
तच्चेए तसा तिविहा, तेसिं भेए सुणेह मे ॥

वृ. 'तेउ'त्ति तेजोयोगात्तेजांसि-अ[आ]ग्नयस्तद्वृत्तिनो जीवा अपि तथोक्ताः, एवं 'वाऊ'ति वान्तीति वायवो-वातास्ते च बोद्धव्याः, 'ओराल'त्ति 'उदाराः' एकेन्द्रियापेक्षया प्रायः स्थूला द्वीन्द्रियादय इतियावत् 'चः' समुच्चये त्रसाः 'तथे'ति तेनागमोक्तेन प्रकारेण, उपसंहारमाह- 'इती'त्यनन्तरोक्तास्त्रस्यन्ति-चलन्ति देशादेशान्तरं संक्रामन्तीति त्रसाः 'त्रिविधाः' त्रिप्रकाराः, तेजोवाय्वोश्च स्थावरनामकर्मोदयेऽप्युक्तरूपं त्रसनमस्तीति त्रसत्वं, द्विधा हि तत्-गतितो

लब्धितश्च, यत उक्तम्-''दोवहा खलु तसजीवा लद्धितसा चेव गतितसा चेव''त्ति, ततश्च तेजोवाय्वोर्गतित उदाराणां च लब्धितोऽपि त्रसत्वमिति, उत्तरग्रन्थसम्बन्धनायाह-'तेसा'मिति तेजःप्रभृतीनां भेदान् शृणुत 'मे' मम कथयत इति सूत्रार्थः ॥ तत्र तावत्तेजोजीवानाह-

मू.(१५७२) *दुविहा तेउजीवा उ, सुहुमा बायरा तहा।*
पज्जत्तमपज्जत्ता, एवमेव दुहा पुनो ॥

मू.(१५७३) *बायरा जे उ पज्जत्ता, नेगहा ते वियाहिया।*
इंगाले मुम्मुरे अगनी, अच्चि जाला तहेव य ॥

मू.(१५७४) *उक्का विज्जू य बोद्धव्वा, नेगहा एवमायओ।*
एगविहमनाणत्ता, सुहुमा ते वियाहिया ॥

मू.(१५७५) *सुहुमा सव्वलोगंमि, लोगदेसे य बायरा।*
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥

मू.(१५७६) *संतइं पप्पऽणाईया, अपज्जवसियावि य।*
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥

मू.(१५७७) *तिन्नेव अहोरत्ता, उक्कोसेन वियाहिया।*
आउ ठिई तेऊणं, अंतोमुहुत्तं जहन्नयं ॥

मू.(१५७८) *असंखकालमुक्कोसा, अंतोमुहुत्त जहन्नयं।*
कायठिई तेऊणं, तं कायं तु अमुंचओ ॥

मू.(१५७९) *अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं।*
विजढंमि सए काए, तेउजीवाण अंतरं ॥

मू.(१५८०) *एएसिं वन्नओ चेव, गंधओ रसफासओ।*
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥

वृ. दुविहेत्यादिसूत्राणि नव प्रायः प्राग्वत्, नवरम् 'अङ्गारः' विगतधूमज्वालो दह्यमानेन्धनात्मकः 'मुर्मुरः' भस्ममिश्राग्निकणरूपः 'अग्निः' इहोक्तभेदातिरिक्तो वह्निः 'अर्चिः' मूलप्रतिबद्धा ज्वलनशिखा, दीपशिखेत्यन्ये, 'ज्वाला' छिन्नमूला ज्वलनशिखैवेति सूत्रनवकार्थः ॥

उक्तास्तेजोजीवाः, वायुजीवानाह-

मू.(१५८१) *दुविहा वाउजीवा य, सुहुमा बायरा तहा।*
पज्जत्तमपज्जत्ता, एवमेव दुहा पुनो ॥

मू.(१५८२) *बायरा जे उ पज्जत्ता, पंचहा ते पकित्तिया।*
उक्कलियामंडलियाघनगुंजासुद्धवाया य ॥

मू.(१५८३) *संवट्टगवाए य, नेगहा एवमाअओ।*
एगविहमनाणत्ता, सुहुमा तत्थ वियाहिया ॥

मू.(१५८४) *सुहुमा सव्वलोगंमि, लोगदेसे य बायरा।*
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥

मू.(१५८५) *संतइं पप्पऽणाईया, अपज्जवसियावि य।*

ठिइं पडुच्च साईया, सपज्जवसियावि य ॥

मू.(१५८६) तिन्नेव सहस्साइं, वासानुक्कोसिया भवे ।
आउठिइं वाऊणं, अंतोमुहुत्तं जहन्नयं ॥

मू.(१५८७) असंखकालमुक्कोसा, अंतोमुहुत्तं जहन्नयं ।
कायठिइं वाऊणं, तं कायं तु अमुंचओ ॥

मू.(१५८८) अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए, वाउजीवाण अंतरं ॥

मू.(१५८९) एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥

वृ. दुविहेत्यादि सूत्रनवकं प्राग्वत्। 'पञ्चधे' त्युपलक्षणम्, अत्रैवास्यानेकधेत्यभिदानात्, 'उक्कलियामंडलियाघणगुंजासुद्धवाया य' वातशब्दस्य प्रत्येकमभिसम्बन्धादुत्कलिकावाता ये स्थित्वा स्थित्वा पुनर्वान्ति मण्डलिकावाता वातोलीरूपाः घनवाता-रत्नप्रभाद्यधोवर्त्तिनां घनोदधीनां विमानानां वाऽऽधारा हिमपटलकल्पा वायवो गुञ्जावाता-ये गुञ्जन्तो वान्ति शुद्धवाता-उत्कलिकाद्युक्तविशेषविकला मन्दानिलादयः, 'संवट्टगवाए य'त्ति संवर्त्तकवाताश्च-ये बहिःस्थितमपि तृणादि विवक्षितक्षेत्रान्तः क्षिपन्तीति सूत्रनवकार्थः ॥

इत्थं तेजोवायुरूपांस्त्रसानभिधायोदारत्रसाभिधित्सयाऽऽह-

मू.(१५९०) ओराला तसा जे उ, चउहा ते पकित्तिया ।
बेइंदिय तेइंदिय, चउरो पंचिंदिया चेव ॥

वृ. उदारास्त्रसाः 'ये तु' इति ये पुनः 'चतुर्धा' चतुष्प्रकारास्ते प्रकीर्त्तिताः, यथा चैषां चतुर्द्धात्वं तथाऽऽह 'बेइंदिय'त्ति द्वे इन्द्रिये-स्पर्शनरसनाख्ये येषां तेऽमी द्वीन्द्रियाः, एतच्च निर्वृत्त्युपकरणाख्यं द्रव्येन्द्रियमभिप्रेत्योच्यते, भावेन्द्रियापेक्षयैकेन्द्रियाणामपीन्द्रियपञ्चकस्यापि सम्भवात्, तथा च प्रज्ञापना-''दव्विंदियं पडुच्च एगिंदिया जीवा एगेंदिया भावेंगियं पडुच्च एगेन्दियावि जीवा बेंदिया तेइंदिया चउरिंदिया पंचिंदिय''त्ति, एवं शेषेष्वपि, तथैव 'तेइंदिय'त्ति त्रीन्द्रियाः-येषां द्वे ते एव तृतीयां घ्राणं, 'चउरो'त्ति प्रक्रमाच्चतुरिन्द्रियाः-येषां त्रीण्युक्तरूपाणि चतुर्थं चक्षुः, पञ्चेन्द्रियाश्चैव-येषामेतान्येव चत्वारि पञ्चमं श्रोत्रमिति सूत्रार्थः ॥

तत्र तावद् द्वीन्द्रियवक्तव्यतां प्रतिपिपादयिषुरिदमाह-

मू.(१५९१) बेइंदिया उ जे जीवा, दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता, तेसिं भए सुणेह मे ॥

मू.(१५९२) किमिनो सोमंगला चेव, अलसा माइवाहया ।
वासीमुहा य सिप्पीया, संखा संखणगा तहा ॥

मू.(१५९३) पल्लोयानुल्लया चेव, तहेव य वराडगा ।
जलूगा जालगा चेव, चंदना य तहेव य ॥

मू.(१५९४) इति बेइंदिया एए, नेगहा एवमायओ ।
लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ॥

मू.(१५९५) संतइं पप्पऽनाईया, अपज्जवसियावि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य॥

मू.(१५९६) वासाइं बारसेव उ, उक्कोसेन वियाहिया।
बेइंदियआउठिई, अंतोमुहुत्तं जहन्नयं॥

मू.(१५९७) संखिज्जकालमुक्कोसा, अंतोमुहुत्तं जहन्नयं।
बेइंदियकायठिई, तं कायं तु अमुंचओ॥

मू.(१५९८) अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं।
बेइंदियजीवाणं, अंतरेयं वियाहियं॥

मू.(१५९९) एएसिं वन्नओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो॥

वृ. बेइंदिया इत्यादि सूत्रनवकम्, इदमपि प्रायस्तथैव, नवरं द्वीन्द्रियाभिलापः कर्त्तव्यः, तथा 'कृमयः' अशुच्यादिसम्भवाः 'अलसाः' प्रतीताः 'मातृवाहकाः' ये काष्ठशकलानि समोभयाग्रतया संबध्नन्ति, वास्याकारमुखा वासीमुखाः, 'सिप्पिय'त्ति प्राकृतत्वात् शुक्तयः 'शङ्खाः' प्रतीताः 'शङ्खनकाः' तदाकृतय एवात्यन्तलघवो जीवाः 'वराटकाः' कपर्दकाः 'जलौकसः' दुष्टरक्ताकर्षिण्यः चन्दनका-अक्षाः, शेषास्तु यथासम्प्रदायं वाच्याः, वर्षाणि द्वादशैवत्विति सूत्रनवकार्थः॥ त्रीन्द्रियवक्तव्यतामाह-

मू.(१६००) तेइंदिया य जे जीवा, दुविहा ते पकित्तिया।
पज्जत्तमपज्जत्ता, तेसिं भेए सुणेह मे॥

मू.(१६०१) कुंथुपिवीलिउद्दसा, उक्कलुद्देहिया तहा।
तणहारा कट्ठहारा य, मालूगा पत्तहारगा॥

मू.(१६०२) कप्पासिऽट्ठिमिंजा य, तिंदुगा तउसमिंजगा।
सदावरी य गुम्मी य, बोद्धव्वा इंदगाइ य॥

मू.(१६०३) इंदगोवसमाइया, नेगहा एवमायओ।
लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया॥

मू.(१६०४) संतइं पप्पऽणाईया, अपज्जवसियावि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य॥

मू.(१६०५) एगूनवन्नऽहोरत्ता, उक्कोसेन वियाहिया।
तेइंदिय आउठिई, अंतोमुहुत्तं जहन्नयं॥

मू.(१६०६) संखिज्जकालमुक्कोसा, अंतोमुहुत्तं जहन्नयं।
तेइंदियकायठिई, तं कायं तु अमुंचओ॥

मू.(१६०७) अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं।
तेइंदियजीवाणं, अंतरेयं वियाहियं॥

मू.(१६०८) एएसिं वन्नओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो॥

वृ. तेंदिएत्यादि सूत्रनवकम्, एतदपि पूर्ववत्, नवरं त्रीन्द्रियोच्चारणं विशेषः। तथा कुन्थवः अनुद्धरिप्रभृतयः पिपीलिकाः -कीटिकाः गुंमी--शतपदी, एवमन्येऽपि यथासम्प्रदायं वाच्याः, एकोनपञ्चाशदहोरात्राण्यायुः -स्थितिरिति सूत्रनवकार्थः ॥ चतुरिन्द्रियवक्तव्यतामाह-

मू.(१६०९) चउरिंदिया उ जे जीवा, दुविहा ते पकित्तिया।
पज्जत्तमपज्जत्ता, तेसिं भेए सुनेह मे ॥

मू.(१६१०) अंधिया पुत्तिया चेव, मच्छिया मगसा तहा।
भमरे कीडपयंगे य, ढिंकणे कुंकुणे तहा ॥

मू.(१६११) कुक्कडे सिंगिरीडी य, नंदावत्ते य विच्छिए।
डोले भिंगारिडिओ, विरिली अच्छिवेहए ॥

मू.(१६१२) अच्छिरे माहले अच्छि[रोडए], विचित्ते चित्तपत्तए।
ओहिंजलिया जलकारी, य नीया तंबगाइ या ॥

मू.(१६१३) इइ चउरिंदिया एए, नेगहा एवमायओ।
लोगस्स एगदेसंमि, ते सव्वे परिकित्तिया ॥

मू.(१६१४) संतइं पप्पऽणाईया, अपज्जवसियावि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥

मू.(१६१५) छच्चेव य मासाऊ, उक्कोसेण वियाहिया।
चउरिंदिय आउंठई, अंतोमुहुत्तं जहन्नयं ॥

मू.(१६१६) संखिज्जकालमुक्कोसं, अंतोमुहुत्त जहन्नयं।
चउरिंदियकायठिई, तं कायं तु अमुंचओ ॥

मू.(१६१७) अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं।
विजढंमि सए काए, अंतरेयं वियाहियं ॥

मू.(१६१८) एएसिं वन्नओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥

वृ. चउरिंदिएत्यादि सूत्रदशकम्, इदमपि तथैव, चतुरिन्द्रियाभिलाप एव विशेषः। एतद्भेदाश्च केचिदप्रतीता एवान्ये तु तत्तद्देशप्रसिद्धितो विशिष्टसम्प्रदायाच्चाभिधेयाः, तथा षडेव मासानुत्कृष्टेषां स्थितिरिति सूत्रदशकार्थः ॥ पञ्चेन्द्रियवक्तव्यतामाह-

मू.(१६१९) पंचिंदिया उ जे जीवा, चउव्विहा ते वियाहिया।
नेरइय तिरिक्खा य, मनुया देवा य आहिया ॥

वृ. पञ्चेन्द्रियास्तु ये जीवाश्चतुर्विधास्ते व्याख्याताः, तद्यथा-'नेरइय तिरिक्खा य'त्ति नैरयिकास्तिर्यञ्चश्च मनुजा देवाश्च 'आख्याताः' कथितास्तीर्थकरादिभिरिति सूत्रार्थः ॥

तत्र तावन्नैरयिकानाह-

मू.(१६२०) नेरइया सत्तविहा, पुढवीसू सत्तसू भवे।
रयणाभ सक्कराभा, वालुयाभा य आहिया ॥

मू.(१६२१) पंकाभा धूमाभा, तमा तमतमा तहा।

इइ नेरइया एए, सत्तहा परिकित्तिया ॥

मू.(१६२२) लोगस्स एगदेसंमि, ते सव्वे उ वियाहिया।
इतो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥

मू.(१६२३) संतइं पप्पऽणाईया, अपज्जवसियावि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥

मू.(१६२४) सागरोवममेगं तु, उक्कोसेन वियाहिया।
पढमाइ जहन्नेणं, दसवाससहस्सिया ॥

मू.(१६२५) तिन्नेव सागराऊ, उक्कोसेन वियाहिया।
दुच्चाए जहन्नेणं, एगं तू सागरोवमं ॥

मू.(१६२६) दससागरोवमाऊ, उक्कोसेन वियाहिया।
चउत्थीइ जहन्नेणं, सतेव उ सागरोवमा ॥

मू.(१६२७) दससागरोवमाऊ, उक्कोसेण वियाहिया।
पंचमाए जहन्नेणं, दस चेव उ सागरा ॥

मू.(१६२८) सत्तरससागराऊ, उक्कोसेन वियाहिया।
पंचमाए जहन्नेणं, दस चेव उ सागरा ॥

मू.(१६२९) यावीससागराऊ, उक्कोसेन वियाहिया।
छट्ठीइ जहन्नेणं, सत्तरस सागरोवमा ॥

मू.(१६३०) तित्तीससागराऊ, उक्कोसेन वियाहिया।
सत्तमाए जहन्नेणं, बावीसं सागरोवमा ॥

मू.(१६३१) जा चेव उ आउठिई, नेरइयाणं वियाहिया।
सा तेसिं कायठिई, जहन्नुक्कोसिया भवे।

मू.(१६३२) अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं।
विजढंमि सए काए, नेरइयाणं तु अंतरं ॥

मू.(१६३३) एएसिं वन्नओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥

वृ. नेरइएत्यादि चतुर्दश सूत्राणि। नैरयिकाः 'सप्तविधाः' सप्तप्रकाराः, किमिति?, पृथ्वीषु सप्तसु 'भवे'त्ति भवेयुः, ततस्तद्भेदात्तेषां सप्तविधत्वमिति भावः, काः पुनस्ताः सप्त? इत्याह-'रयणाभ'त्ति रत्नानां-वैडूर्यादीनामाभानमाभास्वरूपतः प्रतिभासनमस्यामिति रत्नाभा, इत्थं चैतत्, तत्र रत्नकाण्डस्य भवनपतिभवनानां च विविधरत्नवतां सम्भवात्, एवं सर्वत्र, नवरं शर्करा-श्लक्ष्णपाषाणशकलरूपा तदाभा, 'धूमाभे'ति यद्यपि तत्र धूमासम्भवस्तथाऽपि तदाकारपरिणतानां पुद्गलानां सम्भवात्, तमोरूपत्वाच्च तमः, प्रकृष्टतरतमस्त्वाच्च तमस्तमः, 'इति' इत्यमुना पृथिवीसप्तविधत्वलक्षणेन प्रकारेण नैरयिका एते सप्तधा प्रकीर्त्तिताः।

'लोगस्से'त्यादिसूत्रद्वयं क्षेत्रकालाभिधायि प्राग्वत्। सादिसपर्यवसितत्वं द्विविधस्थित्यभिधानद्वारतो भावयितुमाह-सागरोपममेकं तूत्कृष्टेन व्याख्याता 'प्रथमायां' प्रक्रमान्नरकपृथिव्यां

जघन्येन दश वर्षसहस्राणि यस्यां सा दशवर्षसहस्रिका, प्रस्तावादायुःस्थितिर्नैरयिकाणा-मितीहोत्तरसूत्रेषु च द्रष्टव्यम्।

त्रीण्येन 'सागरे'ति सागरोपमाणि 'तु:' पूरणे उत्कृष्टेन व्याख्याता द्वितीयायां, 'जहन्नेणं'ति उत्तरत्र तुशब्दस्य पुनःशब्दार्थस्य भिन्नक्रमत्वेनेह सम्बन्धाज्जघन्येन पुनरेकं सागरोपमम्।

सप्तैव सागरोपमाणि तूत्कृष्टेन व्याख्याता तृतीयायां, जघन्येन पुनस्त्रीण्येव सागरोपमाणि, दश सागरोपमाणि तूत्कृष्टेन व्याख्याता चतुर्थ्यां, जघन्येयन सप्तैव तु सागरोपमाणि। सप्तदश सागरोपमाणि तूत्कृष्टेन व्याख्याता पञ्चम्यां, जघन्येन दश चैव तु सागरोपमाणि द्वाविंशतिः सागरोपमाणि तूत्कृष्टेन व्याख्याता षष्ठ्यां, जघन्येन सप्तदश सागरोपमाणि। त्रयस्त्रिंशत्सागरोप-माणि तूत्कृष्टेन व्याख्याता सप्तम्यां नरकपृथिव्यां, जघन्येन द्वाविंसतिः सागरोपमाणि॥

आयुःस्थितिरुक्ता, कायस्थितिमाह- 'या चे'ति चशब्दो वक्तव्यतान्तरोपन्यासे 'एवे'ति भिन्नक्रमः 'चः' पुनरर्थः, ततो यैव च पुराऽऽयुःस्थितिर्नैरयिकाणां व्याख्याता 'सि'त्ति एवकारस्य गम्यमानत्वात्सैव तेषां कायस्थितिर्जघन्योत्कृष्टा भवेत्, इत्थं चैतत्, तत उद्वृत्तानां पुनस्तत्रैवानुपपत्तेः, ते हि तत उद्वृत्य कश्चिज्जीवो गर्भजपर्याप्तकसङ्ख्येयवर्षायुष्वेवोपजायन्ते, यत उक्तम्-"नरगाओ उव्वट्टा गब्भे पज्जत्तसंखजीवीसु। नियमेण होइ वासो" इत्यादि। अन्तरविधानाभिधायि सूत्रद्वयं प्राग्वत्, नवरमन्तर्मुहूर्तं जघन्यमन्तरं, यदाऽन्यतरनरकादुद्वृत्य कश्चिज्जीवो गर्भजपर्याप्तकमत्स्यादिपूत्पद्यते, तत्र चातिसंक्लिष्टाध्यवसायोऽन्तर्मुहूर्तमानायुः प्रतिपाल्य मृत्वाऽन्यतमनरक [illegible] इति भावनीयमिति चतुर्दशसूत्रार्थः॥

इत्थं नैरयिकानभिधाय तिरश्च आह-

मू.(१६३४) पंचिंदियतिरिक्खा उ, दुविहा ते वियाहिया।
संमुच्छिमतिरिक्खा उ, गब्भवक्कंतिया तहा॥

मू.(१६३५) दुविहावि ते भवे तिविहा, जलयरा थलयरा तहा।
खहयरा य बोद्धव्वा, तेसिं भेए सुणेह मे॥

मू.(१६३६) मच्छा य कच्छभा य, गाहा य मगरा तहा।
सुंसमारा य बोद्धव्वा, पंचहा जलयराहिया॥

मू.(१६३७) लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया।
इतो कालविभागं तु, तेसिं वुच्छं चउव्विहं॥

मू.(१६३८) संतइं पप्पऽणाईया, अपज्जवसियावि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य॥

मू.(१६३९) इक्का य पुव्वकोडीओ, उक्कोसेन वियाहिया।
आउठिई जलयराणं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६४०) पुव्वकोडीपुहुत्तं तु, उक्कोसेन वियाहिया।
कायठिई जलयराणं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६४१) अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं।
विजढंमि सए काए, जलयराणं तु अंतरं॥

मू.(१६४२) एएसिं वन्नओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो॥

मू.(१६४३) चउप्पया य परिसप्पा, दुविहा थलयरा भवे।
चउप्पया चउविहा उ, ते मे कित्तयओ सुण॥

मू.(१६४४) एगखुरा दुखुरा चेव, गंडीपयसनप्फया।
हयमाइ गोणमाई, गयमाई सीहमाइणो॥

मू.(१६४५) भुओरगपरिसप्पा, परिसप्पा दुविहा भवे।
गोहाई अहिमाईया, इक्किक्का नेगहा भवे॥

मू.(१६४६) लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया।
इतो कालविभागं तु, तेसिं वुच्छं चउव्विहं॥

मू.(१६४७) संतइं पप्पऽणाईया, अपज्जवसियावि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य॥

मू.(१६४८) पलिओवमा उ तिन्नि उ, उक्कोसेन वियहिया।
आउठिई थलयराणं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६४९) पलिओवमा उ तिन्नि उ, उक्कोसेनं वियाहिया।
पुव्वकोडीपुहुत्तं तु, अंतोमुहुत्तं जहन्नयं॥

मू.(१६५०) कायठिई थलयराणं, अंतरं तेसिमं भवे।
कालं अनंतमुक्कोसं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६५१) विजढंमि सए काए, थलयराणं तु अंतरं।
चम्मे उ लोमपक्खी या, तइया समुग्गपक्खिया॥

मू.(१६५२) वियपक्खी य बोद्धव्वा, पक्खिणो य चउव्विहा।
लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया॥

मू.(१६५३) संतइं पप्पऽनाईया, अपज्जवसियावि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य॥

मू.(१६५४) पलिओवमस्स भागो, असंखिज्जइमो भवे।
आउठिई खहयराणं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६५५) असंखभागो पलियस्स, उक्कोसेन उ साहिओ।
पुव्वकोडीपुहुत्तेणं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६५६) कायठिई खहयराणं, अंतरं ते(रेयं)वियाहियं।
कालं अनंतमुक्कोसं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६५७) एएसिं वन्नओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो॥

वृ. पञ्चेन्द्रियेत्यादि सूत्राणि पञ्चविं(चतुर्विंशतिर्व्याख्यातप्रायाण्येव, नवरमाद्यसूत्रद्वयमुद्देशतो भेदाननन्तरग्रन्थसम्बन्धं चाभिदधाति, अत्र संमूर्च्छनं संमूर्च्छा-अतिशयमूढता तया निर्वृत्ताः

संमूर्च्छिमाः, यदिवा सम्मित्युत्पत्तिस्थानपुद्गलैः सहैकीभावेन मूर्च्छन्ति तत्पुद्गलोपचयात्स मुच्छिता भवन्तीत्यौणादिक इम्प्रत्यये संमूर्च्छिमास्ते च ते तिर्यञ्चः संमूर्च्छिमातिर्यञ्चो ये मनःपर्याप्तयभावतः सदा संमूर्च्छिता इवावतिष्ठन्ते, तथा गर्भे व्युत्क्रान्तिर्येषां तेऽमी गर्भव्युत्क्रान्तिकाः। जले चरन्ति गच्छन्ति तैरेवंशीलैरिति जलचराः, एवं स्थलंनिर्जलो भूभागस्तस्मिंश्चरन्तीति स्थलचराः, तथा 'खहयर'त्ति सूत्रत्वात्खम्-आकाशं तस्मिंश्चरन्तीति खचराः।

'यथोद्देशं निर्देश' इति जलचरभेदानाह-'मत्स्याः' मीनाः 'कच्छपाः' कूर्माः गृह्णन्तीति ग्राहाः-जलचरविशेषा मकराः सुंसुमारा अपि तद्विशेषा एव।

'लोएगदेसे'त्यादिसूत्राणि षट् क्षेत्रकालभावाभिधायीनि, तथेह पृथक्त्वं द्विप्रभृत्यानवान्तम्। स्थलचरभेदानाह परि-समन्तात्सर्पन्ति-गच्छन्तीति परिसर्पाः, एकसुखरादयश्च हयादिप्रभृतिभिर्यथाक्रमं योज्यन्ते, तत एकः खुरः-चरणे येषामधोवर्त्यवयविशेषो येषां ते एकखुराः-हयादयः एवं 'द्विखुराः' गवादयो गण्डी-पद्मकर्णिका तद्वद्वृत्ततया पदानि येषां ते गण्डीपादाः-गजादयः 'सणप्फ'त्ति सूत्रत्वात्सह नखैः-नखरात्मकैर्वर्त्तन्त इति सनखानि तथाविधानि पदानि येषां ते सनखपदाः-सिंहादयः। 'भुओरगपरिसप्पा य'त्ति परिसर्पशब्दः प्रत्येकमभिसम्बध्यते, ततो भुजा इव भुजाः-शरीरावयवविशेषास्तैः परिसर्पन्तीति भुजपरिसर्पाः, उरो-वक्षस्तेन परिसर्पन्तीत्युरःपरिसर्पाः, तस्यैव तत्र प्राधान्यात्, गोधादयः अहिः-सर्पस्तदादय इति यथाक्रमं योगः, एते च 'एकैके' इति प्रत्येकम् 'अनेकधा' अनेकभेदाः, गोधेरकनकुलादिभेदतो गोणसहाचपलापादिभेदेतः।

पल्योपमानितुत्रीण्युत्कृष्टेन तु साधिकानि पूर्वकोटीपृथक्त्वेन-उक्तरूपेण, पल्योपमायुषो हि ते न पुनस्तत्रैवोत्पद्यन्ते, ये तु पूर्वकोट्यायुषो भूत्वा तत्रैवोपजायन्ते तेऽपि सप्ताष्ट वा भवग्रहणानि यावत्, पञ्चेन्द्रियनरतिरश्चामधिकनिरन्तरभवान्तरासम्भवात्, उक्तं हि-"सत्तट्ठ भवा उ तिरिमगुण"त्ति, अत एतावत एवाधिकस्य सम्भव इति भावना।

खचरानाह-"चम्मे उ"त्ति प्रक्रमात् 'चर्मपक्षिणः' चर्मचटकाप्रभृतयः, चर्मरूपा एव हि तेषां पक्षा इति, तथा रोमप्रधानाः पक्षा रोमपक्षास्तद्वन्तः रोमपक्षिणः-राजहंसादयः 'समुद्गपक्षिणः' समुद्गकाकारपक्षवन्तः, ते च मानुषोत्तराद्बहिर्द्वीपवर्त्तिनः, 'विततपक्षिणः' ये सर्वदा विस्तारिताभ्यामेव पक्षाभ्यामासते। इह च यत्क्षेत्रस्थित्यन्तरादि प्रत्येकं प्रोक्तनेन सदृशमपि पुनः पुनरुच्यते न पुनरुक्तिदिश्यते तत्प्रपञ्चितज्ञविनेयानुग्रहार्थमेवंविधा अपि प्रज्ञापनीया एवेति ख्यापनार्थं चेत्यदुष्टमेवेति भावनीयमिति पञ्चविं(चतुर्वि)शतिसूत्रार्थः॥

इत्थं तिरश्चोऽभिधाय मनुजानभिधातुमाह-

मू.(१६५८) *मनुया, दुविहभेया उ, ते मे कित्तयओ सुन।*
संमुच्छिमाइ मनुया, गब्भवक्कंतिया तहा॥

मू.(१६५९) *गब्भवक्कंतिया जे उ, तिविहा ते वियाहिया।*
अकम्मकम्मभूमा य, अंतरद्दीवगा तहा॥

मू.(१६६०) *पनरस तीसइविहा, भेआ अट्ठवीसई।*
संखा उ कमसो तेसिं, इह एसा वियाहिया॥

मू.(१६६१) समुच्छिमाण एसेव, भेओ होइ आहिओ।
लोगस्स एगदेसंमि, ते सव्वेवि वियाहिया॥

मू.(१६६२) संतइं पप्पऽणाईया, अपज्जवसियावि य।
ठिइं पडुच्च साईया, सपज्जवसियावि य॥

मू.(१६६३) पलिओवमाइं तिन्नि य, उक्कोसेन वियाहिया।
आउठिई मनुयाणं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६६४) पलिओवमाइ तिन्नि उ, उक्कोसेन वियाहिया।
पुव्वकोडिपुहुत्तेणं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६६५) कायठिई मनुयाणं, अंतरं तेसिमं भवे।
अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं॥

मू.(१६६६) एएसिं वन्नओ चेव, गंधओ रसफासओ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो॥

वृ. मनुएत्यादि सूत्रनवकं प्राग्वत्, नवरम् 'अकम्मकम्मभूमा य'त्ति भूमेत्यस्य प्रत्येकमभिसम्बन्धात्सूत्रत्वाच्चाकर्मभूमौ भवा अकर्मभूमा एवं कर्मभूमकाश्च, अन्तरम् इह लवणसमुद्रमध्यं तस्मिन् द्वीपा अन्तरद्वीपास्तेषु जाता अन्तरद्वीपजाः। 'पनरसतीसइविह'त्ति विधशब्दस्य प्रत्येकमभिसम्बन्धात्पञ्चदशविधाः कर्मभूमाः, कर्मभूमीनां पञ्चदशसङ्ख्यत्वात्, तद्भेदे चामीषामिह भेदस्याभिधित्सितत्वात्, पञ्चदशसङ्ख्यात्वं च भरतैरावतविदेहानां त्रयाणां प्रत्येकं पञ्चसंख्यत्वात्, त्रिंशद्विधा अकर्मभूमाः, अत्राप्यकर्मभूमीनामेतावत्सङ्ख्यत्वं हेतुः, ता हि हैमवतहरिवर्षरम्यकहैरण्यवतदेवकुरूत्तरकुरुरूपाः षट् प्रत्येकं पञ्चसङ्ख्यत्वेन त्रिंशद्भवन्ति, इह च क्रमत इत्युक्तावपि पश्चान्निर्दिष्टानामपि कर्मभूमानां मुक्तिसाधकत्वेन प्राधान्यतः प्रथमं भेदाभिधानं, पठन्ति च-'तीसंपन्नरसविहे'ति, तत्र च यथोद्देशं सम्बन्धो, भेदाश्चाष्टाविंशतिरन्तरद्वीपजानामिति विभक्तिपरिणामेन सम्बन्धनीयम्, इत्थं चैतत्तत्सङ्ख्यत्वादन्तरद्वीपानां, ते हि हिमवतः पूर्वापरप्रान्तविदिक्प्रसृतकोटिषु त्रीणि त्रीणि योजनशतान्यवगाह्य तावन्त्येव योजनशतान्यायामविस्ताराभ्यां प्रथमेऽन्तरद्वीपाः, ततोऽप्येकैकयोजनशतवृद्धावगाहनया योजनशतचतुष्टयाद्यायामविस्तरा द्वितीयादयः षट्।

तेषां च पूर्वोत्तरादिक्रमात्प्रादक्षिण्यतः प्रथमस्य चतुष्कस्य एकोरुक १ आभाषिको २ लाङ्गूलिको ३ वैषाणिक ४ इति नाम, द्वितीयस्य हयकर्णो १ गजकर्णो २ गोकर्णः ३ शष्कुलीकर्णः ४, तृतीयस्य आदर्शमुखो १ मेषमुखो २ हयमुखो ३ गजमुखः ४, चतुर्थस्याश्वमुखो १ हस्तिमुखः २ सिंहमुखो ३ व्याघ्रमुखः ४, पञ्चमस्याश्वकर्णः १ सिंहकर्णः २ गजकर्णः ३ कर्णप्रावरणः ४, षष्ठस्योल्कामुखो १ विद्युन्मुखो २ जिह्वामुखो ३ मेघमुखः ४, सप्तमस्य घनदन्तो १ गूढदन्तः २ श्रेष्ठदन्तः ३ शुद्धदन्त ४ इति, एतन्नामान एव चैतेषु युगलधार्मिकाः प्रतिवसन्ति, तच्छरीरमानाद्यभिधायि चेदं गाथायुगलम्-

"अंतरदीवेसु नरा धनुसय अट्ठूसिया सया मुइया।
पालंति मिहुनभावं पल्लस्स असंखभागाऊ॥१॥

चउसट्ठी पिट्ठकरंडगाण मनुयाण तेसिमाहारो।
भत्तस्स चउत्थस्स अउनसीइदिनाण पालनया ॥२॥"

एतेऽपि शिखरिणोऽपि पूर्वापरप्रान्तविवक्षप्रसृतकोटिपूक्तन्यायतोऽष्टाविंशतिः सन्ति, पूर्वस्माच्चैषां भेदेनाविवक्षितत्वान्न सूत्रेऽष्टाविंशतिसङ्ख्यविरोध इति भावनीयम्। संमूर्छिमानाम् 'एष एव' इत्यकर्मभूमादिगर्भजानां य उक्तः 'भेदः' नानात्वं भवत्याख्यातः, ते हि तेषामेव वान्तपित्तादिषु संभवन्ति, तथा चागमः-"गब्भवक्कंतियमनुस्साणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणेसु वा वंतेसु वा पित्तेसु वा पूएसु वा सोणिएसु वा सुक्केसु वा सुक्कपुग्गलपरिसाडेसु वा विगयकडेवरेसु वा थीपुरिससंजोएसु वा गामनिद्धमणेसु वा नगरणिद्धमणेसु वा सव्वेसु चेव असुइठाणेसु इत्थ णं संमुच्छिममनुस्सा संमुच्छंति अंगुलस्स असंखेज्जइ भागमेत्ताए ओगाहणाए" इत्यादि, पल्योपमानि त्रीण्यायुःस्थितिरिति युगलधार्मिकापेक्षया।

कायस्थितिश्च पल्योपमानि त्रीणि पूर्वकोटिपृथक्त्वेनाधिकानीति गम्यते, एतच्च तिर्यक्कायस्थित्यभिहिताभिप्रायेण विज्ञेयम्, अन्तरस्य चानन्तकालत्वं साधारणवनस्पतिकायस्थित्यपेक्षयेतिसूत्रनवकार्थः॥ इत्थं मनुष्यानभिधाय देवानाह-

मू. (१६६७) देवा चउव्विहा वुत्ता, ते मे कित्तयओ सुण।
भोमिज्जवानमंतर जोइस वेमाणिया तहा॥

वृ. 'देवाः' उक्तनिरुक्ताः 'चतुर्विधाः' चतुष्प्रकारा उक्तास्तीर्थकरादिभिरिति गम्यते, 'ते' इति तान् दर्शयन् 'मे' मम 'कीर्त्तयतः' प्रतिपादयतः 'शृणु' आकर्णय, शिष्यं प्रतीदमाह, तत्कीर्त्तनं च न भेदाभिधानं विनेति तद्भेदानाह-'भोमिज्ज'त्ति भूमौ-पृथिव्यां भवाः भौमेयकाः-भवनवासिनो, रत्नप्रभापृथिव्यन्तर्भूतत्वात्तद्भवनानाम्, उक्तं हि-"इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं' जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरजोयणसयसहस्से, एत्थ णं भवणवासीणं देवाणं सत्त भवणकोडीओ बावत्तरिं च भवणावाससयसहस्सा हवंतीति मक्खायं" 'वाणमंतर'त्ति आर्षत्वाद् विविधान्यन्तराणि-उत्कर्षापकर्षात्मकविशेषरूपाणि निवासभूतानि वा गिरिकन्दरविवरादीनि येषां ते ऽमी व्यन्तराः, उक्तं हि "ते ह्यधस्तिर्यगूर्ध्वं च त्रीनपि लोकान् स्पृशन्तः स्वातन्त्र्यात्पराभियोगाश्च प्रायेण प्रतिपतन्त्यनियतगतिप्रचारान्मनुष्यानपि क्वचिदभृत्यवदुपचरन्ति, तथा विविधेषु च शैलकन्दरान्तरवनविवरादिषु प्रतिवसन्त्यतो व्यन्तरा इत्युच्यन्ते," 'जोइस'त्ति, द्योतयन्तीति ज्योतींषि-विमानानि तन्निवासित्वाद्देवा अपि ज्योतींषि, ग्रामः समागत इत्यादौ तन्निवासिजनग्रामवत्, विशेषेण मानयन्ति-उपभुञ्जन्ति सुकृतिन एतानीति विमानानि तेषु भवा वैमानिकाः, 'तथे'ति समुच्चये इति सूत्रार्थः॥ एषामेवोत्तरभेदानाह-

मू. (१६६८) दसहा उ भवनवासी, अट्ठहा वनचारिणो।
पंचविहा जोइसिया, दुविहा वेमानिया तहा॥

वृ. 'दशधा त्वि' दशधैव 'भवनवासि'त्ति भवनेषु वस्तुं शीलमेषामिति भवनवासिनः 'अष्टधा' अष्टप्रकारा वनेषु विचित्रोपवनादिपूपलक्षणत्वादन्येषु च विविधास्पदेषु क्रीडैकर-

गतया चरितुं शीलमेषामिति वनचारिणः व्यन्तराः 'पञ्चधा' पञ्चप्रकाराः 'जोइसिय'त्ति ज्योतिष्षु- विमानेषु वा ज्योतिष्का ज्योतींष्येव वा ज्योतिष्काः, द्विविधा वैमानिकास्तथेति सूत्रार्थः ॥ एतानेव च नामग्राहमाह-

मू.(१६६९) *असुरा नागसुवन्ना, विज्जू अग्गी अ आहिया।*
दीवोदही दिसा वाया, थणिया भवनवासिणो॥

मू.(१६७०) *पिसाय भूया जक्खा य रक्खसा किन्नरा य किंपुरिसा।*
महोरगा य गंधव्वा अट्ठविहा वाणमंतरा॥

मू.(१६७१) *चंदा सूरा य नक्खत्ता, गहा तारागणा तहा।*
दिसाविचारिणो चेव, पंचहा जोइसालया॥

मू.(१६७२) *वेमानिया उ जे देवा, दुविहा ते पकित्तिया।*
कप्पोवगा य बोद्धव्वा, कप्पाईया तहेव य॥

मू.(१६७३) *कप्पोवगा बारसहा, सोहम्मीसानगा तहा।*
सणंकुमारमाहिंदा, बंभलोगा य लंतगा॥

मू.(१६७४) *महासुक्का सहस्सारा, आणया पाणया तहा।*
आरणा अच्चुया चेव, इइ कप्पोवगा सुरा॥

मू.(१६७५) *कप्पाइया उ जे देवा, दुविहा ते वियाहिया।*
गेविज्जगानुत्तरा चेव, गेविज्जा नवविहा तहिं॥

मू.(१६७६) *हिट्ठिमा हिट्ठिमा चेव, हिट्ठिमा मज्झिमा तहा।*
हिट्ठिमा उवरिमा चेव, मज्झिमा हिट्ठिमा तहा॥

मू.(१६७७) *मज्झिमा मज्झिमा चेव, मज्झिमा उवरिमा तहा।*
उवरिमाहिट्ठिमा चेव, उवरिमा मज्झिमा तहा॥

मू.(१६७८) *उवरिमा उवरिमा चेव, इइ गोविज्जगा सुरा।*
विजया वेजयंता य, जयंता अपराजिया॥

मू.(१६७९) *सव्वट्ठसिद्धगा चेव, पंचहानुत्तरा सुरा।*
इइ वेमानिया एए, नेहगा एवमायओ॥

वृ. असुरेत्यादिसूत्राण्येकादश प्रायः प्रतीतान्येव, नवरम् 'असुराः' इत्यसुरकुमाराः, एवं नागादिष्वपि कुमारशब्दः सम्बन्धनीयः, सर्वेऽपि ह्यमी कुमाराकारधारिण एव, यथोक्तं- "कुमारवदेव कान्तदर्शनाः सुकुमाराः मृदुमधुरललितगतयः शृङ्गाराभिजातरूपविक्रियाः कुमारवच्चोद्धतरूपवेषभाषाभरणप्रहरणावरणयानवाहनाः कुमारवच्चोल्बणरागाः क्रीडनपराश्चेत्यतः कुमारा इत्युच्यन्ते"।

'तारागणाः' इति प्रकीर्णकतारकसमूहाः, दिशासु विशेषणमेरुप्रादक्षिण्यनित्यचारितालक्षणेन चरन्ति-परिभ्रमन्तीत्येवंशीला दिशाविचारिणः, तद्विमानानि ह्येकादशभिरेकविंशैर्योजनशतैर्मेरोश्चतसृष्वपि दिक्ष्वबाधया सततमेव प्रदक्षिणं चरन्तीति तेऽप्येवमुक्ताः, ज्योतींषि- उक्तन्यायतो विमानान्यालया-आश्रया येषां ते ज्योतिरालयाः।

कल्प्यन्ते इन्द्रसामानिकत्रायस्त्रिंशादिदशप्रकारत्वेन देवा एतेष्विति कल्पा - देवलोकास्तानुपगच्छन्ति - उत्पत्तिविषयतया प्राप्नुवन्तीति कल्पोपगाः, कल्पान् - उक्तरूपानतीताः तदुपरिवर्तिस्थानोत्पन्नतया निष्क्रान्ताः कल्पातीताः । 'सोहम्मीसाणग'त्ति सुधर्मा नाम शक्रस्य सभा-(सा) ऽस्मिन्नस्तीति सौधर्मः कल्पः स एषामवस्थितिविषयोऽस्तीति सौधर्मिणः, तथेशानो नाम द्वितीयदेवलोकस्तन्निवासिनो देवा अपि ईशानास्त एवेशानकाः एवमुत्तरत्रापि व्युत्पत्तिः कार्या: ।

ग्रीवेव ग्रीवा लोकपुरुषस्य त्रयोदशरज्जूपरिवर्त्ती प्रदेशस्तस्मिन्निविष्टतयाऽतिभ्राजिष्णुतया च तदाभरणभूता ग्रैवेया-देवावासास्तन्निवासिनो देवा अपि ग्रैवेयाः, न विद्यन्ते उत्तराः - प्रधानाः स्थितिप्रभावसुखद्युतिलेश्यादिभिरेभ्योऽन्ये देवा इत्यनुत्तराः, 'हेट्ठिम'त्ति अधस्तना उपरितनपङ्क्त्यपेक्षया प्रथमत्रिकस्थयस्तेष्वपि 'हेट्ठिम'त्ति अधस्तनाः अधस्तनाधस्तनाः-प्रथमत्रिकाधोवर्त्तिनः, 'हेट्ठिमा मज्झिमा तह'त्ति 'अधस्तनमध्यमाः' प्रथमत्रिकमध्यवर्त्तिनः, 'हिट्ठिमा उवरिमा चेव'त्ति 'अधस्तनोपरितनाः' प्रथमत्रिकोपरिवर्त्तिनः, मध्ये भवा मध्यमा-मध्यमत्रिकवर्त्तिनस्तेष्वप्यधस्तना मध्यमाधस्तनाः, एवं मध्यममध्यमामध्यमोपरितनाः, उपरितनाउपरिवर्त्तिनस्तेष्वप्यधस्तना उपरितनाधस्तनाः, एवमुपरितनमध्यमाउपरितनोपरितनाः, 'इति' भेदसमाप्तौ, तत एतावद्भेदा एव ग्रैवेयकाः सुराः, अभ्युदयविघ्नहेतून् विजयन्त इति विजयास्तथैव वैजयन्ताः, 'उणादयो बहुल'मिति बहुलवचनात् घञ्प्रत्यये उपसर्गेकारस्यैकारः, एवं जयन्ताः परैः अन्यैरभ्युदयविघ्नहेतुभिरजिता-अनभिभूताः अपराजिताः, सर्वेऽर्थाः सिद्धा इव सिद्धा येषां ते सर्वार्थसिद्धाः, ते हि विजितप्रायकर्माणः, उपस्थितभद्रा एव तत्रोत्पत्तिभाजः, इतीत्यादि निगमनम्,

अत्र च वैमानिका इति वैमानिकभेदाः, सामान्यविशेषयोः कथञ्चिदनन्यत्वाद्, एवमादय इत्यादिशब्दस्य प्रकारवचनत्वादेवंप्रकारा इत्येकादशसूत्रार्थः ॥

मू.(१६८०) *लोगस्स एगदेसंमि, ते सव्वे परिकित्तया ।*
इत्तो कालविभागं तु, तेसिं वुच्छ चउव्विहं ॥

मू.(१६८१) *संतइं पप्पऽणाईया, अपज्जवसियावि य ।*
ठिइं पडुच्च साईया, सपज्जवसियावि य ॥

मू.(१६८२) *साहीयं सागरं इक्कं, उक्कोसेन ठिई भवे ।*
भोमिज्जाण जहन्नेणं, दसवाससहस्सिया ॥

मू.(१६८३) *पलिओवममेगं तु, उक्कोसेन वियाहियं ।*
वंतराणं जहन्नेणं, दसवाससहस्सिया ॥

मू.(१६८४) *पलिओवममेगं तु, वासलक्खेण साहियं ।*
पलिओवमट्ठभागो, जोइसेसु जहन्निया ॥

मू.(१६८५) *दो चेव सागराइं, उक्कोसेनं वियाहिया ।*
सोहम्मंमि जहन्नेणं, एगं च पलिओवमं ॥

मू.(१६८६) *सागरा साहिया दुन्नि, उक्कोसेन वियाहिया ।*
ईसानंमि जहन्नेणं, साहियं पलिओवमं ॥

मू.(१६८७) सागराणि य सत्तेव, उक्कोसेन ठिई भवे।
सणंकुमारे जहन्नेणं, दुन्नि ऊ सागरोवमा॥

मू.(१६८८) सागरा साहिया सत्त, उक्कोसेन वियाहिया।
माहिंदंमि जहन्नेणं, साहिया दुन्नि सागरा॥

मू.(१६८९) दस चेव सागराइं, उक्कोसेन वियाहिया।
बंभलोए जहन्नेणं सत्त उ सागरोवमा॥

मू.(१६९०) चउद्दस उ सागराइं, उक्कोसेन वियाहिया।
लंतगंमि जहन्नेणं, दस उ सागरोवमा॥

मू.(१६९१) सत्तरस सागराइं, उक्कोसेन वियाहिया।
महासुक्के जहन्नेणं, चउद्दस सागरोवमा॥

मू.(१६९२) अट्ठारससागराइं, उक्कोसेन वियाहिया।
सहस्सारे जहन्नेणं, सत्तरससागरोवमा॥

मू.(१६९३) सागरा अउणवीसं तु, उक्कोसेन ठिई भवे।
आनयंमि जहन्नेणं, अट्ठारस सागरोवमा॥

मू.(१६९४) वीसं तु सागराइं तु, उक्कोसेन ठिई भवे।
पाणयंमि जहन्नेणं, सागरा अउणवीसई॥

मू.(१६९५) सागरा इक्कवीसं तु, उक्कोसेन ठिई भवे।
आरणंमि जहन्नेणं, वीसइं सागरोवमा॥

मू.(१६९६) बावीससागराइं, उक्कोसेन ठिई भवे।
अच्चुयंमि जहन्नेणं, सागरा इक्कवीसई॥

मू.(१६९७) तेवीससागराइं, उक्कोसेन ठिई भवे।
पढमंमि जहन्नेणं, बावीसं सागरोवमा॥

मू.(१६९८) चउवीससागराइं, उक्कोसेन ठिई भवे।
बिइयंमि जहन्नेणं, तेवीसं सागरोवमा॥

मू.(१६९९) पणवीससागरा ऊ, उक्कोसेन ठिई भवे।
तइयंमि जहन्नेणं, चउवीसं सागरोवमा॥

मू.(१७००) छव्वीससागराइं, उक्कोसेन ठिई भवे।
चउत्थयंमि जहन्नेण, सागरा पणवीसई॥

मू.(१७०१) सागरा सत्तवीसं तु, उक्कोसेन ठिई भवे।
पंचमंमि जहन्नेणं, सागरा उ छवीसई॥

मू.(१७०२) सागरा अट्ठवीसं तु, उक्कोसेन ठिई भवे।
छट्ठंमि जहन्नेणं, सागरा सत्तवीसई॥

मू.(१७०३) सागरा अउनतीसं तु, उक्कोसेन ठिई भवे।
सत्तमं जहन्नेणं, सागरा अट्ठवीसई॥

मू. (१७०४) तीसं तु सागराइं, उक्कोसेन ठिई भवे ।
अदुमंमि जहन्नेणं, सागरा अउणतीसई ॥

मू. (१७०५) सागरा इक्कतीसं तु, उक्कोसेन ठिई भवे ।
नवमंमि जहन्नेणं, तीसई सागरोवमा ॥

मू. (१७०६) तित्तीससागरा उ, उक्कोसेन ठिई भवे ।
चउसुंपि विजयाईसुं, जहन्ना इक्कतीसई ॥

मू. (१७०७) अजहन्नमनुक्कोसं, तित्तीसं सागरोवमा ।
महाविमानसव्वट्ठे, ठिई एसा वियाहिया ॥

मू. (१७०८) जा चेव उ आउठिई, देवाणं तु वियाहिया ।
सा तेसिं कायठिई, जहन्नमुक्कोसिया भवे ॥

वृ. क्षेत्रकालाभिधायि सूत्रद्वयं प्राग्वत्, सादिसपर्यवसितत्वभावनार्थं साहीयमित्यादि सप्तविंशतिः सूत्राणि प्रायो निगदसिद्धान्येव, नवरं 'साहीय'त्ति प्राकृतत्वात्साधिकं 'सागर'मिति सागरोपममेकमुत्कृष्टेन स्थितिर्भवेद् 'भौमेयकानां' भवनवासिनाम्, इयं च सामान्योक्ता-वप्युत्तरनिकायाधिपस्य बलेरेवावगन्तव्या, दक्षिणनिकाये त्विन्द्रस्यापि सागरोपममेव, उक्तं हि-''चमरबलिं सारंमहियं''. 'सेसाणं'ति, जघन्येन दशवर्षसहस्राणि प्रमाणमस्या दशवर्ष सहस्रिका, इयमपि सामान्योक्तावपि किल्बिषिकाणामेव स्थितिः, स्थितिप्रभावादीनां देवेषु सहैव ह्रासादिति, उत्तरत्रापि भावनीयम्।

तथा पल्योपमं वर्षलक्षाधिकमिति ज्योतिषामुत्कृष्टस्थित्यभिधानं चन्द्रोपेक्षं, सूर्यस्य तु वर्षसहस्राधिकं पल्योपममायुः, ग्रहाणां तदेव अ(न)तिरिक्तं, नक्षत्राणां तस्यैवार्द्धं, तारकाणां तच्चतुर्भागः तथा पल्योपमाष्टभागो ज्योतिष्षु जघन्यस्थितिरित्यपि तारकापेक्षमेव, शेषाणां पल्योपमचतुर्भागस्यैव जघन्यस्थितित्वात्, यत उक्तं 'चतुर्भागः शेषाणा'मिति ! इह च सर्वत्रोक्तरूपयोरुत्कृष्टजघन्यस्थित्योरपान्तरालवर्त्तिनी मध्यमां स्थितिरिति द्रष्टव्यम्।

तथा 'प्रथमे' इति प्रक्रमाद् ग्रैवेयकेऽधस्तनाधस्तने, एवं द्वितीयादिष्वपि ग्रैवेयक इति सम्बन्धनीयम्। अविद्यमानं जघन्यमिति-जघन्यत्वमस्यामित्यजघन्या तथा अविद्यमानमुत्कृष्ट-मित्युत्कृष्टत्वमस्यामित्यनुत्कृष्टा जघन्या चासावनुत्कृष्टा चाजघन्यानुत्कृष्टा, मकारोऽलाक्षणिकः, महच्च तदायुःस्थित्याद्यपेक्षया विमानं च महाविमानं तच्च तत्सर्वे-निरवशेषा अर्थ्यमान-त्वादर्थाः-अनुत्तरसुखादयो यस्मिंस्त (त्तथा तच्च त) त्सर्वार्थं च महाविमानसर्वार्थं तस्मिन्, स्थितिरिति सर्वत्रायुःस्थितिरेव, कायस्थितित्वाभिधाने तत्रानन्तरमनुत्पत्तिरेवेत्यभिप्राय इति सप्तविंशतिसूत्रार्थः॥

मू. (१७०९) अनंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए, देवाणं हुज्ज अंतरं ॥

मू. (१७१०) एएसिं वन्नओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वावि, विहाणाइं सहस्ससो ॥

वृ. अन्तरविधानाभिधायि च सूत्रद्वयं पूर्ववद्व्याख्येयम्॥ इत्थं जीवानजीवांश्च सविस्तरमुपदर्श्य

निगमयितुमाह

मू.(१७११) *संसारत्था य सिद्धा य, इइ जीवा वियाहिया।*
रूविणो चेवऽरूवी य, अजीवा दुविहावि य॥

वृ. संसारस्थाश्च सिद्धाश्च 'इति' इत्येवंप्रकारा जीवाः 'व्याख्याताः' विशेषेण सकलभेदाभिव्याप्त्या प्रकथिताः, रूपिणश्चैव 'रूवी य'त्ति अकारप्रश्लेषादरूपिणश्चाजीवा द्विविधा अपि व्याख्याता इति योग इति सूत्रार्थः॥ यदुक्तं 'जीवाजीवविभक्तिं शृणुतैकमनसः' इति तत्र जीवाजीवविभक्तिमभिधाय 'शृणुतैकमनसः' इति वचनात् क्वचि(कश्चि)त् श्रवणश्रद्धानमात्रेणैव कृतार्थतां मन्येतातस्तदाशङ्कापनोदार्थमाह-

मू.(१७१२) *इइ जीवमजीवे य, सुच्चा सद्दहिऊण य।*
सव्वनयाण अनुमए, रमिज्जा संजमे मुनी॥

वृ. 'इति' इत्येवंप्रकारान् 'जीवमजीवेय'त्ति जीवाजीवान् 'एतान्' अनन्तरोक्तान् 'श्रुत्वा' अवधार्य 'श्रद्धाय च' तथेति प्रतिपद्य सर्वे च ते नयाश्च सर्वनयाः-ज्ञानक्रियानयान्तर्गता नैगमादयस्तेषामनुमतः अभिप्रेतस्तस्मिन्, कोऽर्थः? ज्ञानसहितसम्यक्चारित्ररूपे 'रमेत' रतिं कुर्यात्, क्व?-सम्यग्यमन-पृथिव्यादिजीवोपमर्दतस्तृणपञ्चकाद्यजीवोपादानादेश्चोपरमणं संयमस्तस्मिन् 'मुनिः' उक्तरूप इति सूत्रार्थः॥ संयमरतिकरणानन्तरं यद्विधेयं तदाह-

मू.(१७१३) *तओ बहूनि वासाणि, सामन्नमनुपालिया।*
इमेण कमजोगेणं, अप्पाणं संलिहे मुनी॥

वृ. 'ततः' तदनन्तरं 'बहूनि' अनेकानि वर्षाणि 'श्रामण्यं' श्रमणभावम् 'अनुपाल्य' आसेव्य 'अनेन' अनन्तरमेव वक्ष्यमाणेन क्रमः-परिपाटी तेन योगः-तपोऽनुष्ठानरूपो व्यापारः क्रमयोगस्तेनात्मानं 'संलिखेत्' द्रव्यतो भावतश्च कृशीकुर्यान्मुनिः, इह च बहूनि वर्षाणि श्रामण्यमनुपाल्येत्यभिदधता न प्रव्रज्याप्रतिपत्त्यनन्तरमेवैतद्विधिरित्युपदर्शितम्, उक्तं हि-

"परिपालितो य दीहो परियाओ वायणा तहा दिन्ना।
निप्फाइया य सीसा सेयं मे अप्पणो काउं॥"

इति सूत्रार्थः॥ सम्प्रति यदुक्तम्-'अनेन क्रमयोगेन संलिखेदि'ति, तत्र कोऽसौ क्रमयोग? इति प्रश्नसम्भवे संलेखनाभेदाभिधानपूर्वकं तमाह-

मू.(१७१४) *बारसेव उ वासाइं, संलेहुक्कोसिया भवे।*
संवच्छरं मज्झिमिया, छम्मासा य जहन्निया॥

मू.(१७१५) *पढमे वासचउक्कंमि विगई(वित्ति) निज्जूहणं करे।*
बिइए वासचउक्कंमि, विचित्तं तु तवं चरे॥

मू.(१७१६) *अंगंतरमायामं, कट्टु संवच्छरे दुवे।*
तओ संवच्छरऽद्धं तु, नाइविगिट्ठं तवं चरे॥

मू.(१७१७) *तओ संवच्छरद्धं तु, विगिट्ठं तु तवं चरे।*
परिमियं चेव आयामं, तंमि संवच्छरे करे॥

मू.(१७१८) *कोडीसहियमायामं, कट्टु संवच्छरे मुनी।*

मासद्धमासिएणं तु, आहारेणं तवं चरे॥

वृ. बारसेत्यादि सूत्रपञ्चकम् · द्वादशैव न तु न्यूनान्यधिकानि वा 'तु:' पूरणे 'वर्षाणि' संवत्सरान् संलेखनं-द्रव्यत: शरीरस्य भावत: कषायाणां कृशताऽऽपादनं संलेखा, संलेखनेति योऽर्थ:, 'उक्कोसिय'त्ति उत्कृष्टा सर्वगुर्वी भवेत्, 'संवच्छरं'ति संवत्सरं वर्षं मध्यमैव मध्यमिका, षण्मासान् 'च:' पुनर्थे भिन्नक्रमस्ततो जघन्यैव जघन्यिका पुन:, पठन्ति च-'उक्कोसिया' इत्यत्र 'उक्कोसतो'त्ति, अन्यत्र तु 'मज्झिमउत्ति जहन्नतो'त्ति।

इत्थं संलेखनायास्त्रैविध्ये उत्कृष्टाया: क्रमयोगमाह-'प्रथमे' आद्ये 'वर्षचतुष्के' संवत्सर चतुष्टये वर्त्तनं वृत्तिनिर्यूहनमनु (णं तत्) कुर्यात्, पठ्यते च· 'विगईनिज्जूहणं करे'त्ति स्पष्टम् इदं च विचित्रतपस: पारणके, यदाह जिनभद्रगणिक्षमाश्रमणपादा:-

'अन्ने चत्तारि वरिसे विचित्तं तवं काउं आयंबिलेण पारेइ निव्विएण वा पारेइ''त्ति, केवलमनेन निर्युक्तिकृता च द्वितीये वर्षचतुष्टयं एतदुक्तम्, अत्र च सूत्रे प्रथमे दृश्यत इत्युभयथापि करणे दोषाभावमनुमीमहे, तयोरस्य च प्रमाणभूतत्वात्, द्वितीये वर्षचतुष्के 'विचित्रं तु' इति विचित्रमेव चतुर्थषष्ठाष्टमादिरूपं तपश्चरेत्, अत्र च पारणके सम्प्रदाय: -''उग्गमविसुद्धं सव्वं कप्पणिज्जं पारेति''त्ति।

एकेन-चतुर्थलक्षणेन तपसाऽन्तरं-व्यवधानं यस्मिंस्तदेकान्तरम् 'आयामम्' आचाम्लं 'कट्टु'त्ति कृत्वा संवत्सरौ द्वौ, 'तत:' तदनन्तरं 'संवत्सरार्द्धं' मासषट्कं 'तु:' पूरणे 'न' नैव 'अतिविकृष्टम्' अष्टमद्वादशादि तप: 'चरेत्' आसेवेत्।

तत: 'संवत्सरार्द्धं पुन: षण्मासलक्षणं 'विकृष्टम्' उक्तरूपं 'तु:' एवकारार्थो विकृष्टमेव तपश्चरेत्, अत्रैव विशेषमाह-'परिमियं चेव'त्ति, 'च:' पूरणे तत: परिमितमेव, द्वादशे हि वर्षे कोटीसहितमायामम्, इह तु चतुर्थादिपारणक एवेत्येवमुक्तम्, आयामं-आचाम्लं तस्मिन्ननन्तरं द्विधा विभज्योपदर्शिते संवत्सरे कुर्यात्, पठन्ति च-

''परिमियं चेव आयामं, गुणुक्कस्सं मुनीचरे।
तत्तो संवच्छरद्धऽन्नं, विगिट्ठं तु तवं चरे॥''

इत्थमेकादशसु वर्षेष्वतिक्रान्तेषु द्वादशे वर्षे किमसौ विदध्यात्? इत्याह कौट्यौ-अग्रे प्रत्याख्यानाद्यन्तकोणरूपे सहिते-मिलिते यस्मिंस्तत्कोटीसहितं, किमुक्तं भवति?-विवक्षित-दिने प्रातराचाम्लं प्रत्याख्याय तच्चाहोरात्रं प्रतिपाल्यं, पुनर्द्वितीयेऽह्नि आचाम्लमेव प्रत्याचष्टे, ततो द्वितीयस्यारम्भकोटिराद्यस्य तु पर्यन्तकोटिरुभे अपि मिलिते भवत इति तत्कोटीसहित-मुच्यते, अन्ये त्वाहु: · आचाम्लमेकस्मिन् दिने कृत्वा द्वितीयदिने च तपोऽन्तरमनङ्गीकृत्य पुनस्तृतीयदिने आचाम्लमेव कुर्वत: कोटीसहितमुच्यते, उभयार्थसंवादिनी चेयं गाथा-

''पढमवणओ य दिवसो पच्चक्खाणस्स निद्दवणओ य।
जहियं सम्मिति दुन्नि उ तं भन्नइ कोडिसहियं तु॥''

इत्थमुक्तरूपं कोटीसहितमाचामाम्लं कृत्वा 'संवत्सरे' वर्षे प्रक्रमाद् द्वादशे 'मुनि:' साधु: 'मास'त्ति सूत्रत्वान्मासं भूतो मासिकस्तेनैवमार्द्धमासिकेन 'आहारेण'न्ति, उपलक्षणत्वादाहार-

त्यागेन, पाठान्तरतश्च क्षपणेन 'तपः' इति प्रस्तावाद्भक्तपरिज्ञानादिकमनशनं 'चरेत्' अनुतिष्ठेत्, निशीथचूर्णिसम्प्रदायश्चात्र-

"अन्नेवि दोवि वरिसे चउत्थं काउं आयंबिलेण पारेइ, एक्कारसमे य वरिसे पढमं छम्मासं अविगिट्ठं तवं काउं कंजिएण पारेइ, बितिए छम्मासे विगिट्ठं तवं काउं आयंबिलेन पारेइ, दुवालसमं वरिसं निरंतरं हीयमाणं उसिणोदएण आयंबिलं करेति, तं कोडीसहियं भणंति जेणायंबिलस्स कोडी कोडीए मिलइ, जहा य दीवस्स वत्ती तेल्लं च समं निट्ठाइ तहा बारसमे वरिसे आहारं परिहावेइ जहा आहारसंलेखना आउयं च समं निट्ठवति, इत्थं बारसगस्स वासस्स पच्छिमा जे चत्तारि मासा तेसु तेल्लगंडूसे निसट्ठे धरित्तु खेल्लमल्लगे निट्ठुहइ मा अतिरुक्खत्तणओ मुहजंतविसंवाओ भविस्सइ, तस्स य विसंवादे नो संमं नमोक्कारं सोहेति" इति सूत्रपञ्चकार्थः।

इत्थं प्रतिपन्नानशनस्याप्यशुभभावनानां मिथ्यादर्शनानुरागादीनां च परिहार्यतां तद्विपर्ययाणामासेव्यतां च ज्ञापयितुं यथाक्रममनर्थहेतुतामर्थहेतुतां च दर्शयन्नाह-

मू.(१७१९) *कंदप्पमाभिओगं किब्बिसियं मोहमासुरत्तं च।*
एयाओ दुग्गईओ मरणंमि विराहया होंति॥

मू.(१७२०) *मिच्छादंसणरत्ता, सनियाणा हु हिंसगा।*
इय जे मरंति जीवा, तेसिं पुन दुल्लहा बोही॥

मू.(१७२१) *सम्मद्दंसणरत्ता अनियाणा सुक्कलेसमोगाढा।*
इय जे मरंति जीवा सुलभा तेसिं भवे बोही॥

मू.(१७२२) *मिच्छादंसणरत्ता सनियाणा कण्हलेसमोगाढा।*
इय जे मरंति जीवा तेसिं पुण दुल्लहा बोही॥

वृ. 'कंदप्प'त्ति कन्दर्पभावना प्राग्वत्, पदेऽपि पदैकदेशस्य दर्शनात्, एवमभियोग्यभावना किल्बिषभावना मोहभावना 'आसुरत्तं च'त्ति आसुरत्वभावना च, एताः कन्दर्पादिभावना दुर्गतिहेतुततया दुर्गतयो 'नड्वलोदकं पादरोग' इति न्यायात्, दुर्गतिश्चेहार्थादेवदुर्गतिः, तद्वशतो हि संव्यवहारतश्चारित्रसत्तायामप्येतद्विधनिकायोत्पत्तिरेव, चरणविकलतायां तु नानागतिभा-जनतैव,

"जो संजओवि एयासु अप्पसत्थासु भावनं कुणइ।
सो तव्विहेसु गच्छति सुरेसु भइओ चरणहीनो॥"

"कदा? इत्याह-'मरणे' मरणसमये, कीदृश्यः सत्यः? इत्याह-विराधिकाः सम्यग्दर्शनादीनामिति गम्यते 'भवन्ति' जायन्ते, इह च मरण इत्यभिधानं पूर्वमेतत्सत्तायामप्युत्तरकालं शुभभावे सुगतेरपि सम्भवात्।

मिथ्यादर्शनम्-अतत्त्वे तत्त्वाभिनिवेशरूपं तस्मिन् रक्ताः-आसक्ता मिथ्यादर्शनरक्ताः, सम्यक्त्वादिविराधनायां ह्येतदासक्तिरेव भवति, सह निदानेन-साभिष्वङ्गप्रार्थनारूपेण वर्त्तन्त इति सनिदानाः 'हुः' पूरणे 'हिंसकाः' प्राण्युपमर्दकारिणः 'इति' इत्येवंरूपा ये 'म्रियन्ते' प्राणांस्त्यजन्ति जीवास्तेषां पुनर्दुर्लभा 'बोधिः' प्रेत्य जिनधर्मावाप्तिः।

सम्यग्दर्शनम्-उक्तस्वरूपं तस्मिन् रक्ताः सम्यग्दर्शनरक्ताः अनिदानाः 'शुक्ललेश्याम्' उक्तलक्षणाम् 'अवगाढाः' प्रविष्टा इति, ये म्रियन्ते जीवाः सुलभा तेषां भवेद्बोधिः।

मिच्छासूत्रं प्राग्वत्, ननु पुनरुक्तत्वादनर्थकमिदं सूत्रं, कृष्णलेश्यावगाहनमपि हिंसकत्वेन पञ्चाश्रवप्रमत्तत्वादिलक्षणाभिधानादर्थत उक्तमेवेति, अत्रोच्यते, नैवं, विशेषज्ञापनार्थत्वादस्य,

"पुव्वभणियं तु पुच्छा जं भण्णति तस्स कारणं बेंति ।
पडिसेहो य अनुन्ना कारण (हेउ) विरोसोवलंभा वा ॥"

विशेषश्च सर्वत्र तथाविधसंक्लिष्टपरिणामरूपता द्रष्टव्या, अन्यथा हि सामान्येनैतद्विशेषण-विशिष्टानामपि तद्भवे भवान्तरे वा बोधिदर्शनाद्यभिचार्येवेदं भवेदिति । इह चाद्येन सूत्रेण कन्दर्पभावनादीनां दुर्गतिरूपानर्थस्य निबन्धनत्वमुक्तमर्थाच्च तद्विपरीतभावनानां सुगति स्वरूपार्थस्य द्वितीयेन मिथ्यादर्शनरक्तत्वादीनां दुर्लभबोधिलक्षणानर्थस्य तृतीयेन सम्यग्दर्शनरक्तत्वादीनां सुलभबोध्यात्मकार्थस्य चतुर्थेन उक्तनीत्या मिथ्यादर्शनरक्तत्वादीनामेव विशेषज्ञापनमिति सूत्रचतुष्टयार्थः ॥

अन्यच्च - जिनवचनाराधनामूलमेव सकलं संलेखनादि श्रेयोऽतस्तत्रैवाऽऽदरख्यापनायान्वयव्यतिरेकाभ्यां तन्माहात्म्यमाह-

मू. (१७२३) जिनवयणे अनुरत्ता जिनवयणं जे करेंति भावेणं ।
अमला असंकिलिट्ठा ते होंति परित्तसंसारा ॥

मू. (१७२४) बालमरणाणि बहुसो अकाममरणाणि चेव बहुयाणि ।
मरिहंति ते वराया जिनवयणं जे न याणंति ॥

वृ. जिना इह्यार्हत्तीर्थकृतस्तेषामुच्यत इति वचनम्-आगमो जिनवचनं तस्मिन् 'अनुरक्ताः' सततं प्रतिबद्धाः, तथा 'जिनवचनम्' इति वाच्यवाचकयोरभेदोपचाराज्जिनवचनाभिहितमनुष्ठानं ये 'कुर्वन्ति' अनुतिष्ठन्ति 'भावेन' आन्तरपरिणामेन न तु बहिर्वृत्त्यैव तत एवाविद्यमानो मल इति भावमलस्तदनुष्ठानमालिन्यहेतुर्मिथ्यात्वादिरेषामित्यमलाः, तथा 'असंक्लिष्टाः' रागादिसङ्क्लेशरहितास्ते 'भवन्ति' जायन्ते परितः--समस्तदेवादिभवाल्पतापादनेन समन्तात्खण्डितः परिमित इतियावत् स चासौ संसारश्च स विद्यते येषां तेऽमी परीतसंसारिणः--कतिपयभवाभ्यन्तरमुक्तिभाज इति योऽर्थः, सूत्रे च प्राकृतत्वाद्वचनव्यत्ययः ।

'बालमरणैः' विषभक्षणोद्बन्धननिबन्धनैः 'बहुशः' अनेकशो 'अकाममरणानि' यान्यत्यन्तविषयगृध्नुत्वेनानिच्छतां भवन्ति तैश्च, उभयत्र सुब्व्यत्ययः प्राग्वत्, 'एव चे'ति पूरणे 'बहूनि' अनेकानि मरिष्यन्ते ते 'वराकाः' बहुदुःखभाजनतयाऽनुकम्पनीयाः 'जिनवचनम्' उक्तरूपं ये 'न जानन्ति' नावबुध्यन्ते ज्ञानफलत्वादनुष्ठानस्य न चानुतिष्ठन्तीति सूत्रद्वयार्थः ॥

यतश्चैवमतो जिनवचनं भावतः कर्त्तव्यं, तद्भावकरणं चालोचनया, सा च न तच्छ्रवणार्हान् विना, ते च न हेतुव्यतिरेकेणेति यैर्हेतुभिरमी भवन्ति तानाह-

मू. (१७२५) बहु आगमविन्नाणा समाहिउप्पायगा य गुणगाही ।
एएण कारणेणं अरिहा आलोयणं सोउं ॥

वृ. बहुः अङ्गोपाङ्गादिबहुभेदतया बह्वर्थतया वा स चासावागमश्च-श्रुतं बह्वागमस्तस्मिन् विशिष्टज्ञानम्-अवगम एषामिति बह्वागमविज्ञानाः 'समाहि'त्ति समाधेः -उक्तरूपस्योत्पादका जनकाः, किमुक्तं भवति ?- देशकालाशयादिविज्ञतया समाधिमेव मधुरगम्भीरभणितिप्रभृति-

भिरालोचनादातृणामुत्पादयन्ति, चशब्दो भिन्नक्रमस्ततः 'गुणगाहिणश्च'त्ति गुणग्राहिणश्च उपबृंहणार्थं परेषां सम्यग्दर्शनादिगुणग्रहणशीलाः 'एएण कारणेण'त्ति 'एतैः' अनन्तरमेव विशेषणतयोपात्तैर्बहागमविज्ञानत्वादिभिः 'कारणैः' हेतुभिः 'अहाः' योग्या भवन्त्याचार्यादय इति गम्यते 'आलोचनां' विकटनामर्थात्परैर्दीयमानां 'श्रोतुम्' आकर्णयितुम्, एते ह्यालोचनाश्रवणफलं परेषां विशुद्धिलक्षणं सम्पादयितुमीशते, व्यत्ययश्च सर्वत्र प्राग्वदिति सूत्रार्थः ॥

इत्थमनशनस्थितेन यत्कृत्यं तत्सप्रसङ्गमुपदर्श्य सम्प्रति कन्दर्पादिभावनानां यत्परिहार्यत्वमुक्तं तत्र यत्कुर्वता ता भवन्ति तत्परिहारेणैव तासां परिहारो न चाज्ञातस्यायमिति ज्ञापनार्थमाह-

मू.(१७२६) *कंदप्पकोक्कुईया तह सीलसहावहासविगहाहिं।*
विम्हावितो य परं कंदप्पं भावनं करइ॥

मू.(१७२७) *मंताजोगं काउं भूईकम्मं च जे पउंजंति।*
सायरसइड्ढिहेउं अभिओगं भावनं कुणइ॥

मू.(१७२८) *नाणस्स केवलीणं धम्मायरियस्स संघसाहूणं।*
माई अवन्नवाई किब्बिसियं भावनं कुणइ॥

मू.(१७२९) *अनुबद्धरोसपसरो तह य निमित्तंमि होइ पडिसेवी।*
एएहिं कारणेहिं आसुरियं भावनं कुणइ॥

मू.(१७३०) *सत्थग्गहणं विसभक्खणं च जलणं च जलपवेसो य।*
अनयारभंडसेवो जम्मणमरणाणि बंधंति॥

वृ.'कंदप्पकोक्कुईया' इति, कन्दर्पः - अट्टट्टहासहसनम् अनुभूतालापाश्च गुर्वादिनाऽपि सह निष्ठुरवक्रोक्त्यादिरूपाः कामकथोपदेशप्रशंसाश्च कन्दर्पो, यत उक्तम्

"कहकहकहस्स हसणं कंदप्पो अनिहुया य संलावा।
कंदप्पकहाकहणं कंदप्पुवएससंसा य॥"

कौक्कुच्यद्विधा - कायकौक्कुच्यं वाक्कौक्कुच्यं च, तत्र कायकौक्कुच्यं यत्स्वयमहसन्नेव भ्रूनयनवदनादि तथा करोति यथाऽन्यो हसति, उक्तञ्च-

"भुमनयनदसनच्छएहिं करचरणकन्नमाईहिं।
तं तं करेइ तह तह हसइ परो अत्तणा अहसं॥"

यत्तु तज्जल्पति येनान्यो हसति तथा नानाविधजीवविरुतानि मुखातोद्यवादितां च विधत्ते तद्वाक्कौक्कुच्यम्, उक्तं हि-

"वायाए कुक्कुइओ तं जंपइ जेन हस्सए अन्नो।
नाणाविहजीवरुए कुव्वइ मुहतूरए चेव॥"

ततः कन्दर्पश्च कौक्कुच्यं च कन्दर्पकौक्कुच्ये कुर्वन्निति शेषः 'तह'त्ति येन प्रकारेण परस्य विस्मय उपजायते तथा यच्छीलं च-फलनिरपेक्षा वृत्तिः स्वभावश्च-परविस्मयोत्पादनाभिसन्धिनैव तत्तन्मुखविकारादिकं हसनं च अट्टट्टहासादि विकथाश्च-परविस्मापकविविधोल्लापरूपाः शीलस्वभावहसनविकथास्ताभिः 'विस्मापयन्' सविस्मयं कुर्वन् 'परम्' अन्यं 'कंदप्पं'ति कन्दर्पयोगात्कन्दर्पास्ते च प्रस्तावादेवास्तेषामियमुक्तानीत्या तेषूत्पत्तिनिमित्ततया

कान्दर्पीं तां भाव्यते आत्मसात्क्रीयतेऽनयाऽऽत्मेति भावना तद्भावाभ्यासरूपा तां 'करोति' विधत्ते, एतदनुसारेणोत्तरत्रापि भावनीयम्।

मन्त्राः-प्रागुक्तरूपास्तेषामाभियोगो-व्यापारण मन्त्रायोगस्तं 'कृत्वा' विधाय, यदिवा 'मंता योगं'ति सूत्रत्वान्मन्त्राश्च योगाश्च- तथाविधद्रव्यसम्बन्धा मन्त्रयोगं तत् 'कृत्वा' व्यापारं 'भूत्या' भस्मनोपलक्षणत्वान्मृदा सूत्रेण वा कर्म-रक्षार्थं वसत्याटेः परिवेष्टनं भूतिकर्म, यथोक्तम् "भूईए मट्टियाए व सुत्तेण व होइ भूइकम्मं तु।

वसहीसरीरभंडगरक्ख"त्ति, चशब्दात्कौतुकादि च 'जे पउंजंति' प्राकृतत्वाद्यः प्रयुङ्क्ते, किमर्थं ?, सातं-सुखं रसा-माधुर्यादयः ऋद्धिः-उपकरणादिसम्पदेता हेतवो-निमित्तानि यस्मिंस्तत्सातरसर्द्धिहेतुः, कोऽभिप्रायः ?-सातार्थम्, 'अभियोगं'ति आभियोगीं भावनां करोति, इह च सातरसर्द्धिहेतोरित्यभिधानं निः स्पृहस्यापवादत एतत्प्रयोगे प्रत्युत गुण इति ख्यापनार्थम्, उक्तं हि-

"एयाणि गारवट्ठा कुणमानो आभियोगियं बंधे।
बीयं गारवरहिओ कुव्वइ आराहगो चेव॥"

"ज्ञानस्य" श्रुतज्ञानादेः 'केवलिनां' केवलज्ञानवतां धर्मोपदेष्टा च-आचार्यस्तस्य च सङ्घ प्रतीतः साधवश्च सङ्घसाधवस्तेषामवर्णवादीति सम्बन्धः, तथाऽवर्णः-अश्लाघात्मकः, स चायं श्रुतज्ञानस्य-पुनः पुनस्त एव कायास्तान्येव व्रतानि तावेव च प्रमादाप्रमादाविहाभिधेयौ, मोक्षाकांक्षिणां च किं ज्योतिर्योनिपरिज्ञानेनेत्यादि भाषते, उक्तश्च-

"काया वया य ते च्चिय ते चेव पमाय अप्पमाया य।
मोक्खाहिगारियाणं जोइसजोणीहिं किं च पुणो ?॥"

केवलिनां च किमेषां ज्ञानदर्शनोपयोगौ क्रमेण भवत उत युगपत्?, यदि तावत्क्रमेण तदा ज्ञानकाले न दर्शनं दर्शनकाले च न ज्ञानमिति परस्परावरणतैव प्राप्ता, अथ युगपत्तत एककालत्वाद् द्वयोरप्यैक्यापत्तिः, उक्तश्च-

"एगतरसमुप्पाए अत्तो ऽन्नावरणया दुवेण्हंपि।
केवलदंसणणाणाणमेगकाले य एगत्तं॥"

धर्माचार्यस्य जात्यादिभिरधिक्षेपणादि, उक्तश्च-

"जच्चाईहिं अवन्नं विहसइ वट्टइ नयावि उववाए।
अहिओ छिद्दप्पेही पगासवादी अनणुकूलो॥"

सङ्घस्य च-बहवः श्वशृगालादिसङ्घास्तत्को ऽयमिह सङ्घः ?, साधूनां च-नामी परस्परमपि सहन्ते, तत एव देशान्तरयायिनः, अन्यथा त्वेकत्रैव संहत्या तिष्ठेयुरत्वरितगतयो-मन्दगतयस्ततो बकवृत्तिरियमेषामित्यादि, यथोक्तम्-

"अविसहणा ऽतुरियगती अनाणुवित्ती य अवि गुरूणंपि।
खणमित्तपीइरोसा गिहिवच्छलगा य संजयगा॥"त्ति,

एवंविधमवर्णं वदितुम्-अभिधातुं शीलमस्येत्यवर्णवादी, माया-शाठ्यमस्त स्वस्वभाव-विनिगूहनादिनाऽस्तीति मायी, यथोक्तम्-

"गूहइ आयरसहावं मायइ य गुणे परस्स संतेवि।
चोरोव्व सव्वसंकी गूढायारो वितहभासि॥"त्ति

किल्विषिकीभावनां करोति। इदानीं विचित्रत्वात्सूत्रकृतेर्मोहीप्रस्तावेऽपि यत्कुर्वंताऽऽसुरी कृता भवति तदाह-अनुबद्धः-सन्ततः, कोऽर्थः ?-अव्यवच्छिन्नो रोषस्य-क्रोधस्य प्रसरो विस्तारोऽस्येति अनुबद्धरोषप्रसरः, सदा विरोधशीलतया पश्चादननुतापितया क्षमणादावपि प्रसत्त्यप्राप्त्या वेत्यभिप्रायः, तथा चोक्तम्-

"निच्चं वोग्गहसीला काऊण न यानुतप्पए पच्छा।
न य खामिओ पसीयइ अवराहीणं दुवेण्हंपि॥"

'तथे'ति समुच्चये 'चः' पूरणे निमित्तमिह ज्ञेयपरिच्छित्तिकारणं, तच्चातीतादित्रिविध-कालभेदात्त्रिधा, उक्तं हि-

"तिविहं होइ निमित्तं तीयपडुप्पन्नऽनागयं चेव।
तेन विना उ न नेयं नज्जइ तेणं निमित्तं तु॥"

तद्विषये 'भवति' जायते 'प्रतिसेवी' इत्यवश्यंप्रतिसेवकोऽपुष्टालम्बनेऽपि तदासेवनात्, 'एताभ्याम्' अनन्तरोक्ताभ्याम् 'आसुरियं'ति आसुरीं भावनां करोति।

शस्येतेऽनेनेति शस्त्रं खड्गक्षुरिकादि तस्य ग्रहणं-स्वीकरणमुपलक्षणत्वादस्यात्मनि वधार्थं व्यापारणं शस्त्रग्रहणं, वेवेष्टि-व्याप्नोति झगित्यात्मानमिति विषं-तालपुटादि तस्य भक्षणम्-अभ्यवहरणं विषभक्षणं, चशब्द उक्तसमुच्चयार्थः पर्यन्ते योक्ष्यते, 'ज्वलनं' दीपनमात्मन इति गम्यते, जले प्रवेशो-निमज्जनं जलप्रवेशः, चशब्दोऽनुक्तभृगुपातादिपरिग्रहार्थः, आचारः-शास्त्रविहितो व्यवहारस्तेन भाण्डम्-उपकरणमाचारभाण्डं न तथाऽनाचारभाण्डं तस्य सेवा-हास्यमोहादिभिः परिभोगोऽनाचारभाण्डसेवा, गम्यमानत्वादेतानि कुर्वन्तो यतयः, किमित्याह-जन्ममरणान्युपचारात्तन्निमित्तकर्माणि 'बध्नन्ति' आत्मना श्लेषयन्ति, संक्लेशजनकत्वेन शस्त्रग्रहणादीनामनन्तभवहेतुत्वात्, अनेन चोन्मार्गप्रतिपत्त्या मार्गविप्रतिपत्तिराक्षिप्ता, तथा चार्थतो मोही भावनोक्ता, यतस्तल्लक्षणम्-

"उम्मग्गदेसओ मग्गनासओ मग्गविप्पडिवत्ती।
मोहेण य मोहित्ता संमोहं भावणं कुणइ॥"त्ति,

ननु पूर्वं तद्विधदेवगामित्वं भावनाफलमुक्तमिह त्वन्यदेवास्या इति न कथं विरोधः ?, उच्यते, अनन्तरफलमाश्रित्य तदुदितमिदं [दमेव चूर्ण्यां दृश्यते, तत्रैव जीवेत्यादि] तु परम्परा-फलं सर्वभावनानामिति भावनार्थमित्थमुपन्यासः, तथा चोक्तम्-

"एयाओ भावनाओ भावित्ता देवदुग्गइं जंति।
तत्तो य चुया संता परिंति भवसागरमनंतं॥"

इति सूत्रपञ्चकार्थः॥ इह च देववक्तव्यताऽनन्तरसूत्रकदम्बस्थाने सूत्रद्वयमेव चूर्ण्यां दृश्यते, तत्रैकं "जीवमजीवे"त्यादि प्राग्वद् व्याख्यातमेव, तथा-

"पसत्थसज्झाणोवगए, कालं किच्चा न संजए।
सिद्धे वा सासए भवति, देवे वावि महड्ढिए॥"त्ति

सम्प्रत्युपसंहारद्वारेण शास्त्रमाहात्म्यं ख्यापयितुमाह

मू.(१७३१) इति पाउकरे बुद्धे, नायए परिनिव्वुए।
छत्तीसं उत्तरज्झाए, भवसिद्धीयसंमए ॥ तिबेमि ॥

वृ. 'इतिः' उपदर्शने 'इति' इत्यनन्यतरमुपवर्णितान् 'पाउकरे'त्ति सूत्रत्वात् 'प्रादुष्कृत्य' काँश्चिदर्थतः काँश्चन सूत्रतोऽपि प्रकाश्य, कोऽर्थः ? प्रज्ञाप्य, किमित्याह-'परिनिर्वृतः' निर्वाणं गत इति सम्बन्धनीयम्, कीदृशः सन् क इत्याह-'बुद्धः' केवलज्ञानादवगतसकलवस्तुतत्त्वः 'ज्ञातको ज्ञातजो वा- ज्ञातकुलसमुद्भवः, स चेह भगवान् वर्द्धमानस्वामी 'षट्त्रिंशद्' इति षट्त्रिंशत्सङ्ख्या उत्तराः - प्रधाना अधीयन्त इत्यध्यायाः- अध्ययनानि तत उत्तराश्च तेऽध्यायाः- श्रोत्तराध्यायास्तान्- विनयश्रुतादीन् 'भवसिद्धियसंमए'त्ति भवसिद्धिका- भव्यास्तेषां समिति- भृशं मता- अभिप्रेता भवसिद्धकसंमतास्तान्, पठन्ति च 'भवसिद्धीयसंवुडे'ति भवे--तस्मिन्नेव मनुष्यजन्मनि सिद्धिरस्येति भवसिद्धिकः स चासौ संवृतश्चाश्रवनिरोधेन भवसिद्धिकसंवृतः, ज्ञातविशेणमेतत्, अथवा 'पाउकरे'त्ति 'प्रादुरकार्षीत्' प्रकाशितवान्, शेषं पूर्ववत् नवरं 'परिनिर्वृतः' क्रोधादिदहनोपशमतः समन्तात्स्वस्थीभूतः, एतेन "सत्यानृतत्वसंदेहैः, सर्वमेव वचस्त्रिधा" इति प्रसिद्धेस्त्रैविध्यसम्भवेऽपि वचनरूपत्वेनोत्तराध्ययनानां वक्तृदोषहेतुकत्वा- दनृतत्वसन्देहयोर्वक्तृदोषाभावख्यापनेनैकान्तसत्यत्वलक्षणं माहात्म्यमाहेति सूत्रार्थः ॥

~~सर्वोत्तिकेऽप्येतन्माहात्म्यख्यापनायाह~~

अध्ययनं-३६ समाप्तम्

नि. [५६०] जे किर भवसिद्धीया परित्तसंसारिआ य भविआ य।
ते किर पढंति धीरा, छत्तीसं उत्तरज्झयणे ॥

नि. [५६१] जे हुंति अभवसिद्धीया गंठिअसत्ता अनंतसंसारा।
ते संकिलिट्ठकम्मा अभविय उत्तरज्झाए ॥

वृ. 'ये' इत्यनिर्दिष्टनिर्देशे 'किल' इति सम्भावने 'भवसिद्धिकाः' भव्याः परीतः -प्राग्वत् परिमितः स चासौ संसारश्च तद्वन्तः परीतसंसारिकाः 'अत इनिठना'विति मत्वर्थीयष्ठन्, कोऽर्थः ?- तथाभव्यत्वाक्षिप्तप्रत्यासन्नीभूतमुक्तयः 'भव्याः' सम्यग्दर्शनादिगुणयोग्या भिन्नग्रन्थय इति योऽर्थः, उभयत्र 'चः' समुच्चये इति, व्यवच्छेदफलत्वाद्वा वाक्यस्य त एव, 'किल' इति परोक्षाससूचकः, 'पठन्ति' अधीयते धीराः प्राग्वत्, कानि ? इत्याह-'छत्तीसं'ति षट्त्रिंशद् 'उत्तराध्ययनानि' विनयश्रुतादीनि, भवसिद्धिकादीनामेतत्पाठफलस्य सम्यग्ज्ञानादेः सद्भावेन निश्चयतस्तत्पाठसम्भवः, अन्येषां व्यवहारत एवेत्येवमभिधानम् ॥

उक्तमेवार्थं विनेयानुग्रहाय व्यतिरेकत आह-ये भवन्ति 'अभवसिद्धयः' अभव्याः प्राग्वद्वचनव्यत्ययः, ग्रन्थिः-उक्तरूपस्तद्योगाद्ग्रन्थयस्त एव ग्रन्थिकास्ते च ते सत्त्वाश्च ग्रन्थिकसत्त्वाः, अभिन्नग्रन्थय इत्यर्थः, तथाऽनन्ताः- अपर्यवसितः संसार एषामित्यनन्तसंसारा-ये न कदाचिन्मुक्तिसुखमवाप्स्यन्ति अभव्याः "भव्वावि ते अनंते" त्यादिवचनतो भव्या वा ते संक्लिष्टानि-अशुभानि कर्माणि-ज्ञानावरणीयादीनि एषामिति संक्लिष्टकर्माण इत्याह,

'अभव्यत्वे'त्ति सूत्रत्वाद् 'अभव्याः' अयोग्याः 'उत्तरज्झाय'त्ति वचनव्यत्ययादुत्तराध्यायेषूत्तराध्यायविषये ऽध्ययन इति गम्यते, यद्वा उत्तर'त्ति प्रधानपदैकदेशे ऽपि पदसमुदायोपचारादुत्तराध्ययनानि तेषामध्यायः पाठ उत्तराध्यायस्तस्मिन्, तदनेन विशिष्टयोग्यतायामेव तात्त्विकैतदध्ययनसद्भावलक्षणं माहात्म्यमुक्तमिति गाथाद्वयार्थः ॥

गतश्चैवमतिमाहात्म्यवन्त एव उत्तराध्याययास्ततो यद्विधेयं तदाह

नि. [५६२] तम्हा जिनपन्नत्ते अनंतगमपज्जवेहि संजुत्ते ।
अज्झाए जहाजोगं गुरूपसाया अहिज्जिज्जा ॥

वृ. तस्माज्जिनैः-श्रुतजिनादिभिः प्ररूपिताः-प्रज्ञप्तास्तान्, अनन्ताश्च ते गमाश्च-अर्थपरिच्छित्तिप्रकाराः पर्यवाश्चशब्दपर्यवार्थपर्यवरूपा अनन्तगमपर्यवास्तैः, समिति सम्यग् भृशं वा युक्ताः संयुक्तास्तान् 'अध्यायान्' प्रक्रमादुत्तराध्यायान् 'जहाजोगं'ति योग उपधानादिरुचितव्यापारस्तदनतिक्रमेण यथायोगं गुरूणां प्रसादः-चित्तप्रसन्नता गुरुप्रसादस्तस्माद्धेतोः 'अधीयेत्' पठेत्, न त्वेतदध्ययनयोग्यतावासौ प्रमादं कुर्यादिति भावः, गुरुप्रसादादिति चाभिधानमध्ययनार्थिनाऽवश्यं गुरवः प्रसादनीयाः तदधीनत्वात्तस्येति ख्यापनार्थमिति गाथार्थः । 'इति' परिसमाप्तौ, ब्रवीमीति पूर्ववत् । उक्तो ऽनुगमः, सम्प्रति नयाः, तेऽपि प्राग्वदेव ॥

मुनि दीपरत्नसागरेण संशोधिता संपादिता उत्तराध्ययन सूत्रस्य
भद्रबाहुसूरिणाविरचिता निर्युक्तिः (एवं) शान्त्याचार्येणविरचिता टीका परिसमाप्ता

अस्ति विस्तारवानुर्व्यां, गुरुशास्त्रासमन्वितः ।
आसेव्यो भव्यसार्थानां, श्रीकोटिकगणद्रुमः ॥१॥
तदुत्थवैरशाखायामभूदायतिशालिनी ।
विशाला प्रतिशाखेव, श्रीचन्द्रकुलसन्ततिः ॥२॥
तस्यामानच्छदनिचयसदृक्षावर्णान्वयोत्थः,
श्रीधारापद्रगच्छप्रसवभरलसद्धर्मकिञ्जल्कपानात् ।
श्रीशान्त्याचार्यभृङ्गो यदिदमुदगिरद्वाङधु श्रीऋषेयं,
तद्भो भव्याः ! विदोषप्रशमकरमतो गृह्यतां लिह्यतां च ॥३॥

४३ चतुर्थं मूलसूत्रं "उत्तराध्यनानि" समाप्तं